रे॰ खं॰ हस्रं प्रोक्तं तच्छ्रूयते पुरा ॥ ४० ॥ कौर्मं पंचदशं प्राहुर्भागद्वयविभूषितं ॥ दशसप्त सहस्राणि पुरा संक्षेपतः कलौ
२ ॥ ४१ ॥ मात्स्यं मत्स्येन यत्प्रोक्तं मनवे षोडशं क्रमात् ॥ चतुर्दश सहस्रं संख्यया जगतां वर ॥ ४२ ॥ गारुडं सप्तद
शं प्रोक्तं चैकोनविंशति ॥ अष्टादशं तु ब्रह्मांडं भागद्वयविभूषितं ॥ ४३ ॥ तच्च द्वादशसाहस्रं शतद्वयसमन्वितं ॥
तथैवोपपुराणानि यानि चोक्तानि वेधसा ॥ ४४ ॥ इदं ब्रह्मपुराणस्याखिलं सौरमनुत्तमं ॥ संहिताद्वयसंयु
क्तं पुण्यं शिवकथाश्रयं ॥ ४५ ॥ आद्या सनत्कुमारोक्ता द्वितीया सूर्यभाषिता ॥ सनत्कुमारनाम्नापि विख्यातं म
हामुने ॥ ४६ ॥ द्वितीयं नारसिंहीच पुराणे पद्मसंज्ञितं ॥ नंदापुराणं च तथा तृतीयं वैष्णवे मतं ॥ ४७ ॥ चतुर्थं शि
वधर्माख्य पुराणे वायुसंज्ञिते ॥ दौर्वाससं पंचपं च स्मृतं भागवते सदा ॥ ४८ ॥ भविष्ये नारदोक्तं च सूरिभिः क
थितं पुरा ॥ कपिलं मानवं चैव तथैवोशनसेरितं ॥ ४९ ॥ ब्रह्मांडं वारुणं चाथ कालिका ह्वयमेव च ॥ माहेश्वरं त
था शांबं सौरं सर्वार्थसंचयं ॥ ५० ॥ पाराशरं भागवतं कौर्मं चाष्टादशं क्रमात् ॥ एतान्युपपुराणानि मयोक्ता
नि यथाक्रमं ॥ ५१ ॥ पुराणसंहितामेतां यः पठेद्वा शृणोति च ॥ सोनंत पुण्यभागी स्यान्मृतो ब्रह्मपुरं व्रजेत् ॥
॥ ५२ ॥ इति श्री वायुपुराणे रेवाखंडे पुराणसंहिता नाम प्रथमोध्यायः ॥ १ ॥ सूत उवाच ॥ चतुर्थं यन्मया
प्रोक्तं चतुर्थं वायुसंज्ञितं ॥ चतुर्विंशति साहस्रं शिवमाहात्म्यसंयुतं ॥ १ ॥ महिमानं शिवस्याह पूर्वं पारा
शरः पुरा ॥ अपरार्धे तु रेवाया माहात्म्यमतुलं मुने ॥ २ ॥ पुराणोत्तमं प्राहुः पुराणं वायुनोदितं ॥ शिवभक्ति
समायोगाद्भागद्वयविभूषितं ॥ ३ ॥ यस्य श्रवणमात्रेण शिवलोकमवाप्नुयात् ॥ तथा शिवः स्तथा शैवः पु
राणं वायुनोदितं ॥ ४ ॥ नर्मदायास्तु माहात्म्यं तस्मिन्द्वैपायनोब्रवीत् ॥ सप्तषष्टि सहस्राणि तथा सप्तशता
नि च ॥ ५ ॥ सप्तषष्टी तथा कोट्यो लक्षेणापि हि सप्त च ॥ दिवि भुव्यंतरिक्षे च तीर्थानां वायुरब्रवीत् ॥ ६ ॥ त २
न्मध्ये नर्मदातीर्थसमासादिह शौनक ॥ तत्तेहं संप्रवक्ष्यामि यत्त्वया परिपृच्छितं ॥ ७ ॥ विस्तरं नर्मदायास्तु

तीर्थानां मुनिसत्तम ॥ कोन्यः शक्नोति वै वक्तुं ऋते ब्राह्मणमीश्वरं ॥ ८ ॥ एवमेव पुरा प्रश्नं पृष्टं जनमेजयः ॥ वैशंपा 7/2008
यनसंज्ञं तु शिष्यं द्वैपायनस्य ह ॥ ९ ॥ रेवातीर्थाश्रितं पुण्यं तत्ते वक्ष्यामि शौनक ॥ पुरा पारिक्षितो राजा यज्ञदी
क्षापदीक्षितः ॥ १० ॥ संप्रवृत्ते तु हविर्दिव्ये वर्तमानेषु कर्मसु ॥ आसीने पृष्टिशाग्रे पूज्यमाने हुताशने ॥ ११ ॥ वर्त
मानासु सर्वत्र तथा धर्मकथासु च ॥ श्रूयमाने तथा शब्दे वंदे जनेरुक्ते ऽलहर्निशं ॥ १२ ॥ यज्ञकर्मणो कुलपतिदी
यतां भुज्यतामिति ॥ विविधाश्च विनोदान्वै कुर्वाणेषु विनोदिषु ॥ १३ ॥ एवंविधे वर्तमाने यज्ञे स्वर्गसदः समे
वैशंपायनमासीनं पप्रच्छ जनमेजयः ॥ १४ ॥ जनमेजय उ॰ ॥ द्वैपायनप्रसादेन शीनवाल्यं च मेमतः ॥ वैशं
पायन स्माल्लोपृच्छामि ऋषिसंनिधौ ॥ १५ ॥ ब्रूहि मे त्वं पुरावृत्तं पितॄणां तीर्थसेवनं ॥ चिरं नानाविधान्वे शान्त्रा
प्राप्स्य इति मे श्रुतं ॥ १६ ॥ कथं यत जिताः पार्था मम पूर्वपितामहाः ॥ आसमुद्रां क्षितिं विप्र भ्रमंतस्तीर्थलोभ
तः ॥ १७ ॥ केन ते सहिता स्तात संप्राप्ता विंध्यपर्वतं ॥ तत्सर्वं कथयः प्राज्ञ सर्वज्ञोसीति मे मतः ॥ १८ ॥ वैशंपायन
उ॰ ॥ साधु पृष्टं महाराज सोमवंशविवर्धनं ॥ कथयामि यथा पृष्टं त्वया यच्च श्रुतं मया ॥ १९ ॥ नमस्कृत्य सत्रिका
लज्ञमहृद्या संमहामुनिं ॥ भगवंतं तपः प्राप्तं गुरुं गिर्वाणवंदितं ॥ २० ॥ पितामहास्तु ते पंच पांडवाः सह कृ
ष्णया ॥ उषिता मुनिभिः सार्धं काम्यके तु वनोत्तमे ॥ २१ ॥ क्रतुरुद्दालकस्तत्र काश्यपः कुशगालवौ ॥ विभांड
को वटनिधिः भृगुस्तासीतद्दैवतः ॥ २२ ॥ पुलस्त्योदेवल श्चैव धौम्यधौतशिरा मुनिः ॥ जाबालिप्यश्रृंगीकाप्या
स्तथान्ये पुत्रपौत्रिणः ॥ २३ ॥ प्रत्यहं श्रममाणास्ते पांडवैः सह सुव्रताः ॥ स्नाता ह्यनेक तीर्थेषु गतास्ते विंध्य
पर्वतं ॥ २४ ॥ तत्राश्रममथापश्यन्वनानावृक्षविवर्जितं ॥ त्रिविष्टपतरुस्पर्धि समर्द्धिं बहुले भृशं ॥ २५ ॥ स
हकारैश्च रंभाभिर्बिल्वपाटलकेतकैः ॥ कदंबैश्चंदनैर्नीपैः निवजंबीरतिंदुकैः ॥ २६ ॥ नालिकेरकपित्थै
श्च खर्जूरीपनसैस्तथा ॥ नानाद्रुमलताकीर्णं नानावल्लीभिरावृतं ॥ २७ ॥ सुपुष्पितं फलैः कांतं यथा चैत्रर

रे· खं· थंवनं॥जलाशयैस्तु विपुलैः पद्मिनीखंडमंडितं॥२८॥सितैश्च लोहितैः पुष्पैर्नीलपीतैस्तथैव च॥हंसकारंड
२ वाकीर्णं चक्रवाकोपशोभितं॥२९॥हंसादिबककचक्रैश्चरंजमानैश्च षट्पदैः॥सिंहव्याघ्रवराहैश्च गजैश्चै
वमदोत्कटैः॥३०॥महिषैश्च महाकायैर्हरिणैश्चित्रकैस्तथा॥खड्गैश्च गवयैश्चैव ऋक्षगोमायुसंवृतं॥३१॥
शशकैः शल्लकैश्चापि वृतैरन्यैश्चतुष्पदैः॥शोभितं कोकिलानादैर्मनःकांतं सुशोभनं॥३२॥जीवंजीवकसंघु
ष्टं नानापक्षिसमाकुलं॥दुःखशोकविनिर्मुक्तं सर्वलोकमनोरमं॥३३॥क्षुत्पिपासारहितं शुद्धं सर्वव्याधिविव
र्जितं॥सिंहास्तनं पिबंत्यत्र कुरंगा निर्भया नृप॥३४॥मार्जारमूषकौ चापि भावि कत्र समवस्थितौ॥क्रीडंति क
रिणः सिंहैर्शृंगिनस्तु कलापिभिः॥३५॥प्रविश्य कत्रंते सख्यं कुर्वत्यानंदपूरिताः॥एवंविधे वने तस्मिन्प्र
विष्टः पांडुनंदनः॥३६॥साश्चर्यमतुलं पश्यन्नाश्रमं ब्राह्मणैः सह॥मार्कंडं दृष्टवांस्तत्र तरुणादित्यवर्चसं
॥३७॥गुणैर्विषयिकैर्मुक्तं युक्तं बुद्धिगुणैः शुभैः॥रिक्तसासारिकैर्भावैः संपृक्तं परमेष्ठिना॥३८॥उद्दि
ष्टं तपसा राजन्निर्णिक्तं चात्मविद्यया॥ऋषिभिः सेव्यमानं तं नानाशास्त्रविशारदैः॥३९॥कुलीनैः सत्व
संपन्नैः शौचाचारसमन्वितैः॥ह्रीमद्भिश्च समोपेतैस्त्रिसंध्यं जपतत्परैः॥४०॥ऋग्यजुःसामविहितैर्मं
त्रैर्होमपरायणैः॥केचित्संचाग्निमध्यस्थाः केचिद्देकांतसंश्रिताः॥४१॥कुड्मलकराः केचिच्छीर्णपर्णा
शनैस्तथा॥अपरे नियताहारा वायुभक्षाबुभोजनाः॥४२॥एवंभूतैस्तपोवृद्धैः सेव्यमानं महामुनिं॥दृ
ष्ट्वा धर्मसुतः श्रीमानृषिसंघैः समावृतः॥४३॥श्रुद्धं मुनिवरं शांतं ध्यायमानं परं पदं॥तस्य पादतलं
प्राप्य दंडवत्पतितो यथा॥४४॥भक्त्या प्रणम्य तं दृष्ट्वा चिरादायतलोचनं॥कोभवानिति पृष्टश्चैनं राजानं ध
र्मवत्सलं॥४५॥तस्य तद्वचनं श्रुत्वा दारुको मुनिसत्तमः॥आचचक्षे तथा सर्वं मार्कंडेयाय धीमते २
॥४६॥युधिष्ठिरोयं नृपतिः संप्राप्तस्तव संनिधौ॥कौरवः पांडुतनयः सोमवंशविवर्धनः॥४७॥यतेनि

9/2008

र्जितो राज्याच्च भ्रातृभिर्वनमागतः॥तच्छ्रुत्वा वचनं तस्य मार्कंडेयो महातपाः॥४८॥एहीति भगवांस्तत्र समा
लिंग्य नृपोत्तमं॥महर्षिस्निग्धहृद्युपाघ्राय शासने उपवेश्यतां॥४९॥आसीनास्याथ नृपतेः पूजां चक्रे महामुनिः
वन्यैर्मूलफलैर्मान्यैरसैश्चापि विधिपूर्वकं॥५०॥पाद्यवान्ब्राह्मणांश्चैव यथायोग्यमपूजयेत्॥५१॥इति
श्रीवायुपुराणे रेवामहात्म्ये द्वितीयोध्यायः॥२॥वैशंपायन उ०॥मुहूर्तं चैव विश्राम्य धर्मपुत्रो युधिष्ठिरः
॥अन्योन्यकुशलं वृत्तं मुनीनामपि वा सत्कृत्॥१॥स्वस्थासीनेषु सर्वेषु मार्कंडेये च सादरं॥पप्रच्छ नृपतिः
श्रेष्ठः कौतूहलसमन्वितः॥२॥युधिष्ठिर उ०॥भगवन्सर्वलोकानां दीर्घायुस्त्वं मतो मम॥सप्तकल्पाणशेष
णकथयस्व प्रसादतः॥३॥कल्पक्षये विलोकस्य स्थावरस्य चरस्य च॥न विनष्टोसि विप्रेंद्र कथं मे कोपुगस्त
ये॥४॥गंगाद्याः सरितः सर्वाः सप्त समुद्राश्च याः शुभाः॥तासां मध्ये स्थिताः काश्चित्कांश्चिन्न प्रलयं गताः॥५॥ए
तत्कथय मे तात प्रसंनेनांतरात्मना॥कथा मे द्भुततामर्वे देवा देवी युगक्षये॥६॥श्रोतुमिच्छामि विप्रेंद्र
ऋषिभिः सह बांधवैः॥मार्कंडेय उवा०॥साधु पृष्टं महाप्राज्ञ धर्मपुत्र युधिष्ठिर॥७॥कथयामि यथान्यायं
त्वं यत्पृच्छसि मामिव॥सर्वपापहरं पुण्यं पुराणं रुद्रभाषितं॥८॥रुद्राच्च लोकपालो यं वायुराचाय सर्व
शः॥श्रावयामास वै देवीन्मुनीन्राजर्षिसत्तमान्॥९॥ऋषिवृंदे समासीनैः श्रुतं मे तत्र भारत॥यः श्रृ
णोति नरो भक्त्या तस्य पुण्यफलं शृणु॥१०॥अश्वमेधसहस्रेण वाजपेयशतेन च॥यत्फलं समवाप्नोति
तदस्य श्रवणान्नरः॥११॥ब्रह्मघ्नश्च सुरापी च स्तेयो गोघ्नश्च यो नरः॥पुराणमेतदाकर्ण्य मुच्यंते सर्व
पातकैः॥१२॥जान्हवी जारितोंश्चिछातथा चैव सरस्वती॥कावेरी देविका भद्रा सिंधुशालकुटी तथा॥१३
सरयूः शतरुद्रा च चंद्रभागेश्वरी तथा॥गोदावरी महेंद्रेच पयोष्णी यमुना नदी॥१४॥शीप्रा शतद्रु वेदभी
तथा च र्मण्वती इरा॥एताश्चान्याः सरिच्छ्रेष्ठाः सर्वपापहराः शुभाः॥१५॥किंतु ते कारणं तात वक्ष्यामि नृप

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

सत्तमः॥ समुद्राः सरितश्चैव कल्पे कल्पे क्षयं गताः॥१६॥ सदा कल्पक्षये क्षीणा न मृता तात नर्मदा॥ एषा देवी
मया दृष्टा तत्तां वक्ष्यामि तेनघ॥१७॥ आश्चर्यभूता राजेंद्र त्रिषु लोकेषु विश्रुता॥१८॥ इति श्रीरेवामहात्म्ये तृ
तीयोध्यायः॥३॥ युधिष्ठिर उवाच॥ सप्तकल्पक्षया घोरास्त्वया दृष्टा महामुने॥ न चान्यो दृश्यते त्वत्तो दीर्घायुरि
ह कश्चन॥१॥ त्वया ह्येकार्णवे सुप्तः पद्मनाभः सुरारिहा॥ दृष्टः सहस्रचरणः सहस्रनयनो हरिः॥२॥ त्वं किलानु
ग्रहात्तस्य दह्यमाने चराचरे॥ न क्षयं समनुप्राप्तो वरदानान्महात्मनः॥३॥ किं त्वयाश्चर्यभूतं च दृष्टं च भ्रम
तानघ॥ एतदाचक्ष्व भगवन् परं कौतूहलं हि मे॥४॥ संप्राप्ते तु महाघोरे युगस्यांते महाक्षये॥ अनावृष्टि
हते लोके पुरा वर्षशताधिके॥५॥ ओषधीनां क्षये प्राप्ते देवदानववर्जिते॥ निर्वषट्के निर्वषट्कारे कलिनाद्
षितिभूतं॥६॥ सरित्सरस्तडागेषु पल्वलोपवनेषु च॥ संशुष्केषु तदा ब्रह्मन्निराकारे युगक्षये॥७॥ जातेम
हार्णवे घोरे निर्ब्रह्मक्षत्रविड्जने॥ ऋषयश्च महात्मानो दिव्यतेजः समन्विताः॥८॥ स्थितानि कानि भूता
नि गतानि च महामुने॥ क्षयमेतं महाभाग कथयस्व प्रसादतः॥९॥ क्षयांते ते च विप्रेंद्र कथं सिद्धिमुपाग
मत् ब्रह्मविच्छिवं द्रुद्रा घाकल्पोप्रासि महामुने॥१०॥ एवं पृष्टस्ततस्तेन धर्मराजेन धीमता॥ मार्कंडस्त्वस
वाचेदं ऋषिसंघसमावृताः॥११॥ मार्कंडेय उ०॥ शृण्वंतु ऋषयः सर्वे त्वया सह नराधिप॥ महत्पुराणं पूर्वो
क्तं शंभुना वायुदैवते॥१२॥ वायोः सकाशान्न स्कंदेनैश्च तमेतत्पुरातनं॥ वसिष्ठः श्रुतवांस्तस्मान्मुनिः पा
राशरः स्ततः॥१३॥ तस्माच्च जातुकर्ण्येन तस्मादपि महर्षिभिः॥ एवं परंपराप्रोक्तं शतसंख्यैर्द्विजोत्तमैः
॥१४॥ संहिता शतसाहस्री पुरोक्ता शंभुना किल॥ आलोड्य सर्वशास्त्राणि वेदार्थं तत्त्वतः पुरा॥१५॥ यु
गरूपेण सा पश्चाच्चतुर्धा विनियोजिता॥ तत्सत्ज्ञानुसारेण नराणां तु महर्षिभिः॥१६॥ आराध्य पशु ४
भर्तारं मया पूर्वं महेश्वरं॥ पुराणं यच्छ्रुतं तात तत्ते वक्ष्याम्यशेषतः॥ यच्छ्रुत्वा मुच्यते जंतुर्नाना पापैर्न

रेश्वर॥ मनोवाक्कर्मजैश्चैव सप्तजन्मसुसंचितैः॥१८॥ सप्तकल्पक्षया घोरा मया दृष्टा पुनः पुनः॥ प्रसादाद्देव
देवस्य शूलिनः परमेष्ठिनः॥१९॥ द्वादशादित्यनिर्दग्धे जलशाःप्लाविते तदा॥ भ्रांतोहं वि दुःश्रमं स्तत्र तरन्बाहु
भिरर्णवं॥२०॥ अथाहं सलिलांतेतु आदित्यः सममरूपिणं॥ पुराणपुरुषं राजन्नन्द्राक्षं परमाद्भुतं॥२१॥ शृं
गाग्रे गिरिराजस्य भासयंतं दिशो दिशः॥ द्वितीयोन्यो मनुर्दृष्टः किंचिद्भयसमन्वितः॥२२॥ आगच्छ नृपते सो
पितमोभूत महार्णवे॥ अविश्रमं मुहूर्त्तं तु चक्रा गुणरवानघ॥२३॥ अत्राहं भयसंत्रस्तस्तरन्बाहुभिर
र्णवं॥ तत्रसाश्चमहामत्स्यमपश्यं पदसंयुतं॥२४॥ ततोहं त्वरयागत्वा तन्मुखो नृपसत्तम॥ सुश्रांतो वि
गतज्ञानः परं निर्वेदमागतः॥२५॥ ततो ब्रवीत्स मां दृष्ट्वा एह्येहीति च भारत॥ परः प्रधानः सर्वेषां मत्स्य
रूपो महेश्वरः॥२६॥ अथाद्राक्ष्यं समुद्रांते महदावर्तितकुलं॥ उद्यत्तरंगसलिलां फेनपुंजाट्टहासिनीं
॥२७॥ नदीं कामगमां पुण्यां नक्रमीनसमाकुलां॥ ततस्तस्यास्तु मध्यस्थां कामदां कामरूपिणीं॥२८
नीलोत्पलदलश्यामां महद्दक्षीमवाहिनीं॥ दिव्यहाटकचित्रांगीं कर्णकुंडलशोभितां॥२९॥ स्वभावशा
न्त्या संगृह्य महापातेव्यवस्थिता॥ तामनुः प्रकृत्वा चेदं कात्वं दिव्या वरानने॥३०॥ तिष्ठसे न कायथा वद
त्वं सुरसुंदरी॥ सुरासुरेणे नष्टे नष्टे स्थावरजंगमे॥३१॥ अविनष्टा कथं देवी भ्रमसे लोलयार्णवे॥ सार
तः सागराः शैला क्षयं यातास्यनेकशः॥३२॥ त्वमेका नु कथं देवी तिष्ठसे कारणं महत्॥ श्रोतुमिच्छाम्य
हं सर्वं कथयस्व प्रसादतः॥३३॥ अबला उवा०॥ ईश्वरांगात्समुद्भूता अमृताना म विश्रुता॥ सरित्पाप
हरा विश्वममाश्रित भयं कुतः॥३४॥ साहं पोतमिमं तुभ्यं गृहीत्वा स्वागता द्विज॥ तत्रेदं पोतसंस्थानं य
त्रतिष्ठति शंकरः॥३५॥ मार्कंडेय उ०॥ तस्य तद्वचनं श्रुत्वा विस्मयोत्फुल्ललोचनः॥ मनुना सह राजेंद्र
सर्वसत्वाभयप्रदं॥३६॥ सद्योजाताय देवाय देवदेवाय वै नमः॥ भवाभवनमस्तुभ्यं भक्तिभावितमा

11/2008

रे. खं. ५

नसः॥३७॥भूर्भुवाय नमस्तुभ्यमंत्रमंत्राय वर्णाभवि॥नमोस्त्वघोररूपाय वामज्येष्ठाय वै नमः॥३८॥ नमस्तेभ
द्रकालाय कलिरूपाय ते नमः॥तमानस्तुरूपिणानं रूपायांधकनाशिने॥३९॥अचिंत्यायाव्यक्तरूपाय महा
देवाय ते नमः॥जगत्सृष्टिविनाशाय कारणाय नमो नमः॥४०॥एवं स्तुतो महादेवः पूर्वं दृष्ट्वा मयानघ
॥प्रसन्नो ह्यब्रवीत्सर्वं ब्राह्वरं वरय मामिति॥४१॥इतिश्रीरेवाखंडे चतुर्थोध्यायः॥४॥मार्कंडेय उ०॥ततो
र्णवात्समुत्तीर्णः स्त्रिकूटशिखरे स्थितः॥महाकनकवर्णाभे नानारत्नोपशोभिते॥१॥महासने सुखा
सीनं रुद्रकोटिसमावृतं॥महादेवं महात्मानमीशानमजमव्ययं॥२॥सर्वभूतमयं तात मनुना सह सु
व्रत॥भक्तोऽवंदं देवरणौ सर्वदेवनमस्कृतौ॥३॥तत्र स्थो युगसाहस्रं सहरुद्रेण मानद॥तस्मिन्नेकार्ण
वे घोरे स्थितोहं कुरुनंदन॥४॥युधिष्ठिर उ०॥एतत्स्थितस्तु मे तात परं कौतूहलं हृदि॥ज्ञातं तत्कथ्यय
स्वेति श्रृण्वतः सह बांधवैः॥५॥कासा पद्मपलाशाक्षी नमो भाति महार्णवे॥ब्रुवाणरुद्रं ते से कात्रमेति
योगिनी यथा॥६॥मार्कंडेय उ०॥इममेव मया प्रश्नं पुरा पृष्टो मनुः स्वयं॥तमेव तुभ्यं वक्ष्यामि अवला
यास्समुद्भवं॥७॥व्यतीतायां निशायां तु ब्रह्मणः परमेष्ठिनः॥प्रभाते विमले जाते सृज्यमानेषु जंतुषु॥८॥
मनुः प्रणम्य शिरसा पृष्टवान्येन युधिष्ठिरः॥कैयं हि पद्मपत्राक्षी श्यामा चंद्रनिभानना॥९॥एकार्णवेऽभ्रमः
से का वदती रुद्रेतिह॥वेदमाता नु सावित्री किं वा ब्राह्मी सरस्वती॥१०॥उभा वा शाश्वती देवी लक्ष्मी मंदा
किनी नु वा॥कालरात्रिः स्थिता वा सा प्रकृतिर्वा सुखोचिता॥११॥एतदाचक्ष्व भगवान्यासात्समतसंभ
वा॥भ्रमसे कार्णवे घोरे नष्टे स्थावरजंगमे॥१२॥मनुरु०॥शृणु विप्र यथादृष्टमस्या वक्ष्यामि संभवं
॥यथा रुद्रात्समुद्भूता या च यं वरवर्णिनी॥१३॥पुरा शिवः शांततनुश्चचार विपुलं तपः॥हितार्थं सर्वलोका
नामुमया सह शंकरः॥१४॥ऋक्षशैलं समारुह्य तपो तप्यत्सुदारुणं॥अदृश्यः सर्वभूतानां सर्वभूतात्मः

कोविदः॥१५॥तप्यतस्तस्य देहाच्च स्वेदः समभवत्किल॥स गिरिं प्लावयामास सोऽस्वेदो रुद्रांगसंभवः॥१६॥त
स्य स्वेदात्समुद्भूता महापुण्या सरिद्वरा॥या लये कार्णवे दृष्टा पद्मपत्रायतेक्षणा॥१७॥स्त्रीरूपसा समासा
द्य रुद्रस्याराधने रता॥आद्ये कृतयुगे तस्मिन्समानामयुते द्विजः॥१८॥ततस्तुष्टो महादेव उमया सह शंकरः
॥उवाच तां महाभागे ब्रूहि यत्ते भिवांछितं॥१९॥सरिद्वा॥प्रलये समनुप्राप्ते नष्टे स्थावरजंगमे॥प्रसादा
त्तव देवेश अक्षया वै भवाम्यहं॥२०॥सरित्सागरसंघाते क्षयं याते चराचरे॥पुण्या तव प्रसादेन यथा स्या
भवाम्यहं॥२१॥येन रापातकैर्युक्ता महापातकनिश्चये॥मुच्यतां पातकैर्घोरैस्तथा स्नाता मयि प्रभो॥
॥२२॥उत्तरे जाह्नवी देवी यथा पापप्रणाशिनी॥भवानी दक्षिणे देवी तथा हं सुरपूजिता॥२३॥स्वर्गादागस
गंगेति मया स्नाति गता विभो॥तथा दक्षिणगंगेति भवामि त्रिदशेश्वरः॥२४॥पृथिव्यां सर्वतीर्थेषु स्नात्वा
यल्लभंते फलं॥तत्फलं लभते मर्त्यो मयि स्नातो महेश्वरः॥२५॥ब्रह्महत्यादिकं पापं मनुजैः संचितं कचि
त॥मासमात्रेण तद्देव क्षयं प्राप्त वगाहनात्॥२६॥सर्वदानोपवासश्च सर्वतीर्थावगाहने॥यत्फलं
लभते मर्त्यः तदस्तु मम दर्शनात्॥२७॥मम तीरेनाराधितुं पूजयामि महेश्वरं॥तेविभुं परमं शांतं ते यो
तु परमं पदं॥२८॥मम कूले महेशान उमया सहितः प्रभो॥वसेति संजगन्नाथ एष एव वरोऽस्तु मे॥२९॥म
मतोयेन संस्पृष्टा पाषाणा मम तीरजा॥विष्णा शिवभावं ते यच्छं तु नर वांछितं॥३०॥सुकर्मा वा विकर्मा वा
शांतो दांतो जितेंद्रियः॥मृतो मम जले स्पृष्टो जित्मोर्वा स्याच्छिवातिथिः॥३१॥त्रिषु लोकेषु विख्याता सर्वः
पापप्रणाशिनी॥भवामि देवदेवेश त्वत्प्रसादात्तथा कुरु॥३२॥एताश्चान्यांश्च रानृ दिव्यान्प्रार्थितां स्तुत्व
संभवान्॥यान्यान्युक्ता न्वदा स्थिता त्तन्मे वंदे हमेश्वर॥३३॥एवं नियमयुक्ता या प्रार्थयंसान्त्पो त्तम॥श्रुत्वा
देवो नर्मदायाः प्रसन्नो वाक्यमब्रवीत॥३४॥महेश्वर उ०॥३५॥एवं भवतु कल्याणी यथोक्तमभिनिंदिते॥ना

13/2008

न्योवराहो लोकेस्मिन्मुक्ता सांबरवर्जिनी ॥ ३५ ॥ यदेवमम देहात्त्वं समुद्भूता वरानने ॥ तदेव सर्वपापानां मोचनी त्वं
नसंशयः ॥ ३६ ॥ कल्पक्षयकरे काले कृत्तोपीरीव कोषतः ॥ दक्षिणं कूलमासाद्य येद्विजा धर्मवत्सलाः ॥ ३७ ॥ आजन्म
निवसिष्यंति पितृलोकनिवासिनः ॥ उत्तरं कूलमासाद्य निवसिष्यंति ये नराः ॥ ३८ ॥ अपि कीटपतंगाद्या वृक्ष
गुल्मलतादयः ॥ त्वत्तापपवनाद्वीतेर्वियास्यंति मत्कृतिं ॥ ३९ ॥ अहं तु तव वाक्येन कस्मिंश्चित्कारणांतरं ॥ वसि
ष्यामि सदा देवी स्वयं तव तटाश्रितः ॥ ४० ॥ ब्रह्मेंद्रचंद्रवरुणाः सिद्धाश्च सह विष्णुना ॥ उत्तरे देवि ते कूले वसिष्यंति
ममाज्ञया ॥ ४१ ॥ दक्षिणे पितृभिः सार्धं तथान्ये सुरसुंदरि ॥ वसिष्यंति मया सार्धं दत्त एष वरो तम ॥ ४२ ॥ क
ल्याणं कुरु लोकानां मम शुभं नाशय स्व च ॥ गच्छ विंध्यमाद्यभागे मत्सान्या पाद्यिमो च य ॥ ४३ ॥ सहिता ऋषिसं
घस्त्वं तथा सिद्धसुरासुरैः ॥ मार्कंडेय उ॰ ॥ एवमुक्ता महादेव रुम या सहितो विभुः ॥ ४४ ॥ वंद्यमानोथ मनुनात
यात्रा दर्शनं गतः ॥ तेनैषा शुभमहापुण्या सर्वपापप्रणाशिनी ॥ ४५ ॥ यात्पृष्टा भगवं तात मातेभव तु विस्मय ॥ ए
षा गंगा महत्पुण्या त्रिषु लोकेषु विश्रुता ॥ ४६ ॥ श्रोताभिः पंचदशभिः पावयंती दिशो दश ॥ शृणु तामि महाभा
गवक्ष्यामि ऋषिसत्तम ॥ ४७ ॥ शोणो मम नदश्चैव नर्मदा सुरसा कृपा ॥ मंदाकिनी महापुण्या त्रिकूटा विमला
तथा ॥ ४८ ॥ चित्रोत्पला विपापा च रंजना लुप्तवाहिनी ॥ महार्णवा विपाशा चरेवा च करभा तथा ॥ ४९ ॥ ऋष्यपा
दप्रसूताया सर्वा वै रुद्रसंभवाः ॥ सर्वपापहरा पुण्याः सर्वमंगलदा शिवा ॥ ५० ॥ इत्येतैर्नामभिर्दिव्यैः श्रूय
ते वेदपारगैः ॥ पुराणज्ञैर्महाभागे राज्यपैः सोमपैस्तथा ॥ ५१ ॥ इत्येतत्सर्वमाख्यातं महाभाग्यं तपोत्तमा
नतु नो क्तं पुरा मह्यं मत्ता याः समुद्भवाः ॥ ५२ ॥ पुण्यं पवित्रमतुलं रुद्रोद्गीतामिदं शुभं ॥ ये नराः कीर्त
यत्यत्र भक्त्या शृण्वति चैव ये ॥ ५३ ॥ प्राप्नुवंत्याय नाम्ना हि कलापंदशापंचकं ॥ ते नरा सलिलं पुण्यं ल ५
क्ष्यं ते सवगाहजं ॥ ५४ ॥ विमानेनार्कवर्णेन घंटाशत निनादिना ॥ त्यक्त्वा मनुष्यकं भावं ते यास्यंति परां

15
2008

गतिं ॥ ५५ ॥ इति श्रीरेवामहात्म्ये पंचमोध्यायः ॥ ५ ॥ युधिष्ठिर उवाच ॥ आश्चर्यमेतदतुलं कथितं मे द्विजोत्तम ॥ भूयो
न्यत्श्रोतुमिच्छामि परं कौतूहलं हि मे ॥ १ ॥ महाभाग्यमिदं श्रुत्वा नर्मदायाः समुद्भवं ॥ परं विस्मयमापन्ना ऋषिसंघा
मया सह ॥ २ ॥ अहो भगवतो पुण्या नर्मदेयमयोनिजा ॥ रुद्रदेहाद्विनिष्क्रांता महापापक्षयंकरी ॥ ३ ॥ सप्तकल्पक्ष
ये प्राप्ते लयं ये सह सुव्रतं ॥ न मृता च महाभागा किमतः पुण्यमुत्तमं ॥ ४ ॥ के ते कल्पाः समुद्दिष्टाः सप्तलोकक्ष
यंकराः ॥ न मृता येषु यद्देवी त्वं चापि ऋषिसत्तम ॥ ५ ॥ अपक्षिगणसंपाते जगत्येकार्णवीकृते ॥ कीदृक्रूपः सम
भवन्महादेवो युगक्षये ॥ ६ ॥ कथं संहरते विश्वं कथमास्ते महार्णवे ॥ कथं च सृजते विश्वं कथं धारयते प्रजा ॥
॥ ७ ॥ कीदृक्रूपा भवेद्देवी जगत्येकार्णवीकृते ॥ किमर्थं नर्मदा प्रोक्ता रेवेति च कथं तु सा ॥ ८ ॥ त्रिकूटा च क
थं देवी किमर्थं वालुवाहिनी ॥ कोटितीर्थसमायुक्ता प्रविष्टा या महार्णवं ॥ ९ ॥ कियत्सः सरितास्तात नर्मदां समु
पासते ॥ यज्ञोपवीतैर्ऋषिभिर्देवताभिस्तथैव च ॥ १० ॥ विभक्तेयं किमर्थं च श्रूयते मुनिसत्तम ॥ त्रिधामीति
च पुराणज्ञैः किमर्थं प्रोच्यते नघ ॥ ११ ॥ तेषु स्थानेषु तीर्थेषु पूजनीया सहिद्वरा ॥ तीर्थानि च पृथक्त्रूहि ये
षु संनिहितो हरः ॥ १२ ॥ किंप्रमाणा च सा देवी या रुद्रेण विनिर्मिता ॥ कीदृशानि च कर्माणि रुद्रेण कथितानि च
॥ १३ ॥ कथं म्लेच्छसमाकीर्णे देशोयं द्विजसत्तम ॥ पुण्यः पुण्यतमो यत्र ईश्वरानुग्रहेण वा ॥ १४ ॥ ज्ञानदृष्ट्या च रि
तं मन्ये यथा वदनिरूपितं ॥ इतिहासपुराणोक्तमिमं सर्वं ब्रुवीहि मे ॥ १५ ॥ मार्कंडेय उ॰ ॥ शृण्वंतु ऋषयः सर्वे
त्वं च तात युधिष्ठिर ॥ पुराणं नर्मदायास्तु कथितं यात्रिशूलिना ॥ १६ ॥ वायोः सकाशात्तु मया तेनापि च महे
श्वरात् ॥ अल्पायुषां मनुष्याणां संक्षिप्तमृषिभिः पुरा ॥ १७ ॥ कल्पनामानि वक्ष्यामि शृणु राजन्यथातथं ॥ मायु
रं प्रथमं कल्पं कौर्मं च तदनंतरं ॥ १८ ॥ तथापरं कौशिकं तु मात्स्यं द्विरदमेव च ॥ वाराहं यन्मया पृष्टं वैष्णवं
चाष्टमं परं ॥ १९ ॥ न्यग्रोधाख्यमतश्चासि दीक्षितं तदनंतरं ॥ पाद्मं च तामसं चैव संवर्तोद्वर्तमेव च ॥ २० ॥

महाप्रलयमित्याहुः पुराणवेदचिंतकाः ॥ एवं संक्षेपतः सर्वं संक्षिप्तं तैर्महात्मभिः ॥ २१ ॥ विभक्तं च चतुर्भागे ब्रह्माद्यैश्च
महर्षिभिः ॥ तदहं संप्रवक्ष्यामि पुराणार्थविशारद ॥ २२ ॥ सप्तकल्पा महाघोरा अनुभूता हि मे मया ॥ महाभागा महा
पुण्या येऽस्यां न मृता सरित् ॥ २३ ॥ जगदेतन्न मोऽभूत्तमप्रज्ञातमलक्षणं ॥ नष्टचंद्रार्ककिरणमासीद्भूतविवर्जितं ॥
॥ २४ ॥ न मसोऽजो महासीवै पुरुषश्च जगद्गुरुः ॥ चराचरेऽस्मिन्नेकाकी व्यक्ताव्यक्तः सनातनः ॥ २५ ॥ सर्वोंकारमयो
तीतो गायत्रीमसृजत्प्रभुः ॥ स तथा सार्धमीशानश्चिक्रीडे पुरुषो विराट् ॥ २६ ॥ स्वदेहादसृजद्विश्वं पंचभूतात्मसं
स्थितं ॥ क्रीडंस्ताप्यसृजद्बीजं हिरण्मयमथ प्रभुः ॥ २७ ॥ तच्चांडमभवद्दिव्यं द्वादशादित्यसप्रभं ॥ तद्भित्त्वा पुरुषो
यज्ञे चतुर्वक्त्रः पितामहः ॥ २८ ॥ सोऽसृजद्विश्वमेव तु सदेवासुरमानवः ॥ सतिर्यक्पशुपक्षीकसस्वेदांडजरायु
जं ॥ २९ ॥ एतदंडं पुराणेषु प्रथमं परिकीर्त्यते ॥ पुराकल्पे नृपश्रेष्ठ क्रीडतः परमेष्ठिनः ॥ ३० ॥ उमायुक्तस्य रु
द्रस्य जगत्येकार्णवीकृते ॥ हर्षाज्जज्ञे पुरा कन्या उमारुद्रांगसंभवा ॥ ३१ ॥ सर्वस्योरस्थलतटात् उमादेहवि
मर्दनात् ॥ स्वेदाज्जज्ञे महादेवी कन्या राजीवलोचना ॥ ३२ ॥ द्वितीयः संभवोऽस्यास्तु रुद्रदेहाद्युधिष्ठिर ॥ सापरि
भ्रमति लोकान् सदेवासुरमानुषान् ॥ ३३ ॥ त्रैलोक्योन्मादजननी रूपेणाप्रतिमा तदा ॥ तां दृष्ट्वा देवदैत्यें
द्रा मोहिनी लुब्धमानसाः ॥ ३४ ॥ प्रार्थयंति स्म तां कन्यामितश्चेतश्च धावतीं ॥ हावभावविलासैस्तु मोहयं
ती चराचरं ॥ ३५ ॥ भ्रमंती दिव्यरूपा सा विद्युत्सौदामिनी तथा ॥ मेघमध्ये स्थिता भाति यथा सा कन्यकप्रभा
॥ ३६ ॥ ततो रुद्रं सुराः सर्वे दैत्याश्च सह दानवैः ॥ वव्रुयंति स्म च तां कन्यां कामेनाकुलितांतराः ॥ ३७ ॥ ततोऽब्रवीत्
महादेवो देवदानवयोर्द्वयोः ॥ बलेन तेजसा चैव अधिको यो भविष्यति ॥ ३८ ॥ स इमां प्राप्स्यसे कन्यां नान्यथैव
वसुरोत्तमाः ॥ ततो देवाः सुराः सर्वे तां कन्यां वव्रुरुद्यताः ॥ ३९ ॥ अहमेतां ग्रहीष्यामि न त्वं सह मया ब्रुवन् ॥ ता
वतापत्रय तां तेषां सा कन्यांतरधीयत ॥ ४० ॥ पुनः पश्यंति तां सर्वे योजनांतरसंस्थितां ॥ जग्मुस्ते त्वरिता सर्वे य

17
2008

त्रास्मा समदृश्यते ॥ ४१ ॥ त्रिभिश्च चतुर्भिश्च तथा योजनैर्दृश्यते पुनः ॥ कचिद्दूरं समीपे च ते पश्यंति मत्ते स्त्रगं ॥ ४२ ॥ यो
जनानां शतैर्भूयः सहस्रैश्च युधिष्ठिर ॥ तथा शतसहस्रैश्च लघुत्वात्सा प्रदृश्यते ॥ ४३ ॥ कचिदग्रे कचित्पृष्ठे दिशा
सु विदिशासु च ॥ तां पश्यंति वरारोहामेकधा बहुधा पुनः ॥ ४४ ॥ दिव्यं वर्षसहस्रं तु भ्रामितास्तेन या पुनः ॥ न चाविस्मा
स्तु सा कन्या रुद्रदेहसमुद्भवा ॥ ४५ ॥ अहो माया महादेवो जहासोच्चैः पुनः पुनः ॥ गणास्तेतालसंपातैर्नृत्यंति च मुदा
न्विता ॥ ४६ ॥ अकस्माद्दृश्यते कन्या शंकरस्य समीपगा ॥ दृष्ट्वा विस्मयमापन्ना देवा यातु पराङ्मुखाः ॥ ४७ ॥ तस्यां
श्वकृतं तोनाम नर्मदेति पिनाकधृक् ॥ भविष्यसि वरारोहे सरिच्छ्रेष्ठा तु नर्मदा ॥ ४८ ॥ स्वरूपा वस्थितो देव प्राप
हास्यं यतो भुवि ॥ नर्मदां तेन नाम्नेयं सुशीतलजला शिवा ॥ ४९ ॥ कल्पकल्पक्षये क्षीणायदुक्तं शंभुना पुरा ॥ नम्र
तायन तेनासावमृता ख्यातिमागता ॥ ५० ॥ ततस्तामददात्कन्यां शीलरूपगुणान्वितां ॥ महार्णवाय पतनाय सर्व
भूतपतिः प्रभुः ॥ ५१ ॥ ततः सा लक्षचेलयां फेनपुंजाट्टहासिनी ॥ विवेश नर्मदा देवी समुद्रं सरितां पतिं ॥ ५२ ॥ एवं
शाखे पुराकल्पे नर्मदा भवदीश्वरात् ॥ मायैव तु यथा दृष्टा मया पूर्वं तथा शृणु ॥ ५३ ॥ इति श्रीनर्मदाखंडे कल्पस
मुद्भवो नाम षष्ठोऽध्यायः ॥ ६ ॥ मार्कंडेय उवाच ॥ पुनर्युगांते संप्राप्ते तस्मिन्नृपसत्तम ॥ द्वादशार्कैस्तनुर्भूत्वा भग
वान्नीललोहितः ॥ १ ॥ सप्तद्वीपसमुद्रांतां सशैलवनकाननां ॥ दग्ध्वा वसुमतीं कृत्स्नां कालो भूत्वा महेश्वरः ॥ २ ॥
ततो महाघनो भूत्वा प्लावयामास वारिणा ॥ अतिकृष्णं नु देवो विद्युदिंद्रायुधांकितः ॥ ३ ॥ प्लावयित्वा जगत्स
र्वं तस्मिन्नेकार्णवीकृते ॥ सुष्वाप विमले तोये संक्षिप्य जगदात्मनि ॥ ४ ॥ ततोऽहं विभ्रमंस्तत्र तमोभूते महार्णवे
दिव्यं वर्षसहस्रं तु वायुभूतो महेश्वरं ॥ ५ ॥ आलोक्य देवदेवेशं येन ह गर्हनीकृतं ॥ ध्यायमानस्ततो देवं राजं
द्र विमले जले ॥ ६ ॥ तस्मिन्नेकार्णवे घोरे नष्टस्थावरजंगमे ॥ मयूरं स्वर्णपक्षाग्रं अपश्यं सरसाजले ॥ ७ ॥ वि
चित्रचंद्रकोपेतं नीलकंठं सुलोचनं ॥ ततो मयूरः समहार्णवांते विक्षोभयन्वारि महाजवेन ॥ ८ ॥ चचार देवः

रे॰ खं॰ ध्यस्व महाभूतन मोस्तु ते॥५॥ तवोदरे जगत्सर्वं तिष्ठते परमेश्वर॥ तद्दृष्टं च मया सत्यं परं सर्वं संहृतं त्वया॥६॥ अनी
९ ताराजनी ब्राह्मी दिव्यं समनुवर्तते॥ निरीक्षस्व त्रिलोकेशा तेन संभवते जगत्॥ संनिशाम्य वचस्तस्या विश्वरूपः परमे
श्वरः॥ तस्मिन्नेकार्णवे घोरे नदीनदविवर्जिते॥८॥ नानातरंगनिनदा मानवौघैः सुसंकुला॥ हंससारससंघुष्टा
मत्स्यकूर्मैः समाकुला॥९॥ दिव्यमायामयी देवी तप्तजांबूनदप्रभा॥ नदीमपश्यद्देवेशो मनोपम्यकलाश्रयां
॥१०॥ तस्या मध्ये बृहद्रूपा मां हारकेयूरमंडिता॥ ददर्श नर्मदां देवीं स्वयं स्त्रीरूपधारिणीं॥११॥ योगमायामयं
श्विनेर्भूषणैस्त्वा विभूषिता॥ सर्वकामगी महाभागा मपश्यत्स तु नर्मदां॥१२॥ अंघीघनभुजां बालां पद्मपत्रायते
क्षणां॥ स्तुवंती देवदेवेशं मुष्ठिता तु जलात्तदा॥१३॥ तां तां तत्र स तां देवीं पुरतः संस्थितां शुभां॥ स्नात्वा शंभुर्मे जले
तस्याः प्रभुतोस्तोतु सुभ्रमया॥१४॥ अर्चयामास संहृष्टो मंत्रैर्वेदागमसंभवैः॥ तस्या जले हृदमध्ये च ततः स्नात्वा
नृपोत्तम॥१५॥ देवं सदृष्टरां तां तु भक्तियोगादपूजयं॥ ततो निरंजनो देवः सर्वभूतपतिः प्रभुः॥१६॥ समुद्
धार लोकान्सर्वान्यस्तान्कल्पक्षये पुरा॥ देवदानवगंधर्वा सयक्षोरगराक्षसाः॥१७॥ चंद्रार्कग्रहाः सर्वे श
रीरात्तस्य निर्गताः॥ तत्र त्रैलोक्यमखिलं ससर्ज परमेश्वरः॥१८॥ जंगमाजंगमं सर्वं पुराकल्पे यथाभवत्॥
विस्तीर्णचलशृंगाढ्यं सनिर्झरसरःसरित्॥१९॥ वनखंडसमायुक्तं सर्वौषधिसपल्वलं॥ हिमवंतं गिरिश्रे
ष्ठं श्वेतपर्वतमुत्तमं॥२०॥ शृंगवंतं महाशैलं तथान्यान्कुलपर्वतान्॥ जंबुप्लक्षः शाल्मलिश्च कुशः क्रौंचस्तथै
व च॥२१॥ शाकश्च पुष्करद्वीपान्सप्त चैवं ससर्ज ह॥ लवणेक्षुसुरासर्पिर्दधिक्षीरांबुसंभृतान्॥२२॥ महार्ण
वान्ससर्जाशु देवो देवो जगद्गुरुः॥ चतुःप्रकृतिसंयुक्तं स्वेदजांडजरायुजं॥२३॥ युगांताग्निविनिर्दग्धं तपो
द्भिज्जं चकार ह॥ दुर्गप्राकारकलितां दिव्यप्रासादतोरणां॥२४॥ महाट्टालां महाजालोपताकाध्वजमालिनीं॥ कू ९
र्मपृष्ठोपमां देवीं व्यसृजत्स वसुंधरां॥२५॥ एवं सृष्टे पुरा राजन्शंभुना सचराचरे॥ एवं दृष्टा मया रवाने वया

21/2008

तास्यं पुरा॥२६॥ महादेवप्रसादात्तु तस्यै वांगसमुद्भवां॥ प्रादुर्भावमिमं कौर्मं ये पठंति द्विजोत्तमाः॥२७॥ ये विश्र
ण्वंति धर्मिष्ठास्तेपि यांति परां गतिं॥२८॥ इति श्रीरेवाखंडे कूर्मकल्पसमुद्भवो नामऽष्टमोऽध्यायः॥८॥ मार्कंडे
य उ०॥ नष्टे तस्मिन्कदा लोके पुनश्च सलिलाप्लुते॥ अहमर्णवमध्यस्थो बाहुभ्यामतरं जलं॥१॥ दिव्ये वर्षशते पूर्णे
श्रांतोऽहं नृपसत्तम॥ ध्यातुं समारभं देवं सुदुःखार्णवतारणं॥२॥ ध्यायमानस्ततस्तस्मिन्नपश्यं पक्षिरूपिणं॥
हारकुंदेंदुसंकाशं बकं गोक्षीरपांडुरं॥३॥ ततोऽहं विस्मयाविष्टस्तं बकं समुदीक्ष्य वै॥ अस्मिन्महार्णवे घोरे कु
तोयं तव संभवः॥४॥ बाहुभ्यां प्रतरछ्रांतस्तं बकं पृष्टवानहं॥ पक्षिरूपं समास्थाय कस्त्वमेकार्णवे कृते॥५॥ श्र
मसिद्धिस्य योगात्मा मोहयन्निव मां प्रभो॥ एतत्कथय ते सर्वं योगीशोसि नमोनमः॥६॥ सोऽब्रवीन्मां महादेवस्त्रा
त्रा तु महमागतः॥ जगत्सर्वं महावत्स संहृतं किं न बुध्यसे॥७॥ पिता माता तथाहं वै विश्वस्य च मुने ध्रुवं॥ का
रुण्यं मम संजातं भग्नेऽब्धौ विक्षुब्धो बुधौ॥८॥ पक्षिरूपं समास्थाय त्वदर्थेऽहं समागतः॥ किमर्थं मातुरो भूत्वा
भ्रमसेत्र महार्णवे॥९॥ विज्ञातं मम पक्षांते सखे विज्ञानमाश्रुहि॥ एवमुक्तस्ततस्तेन देवेनाहं नरेश्वरः
॥१०॥ तस्य पक्षपुटस्यांतं प्रविष्टो वै भ्रमञ्जले॥ कालं युगसहस्रांतमभ्रांतोर्णवमध्यगः॥११॥ ततः श्यणो
मि सहसा दिक्षु सर्वासु सर्वतः॥ किंचिन्न पुरसंभिन्न मुहूर्तं शब्दमुत्तमं॥१२॥ ततोऽर्णवजले सर्वं संक्षिप्तं द
ष्टवानहं॥ किमेतदिति संचित्य सदिशः समवलोकयन्॥१३॥ ददृशे दिक्षु ततः कन्या आगताश्च महार्णवान्॥ व
स्त्रालंकारदिव्याना नानारत्नोपशोभिता॥१४॥ काचिच्चंद्रसमाभासा काचिदादित्यसंनिभा॥ काचिदिंद्रनयु
जाभा काचिद्रक्तोत्पलप्रभा॥१५॥ नानारूपधराः सौम्याः सर्वाभरणभूषिताः॥ अर्घपाद्यादिभिर्मात्यैर्वक
मभ्यर्चयंस्तदा॥१६॥ ततश्च पर्वताकारः पक्षी सोद्भुतदर्शनः॥ प्रविवेश महाघोरं सहसैवार्णवं जलं॥१७॥
बहुकोटिकुलायामं यावद्भूमंडलं गतः॥ योजनानां सहस्राणि तावत्सेवमाता निच॥१८॥ ततो भूमंडले दृष्ट

रे॰ खं॰ नानारत्नसमाकुलं॥ स्फटिकसोपानं रक्तस्तंभं मनोहरं॥१९॥ पुरं योजनमात्रं तु विस्तराद्द्विगुणायतं॥ वापी
१० कूपसमाकीर्णं प्रसादाट्टालकावृतं॥२०॥ वृक्षवृंदसमाकीर्णं ध्वजयष्टिविभूषितं॥ तस्मिन्पुरवरे रम्ये रत्नकांच
नभूषिते॥२१॥ अथान्यत्तस्य मध्ये तु दृष्टवान्पुरमुत्तमं॥ शतयोजनविस्तीर्णं तावद्द्विगुणमायतं॥२२॥ पुरमध्ये नत
स्तत्र नदी परमशोभनी॥ वहते पुण्यसलिला नानारत्नशिलातला॥२३॥ तत्तीरे मया दृष्टं तडित्सूर्यसमप्रभं
॥ इंद्रनीलमहानीलैश्चित्रितं रत्नैः समंततः॥२४॥ क्वचिद्वह्निसमाकारं क्वचिदिंद्रायुधोपमं॥ क्वचिल्लक्षं क्वचित्सि
तं क्वचिद्रक्तं क्वचित्सितं॥२५॥ नानावर्णं महालिंगं दृष्टमद्भुतदर्शनं॥ ब्रह्मविष्ण्विंद्रसाध्याद्यैः समंतात्परिवारि
तः॥२६॥ नंदिभृंगगणेशाद्यैश्चंद्रादित्यैश्च संवृतं॥ पश्यामि लिंगमितन्नं भुक्तिमुक्तिप्रदं शिवं॥२७॥ पार्श्व
योस्तत्र तत्तु प्रसुप्तं देवदानवान्॥ प्रपश्यामि शुभाकारान्परमाभीलितेक्षणान्॥२८॥ ततस्ताः पद्मपत्राक्ष्यो
नार्यः परमसंमताः॥ तस्यानयातले स्नात्वा दिव्यैः पुष्पैः मनोहरैः॥ दत्वार्घ्यपाद्यं विधिवत् लिंगस्य कमलेक्ष
णाः॥ अभ्यर्च्य च वरारोहाः दृष्टस्ता प्रमदोत्तमाः॥३०॥ ततस्त्वभ्यर्च्य तल्लिंगं तस्मिन्स्ताः सर्वकन्यकाः॥ तन्मुख्या
दर्शनं राजन्विद्युतोभ्रगणेष्विव॥३१॥ नवासौ पक्षिराट् दृष्टा न स्त्रियो न च देवता॥ तदेवैकं स्थितं लिंगं मर्चि
तं परमाद्भुतं॥३२॥ आत्तोयद्दुःखसंमग्नो रुद्रमाप्येति चिंतयन्॥ ततो नद्याः समुत्तीर्य दिव्याभरणभूषणाः॥३३
भ्राजयंति जगत्सर्वं कन्या राजीवलोचनं॥ पद्मैर्हिरण्मयैर्दिव्यैः पूजयंतल्लिंगमुत्तमं॥३४॥ पुनस्तत्सलं समासाद्य
प्रविविशुर्वरांगनाः॥ तस्मिन्पुरवरे रम्ये तमेवाहं पुनः पुनः॥३५॥ पश्यामि रूपकन्यां तामर्चयंतीं महेश्वरं॥ त
तोहं तां वरारोहां पृष्टवान् कमलेक्षणां॥३६॥ कात्वमस्मिन्पुरे देवी नित्यार्चनरता वद॥ क्व गतास्ताः स्त्रियः स
र्वाः क्व गतास्ते गणेश्वराः॥३७॥ नमोस्तु ते महाभागे ऋद्धिपुण्यमहोदये॥ तव प्रसादाद्विज्ञातुमिच्छामि कमलेक्ष १०
णा॥३८॥ कृपां कुरु महादेवी कथयस्व यथातथं॥ स्त्र्युवाच॥ विस्मृतस्त्वं कथं विप्र दृष्टा कल्पे पुरातने॥३९॥

23/2008

मा भूत्ते स्मृतिभ्रंशः सा चाहं कल्पवाहिनी॥ नर्मदा नाम विख्याता रुद्रदेहाद्विनिर्गता॥४०॥ यास्ता कन्यास्त्वया दृष्टा
पूजयंत्यो महेश्वरं॥ याभिस्त्वमिह मानीतो पक्षिराजसमन्वितः॥४१॥ विद्धि कन्याः सरितस्तासु स च पक्षि महाप्रभुः
॥ बरते पक्षिरूपेण महायोगी महेश्वरः॥४२॥ अर्चितो ब्रह्मविष्ण्विंद्रैः सुरासुरगुरुर्हरः॥ यस्मादखिलं यं याति वि
श्वमेतच्चराचरं॥४३॥ तेन तल्लिंगमिति प्रोक्तं पुराणज्ञैर्महात्मभिः॥ तेन देवगणाः सर्वे संक्षिप्ता मायया पुरा॥४४॥ प्र
लीनाश्चैव लोकाश्च कालेन इत्यंते हि सांप्रतं॥ पुनर्द्रक्ष्या भविष्यंति सृज्यमानाः स्वयंभुवा॥४५॥ साहं लिंगार्चनपरा
नर्मदा नाम नामतः॥ कल्पं युगसहस्रं तु रुद्रस्य परिचारिका॥४६॥ अस्य प्रसादादमरा तुष्टादं मुनिपुंगवः॥ स
त्याजैव समायुक्तः सिद्धोसत्यं प्रावार्चनेनानु॥४७॥ पूजितः संस्कृतो वापि संस्मृतो वा महामुने॥ किं ददाति महेशा
नः प्रार्थितो लिंगमूर्तिमान्॥४८॥ एवमुक्तानुमां देवी तत्रैवांतरधीयत॥ तस्त्रियः स च देवेशो बकरूपी महे
श्वरः॥४९॥ तस्यास्तद्वचनं श्रुत्वा अवतीर्य महानदीं॥ स्नात्वाभ्यर्च्य च तं राजन् तल्लिंगं भक्तितामया॥५०॥ ततोहं स
रसात्तस्मात्समुत्तीर्णो जलाद्बहिः॥ न च पश्यामि तल्लिंगं न च तां निम्नगां नृप॥५१॥ तत्रैव लोकाः संजाताः
क्षितिश्चैव सकानना॥ सूर्यचंद्रार्कसहितं समस्तं च नभस्थकं॥५२॥ यथा दृष्टं मया पूर्वं त्रैलोक्यं तत्तदाभव
त्॥ ततोहं मनसा देवं प्रजपित्वा महेश्वरं॥५३॥ नर्मदातीरमाश्रित्य सतपस्येहं ततः स्थितः॥ एवं बाक्यपुराकल्पे
मया दृष्टेयमव्यया॥५४॥ नर्मदा मर्त्यलोकस्य सर्वपातकनाशिनी॥ यस्मात्कूर्मपरैर्विप्रैस्तथास्त्रविज्ञादि
भिः॥५५॥ सदा सेव्याः पुण्यतमा धर्मवृद्धिमभीप्सुभिः॥ यो विभक्त्या स वृत्तो येन र्मदाया महेश्वरं॥५६॥ स्ना
त्वार्चयंति ते सर्वे प्रयांति शिवमंदिरं॥५७॥ इति श्रीरेवाखंडे बककल्पसमुद्भवो नाम नवमोध्यायः॥९॥ मार्कंडेय
उ०॥ पुनर्युगांतमन्यं ते संप्रवक्ष्यामि तच्छृणु॥ सूर्येनादीपिते विश्वे स्थावरे जंगमे पुरा॥१॥ सरित्सरः समुद्रे
षु क्षयं यातेषु सर्वशः॥ स्वाहास्वधावषट्कारे नष्टे धर्मे च पार्थिव॥२॥ नानारूपधरैर्मेघैरिंद्रायुधसमुद्र

रे. खं. दे॥ सर्वमोक्षरतंत्रमधायाचिः शतरुद्रिका॥३॥ ततस्ते कार्यविनिते समस्ते सलिलारंते॥ जगत्कलोदरे देवः सुप्ता
११ पश्यन्भगवान् हरः॥४॥ प्रकृतिस्तामवश्च्यमो मायामा सप्रजापतिः॥ सतपुंग सह स्याति कालमाति स्वसार्णवं॥५॥ तत
तत्संसुप्तायारूढा ब्रह्मलोकनिवासिनः॥ भगवान्प्र यमः सर्वे ये चान्ये सनकादयः॥६॥ पर्यंके विमले श्वेते नानास्तरण
संस्तीर्णे शयानं दृष्ट्वा देवं सपत्नीकं स्वपन्तं॥७॥ विश्वरूपा च सा नारी विश्वरूपो महेश्वरः॥ गाढमालिंग्य सुप्तो
सौ दृष्टस्तु मुनिपुंगवाः॥८॥ पादमूले ततस्तस्य उमा पद्मदलेक्षणा॥ तन्मयं युगसहस्रं वै पादमूलमुपस्थिता॥ प्रभु
मोदं चरे वेश्या सुपास्ते वरवर्णिनी॥ अथ ब्रह्मा समायुक्तो भगवांश्च मोनमिः सुतैः॥१०॥ स्तौति शंकरमव्यग्रो भक्त्या
परमया युतः॥ स्तुवंतस्तस्य देवेन ज्ञाने त्रैरीश्वरसंज्ञितैः॥११॥ अकस्माच्चतुरो वेदाः प्रलीनास्ते महार्णवे॥ वेदैः प्र
लीनैर्भगवाननुज्ञातो नमसा स्तुतः॥१२॥ समुत्थितं देवमीशानं बोधयं समुपस्थितः॥ श्रीब्रह्मोवाच॥ उत्तिष्ठ वृषभध्वज(?)
प्रभो महादेव महेश्वर॥१३॥ समवेदा हृताः सर्वे त्वामतः स्तौनु मुयतः॥ वेदैर्व्याप्तं जगत्सर्वं विश्वं वेदोद्भवं विभो॥१४
विनाप्य प्रजायन्ते॥ यस्मान्वेद महादेव शीघ्रं मे दातुमर्हसि॥१५॥ प्रज्ञोत्साहो गतवीर्यो ते
निद्रा च त्वारिकियं स्यामि शंकर॥१६॥ सांप्रतं स्वल्पवीर्यत्वाद्देहहीनः परंतप॥ तावच्छास्त्राणि शंभंते समस्ता
निजगद्गुरोः॥१८॥ यावद्धि दोहद धिरयंतेनोपतिष्ठेत्सनातन॥ यथोदितेन सूर्येण सद्योयाति तमः क्षयं॥१९॥ ए
वं समस्तपापानि यांति वेदस्य धारणात्॥ वेदैरहं मजंस्तस्मं यत्नु ब्रह्म सनातनं॥२०॥ हृदि स्थितं वज्ज्ञानाभिगतं
सा च देवी नदी पुण्या रुद्रस्य पारिचारिका॥ पविनी सर्वभूतानां प्रावहत्सलिलं तदा॥२१॥ तस्यास्तीरे ततो देवाः
ऋषयश्च तपोधनाः॥ जजपुस्त्र्यंबकं देवं प्रहृष्टेनांतरात्मना॥२२॥ एकामूर्तिस्त्रिधा भूता गंगा रेवा सरस्वती
गंगा तु वैष्णवी मूर्तिः सर्वपाप प्रणाशिनी॥२३॥ रुद्रदेहसमुद्भूता नर्मदा पुण्यवर्द्धिनी॥ ब्राह्मी सरस्वती प्रोक्ता ११

25/2008

सर्वलोक प्रदायिनी॥२४॥ नर्मदा परमा काचिन्मूर्तिः शिवकलात्मिका॥ दिव्याकाम गमा देवी सुरासिद्धार्चित
जिता॥२५॥ व्यापिनी सर्वभूतानां सूक्ष्मात्सूक्ष्मतरा स्मृता॥ अक्षयाह्यक्षया लेषा स्वर्गसोपानमुत्तमं॥२६॥ रुद्रधारुद्रे
णजंतूनां संसारार्णवतारिणी॥ तस्याजलं ये हि पिबंति लोका भवंस पापाश्च विमुक्तशोकाः॥२७॥ ब्रजंति संसारवि
दुर्बलं तस्य त्वाचिरं मोक्षपदं विशुद्धं॥ यथा गंगा तथा देवी तथा देवी सरस्वती॥२८॥ समं पुण्य फलं प्रोक्तं स्नान
दर्शनचिंतनैः॥ सप्तकल्पस्मरायस्मात्तस्माद्विक्षयमागता॥२९॥ अमृता इति संभाव्य स्तूयते मोक्षचिंतकैः॥
मुच्यंते दर्शनात्तस्या मनुष्याः पापसंचयैः॥३०॥ नर्मदायां न पश्येद्ध ये चर्वयंति त्रिलोचनं॥ ते रुद्रलोकमासाप
तिष्ठंति सुखसंस्थिताः॥३१॥ इयं रुद्रांगसंभूता महापुण्या महानदी॥ लोकान्प्रार्पयिते पुण्यान्तेन पुण्यत्वमा
गता॥३२॥ य एवमीशानवरस्य लिंगं प्रपूजयेत्पुण्यजलाप्लुतांगा॥ ते यांति रुद्रं सह पूर्वजैश्च रेवाप्रसादाद्
पचीयमानाः॥३३॥ इति श्रीयुर्वा पुराणे नर्मदामाहात्म्ये कल्पोदशमो ध्यायः॥१०॥ युधिष्ठिर उ०॥ कस्मिन्
कल्पे महाभागा नर्मदेयं द्विजोत्तमैः॥ विभक्ता ऋषिभिः सर्वै रूपवीर्ये महात्मभिः॥१॥ एतद्वि स्तरतः सर्वं ब्रूहि
मे वदतां वर॥ कल्पांते व्यद्भवे त्कृष्टं लोकानां तच्च मे वद॥२॥ अतीते च पुरा कल्पे यस्यायं वर्तते नघ॥ अस्यान्य
स्य मामवस्याच द्विभो॥३॥ एवं पृष्टः सभामध्ये मार्कंडो धिमतां वरः॥ उवाच श्रूयतां सर्वैः कथेयं पावनाशिनी॥
॥४॥ महत्कल्पे यं वेशिष्टिकः स्यादस्मा सरं तु या॥ लोकक्षयकरो घोरो आसीत्कालः सुदारुणः॥५॥ तस्मिन्नपि
महाघोरे यथेयं न मृता सरित्॥ पारितु शो विभक्ता च शृणुध्वं तत्कथामिमां॥६॥ संक्षयः सर्वभूतानामभव
र्धमदुर्गमः॥ युगांते समनुप्राप्ते पितामहदिनक्षये॥७॥ मानसा ब्रह्मणः पुत्री साक्षाद्ब्रह्मेव सत्तमाः॥ सन
कादयो महात्मानो ये च वैमानिकागणाः॥८॥ यमेंद्र वरुणा याश्च लोकपाला दिनक्षये॥ कालापेक्षास्तु
तिष्ठंति लोकव्रजांततत्परा॥९॥ ततः कल्पक्षये प्राप्ते तेषां ज्ञानमनुत्तमं॥ सर्वेषां नृप ते तत्र युगरूपानुसा

रे॰ खं॰ रतः॥१०॥ भूर्लोकांते परित्यज्य भुवर्लोकं व्रजंति च॥ स्वर्लोकं च महश्चैव जनश्चैव तपस्तथा॥११॥ आश्रयंति सत्यलो
९२ कं च सर्वलोकेषु उत्तमं॥ कालं युगसहस्रांतं पुत्रपौत्रसमन्विताः॥१२॥ सत्यलोके तु तिष्ठंति यावत्संभवते जग
त्॥ ब्रह्मपुत्राश्च ये केचित् सुत्रादीन भवंस्तथा॥१३॥ त्रैलोक्यं ते परित्यज्य जनाधारं निरस्वरं॥ तैः सार्धं ये च नप्राप्ता
नागा ऋक्षमहामहाः॥१४॥ यक्षाः ऋक्षपिशाचाश्च अन्ये वैमानिका गणाः॥ ऋषयश्च महाभागा वर्णाश्चान्ये
पृथग्विधाः॥१५॥ पृथिव्या सह सीदंति ये चान्ये तलवासिनः॥ अनावृष्टिरभूत्तत्र महती शतवार्षिकी॥१६॥ लो
कक्षयकरी रौद्रा नक्षीपपीविनाशिनि॥ त्रैलोक्यं संक्षोभकरी सत्यलोकावरोधिणी॥१७॥ ततो लोकाः क्षुधा
क्रांताः विभ्रमंतो दिशो दश॥ कंदैर्मूलैः फलैर्वापि कंचित्कालं निवर्तकाः॥१८॥ सरितः सागरान् कूपान् सर्वं
नेपर्वतानपि॥ तत्रापि सर्वे शुष्यंति सरिद्भिः सह सागराः॥१९॥ ततो यान्यल्पसाराणि सत्वानि पृथिवीतले॥
तान्येवाग्ने प्रलीयंते विना तेन समाश्रयात्॥२०॥ अथ संक्षीयमाणासु सरित्सु सहसागरैः॥ षष्टिमुनिस
हस्राणि कुरुक्षेत्रनिवासिनः॥२१॥ ये च वैखानसा विप्रा दंतोलूखलिनस्तथा॥ गुहास्य च हिमाद्रेर्वै ये वसंति त
पोधनाः॥२२॥ सर्वे तमाभ्युपागम्य तृष्णार्ताः क्षुत्प्रपीडिताः॥ ऊचुः प्रांजलयः सर्वे सीदयामो महामुने॥२३॥ सरित्सा
गरशैलांता मही शुष्का द्विजोत्तम॥ क्व वयं तात यास्यामो यावत्कल्पविपर्ययः॥२४॥ दीर्घायुरसि विप्रेंद्र मत
तस्त्वं जगत्क्षये॥ भूतं भव्यं भविष्यच्च सर्वं तव हृदि स्थितं॥२५॥ तस्माज्जानासि सर्वं त्वं ब्रूहि विप्र हितं द्विज॥ अ
नावृष्टिरतं सर्वं सीदते सचराचरं॥२६॥ परित्राहि महाभाग न यामो येन संक्षयं॥ ततः संचिंत्य नर्मसाता
न्विप्रादिदमब्रुवं॥२७॥ कुरुक्षेत्रं परित्यज्य पुत्रदारसमन्विताः॥ सत्कोदिची दिशं पुण्यां याम्यां यास्या
मसांप्रतं॥२८॥ नगरग्रामसहितो सुरपत्तनशोभितां॥ व्रजामो नर्मदां भूमिं बहुसिद्धनिषेवितां॥२९॥ देवी
रुद्रनदी पुण्यां सर्वपापप्रमोचनीं॥ पद्ययामस्तां महाभागां बहुपुष्पफलावृतां॥३०॥ नानाविहंगसंघुष्टां ९२

27/2008

ऋषिकोटिनिषेवितां॥ माहेश्वरैर्भागवतैः सांख्यैः सद्भिः समाकुलां॥३१॥ अनावृष्टिभयान्भीताः कूलयोरुभयोरपि
आश्रयिष्यामस्तत्र निवत्स्यामो यतव्रताः॥३२॥ एवमुक्तास्तु ते सर्वे समेतानुचरैः सह॥ नर्मदातीरमाश्रित्य स्थितास्त
त्रैव निर्भयाः॥३३॥ किं चित्सर्वमनुस्मृत्य पुराकल्पाद्द्विजं भयं॥ प्राप्तास्ते नर्मदातीरमादावेव कलौ युगे॥३४॥ युगांत
तो वर्षशतं दिव्यं तत्र निवासिनः॥ षट्त्रिंशत्तु सहस्राणि मानुषाव्दानि संख्यया॥३५॥ तत्राश्चर्यं मया दृष्टं ऋषीणां
वसतां नृप॥ अनावृष्टिहते लोके नष्टे स्थावरजंगमे॥३६॥ भिन्नचारित्रमर्यादे हाहाभूते विचेतसि॥ चातुर्वर्ण्यप्रली
ने तु नष्टे होमक्रियाविधौ॥३७॥ निःस्वाध्याये निर्वषट्कारे शौचाचारविवर्जिते॥ इयमेका सरिच्छ्रेष्ठा ऋषिसंघनि
षेविता॥३८॥ नान्या काचिन्त्रिलोकेषु दृश्यते धर्मनंदन॥ तथैव पुण्यतीर्थैर्यमिंद्रस्येवामरावती॥३९॥ देवता
यतनैः शुभ्रैः राश्रमैश्च सुकल्पितैः॥ शोभंते नर्मदादेवी स्वर्गमंदाकिनी यथा॥४०॥ तरंगकरविक्षेपाफेनप
ताहहासिनी॥ शाकुंतरुतत्वाल्लोचा पापदुर्गतिनाशिनी॥४१॥ कूलयोरुभयोस्तावत् मंदिरायतनैः शुभैः॥
कृयाद्विरग्निहोत्रैश्च वहविर्धूमसमाकुला॥४२॥ शैवालकुंतलवनी वहुद्वीपस्तनी तथा॥ वहत्कूलोरुजघ
ना खेलच्चक्राह्वमेखला॥४३॥ धर्मावृतपरा देवी प्रावृट्काले वराबरी॥ अनेकदेवायतनैः पूजासंस्कार
शोभिता॥४४॥ भ्राजंते सरिता श्रेष्ठा पुण्या सर्वार्थसाधनी॥ केचित्संचरत्तपास्तत्र केचिदप्याग्निहोत्रिणः॥४५
केचिद्धूमांवुवाताशास्तपस्युग्रे व्यवस्थिताः॥ आत्मयज्ञकराः केचिदपरे परयाजिनः॥४६॥ येष्मवाताशिनः
कश्चिदपरे शीवतत्परः॥ एकरात्रं द्विरात्रं तु केचित्तु षड्रात्रभोजनाः॥४७॥ श्चांद्रायणपराश्चान्ये कृच्छ्रे
केचिद्व्यवस्थिताः॥ अश्मकुट्टास्तथा चान्ये दंतोलूखलिनः परे॥४८॥ पत्राशाः पाणिपात्राश्च जलचर्णाश
नाः परे॥ एवंविधैस्तपोभिश्च नर्मदाश्रिता नृप॥४९॥ जपद्भिः शंकरं देवं केशवं च निरंजनं॥ एकलेचयै
पृथक्लेच यजंतिं ऋषिसत्तमा॥५१॥ कलौ युगे महाघोरे प्राप्ताः सिद्धिमुत्तमं॥ यस्य यस्य हि या भक्तिर्वि

रे॰ खं॰ ज्ञानं न स्पता हरा॥५२॥ यस्य यस्य हि या वांछा तां तामीशो ददाति प्रभुः॥ संसारे परिवर्त्तंते ये पृथक् भावभाजिनः
३३ ॥५३॥ ये महाकल्पमीशाने रेवातीरे वसंति नः॥ पुनरावर्त्तमानास्ति जायंते पशुपक्षिणः॥५४॥ जन्मभार्गवि
धाकारे भ्रमंते दुःखभागिनः॥ पुनरावर्तमानोस्ति जन्मपुनः स्वर्गो पुनर्जन्म चरौरवे॥५५॥ संचरंति महाराज प
र्वपापफलेन तं॥ ये पुनर्देवमीशानं नर्मदाज्ञानुसंश्रिताः॥५६॥ जपंति नर्मदातीरे न पुनः संचरंति ते॥ आदि
हृपतनात्केचिदुपासंतः परं गताः॥५७॥ केचिद्द्वादशभिर्वर्षैः षड्भिरन्ये तपोधनाः॥ त्रिभिः संवत्सरैरन्ये त्व
न्ये संवत्सरेण तु॥५८॥ षड्भिर्मासैस्तु संसिद्धास्त्रिभिर्मासैस्तथापरे॥ मुनयो देवमाश्रित्य नर्मदां च पशस्विनी
॥५९॥ छित्वा संसारबंधं च गतास्ते ब्रह्मशाश्वतं॥ एवं कलियुगे घोरे शातशोथ सहस्रशः॥६०॥ नर्मदातीरमा
श्रुत्य मुनयो मोक्षमागताः॥ ये नर्मदातीरमुपेत्य भक्त्या शिवं व्रजंते यल पराः प्रपन्नाः॥६१॥ त्रिकालमेभः प्रवि
गापभक्त्या देवं समभ्यर्च्य शिवं व्रजंति॥६२॥ ध्यानार्चने जाप्यमहामरविश्वनारायणं वा सततं स्मरंति॥ ते धौ
तपापा द्विवराजहंसाः संसारवार्धेः प्रतरंति पारं॥६३॥ सत्यं सत्यं पुनः सत्यं महारुद्रेण भाषितं॥ नाह वेदात्परं
शास्त्रं न देवः केशवात्परः॥६४॥ अलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः॥ इदमेकं सुनिष्पन्नं ध्येयो ना
रायणः सदा॥६५॥ एतदेव महाराज सर्वविद्या सुसंमतं॥ अर्चनीयो महादेवो ध्येयो नारायणः सदा॥६६॥ऽ
साविद्या या हरिं स्तौति हरार्चनविशारदा॥ मद्विधानां द्विजातीयानां नान्या विद्या मम॥६७॥ हरेरपि हरस्यापि
नान्तरोस्ति यथा नृप॥ गंगायाः नर्मदायाश्च नूनं नास्ति तथान्तरं॥६८॥ हरिं स्तौति हरं द्वेष्टि हरिं द्वेष्टि हरा
र्चकाः॥ यः सपापसमाचारः पापात्मा नारकी ध्रुवं॥६९॥ यो वा हरं प्रजपते पतात्मा रेवा समाश्रित्य महा
नुभावः॥ सर्वेप्सवां शोथ भवेत्सिनाकी वर्षार्धमासार्धदिनैरपीह॥७०॥ कीटापतंगाश्च पिपीलिकाश्च क ३३
शावि रेवांभसि ये म्रियंते॥ ते दिव्यदेहाः सुकुलः प्रसूताः शातं समाधर्मपराभवंति॥७१॥ कालेन दग्धाः प्रप

तंति येपि मतंगजौघैश्च निकृंतमूलाः॥ ते नर्मदासंगविमुक्तपापाः शाच्चत्परमानास्ति दिवं व्रजंति॥७२॥ अका 29/2008
मतः कामत एव राजन् रेवां समाश्रित्य हि ये म्रियंते॥ जगंधमकाश्चिद्दिवं व्रजंति किमत्र विप्राभवभावयुक्ताः॥७३
युक्ताः॥७४॥ मासोपवासैरपि शोषितांगा नानां गतिं यांति विमुक्तदेहाः॥ या यांति रेवाजलपूतकायाः शिवार्चिताः केशवभक्ति
केशवभक्तियुक्ताः॥७५॥ ये नर्मदातीरमुपेत्य कामम् अभ्यर्चयंतीह शिवं शिवां च॥ नारायणं वा मनसा सपूजाः पि
तापधानाः कुक्षौ युवत्या न पुनर्विशंति॥७७॥ किं यत्तदानैर्बहुभिश्च वेदैर्निषेविते स्तीर्थवरैः समस्तैः॥ रेवा
तटं दक्षिणमुत्तरं वा सेवंति ते रुद्रचरा भवंति॥७८॥ तेवंचिताः पंगुगंडांधभूताः लोके मनुष्याः पशुभिर्द्वि
चित्रपुनार्द्धिजेंद्र॥ सनर्मदातीरमुपेत्य शार्वं मभ्यर्चितां शार्वं विमुक्तसंगाः॥८०॥ विधिरनेकैरपि योज्यमानामु
वशिष्ठमुख्या महामुनीन्द्रा हृतपापसंघाः॥ क्षिप्तं परां देवीं तलो प्रभुतां गां ब्राह्म्यं परं पारमनुप्रपन्नाः॥८२॥
प्रमाणं॥८३॥ इति श्रीरेवाखंडे एकादशोध्यायः॥११॥ ॥युधिष्ठिर उवाच॥ अहो महत्पुण्यतमा वरिष्ठा
सर्यनपातादृहयायुगांते॥ तस्मात्सदा सेव्यतमा मुनीन्द्रैः ध्यानार्चनस्नानपरैर्हि नित्यं॥२॥ ये लशोक्ताः
शाभिरेव वा॥ त्रिभिस्तथा चतुर्भिश्च वर्षैर्मासैस्तथैव च॥३॥ मुच्यंते ते कलौ घोरा दीश्वरार्चनतत्पराः॥ त्र

रे०खं० स्नाणं वासुरश्रेष्ठ केशवं वा जगद्गुरुं॥३॥ संशयः सर्वथा जातो ह्यस्मिन् प्रश्ने हि जोत्तमे॥ एतद्गुह्यतरं तः सर्वं कथयस्व ममानघ॥
१४ ॥४॥ अस्मिन् संसारगहने निमग्नाः सर्वजंतवः॥ ते कथं त्रिदिवं प्राप्नुयुरिति मे संशयो महान्॥५॥ मार्कंडेय उ०॥ शृणु राजन्
प्रवक्ष्यामि परं गोप्यं नृपोत्तम॥ संसारावर्तगहने जंतूनां जन्मकोटिषु॥६॥ मानुष्यं दुर्लभं तत्र तेन प्राप्य तु मनुजन्मच॥ मम
बुद्धिः सतां संगः श्रास्वाद्यापि सुदुर्लभं॥७॥ भक्तिरूपपते भाग्यात् कथंचित् त्रिपुरांकरे॥ तीर्थं मनसा मार्नेः सह॥८॥ द्रुमो
पिप्पलस्यासौ मुख्यस्तेन श्रद्धा विविध्यते॥ अन्यथा निष्फलं सर्वं श्रद्धाहीनं हि भारत॥९॥ भक्तिः श्रद्धा वासना च तिस्र एका
र्थलक्षणाः॥ तस्मात्तामाश्रये भक्तिं रुद्रस्य परमेष्ठिनः॥ तेषां हि सफलं जन्म येषां भक्तिः सुनिश्चला॥१०॥ सा चापि त्रिविधा
भक्तिः सात्विकी राजसी तथा॥ तामसी सर्वलोभस्य त्रिविधं च फलं लभेत्॥११॥ ते कर्मफलसंयोगाद्भ्रमंते ते पुनः पुनः॥ त
जन्मांतरप्राप्ते स्तेषां ज्ञानिनां दैवयोगिनां॥१२॥ सात्विकं यो भवेद्भक्तिः क्षया सा परस्य कर्मणः॥ भक्तिर्ज्ञानाय सर्वं धर्मो त्सा
याधो लनेनृप॥१३॥ कर्मकांडफलावाप्तिर्भक्तिः स्याद्दुर्ध सेशुभा॥ ये पुनर्नर्मदातीरमाश्रिता हि तत्सत्तमाः॥१४॥ त्रयीमार्गं
मतिक्रम्य ते यांति परमां गतिं॥ एकाग्रमनसो ये तु शंकरं शिवमव्ययं॥१५॥ अर्चयंति हि नरनाः क्षिप्रं तासि सिभावनाः॥
कालेन महता सिद्धिर्जायते न्यत्र देहिनां॥१६॥ नर्मदायां पुनस्तीरे क्षिप्रं सिद्धिरवाप्यते॥ सिध्यंते वत्सरैः षड्भिर्ये तु सां
ख्याविदो जनाः॥१७॥ वैष्णवज्ञानसंपन्नास्ते विसिध्यंति चार्थतः॥ सर्वयोगविदः संतः समुद्रमिव सिंधवः॥१८॥ ए
कांभजंति कल्पांते योगिमाहेश्वरं द्रतः॥ सर्वेषामेव योगानां योगमाहेश्वरो वरः॥ तमासाद्य विमुच्यंते ये विः स्युः पा
पयोनयः॥ निर्विकल्पां क्रियां ध्यात्वा जायंते नाहि योनिषु॥ गतिरेषा दुरारोहा सर्वपापक्षयंकरा॥२०॥ क्षिप्रं मुच्यंति सं
साराद्विवामाश्रित्य जंतवः॥ तस्यां स्नानपरो विप्रो नित्यं भस्मावलेपनः॥२१॥ नर्मदातीरमाश्रित्य क्षिप्रं साक्षिमवा
नुयात्॥ अर्चयंति त्रिकालं तु येन शालिंगमीश्वरं॥२२॥ सर्वपापविनिर्मुक्तास्ते यांति परमां गतिं॥ षड्भिर्मासैस्तु १४
सिध्यंति यमरत्नाः पापयोनयः॥२३॥ ये पुनः शुद्धमनसो मासैः शुध्यंति ते त्रिभिः॥ यथा दिनकरस्पृष्टो हिमराशि

31
2008

र्विशीर्यते॥२४॥ तद्वद्धिनायंते पापं स्पृष्टं भस्मकणैः शुभं॥ सद्योजातादियुक्तेन भस्मना येन गुंठिताः॥२५॥ सर्वैव
हिमल्लाभांति नरा रुद्रपरायणाः॥ वैनतेयभयं न स्याद्यथान्यंति पन्नगाः॥२६॥ तद्वत्सा पानि नश्यंति भस्मनाभ्युक्षि
तानि तु॥ नर्मदातीयस्तेन भस्मनोद्धूलयंति वै॥२७॥ सद्यस्ते पापसंघातान्मुच्यंते नात्र संशयः॥ व्रतं पाशुपतं प्र
कायथोक्तं पारयंति ये॥२८॥ श्रद्धानेन विद्यानास्तु ते वियांति परां गतिं॥ जन्मतो ब्राह्मणस्यानं क्षत्रियाणां पयस्मृतं॥
२९॥ वैश्यान्नमन्नमेवास्यात् शूद्रान्नं रुधिरं स्मृतं॥ शूद्रान्नरससंपुष्टा ये ह्रियंते हि तापतः॥३०॥ तपोज्ञानवि
हीनास्तु भकाकगृध्रा भवंति ते॥ दुःकृतं हि मनुष्याणां अन्नमाश्रित्य तिष्ठति॥३१॥ यो हि यस्यान्नमश्नाति स तस्या
श्नाति किल्बिषं॥ पतिधर्मविशेषेण वर्तयन् लोम्यमाश्रितः॥३२॥ नरकं या स संदिग्धा मिसे वं शंकरो ब्रवीत्॥ द्र
व्येषुपात्रस्तु विज्ञेयाः पशुपसिव्यवस्थिताः॥३३॥ ते मद्दलापसंघातैर्दग्धा एव न संशयः॥ विरंचेन च संयुक्ता लोलु
पत्वेन पीडिताः॥३४॥ असंभाष्याः स संग्राह्याद्रसेवं श्रुतिनोदना॥ पितृमातृकृते दीप रन्येऽश्रेयस्य कर्म
जैः॥३५॥ नष्टज्ञाना वलेपेन अहंकारेण चापरे॥ शांकरं विस्थिता धर्मे यस्मात्सर्वबहिः कृताः॥३६॥ क्लिश्य
मानास्तु कालेन ते वियांति परां गतिं॥ अश्रद्धाना पुरुषा मत्सरदंभसमन्विताः॥३७॥ न सिध्यंति दुरात्मानः
कुरुक्षेत्रा तीर्थ संश्रिताः॥ महाभावविपतीर्थस्य शंकरव्रतमाश्रिताः॥३८॥ वियोनिं यात्यसंदिग्धं लोलुप्येन सम
न्विताः॥ न तीर्थैर्न च वेदैश्च दुःकृतं हि विलुप्यते॥३९॥ अज्ञानाश्च मोप्रेटाश्च कृतं पापं विनश्यति॥ एवं ज्ञा
त्वा विधिनानार्ते तस्यं हि जातिभिः॥४०॥ परं ब्रह्म जपद्भिश्च ध्यानत्यंयत मानसैः॥ ऊर्ध्वस्थितो विरूपाक्षं
कांपीति रुद्रमात्मभिः॥४१॥ सद्यः संसिध्यते साक्षान् षण्मासात्संगवर्जितः॥ संहितापाठतत्त्वार्थं यः करो
ति सुसंयतः॥४२॥ नर्मदातटमाश्रित्य सर्वपातकैः॥ पुराणसंहितां वापि त्रावी वानि घर्मीमपि॥४३॥
यः पठेन्नर्मदातीरे शिवात्रे सशिवात्मकः॥ आभूतसंप्लवं यावत् स्वर्गलोके महीयते॥४४॥ संसाररव्य

रे. खं. सनंदनेन पुराप्रोक्तं तु नंदिना ॥ देवर्षिसिद्धगंधर्वाः समवायेशिवालये ॥ ४५ ॥ नंदीशो नाम मां राजन्शृणुष्वैकमना
१५ शुभां ॥ स्वर्गमोक्षप्रदां पुण्यां संसारभयनाशिनीं ॥ ४६ ॥ संसारगह्वरे घोरे प्रविष्टानु मायाभिश्छिद्यथ प्रतिपदं भ
वतापक्लिन्नाः ॥ नानाविधैर्निकृतैस्तैस्तैर्दुष्कर्मपाशैर्बद्धाः सुखाय शृणु ते कथितं प्रयोक्तं ॥ ४७ ॥ शक्रवक्रगति
मागामारूतापमयागतां ॥ चेतः प्रचेतः श्रामयलौल्यं त्यक्त्वा चित्तप ॥ ४८ ॥ दीनानाथविशिष्टेभ्यो धनं सर्वं परि
त्यज ॥ यदि संसारजलधे वैशिविष्रे खलनातुरं ॥ ४९ ॥ जन्मादिदुःखमत्येतत्वं कामादिभिर्नरा ॥ अस्त्वं योगयमादि
भ्यः पिनाकीपातिपावनं ॥ ५० ॥ माधिदिगंधर्यकिनाशहास्यं यास्यसि पीडयन् ॥ प्राणिमात्रे यं शरणं तद्भावि
मरणं तव ॥ ५१ ॥ कालः करालः कोबालः कामक्रोधमोपमः ॥ शिवविष्णुपराणां हि नराणां किं भयं भवान्
॥ ५२ ॥ भवभारार्तजंतूनां रेवातीरनिवासिनां ॥ भर्गश्च भगवांश्चैव भवतीति विभेदने ॥ ५३ ॥ शिवं भज शिवं देहि
शिवं स्तुहि शिवाय ज ॥ शिवं नमवराक त्वं ज्ञानं मोक्षं यदिच्छसि ॥ ५४ ॥ परं पंचाननं शास्त्रं मंत्रं पंचाक्षरं जप ॥
ध्याहि पंचात्मकं तत्त्वं यज पंचाननं परं ॥ ५५ ॥ किं तैः कर्मभोगैः शोच्यैर्नानाभावविशेषतैः ॥ यदि पंचाननः श्री
मान्सेव्यथे सर्वथा शिव ॥ ५६ ॥ किं संसागोरं जीन्मत्तवंहितेनिभतैरपि ॥ यदि पंचाननो देवो भावगंधेन
सेवितः ॥ ५७ ॥ रमस्व किं विषादेन प्राप्य कर्मकदर्थनां ॥ भवानीवल्लभं भीमं भज त्वं भयनाशनं ॥ ५८ ॥ नर्म
दातीरनिलयं दुःखौघविलयंकरं ॥ स्वर्गमोक्षप्रदं नित्यं भज मृड सुरेश्वरं ॥ ५९ ॥ न महेशात्परो देवो न वि
श्वारपरं गतिः ॥ न परं नर्मदागंगा नद्यास्तरणमुत्तमं ॥ ६० ॥ विहाय रेवां सुरसिंधुसेवां तत्तीरसंस्थं च ह
रिं हरं च ॥ उन्मत्तवद्भावविवर्जितत्वं कथासि रे मूढ दिगंतराणि ॥ ६१ ॥ भज रेवातलं पुण्यं यत्र रुद्रः सनात
नं ॥ जप पंचाक्षरीविद्यां व्रज स्थानमनामयं ॥ ६२ ॥ कृत्वा पित्वा निजं कायमुपायैर्बहुभिः स्तुतिं ॥ भज रेवां शि १५
वां प्राप्य सुखसाध्य परं पदं ॥ ६३ ॥ एवं कैलासमासाद्य नंदीशः शिवसंनिधौ ॥ समाजे लोकपालानां तन्म

33/2008

योक्तं तवाधुना ॥ ६४ ॥ श्रीमार्कंडेय उ० ॥ स्नानदानपरो यस्तु नित्यं धर्ममनुव्रतः ॥ नर्मदातटमाश्रित्य मुच्यते स
र्वपातकैः ॥ ६५ ॥ विधिहीनो जपेद्यस्तु वेदान्सर्वाननुक्रमात् समाः ॥ गायत्रीजाप्यसंयुक्तः संयमी स्वधिको गुणैः ॥
६६ ॥ अग्निमीळे इषेत्वा वा अग्न आयाहि नित्यदा ॥ शंनो देवीति कूलस्थो जपन्मुच्येत किल्बिषात् ॥ ६७ ॥ सांगो
पांगास्तथा वेदान् जपन्नित्यं समाहितः ॥ न तत्फलमवाप्नोति गायत्र्या संयमी यथा ॥ ६८ ॥ रुद्राध्यायं सकृज्ज
प्त्वा विप्रो वेदसमान्वितः ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ ६९ ॥ अन्यद्वा जाप्यसंस्थानं सूक्तमा
रण्यकं तथा ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ ७० ॥ यत्किंचित्क्रियते जाप्यं यच्च दानं प्रदीयते
नर्मदातटमाश्रित्य तत्सर्वं चाक्षयं भवेत् ॥ ७१ ॥ एवं बहुजातिधानि सं नर्मदां च समाश्रिताः ॥ ते मृता वै शिवं
यांति पदं शाश्वतमव्ययम् ॥ ७२ ॥ सत्यलोके नराः केचित्सूर्यलोके तथापरे ॥ अप्सरोगणसंवीता यावदा
हूतसंप्लवं ॥ ७३ ॥ एवं वै वर्तमानेऽस्मिंल्लोके तु नृपपुंगव ॥ ऋषीणां दशकोट्यस्तु कुरुक्षेत्रनिवासिनां ॥ ७४
मया सह महाभाग नर्मदातटमाश्रिताः ॥ फलमूलकृताहारा अर्चयंतस्त्रिताहरं ॥ ७५ ॥ तत्र वर्षशतं दि
व्यं कालसंख्यानुमानतः ॥ षट्त्रिंशतिसहस्राणि तानि मानुषसंख्यया ॥ ७६ ॥ ततो हरदमतीतायां संध्या
शेऽयां नृप सत्तमं ॥ समासते व्यतीते तु शेष मानुष्यके तथा ॥ ७७ ॥ ततोऽभवदनावृष्टिर्लोकक्षयकरी तथा
॥ यया यातं जगत्सर्वं क्षयं भयोद्दिदारुणं ॥ ७८ ॥ ये पूर्वमिह संसिद्धा ऋषयो वेदपारगाः ॥ तेषां प्रभावा
द्भगवान्प्रावर्षद्बलवृत्रहा ॥ ७९ ॥ महती भूरिसलिला समंताद्वृष्टिराहिता ॥ ततो वृष्ट्यां तु तेषां वै वर्तनं
समजायत ॥ ८० ॥ त्वया मार्कंडगुद बिल्वाद्यैर्नर्मदातीरमाश्रितैः नीयते सुमहान्कालो महासिद्धिमभीप्सु
भिः ॥ ८१ ॥ पुनर्युगांतसंप्राप्ते किंचिच्छेषे कलौ युगे ॥ निःशेषमभवत्सर्वं शुष्कं स्थावरजंगमं ॥ ८२ ॥ निर्वृ
क्षौषधिगुल्मं च तृणवीरुधवर्जितं ॥ अनावृष्टिहतं सर्वं भूमंडलमभूद्भयं ॥ ८३ ॥ ततस्ते ऋषयः सर्वे शु

तृषार्ताः सहस्रशः ॥ युगस्वभावमाविश्य हीनसत्वा भवंति ये ॥ ८४ ॥ न दृष्टैव हीमलब्धा कोरिपुगांतु समुपस्थिते
॥ के का यं कुत्र मा स्याम ह्यावास्माकं गतं भवेत ॥ ८५ ॥ तानहं प्रत्युवाचेदं मा भैष्टेति पुनः पुनः ॥ दृष्ट्वा विप्रा मया
ह्यत्र बहवः कालपर्ययाः ॥ ८६ ॥ नर्मदातीरमाश्रित्य ते सर्वे गमिता मया ॥ एषा नु त्राणं देवी संप्राप्ते तु युगक्षये ॥
८७ ॥ भृग्वाद्याः सप्तयेत्वासन् मम पूर्वपितामहाः ॥ तथान्ये च महाभागा मनियमव्रतचारिणः ॥ ८९ ॥ नानामति
रिद्दास्मार्कं विपत्तिं हि जसत्तमाः ॥ ते समस्ता गताः सर्वे समाश्रित्य महानदीं ॥ ९० ॥ पुलस्त्यः पुलहश्चैव वशि
ष्ठो नेयकश्यपाः ॥ अन्ये च शतसाहस्रास्तत्रास्ति समागताः ॥ ९१ ॥ तस्मादियं महाभागा न मोक्तव्या कदाच
न ॥ नान्या काचिन्नदी त्वत्र लोकद्वयफलप्रदा ॥ ९२ ॥ हूंद्वैरनेकैर्बहुभिः स्तुता पापैर्महाभयैः ॥ मुच्यंते तेन नराः
सर्वे नर्मदातीरवासिनः ॥ ९३ ॥ तस्मात्सर्वप्रयत्नेन सेवनीया सरिद्वरा ॥ बाढ़िः सततं श्रेयः इह लोके परत्र
च ॥ ९४ ॥ इतिश्रीरेवाखंडे द्वादशोध्यायः ॥ १२ ॥ श्रीमार्कंडेय उ॰ ॥ इतिश्रुत्वा वचो राजन् संहृष्टाः कृपया भवत
॥ नर्मदां स्तोतुमारब्धाः कृतांजलिपुटास्तदा ॥ १ ॥ नमोस्तु ते पुण्यजलाश्रये शुभे विशुद्धसत्वे सुरसिद्धसे
विते ॥ नमोस्तु ते तीर्थगणैर्निषेविते नमोस्तु ते सर्वपवित्रमंगले ॥ २ ॥ नमोस्तु ते सर्वपवित्रपूजिते नमोस्तु ते
विप्रसहस्रसेविते ॥ नमोस्तु रुद्रांगसमुद्भवे शिवे नमोस्तु ते देवि समुद्रगामिनी ॥ ३ ॥ नमोस्तु ते देवि वर
प्रदे मले नमोस्तु लोकद्वयसौख्यदायिनी ॥ अनेकभूतौघसमाश्रिते नघे सरिद्वरे पापहरे विचित्रे ॥ ४
गंधर्वयक्षोरगसेवितांगे सनातनी प्राणगणानुकंपिनी ॥ महार्णवौघे मदविषैरराहैः संविसिते देवि
महोर्मिमालिनी ॥ ५ ॥ नतास्म सर्वे सततं सुखप्रदे विमोचयास्मान् इह पापसंघात् ॥ पापैरनेकैर्विषये
निबद्धा भ्रमंति तावन्नरकेषु मर्त्याः ॥ ६ ॥ अपारसंसारतरंगभंगं यावत्त्वां भो नहि संस्पृशंति ॥ अनेक ९६
दुःखौघभयार्दितानां पापैरनेकैरभिवेष्टितानां ॥ ७ ॥ गतिस्त्वमंभो जसमानवक्रे हूंद्वैरनेकैरभिसंस्थ

तानां ॥ न घर्मपूता विमला भवंति त्वां देवि संप्राप्य न संशयोत्र ॥ ८ ॥ दुःखातुराणामभयं ददासि हूंद्वैरनेकै 35/2008
रभिपूजितासि ॥ यत्रोपलाः पुण्यजलाप्लुतास्ते शिवत्वमायांति किमत्र चित्रं ॥ ९ ॥ भ्रमंति तावन्नरकेषु मर्त्याः
दुःखातुराः पापपरीतदेहाः ॥ महानिलोद्धूततरंगभंगं यावत्त्वां भो नहि संश्रयंति ॥ १० ॥ म्लेच्छाः पुलिंदास्तथ
यातुधाना पिबंति ये भस्तव देवि पुण्यं ॥ मुक्ता भवंतीह भयात् घोरात् संश्रयंते त्वत्र किमत्र चित्रं ॥ ११ ॥ सरां
सि नद्यः क्षयमभ्युपेता घोरे युगेऽस्मिन् हि कलिप्रदूषिते ॥ त्वं भ्राजसे देवि जलौघपूर्णा दिवीव नक्षत्रपथे तु
गंगा ॥ १२ ॥ तव प्रसादाद्धरदेव रहिकालं पथेमं परिपारयित्वा ॥ यास्याम मोक्षं नव सुप्रसादात्त्वामाश्रिता
स्त्वां शरणं प्रपन्नाः ॥ १३ ॥ इति स्तमं बेवपितेव पुत्रान् त्वं पाहि यावद्दिदं युगांतं ॥ कालं त्वनादृष्टहतं सुघो
षं यावत्तरामस्तव सुप्रसादात् ॥ १४ ॥ पठंति ये स्तोत्रमिदं द्विजेंद्राः शृण्वंति ये चापि नराः प्रशांताः ॥ ते यांति
रुद्रं वृषसंयुतेन यानेन दिव्याप्सरसां सुपूर्णं ॥ १५ ॥ यः स्तोत्रमेतत्सततं जपेत स्नात्वा तु तोये खलु नर्मदा
याः ॥ अंते हि तेषां सरिदुत्तमेयं गतिं विशुद्धामचिराद्ददाति ॥ १६ ॥ प्रातः समुत्थाय तथाशयाना ये स्तोत्र
मेतत्सततं पठंति ॥ ते मुक्तपापाः सुविशुद्धदेहाः समाश्रयं यांति महेश्वरस्य ॥ १७ ॥ इतिश्रीरेवाखंडे त्रयोद
शोध्यायः ॥ १३ ॥ मार्कंडेय उ॰ ॥ एवं भगवती पुण्या स्तुता सा मुनिपुंगवैः ॥ चिंतयामास सर्वेषां दास्यामि वर
मुत्तमं ॥ १ ॥ ततः प्रसुप्तान् तान् ज्ञात्वा रात्रौ देवी जगाम ह ॥ एकैकस्य ऋषेः स्वप्ने दर्शनं चारुहासिनी ॥ २ ॥ ततो
र्धरात्रे संप्राप्ते उत्थिता जलमध्यतः ॥ विमलांबरसंवीता दिव्यमाल्यविभूषिता ॥ ३ ॥ धृतातपत्रा सुश्रोणी
पद्मरागविराजिता ॥ जगाद मा भैरिति तान् एकैकं तु पृथक्पृथक् ॥ ४ ॥ वसध्वं मम पार्श्वे तु भयं त्यक्त्वा सु
धार्मिकं ॥ एवमुक्त्वा महादेवी स्वप्नांते तान् महामुनीन् ॥ ५ ॥ जगामादर्शनं देवी प्रविश्य जलमात्मकं ॥ तं
तः प्रभाते मुनयो निरीक्ष्य चतुर्मुदान्विताः ॥ ६ ॥ अभयं दत्तमस्माकं सिद्धिश्चात्र भविष्यति ॥ अन्यस्मिन्निवसे

रे. खं. राजन्मत्स्यानां पुंजमुत्तमं ॥ ७ ॥ पश्यंती सपरीवारा महर्षीणाश्रमसंनिधौ ॥ तानदृष्ट्वा विस्मयाविष्टा मत्स्यांस्तत्र म
१० हर्षयः ॥ ८ ॥ पूजयामासुरव्यग्रा हव्यकव्येन देवताः ॥ तान्मत्स्यसंघान्संप्राप्य महादेव्याः प्रसादतः ॥ ९ ॥ सपुत्र
दारभृत्यास्ते वर्त्तंते च पृथक्पृथक् ॥ दिने दिने तथा वै ते मासमेपुष्टि जायते ॥ १० ॥ तत्स्थानां संचयं दृष्ट्वा विस्मि
ताश्चाभवंस्तदा ॥ ते जपंतस्तपंतश्च तिष्ठंत भरतर्षभ ॥ ११ ॥ अर्चयंतः पितॄन्देवान्नर्मदातटवासिनः ॥ तेजो
यद्भिश्च सततं जपतस्सुरे ॥ १२ ॥ भ्राजते सा सरिच्छ्रेष्ठा ताराभिर्द्यौरिवांबरे ॥ तत्रैते बहुलैः शुभ्रैर्ब्राह्मणैर्वेदपा
रगैः ॥ १३ ॥ नर्मदा पूर्वसंसिक्ता यथाक्रमं ॥ ऋषिभिर्दशकोटीभिर्नर्मदातीरवासिभिः ॥ १४ ॥ विभक्तेयं विभक्ता
सा नर्मदा नर्मदा नृणां ॥ उत्तरीयैः शुभैस्तत्र वाससैश्च भारत ॥ १५ ॥ कुलद्वयमहापुण्या पश्चिमोदधिगा
मिनी ॥ पृथगायतनैः शुभ्रैर्लिंगैर्बाणुकपिंडकैः ॥ १६ ॥ भ्राजते या सरिच्छ्रेष्ठा नक्षत्रैर्द्यौरिवायत ॥ एवं ते ऋ
षयः सर्वे तपयंतः सुरान्पितॄन् ॥ १७ ॥ न्यवसन्नर्मदातीरे यावदाहूतसंप्लवात् ॥ किंचिद्रुते ततस्तस्मिन्घो
रे वर्षशताधिके ॥ १८ ॥ अर्धरात्रे तदा कन्या जलमुत्तीर्य चागता ॥ विधुस्पुंजसमाभासा व्यालयज्ञोपवीति
नी ॥ १९ ॥ त्रिशूलाग्रकरा सौम्या तानुवाच ऋषींस्तदा ॥ आगच्छध्वं ऋषिगणा विशध्वं मा विशध्वं मामयोनिजां
॥ २० ॥ समेता पुत्रदारैश्च ततः सिद्धिमवाप्स्यथ ॥ यस्य यस्य हि या वांछा तस्य तां तां ददाम्यहं ॥ २१ ॥ विष्णुं ब्रह्माण
मीशानं जन्यं वा सुरमुत्तमं ॥ तत्र सर्वोत्र यिष्यामि प्रसन्ना वः सुरार्चिता ॥ २२ ॥ प्राणायामपरा भूत्वा मां विशध्वं
३२ मासिनिष्पावाःपयोदेयंतुश्रावणे॥४४॥मुक्तादेयानभस्यंतुशाल्योश्वयुजेतथा॥कार्तिकेशर्करापात्रंकरकं
रससंभृतं॥मार्गशीर्षेतुकार्पासंकरकंघृतसंभृतं॥पौषेतुकुंकुमंदेयंमाघमासितिलास्तथा॥४६॥फाल्गुने
मासिसंपूर्णोतिलामोदकमिश्रिताः॥यस्यांतिथौयद्देयंस्यात्मासेनाद्विवर्जयेत्॥४७॥विधानमासांसर्वासां
सामान्यंबाणसुंदरी॥प्रतिमांमधुवृक्षस्यतामेवप्रतिपूजयेत्॥४८॥तस्मैसर्वंनुविप्रायआचार्यायप्रदापये
त्॥ततःसंवत्सरस्यांतेउद्यापनविधिंशृणु॥४९॥मधुवृक्षमधोगत्वासर्वसंभारसंभृतं॥निखनेत्प्रतिमांमध्ये
मधुकीमाधुकस्यच॥५०॥तत्रस्थंपूजयेत्सर्वमुमादेहार्धधारिणं॥पूजोपहारैर्विविधैर्वस्त्रगंधानुलेपनैः॥
॥५१॥कौसुंभेवाससीशुक्लेशतसीपुष्पसंनिभे॥परिधाप्यततस्तत्रदंपत्यानिचपूजयेत्॥५२॥शाद्वैवस्त्रयंरा
त्रीभक्तिभावितचेतसा॥छत्रोपानहवस्त्रैश्चकंटसूत्रैःसकर्ब्यकैः॥५३॥हारकेयूरमुकुटैःकटकैरंगुली
यकैः॥कज्जलैःकंकतैःसूत्रैःसिंदूरैःकुंकुमैस्तथा॥५४॥सुगंधैःपुष्पतांबूलैःशयनीयफलैरपि॥भक्ष्यैर्द्वि
धैर्यागौमिष्टान्नैर्भोजयेत्ततः॥५५॥सुखोपस्थितांश्चविश्राम्यशय्यासुचानिवेशयेत्॥गुरुमप्यर्चयेत्सर्वंगुरुरे
वमहेश्वरः॥५६॥प्रीतेगुरौततःसर्वंजगत्प्रीतंचराचरं॥यद्यदिष्टतमंलोकेयच्चैवास्यहितंवसु॥५७॥तत्स
र्वंगुरवेदेयंसदैवाक्षयमिच्छता॥धनवद्भिरिदंदेयंअन्यैर्देवंयथाख्यते॥५८॥दंपसमेकंविधिवत्प्रतिपूज्यंशु
भव्रते॥द्वितीयंगुरुदेवस्यगुरुर्योयतःप्रभुः॥५९॥ततःसमापयेद्देवीद्विंचब्राह्मणंगुरुं॥यथात्वंदेविललि
तेनविमुक्तासित्रांसुना॥६०॥तथामेपतिपुत्राणामवियोगप्रदाभव॥अनेनविधिनाकृत्वातृतीयांमधुकाख्
यां॥६१॥शचीशक्रपतिंप्राप्यदेवेशंनुनुमध्यमा॥सौभाग्यंचत्रिलोकेस्मिन्यंसर्वार्थसुखमुत्तमं॥६२॥अनेनवि ३२
धिनायातुकुमारीव्रतमाचरेत्॥शोभनंपतिमाप्नोति॥यथेंद्राण्याशतक्रतुः॥६३॥दुर्भगासुभगत्वंचसुभ

67/2008

गत्वंचसुभगापुत्रिणीभवेत्॥पुत्रिण्यक्षयपुत्रांश्चनशोकंप्रतिपद्यते॥६४॥अनेकजन्मजनितंदौर्भाग्यंनश्यते
ध्रुवं॥मृतानुत्रिदिवंप्राप्यउमयासहमोदते॥६५॥कल्पकोटिशतंसाग्रंभुक्त्वाभोगान्मनोरमान्॥अवतीर्यपुन
र्भूमौपार्थिवंपतिमाप्नुयात्॥६६॥सुभगारूपसंपन्नापार्थिवंजनयेत्सुतं॥एतत्तेकथितंसर्वंव्रतानामुत्तमंव्रतं
॥सर्वपापप्रशमनंधर्मवृद्धिकरंपरं॥६७॥इतिश्रीरेवाखंडेनारदोक्तंमधुकव्रतंनामपंचविंशोध्यायः॥२५॥
मार्कंडेयउ०॥नारदस्यवचःश्रुत्वाराज्ञीवचनमब्रवीत्॥गृहाणममविप्रेंद्रदानंकिंचित्तवेप्सितं॥१॥सुवर्णम
णिरत्नानिवस्त्राणिविविधानिच॥सर्वदास्याम्यविधिवत्यच्चान्यदपिदुर्लभं॥२॥तद्राज्ञीवचनंश्रुत्वानारदो
वाक्यमब्रवीत्॥अन्येषांदीयतांदानंयेद्विजाःक्षीणवृत्तयः॥वयंतुसर्वसंपन्नाभक्तिग्राह्यास्सदैवहि॥देवर्षेर्व
चनाराज्ञीदानायाभ्युद्यतोद्यमा॥४॥अथाहूयद्विजान्सर्वान्दानंदातुंप्रचक्रमे॥यत्किंचिंनारदेनोक्तंमहत्सौ
भाग्यवर्धनं॥५॥तेनदानेनमेनित्यंप्रीयतांहरिशंकरौ॥एवंदानानिसादत्वाविविधान्याहतंमिनिं॥६॥स्नाना
र्थंगच्छविप्रेंद्रमाभूत्कालविपर्ययः॥अहंत्वंपतिमासाद्यकरिष्येभक्तिमुत्तमं॥७॥नान्यंहिदैवतंमन्येमुक्त्वाबाणं
ममद्विज॥तेनसत्येनमेभर्ताबलवानस्तुबाणाश्रयः॥८॥नान्याहिदेवतास्त्रीणांज्ञानासिलंपतिंविना॥तथापि
तववाक्येनदत्तंदानंह्यनेकशः॥९॥शेषंकर्मकरिष्यामिस्वपतिंप्रतिमानद॥अथापृष्टाबाणपत्नीनारदेनत
पोत्तम॥१०॥उवाचमधुरंवाक्यंविनयावनितासती॥शिष्यासमागतोविप्रगृहंमेप्रणतोमया॥११॥ब्रह्मपुत्रप्र
जस्थानंआशीर्देयासदामम॥तथेतितामनुज्ञाप्यनारदोमुनिसत्तमः॥१२॥सर्वासांमानसंहृत्वाकृत्वाचैवा
न्यतोमनः॥जगामादर्शनंविप्रःपूज्यमानोनभश्चरैः॥१३॥अथोद्विग्नमनाःसर्वाभर्तारंपतिताःस्त्रियः॥विवर्णा
निःप्रभाजातानारदेनविमोहिताः॥१४॥मार्कंडेयउ०॥एतस्मिन्नंतरेरुद्रोनर्मदातीरमाश्रितः॥क्रीडतेउमया
सार्धंसंप्राप्तेस्तस्यनारदः॥१५॥प्रणम्यपार्वतीनाथंदेव्यायुक्तंमहेश्वरं॥विज्ञापयत्तदादेवंपद्धतंत्रिपुरेरप

॥१६॥गतोहंभवदादेशात्प्रत्रतद्बाणमंदिरं॥दृष्ट्वाबाणंचतद्वाक्याद्धूनीतःपुरमुत्तमं॥१७॥तत्रभार्यासहस्राणिदृ
ष्ट्वाबाणासुरस्यहि॥यथायोगंयथाकालंआगतःसोभ्यंतत्पुरं॥१८॥नारदस्यवचःश्रुत्वाप्रशस्यमुनिपुंगवं॥चिं
तयामासदेवेशोभ्रमणंत्रिपुरस्यहि॥१९॥करमुक्तंयथाचक्रंविष्णुनाप्रभविष्णुना॥भ्रमतेत्रिपुरंतद्वद्रक्षितं
ममतेजसा॥२०॥सर्वेमेभक्तिनिरताबाणस्त्रैलोक्यविश्रुतः॥प्रतिपन्नंचदेवानांत्रिपुरस्यवधंप्रति॥२१॥एवंस
सुचिरंकालंदेवदेवोमहेश्वरः॥चिंतयित्वापुनर्बाणकार्यंप्रतिजनेश्वर॥२२॥ततोसौमंदरंध्यात्वाचापंकृत्वा
त्वहिगुणं॥विष्णुंसनातनंदेवंबाणंध्यात्वात्रिलोचनः॥फलेहुताशनंदेवंज्वलनंसर्वतोमुखं॥सुपर्णंपुंखदेशे
च॥जंबवायुंप्रकल्प्यच॥२४॥रथंमहीमयंकृत्वाधुरीभ्यामश्विनौकृतौ॥असौसुरेश्वरंदेवंअग्नर्कौत्याधनाधि
पं॥२५॥यमंतुदक्षिणेपार्श्वेवामेकालंसुदारुणं॥आदित्यचंद्रौचक्रेस्थौगंधर्वानककादिषु॥२६॥यंतारंचसु
रश्रेष्ठंवेदान्कृत्वाहयोत्तमान्॥खलीनादीपुचागानिरश्मीछंदांसिचाकरोत्॥२७॥कृत्वाप्रतोदमोंकारंसु
खग्रासंमहेश्वरः॥पातारमग्रगंकृत्वाविधातारंचपृष्ठगं॥२८॥मारुतान्सर्वतोदिक्षुऊर्ध्वेयंत्रेतथैवचः॥म
होरगपिशाचांश्चसिद्धविद्याधरांस्तथा॥२९॥गणांश्चरातत्रास्तत्संसर्वांगेसंधियंधनं॥सत्संरथध्वजेकृत्वा
गोचरस्तांसमंततः॥३०॥रथंदेवमयंकृत्वादेवदेवोमहेश्वरः॥संनद्धःकवचीखड्गीबद्धगोधांगुलीत्रवान्॥३१
बध्वापरिकरंगाढंजटाजूटंलंतियम्यच॥राज्यंकृत्वाधुनिर्दिव्यंयोजयित्वारथोत्तमं॥३२॥रथमध्यस्थितोदेवःश्रु
शुभेसयुधिष्ठिर॥धनुपरस्तुनिनादेनप्रचकंपेजगत्त्रयं॥३३॥स्थानंकृत्वातुवैशाखंतिष्ठंतंसंस्थितोहरः॥३
निरीक्ष्यसुचिरंकालंकोपसंरक्तलोचनं॥३४॥ध्यात्वातुपरमंमंत्रंस्वनिरोधात्जगत्प्रभुः॥मुमुक्षुःसहसा
बाणंत्रिपुरस्यवधेप्सया॥३५॥यदात्रीणिसमेतानिअंतरिक्षस्थितानिवै॥त्रिपर्वणात्रिशल्येनतेनतान्य
वसादयन्॥३६॥ततःकालंनिमेषार्धंदृष्ट्वैक्यंत्रिपुरस्यतु॥त्रिपर्वणात्रिशल्यंचन्नारंतत्रन्ययोजयत्॥३७ ३३

69/2008

यतोलोकाभयंनास्ताबभूवुःप्रलयेयथा॥बहवश्चतथोत्पाताआसन्नसंक्षयकारकाः॥३८॥सर्वासुरविनाशायका
लरूपाःसुदारुणाः॥अट्टहासंप्रमुंचंतिनराःकाष्ठमयायथा॥३९॥चित्ररूपाणिकुर्वंतिनिमेषोन्मेषणंतथा॥निस्पंद
नयनामत्यानिश्चेष्टालिखितातथा॥४०॥देवायतनगादेवारुदंतिचहसंतिच॥स्वप्नेपश्यंतिचात्मानंरक्तांबरविभूषि
तं॥४१॥रक्तमाल्योपसंयुक्तंपतंतंकार्दमेह्रदे॥पश्यंतिनामचात्मानंतैलाभ्यक्तंसमस्तकं॥४२॥पश्यंतिमानमारू
ढंयुक्तंमेषैश्चरासभैः॥संवर्तकोमहावायुर्वगातप्रतिमोबली॥४३॥महानुन्मीलयामासवृक्षजातीननेकशः॥
भूमिकंपःसनिर्घातःउल्कापातास्तथैवच॥४४॥रुधिरंवर्षतिघनःशर्करामिश्रितंबहु॥अग्निकुंडेषुविप्राणां
हुतःसम्यक्हुताशनः॥४५॥ज्वलतेधूमसंयुक्तोविस्फुलिंगकणैःसह॥कुंजराविमदाजातास्तुरंगाःसलवर्जि
ताः॥४६॥अवादितानिबाधंतेवादित्राणिसहस्रशः॥ध्वजाश्चकंपिताःपेतुछत्राणिचसहस्रशः॥४७॥ज्वलंति
पादपास्तत्रवनानिचसहस्रशः॥सर्वेहिव्याकुलीभूतंहाहाकारसमन्वितं॥४८॥उद्यानानिविचित्राणिभभंजा
शुभभंजनः॥तेनसंप्रेरितोःसर्वेज्वलयंतिहुताशनाः॥४९॥वृक्षगुल्मलतावल्लीगृहाणिचसमंततः॥दिग्भा
गेष्वपिसर्वेषुप्रवृत्तोहव्यवाहनः॥५०॥सर्वंकिंशुकवर्णाभंप्रज्वलत्संप्रदृश्यते॥गृहात्गृहंतदागंतुंनैवधूमे
नशक्यते॥५१॥हरकोपाग्निनिर्दग्धःकृंदतित्रिपुरेजनाः॥प्रदीप्तंसर्वतोदिक्षुदह्यमानंपुरत्रयं॥५२॥पतंतं
शिखराग्राणिविस्तीर्णानिसहस्रशः॥पावकोधूमसंपृक्तोदहमानःसमंततः॥५३॥देवागारेषुसर्वेषुगृहेष्वट्टा
लकेषुच॥प्रवृत्तोहुतभुक्तत्रत्रिपुरेरहनोदितः॥५४॥ददाहत्रैपुरंलोकंबालवृद्धसमन्वितं॥कांश्चिद्दृष्ट्वाजन
संसक्ताःपानासक्ताःस्तथैवच॥५५॥अपरागीतनृत्येषुसंसक्तावारयोषितः॥अन्योन्यंपरिष्वज्यहुताशन
भिर्बार्दितः॥५६॥दह्यमानाद्रुतश्चैतोधावंतिविह्वलान्नृप॥तथान्येदानवास्तत्ररसंसग्निविमोहिताः॥५७॥
अनाक्ताश्चन्यतोगंतुंधूमेनाकुलिताननाः॥हंसचारंडवाकीर्णनलिन्योहेमपंकजाः॥५८॥दह्यंतेविविधास्त

चापीकूपाश्च भारत॥ दह्यंते तेन लनिर्दग्धाः पुरानोद्यानदीर्घिकाः॥५९॥अम्लानपंकजैश्छन्ना विस्तीर्णा बहुयोजना
गिरिकूटनिभास्तत्र प्रसादा रत्नशोभिताः॥६०॥दह्यंते तेन निर्दग्धा विशीर्णा धरणीतले॥ नरस्त्रीबालवृद्धेषु दह्यमा
नेषु सर्वशः॥६१॥निर्दयं ज्वलते वह्निर्हाहाकारप्रसंचतो॥ काचित्कण्ठा विशालाक्षी हारावलिविभूषिता॥६२॥धूमना
कुलतोदीनान्यपतस्पथ्यवाहने॥ काचित्तस्मिन्पुरे रम्ये पुत्रस्नेहातुलालसा॥६३॥ पुत्रमालिंगते गाढं दह्यते त्रिपुर
स्यंतत्रे पुराग्निना॥ काचित्कनकवर्णाभा इंद्रनीलनिभं शुभं॥६४॥भर्तारं पतितं दृष्ट्वा तस्योपरि पपात ह॥ काचि
दादित्यवर्णाभा प्रसुप्ता तु प्रियोपरि॥६५॥अग्निज्वालाहता कंठे गाढमालिंगते नृप॥ मेघवर्णा परा नारी ज्वलत्कन
कमेखला॥६६॥श्वेतवस्त्रोत्तरीया तु पतीताधरणीतले॥ कुचित्कुंदेंदुवर्णाभा नीलरत्नविभूषिता॥६७॥शिर
स्यंजलिमाधाय संप्रार्थयति पावकं॥ कस्याश्चित्ज्वलते वस्त्रं केशा कस्याश्च भारत॥६८॥ज्वलज्वलनसंकाशो
हेमभांडेश्च संतिच॥ काचिल्लभ्रतदुःखाना विललापवरांगना॥६९॥मत्स्रीभर्तपतिं दृष्ट्वा क्रंदति कुररी यथा॥
मातरं पतितां काचिद्दृष्ट्वा विगतचेतसा॥७०॥विपते पतिता भूमौ पिदिता च उवाय यथा॥ इतश्चेतश्च काचिद्दह्य
माना प्रधाविता॥७१॥अपरूपहालकं दग्धं विललाप च दुःखिता॥ कुंभिलस्य गृहं दग्धं पतितं धरणीतले॥७२॥
कूष्मांडस्य च धूम्रस्य कुरुकस्य वकस्य च॥ विरूपनयनास्यापि वक्रविक्रूरयोरपि॥७३॥शुंभडिंभवलांतानां
रौद्रप्रह्लादयोस्तदा॥ दंडपाणेरपाणेश्च सिंहवक्त्रस्य मारुतेः॥७४॥ दुंदुभेश्चैव हिंगोश्च डिंडिमुंडेस्तथैव च॥ बा
णस्यानुश्च बाणश्च कृष्याद्व्याघ्रवक्त्रयोः॥७५॥ एवमन्येपि ये तत्र दानवा बलदर्पिताः॥ तेषां गृहेषु रौद्राग्नि
ज्वलते निर्दयो नृप॥७६॥दह्यमाना स्त्रियस्तत्र विलपंति गृहे गृहे॥ करुणाक्षरवादिन्यः पावकं प्रति दुःखिताः
॥७७॥यद्वैरं सुघोरं हि पुरुषोपरि पावक॥ स्त्रियः किमपराध्यंते गृहपंजरकोकिलाः॥७८॥निर्दयस्त्वं नृशंस ३४
श्चकः कोपस्ते स्त्रियं प्रति॥ किं त्वया न श्रुतं लोके न वध्याः सर्वथा स्त्रियः॥७९॥नकारुण्यं दयाकाचिद्दाक्षि

71/2008

ण्यं वास्ति यं प्रति॥ दयां स्त्रिष्वोपि कुरुते वदनं वीक्ष्य योषितां॥८०॥म्लेच्छानामपि श्लिष्ट त्वं दुर्निवार्योस्यचेतनः॥ एवं
विलपमानानां श्रुत्वा स्त्रीणां वचः शुभं॥८१॥करालज्वालबहुलो ज्वलसेव हुताशनः॥ रावं तत्र ज्वलमानं तु दृष्ट्वा बाणा
सुरोब्रवीत्॥८२॥अविज्ञाय विनष्टोहं पापात्मा हरमंजसा॥ मया पापेन सर्वेण ह्यनेकोनाशितो ध्रुवं॥८३॥गोब्रा
ह्मणाः स्त्रियो बालाः ज्ञातयोथ सहस्रशः॥ नानाविता नियमानस्तं मया रामाश्रमास्तथा॥८४॥ऋषीणामाश्रमाश्चै
व देवागारा गणाल्पयाः॥ तेन पापेन मे ध्वंसस्तपसश्च बलस्य च॥८५॥किं धनेन करिष्यामि राष्ट्रेनांतःपुरेण वा
वरं शंकरपादौ च शरणं यामि सत्कृतः॥८६॥न माता न पिता चैव न बंधुर्नापरो जनः॥ मुक्त्वा चैव महेशानं परमा
र्तिहरं परं॥८७॥आत्मना तु कृतं पापं आत्मना किं न भुज्यते॥ अहं पुनः समस्तैश्च दह्यामि सहसाधुभिः॥८८॥ए
वमुक्त्वा शिवं लिंगं मस्तकोपरि भारत॥ निर्जगाम गृहात्क्षिप्रं पावकेनाविगुंठितः॥८९॥स खिन्नो खिन्नगात्र
स्तु प्रस्खलन्सोमुहुर्मुहुः॥ सतु गंगहृदयावाचा संस्तुवन्शरणं ययौ॥९०॥त्वत्कोपानलनिर्दग्धो यद्यपि ध्वंसितस्त्रि
कर॥ त्वत्प्रसादान्महादेव मा मे लिंगं प्रणश्यतु॥९१॥अर्चितो मे सुरश्रेष्ठ ध्यातो भक्त्या मया विभो॥ प्राणाधिष्ट
तमं देव यस्मान्नान्यतु कृतु काहिंचित्॥९२॥यदि तेह मनुग्राह्यो वध्यो वा सुरसत्तम॥ प्रतिजन्म महादेव त्वद्भ
क्तिर्मे सनाश्रिया॥९३॥पशुकीटपतंगेषु तिर्यग्योनिगतेषु च॥ कर्मणा देवदेवेश त्वद्भक्तिरचलास्तु मे॥९४॥
एवमुक्त्वा महाभागो बाणो भक्तिमतां वरः॥ स्तोत्रेण देवदेवेशं स्तोतुं समुपचक्रमे॥९५॥ बाण उवाच॥ शिवशंकर
सर्वहराय नमो भव भीत महेश्वर भीम नमो॥ कुसुमायुधदेहविनाशकर त्रिपुरांतक देह विनाशकर॥९६॥प्रम
दाप्रिय कामगदिवन मोऽसुरासुरदेवगणेशनमो॥ हयवानरसिंहगजेंद्रसुरवज्ञातिहस्व सुदीर्घ भवादि नमो
॥९७॥उपलक्षिन शक्यं तितिपमरैः प्रणतोस्मि निरंजन तेचरणौ॥ जयशुंभ सुलोचन कांतिहर अपरापरपार जया
दि नमो॥९८॥जय सुरवर नाथ सुरांतकर जय शंभु सुरेश उमार्धहर॥ अप्राप्यता किं न पश्यतु अक्षितं तु यदा भ

रे॰ खं॰ यं॥९९॥अतिप्रमाथिवतदातपोमहत्सुदारुणं॥नपुत्राबांधवादारान्समस्तासुहृज्जनाः॥१००॥संकटेभ्युपगच्छंतित्र
३५ अंतमेकगामिनं॥यदेवकर्मकेरेण्यंकृतंतेनशुभाशुभं॥तदेवसार्थवत्तस्यभवस्यग्रेतुगच्छन्॥१॥निर्धनस्येहचरतो
नभयंविद्यतेक्वचित्॥धनीभयैर्नमुच्येतधनंतस्मात्सुजाम्यहं॥२॥लुब्धाःपापानिकुर्वंतिश्रुत्वाश्रेतेनसमानवाः॥
श्रुत्वादेवस्यसर्वस्वंश्रुत्वाचैवावधार्यतां॥३॥त्वंविष्णुस्त्वंजगन्नाथब्रह्मरूपनमस्कृतायः॥इंद्रस्त्वंदेवदेवेशासुरना
थनमोस्तुते॥४॥त्वंसितःपवनश्चैववरुणस्त्वंहुताशनः॥त्वंदीक्षायजमानस्यआकाशंसोमएवच॥५॥त्वंस
पस्त्वंहिविज्ञेयस्त्वंयमोगुरुरेवच॥त्वयाव्याप्तंजगत्सर्वंत्रैलोक्यंभास्वतादृव॥६॥एतद्बाणकृतंस्तोत्रंश्रुत्वादेवो
महेश्वरः॥क्रोधंमुक्त्वाप्रसन्नात्मातदावचनमब्रवीत्॥७॥ईश्वरउवाच॥नभेतव्यंनभेतव्यंअद्यप्रभृतिदानव॥
सौवर्णेभुवनेतिष्ठममपार्श्वेथवापुनः॥८॥पुत्रपौत्रप्रपौत्रैश्चबांधवैःसहभार्यया॥अद्यप्रभृतिलंवत्स्यजवध्य
सर्वशत्रुषु॥९॥भयस्तस्यवरोदत्तोदेवदेवेनभारत॥स्वर्गमर्त्येचपातालेपतितःसमुरासुरैः॥११०॥अक्षयश्चा
ष्ययश्चैवविचरस्वयथासुखं॥ततोनिवारयामासरुद्रःसमशिखंतदा॥११॥तृतीयंरक्षितंतस्यपुरंदेवेन
शंभुना॥ज्वालामालाकुलंचान्यत्पातितंधरणीतले॥१२॥ऊर्ध्वेनप्रस्थितादूर्ध्वंतस्यज्वालादिवंगता॥हाहाकारो
महान्तत्रऋषिसंघैरुदीरितः॥१३॥देवतैश्चमहाभागैःसिद्धविद्याधरैरपि॥एवंतुपातितंतस्यश्रीशैलेखंड
मुत्तमं॥१४॥द्वितीयंपतितंराजन्नोलेश्वमकरंकरं॥ज्वलंतंपतितंतत्रतेनज्वालेश्वरंस्मृतं॥१५॥एवंतुपातितं
तस्याद्दग्धेतुत्रिपुरेराजन्॥पातितेखंडउत्तमे॥रुद्रोदेवस्थितोतत्रज्वालामालानिवारकः॥१६॥हाहाकारप
राणांतुऋषीणांरक्षणायच॥स्वयंमूर्तिंमहत्कृत्वाउमावृषभसंयुतः॥१७॥रुद्रकोटिस्थितास्तत्रपर्वतेहम स्थि
मरंकृते॥मनसापिस्मरेद्यस्तुभक्त्याह्यमरंकंटकं॥१८॥चांद्रायणादिकंपुण्यंसलभेन्नात्रसंशयः॥अति ३५
पुण्यमिदंश्रेष्ठंयस्माद्रूरनसत्तम॥तस्मात्संस्मरहाजंसर्वपापक्षयंकरं॥नानाद्रुमलताकीर्णनानावल्लि

+3
2008

भिरावृतं॥२०॥नानागुल्मलताकीर्णनानावल्लिभिरावृतं॥सिंहव्याघ्रसमाकीर्णंमृगयूथैरलंकृतं॥२१॥श्वापदा
रावघोषेणनित्यंप्रमुदितोभवेत्॥ब्रह्मेंद्रविष्णुप्रमुखैर्देवैर्मरुद्भिश्चसहस्रशः॥२२॥सेव्यतेदेवदेवेशांकरस्तत्रप
र्वते॥पतनंकुरुतेतस्मिपर्वतेह्यमरकंटके॥२३॥क्रीडतेक्रमशोराजन्भुवनानिचतुर्दश॥ऐंद्रमाग्नेयकौबेरं
वायव्यंयाम्यमेवच॥२४॥नैरृत्यंवारुणंचैवसौम्यंसौरंतथैवच॥ब्राह्म्यंचपदमाक्रिष्टंवैष्णवंतदनंतरं॥
२५॥उमारुद्रंमहाभागऐश्वरंतदनंतरं॥परंसदाशिवंशांतंसुक्ष्मंज्योतिरनंतरं॥२६॥तस्मिन्यांतिलयंधीरो
विधिनानात्रसंशयः॥२७॥युधिष्ठिरउ०॥विधिःकोत्रविनिर्दिष्टःपतनाऋषिसत्तम॥एतत्सर्वमाचक्ष्वसंस
याभिमहामुने॥२८॥मार्कंडेयउ०॥शृणुष्वकथयिष्यामितंविधिंपांडुनंदन॥यत्कृत्वाप्रथमंकर्मनिपतेत्तुनरा
धिप॥२९॥कृत्वाकृच्छ्रत्रयंपूर्वंजलपक्षंतथैवच॥शाकाहारंस्थितेस्तत्रशुचिस्निग्धवर्णोनरः॥३०॥त्रिका
लमभ्यर्च्यशिवंसर्वपश्यंत्रिलोचनं॥दशांशेनतुराजेंद्रहोमंत्रैवकारयेत्॥३१॥संपूज्यविधिवद्देवंगंधमा
ल्यानुलेपनैः॥अनेनैवविधानेनआत्मानंयत्कनिक्षिपेत्॥स्वर्गलोलमनुप्राप्यक्रीडतेदेवतैःसह॥३२॥३
त्रिंशद्वर्षसहस्राणित्रिंशत्कोटयस्तथैवच॥भुंक्तामनोरमान्भोगान्ततोयामहीतलं॥३३॥एकच्छत्रेणपृथि
वींसभुंक्तेलोकपूजितः॥व्याधिशोकविनिर्मुक्तोजीवेच्चशरदांशतं॥३४॥ज्वालेश्वरंतुयत्तीर्थंत्रिषुलोकेषु
विश्रुतं॥तत्रज्वालानदीपार्थप्रसृतानिवनिर्मिता॥३५॥निर्वाप्यतद्बाणपुरंरेवायासहसंगता॥तत्रस्ना
त्वामहाराजविधिनामंत्रसंयुतः॥३६॥तिलमिश्रेणतोयेनतर्पयेत्पितृदेवता॥पिंडप्रदानंकृत्वाचसर्वती
र्थफलंलभेत्॥३७॥अनाशकंतुयःकुर्यात्तस्मिंतीर्थेनराधिपे॥मुच्यतेसर्वपापेभ्योरुद्रलोकंसगच्छति॥
३८॥अमराणांशतैश्चैवसेवितोह्यमरेश्वरः॥तथामहर्षिसंघैश्चतेनपुण्यतमोनृप॥३९॥तस्यपर्वतराज
स्ययःकरोतिप्रदक्षिणं॥प्रदक्षिणीकृतातेनसर्वेदेवानसंशयः॥वाजिकंमानसंचैवकायिकंत्रिविधंतुय

रे॰खं॰ त॥ नश्यते पातकं सर्वं शिवस्यैवं वचो यथा॥४०॥ अमरेश्वर पार्श्वे च तीर्थं शक्रेश्वरं नृप॥ तपस्तप्त्वा पुरा तत्र श
२५ क्रेण स्थापितं किल॥४१॥ कुशावर्तं नाम तीर्थं ब्रह्मणा च कृतं शुभं॥ ब्रह्मकुंडमिति ख्यातं हंसतीर्थं तथापरं॥४२
अंबरीषस्य तीर्थस्य महाकालेश्वरं तथा॥ कावेर्योः पूर्वभागे तु तीर्थं वै मातृकेश्वरं॥४३॥ एतानि दक्षिणे ती
रे रेवाया भरतर्षभ॥ ससेवनः स्नानपानैः पापसंघहराणि तु॥४४॥ भृगुतुंगे महाराज प्रसिद्धो भैरवः शि
वः॥ तस्य याम्यविभागे च तीर्थं चैव पलेश्वरं॥४५॥ एतौ स्थितौ दुःखहरौ रेवाया उत्तरे तटे॥ तावभ्यर्च्य ल
ता नत्वा सम्यग्यात्राफलं लभेत्॥४६॥ अदृष्टापूजितौ तौ हि नराणां विघ्नकारकौ॥४७॥ इति श्रीरेवाखंडे
त्रिपुरविध्वंसेऽज्वालेश्वरतीर्थनाम षड्विंशोऽध्यायः॥२६॥ ॥ युधिष्ठिर उ०॥ या कावेरीति विख्याता त्रिषु
लोकेषु सत्तम॥ महात्म्यं श्रोतुमिच्छामि तस्या मार्कंडतत्वतः॥१॥ कीदृशं दर्शनं तस्याः फलं स्नाने च किं
स्नातं फलं॥ तत्र दाने जपे होमे उपवासे सुरार्चने॥२॥ कथयस्व मुने मह्यं कावेरीसंगमे फलं॥ धर्मः कृतो वा
दृष्टो वा कथितो वाश्रुतोऽपि वा॥३॥ अनुमोदितो वा राजेंद्र पुनातीति श्रुतं मया॥ यथा पर्म प्रसंगेन तथा पि धर्मो
पि जायते॥४॥ स्वर्गश्च नरकश्चैव मिश्रेषा वै द्विकाश्रुतिः॥ मार्कं०॥ साधु साधु महाप्राज्ञ प्रश्नोऽयं यस्त्वया कृतः
॥५॥ शृणुष्वाहं प्रवक्ष्यामि कावेरीफलमुत्तमं॥ आसीद्यक्षो महासत्वः कुबेरो नाम विश्रुतः॥६॥ सोऽपि तीर्थप्र
भावेन राजन्यक्षाधिपो भवत्॥ कावेरीनर्मदायास्तु संगमे लोकविश्रुते॥७॥ स तु स्नात्वा शुचिर्भूत्वा कुबेरः
सत्यविक्रमः॥ विधिवं नियमं कृत्वा शास्त्रयुक्त्यान्वयोत्तम॥८॥ आराधयन्महादेवं एकचित्तः सनातनं॥ एका
हारो वसन्मासं तथा षष्ठाह्नकालिकः॥९॥ पक्षोपवासी न्यवसत्कंचित्कालं नृपोत्तम॥ फलमूलान्नतोया
न्नं कंचित्कालं धृतव्रतः॥१०॥ कंचित्कालं स्थितस्तत्र तीर्थे शैवालभोजनः॥ कंचित्साकनिरतः कंचित्कृच्छ्रे २५
पान्यस्य यात्॥११॥ चांद्रायणपरः कंचित्कंचिद्वायंबुभोजनः॥ एवं तत्र नरश्रेष्ठ कामरागविवर्जितः॥१२॥

75
2008

स्थितो वर्षशतं साग्रं कर्शीमं निजविग्रहं॥ ततो वर्षशतस्यांते देवदेवो महेश्वरः॥१३॥ तुतोष परया भक्त्या तमुवा
च परंतप॥ भो भो यक्ष महासत्व वरं वरय सुव्रत॥१४॥ परितुष्टोऽस्मि ते भक्त्या तव दास्येयथेप्सितं॥ यक्ष उ०॥ यदि तु
ष्टोऽसि देवेश उमया सह शंकर॥१५॥ मामद्य सर्वयक्षाणामाधिपं कर्तुमर्हसि॥ अक्षयत्वं महेशान त्वयि भक्तिम
चंचलां॥१६॥ धर्मे मतिं च मे नित्यं राजराज्यं च शाश्वतं॥ ईश्वर उ०॥ यत्त्वया प्रार्थितं सर्वं तत्तवाशु भविष्यति॥१७
एवं दत्वा वरं तस्य जगामादर्शनं हरः॥ सो विस्नात्वा विधानेन संतर्प्य पितृदेवताः॥१८॥ अमंत्रयित्वा तत्तीर्थं कृ
ताहारो दिवं ययौ॥ पूजितस्तत्र यक्षैस्तु अभिषिक्तो विधानतः॥१९॥ चकार विपुलं तत्र राज्यमीप्सितमुत्तमं
॥ तत्र चान्ये नराः सिद्धा यक्षगंधर्वकिंनराः॥२०॥ अप्सरोगणसंघाश्च अन्ये चैव तपोधनाः॥ कावेरीसंगमे
तन सर्वपापहरं विदुः॥२१॥ सर्वेषामपि स्वर्गाणां द्वारमेतद्युधिष्ठिर॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजी
वितं॥२२॥ कावेरीसंगमे स्नात्वा ये यैर्दत्तं हि तिलोदकं॥ दशपूर्वपरे तात मातृतः पितृतस्तथा॥२३॥ उद्धरेत्पु
रुषान् स्वर्गे स याति नृपसत्तम॥ तस्मात्सर्वप्रयत्नेन तत्र स्नातु मानवः॥२४॥ अर्चयेदीश्वरं देवं यदिच्छे
च्छाश्वतीं गतिं॥ कावेरीसंगमे स्नात्वा राजेंद्रानार्चनं नरैः॥२५॥ कृतं भक्त्या नरश्रेष्ठ अश्वमेधाधिकं फलं॥ द्वे
मिन चास्त यः स्वर्गो आप्या दायुर्विवर्धते॥२६॥ ध्यानाद्दानं समाप्नोति पदं शिवकलात्मकं॥ अग्निप्रवेशं यः कु
र्यात्तस्मिं तीर्थे नराधिप॥२७॥ अग्निप्रलोके वसेत्तावद्यावदाहूतसंप्लवं॥ अनाशकं तु यः कुर्यात्तस्मिं ती
र्थे युधिष्ठिर॥२८॥ तस्मिन्पुण्यफलं यस्यात्तच्छृणु युधिष्ठिर॥ अप्सरोगणसंकीर्णे विमाने सूर्यसंनिभे॥
॥२९॥ चामरैर्वीज्यमानस्तु देवैः सह मोदते॥ षष्टिवर्षसहस्राणि रुद्रलोके महीयते॥३०॥ रुद्रलोकात्परि
भ्रष्टः संप्राप्य पृथिवीतलं॥ दानभोगी च दीर्घायुर्जायते पृथिवीपतिः॥३१॥ व्याधिशोकभयाद्वेगमुक्तो जी
वेच्छतं समाः॥ एवं फलप्रदाता तु कावेरी सेविता नृणां॥३२॥ त्रिषु लोकेषु विख्याता नर्मदासंगमे सदा॥ जि

44565

रे॰खं॰ तवाङ्कायचिताश्चध्येयध्यानरतास्तथा॥३३॥कावेरीसंगमेतात तेपु मोक्षमवाप्नुयुः॥ येपिबंतिजलंत
२७ त्रतेपुण्यानात्रसंशयः॥३४॥तेषांपापंविलीयेतहिमंसूर्योदयेयथा॥गंगायमुनयोःसंगेयत्फलंपरिकीर्तितं
३५॥सोमेतुभृगुजायोगेव्यतीपातेचसंक्रमे॥राहुसोमसमायोगेतद्देवाष्टगुणंस्मृतं॥३६॥अशीतिश्चप्रयागेप्रो
क्तागंगायमुनसंगमे॥कावेरीनर्मदायोगतएवाष्टगुणास्मृताः॥३७॥गंगाषष्टिसहस्रैस्तुक्षेत्रपालैःप्रप
ल्यते॥तदर्धैरन्यतीर्थानिरक्ष्यंतेनात्रसंशयः॥३८॥अमरेश्वरेतुसक्षितांयेसंगाःपरिकीर्तितः॥तेत्वशीति
सहस्रैस्तुक्षेत्रपालैःसुपूजिताः॥३९॥तथामरेश्वरेश्वरेयाम्येलिंगंवैचपलेश्वरं॥द्वितीयंचंडहस्ताक्षंद्वेलिं
गेतीर्थरक्षके॥४०॥शिवेनस्थापितंपूर्वंकावेर्यास्त्वभिरक्षणे॥रक्षणरक्षतेदेवीनर्मदाबहुकल्मषा॥४१
धनुषांषष्टिभिर्यंत्रैःपुरुषैरीशायोजितैः॥ओंकारशतसाहस्रैःपुरुषैश्चाभिरक्षितः॥४२॥अन्यदेशाकृतं
पापमस्मिन्क्षेत्रेविनश्यति॥अस्मिन्क्षेत्रेकृतंपापंवज्रलेपोभविष्यति॥४३॥इतिश्रीरेवाखंडेरेका
कावेरीसंगममाहात्म्यंसप्तविंशतिमोध्यायः॥२७॥मार्कं॰॥ततोगच्छेन्महाराजवाराहीसंगमंपरं॥वराहस्य
महाविष्णोर्देहस्वेदसमुद्भवा॥१॥रेवायासंगतातत्रस्नात्वापापैःप्रमुच्यते॥तर्पयित्वापितॄंस्तत्रतिलतोये
र्यथाविधि॥२॥उद्धरेद्दशमनासार्धंकुलान्येकोनविंशतिः॥३॥इतिवाराहीसंगमः॥मार्कं॰॥रेवांभित्वामहा
भागाचंडवेगाविनिःसृता॥तत्रस्नात्वानरव्याघ्रब्रह्महत्यांव्यपोहति॥४॥तिलोदकप्रदानेनहविषापिंडदा
नतः॥पितॄन्समुद्धरान्घोरान्नरकान्नात्रसंशयः॥पापमेकमतायेचचंडकर्मकृतोनराः॥मुच्यंतेते
नपापेनचंडवेगासमागमे॥६॥चंडेश्वरंतत्रलिंगंसर्वदेवमयंशुभं॥स्नापनार्चनादस्यपुण्यगंधादि
दानतः॥७॥ब्रह्महत्यादिपापंहितत्क्षणादेवनश्यति॥चंडसेनःपुरात्वासीदुरात्मापापकर्मकृत्॥८॥प २७
रदाररतश्चौरोब्रह्मघ्नोगुरुतल्पगः॥रघुवंशसमुद्भूतोराजाकृष्यवरोधकः॥९॥बलात्कारगृहीताचऋ

77
2008

षिपत्नीनिषेवकः॥पतीन्हत्वातथान्याश्चनानावर्णाःस्त्रियोहरन्॥१०॥नैमिषारण्यवासीचशांडिल्योब्रह्मवि
त्तमः॥सौदामिनीतस्यभार्याधर्मपत्नीयशस्विनी॥११॥रूपयौवनसंपन्नाचंद्रकांतिसमप्रभा॥कामिनीवकल
धरापीनश्रोणिपयोधरा॥१२॥एकदाहयमारूढश्चंडसेनोवनेचरन्॥शांडिल्यस्याश्रमंप्राप्तोवनेसमृगयन्
मृगान्॥१३॥दृष्टासौदामिनीतेनविचरंतीमुनेःप्रिया॥उवाचतांसमागच्छममराज्ञीभवेतिच॥१४॥वल्कलाजि
नधारीचकुशकाशयवित्रकः॥कंदमूलाशनोदुःस्थोब्राह्मणःकिंपतिस्तव॥१५॥किंकरिष्यसितेनत्वंम
मभोगान्सुपुष्कलान्॥सर्वदामत्प्रसादेनभुंक्ष्वत्वंवरवर्णिनी॥१६॥तस्यतद्वचनंश्रुत्वानृपतेःपापकर्मणः
॥आहसौदामिनीवाक्यंचंडसेनंनृपाधमं॥१७॥याचस्वमेपतिंराजन्तस्याहंवशवर्तिनी॥ततस्तद्वचना
द्रुतंगत्वाशांडिल्यमब्रवीत्॥१८॥अयोग्येयमृषिश्रेष्ठपत्नीतवगतव्रता॥विरूपाचपलाक्रूरातांमेदेहि
मुनेस्त्रियं॥१९॥याचेहंकृपणामेनांपत्नींतेशीलवर्जितं॥ददामिद्रविणंतूर्णंरूपकांतासहस्रशः॥२०॥त्वंते
नान्यांशुभांपत्नीमुद्वहस्वकुलान्वितां॥शांडिल्यउ०॥सर्वाःस्त्रियःकैतवबहुमूलास्तासांप्रियोनास्तिमनुष्य
लोके॥२१॥ददामितेनाहमिमांप्रियांमेकिमांद्विजंयाचसिदुर्बलंच॥अनेनाध्यवसायेनकिंतेश्रेयोभवि
ष्यति॥२२॥नेयंतवार्हाकृपणात्वंराजाभिसवोवयं॥इत्याकर्ण्याधिकामोधस्तांगृहीतुगतस्त्वरन्॥२३॥सा
निरीक्ष्याहतंपापंप्रज्वलंतीवकोपतः॥अस्पृश्यमहमुद्दस्याचत्वंचेन्मामिच्छसि॥२४॥ब्राह्मणंऋषि
पत्नीचसाध्वींचपतिदेवतां॥हादुरध्यवसायश्चेचंडालस्त्वंभविष्यसि॥२५॥याहियाहिपराक्यापचांडा
लकृपणाधम॥ततःश्रुत्वासतंपापंभयार्तःप्राणविह्वलः॥२६॥चांडालस्तत्क्षणाज्जातःसर्वभूतभयाव
हः॥हाहाकारंततश्चक्रुःसर्वेतेमुनिमानवाः॥२७॥अश्वमारुह्यराजासौअयोध्यामाविशत्पुरीं॥दृष्ट्वा
चांडालरूपंतुब्राह्मणाःपुरवासिनः॥२८॥राजपुत्रामहीपालअंतःपुरनिवासिनः॥बभूवुर्भयभीता

श्वगर्हयंतो महीपतिं ॥२९॥ सर्वोपचिंतया विष्टो नेत्रे स्तंबीस्य कुत्सितं ॥ कृष्णवर्णं च दुर्गंधं क्रूरनेत्रं भयानकं ॥
३०॥ विस्तरं ध्वजिनं पांसुगुंठितं गतिगर्हितं ॥ ततस्ते ब्राह्मणा लोका बोधयित्वा विगर्हितं ॥३१॥ वसिष्ठस्याश्रम
नेतुं समुत्थाप्य प्रचक्रमुः ॥ ततः पुरोधसं प्राप्तो ब्राह्मणैरभिसंवृतः ॥३२॥ वसिष्ठं शरणं प्राप्तः शोचित्वा चात्मन
स्तनुं ॥ राजा विषण्णवदनस्तत्कर्म स्वन्यवेदयत् ॥३३॥ भीतिस्खलितवाक् सर्वं स्वापं तं निजदुःकरं ॥ वसिष्ठो
थ ब्रवीद्वाक्यं चंडसेनं नृपं ततः ॥३४॥ शांडिल्यं गच्छ राजंस्त्वं शापत्राणं यदिच्छसि ॥ सौदामिनी च तद्भार्या ज्व
लंतीमिव तेजसा ॥३५॥ एवमक्षितिपालस्तं नमस्कृत्य पुरोधसं ॥ स जगाम ततः सार्धं शांडिल्यं भार्यया न्वि
तं ॥ प्रणिपत्य च साष्टांगं नमस्कृत्य पुनः पुनः ॥ अब्रवीत्तं मुनिश्रेष्ठं भयत्रस्तो नराधिपः ॥३७॥ स्वामिन् स्वामिन् मुनि
श्रेष्ठ त्वद्भार्यो प्रतिकामुकं ॥ पापोहं पापकर्मा च सर्वथा त्वां समाश्रितः ॥३८॥ इयं माता पिता त्वं मे रघुवंश
समुद्धर ॥ मया त्वपकृतं तेन तस्य प्राप्तं फलं हि मे ॥३९॥ हीनस्य पुण्यहीनस्य निःसत्वस्य गतस्य च ॥ पादाग्र
पतितस्याद्य दयां मे कर्तुमर्हसि ॥४०॥ ततः प्रोवाच स ऋषिभार्या प्रीतो च सुव्रता ॥ मार्कंडो मत्पिता राजन्नृ मा॰श्री
षिश्रेष्ठो हि तस्य धीमतः ॥४१॥ तं गच्छ त्वं मुनिश्रेष्ठ तस्मै सर्वं निवेदयन् ॥ कृपानिधिं भज क्षिप्रं यदि शापांत
मिच्छसि ॥४२॥ तदादेशाः प्रमाणं मे नात्र तु प्रभवाम्यहं ॥ इत्येवमुक्तो मुनिना शांडिल्येन स भूपतिः ॥४३॥ तो
प्रणम्य ययौ तत्र मार्कंडस्याश्रमं प्रति ॥ आसीनमाश्रमद्वारि प्रणम्य च कृतांजलिः ॥४४॥ न्यवेदयद्यथा
वृत्तं शौ स्वकृतं शापकारणं ॥ चांडालत्वं मया प्राप्तं ताभ्यां यच्चोक्तमुत्तरं ॥४५॥ कौ मार्कंडस्तु समाक
र्ण्य कृपया चाभ्यचिंतयत् ॥ क्षणमेकं समाधिस्थः प्रावोचं नृपतिं ततः ॥४६॥ सर्वेषां ब्राह्मणादीनां शृणु व
तां च युधिष्ठिर ॥ याहि त्वं नृपते शीघ्रं चंडवेगासमागमं ॥४७॥ ओंकारसंनिधौ श्रेष्ठं पापशापविमुक्तये ॥ २८
त्वं चेदिच्छसि शापांतं तयोरादेशमाश्रितः ॥४८॥ चंडेश्वरं समभ्यर्च्य तत्र स्नात्वा विधानतः ॥ अवाप्स्य

सि परं स्थानं मुक्तश्चास्मान्नु किल्बिषात् ॥४९॥ एवं मयोक्तं वचनं श्रुत्वा मां प्रणिपत्य च ॥ शांडिल्यं च पुनर्द 79 / 2008
ता तथा सौदामिनी नृप ॥५०॥ स्वलिंगास्तु गमिष्यामि चंडवेगासमागमं ॥ मार्कंडेनोपदिष्टं मे ब्राह्मणानां नु संनिधौ ॥५१॥
एवमुक्त्वा गतस्तत्र तदनुज्ञामवाप्य च ॥ संगमे विधिवत्स्नात्वा पूज्य चंडेश्वरं शिवं ॥५२॥ आगारं सोपवासोश्च कृत्वा विप्रां
श्च भोजनैः ॥ भर्षणेश्चाविसंतोष्य शुद्धात्मा प्रययौ पुरीं ॥५३॥ ततः कालेन महता शुद्धबुद्धिर्महामनाः ॥ कुर्वन् स्ववि
हितं कर्म स्वर्गं प्राप्तो नराधिपः ॥५४॥ दिव्यं विमानमारूढः स्तूयमानोप्सरोगणैः ॥ सर्वपापविनिर्मुक्तः तीर्थस्या
स्य प्रभावतः ॥५५॥ ततः शिवपुरं प्राप्तश्चंडसेनो महीपतिः ॥ स्वारोचिषांतरे पूर्वमादिकल्पे कृते युगे ॥५६॥ राज्ञी चैव
सहस्राणि त्रिंशद्धि प्राप्तानि तत्र वै ॥ एतत्ते कथितं राजन् चंडवेगासमागमं ॥५७॥ श्रवणात्कीर्तनाद्दस्य भ्रूणहत्या प्रण
श्यति ॥५८॥ इति श्रीबा पु॰ रेवाखंडे चंडवेगासमासगमो नाम विंशतिमोध्यायः ॥२८॥ मा॰ कं॰ ॥ ॥ ततो गच्छेत
राजेंद्र एरंडीसंगमं पुनः ॥ तत्र वन्मेदायाश्च सर्वकामफलप्रदं ॥१॥ तृतीया चंडवेगा च स्वर्गसोपानपद्धतिः ॥ त
त्र स्नात्वा दिवं यांति ये मृतास्ते पुनर्भवाः ॥२॥ तिलोदकप्रदानेन पिंडयातेन भारत ॥ अनंतकालिका तृप्तिः पितॄ
णामुपजायते ॥ अमासोमा समायोगे व्यतीपाते च वैधृते ॥ गयाशतगुणं पुण्यं प्रोक्तं एरंडीसंगमे ॥४॥ अमा
सोमसमायोगे राहुग्रस्ते दिवाकरे ॥ एरंडीसंगमे स्नात्वा पुण्यसंख्या न विद्यते ॥५॥ तत्र पिंडप्रदानेन तस्मिन् पर्व
णि भारत ॥ किं गयादिकृतैः श्राद्धैः पितॄणामनृणो भवेत् ॥६॥ एरंडेश्वरलिंगं च सर्वपापप्रणाशनं ॥ कुंकुमेन स
मालिप्य गंधपुष्पैः प्रपूजयेत् ॥७॥ सत्रेणाविश्च वस्त्रैर्दीपनैवेद्यदानतः ॥ दिव्यं वर्षसहस्रं तु मोदते शिवसंनिधौ
॥८॥ दर्शनात्तस्य लिंगस्य गाणपत्यमवाप्नुयात् ॥ तत्रैव चापरं देवं भद्ररुद्रेश्वरं नृप ॥९॥ नृणां भवार्तिभीता
नां लिंगं परमसिद्धिदं ॥ भद्ररुद्रौ पुरा कश्चिद्गंधर्वौ भ्रातरावुभौ ॥१०॥ तदभ्यर्च्य विधानेन गतौ विद्याधरं पुरं ॥
गायंति पितरो गाथां वंशाद्ध्यस्य समुद्भवाः ॥११॥ अपि स्यात्स कुलेस्माकं पुत्रः परमधार्मिकः ॥ तिलोदकप्रदा

रे॰खं॰ तावयश्चैरंडीसमागमे॥१२॥ उद्धरेन्नरकाद्घोरात्पुत्रः दत्तांविधानतः॥ तत्रश्राद्धप्रदानेनपिंडदानेन भारत॥१३॥व
३९ सेन्मन्वंतराणीह ब्रह्मलोके चतुर्दश॥ शस्त्रेण च हतार्थे वै पापमृत्युमृतास्तथा॥१४॥ एकादश्यां चतुर्दश्यां श्रा
द्धं च दत्तमोक्षणात्॥ सूर्येंद्रवीरलोकांश्च प्राप्य क्रीडंति मानवाः॥१५॥ तत्र यस्त्यजति प्राणान् अवशः स्ववशो
पि वा॥ तीर्थस्यास्य प्रभावेन स्वर्गं स्यांति भवंति नृप॥१६॥ चतुर्युगसहस्रं च राजा विद्याधरे पुरे॥ एतत्ते कथितं रा
जन्तीर्थमेरंडिसंगमे॥१७॥ श्रवणात्कीर्तनादस्य गोसहस्रफलं लभेत॥१८॥ इति श्रीरेवाखंडे एरंडीसंग
मो नाम एकोनत्रिंशोध्यायः॥२९॥ ॥मार्कं०॥ तत्रैव पितृतीर्थं च ब्रह्मणा विहितं पुरा॥ दुर्वाससा च ऋषिणा स्था
पितं ब्रह्मशासनात्॥ एरंडेनापि मुनिना सेवितं मुनिवाक्यतः॥ पितृतीर्थं परं श्रेष्ठं पितॄणां मोक्षदायकं॥२०॥
अक्षया जायते तृप्तिः पितॄणां श्राद्धदानतः॥ येनाप्यधिकं राजन्गयायाः पुरतो हितं॥२१॥ अमासोमसमायो
गे पितृतीर्थे नराधिप॥ यः पिंडान्पातयेत्तत्र गयाश्राद्धेन तु किं भवेत्॥२२॥ किं कृते श्च गयाश्राद्धैः किं तीर्थैः किंत
थाव्रतैः॥ रेमूढा नर्मदातीरे पर्वतोमकरं करे॥२३॥ एरंडीसंगमे स्नात्वा तथा चंडासमागमे॥ सकृद्वापि कृतं श्रा
द्धं विधिवत्तिलमिश्रितं॥२४॥ दूर्व्येनयेन केनापि पितॄणां तृप्तिरक्षया॥ तत्र स्नात्वा हि विधिवत्कामना योगमा
श्रितः॥२५॥ संतानकामः संतानं वसुकामो लभेद्वसु॥ विद्याकामो लभेद्विद्यां जयकामो लभेज्जयं॥२६॥ यापि
द्वा पुरुषो वापि यं यं काममिहेच्छति॥ तं तमाप्नोति नियतं स्नात्वा श्राद्धसमन्वितः॥२७॥ इति श्रीरेवा॰ एरंडीसंग
मे पितृतीर्थमाहात्म्यं नाम त्रिंशोध्यायः॥३०॥ मार्कं०॥ ओंकारस्य तथोत्पत्तिं शृणु राजेंद्र समासतः॥ संभवं पंचव
क्त्राणां लिंगानामर्चनं तथा॥१॥ कलेश्चापि कलानां च प्रमाणं कथयामि ते॥ न शक्यं विस्तरेणेह वक्तुं वर्षशतै
रपि॥२॥ युगे युगे युगाचारा ब्राह्मणा वेदपारगाः॥ कलौ कृतयुगाचारः परमात्मैव दृश्यते॥३॥ द्वाविंशत्तु सह ३९
स्राणि तथा लक्षचतुष्टयं॥ मानुषाणां तु वर्षाणां कलेर्मानं स्मृतं बुधैः॥४॥ यवाकारकलिर्भूप स्वभावेन स

81/2008

द्दृत्तणः॥ अल्पक्षीरास्तथा गावो ह्यल्पसस्या च मेदिनी॥५॥ अल्पोदकास्तथा मेघाः स्वल्पविद्यास्तथा द्विजाः॥ येवं
कौमारमारभ्य नराः पलितयौवनाः॥६॥ दशमे द्वादशे वर्षे नारी गर्भधरा भवेत्॥ शूद्रा धर्मपरा नित्यं कलौ लोकादि
गंबराः॥७॥ एकवर्णाः प्रजाः सर्वाः प्रायो म्लेच्छा नृपा नृप॥ आयुषो नियमो नास्ति विप्राणां चावमाननात्॥८॥ स
द्विद्यायास्ततो छेदान्नास्त्रं नाटककल्पितं॥ सत्सिद्धास्तथा दिवा मर्त्याः सिद्धिप्रदायिनः॥९॥ विप्राणां च सभा गोष्ठी
कुलटासु रिरंसया॥ द्रव्यनाशः स्वसस्येन जीवनं पापचिंतनं॥१०॥ सैन्ये सैन्ये न तपो दानं न तीर्थं स्थानदेवताः॥ वे
दविक्रयिणो विप्राः जंस्यज्ञानां गृहे गृहे॥११॥ वेदादेशं करिष्यंति वेदविप्लवकारकाः॥ कन्याविक्रयिणः पापास्त
था कन्योपजीविनः॥१२॥ सहस्रांशो न धर्मस्य कला चैका प्रकीर्तिता॥ शूद्राः पत्नी द्विजानां तु भविष्यंति गृहे गृ
हे॥१३॥ अपरोत्तरभावेन भविष्यंति कलौ नराः॥ बौद्धाः क्षपणकाः पापा नग्ना मलिनकंचुकाः॥१४॥ विडंबयंति चात्मानं मो
हिताः पापकर्मणा॥ न मुक्तं मन्यंते शिष्याः पुत्रश्च पितरं तथा॥१५॥ चंडालाद्द्रव्यहर्तारो वेषप्रव्राजकास्तथा॥ लिंगोपजीविनः
पापास्तथा भस्मोपजीविनः॥१६॥ वैवस्वतेंतरे प्राप्ते कलौ ह्येवं भविष्यति॥ उन्मत्तचारिणः पापाः स्वाचाराः स्वामिनस्त
था॥१७॥ नरा नीचरताः प्रायः सहजे द्वेषधारिणः॥ स्वामिगमनाः स्वकलत्राणां परभार्याः स्वल्पं पराः॥१८॥ परपुत्राः
स्तथा प्रायः परमांसोपजीविनः॥ अल्पश्रोता तथा नृपः खर्वा वृक्षाश्च शाखिनः॥१९॥ एतत्तु कथितं राजन्कलौ पद्य
द्भविष्यति॥ ॐकारस्यैव चोत्पत्तिं शृणु राजन्यथाश्रुतं॥२०॥ कथयामि समासेन माहात्म्यं चातुलं नृप॥ कीर्तना
च्छ्रवणादस्य मुच्यते भवबंधनात्॥२१॥ ओमित्येकाक्षरं ब्रह्म व्याहरन्समनुस्मरन्॥ यत्र कुत्रापि संत्यजेद्देहं स प्रया
ति परां गतिं॥२२॥ वेदमाता च गायत्री ओंकारप्रभवा च या॥ ओमित्येकाक्षरे तस्मिन् ब्रह्मविष्णुमहेश्वराः॥२३॥ ॐ
कारो वेदमूलं तु ततः शाखाः प्रतिष्ठिताः॥ अंगानि स्कंधशाखाश्च पर्णानि स्मृतिरागमः॥२४॥ फलपुष्पाणि
सिद्धांतो मोक्षः स्वादुरसस्तथा॥ वह्नित्रयं शक्तित्रयं चापि स्वरलोकत्रयं नृप॥२५॥ मार्गवर्णत्रयं प्रोक्तं तद्वत्कर्म

त्रयेस्मृतं॥ इतित्रयं चराजेंद्र ओंकारे परिकीर्तितं॥२६॥ त्रिवर्गरूपो भगवानक्षरत्रितयात्मकः॥ अस्मिन् क्षेत्रे
स भगवान् स्वयंमूर्तिः स्थितः सदा॥२७॥ व्यक्ताव्यक्तस्वरूपो यः शिवः श्रीनर्मदांतरे॥ अष्टषष्टिश्च तीर्थानां अस्मि
न् क्षेत्रे व्यवस्थिता॥२८॥ त्रयस्त्रिंशत्तथा देवाः परिवारगणैः सह॥ अस्मिन् क्षेत्रे च रुद्राणां स्थितमष्टोत्तरं शतं॥
२९॥ पंचभूतात्मकं चैव पंचतत्वात्मकं तथा॥ पंचाक्षरं पंचवक्त्रं ओंकारं लिंगमुत्तमं॥३०॥ पृथिव्यां यानि लिंगानि
आसमुद्रांतगोचरे॥ न तेषां पंचवक्त्राणि सत्योंकारं युधिष्ठिर॥३१॥ स्वायंभुवेंतरे प्राप्ते आदिकल्पे कृते युगे॥ दा
नवैर्निर्जितौ देवा नर्मदातीरमाश्रिताः॥३२॥ अंबुचूचुककौतिश्च कालिकेयश्च कालिके॥ देवा ब्रह्ममुखास्तत्र
ईश्वरं शरणं गताः॥३३॥ शिवः स भगवान् प्राह ब्रह्माणं प्रति भारत॥ दृष्टिं कुरु महारौद्रीं दानवानां क्षयंकरीं॥
३४॥ यथा ते दानवाः सर्वे निर्वीर्याः क्षयमाप्नुयुः॥ प्रसूवाच ततो ब्रह्मा त्रिपुरांतकरं हरं॥३५॥ मम मंत्रा विस्मृता
मंत्रा दानवानां भयेन तु॥ ब्रह्मणो वचनाद्रुद्रो हुंकारं वै मुमोच ह॥३६॥ एतस्मिन्नंतरे भित्वा पातालानि तु समच्यु॥
ओंकारपूर्वकं राजन् भूर्भुवः स्वरितीरयन्॥३७॥ पर्वतादुत्थितं लिंगं ज्वलत्कालानलप्रभं॥ सूर्यकोटिसमप्रक्षं ख्यं
ज्वालामालासमावृतं॥३८॥ आदिमध्यांतहीनं च न दृष्टं न श्रुतं क्वचित्॥ ब्रह्मवक्त्रेषु ते वेदाः स्वत उल्का समागम
न्॥३९॥ वेदांगानि च सर्वाणि भणिति च यथा पुरा॥ ततश्चैव स्वयंशंभुर्ब्रह्माणं लोकपावनं॥४०॥ ब्रह्मन् समुद्भू
ता वेदा दृष्टिं कुरु यथेच्छया॥ ततो ब्रह्मा चकार दृष्टिं रौद्रीं दैत्यक्षयंकरीं॥४१॥ यथा ते दानवाः सर्वे निर्वीर्याः क्षयमा
प्नुयुः॥ प्रसूवाच ततो ब्रह्मा त्रिपुरांतकरं परं॥४२॥ सौम्यां चापि तथैवेष्टिं लोकानां शांतिकारिणीं॥ ततो सुरा
न् पश्यन्स दृष्ट्वा चेष्टिं भयंकरीं॥४३॥ हीयमाना भयोद्विग्ना नेशुः सर्वे दिशो दश॥ ओंकारस्य प्रभावेन वेदा विगत
कल्मषाः॥४४॥ संजाता असुराश्चापि रसातलतलं गताः॥ पुष्पवृष्टिः पपातोच्चैर्लिंगमूर्ध्नि पर्वते॥४५॥ देवदुंदुभ ५०
योनेदुर्जयशब्दास्तथाभवन्॥ जगुर्गंधर्वराजानो ननृतुश्चाप्सरोगणाः॥४६॥ गीतो मंदश्च सुरभिर्ववौ वायुस्तदा

83
2008

चले॥ विश्वोत्पाताश्च शांताश्च सुखमापत्तदा जगत्॥४७॥ ततोभ्यर्च्य सुरानंदे चास्ति त्रिदिवं ययुः॥ बहुकल्पं महालिंगं सु
रासुरनमस्कृतं॥४८॥ भुक्तिमुक्तिप्रदं सौम्यं ओंकारं विद्धि पार्थिव॥ तस्मिन् लिंगे तु लीयंते कल्पांते दैवतागणाः॥४९॥ अ
मरं ब्रह्म चैवात्र रुद्र ईशं सिद्धेश्वरं तथा॥ विमलेश्वरमादिं सोमं तीर्थेश्वरं तथा॥५०॥ यत्र सिद्धास्त्रयो वेदाः सषडंगपद
क्रमाः॥ तेनासिद्धेश्वरं सिद्धं सर्वसिद्धिप्रदायकं॥५१॥ स्थितं तु पर्वते तस्मिन्नेव लिंगकोटिसमन्वितं॥ अर्चनात्तस्य लिंगस्य
शिवलोके महीयते॥५२॥ कल्पे कल्पे महाराज क्षीयंते सर्वदेवताः॥ एकां तु पंच लिंगानि मार्कंडं नर्मदां तथा॥५३॥
अविमुक्तं च केदारमोंकारं चामरेश्वरं॥ तथैव च महाकालं पंच लिंगानि चाप्यमी॥५४॥ पुण्यानि पंच लिंगानि प्रात
रुत्थाय यः पठेत्॥ सर्वतीर्थफलं प्राप्य शिवलोके महीयते॥५५॥ एककाली महाकाले वसेद्व्यापिनी सदा॥ सपादको
टितीर्थानां महाकालवने नृप॥५६॥ क्षिप्रारूपेण कावेरी शिवक्षेत्रे व्यवस्थिता॥ चतुःक्रोशाभ्यंतरतो ब्रह्महत्या
न सर्पति॥५७॥ आग्नेयं सिद्धलिंगं च तस्यास्तीरे समाश्रितं॥ शिवखातमिति ख्यातं तत्तीर्थं कुरुनंदन॥५८॥
स्नातस्य तस्य पुंसो हि संभवो न पुनर्भवेत्॥ कीटपक्षिपतंगादि तिर्यग्योनिगता नराः॥५९॥ तस्मिंतीर्थे विमुच्यं
ते शिवस्य वचनं यथा॥ तत्र यः कुरुते श्राद्धं पितॄणां च तिलोदकं॥६०॥ युगकोटिसहस्रं तु पितरस्तेन तर्पिताः॥ द्वि
कलेनैव केदारं शिवेन परिकीर्तितं॥६१॥ तत्र स्नातो दिवं याति न विशेद्योनिसंकटे॥ यज्ञायुतफलं प्राप्य शिवलो
के महीयते॥६२॥ अर्धकोटिस्तु तीर्थानां केदारे कथिता नृप॥ दर्शनादर्चनात्तस्य शांडवे मोक्षफलं नृप॥६३॥ स्म
रणात्पापसंघातः क्षयमायाति भारत॥ केदारस्योदके पीते पुनर्जन्म न विद्यते॥६४॥ अहोरात्रोषितो भूत्वा पयः
पानं करोति यः॥ तस्योदरे भवेल्लिंगं षण्मासं ब्रह्मचारिणः॥६५॥ केदारकीर्तनाद्देव शिवलोके महीयते॥
तथा वाराणसी पुण्या त्रिषु लोकेषु विश्रुता॥६६॥ अंतरिक्षपुरी सा तु मर्त्यलोके पृथक्कृता॥ पंचक्रोशांत
रे स्नानं ब्रह्महत्या न सर्पति॥६७॥ अष्टौ कोट्यस्तु लिंगानि तथा विंशतिकोटयः॥ अविमुक्ते महाराज गुप्ता

रे.खं. निष्क्रयति च ॥६८॥ अत्रैव वरुणायोर्मध्ये स्नानं कृत्वा यथोदितं ॥ सर्वपापविनिर्मुक्तो देववन्मोदते दिवि ॥६९॥ तत्र
४९ तत्र यस्त्यजति प्राणान् शिवं ध्यायन्नृपोत्तम ॥ सहस्रकुलमुद्धृत्य शिवभावं स गच्छति ॥७०॥ तत्र यद्दीयते दानं त
स्य संख्या न विद्यते ॥ तिलोदकप्रदानेन पितॄणां तु भिरक्षया ॥ ७१॥ तत्र यस्त्यजति प्राणान् अवशः स्ववशोपि
वा ॥ ऊर्ध्वं दक्षिण कर्णस्तु शिवेन सहितोध्यते ॥७२॥ संपन्नतारकोद्भानो जटाशूलत्रिनेत्रवान् ॥ फणिभिः कृतशृंगा
रश्चंद्रमौलिर्विभातमान् ॥७३॥ व्याघ्रचर्मांबरीयश्च जरद्गवगतिर्भवेत् ॥ अविमुक्तस्य लिंगस्य स्पर्शनान्मु
क्तिरेव हि ॥७४॥ कालत्रयं च तत्रास्ति काशीपुर्यां न संशयः ॥ गंगासागरसंभेदे च तस्य स्तु कलाः स्मृताः ॥७५॥ गं
गासहस्रवक्त्रैस्तु प्रविष्टा यत्र सागरं ॥ ध्यानावगाहनास्नानास्पिंडदाना च तर्पणात् ॥७६॥ गच्छेत् शिवपुरं तत्र
पितृभिः सह मानवः ॥ द्वारकेश्वरसंज्ञं हि तल्लिंगं विद्धि पार्थिव ॥७७॥ तेन देवाः प्रपन्यंति न तं पश्यंति मानुषाः
पूज्यते देवमुनिभिर्यक्षगंधर्वसेवितं ॥७८॥ गंगेश्वरं द्वितीयं च तृतीयं सागरेश्वरं ॥ चतुर्थं शूलपाणिं तद्वितित्ते
यं चतुःकलं ॥७९॥ कलापंचात्मकं लिंगमोंकारं कामरूपिणं ॥ पंचाक्षरं पंचवक्त्रं नवशक्तिसमन्वितं ॥
॥८०॥ ॐकारं कल्पगातीरे पर्वते मकरंदके ॥ प्राहु पुण्यतमं वेधा लोकत्रितयपूजितं ॥८१॥ शंखकुंदेंदुसंका
शं सद्योवक्त्रं तु पूर्वतः ॥ ऋग्वेदो निर्गतो यस्माद्ब्रह्मा तत्राधिदेवता ॥८२॥ दक्षिणे वामदेवं तु पीताभं सुम
नोहरं ॥ यजुर्वेदोद्भवं विद्धि विष्णुस्तत्राधिदेवता ॥८३॥ अघोरं मेघवर्णाभं पश्चिमेन तु संस्थितं ॥ सावेमेदो
द्भवं विद्धि सर्पकालाग्निदैवतं ॥८४॥ सौम्ये तत्पुरुषं ज्ञेयं कुंकुमारुणसंनिभं ॥ अथर्वनिर्गमस्तस्माद्रायुस्त
त्राधिदेवता ॥८५॥ ईशानमूर्ध्ववक्त्रं तु पंचवर्णं महाद्युतिं ॥ स्मृतिसिद्धांतसंगीतशास्त्राशेषाभिनिर्गमं ॥८६॥
रसभावात्मकं तल्लंतद्वाय्वाकाशदेवतं ॥ एतत्ते कथितं राजन् ॐकारस्य तु वर्णनं ॥८७॥ वक्तुं शक्तो न ल ४९
क्षास्योप्येकवक्त्रस्य का कथा ॥ स्नापयित्वोदकेनापि बिल्वपत्रैश्च योर्चयेत् ॥८८॥ चतुर्वर्षसहस्राणि

85/2008

वसेन्माहेश्वरे पुरे ॥ ओंकारदक्षिणे भागे प्राणत्यागं करोति यः ॥८९॥ वर्षकोटिसहस्राणि शिवलोके महीय
ते ॥ प्रासादं वा मठं वापि पाषाणेष्टिकनिर्मितं ॥९०॥ सुधाधवलितं कृत्वा तृणकाष्ठमयं नृप ॥ स्थापयेत्तत्र यो राजन् स्वश
क्त्या भक्तिभावितः ॥९१॥ चतुर्युगशतं पूर्णं स वसेच्छिवमंदिरं ॥ चित्रमाल्यं स्वच्छं लंचपताकाध्वजशोभितं ॥९२॥ विता
नं किंकिणीयुक्तं नेत्रपट्टोद्भवं शुभं ॥ पंचवर्णकशोभाढ्यं ओंकारस्य निवेदयेत् ॥९३॥ पंचामृते संस्नाप्य चंदना
गरुकुंकुमैः ॥ समालभ्य पटैर्नानाविधैश्च परिधापयेत् ॥९४॥ हेममौक्तिकरत्नैश्च भूषयेन्निजशक्तितः ॥ सघृ
तं गुगुलं चापि धूपं दद्यान्मनोरमं ॥९५॥ घृतपक्वं च नैवेद्यं भक्ष्यभोज्यभोज्यफलादिकं ॥ घंटानादांश्च दीपांश्च
कर्पूरारात्रिकं तथा ॥९६॥ अर्घ्यं नानाविधं दद्याच्छिवायन्नृपसत्तम ॥ वेणुवीणामृदंगैश्च षट्टैश्चापि गीत
कैः ॥९७॥ काहलाशंखवाद्यानि भेरीतालांश्च कांसिकाः ॥ न्यसेश्च विविधैर्देवमोंकारं तोषयेत्सदा ॥९८॥ व्य
जनं गडुकाछत्रं चामरध्वजमानसं ॥ शक्तोपि योगि चेवान्यत् शिवाय विनिवेदयेत् ॥९९॥ हेमधेनुधरादी
नि गजांश्च ग्रामपत्तनं ॥ यद्यदिष्टतमं चान्यत् ॐकाराय निवेदयेत् ॥१००॥ तस्य दानफलस्येह संख्यां कर्तुं
शिवः स्वयं ॥ न शक्नोति महाभाग शिष्टस्य च का कथा ॥१॥ सिद्धेश्वरोंकारयोस्तु चंद्रसूर्यग्रहे नृप ॥ महाध्वजं
रत्नं कुर्यादालयं तत्फलं शृणु ॥२॥ यावत्तत्तंतुसंख्या हि वायुनोद्दीयते नृप ॥ तावद्युगसहस्राणि शिवलोके वसेन्न
रः ॥३॥ इति ते कथितं राजन् ओंकारोत्पत्तिलक्षणं ॥ उत्पन्नमात्र ओंकारे ब्रह्मा वेदानवाप्य च ॥४॥ हर्षेण महता यु
क्तः स्तोत्रमेतदुवास वै ॥ नमस्ते व्योमसंव्यापिने मो व्योमहराय च ॥५॥ सर्वव्यापिन्नमस्तुभ्यं मशिवाय शिवाय
च ॥ अनंतायाप्यनाथाय अमृताय ध्रुवाय च ॥६॥ शंभवे शाश्वतायास्तु योगपीठाश्रिताय च ॥ योगाय योगि
निसंयोगाधारायते नमः ॥ नमः शिवाय शर्वाय सर्वस्य प्रभवाय च ॥ सद्योजाताय देवाय वामवक्त्राय
ते नमः ॥७॥ नमस्ते घोरवक्त्राय नमस्तत्पुरुषाय च ॥ ईशानाय नमस्तुभ्यं त्रिपुरांतकराय च ॥ त्रिनेत्राय त्रिश

लायत्रोंकारायनमोनमः॥ कपालीशोव्ययोबुद्धिवज्रदेहापमर्दनं॥ ११॥ अध्यक्षस्तु विधुःशास्ताविनाकीत्रि
 दशाधिपः॥ अग्निरुद्रोहुताशश्चपिंगलःखादनोहरः॥ १३॥ ज्वलनोदहनोबहिर्भस्मांतश्चक्षमांतकः॥ अपम
त्युपरोधाताबिधाताकर्तसंज्ञकः॥ १२॥ कालोधर्मपतेर्मोक्ताविषमोनियमप्रियः॥ नैरुतोवारुणोहंताकूरद
ष्टिर्भयावहः॥ १३॥ ऊर्ध्वरोमाविरूपाक्षोदंष्ट्रोधूम्रलोहिताः॥ बालोद्युतिबलश्चैवपाशहस्तोमहाबलः॥ १४
श्वेतोश्वरूपोरुद्रश्चदीर्घबाहुर्जलांतकः॥ शीघ्रोलघुर्वायुवेगोभीमश्चवरुवामुखः॥ १५॥ पंचवक्त्रः कप
र्दीचसूक्ष्मतीक्ष्णःक्षयंतकः॥ विधीशोरौद्रवांधन्यःसौम्यदेहप्रमर्दनः॥ १६॥ लक्ष्मीवान्रत्नप्रकाशश्चका
मःसौम्यश्चदैवतं॥ वेदेशोज्ञानतत्वाज्ञोवेदज्ञोगात्रपिंगलः॥ १७॥ भूतपालोवलिर्मित्रसर्वमित्राधिपःसुधः
अनंतपालकोधीरपातालेशोवृषध्वजः॥ १८॥ सुधूम्रःशाश्वतोमुख्यःपिशांगपिंगलेक्षणः॥ विघ्नरीशो
महात्माचसुखीमस्तकविवर्जितः॥ १९॥ शंभुर्विभुर्गणाध्यक्षस्त्र्यक्षश्चैवदिवस्पतिः॥ संवादश्चविवादश्चनमो
लिस्फटिचलक्षणः॥ १२०॥ विसंधिर्विषमःसंधिःकामहाकामपालकः॥ यएकोभगवान्रुद्रोरुद्रकोटिस्वरूपवा
न॥ २१॥ स्रष्टापालयिताकर्तासमेरुद्रप्रसीदतु॥ एवंस्तुतस्तवस्तस्यब्रह्मणःपरमेष्ठिनः॥ २२॥ देवदेवोब्रवीद्वा
क्यंब्रह्माणंप्रतिभारत॥ स्तोत्रेणानेनतेब्रह्मन्तुष्टोहंवैवरंवृणु॥ २३॥ हास्यहंतेनसंदेहोयदप्राप्यंसुरैर
पि॥ एवमुक्तःशिवेनाथब्रह्मामुदितमानसः॥ भूमौप्रणम्यसाष्टांगंकृत्वाचापिप्रदक्षिणं॥ उवाचपरयाभ
क्त्यास्मरन्देवंमहेश्वरं॥ २५॥ ब्रह्मोवाच॥ इमंस्तवंपठेद्यस्तुरौद्रमोंकारमग्रतः॥ ब्राह्मणःक्षत्रियोवैश्यःसदा
तद्गतमानसः॥ २६॥ सर्वान्कामानवाप्नोतिइहलोकेपरत्रच॥ योन्याकामयतेकामांतांस्तानाप्नोतिमान
वः॥ २७॥ शतमेकोत्तरंनाम्नांपठित्वासदिवंव्रजेत्॥ ईश्वरउ०॥ एवंभवतुवैब्रह्मन्यत्तेमनसिवांछितं॥ २८॥ भ ४२
विष्यतितथासर्वंसत्यमेतत्तवोदितं॥ एवमुक्तस्ततोब्रह्मानमस्कृत्यमहेश्वरं॥ २९॥ दिव्यंविमानमारुह्यब्रह्म

87
2008
लोकंमुदायययौ॥ चतुर्युगसहस्रेणब्रह्मणोहःप्रकीर्तितः॥ ३०॥ अनेनैवतुवर्षाणांशतंब्रह्मातुजीवति॥ पितामहश
तंयावद्विष्णोर्मानंविधीयते॥ ३१॥ महेशानिमिषार्धेनसहस्राणिचतुर्दश॥ विनश्यंतितथाविष्णोरसंख्याताःपिताम
हाः॥ ३२॥ एवंकालगतिंज्ञात्वाशिवमोंकारमर्चयेत्॥ शिवाज्ञावर्ततेलिंगेतस्माल्लिंगंसमर्चयेत्॥ ३३॥ दृष्टिलिंगंतुयो
मोहात्सर्वदेवनमस्कृतं॥ सयातिनरकंघोरंशिवस्यवचनंयथा॥ ३४॥ एतत्तेकथितंराजन्नोंकारोद्भवकीर्तनं॥ श्र
वणात्कीर्तनादस्यशिवलोकेमहीयते॥ ३५॥ इतिश्रीवायुपुराणेरेवाखंडेओंकारोत्पत्तिमहात्म्यंनामएकत्रिंशो
ध्यायः॥ ३१॥ मार्कंडेयउ०॥ ततोगच्छेतराजेंद्रकोटितीर्थमनुत्तमं॥ पिप्पल्याःकपिलायोगेखायाश्चसमाग
मे॥ १॥ अनेकानिसहस्राणिसिद्धिप्राप्तानिसंगमे॥ क्षत्रियाणांनृपश्रेष्ठकोटितीर्थप्रभावतः॥ २॥ स्नानमात्रो
नरस्तत्रशिवलोकेमहीयते॥ कोटितीर्थेस्थितोह्यत्रकोटिलिंगसमन्वितं॥ ३॥ ऋषिकोटिसमायातादेवको
टिपुरानृप॥ स्नानार्थंन्यवसंस्तत्रकिंचित्कालंमुदान्विताः॥ ४॥ ततःप्रभृतिविख्यातंकोटितीर्थंनराधिप॥
स्थापितालिंगकोटिस्तुतैस्तैःसंसिद्धिमिच्छुभिः॥ ५॥ इतिकोटितीर्थंनाम॥ मार्कं०॥ कोटितीर्थात्स्वभागेहस्त
स्थितयमानतः॥ तीर्थंकाकहृदंनामपक्षियोनिविमोक्षणं॥ ६॥ उलूकेनहताःकाकास्तत्रैवभरतर्षभ॥ उलूक
पातितान्यत्रकोटितीर्थेशिरांस्यच॥ ७॥ काकानांजलमध्येतु॥ शतशोथसहस्रशः॥ तत्क्षणाद्दिव्यदेहास्तु
तेकाकायानमारुहन्॥ ८॥ विद्याधराणांराजानोमयादृष्टापुरानघ॥ इंद्राश्चैवानुबंधाश्चसुमतोमत्तएवच॥
विद्याधराणांपतयःश्रीमंतोनेकसंख्यया॥ तत्रस्नात्वाचविधिवद्विद्याधरंभवेन्नृ॥ १०॥ इतिकाकहृदतीर्थं
॥ मार्कं०॥ सर्वपापहरंदिव्यंलिंगंवैजंबुकेश्वरं॥ तत्रैवनृपश्रेष्ठकोटितीर्थादनंतरं॥ ११॥ भीतिश्चजंबुकः
पर्वत्याप्रदंष्ट्राभिविक्षतः॥ तदामेघाहतेकालेनर्मदाजलमाविशत्॥ १२॥ ममारार्धजलेतीरेपतितःशिवद
र्शने॥ व्योमस्थःरूपमारुह्यसमागत्यानयद्दिवं॥ १३॥ जंबुकेश्वरनाम्नासततत्रतस्थौहरःस्वयं॥ जंबुकेश्च

रतीर्थंततः प्रभृतिभारत॥१४॥ यांतिदं भयभीतानांतिर्यग्योनिविमोक्षणं॥तत्र स्नात्वा महाराज तिर्यग्जन्मनजा
यते॥१५॥जंबुकेश्वर संज्ञंतु रुद्रं संपूजयेत्तु यः॥दुःखत्रयसमायोगस्तदा नीतस्य न स्पृशेत्॥१६॥इति जंबुकेश्वरतीर्थं
॥मार्कं॰॥पश्चिमे कोटितीर्थस्य लक्षहस्तप्रमाणतः॥तत्र सारस्वतं नाम सर्वतीर्थवरं स्मृतं॥१७॥तत्र स्नातस्य रा
जेंद्र हयमेधफलं लभेत्॥सिद्धः सारस्वतीतत्र तीर्थस्यास्य प्रभावतः॥तत्र यः कुरुते श्राद्धं पितॄणां प्रीतिवर्धनं॥
स याति परमं स्थानं पितृभिः सह मानवः॥१९॥लिंगं सारस्वतं तत्र ब्रह्महत्याव्यपोहनं॥२०॥इति सारस्वततीर्थं॥
र्थं॥मार्कं॰॥पूर्वं मा कपिला प्रोक्ता गौरी विख्यातु वा नदी॥शृणु राजन्पुनस्तस्याश्चरितं पापशोधनं॥२१॥प्रवक्ष्या
म्यामि नृपश्रेष्ठ इतिहासं पुरातनं॥स्वायंभुवेंतरे पूर्वं माद्यि कले कृतयुगे॥२२॥अयोध्याधिपतिः श्रीमान्धुंधु
माराह्वयो नृप॥शक्रतुल्यबलोपेतः सत्यवादी जितेंद्रियः॥२३॥राजलक्षणसंपन्नो देवतातिथिपूजकः॥निरा
बाधाः प्रजाः तस्य भयदारिद्र्यवर्जिताः॥२४॥चतुरंगबलोपेतो भृत्यामात्यसमन्वितः॥पूर्णकोशोतिबलवा
न् आयुष्मान्यज्ञदानवान्॥२५॥बहुपुत्रसुहृन्मित्रो यशस्वी कीर्तिमान्स्थिरः॥सर्वकामदुघा तस्य पृथिवी वृ
क्षसंयुता॥२६॥स्वधर्मस्थाः प्रजास्तस्य राज्ञा सनेन प्रतिष्ठिताः॥एवं राज्ञा सवसुधां यथा शक्रस्त्रिविष्टपं॥
२७॥एकदा मृगयां रंतुं रतिरासीन्महात्मनः॥पाशिभिश्च मृगव्याधैः सार्धं विंध्यवनं ययौ॥२८॥वेदोद्धरण
निर्घोषैर्द्विजानां चाग्निकर्मसु॥नादितास्त्रिषु लोकेषु विख्याता सप्तकल्पगा॥तयोपयोमितं रम्यं विचित्रं व
नमंडलं॥निघ्नन्जीवसहस्राणि क्षत्रियैः सह भारत॥विचचार वनं सर्वं ततोपश्यत्सु दारुणं॥भीमरूपं म
हाघोरं दुःप्रेक्ष्यं सुदुरासदं॥२९॥मेघनादेन गर्जंतं महांतं रोमहर्षणं॥वराहं श्वेतरूपं तु दंष्ट्रायुमलभीषणं
३२॥तं दृष्ट्वा तादृशं तत्र वराहं नृपसत्तम॥उवाच क्षत्रियान्सर्वान्न दृष्टं न मया श्रुतं॥३३॥एतादृशं वरा ४३
हस्य रूपं वेलोमहर्षणं॥इत्युक्त्वा विविधैरस्त्रैयावत्हंतुं समुद्यतः॥३४॥तावत्स घुर्घुरन्वेगान्भयार्तः

84/2008

परिपीडितः॥विवेशनर्मदातोये कोटितीर्थे स विद्रुतः॥३५॥पृष्ठतो नृप विश्याथ तं राजा हयवाहनः॥पुनर्बाणैः सं
धानाशुमृतकल्पं चतं व्यधात्॥३६॥मृतस्तत्रैव पयसि वराहः सुप्रतीकवत्॥तत्क्षणाद्दिव्यदेहस्तु दिव्यं यानम
वाप्तवान्॥३७॥अंतरिक्षस्थितं दृष्ट्वा किमिदं प्राह तं नृपः॥परं विस्मयमापन्नः सत्यमेतद्ब्रवीहि मे॥३८॥तस्यैवं पृ
च्छतो राज्ञो वराहो देवरूपधृक्॥प्रसन्नश्चाब्रवीद्वाक्यं शृणु राजन्निवेदये॥३९॥अंगदं नाम गंधर्वं विद्धि मां त्र्यंबकस्य
तु॥गायेश्च देवगंधर्वैः मया सह शंकरः॥४०॥क्रीडं नास्ते स कैलासे तस्याग्रे न नृपसत्तम॥मंत्रगीतं मया गीतं ज्ञा
त्वा दंडकलक्षणं॥४१॥दृष्ट्वा वंशी चरंभां च कामार्तोहं विमोहितः॥विस्मृतस्मृतिकं तत्र द्विःस्वरं विकृतान्वितः
४२॥विह्वलेन मया तत्र ह्यप्सरोभिः प्रकेलितं॥तादृशं मां च दृष्ट्वा वै कामक्रीडावशं गतः॥४३॥शशाप नंदिः को
पात्मा शंकरो मेध्य भुक्भव॥दशवर्षसहस्राणि भ्रमिष्यसि महीतले॥४४॥ब्रह्मापि निस्त्रपो रंतुं न शक्तः
शिवसंनिधौ॥त्वं तु गायकमात्रोत्र किंकरस्यापि किंकरः॥४५॥अभेध्यभक्षणं यद्वत्शूकरस्य वने कृते॥
तस्मात्त्वं तादृशो भूत्वा महीं विचर दुर्मते॥४६॥कुपितं नंदिनं दृष्ट्वा भयभीतोतरात्मना॥प्रसादितो म
या नंदी शापांतं कृपया दिशात्॥४७॥दर्शनाद्धुंधुमारस्य कोटितीर्थावगाहनात्॥सत्कालं त्वं शूकरी योनिं पुनः प्र
याग मिष्यसि॥४८॥एतत्ते कथितं राजन्वराहरूपकारणं॥यथाहं किल्बिषात्तत्र तीर्थस्यास्य प्रभावतः॥ओं
कारदर्शनाद्राजन्रेवातोयावगाहनात्॥प्राप्तोगं धर्वयोनिं तु प्रहारात्दर्शनाच्च ते॥५०॥विषादं त्यज राजेंद्र क
र्मणां गहनो गतिः॥धर्मबुद्धिं समाधाय सर्वभूतहितो भव॥५१॥जन्मतो रमणं राजन्मरणाज्जन्मसंभवः॥
ज्ञात्वा शुभाशुभं कर्म त्वमात्मानं समुद्धर॥५२॥स्वयमेवार्जितं कर्म स्वयमेवोपभुज्यते॥स्वयं कर्ता च भोक्ता
च शुभस्याप्यशुभस्य च॥५३॥स्वस्ति तेस्तु गमिष्यामीत्येवमुक्त्वाजगाम ह॥वीज्यमानातपत्रस्तु वीज्यमानो
प्सरोगणैः॥५४॥शिवध्यानपरो भूत्वा कैलासं स नगोत्तमं॥गते तस्मिन्नृपश्रेष्ठ पितः श्रीतवाहनः॥५५

रे॰ खं॰ ४४ हयं मुमोच राजा साश्वश्चोपकरणानि च ॥ पाययामास तं चाश्वं कपिला संगमे जलं ॥ ५६ ॥ स्नापयित्वा च तं वेगा
दश्वरोऽतीरचारिणे ॥ स्वयं सविस्मयाविष्टः ओंकारं च रतिं स्मरन् ॥ ५७ ॥ नृपः सुबुधमनाः श्रांतः उपविष्टः शिलात
तले ॥ यावद्विलोकयेद्वश्वं स्नातपानादिकारितं ॥ ५८ ॥ तावत्तमंतरिक्षस्थं ॥ ब्राह्मणं सदृशं ददृ ॥ सत्यस्यांतोरगं
रूपं ब्रह्मयानं समाश्रितं ॥ ५९ ॥ अत्यद्भुतं तु तद्दृष्ट्वा पुनर्विस्मयमागतः ॥ उवाच वचनं राजा पूर्वाश्वं ब्राह्मणं त
तः ॥ ६० ॥ किमेतत्कारणं ब्रह्मन् ब्रूहि सम तत्वं यथातथं ॥ उवाच तद्वचः श्रुत्वा हयः पर्वद्विजोत्तमाः ॥ ६१ ॥ गाल
वं विद्धि मां राजन् कुरुक्षेत्र निवासिनं ॥ ब्रह्म पिंडभक्षणार्थं तपसा दग्ध किल्बिषं ॥ ६२ ॥ अश्वप्रतिग्रहाद्दग्धो जन्मयो
निमवाप्तवान् ॥ एवं तु निरयान्मुक्ता प्राप्य चारोहणी गतिं ॥ ६३ ॥ दावाग्निना तु यद्दग्धं पुनस्तद्धि प्ररोहति ॥ प्रतिग्र
हेणा योदग्धः स दग्धो न प्ररोहति ॥ ६४ ॥ द्रुमसेनः पुरा चासीद्राजा परमधार्मिकः ॥ कांतिपुरपतिः श्रीमान् चक्रव
र्तीमहाबलः ॥ ६५ ॥ राहुसूर्यसमायोगे कुरुक्षेत्रं जगाम ह ॥ गजानश्वान् समादाय हिरण्यं गाश्च भूपते ॥ ६६ ॥ माणि
क्यवस्त्रवैडूर्यवासांसि विविधानि च ॥ दानार्थं ब्राह्मणेभ्यश्च मुदा परममाप्लुतः ॥ ६७ ॥ सूर्यपर्वणि सः स्नात्वा द
दानभ्यर्च्यचस्वयं ॥ दत्वा दानानि कतिचिद्विप्रेभ्यः सव्रता श्रियं ॥ ६८ ॥ राजासमुद्रकुलमथ पिंडिलोरुतवत्तिसाश्रि
तं ॥ ययाचे विनयोपेतः श्राद्धमुद्दिश्य मुद्गलं ॥ ६९ ॥ श्राद्धकालः पितॄणां मे भोजनं क्रियतामिति ॥ ऋषिरु० ॥ राज्ञः प्रति
ग्रहो घोरो मध्वास्वादो विषोपमः ॥ ७० ॥ विप्रास्सरं नास्ति पात्रं सत्यं ति गृहजीवनं ॥ असत्प्रतिग्रहं गृण्हन् नरकेषु
निमज्जति ॥ ७१ ॥ पापयोनिं व्रातं याति न चेत्कुर्यात् प्रतिक्रियां ॥ नाहं प्रतिग्रहं ग्राह्ये प्रतिकारे च न क्षमः ॥ ७२ ॥ बह
वो ब्राह्मणाः संति याचस्वान्यं द्विजोत्तमं ॥ ऋषिणाधिकृतो राजा प्रतिहारमथाब्रवीत् ॥ ७३ ॥ घोषणा क्रियतां त
तः स्थानेश्वरनिवासिनां ॥ प्रतिग्रहाय यं सत्कः सआयाति हसत्वरः ॥ ७४ ॥ कृतेपि घोषणे कश्चिन्नागच्छंन्नृप ४४
तेः पुरः ॥ ततः सकुपितो राजा स्थानं निंदितवान्नृहितत् ॥ ७५ ॥ अब्रह्ममिदं स्थानं न वेदा न च याचनं ॥ न पात्रं

91/2008

नाह्रणमात्रास्ति यतु तीरयतीतरं ॥ ७६ ॥ गार्हत्वा तु तत्स्थानं राजा तान्नृपमीव भवद्ध ॥ ब्राह्मणउ० ॥ श्रुत्वा तु नृपतेर्वाक्यं
सामर्षमिदमब्रुवं ॥ ७७ ॥ गालवोऽहं नृपश्रेष्ठ चातुर्विद्यो महातपाः ॥ यत्तु पाजितपस्वीच सर्वभूतहिते रतः ॥ ७८
गजमश्वं रथं वापि जन्यद्वा दानमुत्तमं ॥ मह्यं देहि महाराज सर्वाभरणभूषितं ॥ ७९ ॥ तिस्रः सार्धाः स्वर्णकोटिर्दी
तुं मे यदि नाक्ष्यते ॥ सत्यमेतद्दर्शब्रूयो नान्ततं गदितं मया ॥ ८० ॥ अनुग्रहमहं कुर्वन् उद्धरिष्ये भवार्णवात् ॥ राज्ञो
वाच ॥ दास्यामि ते न संदेहः त्वमेव मुनिसत्तम ॥ ८१ ॥ ततश्चाश्वरथो दत्तो राज्ञा महाविधानतः ॥ मुद्गलाद्यैर्द्विजैः स
र्वैर्वीर्यमाणेन चानघ ॥ ८२ ॥ गृहीतोऽश्वरथस्तत्र मया सर्वांगभूषितः ॥ पूर्वोक्तदक्षिणा स्वर्णा सहित स्तीर्थमध्य
तः ॥ ८३ ॥ ततः समानमस्तत्स्व द्रुमसेनः पुरं ययौ ॥ मयापि चाग्निहोत्रादि कर्मसत्का यथासुखं ॥ ८४ ॥ तेन पापप्र
संगेन प्रतिकारान योयतः ॥ नानाविधाभिर्दिव्याभिस्त्रिभिः सार्धं तु क्रीडितं ॥ ८५ ॥ निर्द्रव्येण पुनर्भिक्षामिक्षि
ताशाकपालिता ॥ श्रांतश्चेततः पश्चान्मृतोऽहं यत्र कुत्रचित् ॥ ८६ ॥ नानाविधांश्च निरयान्भुक्त्वा तिर्यंच जा
तिषु ॥ आरोहिणीं गतिं प्राप्य तुरंगश्चाभवं क्रमात् ॥ ८७ ॥ त्वया रूढेन नरपते स्नापितः पायितस्तथा ॥ अद्यभ्यो
ऽस्मिन्रश्वाहमात्मनः तीर्थयोगतः ॥ ८८ ॥ मुक्तोऽहं त्वत्प्रसादेन तीर्थस्यास्य प्रभावतः ॥ एतत्ते कथितं राजन् यथा
गास्त्वं विस्मयं पुनः ॥ पापं कुर्वन् पापबुद्धिः पापमेवाश्नुते फलं ॥ धर्मं कुर्वन् धर्मबुद्धिः धर्मपदमवाप्नुयात् ॥ ९०
तस्मात्पापं न कुर्वीत चंचले जीविते सति ॥ त्वत्प्रसादात्तथोंकार कोटितीर्थ प्रभावतः ॥ ९१ ॥ मुक्तोऽहं हययोनेस्तु ब्र
ह्मलोकमवाप्नुयात् ॥ कपिलासंगमः पुण्यो यद्दिनानाति मानवः ॥ ९२ ॥ नोस्य पतनु सा बुद्धिः कपिलासंगमार्थि
नी ॥ शांतिरस्तु शिवं चास्तु चिरं तिष्ठ महीपते ॥ ९३ ॥ एवमुक्त्वा गतो विप्रो ब्रह्मलोकं सनातनं ॥ मार्कं० ॥ एकाकी सत
तो राजा चिंतयामास भारत ॥ ९४ ॥ एकाकी यदि यास्यामि निरश्वश्चरणेन तु ॥ राजानो मां हसिष्यंति हास्यवाक्यैः
परस्परं ॥ ९५ ॥ दस्युभिर्वैहतस्यास्या हयद्दस्त्वमाद्विभिः ॥ अश्वोपस्करमादाय पर्यंतं गिरसाकथं ॥ ९६ ॥ प्रविष्टः

रे॰खं॰ पुरं चैतन् मया लज्जाकरं यतः ॥ एतावता मया लब्धं ब्राह्मणा रोहणं कृतं ॥ ७ ॥ पापस्यास्य विशुध्यर्थं प्रवक्ष्या
४५ मि हुताशनं ॥ बहुकालं मया रुद्धं एष विप्रस्य निग्रहः ॥ ८ ॥ एवं संचिंत्य मनसा राजा तत्रैव सत्वरं ॥ दक्षिणां दिशा
मास्थिस्य शुष्ककाष्ठानि चाहरत ॥ ९ ॥ ततः प्रज्वाल्य वह्निं स कृत्वा चाग्निं प्रदक्षिणं ॥ नमस्कृत्य च वह्निं स विवेश ता
वत्स हंयथा ॥ किंचिद्धावितारूढ नृपदेवी जलान्तिकं ॥ साक्षात्द्रूपा समुद्भूता या विचित्राभरणांबरा ॥ १ ॥ दिव्यगंधा
नुलिप्तांगा दिव्यवस्त्राभिर्विभूषिता ॥ तं गृहीत्वा करे देवी इदं वचनमब्रवीत् ॥ २ ॥ अप्राप्तमरणे राजन् कालेनावि
हितेन तव ॥ अकस्मात्साहसं देव युक्तं न प्रतिभाति मे ॥ ३ ॥ कालं प्राप्तं नरं राजन् ईश्वरोपि न रक्षति ॥ राजोवाच ॥
कासि त्वं तु वरारोहे गौरी गंगानु वा रमा ॥ ४ ॥ कथयस्व महाभागे मम मुक्तिं प्रयच्छ च ॥ देव्युवाच ॥ नाहं गंगा भवा
नी वा कपिलां विद्धि मां नृप ॥ ५ ॥ ध्रुवं रुद्रांगसंभूतां नर्मदा तत्र संभवा ॥ गिरिजा स्नानवस्त्रोपासंभूतिर्मम पर्व
तः ॥ ६ ॥ तृतीया च सुदानस्य यज्ञे कल्पे तु पार्थिवे ॥ सोमाव भक्ष्यमध्यानु ममोत्पत्तिरिहानघ ॥ ७ ॥ ब्रह्मविष्णुमहेशा
न स्नानार्घोद्भूतारिभिः ॥ तिलोदकैर्मुनीनां च प्रणिताकलशोदकैः ॥ ८ ॥ तथा सोमरसैश्चैव मधुदुग्धाज्यमिश्रितैः
॥ तत्रस्थ ततः प्रवाहो मे द्रवद्रव्यैर्महान्पुरा ॥ ९ ॥ रेवाजलसमुद्भूता रुद्ररूपात् समुद्भवा ॥ रेवा पुनः प्रवाहेण संगता
हं नृपोत्तम ॥ १० ॥ रुद्रावर्त पदं चात्र वर्तते मुक्तिदायकं ॥ मार्कंडेयाश्रमं गच्छ पर्वभागे व्यवस्थितं ॥ ११ ॥ सपाद
लक्षं तत्रास्ति ऋषीणां ब्रह्मचारिणां ॥ जपध्यानरतानां च नानाव्रतधृतां तथा ॥ १२ ॥ एवमुक्त्वा ययौ राजा देवी चां
तर्दधे ततः ॥ हृष्टस्तु चक्रवर्ती मार्कंडेयस्याश्रमं ययौ ॥ १३ ॥ गत्वा प्रणम्य तं सोपि समुपविष्टः स्तदग्रतः ॥ ऋषीणां
चार्घपाद्यैस्तु स्वीकृतो ह्यासनेन तु ॥ १४ ॥ राजोवाच ॥ अद्य मे सफलं जन्म त्वत्प्रसादाद् बुद्धदर्शनात् ॥ वृत्तांतं च तदा
राजा कथयामास पौर्वकं ॥ १५ ॥ मार्कंडेयश्च तच्छ्रुत्वा वृत्तांतं पृथिवीपते ॥ मार्कंडेय उ० ॥ कुशलं ते नृपश्रेष्ठ ध
र्माचारविशारद ॥ १६ ॥ कथं स्वसैन्यं संत्यज्य एकाकी त्वमिहागतः ॥ रेवाकपिलयोर्योगे स्नात्वा स्तोत्रमिदं ज ४५

93/2008

पो ॥ १७ ॥ ध्रुवं स्नानात् दिवं याति रेवाकपिलसंगमे ॥ प्रवाहमुमुक्षुर्वा श्यसंस्मरन् कपिलोह्यहं ॥ १८ ॥ सा पुरा पृष्टमे नंदिकस्यो
तो हः प्रणाशिनी ॥ कपिला सरितां श्रेष्ठा पुरा वा समाश्रय ॥ १९ ॥ अमृता पुण्यगर्भा त्वं त्वमेव कलुषापहा ॥ सरस्वती तथा गं
गा यमुना गौतमी शुभा ॥ २० ॥ रेवा क्षिप्रा च वरुणा असिता वृता नदी प्रिया ॥ चंद्रभागा च सिंधुश्च गोमती रावती तथा ॥ २१ ॥
चर्मण्वती वितस्ता च गभस्ती च मही तथा ॥ सरयू गंडकी चैव घर्घरा विदुरा तथा ॥ २२ ॥ दंडका विष्णुका चैव पारा वेत्रवती
तथा ॥ विवक्षा चव भारा दापयाः स्मीनां लिनी तथा ॥ २३ ॥ वेत्रका चैव कावेरी भीमा कृष्णा तथांबिका ॥ भद्रा सुभद्रा ता
पी चक्रतीपायमालिनी ॥ २४ ॥ एतान्यान्याश्च सरितस्त्वत्स्वरूपा त्वमेव वा ॥ सर्वतीर्थमयी यस्मात्सर्वं गत्वा न गम्य
ते ॥ २५ ॥ लोकत्रयं त्वया व्याप्तं अपां रूपेण सुव्रते ॥ प्रसीद त्वं महाभागे लोकपितपाविनी ॥ २६ ॥ एवं स्तुता च तो देवी
मार्कंडेयस्य तपोनिधेः ॥ पुष्पकं यानमारूढा सर्वाभरणभूषिता ॥ २७ ॥ चतुर्भुजा त्रिनेत्रा च चंद्रबिंबनिभानना ॥ उवा
च वचनं देवी मार्कंडं मुनिसत्तमं ॥ २८ ॥ स्तोत्रेणानेन तुष्टाहं वरं वरय सुव्रत ॥ मार्कं० ॥ यदि तुष्टासि देवि त्वं वरदा नु म
म कपिले ॥ २९ ॥ कुरु मलं हर कल्याणि लोकानां भवसंभवं ॥ देवि त्वत्संगमे स्नात्वा ध्रुवं यांति शिवांतिकं ॥ ३० ॥ प्रसन्ना
च हरं देहि धुंधुमाराय सांप्रतं ॥ एष राज्यं महद्भुक्त्वा सांतः पुरपरिग्रहः ॥ ३१ ॥ यं यं चिंतयते कामं तं तं प्राप्नोति सांप्र
तं ॥ देहांते च दिवं यातु पुत्रदारजनैः सह ॥ ३२ ॥ कपिलोवाच ॥ एवं भवतु विप्रेंद्र मत्तो यच्छ्रुतिं त्वया ॥ ततस्तदा प्रीतु नृ
पतिस्त्वत्प्रसादाद् द्विजोत्तम ॥ ३३ ॥ एवमुक्त्वा ययौ देवी कपिला लोकपावनी ॥ मार्कंडेयं च तं नौ राजा मुनिभिः परिवा
रितं ॥ ३४ ॥ प्रणिपत्य यथान्यायं गतस्तु स्वपुरं तदा ॥ ततः कालेन महता धर्मं धर्मे पुरा नृपः ॥ ३५ ॥ दानं दत्वा मखि
रिष्टा मुक्त्वा राज्यमकंटकं ॥ सपुत्रामात्यभृत्यश्च धुंधुमारो दिवं गतः ॥ ३६ ॥ एतत्ते कथितं सर्वं मया दृष्टं पुरा य
था ॥ श्रवणात्कीर्तनाद्स्य मुच्यते भवबंधनात् ॥ अत्रैव संगमे तीर्थं दैत्यसूदनसंज्ञितं ॥ चक्रतीर्थं च परमं सर्व
पापप्रणाशनं ॥ ३७ ॥ वामनप्रभृतिन्याहुर्लक्षतीर्थानि तत्र वै ॥ पृथग्वक्तुं न शक्यं ते तानि तीर्थानि भारत ॥ ३८ ॥

रे॰खं॰ इतिश्रीरेवाखंडेकपिलासंगममाहात्म्यंद्वात्रिंशोध्यायः॥३२॥ ॥युधिष्ठिरउवाच॥केव्रजंतियमंविप्रकीदृशानरकाश्चिते
४८ एतन्मेसर्वमाख्याहिस्वर्गलोकंव्रजंतिके॥१॥मार्कंडेयउ०॥यांतिपुष्पकयानेनपुष्पाराममप्रदायिनः॥देवायतनदातारो
यांतिमर्त्याश्चमस्यच॥२॥अनाथमंडपानांचतेक्रीडंतेगृहोत्तमैः॥दिव्यंवर्षशतंकेपिसहस्रंकेपिसाधिकं॥३॥स्वर्गेव
संतिनियतंस्वन्नात्याधर्मसाधकाः॥देवाग्निगुरुविप्राणांमातापित्रोश्चपूजकाः॥४॥पूज्यमानानरायांतिकामयाने
यथासुखं॥घातयंतीद्विजाःसर्वायांतिदीपप्रदानतः॥५॥प्रतिश्रयप्रदानेनसुखंयांतिशिवालये॥सर्वकामसमृद्धेनय
थागच्छतिगोप्रदः॥६॥येचानपानंयच्छंतितेतृप्तायांतिमानवाः॥अंनौषधप्रदानेनसुखंयांतिनिराकुलाः॥७॥द्विज
यानाहिगच्छंतिगुरुशुश्रूषणेरताः॥पादाभ्यंगंद्विजेदद्यात्सोश्वपृष्ठेनगच्छति॥८॥पादुकोपानहौदत्वाअश्वारूढो
दिवंव्रजेत्॥इत्येवमादिभिर्दानैःसुखंयांतिशिवालये॥९॥स्वर्गेचविपुलान्भोगान्प्राप्नुवंत्यन्नदानतः॥सर्वेषामेवदा
नानामंनदानंपरंविदुः॥१०॥सद्यःप्रीतिकरंपुण्यंबलपुष्टिविवर्धनं॥नान्नदानसमंदानंत्रिषुलोकेषुविद्यते॥११॥
अंनाद्भवंतिभूतानिम्रियंतेतदभावतः॥रक्तंमासंवसाशुक्रंक्रमादन्नात्प्रवर्तते॥१२॥शुक्राद्भवंतिभूतानितस्मादन्नम
यंजगत्॥हेमरत्नादिनागेंद्रनारीस्रक्चंदनादिभिः॥१३॥समस्तैरपिसंप्राप्तैर्नरमंतेबुभुक्षिताः॥गर्भस्थाजायमानश्च
बालावृद्धाश्चमध्यगाः॥आहारमभिकांक्षंतियतोदेयदानवाः॥क्षुधेवसर्वव्याधीनांव्याधिःश्रेष्ठतमोमतः॥१४॥
तस्मान्नौषधदानेनप्रतीकारःप्रकीर्तितः॥नास्तिक्षुत्समंदुःखंनास्तिरोगःक्षुधासमः॥१५॥नास्त्याहारसमंसौख्यं
जीवनंनान्नतःपरं॥अतएवमहापुण्यमंनदानेनभारत॥१६॥अतःक्षुदग्निसंतप्ताम्रियंतेसर्वजंतवः॥ददस्वा
नंददस्वान्नंददस्वान्नंनराधिप॥१७॥अंनदःप्राणदोलोकेतस्माद्दन्नप्रदोभवेत्॥अंनदप्राणदःप्रोक्तःप्राणदश्चा
पिसर्वदः॥१८॥तस्मादंनप्रदानेनसर्वदानफलंलभेत्॥त्रैलोक्येयानिदानानिभोगाःस्त्रीवाहनानिच॥१९॥अं ४८
नपानादियत्किंचिदैश्वर्यंचयुधिष्ठिर॥अंनदानस्यतत्सर्वमिहामुत्रफलंस्मृतं॥२०॥यस्यान्नपानपुष्टांगःकुरु

95/2018

तेधर्मसंचयः॥अंनप्रदातुस्तस्यार्धंकर्तुश्चार्धंनसंशयः॥२१॥धर्मार्थकाममोक्षाणांदेहःपरमसाधनं॥अंनंप्रजाप
तिःसाक्षादंनंविष्णुःशिवःस्वयं॥२२॥तस्मादंनसमंदानंनभूतंनभविष्यति॥त्रयाणामपिलोकानामुदकंजीवनंस्मृतं
२३॥पवित्रममृतंदिव्यंशुद्धंसर्वरसायणं॥नाम्नापिजीवनंतस्माद्वितीयाधऽटस्तनुः॥२४॥अंनपानाश्वगोवस्त्रशय्या
छत्रासनानिच॥प्रेतलोकप्रशस्तानिदानान्यष्टौयुधिष्ठिर॥२५॥एवंदानविशेषेणधर्मराजपुरंनराः॥यस्माद्यांतिसु
खेनैवतस्माद्धर्मंसमाचरेत्॥२६॥अंनदानमहाराजफलंचैवतुपुष्कलं॥पितृभ्यःप्रयतोदद्यात्तीर्थेचैवामरेश्वरे॥२७
तीर्थानिपुण्यक्षेत्राणियानिवैकीर्तितानिच॥काममोक्षप्रदानीहसर्वसिद्धिकराणिच॥२८॥सर्वेषामपितेषांवैमा
तेयंपरिकीर्तिता॥नर्मदासरितांश्रेष्ठासप्तकल्पवहानघ॥२९॥तपसांयज्ञदानानांसंख्यातीर्थेषुविद्यते॥नर्मदाः
यांनसंख्यास्तितेषामिसाहशंकर॥३०॥यथाशिवस्तथारेवापूजनीयाप्रयत्नतः॥येचापिक्रूरकर्माणःपापादा
नविवर्जिताः॥३१॥तेषांशृणुमहाराजयातनावैसमासतः॥यथाघोरेणतेयांतिदक्षिणेनयमालयं॥षडशी
तिसहस्राणियोजनानांहितत्पुरं॥अतोज्ञेयंमहारौद्रंनानारूपैरधिष्ठितं॥३३॥समीपस्थमिवाभातिनृणांतु
शुभकर्मणां॥पापानामतिदूरस्थंपथारौद्रेणयांतिते॥३४॥तीव्रकंटकयुक्तेनशर्करापूरितेनच॥क्षुरधारा
व्रतैस्तीक्ष्णैःपाषाणैर्निचितेनच॥३५॥केचित्संकेनमहतादुस्तारैश्चपातकैः॥लोहशृंगीभिरुग्राभिर्निचिते
नकचित्कचित्॥३६॥लताप्रतानविषमपर्वतेवृक्षसंकुले॥सुतप्तांगारपूर्णेनयांतिमार्गेणदुःखिताः॥३७
कचिद्विषमगर्तौघैःकचिल्लोष्टेष्टिकान्विते॥सुतप्तवालुकाभिश्चतथातीक्ष्णैश्चशंकुभिः॥३८॥अनेकभग्नशा
खाभिरावृत्तेचकचित्कचित्॥कष्टेनतमसाकेचिद्गच्छंत्यालंबिताःकचित्॥३९॥मार्गेश्टंगमंकेस्तस्मिंस्तथादावा
ग्निविदाहिताः॥कचित्तप्तशिलाभिश्चपंकेनकचिन्नानतः॥४०॥कचिदुष्णांबुनापूर्णेकरीषाग्निचितेकचित्॥कचि
त्प्रचंडव्याघ्रदंशकीटैःसुदारुणैः॥४१॥कचिन्महद्दुःखैश्चकचिच्चाजगरावृते॥भ्रमरीभिश्चरौद्राभिःक

रे॰ खं॰ विसर्पार्विषोल्बणैः॥ ४२॥ मत्तमातंगयूथैश्च समंताच्च प्रमाथिभिः॥ पंथानमुल्लिखद्भिश्च तीक्ष्णशृंगैर्महाबलैः॥ ४३॥
४७ महाविषाणैर्महिषैरौद्रैर्मत्तैस्तथापरैः॥ डाकिनीभिश्च रौद्राभिर्विकरालैश्च राक्षसैः॥ ४४॥ मर्त्यैश्च व्याधिभिर्घोरैः
पात्यंकेश्च दुरासदैः॥ महापांशुप्रवर्षेण महाचंडेन वायुना॥ ४५॥ पर्वतानिकरवर्षेण हन्यमाना निराश्रयाः॥ क्वचिद्वि
द्युत्प्रपातेन दार्यमाणा व्रजंति हि॥ ४६॥ महता बाणवर्षेण ताड्यमानाः समंततः॥ पतद्भिर्वज्रसंघातैरुल्कापातैः सु
दारुणैः॥ ४७॥ गिरिशृंगनिपातैश्च चूर्णमानाः पुनः पुनः॥ प्रदीप्तांगारवर्षेण दह्यमानाः प्रयांति हि॥ ४८॥ महता पांशु
वर्षेण पूरितास्तेन च रुदंति हि॥ महामेघरवैर्घोरैर्वित्रास्यंते मुहुर्मुहुः॥ ४९॥ निर्भिन्ना मुषलवर्षेण चूर्यमाणाश्च सर्वशः॥
धावंति महाक्षारांबुवर्षेण सिच्यमानास्तथापरे॥ ५०॥ केचिद्दुष्टैस्तिमिरसंपातैः पतंति च॥ अपावृतागारराश्च क्रंदयंते के
चिदुद्गस्तथा॥ ५१॥ दृश्यं संतप्तरौद्रेण दुर्गोणांतोर्जितेन च॥ निरालंबेन मार्गेण निर्जलच्छायकेन च॥ ५२॥ अविश्रामे
ण द्रवं यांति पापकृतापमं॥ तमोरूपेण कष्टेन सर्वदुःखाश्रयेण च॥ ५३॥ नीयंते देहिनः सर्वे महापापपरा
यणाः॥ यमदूतैर्महारौद्रैर्यमाज्ञाकारिभिर्बलात्॥ ५४॥ एकाकिनः पराधीना मित्रबंधुविवर्जिताः॥ शोचंतः स्वा
नि कर्माणि दह्यंते च मुहुर्मुहुः॥ प्रेतीभूता विवस्त्राश्च शुष्ककंठोष्ठतालुकाः॥ निराश्रया कृशांगाश्च त्रस्ताभी
तां क्षुधान्विताः॥ ५५॥ केचिद्बद्धं खलया बद्धा गलपादकरेषु च॥ कृष्यंते कर्कशा मार्गे यमदूतैर्महाबलैः॥ ५६
घृष्यमाणा महीपृष्ठे पृष्टपृष्टकरीतटाः॥ केशपाशाविबद्धाश्च कृष्यंते केचिदाकुलाः॥ ५८॥ ललाटे चांकुशै
र्भिन्ना कृष्यंते देहिनः क्वचित्॥ पार्श्वबाहुनिबद्धाश्च जठरे च प्रपीडिताः॥ ५९॥ ग्रीवापाशानिकृष्टाश्च प्रयां
त्यन्ये सुदुःखिताः॥ जिह्वाग्रांकुप्रदानेन समानीय कृकाटिका॥ ६०॥ अर्धचंद्रेण गृह्यंते क्षिप्यमाणा इतस्त
तः॥ शिश्नेवृषणयोश्चैव रज्वा बद्धास्तथापरे॥ ६१॥ विछिन्नहस्तपादाश्च विछिन्नकर्णोष्ठनासिकाः॥ विछि ४७
न्नशिश्नवृषणाः छिन्नजिह्वांगसंधयः॥ ६२॥ अंकुशैर्भिद्यमानाश्च दह्यमानाः सरीसृपैः॥ इतश्चेतश्च

धावंति क्रंदमाना निराश्रयाः॥ ६३॥ मुद्गरैर्लोहदंडैश्च घनघातैश्च दारुणैः॥ कशाभिश्च प्रतोदैश्च दह्यमाना पु
नः पुनः॥ ६४॥ भिंदिपालैर्विशीर्यंते वमंतः शोणितं बहु॥ याचमानाश्च सलिलमन्नं चापि बुभुक्षिताः॥ ६५॥ छा
यां प्रार्थयमानाश्च शीतार्ताश्चानलं तथा॥ दानहीनाः प्रयांत्येव पार्थ नाविमुखा नराः॥ ६६॥ ये कृतं शुभपाथेयं
सुखं ते यांति वै यमं॥ एवं पथाति कष्टेन प्राप्ताः प्रेतपुरं नराः॥ ६७॥ प्रज्ञापिता स्तदा दूतैर्निवेद्यंते यमाग्रतः॥ तत्र
ये शुभकर्माणस्तान्संभावयते यमः॥ ६८॥ स्वागतासनदानेन पाद्यार्घ्यप्रियभाषणैः॥ धन्या यूयं महात्मानः आ
त्मनो हितकारिणः॥ ६९॥ यतो दिव्यसुखार्थं वै भवद्भिः सुकृतं कृतं॥ नर्मदानरमाभिस्पर्वते मरकंटके॥ ७०॥ स्ना
नं दत्तं तपस्तप्तं हुतं ध्यातं तथार्चितं॥ स्तुतं श्रुतं च तद्वाक्यं दृष्टं चापकृतं तथा॥ ७१॥ यातं नतं स्थितं चैव मनः पतंवि
धानतः॥ वाराणस्यां कुरुक्षेत्रे प्रयागे पुष्करे तथा॥ ७२॥ गयायां नैमिषारण्ये गंगासागरसंगमे॥ केदारे भैरवे चा
पि प्रभासे नागनिभषणे॥ ७३॥ महाकालवने रम्ये श्रीशैले त्रिपुरांतके॥ द्वारकायां द्रुपरज्यां देवदारुहविंध्यपर्वते॥
७४॥ त्र्यंबके धूतपापेन नीलकंठे तथैव च॥ गंगाद्वारे हिमस्थाने तथा कालिंजरे गिरौ॥ ७५॥ एतेष्वन्येषु तीर्थे
षु सत्रेषु च यथाकृतं॥ यात्रास्नानात्तथा चैवातुलान्तानविधानतः॥ ७६॥ दत्तानमानतथाध्यातालेवधातन्म
फलं ध्रुवं॥ भवद्भिः शीलसंपन्नैः श्रुतशास्त्रैश्च सत्तमाः॥ ७७॥ इदं विमानमारुह्य दिव्यस्त्रीभोगभूषिते॥ ग
छध्वं वांछितं स्थानं सर्वकामसमन्वितं॥ ७८॥ तत्र भुक्त्वा महाभोगानंतान्पुण्यसंक्षयात्॥ यत्किंचिदन्यदशुभं
स्वल्पं तदपि भोक्ष्यथ॥ ७९॥ एवं ते धर्मराजात्तु पतनं पुण्यमेव च॥ उवाच तान्धर्मराजः शृणुतेदं हि सत्तमाः॥ ८०
सर्वेषामस्ति पुण्यानां पतनं भोगपूरतः॥ कालेन बहुनाप्येन वर्जयित्वा तु कन्यकां॥ ८१॥ आस्ते वै कन्यका योगो
व कन्यकातीरवासिनः॥ आरोहंति विमानानि सर्वेषामुपरिस्थिताः॥ ८२॥ सर्वतीर्थेषु संख्यास्ति दानस्यापि ण
स्य च॥ कन्यागायाने संख्यास्ति प्रोक्तं च ब्रह्मादिभिः पुरा॥ ८३॥ तत्र यद्दीयते दानं स्वल्पं वा यदि वा बहु॥ तदसं

47/2008

रे॰ खं॰ स्वांमवंनरलंजनंतंस्वर्गमश्नुते॥८४॥म्रियतेतत्रयःकश्चित्सतनानगानादिभिः॥दिव्यंयानंसमाश्रित्यत्रयाणामे
४८ कमुगमवेत्॥८५॥तत्रापिभावनायोगात्तत्लोकाधिवासनं॥शिवसंनिधिमाप्नोतियदिवाब्रह्मलोकभाक्॥८६॥प्र
यातिवाविष्णुलोकंविष्णोरनुचरोभवेत्॥एतत्तेकथितंराजन्कपिलासंगमाश्रितं॥८७॥ओंकारसंभवंचैवतीर्थं
चामरकंटके॥पश्यंतिपुण्यकर्माणोयमंमित्रमिवात्मनः॥८८॥येपुनःक्रूरकर्माणिस्तेपश्यंतिभयानकं॥पापाचरिष्ट
जनयनाविपरीतामवुद्धयः॥८९॥दंष्ट्राकरालवदनंभ्रकुटिलक्षणं॥ऊर्ध्वकेशोमहानश्मश्रुंप्रस्फुरन्नधरोत्तरं
॥९०॥अष्टादशभुजंक्रूरंनीलांजनचयोपमं॥सर्वायुधोत्तमधरंगर्जंतंदंडपाणिकं॥९१॥महामहिषमारूढंदी
प्ताग्निसमलोचनं॥रक्तमाल्यांवरधरंमहामेरुरिवोच्छ्रितं॥९२॥प्रलयांबुदनिर्घोषंपिबंतमिववारिधिं॥ग्रसं
तमिवत्रैलोक्यंउद्गिरंतमिवानलं॥९३॥मृत्युस्तस्यसमीपस्थोवन्हिःकालानलोपमः॥कालश्चांजनसंकाशः
कृतांतश्चभयानकः॥९४॥मकरश्चोयमरकं॥कालरात्रिश्चदारुणा॥विविधाव्याधयःकुष्ठानानारूपाभया
नकाः॥९५॥शक्तिशूलांकुशधराःपाशचक्रासिधारिणः॥वज्रपट्टिशादंष्ट्रोश्चरौद्राःक्षणधनुर्धराः॥९६॥असं
ख्यातामहावीर्याःक्रूराश्चांजनसंनिभाः॥सर्वायुधोत्तमधरायमदूताभयानकाः॥९७॥एवंविधेनचानेकपरि
वारेणासंवृतं॥यमंपश्यंतिपापिष्टाश्चित्रगुप्तंचभीषणं॥९८॥निर्भर्त्सयतिचात्यर्थंयमोवैपापकारिणां॥चि
त्रगुप्तश्चभगवान्धर्मवाक्यैःप्रबोधयेत्॥९९॥भोभोदुष्कृतकर्माणःपरद्रव्यापहारकाः॥गर्वितारूपवीर्ये
णपरदारप्रधर्षणाः॥१००॥यत्स्वयंक्रियतेकर्मतत्स्वयंभुज्यतेपुनः॥तत्किमात्मोपघातायभवद्भिर्दुष्कृतंकृतं
॥१॥किमर्थंपरितप्यध्वंपीड्यमानाःस्वकर्मभिः॥भुज्यंतुस्वानिकर्माणिनास्तिदोषोत्रकस्यचित्॥२॥भोभो
नृपदुराचाराःप्रजाविध्वंसकारिणः॥स्वल्पकालस्यराज्यस्यकृतेवैदुष्कृतंकृतं॥३॥भवद्भिराज्यलोभेनमो ४८
हेनान्यायतःप्रजाः॥यद्दंडिताःफलंतस्यसंभुज्यध्वंयथातथं॥४॥कतद्राज्यंकलत्रंवायदर्थमशुभंकृतं॥त

99/2008

सर्वंपरित्यज्ययूयमेकाकिनःस्थिताः॥५॥तद्बलंवीक्ष्यपश्यामियेनविध्वंसिताःप्रजाः॥यमदूतैःपीड्यमानानामधु
नाकीदृशंभवेत्॥६॥एवंबहुविधैर्वाक्यैरुपालब्धायमेनते॥शोचंतिस्वानिकर्माणितूष्णींभूतास्तुपार्थि
वाः॥७॥इतिवाक्यैःसमादिश्यनृपाणांधर्मराट्ततः॥तेषांपापविशुद्ध्यर्थंयमदूतान्तथाब्रवीत्॥८॥भोभोचंड
महाचंडकैवर्तोजगरानल॥टंतुराभूमकवाहीकगृहीत्वान्नृपतीनिमान्॥९॥विशोधयध्वंपापेभ्यःक्रमेणनरकाग्नि
षु॥शोध्यंतेधातवोयद्वात्तक्षारदाहाम्लसीसकैः॥११०॥पुरैश्चधर्मनैर्यद्वत्कुट्टनैःपाचनैरपि॥धर्मराजवचः
श्रुत्वादूतास्तेचापकारिणः॥११॥ततःशीघ्रंसमुत्थाप्यनृपान्संगृह्यपादयोः॥भ्रामयित्वातुवेगेनाक्षिप्युर्यम
किंकराः॥१२॥सर्वप्राणेनमहतासुप्रतप्तेमहीतले॥आस्फालयंतिचतथाअश्मसारमयेद्रुमे॥१३॥ततस्ते
ते सर्वएवास्तनिपतितैर्जर्जरीकृताः॥विसंज्ञाश्चरुदासीरन्निश्चेष्टाश्चयुधिष्ठिर॥१४॥ततस्तेवायुनास्पृष्टाःशा
नैरुज्जीविताःपुनः॥पुनःपापविशुद्ध्यर्थंक्षिप्यंतेनरकार्णवे॥१५॥अष्टाविंशतिरेवाधःक्षितौनरककोटयः॥
सप्तमस्यतलस्यांतेघोरेतमसिसंस्थिताः॥१६॥अतिघोरामहाघोराघोरघोरतरास्तथा॥असंतदुःखजन
नीघोररूपाचपंचमी॥१७॥षष्ठीतरणतारास्यासप्तमीचभयानका॥अष्टमीकालरात्रीचनवमीचभयो
त्कटा॥१८॥दशमीद्यावचंडाचमहाचंडाततोप्यधः॥चंडकोलाहलाचैवप्रचंडाचवराग्निका॥१९॥पद्मापद्मा
वतीभीमाभीषणाचैवनायिका॥करालाविकरालाचवज्राविंशतिमास्मृताः॥२०॥त्रिकोणापंचकोणाच
सुदीर्घापरिवर्तुला॥सप्तभौमाष्टभौमाश्चसुदीप्ताइतिचापरे॥२१॥इतितानामतःप्रोक्ताघोरानरककोटयः
अष्टाविंशतिरेवासुत्तंनरकायातनाभुवः॥२२॥तासांक्रमेणविज्ञेयाःपंचपंचैवनायकाः॥प्रत्येकंसर्वको
टीनांनामतस्तुविशांपते॥२३॥रौरवःप्रथमस्तेषांरुदंतिपत्रजंतवः॥महारौरवपीडाभिर्महद्भुर्चैरुदंतिहि
॥२४॥तमःशीतंतथाचोष्णंपंचैतेनायकाःस्मृताः॥अघोरःप्रथमस्तीक्ष्णःपद्मःसंजीवनःशठः॥२५॥महा

रे॰ खं॰ मार्यो विलोमश्च वकेरकः करकस्तथा ॥ तीव्रवेगः करालश्च विकरालः प्रकंपनः ॥ २७ ॥ महापद्मः सुवक्रश्च काल
४९ सूत्रः प्रगर्जनः ॥ शूचीमुखः सुनेत्रश्च खादकः सुप्रपीडकः ॥ २८ ॥ कुंभीपाकः सुपाकश्च क्रकचोऽथ प्रपीडकः ॥ अंगा
रराशिभवनं असृक्पूयहृदस्तथा ॥ सूचीतीक्ष्णस्तु शाल्मली महासंवर्तकः क्रमिः ॥ नगतंतुः पंकलेपः प्रतिमांसस्त्र
पुः ॥ २९ ॥ उच्छ्वासश्च निरुच्छ्वासः सुदीर्घः कूटशाल्मलिः ॥ दुरिष्टः सुमहानादः प्रवहः सुप्रवाहनः ॥ ३० ॥ वृष
णश्चो वृषास्यश्च सिंहव्याघ्रगजाननः ॥ श्वशूकरजमहिषवृषभपक्षिराननाः ॥ ३१ ॥ ग्राहकुंभीननक्रास्या
महाघोरा भयानकाः ॥ सर्वभक्षा महाभक्षाश्च सर्पकूर्मास्तथायसाः ॥ ३२ ॥ गृध्रोलूकाश्च भल्लूकाः शार्दूल
कपिकर्कराः ॥ गंडकाः पिंडितेत्राश्च ॥ पतिन क्रोश्च मार्तिका ॥ ३३ ॥ तृणाक्ष मस्त्रपाग्निश्च कृमीणां निचयस्त
था ॥ अंतकश्च प्रतिष्ठश्च रुधिराध्यश्च भोजनाः ॥ ३४ ॥ कालांबु गोमभक्षश्च श्लेष्मभक्षः सुदारुणः ॥ कर्क
टः सुविलापश्च विकटः कटपूतनः ॥ ३५ ॥ अंबरीषकटाहश्च कष्टा वैतरणी नदी ॥ सुतप्तलोहकुंभश्च एक
पादः सुपूरणः ॥ ३६ ॥ असिपत्रवनं घोरं अस्थिभंगः प्रपीडनः ॥ तिलातसीक्षुयंत्राणि कूटपापः प्रकंपनः ॥
३७ ॥ महाचुल्लीति वह्नी च तप्तलोहमयी शिला ॥ पर्वतः क्षुरधाराख्यो नाथोप्यमलपर्वतः ॥ ३८ ॥ पूयविष्टादिकू
पश्च शातनः पातनस्तथा ॥ मुशलोलूखलो यंत्रं शिला शकटलांगलः ॥ ३९ ॥ तालपत्रासिगहनं महामशककमंड
पः ॥ संमोहनोऽस्थिभंगश्च तप्तशूलमयो गुडः ॥ ४० ॥ बहुदुःखो महादुःखः कश्मलो यमलस्तथा ॥ हालाहलो वि
रूपश्च यत्र कोगोफणस्तथा ॥ ४१ ॥ एकपादस्त्रिपादश्च सुधापिष्टश्च मुद्गरः ॥ अष्टाविंशतिरित्येते क्रम
शः पंच कस्मृताः ॥ ४२ ॥ कोटिनामतरूपाश्च पंचपंचैव नायकः ॥ रौरवाद्यं मुद्गरांतं नरकाणां शतं स्मृतं ॥
४३ ॥ चत्वारिंशत्समधिकं महानरकमंडलं ॥ भोक्तव्यं क्रमशस्त्वेते नरैः कर्मानुरूपतः ॥ ४४ ॥ कामनाभि ४९
विरूपाभिः कर्मपश्यपाकृत्रां ॥ आमलप्रस्तयायहूत ध्यायं तेग्नो हि धावतः ॥ ४५ ॥ तद्वत्पापक्षयस्यापाश्री

101
2008

ध्यंते नरकादिषु ॥ हस्तयोः पादयोर्बध्वा तप्तशृंखलया नराः ॥ ४६ ॥ महावृक्षस्य शाखासु लंब्यंते यमकिंकरैः
ततस्तान् सर्वयत्नेन दोलयंति हि किंकराः ॥ ४७ ॥ दोलिताश्चातिवेगेन निःसंज्ञा यांति देहिनः ॥ अंतरिक्षस्थितानां
च लोहभारशतं ततः ॥ ४८ ॥ पादयोर्बध्यते तेषां यमदूतैर्बलोत्कटैः ॥ तेन भारेण महता भग्नाः संताडिता नराः ॥
४९ ॥ ध्यायंतः खानिकं मोक्षितं लमीतिष्ठंति निश्चलाः ॥ ततः क्रमादग्निवर्णैर्लोहदंडैः सकंटकैः ॥ ५० ॥ सर्वप्रा
णा निहन्यंते यमदूतैस्तु मस्तके ॥ विष्टापूर्णे ततः कूपे कृमीणां निचये ततः ॥ ५१ ॥ समंतात्किंकरैर्घोरैः पच्यंते
पापकारिणः ॥ ततः क्षारेण तेषां च वह्नेः राशिविशोषतः ॥ ५२ ॥ समंततः प्रलिप्यंते तप्ततैलाज्जलैः रीकृताः ॥ पुनर्वि
वायें चोगानि निरसः प्रभृति क्रमात् ॥ ५३ ॥ वर्तीकवत्पच्यंते तप्तलोहकटाहके ॥ अमेध्यकूपे प्रक्षिप्य ज
लजंतु समाकुले ॥ ५४ ॥ मेदोसृक्पूयपूर्णायां वाप्यां क्षिप्वास्तु ते ततः ॥ भक्ष्यंते कृमिभी रौद्रैर्लोहतुंडैश्च वायसैः ॥ ५५
पच्यंते मत्स्यवच्चापि प्रदीप्तांगार राशिषु ॥ प्रोताः शूलेषु तीक्ष्णेषु नराः पापेन कर्मणा ॥ ५६ ॥ तैलिकस्येव चाक्रम्य घोरैः
कर्मभिरात्मजैः ॥ तिलवत्संप्रपीड्यंते यंत्राख्ये नरके नराः ॥ ५७ ॥ पच्यंते च पुनस्तत्र वै यमदूतैरनेकधा ॥ तैलपूर्णकटा
हेषु सुतप्तेषु पुनः पुनः ॥ तेषां चोत्पाट्यते जिह्वा असत्याप्रियवादिनां ॥ संदंशैस्तु वर्तते न प्रपीड्योरसि पादतः ॥ ५९
मिथ्यागमप्रयुक्तस्य द्विजस्य तथैव च ॥ जिह्वार्धकोटिविस्तार्यैर्भल्लिः स्तीक्ष्णैः प्रपात्यते ॥ ६० ॥ निर्भत्सयंति ये
क्रूरा मातरं पितरं गुरुं ॥ वज्रवालुकयातप्तपांसुखमापूर्य सीव्यंते ॥ ६१ ॥ ततः क्षारेण दीप्तेन पयसा च पुनः पुनः ॥ दूतं
संपूर्य तेषां स्थंत तैलेन तन्मुखं ॥ ६२ ॥ इतस्ततः पुनर्वक्त्रं श्वस्तमापूर्य हन्यते ॥ विष्ठाभिः कृमिमिश्राभिः सोपानच्च
रणैर्नरैः ॥ ६३ ॥ पारलब्धाधिका मुख्या प्रदीप्ता लोहमूल्मली ॥ हन्यंते पृष्ठदेशे तु पुनर्भूमौ महाघनैः ॥ ६४ ॥ दं
तुरयातिकुंठन क्रकचेनवलीयसा ॥ शिरः प्रभृति पाद्यंते घोरैः कर्मभिरात्मजैः ॥ ६५ ॥ खाद्यंते च स्वमांसानि
पाव्यंते च स्वशोणितं ॥ अन्नपानं च दत्तं वै मत्र्योप्यनुमोदितः ॥ ६६ ॥ इक्षुवत्संप्रपीड्यंते नरा रौरवसमुद्गरैः ॥

रे.खं. असिताल वनेघोरेछिद्यंतेखंडखंडशः॥६७॥शुचीभिर्भिन्नसर्वांगाः लतशूलेषु रोपिताः॥ संचाल्यमानाः क्लिश्यं
५० तेनम्रियंतेतथापिच॥६८॥देहाद्दुत्पाट्यतेमांसंतेषामस्थीनिमुद्गरैः॥बहूरास्क्ष्यंतेननर्यमदूतैर्बलोत्कटैः॥६९॥
नेरुद्धासेनिरुद्धासाःक्लिष्टंतिनरकेचिरं॥उच्छ्वसंतः सदोच्छासैर्वालुकावेदनान्विताः॥७०॥रौरवेचरुदंतोवैपीड्य
तेविविधैर्वधैः॥महारौरवपीडाभिर्महांतोपिरुदंतिहि॥७१॥पद्भ्यामास्यगुदेपाण्यंर्योपाणोचौरसिमस्तके
निहन्यंतेघनैस्तीक्ष्णैः सुदीप्तैर्लोहमुद्गरैः॥७२॥सुतप्तवालुकायांच प्रज्वाल्यंतेमुहुर्मुहुः॥अंतुपाके सुसंत
प्तेक्षिप्ताः क्रंदंतिविस्वरं॥७३॥निंदंतिचैवरूपेणपरदारान्हसंतिच॥आलिंगंतिचतेनारीः ज्वलंतीर्लोहनिर्मि
ताः॥७४॥एवंकारंचपुरुषंप्रज्वलंतंसमंततः॥दृष्ट्वारण्यस्त्रियोगाढमालिंगंति॥रुदंतिच॥७५॥किंप्र
धावसिवेगेननंतेसख्योस्तिसांप्रतं॥लंघितश्चत्वयाभर्तापापंभुंक्ष्वयथासुखं॥७६॥लोहकुंडेविनिक्षिप्ताः
पातिताश्चशनैःशनैः॥महाग्निनाप्रपच्यंतेस्वपापेनैवभारत॥७७॥उलूखलेषुखंड्यंतेप्रपीड्यंतेशिला
सुच॥क्षिप्यंतेचांधकूपेषुदृश्यंतेभ्रमरादिभिः॥७८॥येनिंदंतिमहात्मानमाचार्यंधर्मदर्शिनं॥शिवभक्तां
श्चानिंदंतिशिवधर्मंचशाश्वतं॥७९॥तेषामुपरिकंठेचजिह्वायांदंतसंधिषु॥कीलकाञ्चोष्ठगलकेकील्यं
तेयमकिंकरैः॥८०॥योनिंदंतिद्विजान्साधून्वेदांश्चपितरोगुरून्॥विनाकार्यंमहाराजतेषांजिह्वासहस्रधा
॥८१॥छिद्यतेत्रोद्यतेचैववज्रतुंडैःखगैरपि॥एवमाद्यामहाघोरातथैवान्यास्त्वनेकधा॥८२॥संक्षेपात्तेम
याप्रोक्तायातनाःपापकारिणां॥प्रत्येकंयातनाश्चित्रंसर्वेषुनरकेषुयाः॥८३॥कस्तावर्षशतेनापिवक्तुंश
क्नोतिनरवधीः॥एवंविविधघोरैर्पीड्यमानाः स्वकर्मभिः॥८४॥म्रियंतेनैवपापिष्ठाः भुंजंतोयातनाव
हु॥तत्रान्यायातनाःकष्टाःविविधाःपापकर्मणां॥महाघोरातिघोराख्याकल्पाग्निसदृशोपमा॥श्रुत्वैता ५०
यातनाःपूर्वम्भ्रियंतेमरुचेतसः॥८५॥पापिभिर्दैश्चनरकेसंतर्ज्यंतेपुनःपुनः॥पुत्रमित्रकलत्रार्थेयद्दपु

103 / 2088

ण्यंत्वयाकृतं॥८६॥एकाकीदह्यसेतेननात्रपश्यसितानिह॥आत्मनैवकृतंपापंभोक्तव्यंध्रुवमव्ययं॥८७॥
तत्किमात्मोपघातार्थंमरुपापंत्वयाकृतं॥एवंदूतैरुपालब्धास्तदिष्टंतिततःपुनः॥८८॥देवद्रव्यविनाशेन
गुरुद्रोहादिकर्मभिः॥क्रमात्सर्वेषुपच्यंतेनरकेषुनसंशयः॥८९॥महापातकिनश्चापिसर्वेषुनरकेष्विह॥आ
चंद्रतारकंयावत्पीड्यंतेविविधैर्वधैः॥९०॥उपपातकिनश्चापितदर्धंयांतिमानवाः॥कथंसह्यायातेमह
त्कः कदाकस्यभविष्यति॥९१॥प्रासिचाकस्मिकंमृत्योरत्तंनिंदंतिकोनरः॥परित्यज्यपतःसर्वमेकाकीया
स्यसिध्रुवं॥९२॥तस्मात्सर्वप्रयत्नेननित्यंधर्मपरोभव॥एतत्तेसर्वमाख्यातंनरकाणांतुलक्षणं॥९३॥
अतःपरंतुतीर्थानिशृणुत्रोषाविभारत॥९४॥इतिश्रीपरमरहस्येरौद्रीसंहितायांवायुपुराणेश्रीन
र्मदामाहात्म्येनरकवर्णनंनामत्रयस्त्रिंशोध्यायः॥३३॥ ॥युधिष्ठिरउवाच॥नमामिचरणौब्रह्मन्नत
वकल्पांतवासिनः॥पितामहंहरिंशर्वंशरण्यंयामिसंततं॥१॥शिवंनौमिशिवंस्तौमिशिवंध्यायेछिवंय
जे॥शिवंशरणोमिपश्यामिशिवमेवात्मनिध्रुवं॥२॥द्विजवर्यमुनिश्रेष्ठमार्कंडतपतांवर॥अतीवभयभी
तोस्मिश्रुत्वानरकयातनाः॥३॥तीर्यतेयेनधर्मेणसंसाराहिदुरोत्तरः॥तंधर्मंब्रूहिसकलंधर्मराजकथा
नकं॥४॥मार्कंडेयउ०॥एवंनिर्भर्त्स्यपापानउवाचरविनंदनः॥रक्षोमरुश्चलोकोयंअकार्येसंप्रवर्त
ते॥५॥नचात्मानंविजानातिनपरंनचदैवतं॥नशृणोतिपरंश्रेयःसतिचक्षुषिनेक्षते॥६॥समेपथिरोने
गछन्नस्खलतिपदेपदे॥एवमुक्त्वाधर्मराजःसंक्षेपात्पापदेहिनां॥७॥विस्तरेणातथोवाचसतान्शृत
शृणुसांप्रतं॥यमउ०॥मायावद्धोनजानातिबोध्यमानोबुधैरपि॥८॥संसारेक्लिश्यतेतेनलोभमोह
वशोनरः॥गर्भजातेनभावेनशास्त्रमुक्तंनबुध्यति॥९॥नचोपाश्रयतेकर्मस्वर्गमोक्षप्रसाधकं॥सत्य
व्याक्षिन्शिवध्यानेसर्वकामार्थसाधके॥१०॥नरकोछेदकंश्रेयोयदन्यदहितंकृतं॥प्रेतीभूतान्नराःस

रे॰ खं॰ वैभमलोकं समागताः॥११॥ऋषय ऊचुः श्रृणुताख्यानं यथोद्दिष्टं विवस्वता॥ पुरा स्नेहानुमसित्रानर्मदाचरितं
५९ शुभं॥१२॥ऽऽश्रृण्वतां पितृदेवानां पवित्रमनुकंपया॥ कृतादिपुरुषेणेह सप्तद्वीपवती मही॥१३॥तन्मध्ये प्र
थमं द्वीपं लक्षयोजनविस्तृतं॥तत्रापि नवखंडं वै पुराणज्ञाः प्रचक्षते॥१४॥तत्र यद्भारतं वर्षं कर्मभूरिति विश्रु
तं॥तत्र विंध्याद्रिसंभूता रुद्रदेहोद्भवानुया॥१५॥नर्मदा सरिता श्रेष्ठा पापदुर्गतिनाशिनी॥प्रवाहाद्धृति
मारभ्य यावज्जलधिसंगमे॥१६॥सार्धं शतं योजनानां स्थिता पुण्यजलेन वै॥ तत्तुल्यानि शतानि तु लभंते
मानुषीतनुं॥संप्राप्य भारतं खंडं मानुषी योनिमाश्रितः॥नाश्रयेन्नर्मदां देवीं स भवेत्पापात्मा नृपः॥१८
दूरस्थानि करस्थानि वा तेन नामा हारितो मुधा॥कृतैः किं बहुभिः पुण्यैः किं दानैः किं जपैर्यदि॥१९॥बहुभिः
किं सरिद्भिश्च तत्र रेवां तु सेवते॥ स्नानावगाहपानेभ्यो ध्यानपोदानक्रियादिभिः॥२०॥ योनसंश्रयते रेवां
पापात्मा पतितो हि सः॥ ये ध्यायंति महादेवीं नर्मदां पापहारिणीं॥२१॥प्रणश्यति शुभं तेषां तमः सूर्योदये
यथा॥नर्मदां संस्मरेद्यस्तु कर्मणा मनसा गिरा॥२२॥रेवां संस्मरेदंते यमदूतैर्न बाध्यते॥नर्मदां कीर्त
येद्यस्तु पापकर्मा नराधमः॥२३॥नरकान्सप्तमादि दृष्ट्वा अपक्रामति तत्क्षणात्॥ गंगाद्याः सरितश्चैव
तीर्थकोटिनैरकधा॥२४॥रेवातिजः प्रभावेन शुद्धिं गच्छंति किल्बिषात्॥ स्मरेद्यस्तु रुद्रदेहाद्धरं हरिं॥मुच्य
ते यमदूतैस्तैस्तत्क्षणे नात्र संशयः॥यत्र तिष्ठति वैदूर्य पर्वतो मरकंटके॥३०कारः परमेशानो भुक्तिमु
क्तिफलप्रदः॥२५॥किमर्थं तत्र गच्छंति पापा वरूतचेतसः॥सिद्धेश्वरं सिद्धलिंगं लोकानुग्रहकारकं॥२६
यत्र पर्वतमध्ये तु तत्रैव शशिभूषणः॥नर्मदा दक्षिणे भागे लिंगं वै वामरेश्वरं॥२७॥चतुर्थं कपिलं च
शिवक्षेत्रं विदुर्बुधः॥ येर्चयंति सदा भक्त्या पुष्पधूपानि तर्पणैः॥२८॥शिवलोकं हि ते यांति नरकाणां क ५९
थैव का॥एतत्ते सर्वमाख्यातं यथोद्दिष्टं हि भानुना॥२९॥पापीष्टानां सर्वपथं नर्मदा परिशीलनं॥ गेहे

105/2008

मति लदानानि तत्र नगृहवाससां॥३०॥यथा च महिषीदानं शिवोपस्करमेव च॥प्रासादारामदानं ये कु
र्वंति नरोत्तमाः॥३१॥यमलोकं न ते यांति नरकान्नोग्ररूपिणः॥रेवातीरविशेषेण दानानां स्वफलेन च॥३२॥मु
च्यंते सर्वपापेभ्यः शिवस्य वचनं यथा॥सन्मानश्चापमानेन वियोगेनेष्टसंगमः॥३३॥यौवनं जरया ग्रस्तं कैष्टि
सौख्यमुपद्रुतं॥वलिभिः पलितैश्चैव जर्जरीकृतविग्रहः॥३४॥किं करोति नरः प्राज्ञः इंद्रियैर्विकलीकृतः॥स्त्री
पुंसौ यौवनं रूपं यदन्योन्यं प्रियं पुरा॥३५॥तदेव जरया ग्रस्तमुभयोरपि न प्रियं॥अपूर्ववत्स्वमात्मानं ज
रया परिवर्तितं॥३६॥यः पश्यन्न विरज्येत कोन्यस्तस्माद्विचेतनः॥पुरुषो जरया ग्रस्तः पत्नीपुत्रादिबंधुभिः॥३७
अशक्तत्वात् दुराचारैर्मर्त्येश्च परिभूयते॥धर्मश्चार्थश्च कामश्च मोक्षश्च न तु जीर्यतः॥३८॥शक्तः साध
यितुं यावत्तावत्सर्वं समाचरेत्॥वातपित्तकफादीनां वैषम्यं व्याधिरुच्यते॥३९॥वातादीनां समत्वं च्च
हार्यं परिकीर्तितः॥तस्माद्व्याधिसमं ज्ञेयं शरीरमिदमात्मनः॥४०॥वातादैरतिरिक्तस्याध्यात्मिकानां पंजर
स्य च॥रोगेनानाविधश्चैव देहदुःखान्यनेकधा॥४१॥तानि तु स्वात्मवेद्यानि किमन्यत्कथयाम्यहं॥एको
नरं मृत्युशतं अस्मिन्देहे प्रतिष्ठितं॥४२॥तत्रैकः कालमृत्युश्च शेषास्त्वागंतवः स्मृताः॥ये त्विहागंतवः प्रो
क्तास्ते प्रशाम्यंति भेषजैः॥४३॥जपहोमप्रदानैश्च कालमृत्युर्न शाम्यति॥अपमृत्युश्च चेन्नस्या द्विषमधा
दत्तां कितः॥४४॥न चापि पुरुषस्तस्मादपमृत्योर्बिभेति च॥विविधा व्याधयः कष्टाः सर्पाद्याः प्राणिनस्तथा॥
॥४५॥विषाणि चाभिचाराश्च मृत्योर्द्वाराणि देहिनां॥पीडितं रोगसर्वाधैरपि धन्वंतरिः स्वयं॥४६॥स्वस्थी
कर्तुं न शक्नोति कालग्रस्तं हि देहिनं॥नौषधं न तपो दानं न मित्राणि न बांधवाः॥४७॥शक्नुवंति परित्रा
तुं नरं कालेन पीडितं॥रसायनेस्तपोजाप्यैर्योगसिध्यादिभिस्तथा॥४८॥कालमृत्युरपि प्राज्ञैर्जीयते ना
लसैर्नरैः॥नास्ति मृत्युसमं दुःखं नास्ति मृत्युसमं भयं॥४९॥नास्ति मृत्युसमः शत्रुः सर्वेषामपि देहिनां॥स

रे॰ खं॰ भार्यापुत्रमित्राणि राज्यैश्वर्यसुखानि च ॥५०॥ प्रच्छिनत्ति सर्वाणि व्याधिश्चापि भारत ॥ इयं तु कथिता राजन् धातिः संसा
६२ रदुस्तरे ॥५१॥ परिणामदुनिवारा सर्वकालस्य भोजनं ॥ तस्मात्सर्वप्रयत्नेन सेव्यं यं सप्तकल्पगा ॥५२॥ सर्वदुःखहरा पुण्या
सर्वभोगकनिवासिनी ॥ यान्यांश्चिंतयते कामान् तांस्तान्देवी प्रयच्छति ॥५३॥ इदं ज्ञानमिदं ध्यानं पांडित्यं वेदवादिनां ॥ निः
वासः सर्वधर्माणां सिध्यंते सप्तकल्पगा ॥५४॥ यज्ञदानतपः सत्यः स्वाध्यायपितृतर्पणं ॥ सकलं फलमाप्नोति यो रे
वां विनिषेवते ॥५५॥ ब्रह्मकूर्चसहस्त्रैर्वै सोमपानायुतैस्तथा ॥ नर्मदातोयपानस्य कलां नार्हंति षोडशीं ॥५६॥ संयुक्तो
पि महापापैर्नानाकर्मकृतैरपि ॥ ओंकाराद्दक्षिणे घोरं मुच्यते तत्क्षणाज्जपन् ॥५७॥ गोदानानां परं दानं त्रिषु लोके
षु विद्यते ॥ नर्मदापयसि स्नात्वा यो दद्याद्द्विजन्मने ॥५८॥ सांख्यानक्षि यमाकल्पं देवा अपि नराकृतयुः ॥५९॥ इ
ति श्रीरेवाखंडे नारारव्यवस्थानाम चतुस्त्रिंशोऽध्यायः ॥३४॥ ॥युधिष्ठिर उ॰॥ धेनुः कतिविधा प्रोक्ता कस्मिन्का
लप्रदीयते ॥ सर्वोपस्करसंयुक्ता तत्तदुक्ष्छामि वेदितुं ॥१॥ भविष्यद्भूततत्त्वज्ञ सप्तकल्पानुकीर्तक ॥ मार्कंडेय उ॰॥
शृणु राजन्वक्ष्येहं किं गोदानं कथयामि ते ॥२॥ यथाश्रुतं पुरास्माकं मादिकल्पे कृते युगे ॥ चक्रवर्ती राजासीत्कोम
न सर्वधर्मभृतांवरः ॥३॥ नतं वर्णयितुं शक्तः सत्यधर्मव्रतस्थितं ॥ बुभुजे स महीं कृत्स्नामेकच्छत्रेण पार्थिव ॥४॥
नवखंडां च सद्वीपां यथा शक्रो मरावतीं ॥ हरिश्चन्द्रस्य तस्यापि संवादश्चक्रवर्तिनः ॥५॥ हरिश्चंद्रः कुरुक्षेत्रे
गत्वा मयुतमुत्तमं ॥ हेमभारोपकरणं सर्वरत्नविभूषितं ॥६॥ मुद्गलाय द्विजाः सर्वं सत्यधर्मपरायणः ॥ ना
तमश्चोत्तरं साग्रं त्रासेनात्रत्र वाहिनः ॥७॥ हरिश्चन्द्रो ददौ तेभ्यो राजसूयसमागमे ॥ द्विजानसंपदस्यविधिव
तथ्र दुस्यापरया युतः ॥८॥ अर्चयित्वा महेशानं स्थाणुं परमसिद्धिदं ॥ चक्रपाणिं हृषिकेशं नर्मदापरमया युतः ॥९
सरस्वत्यां तपस्थेषु सतिलाक्षतदर्भवान् ॥ दानस्यास्य प्रभावेन लोकास्ते नाखिलाजिताः ॥१०॥ सरस्वत्यां त ६२
पस्थेषु सतिलाक्षतदर्भवान् ॥ दानस्यास्य प्रभावेन लोकास्ते नाखिलाजिताः ॥११॥ अंतरिक्षे पुरी प्राप्ता सर्व

107/2008

लोकमनोहरा ॥ हरिश्चन्द्रपुरी रम्या ख्याता लोके चराचरे ॥१२॥ सत्यदानसमायोगात्त्यागाभिः समन्वितः ॥ हरि
श्चंद्रसमो राजा न भूतो न भविष्यति ॥१२॥ एवं गाथा पुरा गीता ऋषिभिः सुरसत्तमैः ॥ राजाकोट्या करोत्सर्वे नर्मदा
तीरमाश्रितः ॥१३॥ दानयज्ञतपः सत्यपर्वते मरकंटके ॥ ददौ चार्धप्रसूतां गां द्विजाग्र्याय महात्मने ॥१४॥ दानस्या
स्य प्रभावेन ददाह पृथिवीपतिः ॥ अनेकभाविकं पातं तत्र रात्रिमिवानलः ॥१५॥ यावद्वत्सस्य पादौ द्वौ मुखं योन्यां
प्रदृश्यते ॥ तावद्गौः पृथिवी ज्ञेया सशैलवनकानना ॥१६॥ स्वर्णशृंगी रूप्यखुरां सवत्सां कांस्यदोहनां ॥ ताम्र
पृष्ठीं सघंटां च सीमपुच्छां सवस्त्रिकां ॥१७॥ रत्ननेत्रां सपिटकां सर्वोपस्करसंयुतां ॥ नर्मदापयसि स्ना
त्वा तिलराज्यकुशासंयुतः ॥१८॥ ओंकारामरयोर्मध्ये कोटितीर्थे नराधिपः ॥ एवं सहस्रसंख्याता कोटितीर्थे
नराधिप ॥ एवं सहस्रसंख्याता कोटितीर्थे स्वयं ददौ ॥१९॥ एतस्मिन्नंतरे नेदुर्देवदुंदुभयो दिवि ॥ तत्क्षणा
यानमारूढश्चलन्मणिगणान्वितं ॥२०॥ स्तूयमानः समीपस्थैरसंख्यातैर्विमानगैः ॥ धृतस्वर्णातपत्र
स्तु वीज्यमानश्च चामरैः ॥२१॥ योजनानां सहस्रेण हरिश्चंद्रोऽतिविस्थितः ॥ राज्ञां को युपरिष्टान्नृपतेर्लपमी
पौर्व्यः ॥२२॥ तं दृष्ट्वा नादरो लोकं मनोरा राजा कस्य विमापते ॥ सनिनिदं कुरुक्षेत्रे विस्मयाविष्टचेतनः ॥२३॥ महादानधो
राज्ञां केन राहुसोमसमागमे ॥ दत्तं दानं न सामान्यं भवद्विति मतिर्मम ॥२४॥ विषण्णावदनो भूत्वा हरिश्चंद्रो नृ
पोत्तमः ॥ ब्रह्मलोकगतः क्षिप्रं यत्र लोकेश्वरः प्रभुः ॥२५॥ प्रणिपत्याभिवाद्याथ समपृच्छत्पितामहं ॥ दानेन नि
र्जिता लोकाः राज्ञां केन पितामह ॥२६॥ किमिदं साहसं ब्रह्मन् कुरुक्षेत्राद्विनिश्यते ॥ अमरेश्वरसंज्ञं तु तीर्थे
रेवासमुद्भवं ॥२७॥ केनापि न समं मर्त्ये मन्येहं कुरुजांगले ॥ इति श्रुत्वा वचस्तस्य हरिश्चंद्रस्य धीमतः ॥२८
प्रत्युवाच ततो ब्रह्मा हरिश्चंद्रं नृपं नृप ॥ विषादं त्यज राजेन्द्र गहना कर्मणां गतिः ॥२९॥ राज्ञा कसंज्ञो राजर्षि
र्दृष्टो न श्रुतो मया ॥ एवं वक्तुं न केनापि नापि देवाः सवासवाः ॥३०॥ अनेकानि सहस्राणि पुरा विचक्रवर्तिनां ॥

रे॰खं॰ दृष्ट्वा तु सन्निधानेन पर्वते मरकंटके ॥३१॥ गतानि त्रिदिवं राजन सत्यमेतद्ब्रवीम्यहं ॥ त्रेतायुगे मया पूर्वं तीर्थमिदं तीर्थ
५२ मुत्तमं ॥३२॥ अश्वमेधाधिकमानेन सर्वतो मरकंटकं ॥ राहुग्रस्ते समायोगे तीर्थलक्षाणि भूपते ॥३३॥ सरस्वती कुरुक्षे
त्रं नैमिषं पुष्करं गया ॥ तीर्थान्येतानि चान्यानि स्नातुमायांति चात्र वै ॥३४॥ नर्मदायां हरिश्चंद्र कोटितीर्थं नराधिप ॥
तीर्थान्यत्र तु राजेंद्र स्पर्धां वैरेणयासद ॥३५॥ वाराणस्यादितीर्थानि तथैव तत्तुल्याधमं ॥ तीर्थानि न समानि स्युः रा
कोटिः कोटितीर्थतः ॥ ख्यातिमात्रं कुरुक्षेत्रं लोकयात्राप्रवर्तकं ॥ पुराणानश्रुतं येस्तु मिथ्यापानसमन्वितः ॥३६॥ गांत
व्यतां कल्पगा देवी यदि खसि परं पदं ॥ इत्याकर्ण्य विधेर्वाक्यं हरिश्चंद्रो विविस्मितः ॥३७॥ प्रणिपत्य विधातारं अयो
ध्याधिपतिस्तदा ॥ मुदा परमया युक्तो गतोसावमरेश्वरं ॥३९॥ किंचित्कालं स्थितं तत्र दत्त्वा दानान्यनेकशः ॥ प्रसा
दादमरेशस्य कल्पगायाश्च भारत ॥४०॥ शाश्वतं कादधिकं प्राप पदं यानं यशस्तथा ॥ एतत्सर्वं मयाख्यातं यथावत्त
वसुव्रत ॥४१॥ पुनरन्यत्प्रवक्ष्यामि तीर्थं परमशोभनं ॥४२॥ इति श्रीवायुपुराणे रेवाखंडे रौद्रीसंहितायां परमर
हस्ये अमरेश्वरक्षेत्रे गोदानमहिमा वर्णनं नाम पंचत्रिंशोध्यायः ॥३५॥ ॥ मार्कंडेय उ॰ ॥ माहिष्मत्याः पश्चिमे च ती
र्थं पापहरं परं ॥ अशोकवनिका नाम सर्वशोकविनाशनं ॥१॥ स्नात्वा तत्रार्चयेद्गौरीं यथाविभवसंभवैः ॥ मतंग
स्याश्रमस्तत्र सिद्धगंधर्वसेवितः ॥२॥ शुक्लकुसुमत्रतीयायां गंधधूपविलेपनैः ॥ उपहारैरन्नैश्च दीपमालाप्रमो
धनैः ॥३॥ तत्र यात्रां जयेन्नारी गौरीभक्तिसमन्विता ॥ रूपसौभाग्यसंपन्ना लभते सत्पतिं तु सा ॥४॥ सुखं सुतान्नश्रि
यं प्राप्य मोदते पतिसंयुता ॥ अस्य तीर्थस्य माहात्म्यादुमामाहेश्वरे पुरे ॥५॥ इति अशोकवनिकातीर्थं ॥ मार्कंडेय
उ॰ ॥ मातंगोन्मर्दवर्षिः पुराकल्पे युधिष्ठिर ॥ नर्मदातीरमाश्रित्य तपस्तेपे सुदुःकरं ॥६॥ जन्मन्यादौ निषादः सन्
जातिस्मरतिपौर्विकीं ॥ वेदस्नानावधिं धर्मं पठता मघमर्षणं ॥ महर्षीणां प्रसंगेन नर्मदादर्शनेन च ॥ पापबु ५३
द्धिं परित्यज्य धर्मबुद्धिं समाश्रितः ॥८॥ पापोहं पापरूपोहं प्राणिहिंसारुचिः सदा ॥ सविषादो निषादोहं त्रियेवा

109
2008

किं करोम्यहं ॥९॥ पापः पापकुले जातो धुनाचरवपचोपमः ॥ एवमुक्त्वा स विमनाः नशोकवनिकां गतः ॥१०॥ जटाव
ल्कलधारी च कंदमूलफलाशनः ॥ दिव्यं वर्षशतं सोभूत्स्थिताराधनतत्परः ॥ शिवध्यानपरस्तत्र उग्रे तपसि संस्थि
तः ॥ दिव्यं वर्षशतं पार्थ तथा तस्य तपस्यतः ॥११॥ मंत्रज्ञाप्यविहीनस्य शिवभक्तिपरस्य च ॥ वागुवाचांतरिक्षस्था
मंत्रं जप परं परं ॥१२॥ हृच्चक्रे विमलं ध्यायन्न शिवांतकरं शिवं ॥ नमः शिवाय मंत्रं तु प्रणवाद्यं समाहितः ॥१३॥ स
र्वार्थसाधकं श्रेष्ठं सर्वविघ्नविनाशकं ॥ सर्वपापहरं जाप्यं सर्वमंत्रोत्तमोत्तमं ॥१४॥ इत्याकर्ण्य वियद्वाण्या प्रोक्तं
तत्स्थानमागतं ॥ जपतस्तस्य तं मंत्रं प्रसन्नमभवन्मनः ॥१५॥ तस्य भक्तिपराशक्त्या देवदेवो महेश्वरः ॥ प्रत्यक्षरूपो
भगवान् शूलपाणिरुमापतिः ॥१६॥ उवाच वचनं देवो मतंगं प्रति भारत ॥ वरं वृणीष्व भद्रं ते ध्यानेनानेन सुव्रत ॥
१७॥ मतंग उ॰ ॥ यदि तुष्टोसि देवेश वरं दातुं ममेच्छसि ॥ मातंगमिति मे ख्यातौ तीर्थमेतत्त्वया तु मे ॥१८॥ चांडालाः श्व
पचा वापि पापयोनिगता अपि ॥ जपादिरहिताश्चापि मुच्यंतामत्र किल्बिषात् ॥१९॥ स्थेयमत्र त्वया देव मत्प्रीत्या
तीर्थसंनिधौ ॥ मतंगेशमिति ख्यातं शिवलिंगमिहास्तु ते ॥२०॥ नर्मदातीरनिलयं बिलयकरं महत्सं ॥ स्नात्वा यो
त्रार्चयेत्तस्य भवेद्धं पापमोक्षणं ॥२१॥ इमं वरमहं याचे त्वत्प्रसादान्महेश्वर ॥ ईश्वर उवाच ॥ एवं भवतु ते सर्वं मत्प्र
सादाच्चमारिष ॥२२॥ एवमुक्त्वा ययौ देवः कैलासं पर्वतोत्तमं ॥ मतंगोपि वरं प्राप्य शिवलोकं जगाम ह ॥२३॥ कामिकं
यानमारुह्य दिव्यमाल्यांबरावृतः ॥ तत्तो रूपगुणैर्युक्तः सर्वाभरणभूषितः ॥२४॥ दिव्यान्भोगांस्तु सुचिरं भोक्तुं
तीर्थप्रभावतः ॥ याचेत्रस्य अमावास्या कृष्णपक्षचतुर्दशी ॥२५॥ तस्यां तत्र कृतं दत्तं जप्तं ध्यातं तथार्चितं ॥ स्नातं स्तु
तं च नतं सर्वमक्षय्यमश्नुते ॥२६॥ तिलोदकप्रदानेन पापयोनिगतानपि ॥ सत्काद्यसगुडपिंडेनापितृन्मोदयत्यहि
सः ॥२७॥ पितरस्तस्य तृप्यंति यावदिंद्राश्चतुर्दश ॥ तिलतंदुलमिश्रं च यः कुर्याल्लिंगपूरणं ॥२८॥ सोपि वर्षसह
स्राणि शिवलोके महीयते ॥ अशोकवनिकानाम मम मातंगतीर्थं उच्यते ॥२९॥ रेवाया उत्तरे कूले कथितं तव भारत ३०

रे.खं. इतिश्रीरेवाखंडेमतंगतीर्थेनामषट्त्रिंशोध्यायः॥३६॥ ॥मार्कंडेयउ०॥अथान्यत्कथयिष्यामिरेवायादक्षिणेतटे॥ती
५४ र्थंमृगवनंनामसर्वपापप्रणाशनं॥१॥तत्रस्नात्वार्चयेद्विष्णुंशंखचक्रगदाधरं॥एकादश्यांमहाराजनिराहारोजितें
द्रियः॥२॥हरिंमृगवनंनामगंधधूपैश्चपूजयेत्॥एकस्मिन्भोजितेविप्रेलक्षंभवतिभोजितं॥३॥तिलोदकप्रदानेनापि
तॄणांवैष्णवंपदं॥तत्रैवसंनिविष्टंतुवाराहंतीर्थमुत्तमं॥४॥यत्रवाराहरूपेणधात्रीदेवीसमुद्धृता॥विश्वरूपेणतथा
चान्यत्हरेरमिततेजसः॥५॥पतिव्रतातुयानारीतथामासोपवासिनी॥तत्रस्नात्वाविधानेनलोकंप्राप्नोतिवैष्णवं
॥६॥आख्यानंकथयिष्यामिख्यातंमृगवनंयथा॥व्याधःकश्चिद्दुराचारःसर्वभूतेषुनिर्दयः॥७॥पाशहस्तोधनुष्पा
णिर्विचरन्गिरिकंदरं॥ओजघानमृगान्सर्वान्कुटुंबार्थेयुधिष्ठिर॥८॥ज्येष्ठमासेतुसंप्राप्तेनिदाघेज्वलनप्रभे
॥घर्मार्तश्चतृषार्तश्चवृक्षमूलंसमाश्रितः॥९॥रात्रौसुष्वापनिश्चेष्टोदुःखार्तःक्षुधान्वितः॥वनसंघर्षजोवह्नि
रुत्थितोवृक्षकोटरात्॥१०॥प्रदग्धंवचनंतेनमृगव्याधसमन्वितं॥भस्मीभूतंततःसर्वंसव्याधंमृगवनं॥११॥
मेघजालावृतेकालेप्रवाहेनार्मदेशुभे॥कन्याराशिगतेभानौद्वादश्यांश्रवणेनतु॥१२॥नर्मदातोयसंसर्गादस्थां
दुःकृतनाशनात्॥तत्क्षणाद्दिव्यदेहस्तुवैष्णवंयानमास्थितः॥१३॥ततस्तुष्टावदेवेशंभक्तलोकानुकंपनं॥तीरा
परिस्थयानोसौसंस्मरन्गरुडध्वजं॥१४॥येनादौमीनरूपेणविष्णुनानिहतोसुरः॥ब्रह्मासंभाषितोवेदैस्तंनमा
मिसनातनं॥१५॥कूर्मरूपेणयेनादौविधृतोमंदराचलः॥सुधयाप्यायितोदेवास्तंनमामिजगद्गुरुं॥१६॥वरा
हंवपुराश्रित्ययेनधात्रीसमुद्धृता॥लोकाःसंस्थापितायेनतंनमाम्यखिलास्पदं॥१७॥भूत्वायेननृसिंहेनहिरण्य
कशिपुर्हतः॥प्रह्लादोह्लादितोयेनतंनमामिपुरुविक्रमं॥१८॥वामनंचवपुर्धृत्वाबलिर्येनवशीकृतः॥स्वपदं
प्रापितादेवास्तंनमाम्यखिलास्पदं॥१९॥पुरापरशुरामेणभूत्वायेनजितामही॥क्षत्रमुत्सादितंसर्वंतंनमाम्यु ५६
ग्रचारिणं॥२०॥भूत्वारामेणयेनाशुरावणःसगणोहतः॥सुराश्चानंदिताःसर्वेतंनमामिक्षमापतिं॥२१॥कृष्ण

111/2008

रूपंसमास्थाययेनकंसासुरोहतः॥पितृभ्रातिमदप्रेम्णातंनमाम्यखिलात्मकं॥२२॥बौद्धंरूपंसमास्थायविश्वंयेनविमोहि
तं॥योगिनस्तोषितायेनतंनमाम्याशुतोषकं॥२३॥कल्किरूपंसमास्थायदुर्वृत्तांतकरंपरं॥जगद्वित्रास्यतेयेनतंनमाम्यु पापानि
ग्ररूपिणं॥२४॥एवंस्तुतस्ततस्तस्यविष्णुर्व्याधस्यसनातनः॥साक्षाद्रूपउवाचेदंतुष्टोहंतेवरंवृणु॥२५॥व्याधउवाच
दिप्रसंनोसिविभोयदिदेयोवरोमम॥अत्रतीर्थेभगवतास्थेयंभगवनांतिकं॥२६॥नाम्नामृगवनंतीर्थंप्रसादात्ते
भवत्विदं॥इदंस्तोत्रंचपरमंतवभक्त्यामयाकृतं॥२७॥यःपठेच्छृणुयाद्वापिसलभेद्वांछितंफलं॥श्रीभगवानुवा०
एवंतेभवितासर्वंगच्छव्याधयथेप्सितं॥अत्रतीर्थेमयास्थेयंपुरास्तत्रस्थितोस्म्यहं॥इत्युक्त्वातदर्धेदेवोव्याधोपिविष्णोः
परंययौ॥२९॥दशवर्षसहस्राणिभोगान्भुंक्त्वासपुष्कलान्॥ततःसोप्यभवद्राजातीर्थस्यास्यप्रभावतः॥३०॥येपिदग्धा
मृगाद्याश्चतेपिगंधर्वतांगमः॥वैष्णवेनतुयानेनप्राप्तास्तेवैष्णवंपुरं॥३१॥अवशास्ववशोवापियस्तुप्राणान्परित्य
जेत्॥दिव्यंवर्षसहस्रंतुविष्णुलोकेमहीयते॥३२॥तिलोदकप्रदानेनपितॄणांपरमांगतिः॥३४॥इतिश्रीरेवाखंडे
मृगवनतीर्थंनामसप्तत्रिंशतिमोध्यायः॥३७॥मार्कंडेयउवाच॥मनोरथंनामतीर्थंअन्यत्परमसिद्धिदं॥त्रिषुलोके
षुविख्यातंरेवातीरसमुद्भवं॥१॥यान्यान्प्रार्थयतेकामान्तत्रस्नात्वाहिमानवाः॥तांस्तान्सर्वानवाप्नोतितीर्थ
स्यास्यप्रभावतः॥२॥संगमोगारमत्तोयागोसहस्रफलप्रदः॥अंगारेश्वरदेवश्चतत्रतिष्ठतिसंगमे॥३॥नालमात्रो
नरस्तत्रगयापस्समवाप्नुयात्॥चतुर्थ्यांगारयोगश्चयदाभवतिभारत॥४॥हिरण्यपुरुषंकृत्वारक्तवस्त्रेणवेष्टये
त्॥घृतपूर्णेताम्रपात्रेगुडेनापिप्रपूरयेत्॥५॥तत्रसंस्थाप्यतंदेवंसंपूज्यविधिवंनृपः॥श्रोत्रियायप्रदद्यात्तत्
श्रोत्रियायकुटुंबिने॥६॥तद्दानतीर्थमाहात्म्याच्छक्रार्धासनभाग्भवेत्॥दानंस्वभावतःश्रेष्ठंतीर्थयोगाद्विशेषतः॥
७॥तस्मात्सदैवदातव्यमविच्छिन्नंतथार्थिने॥विच्छिन्नेनतथाभोगाग्रीष्मेकुसरितोयथा॥८॥सदैवपापनाशाय
संसेव्यासप्तकल्पगा॥येनकेनाप्युपायेनपापनाशंकरंचरेत्॥१०॥यस्मात्तापेनदुःखानितीव्राणिसुबहूनिच॥त

रे·ख· स्मात्पापं न कर्तव्यं जलपीडाकरं हि तत्॥१०॥ यस्मिन्काले चदेवेश भ्रोच्यय साद्याद्रोनच॥ शुभाशुभं कर्मतत्तथा तेन भु

५५ ज्यते॥११॥ सर्वेषामेव शास्त्राणामेव पार्थ विनिश्चयः॥ सेव्यतां कृत्यगादेवी शिवपत्नार्तैः सदा॥१२॥ पितृणां तर्पणं कुर्या

द्विसोदधाव्र भिक्षवे॥ कारुण्यं सर्वभूतेषु नर्मदास्थान चिंतनं॥१३॥ दयं हि सर्वभूतानां तारणं भुवि नर्मदा॥ अपां रूपेण

या देवी लोकानुग्रहकारिणी॥१४॥ स्थावरं जंगमं वापि भूतग्रामं चतुर्विधं॥ भगवंतुस्मरेदेव पततं नरकार्णवे॥१५

इतिश्रीरेवाखंडे मनोरथतीर्थ मं गारगती संगममाहात्म्यं नाम षट्त्रिंशति मोध्यायः॥३८॥ मार्कंडेय उवा॥ ततो मेघव

नं नाम यज्ञपर्वतमाश्रितं॥ रंतिदेवपुरा तत्र चक्रवर्ती युधिष्ठिर॥१॥ रतिंनीतं कुलं येन सदेवासुरमानुषं॥ पितावे

मोचितो येन गोभिर्विनिनिहितः पुरा॥२॥ गोचं डालहतायेतु नाप्नुवंति परांगतिं॥ चांडाद्दादुद्कास्ता पापाहि युतो ब्रह्म

णाद्यपि॥ दंष्ट्रिभिश्च पशुभ्यश्च मरणं पापशालिनो॥ विष्णो बलि प्रदानेन क्रियाणां करणेन च॥ तिर्थपिंड प्रदानेन ते

यांति परांगतिं॥ दधीचिर्नाम राजर्षि रंवसुधिपतिः पुरा॥३॥ सर्वधर्मभृतां श्रेष्ठः शक्रतुल्यपराक्रमः॥ स्वेराज्येत

नयं स्थाप्य वनं सत्पतिर्ययौ॥४॥ तपश्चचार विपुलं दधीचिर्वनमाश्रितः॥ एवं काले समभवद्युद्धं देवासुरं नृप॥५

तदा देवासुरे युद्धे दैत्या दैवैर्विनिर्जितः॥ देवानां ब्रह्मणानां च हंतारो देवकंटकः॥६॥ नष्टास्ते पापदोषेण समरस्फकु

लवोपवाः॥ देवाः समुदिताः सर्वे लोकपालाः सवासवाः॥७॥ विंध्यं गिरिंगतास्ते तु यस्मिन्वदति कल्पगा॥ समर्थे भू

पतिं ज्ञात्वा दधिचीं कुरुसत्तम॥८॥ दत्तान्यस्त्राणि रक्षार्थं तस्य राज्ञः सुरोत्तमैः॥ तानि दत्वा ययुर्देवाः स्वं स्वं स्थानमुदा

न्विताः॥९॥ निर्युद्धा निर्भयाः सर्वे न्यासे मुक्तास्त्रसंचयं॥ स्वर्गभोगसुखे सक्ता निर्वैराः सुरसत्तमाः॥१०॥ सुराणांम

तमाज्ञाय दधीचिः सत्यविक्रमः॥ शापस्य च भयाद्भीतो नमस्कृत्य प्रगृह्य च॥११॥ प्रभावात्तीयतांनीत्वा शराराणंतर्ये वे

शायत॥ कालांतरे ततः प्रासिदानया वसुधुः सह॥१२॥ जंभकुंभहयग्रीव प्रमुखा बलदर्पिताः॥ दानवान्पुनरप्युग्रां जा ५५

तांज्ञात्वा ततः सुरैः॥१३॥ कार्यकाले समुत्पन्ने संस्मृतान्यायुधानि तैः॥ प्रेषितो नारदमुनिर्दधीचीं प्रति सत्वरं॥१४॥ अ

113/2008

वंतीवनमासाद्य देवर्षिर्नारदस्तथा॥ सविवेशाश्रमपदं सुह्वारागणवेदिकं॥१५॥ अभितो नृपशार्दूलो मुनिं दृष्ट्वा समा

गतं॥ पूजयित्वार्घपाद्येश्च ददौ विष्टरमासनं॥१६॥ मुनिं दृष्ट्वा सुखासीनं राजा वचनमब्रवीत्॥ सर्वत्र कुशलं विप्र देहे

तपस्विन्यप्यतः॥१७॥ किमर्थं मानुषं लोकं देवलोकादुपागतः॥ नारद उ०॥ युद्धं सुमहत्संतं देवानां दानवैः सह॥१८॥

तान्यपेयत्वं शस्त्राणि जीयंते दानवान्यथ॥ कुरु कार्यं हि देवानां सत्यधर्मपरायणः॥१९॥ दधीचिरु०॥ शृणु कार्यं

हि देवर्षे देवानां हितकारकं॥ अचिरेणैव कालेन क्षयं यास्यति दानवः॥२०॥ संदेहो मेप्यनु प्राप्तः शरीरे ज्ञाव तिपिच॥ ता

न्यस्त्राण्यपश्यिपुमम अस्थीन्यस्त मयानि मे॥२१॥ किं कार्यं च कपं कार्यं किं च लत्वा शुभं भवेत्॥ ममागस्यात्र देवेनवारूण्ह

न स्त्राणि मे गतः॥२२॥ नारदो पितदाकर्ण्य कंपितस्तान्सुरान्ययौ॥ निवेदितेनारदेन सर्वेतत्रागताः सुराः॥२३॥ दधीचि

र्यत्र राजर्षिस्तपस्युग्ने व्यवस्थितः॥ ततः प्रणम्य तान्देवान्दधिचीरिदमब्रवीत्॥२४॥ देवाग्रपरं तु मे कार्याद स्त्रा

णि विविधान्यपि॥ अपौरुषाणि मे कृत्वान्य स्तान्यस्त्राणि सर्वशः॥ तपः सिद्धिः कथं मे स्याद न्यथा युधरक्षणात्॥ देवा

उ०॥ मनसापि न हंतव्यास्तापसः सेश्वर इच्छता॥२५॥ पादशस्ताद्शो वापि किं पुनस्त्वादशो नप॥ यद्रूपाचिंतयिसे वंद

धीचिर्देवतैः सह॥२७॥ आजुहाव तत स्तूर्णं गास्ताः कामदुघास्तु या॥ लिरं तु ममगात्राणि जिह्वयाशाणलीलया

२८॥ व्यक्ताकुर्वंतु मेस्थीनि दिवर्योकोर्थसिध्यये॥ दधीचिवचना कोभिरस्थिवज्रं विशां पतेः॥२९॥ नगधं मांसा

दितः सर्वानिर्विचेकतयातदा॥ अस्त्राग्नामस्त तोस्थिभ्यः प्रानीदेवैर्नृपोत्तम॥३०॥ नेगोर्दनगरं नाम्ना जातं तत्राभि

विश्रुतं॥ दानवानिहतार्देवैः पुनः स्वस्थी कृतं जगत्॥३१॥ अचिंतयत्ततस्तत्र रंतिदेवो महीपतिः॥ गोविपुद्विप्र

चांडालसर्वे विनिहता नराः॥३२॥ देवलोकं न ते यांति न ते पासुदकक्रिया॥ शोचित्वा तु चिरं कालं सांतःपुरपरिग्र

हः॥३३॥ प्रक्षाल्य नर्मदातोये शेषास्थीनी व्यसर्जयत्॥ लिंगं ब्रह्मेश्वरं यत्र यज्ञपर्वतसंनिधौ॥३४॥ धर्मसंशायमा

पं नारंतिदेवो महीपतिः॥ वसिष्ठमुख्यैर्मुनिभिर्वृतो मार्कंडमाययौ॥३५॥ ममश्रयहारवेघ्यामासीनम्रषिभि

इ॰ खं॰ दैवं॥ कस्य गालीरनिलये संप्रासीमो युधिष्ठिर॥ ३८॥ रंतिदेवो द्विजैः सार्धं प्रणिपत्याभिवाद्य मां॥ कलाधे पापः सनदी
५५ निवेदितकुब्जास्तनः॥ ३९॥ समुपेत्या हृवीहाव्ययमासीनान्नानाकर्षान्पति॥ कथमेमु व्यनेपोराशितादुर्गानितंपनात
३९॥ रूपमेउ॰॥ एतद्दृष्ट्वा तमाकंडेये नावेद पुराणगो॥ अस्यवाक्यं प्रमाणं न सम्यक्व दवारोरणा॥ ४०॥ मार्कंडे
य उ॰॥ शृणवंतु मेयथा दृष्टं पुराणे च यथाश्रुतं॥ सर्वतीर्थमयीरेवा सर्वदेवमयी शुभा॥ ४०॥ कुब्जारिवा समायो
गो विशेषात्सुरपूजितः॥ तत्र स्नात्वादि वं यांति येमृतास्ते पुनर्भवाः॥ ४१॥ तत्र श्राद्धं प्रयत्नेन पितॄणां परमा गतिः॥
अयं ते कथितो राजन्कुब्जारेवासमागमः॥ ४२॥ अर्चयित्वा महेशानं तत्र बिल्वाम्रकाव्ययं॥ सर्वपापविनिर्मुक्तो
गाणपत्यमवाप्नुयात्॥ ४३॥ अष्टाधिकशतं देव्यः कन्याः सिद्धिं परां गताः॥ तपस्तप्त्वा त्र राजेंद्र पर्वकालेषु मन्त्रताः
४४॥ सर्वास्ताः सिद्धिमापन्ना कुब्जारेवा समागमे॥ अमासोम समायोगे कार्तिक्यां कृत्तिका यदि॥ ४५॥ वाराणसी
प्रयागं च पुष्करं नैमिषं तथा॥ एवमादीनि तीर्थानि स्नातुमायांति संगमे॥ ४६॥ श्रवणा र्क्षे तु नाचास्य प्रावलो
ले महीयते॥ कार्तिक्यां कृत्तिका योगे यः कुर्यात्त्रिवपूजनं॥ ४७॥ कुब्जा या संगमे स्नात्वा वांछितं लभते फलं॥
रंतिदेव उ॰॥ कास्ताः कन्याश्च किंनाम्नी वद सिद्धिं च कां गताः॥ ४८॥ मार्कंडेय उ॰॥ उमायाः सहचर्यस्ता देव्यः स
र्वा उमात्मकाः॥ कदाचिदुमया सार्धं रोषामर्षसमन्विताः॥ ४९॥ इयं दास्यति शापं नै इति निश्चयके मुश्चता॥ इ
ह आगम्य ततः सर्वाः स्नात्वा कुब्जासमागमे॥ ५०॥ बिल्वाम्रकं शिवं पूज्य कोट्या बिल्वाम्रजैर्दलैः॥ कालेन
कियतास र्वाः सिद्धिमापुः पृथक्पृथक्॥ ५१॥ बिल्वाम्रकमहेशस्य प्रसादं प्राप्य तास्ततः॥ पृथक्स्थानान्यवा
पुश्च पूज्याः पूज्या तिभूपतेः॥ ५२॥ वाराणस्यां विशालाक्षी नैमिषे लिंगधारिणी॥ प्रयागे ललितादेवी कामु
का गंधमादने॥ ५३॥ मानसे कुमुदा नाम विश्वकाया तथांबरे॥ गोमंते गौतमी नाम मंदरे कामचारिणी॥ ५४ ५५
मदोत्कटा चैत्ररथे जयंती हस्तिनापुरे॥ कन्यकुब्जे तथा गौरी रंभा मलयपर्वते॥ ५५॥ एकाम्रे कीर्तिमालेति

विश्वा विश्वेश्वरे तथा॥ पुष्करे पुरुहूतेति केदारे मार्गदायिनी॥ ५६॥ नंदा हिमवतः पृष्ठे गोकर्णे भद्रकर्णिका॥ स्था
नेश्वरे भवानी च बिल्वके बिल्वपत्रिका॥ ५७॥ श्रीशैले माधवी नाम भद्रा भद्रेश्वरे तथा॥ पमहालिंगे तु कपिला माको
टे मुकुटेश्वरी॥ ५८॥ शालग्रामे महादेवी शिवलिंगे जलप्रिया॥ जलावराहे लेशौं तु कमला कमलालये॥ ५९॥ रुद्रको
ट्यां तु रुद्राणी लोकोकालंजरे तथा॥ मयापूर्यां कुमारी च संताने ललिता तथा॥ ६०॥ उत्पलाक्षी सहस्राक्षी हिरण्या
क्षे महोत्पला॥ गयायां मंगला नाम विमला पुरुषोत्तमे॥ ६१॥ विपाशायाममोघाक्षी पाटला पांडुवर्धने॥ नारा
यणी सुपार्श्वे च त्रिकुटे भद्रसुंदरी॥ ६२॥ विपुले विपुला नाम कल्याणी मलयाचले॥ कोटवी कोटितीर्थे च
सुगंधा माधवेवने॥ ६३॥ गोदाश्रमे तु संध्याख्या गंगाद्वारे रतिप्रिया॥ शिवकुंडे शुभानंदा नंदिनी देविकात
टे॥ ६४॥ रुक्मिणी द्वारकायां च राधा वृंदावने तथा॥ देवकी मथुरायां च पाताले परमेश्वरी॥ ६५॥ चित्रकूटे
तथा सीता विंध्ये विंध्यवासिनी॥ सह्याद्रावेकवीरा च हरिश्चंद्रे तु चंद्रिका॥ ६६॥ रमणा रामतीर्थे तु यमु
नायां मृगावती॥ कोलापुरे महालक्ष्मी रुमादेवी विनायके॥ ६७॥ आरोग्या वैद्यनाथे च महाकाले महेश्वरी
अभयाख्या उष्णतीर्थे च अमृता विंध्यकंदरे॥ ६८॥ मांडव्ये मांडुकी नाम स्वाहा माहेश्वरे पुरे॥ छागलंडे प्रचं
डा च चंडिकामरकंटके॥ ६९॥ सोमेश्वरे वरारोहा प्रभासे पुष्करावती॥ देवमाता सरस्वत्यां पारायण
तटे तथा॥ ७०॥ महालये महाभागा पयोष्ण्यां पिंगलेश्वरी॥ सिंहिका कृतशौचे च कार्तिके ये तु शंकरी॥ ७१
उत्पलावर्तके लोला सुभद्रा शोणसंगमे॥ माता सिद्धवने लक्ष्मीरनंता भरताश्रमे॥ ७२॥ जालंधरे वि
श्वमुखी तारा किष्किंधपर्वते॥ देवदारुवने पुष्टिर्मेधा काश्मीरमंडले॥ ७३॥ भीमा देवी हिमाद्रौ च तुष्टिर्वस्त्रेश्वरे तथा॥ क
पालमोचने सिद्धिर्माता कायावरोहणे॥ ७४॥ शंखोद्धारे ध्वनिर्नाम धृतिः पिंडारके तथा॥ कला तु चंद्रभागायामच्छोदे
शिवधारिणी॥ ७५॥ वेण्यामपृतनामा च बदर्यामोषधी तथा॥ ऐंद्री वा चामरकुरौ कुब्जा हातपे कुशोदरी॥ ७६॥ मन्मथे

115/2008

रे॰ ख॰ हेमकूटे च कुमुदे सस्यवादिनी॥ अश्वत्थे वंदनी या च निंबे श्रवणालये॥ ७७॥ गायत्री वेदवदने पार्वती शिवसंनि
५७ धौ॥ देवलोके तथेंद्राणी ब्रह्मास्ये तु सरस्वती॥ ७८॥ सूर्यबिंबे प्रभा नाम मातॄणां वैष्णवी तथा॥ अरुंधती सती नां च
रामासु च तिलोत्तमा॥ ७९॥ चित्ते ब्रह्मकला नाम शक्तिः सर्वशरीरिणां॥ एतदुद्देशतः प्रोक्तं नामाष्टशतमुत्तमं॥ ८०॥ अ
ष्टोत्तरं तु तीर्थानां शतं चापि प्रसंगतः॥ यः पठेच्छृणुयाद्वापि स लभेत् सिद्धिं स वांछितं॥ ८१॥ एषु तीर्थेषु यः स्नात्वा एताः
पश्यति यो नरः॥ सर्वपापविनिर्मुक्तः स याति परमां गतिं॥ ८२॥ यः करोति परं पाठमुमास्थानेषु मानवः॥ स भित्वा
ब्रह्मसदनं पदमाप्नोति शाश्वतं॥ ८३॥ नामाष्टशतकं यस्तु श्रावयेच्छिवसंनिधौ॥ तृतीयायां तथाष्टम्यां बहुपुत्रो भ
वेन्नरः॥ ८४॥ गोदाने श्राद्धकाले च विवाहे मंगले तथा॥ देवार्चनविधौ चापि पठन् ब्रह्मत्वमाप्नुयात्॥ ८५॥ श्रुत्वैतत्तु
स्तोत्रमतुलं नमस्कृत्य च पार्वतीं॥ रंतिदेवो नरपतिः पप्रच्छ पितृसद्गतिं॥ ८६॥ मार्कंडेय उ०॥ रेवातटे महापुण्ये पितॄ
णां मोक्षवांछया॥ कुरुष्व श्राद्धं च यत्नं च मुच्यंते पितरो यथा॥ ८७॥ विज्ञाय पितृमोक्षार्थं कुब्जारेवासमागमे॥
श्रुत्वैवं रंतिदेवोऽपि वसिष्ठप्रमुखैः सह॥ ८८॥ नमस्कृत्य च मार्कंडं जगाम स्वपुरं नर॥ ततः श्राद्धस्य समये प्राप्ते काले ह्यु
पस्थिते॥ ८९॥ यज्ञवाटं ततः कृत्वा कुब्जारेवासमागमे॥ वसिष्ठप्रमुखैर्विप्रैर्ऋषिभिर्मुनिभिः सह॥ ९०॥ ईजे स यज्ञे
बहुसुवर्णं बह्वन्नं बहुदक्षिणं॥ गजाश्वरथदानेन नदे मम भूमिगवाह्निकः॥ विप्रेभ्यः संप्रदत्तेनु कर्तुं संख्यां न पर्यते॥
देवगंधर्वनागाश्च ग्रहा विद्याधरास्तथा॥ ९२॥ साक्षात्तत्र समागम्य इंद्राद्या जगदुर्बलिं॥ युगपत्पूजिता देवा
ब्रह्मविष्णुमहेश्वराः॥ ९३॥ अर्चितान्मदादेवी नीलमस्तेष्ववस्थिता॥ प्रवाहो निर्गतो यत्र कुब्जारेवासमागमे
॥ ९४॥ पितरस्तर्पिता स्तत्राप्तमुख्या युधिष्ठिर॥ विविधैः श्राद्धदानैश्च प्राप्तास्ते परमां गतिं॥ ९५॥ दिव्य
यानसमारूढा दधिचिं पितरस्वकं॥ शतमष्टोत्तरं चापि पितॄणां तदनंतरं॥ ९६॥ देवयानपथे सर्वे सदर्शनपो
त्तमः॥ ऊचुः सर्वे पितृदेवा ब्राह्मणाय रंतिभ भुजे॥ ९७॥ वरं वृणीष्व भद्रं ते स सेनानेन भूमिप॥ प्राप्तोपि परमं स्थानं

117
2008

पितृभिः सहशाश्वतं॥ ९८॥ रंतिदेवोऽब्रवीद्वाक्यं यद्यं मे वरदा यदि॥ कुलेऽस्य पितरो यत्र ब्राह्मणो वेदपारगः॥ चातुर्विद्ये
स्तुर्विद्यस्तु मुख्यार्थे पंच ब्रह्मतनुः स्वयं॥ शिवलिंगं भवेत्तत्र ज्वलत्कालानलप्रभं॥ १००॥ पर्वते यज्ञवाटे च प्रवाहा ये विनि
र्गताः॥ स्नाने विनिर्गता कुब्जा च रु॰ के॰ चरुका तथा॥ १॥ चर्मला चर्मवृक्षे तु रिल्पेलिल्या विनिर्गता॥ एताः पापहराः संतु
नद्यो रूपान्वयद्वता॥ २॥ एवं वरमहं याचे भवंतो वरयदा यदि॥ एवमस्त्विति ते देवा उक्त्वा तं नृपतिं प्रति॥ स्वस्वं यानं समा
रुह्य जग्मुः सर्वे यथागतं॥ रंतिदेवोऽपि नृपतिः पितॄननुध्यस्य भारत॥ ४॥ शिवं संस्थाप्य यत्नेन देवत्रयं स्वयं॥ कामगेया
नमारुह्य जगाम स्वं निवेशनं॥ ५॥ वादित्रैर्विविधैर्युक्तो जयशब्दपुरस्कृतः॥ मार्कंडेय उवाच॥ अमा सोमसमायो
गे कार्तिक्यां च व पर्वणि॥ ६॥ अत्र यद्दीयते दानं तद्दानं स्याय कल्पने॥ एतत्ते कथितं राजन् तीर्थं पापप्रणाशनं॥ ७
सपादकोटितीर्थानां कुब्जारेवासमागमे॥ दक्षिणोत्तरभागे च क्रोशमात्रे प्रतिष्ठितं॥ ८॥ अवनाः स्ववनो वापि
यात्र प्राणान्परित्यजेत्॥ दशवर्षसहस्राणि विद्याधरपुरे वसेत्॥ ९॥ बिल्वाम्रके सिद्धलिंगं कामं मोक्षफलप्र
दं॥ कुब्जेश्वरं तथा चान्यत् ब्रह्महत्यापनोदनं॥ ११०॥ अत्रांतरे महाराज शिवक्षेत्रं विदुर्बुधाः॥ अयं ते कथि
तो राजन् कुब्जारेवासमागमः॥ ११॥ श्रवणात्कीर्तनादस्य तीर्थस्य नरसत्तम॥ सर्वपापविशुद्धात्मा शिवलोके
महीयते॥ ११२॥ इति श्रीरेवाखंडे बिल्वाम्रकमाहात्म्यं नाम एकोनचत्वारिंशोऽध्यायः॥ ३९॥ मार्कंडेय उवा
च॥ अथान्यत्कथयिष्यामि तीर्थं पापहरं शुभं॥ यान्यप्रदेशे रेवाया आश्रमं सुरपूजितं॥ १॥ स्वर्णद्वीपमिति
ख्यातं देवद्रोणिसमन्वितं॥ हारीतो गौतमो विष्णुः सावर्णिः कौशिकस्तथा॥ २॥ इत्येवमादिबहवो मुनयः शंसि
तव्रताः॥ मासपक्षोपवासैश्च कृच्छ्रचांद्रायणैस्तथा॥ ३॥ शोषिताः कंदमूलैश्च तथान्ये वायुभक्षकाः॥ दं
तोलूखलिनः केचित् अन्ये संप्रक्षालकिनः॥ ४॥ जलपर्णाशनाश्चान्ये एकपादस्थिताः परे॥ तथैवोर्ध्वक
राः केचित् कणधमाशिनः परे॥ ५॥ नानाविद्यासु निरता योगाभ्यासरतास्तथा॥ तत्र से चेरुस्तापतमाः स

रे॰ख॰ यौद्मेय था॥८॥ न्यग्रोधाशोकबदरीबिल्वपुन्नागकेसरैः॥ धवपाटलमुख्यैश्च चिंचिणिंबचंपकैः॥ आपत्र
५८ पुष्पफलोपेतैर्वृक्षैः सर्वैरलंकृतं॥ नानापक्षिगणैर्जुष्टं सिद्धगंधर्वसेवितं॥८॥ व्याहर्तारं दृताः सर्वैर्मनुष्याणां शि
रोरुप॥ एवंगुणसमायुक्तं सुवर्णद्वीपमुत्तमं॥९॥ अर्चनाद्देवदेवस्य सुवर्णद्वीपवासिनः॥ अपहायतमः कृत्स्नं
लोके क्रीडंति शंकरे॥१०॥ पुण्यायां भूपकार्तिक्यां सर्वतीर्थफलप्रदे॥ तेन पश्यंति मनुजाः कलिमायाविमो
हिताः॥११॥ नास्तिकैर्भिन्नमर्यादैः पुराणस्मृतिनिंदकैः॥ कलिभावविमूढैश्च स्थानं नैव तु दृश्यते॥१२॥ हिरं
ण्यगर्भा च सरितः यस्मिन्वहति भारत॥ पद्मगर्भेश्वरं नाम शिवलिंगं प्रतिष्ठितं॥१३॥ पूज्यंते सिद्धगंधर्वैः सुरासु
रमहोरगैः॥ यत्र वैवस्वतो राजा चंद्रविंबाननो भवत्॥१४॥ चैत्रस्यापि च मासस्य शुक्लपक्षे महोदयी॥ चतु
र्दश्यां पूर्णमास्यां तत्र संनिहितो नरः॥१५॥ तिलोदकप्रदानेन पिंडदानेन भारत॥ पितॄन्समुद्धरेत्तत्र नरकाद्द
रिदक्षिणा॥१६॥ निवसेद्धि ह्मवी लोके यावदिंद्राश्चतुर्दश॥ तत्र यद्दीयते दानं कुरुक्षेत्रसमं हि तत्॥१७॥ प्रा
प्यमाणपरित्यागेन पश्यति यमालयं॥१८॥ इति सुवर्णद्वीपं हिरण्यगर्भासंगमः॥ मार्कंडेय उ॰॥ ततो गच्छे
त राजेंद्र मांडव्याश्रममुत्तमं॥ नर्मदायाम्यभागे तु तीर्थं परमशोभनं॥१॥ तस्मिन्सहस्रशः संति मुनयः सं
शितव्रताः॥ विभांडकश्च गार्ग्यश्च ऋष्यशृंगो सितः क्रतुः॥२॥ इत्येवमादयः सर्वे नानाव्रतपरायणाः॥ व
नं चाशोकवनिकानाम्ना राजन्प्रकीर्तितं॥३॥ तत्र संनिहितो देव उमया सह शंकरः॥ प्रविष्टश्चाश्रमे तत्र
विमलः शिवः॥४॥ विशोका च सविष्टा देवा या पत्र संगता॥ तत्र स्नात्वा दिवं याति यमलोको स्ति पुनर्भवात्॥५
अशोकेश्वरनामानं सिद्धलिंगं तु शंकरं॥ पूजयात स्य देवस्य मोदते दिवि देववत्॥६॥ अशोकेश्वरसांनि
ध्ये वसेत शक्रपुरोगमाः॥ देवाश्च ऋषिसंघाश्च नियमंति युधिष्ठिर॥७॥ विश्वेदेवाः श्रमं विद्धि सर्वदेवन ५८
मस्कृतं॥ विश्वायां च पुरा पुत्रान्विश्वेदेवाभिधान्नृप॥८॥ अशोकवनिकायं च जनयामास कश्यपः॥ वे

119/2008

वस्वतेंतरे प्राप्ते त्रेतायां नृपसत्तम॥९॥ पंचायुतानि तीर्थानि तत्र सिद्धानि भारत॥ अशोकेश्वरपूजाभिरशो
को जायते नरः॥१०॥ सहस्रसंख्यास्तत्राद्यो मुनीनां प्रवराः स्त्रियः॥ अरुंधती च सावित्री देवमाता दितिस्तथा
११॥ देवयानी तथेंद्राणी रोहिणी शांकरायणी॥ दाक्षायणी लोकवंद्या लोपामुद्रा यशस्विनी॥१२॥ रत्नावती
सर्वभार्या स्वाहाद्या देवतास्त्रियः॥ अशोकास्तास्तु तीर्थेस्मिन्बभ्रयुः शतसंख्यया॥१३॥ अस्य तीर्थस्य मा
हात्म्यान्मुच्यंते कलुषान्नराः॥ शुक्लपक्षे चतुर्दश्यां आश्विने पाक्षि भारत॥१४॥ अपुत्रिणी तथा वंध्या दुर्भगा भ
र्तृवर्जिता॥ पंचरत्नौषधिफलैः स्नाप्यं वै कलशैः शुभैः॥१५॥ पुत्रिणी सुभगा सा स्याद्वज्ञात तत्स्मान्निभारत॥ पुरा
णा यावरोदत्तस्त्वशोकवनिकां प्रति॥१६॥ यस्मिन्वहति सा देवी नर्मदा सप्तकल्पगा॥ आविष्टा लोकपालैश्च
दिक्पालैश्चाप्यनेकधा॥१७॥ अन्यक्षेत्राद्दशगुणं तत्र दानादिकं भवेत्॥ स्नातं जप्तं हुतं ध्यातं श्रद्धया वाविधि
वत्कृतं॥१८॥ बहूनि संति तीर्थानि कुरुक्षेत्रादिकानि च॥ अशोकवनिकायास्तु नान्यतीर्थसमं विदुः॥१९॥ ॥
इति श्रीरेवाखंडे रौद्रीसंहितायां वायुपुराणे॥ अशोकेश्वरतीर्थं नाम चत्वारिंशत्तमोध्यायः॥४०॥ ॥मार्कं
डेय उ॰॥ अथान्यत्कथयिष्यामि तीर्थं वाग्मीश्वराभिधं॥ वाग्युनाम नदी यत्र रेवया सह संगता॥१॥ तत्र
स्नाता दिवं याति यमलोकं न पुनर्भवात्॥ वाग्मीश्वा तत्र चामुंडा दानवक्षयकारिणी॥२॥ मणिभद्रवीरभद्रा
५५ स्तथान्ये शतशो नृपाः॥ बभ्रुर्मुक्तशापास्ते तीर्थस्यास्य प्रभावतः॥३॥ तिलपिंडप्रदानेन पितॄणां परमा गतिः
॥ब्रह्मदत्तश्च चक्रवर्ती सूर्यवंशो पुराभवत्॥४॥ अयोध्याधिपतिः श्रीमान् शक्रतुल्यपराक्रमः॥ दृष्ट्वा तु
वरस्तेन नर्मदावाग्युसंगमे॥५॥ ब्रह्माद्या देवताः सर्वाः शक्रविष्णुपुरोगमाः॥ प्रसक्षाश्च महेशानगणे
श्वरपुरोगमाः॥६॥ एवमाद्याश्च ऋषयोन्ये पुनामंत्रितास्ततः॥ हिरण्मयास्तत्र यूपाः सर्वे चापि हिर
ण्मयं॥७॥ गजाश्वरथलक्षाणि गावो हेमसमन्विताः॥ बहुलक्षाद्दौ राजा दक्षिणायां मखोत्तमे॥८

रे०खं० स्वर्णभारसहस्राणि रत्नं नानाविधं बहु ॥ राजानः कर्मकर्तारो बहुदेशसमागताः ॥९॥ पायसं दीयते यावत्
५९ तत्तस्यासु प्रदीयते ॥ एवं प्रवर्तितो यज्ञो बह्वन्नो बहुदक्षिणः ॥१०॥ ब्रह्महत्यस्य पद्येन वाग्मीशस्य प्रसादतः ॥ न
र्मदासंगमयोगेन वितरणात्तपसत्तम ॥११॥ कल्पावसाने यावच्च तुहिविद्देवत्वसंस्थितः ॥ प्रेतत्वमुक्ताः प्रेताश्च ये के
चित्कोटिशमात्रगाः ॥१२॥ एतत्ते कथितं राजन्यथा दृष्टं पुरातनं ॥ वाग्मीशानसमायुक्तं तीर्थं संगममंडितं ॥१३॥
इति श्रीरेवाखंडे वागुरेवासंगममाहात्म्यं नाम चत्वारिंशोऽध्यायः ॥४१॥ मार्कंडेय उ० ॥ ततो गच्छेत राजेंद्र
तीर्थं पापहरं शुभं ॥ सहस्रावर्तकं नाम स्वर्गसाधनमुत्तमं ॥१॥ तत्र स्नात्वा यथाविधिवत् वृषोत्सर्गफलं
लभेत् ॥ आसप्तमं कुलं चैव पुनाति नात्र संशयः ॥२॥ रेवाया उत्तरे कूले आर्यपुक सहस्रकं ॥ तत्र चास्ति महा
भागकारावनमनुत्तमं ॥३॥ अग्निष्टोमफलं यत्र स्नात्वा स्वर्गं च गच्छति ॥४॥ इति श्रीसहस्रावर्तकं तीर्थं ॥
मार्कंडेय उ० ॥ रेवाया उत्तरे भागे तीर्थं परमशोभनं ॥ सौगंधिकं वनं नाम ब्रह्मचारिगणाः पुरा ॥१॥ सिषेवुः
पितरस्ते तु ब्रह्माद्याश्च तपोधनाः ॥ सिद्धचारणगंधर्वाः सकिंनरमहोरगाः ॥२॥ सदा पर्वणि सेवंते वार्धि
तं ब्रह्मचारिभिः ॥ प्रविश्य तद्वनं मर्त्यः सर्वपापैः प्रमुच्यते ॥३॥ विप्रांस्संतर्प्य तत्रैव पितॄणां तत्परस्सया ॥
वनछाया प्रसुप्तानां न दोषा दहसं भवं ॥४॥ इति सौगंधिकवनमाहात्म्यं ॥ मार्कंडेय उ० ॥ ततः सरस्वती
गच्छेन्नदीनामुत्तमां नदीं ॥ प्लक्षाद्देव समुद्भूता महापुण्या सरिद्वरा ॥५॥ तत्र स्नानं प्रकुर्वीत वल्मीकाभि
व्रते जले ॥ तर्पयित्वा पितॄन्देवान्नरमेधफलं भवेत् ॥६॥ इति सरस्वतीतीर्थमाहात्म्यं ॥ मार्कंडेय उ० ॥ ईशा
नाध्युषितं नाम तीर्थं परमदुर्लभं ॥ तत्र स्नात्वा व्यतीपाते संक्रांतौ ग्रहणे नरः ॥७॥ सहस्रकपिलादाने वा
जिमेधे च यत्फलं ॥ तत्फलं समवाप्नोति ईशानाध्यु षितो नरः ॥८॥ इति ईशानतीर्थं ॥ मार्कंडेय उवाच ॥ ५९
देवतात्रितयं तत्र सर्वाशुभविनाशनं ॥ सुगंधा शातकुंभा च पंचयज्ञा च भारत ॥ अभिगम्य नरश्रेष्ठ स्वर्गे

121/2008

लोके महीयते ॥ त्रिशूलखातं तत्रैव तीर्थमासाद्य भारत ॥१०॥ तत्राभिषेकं यः कुर्याद्देवं ध्यात्वा त्वदं वताः ॥ गाणपत्यं स लभते
पुनर्जन्मनि भारत ॥११॥ ततो गच्छेन्महाराज ब्रह्मणः स्थानमुत्तमं ॥ रेवाया उत्तरे कूले कामभोगफलप्रदं ॥१२॥ ब्रह्मोदमिति
विख्यातं प्रकाशं भुवि भारत ॥ तत्र सप्तऋषयः सिद्धा ब्रह्मलोकं च योगिनः ॥१३॥ मुनयः सिद्धसंघाश्च तापसा ब्रह्मवादिनः
यस्य तीर्थस्य माहात्म्यात् ब्रह्मलोकमवाप्नुयुः ॥१४॥ पितरः श्राद्धदानेन प्रयाता ब्रह्मणः पुरं ॥ उदंबरस्य देवस्य कृत्वाभि
षिंव दर्शनं ॥१५॥ ब्रह्मस्थानमवाप्नोति तपसा दग्धकिल्बिषः ॥१६॥ इति ब्रह्मोदतीर्थं ॥ ततो गच्छेन्महाराज शांकरं लोक
शंकरं ॥ कृष्णपक्षे चतुर्दश्यामभिगम्य वृषध्वजं ॥१७॥ लभते सर्वकामांश्च स्वर्लोकं चापि गच्छति ॥ नर्मदायाम्य
भागेनु गोप्याद्गोप्यतरं महत् ॥१८॥ सिद्धलिंगं मणिमयं न तत्पश्यंति मानवाः ॥ नागेंद्रसुरदैत्याश्च नागकन्याभि
रर्च्यते ॥१९॥ वहुतीर्थाश्रयं लिंगं शांकरं कुरुनंदन ॥ वसुनामाश्रयं पुण्यं पुनीतं ब्रह्मचारिणां ॥२०॥ शिवभक्तिप
रायाश्च कंदमूलफलाशिनां ॥ पितॄणां चाक्षयास्तृप्तिस्तिलतोयप्रदानतः ॥२१॥ शांकरं देवमभ्यर्च्य दत्वा दानं च श
क्तितः ॥ शांकरस्य प्रभावेन शिवदेवत्वमाप्नुयात् ॥२२॥ इति श्रीशांकरतीर्थं ॥ ततो गच्छेत राजेंद्र सोमतीर्थमनु
त्तमं ॥ नर्मदादक्षिणे कूले पितॄणां मुक्तिदायकं ॥२३॥ तत्र स्नात्वा नरो राजन् स्वर्गलोके महीयते ॥ पितरः श्रा
द्धदानेन लभंते तृप्तिमक्षयां ॥२४॥ तिलोदकप्रदानेन तथा मर्त्यः शिवार्चनात् ॥ शिवलोकमवाप्नोति वर्षाणामयु
तं नृप ॥२५॥ इति सोमतीर्थं ॥ ततो गच्छेत राजेंद्र तीर्थं सारस्वताभिधं ॥ नाम सर्वांतरे पूर्वं यत्र सिद्धा सरस्वती
॥२६॥ द्वापरे प्रथमे पादे वरु तीर्थं समन्विता ॥ ब्राह्मी सरिच्छुभं देहा रेवायामभिवर्तिता ॥२७॥ तत्र सा स्थाप
यामास लिंगं सारस्वतं शुभं ॥ तत्र स्नात्वा दिवं यांति मर्त्या न ते पुनर्भवाः ॥२८॥ सारस्वतं शिवं ये च पूजयंति
स्वशक्तितः ॥ ते पुण्यदेहाः पुरुषं ब्रह्मणा मभिगामिनः ॥२९॥ ये त्वग्निपावाहे वदः त्वणपर्णा जलाशनः ॥ ते
चात्र मुनयः सिद्धाः सर्वे वैलोक्य विश्रुताः ॥३०॥ अत्र मंकणको नाम ऋषिराद्यो शिवार्चकः ॥ स्नात्वा सारस्वते देवं स

रे॰ खं॰ पञ्चाहारमसृजत् ॥ ३१ ॥ निराहारतपःक्लिष्टपरिणामविवत्सया ॥ सेवन्तं रसं दृष्ट्वा हर्षाविष्टोभवत्तदा ॥ ३२ ॥ ननर्त्त
८० बहून्कालांस्तेन तुष्टिनीयविस्मितो मुनिः ॥ तस्मिन्नर्त्तति विप्रेंद्रे स्थावरं जंगमं जगत् ॥ ३३ ॥ ननर्त्त श्रुमहावीरा तेजसा तस्य
मोहितं ॥ ब्रह्मादिभिः स्तुतो राजन् मुनिभिर्दैवतैः सह ॥ ३४ ॥ विज्ञाप्तः शंकरो देवो नर्त्तनं मुनिविश्वपाः ॥ ननर्त्त तिमु
नियेन तथा त्वं कर्त्तुमर्हसि ॥ ३५ ॥ शिवोप्यागत्य तं दृष्ट्वा हर्षेणाविष्टमानसम् ॥ रसं तमब्रवीद्वाचं सुराणां हितकाम्यया
३६ ॥ भो भो महर्षे धर्मज्ञ किमर्थं नर्त्तितं त्वया ॥ हर्षस्य कारणं किं वा तन्मे ब्रूहि त्वमत्र सांप्रतं ॥ ३७ ॥ मंकणक उ० ॥ किं न पश्य
सि मे देहे जलस्य तु रसं शुभं ॥ यं दृष्ट्वा संभ्रमत्तोहं हर्षेण महता वृतः ॥ ३८ ॥ प्रसन्नश्चाब्रवीद्देवो मुनिं रागेण मोहितं ॥
ममापि विस्मयो जातो त्वां दृष्ट्वा मुनिपुंगव ॥ ३९ ॥ एवमुक्त्वा नरश्रेष्ठ महादेवन संस्थितः ॥ अंगुल्यग्रेण नृपते स्वांगु
ष्ठस्ताडितस्तदा ॥ ४० ॥ ततो भस्म स्रुतं राजन् निर्गतं हिमसंनिभं ॥ तं दृष्ट्वा लज्जितो भीतः स मुनिः पादयोर्गतः ॥ ४१
रुद्रं त्वां देवमन्येहं नान्यस्त्वमसि वै विभो ॥ सुरासुराणां जगतां गतिस्त्वमसि शूलधृक् ॥ ४२ ॥ त्वया सृष्टमिदं सर्वं त्रै
लोक्यं त्रिपुरांतक ॥ तथैव पालयन्देव वर्त्तसे जगति स्वयं ॥ ४३ ॥ त्वया संह्रियते सर्वं पुनरेव युगक्षये ॥ देवैरपि
न ज्ञाप्यस्त्वं परो ज्ञातुं कुतो मया ॥ ४४ ॥ त्वत्प्रसादात्सुराः सर्वे मोदंते त्वकुतोभयाः ॥ एवं स्तुत्वा महादेवं स मुनिः प्र
णतो भवत् ॥ ४५ ॥ न ज्ञातं मे जोनं ना भिमतोहं वात्यबुद्धिमान् ॥ तथा कुरु महादेव तपो मे न क्षरेद्यथा ॥ ४६ ॥ त
तो देवः प्रहृष्टात्मा ऋषिं तमिदमब्रवीत् ॥ तपस्ते वर्द्धतां विप्र मत्प्रसादादनेकधा ॥ ४७ ॥ तत्र सर्वं विजानीहि ज्ञास्यते
च तथा मुने ॥ यत्त्वयाज्ञानुमारब्धं यस्त्वार्थयसि निःस्पृहः ॥ आश्रमे चात्र वत्स्यामि त्वया सार्धं महामुने ॥ मंकणेश्वर
नाम्नाहं लोकानामभयप्रदं ॥ ४९ ॥ अत्र सारस्वते तीर्थे यो मां संपूजयति द्विजः ॥ न तस्य दुर्लभं किंचिदिह लोके परत्र
च ॥ ५० ॥ एतत्ते कथितं राजन् तीर्थं सारस्वतं मया ॥ श्रवणात्कीर्त्तनादस्य गोसहस्रफलं लभेत् ॥ ५१ ॥ इति श्रीरेवा ८०
खंडे सारस्वततीर्थमहात्म्यं नाम द्वाचत्वारिंशोध्यायः ॥ ४२ ॥ मार्कंडेय उ० ॥ ततः सहस्रयज्ञाख्यं त्रिषु लोकेषु विश्रु

123
2008

तं ॥ नर्मदा दक्षिणे भागे तीर्थं सिद्धिप्रदायकं ॥ १ ॥ यत्र ब्रह्मादयो देवा मुनयश्च तपोधनाः ॥ कार्तिकेयश्च भगवा
न् विसंध्यं किल भारत ॥ २ ॥ सांनिध्यं कुर्वते नित्यं भार्गवप्रियकाम्यया ॥ तत्र स्नात्वा च जप्त्वा च तर्पयित्वा पितॄन्मु
दा ॥ ३ ॥ फलं यज्ञसहस्रस्य प्राप्नोति न्रपसत्तम ॥ पुरा ऋषिसहस्रेण भार्गवप्रमुखेन तु ॥ ४ ॥ इष्टं यज्ञसहस्रं वै
विधिनावविधात्मना ॥ सहस्रयज्ञसंज्ञं वै तेन तीर्थं विदुर्बुधाः ॥ ५ ॥ इति सहस्रयज्ञतीर्थं ॥ मार्कंडेय उ० ॥ कपा
लमोचनं तीर्थं ततो गच्छ युधिष्ठिर ॥ कपालमोचनं नाम ख्यातं पापप्रणाशनं ॥ ६ ॥ तत्र स्नात्वा नरव्याघ्र सर्वपा
पैः प्रमुच्यते ॥ कपालेश्वरदेवस्य लिंगं संपूज्य मानवः ॥ ७ ॥ मुक्तपापो विशुद्धात्मा शिवलोके महीयते ॥ पितॄणा
मक्षयां तृप्तिर्दत्वा चापि तिलोदकं ॥ ८ ॥ इति कपालमोचनतीर्थं ॥ मार्कंडेय उ० ॥ अग्नितीर्थं ततो गच्छेन्नियतो भर
तर्षभ ॥ अग्निष्टोमफलं प्राप्य कुलं चापि समुद्धरेत् ॥ ९ ॥ रेवाया उत्तरे कूले पंचकुंडानि भारत ॥ भारद्वाजो गोतमोत्रिः
पालस्त्यः पुलहस्तथा ॥ १० ॥ अत्र लोकं गता राजन् ज्वलनस्य प्रसादतः ॥ हूयमानस्तु तैर्वह्निः प्रत्यक्षोभद्युधिष्ठिर ॥
११ ॥ ततस्तोत्रेण ते सर्वे तोषयामासुरुत्थिताः ॥ त्वमग्ने सर्वदेवानां मुखं वेदेषु गीयते ॥ १२ ॥ त्वमेव सर्वभूतानां मंत
श्वरसि पावक ॥ त्वमेव कव्यमित्याहुस्त्वमेवात्राविधः पुनः ॥ १३ ॥ त्वमष्टमूर्त्तिमूर्त्तिश्च यज्ञवाहस्त्वमेव च ॥ त्वया सृष्ट
मिदं सर्वं प्रवदंति महर्षयः ॥ १४ ॥ त्वद्दृते हि जगत्सर्वं सद्यो नश्येद्धुताशनः ॥ तुभ्यं दत्वान्नमो विप्राः स्वकर्मोपार्जितां ग
तिं ॥ १५ ॥ गच्छंति सह पत्नीभिस्त्वत्प्रसादेन शाश्वतीं ॥ त्वमग्ने जलदानेन स्वविषत्वाश्च विश्रुतः ॥ १६ ॥ त्वत्तो निर्ग
तभूतानि त्वमेव दहसि प्रभो ॥ ज्ञानवेद्यस्त्वमेवासि विश्वसृष्टिर्महामते ॥ १७ ॥ त्वया यत्कर्म विहितं तत्सर्वं स्यात्त्वरा
चरं ॥ त्वयापो विहिताः पूर्वं त्वमेव च प्रमासि स्वयं ॥ १८ ॥ त्वयि हव्यं च कव्यं च यथावत्संप्रतिष्ठितं ॥ अग्निस्त्वमेव यज्ञानां
त्वं धाता त्वं बृहस्पतिः ॥ १९ ॥ त्वमश्विनौ यमः सूर्यः सोमस्त्वमसि पावक ॥ इत्येवं संस्तुतो वह्निस्तोषितो भक्तिसंयुतैः
२० ॥ प्रसन्नश्चाब्रवीत्तत्र मुनीन्सर्वान्वचः सत्तमः ॥ भारद्वाजादिमुनयः स्तोत्रेणाहं प्रतोषितः ॥ २१ ॥ वरं त्वया चित माप

रे·खं·
६१
प्रदास्यामि यथेप्सितं ॥ तपोयज्ञादिकं कर्म सिध्यतां वो यथेप्सितं ॥ २२ ॥ ब्रह्मलोके निवासोस्तु वांछितार्थसिद्धिरस्तु वः
॥ इति दत्वा वरं वह्निस्तत्रैवांतर्धानमथागमत् ॥ २३ ॥ ततस्ताः सर्वे ऋषिभिर्वांछितं येनैन ॥ ततश्चाग्नीश्वरं देवं स्थापयि
त्वा हृष्टा तत्तमः ॥ २४ ॥ हर्षेण महता युक्ताः सत्यलोकमुपागताः ॥ वैश्वानरमिदं स्तोत्रं सर्वपापप्रणाशनं ॥ २५ ॥ यः पठेद्दा
मकाले वै ब्रह्मलोकमवाप्नुयात् ॥ अग्नीश्वरं महादेवं सुरासुरनमस्कृतं ॥ २६ ॥ नर्मदातीरसंस्थं यः संगमे तिगमर्चयि
ता ॥ न रोदान चशोभोग्यं न दुःखं नाग्निमाप्नुता ॥ २७ ॥ तस्य जन्मनि चानुः पंचजायते नैव युधिष्ठिर ॥ २८ ॥ इति श्रीरेवा ॥ ॥
अग्नितीर्थं ॥ मार्कंडेय उ० ॥ ततो गच्छेत राजेंद्र तीर्थं त्रैलोक्यविश्रुतं ॥ अदितीश्वरनमद्देवं लोकानपरमकारिणं ॥ १ ॥ नर्मदा
सौम्यभागे तु महापातकनाशनं ॥ तत्र स्नात्वा दिवं याति सारंगा वै नु वापदं ॥ २ ॥ तिलोदकप्रदानेन पितॄणां मस्तयाग
तिः ॥ शृणु राजन्पुराख्यानं मादिकल्पे कृते युगे ॥ ३ ॥ अदितिर्देवमाता तु सर्वलोकहितेच्छया ॥ दिव्यं वर्षसहस्रं तु
तोयं यासहभारत ॥ ४ ॥ कृतोपचारा पुत्रार्थे स्वयं सवीक्ष्य नाशिवं ॥ आराधयामास भक्त्या कन्यगा तीरमाश्रि
ता ॥ ५ ॥ तस्या भक्तिं परां ज्ञात्वा ततस्तुष्टोब्रवीच्छिवः ॥ वरं वरय सुश्रोणि यत्ते मनसि वांछितं ॥ ६ ॥ दास्ये हं तेन
संदेहो यद्यपि स्यात्सुदुर्लभं ॥ अदितिरु० ॥ यदि तुष्टोसि देवेश न वरं दातुमर्हसि ॥ ७ ॥ द्वौ सुतौ लोकपालौ मे भव
तां त्वत्प्रसादतः ॥ तव तेजोंशसंभूतौ चंद्रसूर्यौ विवादितौ ॥ ८ ॥ चराचरस्य लोकस्य त्रिदिवस्य च पालकौ ॥ अत्र यः
पूजयेत्तु स्यं स्नात्वा पापयसि नार्मदे ॥ ९ ॥ न तस्य पुनरावृत्तिः संसारे दुःखसागरे ॥ कालिंदीसंगमे पुण्य ताप्यां चैव सु
रेश्वर ॥ १० ॥ पयोष्णीसंगमे यत्र दानसंख्या न विद्यते ॥ गंगायमुनयोर्मध्ये स्वर्गसोपानमुत्तमं ॥ ११ ॥ एवं तीर्थं सुदे
वेषु स्नानं पूजनतर्पणैः ॥ जपहोमस्तथा श्राद्धे यत्पुण्यं तद्द्विरास्तु वै ॥ एवं तीर्थं मया प्रोक्तं आदित्येश्वरमुत्तमं ॥
अस्मिंस्तीर्थे च ऋषयः पुरा सिद्धाः सहस्रशः ॥ १३ ॥ सावित्र्यश्चोपमनुष्यश्च रूपांगुर्मध्य गौतमः ॥ दक्षः क्रतुः तप ६१
मुख्या अत्र सिद्धिं परां गताः ॥ १४ ॥ एवं चाप्यदितिः प्राप्य वरं त्रो चापयेप्सितं ॥ स्वस्थानमगमद्यत्र कश्यपो मुनिस

125/2008

त्तमः ॥ १५ ॥ प्राप्य सर्वोदिका पुत्रान्स्वयं च प्रार्थितद्वयं ॥ बहुपुत्रा समभवत्सुपुत्रा या पितां वरा ॥ १६ ॥ एतत्ते कथि
तं राजन्नादित्याख्यानमुत्तमं ॥ धन्यं यशस्यमायुष्यं पुत्रदं स्वर्गसाधनं ॥ १७ ॥ यत्र यत्र गता देवा नर्मदालोकपा
वनी ॥ तत्र तत्र महाराज स्वर्गसोपानपंक्तयः ॥ १८ ॥ दक्षिणोत्तरभागे तु नर्मदायां वसंति ये ॥ पापयोनिं न गच्छंति
तीर्थे चास्मिन्नि नृपतेः ॥ १९ ॥ इति श्रीरेवाखंडे अदितीश्वरतीर्थत्रयश्चत्वारिंशोध्यायः ॥ ४३ ॥ मार्कंडेय उ० ॥ अ
थान्यत्कथयिष्यामि वाराहतीर्थमुत्तमं ॥ तत्र स्नात्वा नरो भ्यां प्रपूजयित्वा जनार्दनं ॥ १ ॥ सर्वपापविशुद्धात्मा विष्णु
लोकं स गच्छति ॥ तत्र वाराहरूपेण बोधिता विष्णुना महीः ॥ २ ॥ कार्तिके शुक्लपक्षे न कौ द्वपामुपोषितः ॥ पू
जयित्वा बंभक्त्या दीपमालाप्रबोधयेत् ॥ ३ ॥ ब्राह्मणान्भोजयेत्भक्त्या कोटिर्भवति भोजिता ॥ युधिष्ठिर उ० ॥ कि
मर्थमुद्धता पात्री वाराहवपुषा कथं ॥ ४ ॥ एतन्मे शंस भगवान् वाराहचरितं महत् ॥ मार्कंडेय उ० ॥ पुरा देवास्सु
रेः संतु मलनामहर्षणे ॥ ५ ॥ दानवैर्निर्दलिता देवाः पलायन परायणाः ॥ पारं गंतुं न शक्तास्ते प्रविष्टाः शोकसा
गरं ॥ ६ ॥ तो त्रैरनाप्य गच्छतकिं कृत्वा किं भविष्यति ॥ अलं भला मह नष्टं नरसातलं तलं ययौ ॥ ७ ॥ सर्वां चैव मम
सा तानीतश्च वानमार्गगामिनी ॥ न चातिपवना राजन् उद्वेनाश्चापि वा भवन् ॥ ८ ॥ तम्मुक्ति कारणं देवा माधवं
मधुसूदनं ॥ ब्रह्मा रुद्रादयः सर्वे क्षीरसागरशायिनं ॥ ९ ॥ श्रीपतिं श्रीसमाश्लिष्टं नायानं योगनिद्रया ॥ त्रै
लोक्यायानयस्मिन्नेजगज्जगतिजायतो ॥ १० ॥ कृतांजलिपुटाः सर्वे स्तोत्रमेतदुदाहरन् ॥ देवा ऊचुः ॥ सनातन ज
गन्नाथ मर्मपमस्तनमास्तुते ॥ ११ ॥ आदिदेवमहादेव सुरासुरनमस्कृत ॥ आपो नाराइति प्रोक्ता आपो वै नर
सूनवः ॥ १२ ॥ तो यदस्यायनं पूर्वं तेन नारायणः स्मृतः ॥ ब्रह्मोवाच ॥ प्रपद्ये प्रातरुत्थाय प्रयता मा कृतांजलिः
॥ १३ ॥ नमो नारायणायेति प्रणम्य श्रूरनाग्राग्रं ॥ यस्य नाभिस्थितं सर्वं जगदेतच्चराचरं ॥ १४ ॥ तमभ्यर्चितु मि
च्छामि नाभिर्वाचस्पतिं गुरुं ॥ यस्मिन्नेतरिंद वास्येनिविष्टं सचराचरं ॥ १५ ॥ एकस्मिन्निद्रियातीतस त्रै

रे॰ ख॰ मणिगणा इव॥ कारणानां स्वभावस्य कारणं परमेश्वरं॥१६॥ गुणमायारथारूढं नित्यमीश्वरमव्ययं॥ सहस्रशिरसं देव
६२ मक्षं सकलनिःकलं॥१७॥ वेदं पुरुषमव्यक्तं आद्यं नारायणं हरिं॥ यमाहुः परमात्मानं अक्षयं ब्रह्मवादिनः॥१८॥ तं च
यं ज्ञानिनां ज्ञानं वासुदेवमुपास्महे॥ ओंकारः प्रणवो दीर्घः प्रतिज्ञात्मा च गतोत्तरः॥१९॥ अमृतं शाश्वतं ब्रह्म वासुदे
वोस्तु मे गतिः॥ भूर्भुवः स्वस्य चाप्ययं पुण्यकीर्तिरनामयः॥ वाक्पतिर्यश्च सांनिध्यं वासुदेवोस्तु मे गतिः॥ हंसः शुचि
षष्टी षद्योम्य कोवसुर्नामा अंतरिक्षसत्॥२०॥ होता वेदिषन्नो वासुदेवोस्तु मे गतिः॥ स्वाहाकारः स्वधाकारो वषट्कारो
हविष्यभुक्॥२१॥ क्षेत्रज्ञः परमः साक्षी जगतां तारको हरिः॥ ईश्वरो हृदयावासो वासुदेवोस्तु मे गतिः॥२२॥ क्र
स्मृतिर्यज्ञेषु मतिः सा ममतिः कर्मगाः॥ सर्वशास्त्रमयो व्यक्तो वासुदेवोस्तु मे गतिः॥२३॥ श्रावण्यः श्रवणो ह्रो
यः पुण्यश्लोकस्तु विश्रवाः॥ वरदो वासुदेवोग्नि वासुदेवो॥२४॥ पुरुषः पुंडरीकाक्षः पुराणो भुवनेश्वरः॥ आ
दित्योंतर्गतो वह्निर्वासुदेवोस्तु॰॥२५॥ संकुलाली यहंता च सुमालिवलमर्दनः॥ शिशुपालनिहंता च वासु॰॥
२६॥ कालनेमिनिहंता च यः कालयवनांतकः॥ बाणासुरपुराघ्नो वै वासु॰॥२७॥ केशवः केशिहंता च मधुकैट
भनाशनः॥ शंखचक्रगदापाणिर्वासु॰॥२८॥ हृषीकेशः श्वेतद्रसखो वं ध्वा गरुडवाहनः॥ सहस्रनामा धर्म
ज्ञो वासुदे॰॥२९॥ श्मश्रुम श्मश्रु पामा च युगपर्णो युगांतकृत्॥ क्षीरोदशायी निर्वाणो वासु॰॥३०॥ अव्य
क्तात्मा महात्मा यस्त्वंतरात्मा जनार्दनः॥ प्राणात्मेंद्रिय मंतात्मा वासु॰॥३१॥ इति वागीश्वरो वाग्भिः पूजितः प
रमेश्वरः॥ भक्तस्य भगवान् विष्णुः प्रीयतां मे जनार्दनः॥३२॥ जन्मप्रभृति यत्किंचिन्मया सुकृतमर्जितं॥ तेन स
र्वेण सर्वात्मा प्रीयतामादिरुद्धि भूः॥३३॥ एवमभ्यसतो नित्यं संसजितः परमेश्वरः॥ विनाशयति पापानि प्रकाश ६२
यति तत्फलं॥३४॥ एष निःकंटकः पंथा यत्र संपूज्यते हरिः॥ कुपथं तं विजानीयाद्यत्र नाराध्यते हरिः॥
३५॥ वासुदेवपरा वेदा वासुदेवः परा क्रिया॥ वासुदेवपरा विप्रा वासुदेवः परं फलं॥३६॥ सर्वदेवा वासुदेवा

127/2008

श्चसत्ताः सर्वे वेदा वासुदेवं यजंते॥ सर्वेषां वेवासुदेवो पिदेवो नान्यत्किंचिद्वासुदेवातिरिक्तं॥३६॥ नास्ति विष्णोः
परं देवो नास्ति विष्णोः परं तपः॥ नास्ति विष्णोः परं ज्ञानं सर्वं विष्णुमयं जगत्॥३७॥ विष्णुर्माता पिता विष्णुर्विष्णु
स्वजनबांधवाः॥ विष्णुर्ज्ञातिश्च गोत्रं च सर्वं विष्णुमयं जगत्॥३८॥ ये पठंति नरा भक्त्या विष्णुनामांकितं स्त
वं॥ ते यांति वैष्णवं लोकं त्यक्त्वा पापमनेकधा॥३९॥ इत्येवमादिबहुधा संस्तुतः परमेश्वरः॥ ब्रह्मणा भक्तियोगा
द्विश्वदीपापनुत्तिकृत॥४०॥ मार्कंडेय उ॰॥ श्रुत्वा स्तोत्रमिदं देवो ब्रह्मणः सुमहात्मनः॥ श्रियाप्रबोधितः कृ
ष्णः नायानो योगनिद्रया॥४१॥ दृष्ट्वा अग्नीन् सुरान् सर्वान् नानारूपान् भयान्वितान्॥ किं कार्यं वा भयं वार्त
यैनत्य कंदिवसुराः॥४२॥ कथयंतु यथातत्त्वं यतः सर्वे समागताः॥ ब्रह्मोवाच॥ त्वयि सुप्ते जगन्नाथ पान्नकेद
वकोर्वैः॥४३॥ दानवैः स्वदिता धात्री स्वर्गश्चैव विनाशिता॥ धर्मा कर्मादिकं यज्ञा वेदा विप्रा विनास्तथा॥४४
परादनुभराक्रांता रसातलतलं गता॥ तदा सुरश्च यावानिर्देत्यामापासुरस्तथा॥४५॥ दनुकोद्य स्तु दैत्यानां
समस्त बलशालिनां॥ शिव प्रसादयुक्तानां स्वर्गविप्लवकारिणां॥४६॥ देवदैत्यार्णवं नस्यं उद्धृत्य गांपयप्र
भो॥ मग्नामकार्णवं तूर्णमुद्धर त्वं वसुंधरां॥४७॥ श्रुत्वा वाक्यमिदं देवो भयानोन्मीदितान् सुरान्॥ उवाच व
चनं देवो भयं त्यजत देवताः॥४८॥ अचिरेणैव कालेन समद्धरिष्यामि तानहं॥ वाराहं रूपमास्थाय प्रोक्षितं नर्म
दातले॥४९॥ एवमुक्त्वा सुरान् सर्वान् विसृज्य च जनार्दनः॥ कालेनाल्पेन गत्वा तु विष्णुनाकोडरूपिणा॥५०॥
दंष्ट्राग्रेणोद्धृता धात्री दानवाश्च निपातिताः॥ पुनः संस्थापितं सर्वं त्रैलोक्यं सचराचरं॥५१॥ ब्रह्माद्या मुदिता
देवाः सुखमास्थितविस्मयाः॥ वेदा वादितो कर्म पुनः सर्वं प्रवर्तितं॥५२॥ एतत्ते कथितं राजन् वाराहं कल्पगातन
तीर्थो नामुतमर्तीर्थं वे प्रत्यंमुक्तिमुक्तिदं॥५३॥ श्रवणात्कीर्तनाद्दस्य गोदानफलमवाप्नुयात्॥५४॥ इति श्री
रेवाखंडे वाराहतीर्थनामचतुश्चत्वारिंशोध्यायः॥४४॥ ॥ ततो देवपथं गच्छेत्तीर्थं देवमयं शुभं॥ तत्र स्नान

रे॰खं॰ स्यविधिवत् बहुयज्ञफलं लभेत्॥१॥ मासि मासि कुहूश्चैव सोमपानं करोति यः॥ सलदस्यांबुपानस्य कलां नार्हति
६३ षोडशीं॥२॥ लिंगं देवपथं नाम सुरासुरनमस्कृतं॥ देवाः प्रदक्षिणपरैः पूर्वं सवासवैः॥३॥ लिंगं वै पथि निक्षिप्तं मंत्र
माहृत्य लिलरहृयं॥ मानितं पूजितं लिंगं पथि विप्रैः सुरेश्वरैः॥४॥ ततः प्रभृति राजेंद्र ख्यातं देवपथं च तत्॥ शि
वलिंगं तदभ्यर्च्य सर्वपापैः प्रमुच्यते॥५॥ श्राद्धे यात्र दानेन पितॄणां परमा गतिः॥ चैत्रे मासि चतुर्दश्यां पक्षयोरुभ
योरपि॥६॥ स्नानार्थं देवसिद्धास्तु तीर्थान्यायांति संपराः॥ सहस्रशो मुनींद्राश्च तस्मिंश्छिवमुपासते॥७॥ नानाव्र
तक्रियायोगैर्ध्यानैः स्तुस्वर्थसाधनैः॥ उपास्यंते देवपथं ससिद्धिं परमां गताः॥८॥ इति श्रीरेवा॰॥ देवपथती
र्थं॥ अथान्यत् संप्रवक्ष्यामि तीर्थं पापप्रणाशनं॥ सहस्रयज्ञसंज्ञं तु सर्वकामफलप्रदं॥९॥ एकादश्यां मार्गशीर्षे
पूजयित्वा जनार्दनं॥ सहस्रयज्ञस्य एवस्य फलं प्राप्नोति मानवः॥१०॥ न पश्येद्यमलोकं च तिर्यग्योनिं न गच्छति
पुरा दक्षस्य तनयैर्नारदप्रवितैः किल॥११॥ भुवः प्रमाणं विज्ञातुं निर्गतैरिह चागतैः॥ सहस्रसंख्यैरन्वेष्टुं मनः
शुद्धिसमाश्रयात्॥१२॥ कृतं सहस्रं यज्ञानां अस्मिंस्तीर्थे नराधिप॥ दर्शे काले च वितत्य वीक्ष्य सर्वैः स्तुसत्कृ
तं॥१३॥ ततः सिद्धिं परां जग्मुः शिवलोकं च शाश्वतं॥ ततः सहस्रयज्ञाख्यं ख्यातं तीर्थं युधिष्ठिर॥१४॥ अत्र
स्नात्वा तु यः कुर्यात्पितॄणां तर्पणं तिलैः॥ तिलहोमं यथाशक्त्या आज्यहोममथापि वा॥१५॥ स याति परमं स्थानं
यत्र गत्वा न शोचति॥ तीर्थस्यास्य प्रभावेन नरो विगतकल्मषः॥१६॥ एतत्ते कथितं राजन् तीर्थं परमशोभनं
॥ श्रवणात् कीर्तनादस्य स्वर्गलोके महीयते॥१७॥ इति सहस्रयज्ञतीर्थं॥ मार्कंडेय॰॥ शुक्लतीर्थं ततो गच्छे
सर्वतीर्थमनुत्तमं॥ यत्र स्नात्वा नरो लभते यज्ञायुतफलं नरः॥१८॥ शुक्लीकृतास्तेन देवा ब्रह्मविष्णुमहेश्वरः
॥ सपादकोटितीर्थानां शुक्लतीर्थं तु पर्वसु॥१९॥ अष्टहस्तप्रमाणं हि शुक्लतीर्थं युधिष्ठिर॥ तत्रा कालाग्नि ६३
रुद्रश्च श्रीकंठश्च तथापरः॥२०॥ ते स्नात्वा तपोभिरस्यैव तत्र सिद्धिं परां गताः॥ शुक्लतीर्थप्रभावेन मोदंते दि

129
2008

वि देवता॥२१॥ प्रह्लादोऽपि पुरा स्नात्वा अत्र तीर्थे उमापतिं॥ देवा तोयेन संस्थाप्य बिल्वपत्रैरथार्चयन्॥२२॥ इंद्रत्वम
गमत्सोऽपि तीर्थस्यास्य प्रभावतः॥ तिलकप्रदानेन पिंडदानेन भारत॥२३॥ नरकस्थानपि तस्य यः दानं पर्वणि समुद्धरे
त्॥ कश्यपस्याश्रमस्तत्र सुरसिद्धनिषेवितः॥२४॥ मुनयः शांतदांतश्च स्वयं तिष्ठंति भारत॥ कृष्णचांद्रायणाद्यैश्च
व्रतैश्च नियमैर्युतः॥२५॥ कोटिशो देवमुनयः शंकरेश्वरमुपासते॥ राहुग्रस्ते स्ते च चंद्रे पूर्णिमायाति यो सदा॥
२६॥ आयांति सर्वतीर्थानि शुक्लतीर्थे शिवालये॥ स्नानेश्वरे यत्फलं स्यात् राहुग्रस्ते समागमे॥२७॥ तत्फलं प्राप्नु
यात्स्नात्वा शुक्लतीर्थे नसंशयः॥ हेमधेनुप्रदानेन गजाश्वरथगोरुपान्॥२८॥ एतद्दत्वात्र राजेंद्र पुण्यसंख्या
न विद्यते॥ सर्वतीर्थमयं तीर्थं सर्वदेवमयं शुभं॥२९॥ अपि वर्षसहस्रेण शुक्लतीर्थोपवर्णनं॥ न शक्यते सुरैः कृ
र्तुं ऋषिभिर्वा नरेश्वर॥३०॥ पापयोनिगतो यश्च तिर्यग्योनिगतोऽपि वा॥ महापातकयुक्तो वा शिवनिर्माल्यभक्ष
कः॥ मुच्यंते तेन पापेन तीर्थस्यास्य प्रभावतः॥ तत्र स्नानं नरः कृत्वा पूजयित्वा वृषध्वजं॥३२॥ सुरासुरगणैः स
र्वैः पूज्यंते स वृषध्वजः॥ पितामहेन यत्रेष्टं यज्ञोपतेश्वरे पुरा॥३३॥ स्तोत्रं कृतं यथार्हं च देवदेवस्य शूलिनः॥ ए
कचित्तानुसुक्तां तत्तेवक्ष्ये समासतः॥३४॥ नमः शिवाय शांताय ज्ञानिने ज्ञानरूपिणे॥ सूक्ष्माय सूक्ष्मरूपाय
सर्वसक्ष्यकहेतवे॥३५॥ सूक्ष्माणामपि सूक्ष्माय नमः सूक्ष्मतराय च॥ दिव्याय दिव्यरूपाय दिव्यभावात्मने
नमः॥ क्लिष्टानामपि क्लिष्टाय नमो क्लिष्टतराय च॥ व्योमप्रमाण्यभावाय अघोराय नमो नमः॥३७॥ सर्वज्ञाय नम
स्तुभ्यं सर्वनाथाय ते नमः॥ अव्यक्ताय नमस्तुभ्यं शाश्वताय नमो नमः॥३८॥ नमः सर्वात्मने तुभ्यं विश्वेशाय
नमो नमः॥ नमः कालाग्निरुद्राय नमः पातालवासिने॥३९॥ त्वया व्याप्तमिदं विश्वं चराचरमुमापते॥ अपि
वर्षसहस्रैस्त्वां स्तोतुं शक्तिमान् भवेत्॥४०॥ इत्यादि बहुधा देवः संस्तुतो ब्रह्मणा शिवः॥ पातालादुत्थितं
लिंगं सहस्त्रतनु शंकरं॥ अप्रमेयप्रभावं तु तथा निरुपमं नृप॥ उदिता चंद्रकोटीच्च यतो ह्यासितं भदिवं॥

४२॥ शुक्लीकृतं तेन सर्वं स प्रदेशो विशेषतः॥ भवत्स्वस्मात्समुत्पन्नो साक्षान्मूर्तिः सनातनः॥ ४३॥ यद्ब्रह्मत्वन्निति
विभुः प्रोवाच वृषभध्वजः॥ किमर्थं संस्तुतो हं ते ब्रूहि लोकपितामह॥ ४४॥ ब्रह्मोवाच॥ यदि तुष्टोसि देवेशावरं दा
तुं ममेच्छसि॥ इदं तीर्थं नमोक्तव्यं त्वया सदाशंकर॥ ४५॥ यत्तु दानादिकं सर्वं जप्यं चात्र जायतां॥ तपो दानान रा
यच्च दानसंस्कारवर्जिताः॥ ४६॥ ते सर्वे त्वत्सुरं यांति तीर्थस्यास्य प्रभावतः॥ नेत्र सानवलिंगस्यय स्मात्शुक्लीकृतं ज
गत्॥ ४७॥ शुक्लतीर्थं ततो नाम्ना ख्यातिं यातु जगत्त्रये॥ मयापि तत्स पर्यार्थं न मोक्तव्यमिदं विभो॥ ४८॥ स्नात्वा त्रि
णां तेन दिव्येन यत्सोति त्वां महेश्वरः॥ विधूय सर्वपापानि तव लोकं स गच्छतु॥ ४९॥ तमुवाच महादेव एवमस्तु त
वोदितं॥ योयान्कामयते कामान् सतान्प्राप्नोतु पुष्कलान्॥ ५०॥ अस्य तीर्थस्य माहात्म्यात्लिंगस्य च समर्चनात्॥ या
वज्जन्मशतं भूपनिरयं स न पश्यति॥ ५१॥ एवमुक्त्वांतर्हितः शिवो देवदेवो यथागतं॥ ब्रह्मा प्राप्ति यथुः सर्वे न
मस्कृत्य महेश्वरं॥ ५२॥ एतत्ते कथितं राजन्यथापूर्वं श्रुतं मया॥ श्रवणात्कीर्तनादस्य शिवलोके महीयते॥ ५३॥
इति श्रीरेवाखंडे माहात्म्ये शुक्लतीर्थं नाम पंचचत्वारिंशोध्यायः॥ ४५॥ मार्कंडेय उ॰॥ दारुमिकेश्वर नामानं सि
द्धलिंगं ततो व्रजेत्॥ नातः परतरं किंचित्त्रिषु लोकेषु विद्यते॥ १॥ दर्शनाद्दारुमिकेशस्य स्पर्शनाद्दर्शनात्तथा॥ अ
नेक जन्मजं पापं क्षणमात्रे प्रणश्यति॥ २॥ अर्चयेत्क्षणमेकं यो मुहूर्तं दिनमेव च॥ न तस्य पुनरावृत्तिर्घोरे
संसारसागरे॥ ३॥ मोक्षदा नाम चामुंडा तत्र गौरी महेश्वरी॥ स्तुता नाम सहस्रेण विष्णुना ब्रह्मणा तथा॥ ४॥
स्तुतानि पंचलिंगानि रेवाया उत्तरे तटे॥ ओंकार आदितो वायो विश्वामित्रकमहेश्वराः॥ ५॥ शुक्लेश्वरश्च भ
स्वीत्रोदारुमिकेशश्च पंचमः॥ वैवस्वतेंतरे पूर्वमादिकल्पे कृते युगे॥ ६॥ अत्रादेवैर्मिलित्वा तु ब्रह्माविष्णुपुरो
गमैः॥ नाना पदप्रकारैश्च स्तुतो देव उमापतिः॥ ७॥ प्रभुर्नाम सहस्रेण तच्छृणुष्व नराधिप॥ ॐ नमः शिवा
य॥ स्थिरः स्थाणुः प्रभुर्भानुः प्रवरो वरदो वरः॥ ८॥ सर्वात्मा सर्वविख्यातः सर्वः सर्वकरो व्ययः॥ जटी चर्मी शि ६४

131
2008

खी खड्गी सर्वज्ञः सर्वभावनः॥ ९॥ हरिश्च हरिणाक्षश्च सर्वभूतहरः प्रभुः॥ प्रवृत्तिश्च निवृत्तिश्च नियतः शाश्वतो
ध्रुवः॥ १०॥ श्मशानवासी भगवान् खचरो गोचरस्तथा॥ अभिवंद्यो महाकर्मा तपस्वी भूतभावनः॥ ११॥ उन्मत्तवेषः
प्रच्छन्नः सर्वलोकप्रजापतिः॥ महारूपो महाकायः सर्वरूपो महायशाः॥ परमात्मा च भूतानां विरूपो वामनो म
नुः॥ ओकपालो हितात्मा च प्रसन्नो भवनाशनः॥ १३॥ पवित्रश्च महांगश्च नियमो विपताश्रयः॥ सर्वकामः स्वयं
भूश्च आदिरादिकरो निधिः॥ १४॥ सहस्राक्षो विरूपाक्षः सोमो नक्षत्रसाधकः॥ चंद्रसूर्यः शनिः केतुर्ग्रहो ग्रहपति
र्वरः॥ १५॥ दष्टादष्टश्च लस्थाणुः मृगबाणार्पणो घनः॥ महातपा दीर्घतपा आपिपाना नुपेकैकः॥ १६॥ संवत्स
रकरो मंत्रः प्रमाणं परमं तपः॥ योगी योगो महादेवो महारेताहरोहरः॥ १७॥ वसुरेताश्च सर्वज्ञः सुबीजो वृ
षवाहनः॥ दशबाहुर्बीर्महाबाहुर्नीलकंठ उमापतिः॥ १८॥ विश्वरूपः स्वयंश्रेष्ठो बलिर्वैरोचनो गणाः॥ ग
णकर्ता गणपतिर्दिग्वासा काम्य एव च॥ १९॥ सविता परमो मंत्रो सर्वपापहरो हरः॥ कमंडलुधरो धन्वी बा
णहस्तो कृतापवान्॥ २०॥ अशनिः शतघ्नी शूली खड्गी पट्टीशी तथा॥ शुचिहस्तः स्वरूपश्च स्तेजस्ते
जस्तेजस्करो विधिः॥ २१॥ उष्णीषी च सुवक्त्रश्च उदग्रो विनतस्तथा॥ हरिवान् हरिनेत्रश्च सुतीर्थः कृष्ण
एव च॥ २२॥ श्रृंगालरूपी सर्वार्थो मुंडी शुद्धकमंडलुः॥ अजश्च गंधमाली च मृगरूपी कपर्दधृक्॥ २३॥ ऊर्ध्वरे
ता ऊर्ध्वलिंग ऊर्ध्वशायी नभस्थलः॥ त्रिजटश्चाजवासाश्च रुद्रः सेनापतिर्विभुः॥ २४॥ अहश्चरो रात्रिच
रा सुवासाश्च दिवांपतिः॥ राज्यहा लोकहा लोकोलोकपालो गुणात्मकः॥ २५॥ सिंहशार्दूलरूपश्च आर्द्र
चर्मपराहवः॥ कालयोगी महानादः सर्वावासश्चतुष्पथः॥ २६॥ दुर्निवारः प्रेतचारी भूतचारी महेश्वरः॥ ब
हुभूतो बहुधनः सर्वाधारगुरुर्विरागतिः॥ २७॥ नृत्यप्रियो नृत्यकर्ता नर्तकश्च बलाहकः॥ घोरो महातपाश्या
सो नित्यो गिरिनिरानमः॥ २८॥ सहस्रहस्तो विजयो व्यवसायोत्स निश्चयः॥ अमर्षणो मर्षणात्मा यज्ञहा

कामशासनः ॥२९॥ दक्षयज्ञापहारी च सुसहो मध्यमस्तथा ॥ तेजापहारी बलिहा मुदितश्चाजितो भवः ॥३०॥ गं
भीरघोषो गंभीरो गंभीरबलवाहनः ॥ न्यग्रोधरूपो न्यग्रोधो वृक्षकर्णस्थितिर्विभुः ॥३१॥ तीक्ष्णतापश्च हर्यश्व
सहायः कर्मकालवित् ॥ विष्णुप्रसादितो यज्ञः समुद्रो वडवामुखः ॥३२॥ हुताशनसहायश्च प्रशांतात्मा हुताश
नः ॥ महातेजाः सुतेजाश्च विजयो जय एव च ॥३३॥ ज्योतिषामयनं सिद्धिः संधिर्विग्रह एव च ॥ शिखी दंडी जटी
ज्वाली मूर्तिजो दुर्बलो बलिः ॥३४॥ वेणवी पणवी ताली काली कालः कटंकटः ॥ नक्षत्रविग्रहमतिर्गुणबु
द्धिर्लयोऽगमः ॥३५॥ प्रजापतिर्विश्वबाहुर्विभागः सर्वतोमुखः ॥ विमोचनः सुरगणो हिरण्यकवचोद्भवः ॥३६॥
अरजो बलिचारी च महाचारी श्रुतः श्रवाः ॥ अनादिः सर्वमंत्रादिः सर्वनाद्यप्रतिग्रहः ॥३७॥ व्यालरूपो गुहा
वासी हिममाली तरंगवित् ॥ त्रिपदस्त्र्यंबकोऽव्यक्तः सर्वबंधविमोचकः ॥३८॥ सांख्यप्रसादो दुर्वासाः स
र्वसाधुनिषेवितः ॥ प्रस्कंदनो विभागज्ञोऽतुल्यो यज्ञभागवित् ॥३९॥ सर्वावसः सर्वहंसो दुर्धरो वासवो यमः ॥ हि
मो हिमकरोऽयत्रः सर्वधारी बुधोत्तमः ॥४०॥ लोहिताक्षो महाक्षश्च विलयज्ञो विशारदः ॥ संग्रहो विग्रहः कर्म
सर्पराजविभूषणः ॥४१॥ मुख्यो विमुक्तदेहश्च देहचारी च कामदः ॥ सर्वकालप्रसादश्च खेचरो बलरूप
धृक् ॥४२॥ आकाशवृत्तरूपश्च निपाती उरगः खगः ॥ रौद्ररूपः स्वरादित्यो वसुरश्मिः सुवर्चसी ॥ वसुवेगो
महावेगो मनोवेगो निशाकरः ॥ विप्रावासः श्रियावासः उपदेशकरो हरः ॥४४॥ मुनिरात्मा पतिर्लोके
सहस्रवदनो बुधः ॥ पक्षी च पक्षराजश्च दीप्तनदीशो विशांपतिः ॥४५॥ उन्मादो मदनाकारो अर्थानर्थकरो म
हत् ॥ वामनो वामदेवश्च प्राग्दक्षो वामनस्तथा ॥४६॥ सिद्धियोगापहारी च सिद्धः सर्वार्थसाधकः ॥ भिक्षु
श्च भिक्षुरूपश्च विषाणी च मृदुरव्ययः ॥४७॥ महासेनो विशाखश्च षष्टिभागो गवांपतिः ॥ वज्रहस्तश्च ६९
विष्कंभी विश्वस्तंभनमेव च ॥४८॥ ऋतुसत्राणकरः कालो मधुर्मधुकलोचनः ॥ वाचस्पत्यो वाजसनो नि

त्याश्रमपूजकः ॥४९॥ ब्रह्मचारी लोकचारी सर्वचारी सुचारवित् ॥ ईशान ईश्वरोऽध्यक्षो निशाचार्यप्यनेक
कृत् ॥५०॥ अमितश्चाप्रमेयश्च नंदी नंदिकरोऽव्ययः ॥ नंदीश्वरः सुनंदी च नंदनो नंदिवर्धनः ॥५१॥ नराहारी वि
हंता च कालो ब्रह्मविदां वरः ॥ चतुर्मुखो महालिंगश्चारुलिंगस्तथैव च ॥५२॥ लिंगाध्यक्षः सुराध्यक्षो लोकाध्य
क्षो युगावहः ॥ बीजाध्यक्षो बीजकर्ता अध्यात्मानुगतो बलः ॥५३॥ कल्पेतिहासकर्ता च गौतमोऽब्जजलेश्वरः
॥ दंभो ह्यदंभो वैदंभो विवश्यान्निकरच्छविः ॥५४॥ लोकधाता पशुपतिर्महाकर्ता महौषधिः ॥ अक्षरं परमं ब्रह्म
बलवानल्पश्च एव च ॥५५॥ नीतिः सुनीतिः शुद्धात्मा शुद्धिगस्तथा ॥ बहुप्रसादः सुस्वप्नो दर्पणो
ध्वज एव च ॥५६॥ दैवकारः सत्रकारो विद्वान् परमरूपधृक् ॥ महामेघनिवादी च महाघोरवशीकरः ॥५७॥
अग्निज्वालो महाज्वालो महाधूम्रो हव्यभुक् ॥ वृषणः शंकरो नित्यो वर्धनो धूमकेतनः ॥५८॥ नीलस्त
थांगलुब्धश्च दुर्गो विमुक्तियोनिर्विहः ॥ स्वस्तिभाक्स्वस्तिभागी च भोक्ताभोगकरो लघुः ॥५९॥ उत्संगश्च म
हांगश्च महागर्भपरो युवा ॥ कृष्णवर्णः सुवर्णश्च कारणं सर्वदेहिनां ॥६०॥ महापादो महाहस्तो महाका
यो महायशाः ॥ महादंष्ट्रो महाकर्णो महोदरश्च महाहनुः ॥६१॥ महाकंठो महाग्रीवो नीलकंठः श्मशानधृक्
लंघनो लंबितौष्ठश्च बहुमायः पयोनिधिः ॥६२॥ महांगश्च महानुश्च महाजिह्वो महाननः ॥ महानेत्रो महा
नासो महाकेशो महाजटः ॥६३॥ आश्रयश्च प्रमादश्च प्रसन्नो गिरिसाधकः ॥ स्नेहनोऽस्नेहनः श्रीमानजि
तश्च महामुनिः ॥६४॥ वृक्षाकारो वृक्षकेतुरनलो वायुवाहनः ॥ मंडली मरुधामश्च दक्षदानवदर्पहा ॥६५॥
सहस्रशीर्षो नागश्च दक्षनाशो निग्रहमेहयाः ॥ पद्मनाभ भुतो गुह्यप्रकाशो जंगमस्तथा ॥६६॥ अमो
घार्थप्रसादश्च सुभगो विश्ववर्धनः ॥ उपहारः प्रियः सर्वः कांचनाकांचनप्रियः ॥६७॥ महीमदकरो भा
व्यः पुष्करः स्थपतिः स्थितः ॥ द्वापरः शासनः सद्योऽग्रणीयज्ञसमाहृतः ॥६८॥ नक्तं कालश्च कालो मामहा

133
2008

कालद्विषो चैतन्न सुगंधीगणकार्यश्च मुक्ता बन्नलारथि॥६९॥ भस्मांगो भस्मगोप्ता च भस्मभूतस्तरुर्गणः
६९ ॥ लोकपालश्चैव लोको महात्मा सर्वपूजितः॥७०॥ शुक्लस्त्रिशुक्लः संपन्नः शुचिर्भूतनिषेवितः आश्रमस्थः क्रि-
यावस्थो विश्वकर्ममतिर्वरः॥७१॥ विशालशाखस्ताम्रोष्ठो ह्यंबुजालः सुनिश्चलः॥ कपिलः कपिशः शुक्ल आयु-
श्चैवागरोपकः॥७२॥ गंधर्वश्चादितिस्तार्क्ष्यो विज्ञेयश्च सुरारषिः॥ परशुधायुधो महादेवो ह्यनुकारः सुबांधवः
॥७३॥ तुंबवीणो महाकोप ऊर्ध्वरेता जलात्मकः॥ उग्रो वंशकरो वंशो वंशवादी सुनंदितः॥७४॥ समयारि सु-
कर्मारिर्महो॥ ------ बहुलानां बलः सारीः सुकारः नाकरध्वजः॥७५॥ सर्वांगरूपो मायावी सुहृच्चारु-
विलोचनः॥ बंधनो बंधकर्ता च सुबंधनविमोचनः॥७६॥ समर्थश्च महादेवो नर्थहंता सुबांधवः॥ भस्य-
श्च भरतो भर्ता विश्वदेवः पुरोहितः॥७७॥ चेकितानो निलोभारः सर्वलोकगुरुर्गुरुः॥ अनेकपालकपाली
त्रिशंकुरजितः सुधी॥७८॥ धन्वंतरिर्धनुःपाणिः स्कंधो वैश्रवणो धनः॥ धाता शक्रश्च विष्णुश्च मित्र-
स्त्वष्टाध्वरी ध्रुवः॥७९॥ प्रभवः सर्वगो वायुरर्यमा सविता रविः॥ विष्वक्सेनो विधाता च पतंगो भूतभाव-
नः॥८०॥ रतिस्तीर्थं मवाङ्मी च करणानां गुहावहः॥ पद्मवक्त्रोपमामाली च चंद्रवक्त्रमनोरथः॥८१॥ स-
र्वज्ञश्चोपशांतश्चैव पुराणः पुण्यभृच्छुकः॥ कुलकर्ता कलावांश्च कुलभर्ता महेश्वरः॥८२॥ सर्वा-
शयः सर्वज्ञायी सर्वेषां प्राणभृत्पतिः॥ देवदेवः सुखासक्तः सदयः सर्वरत्नवान्॥८३॥ कैलासवान्गिरिवि-
श्वात्मा हिमवद्गिरिसंस्थितः॥ महार्णवो तिनादश्च सिद्धानंदो महाचरः॥८४॥ विभारदो घोरमतो व्य-
कोधारस्तपोनिधिः॥ सेनाकल्पो महाकल्पो योगो योगामरेश्वरः॥८५॥ युगाधारो महामूर्तिः प्रचनो
गहनो रुरुः॥ न्यायो निर्वापणः पादश्च पंडितः पुण्यलोचनः॥८६॥ धन्यः कपालमाली च महामाली च ६९
षाकपिः॥ विस्तारो लवणः क्रूरः कुसुमः सफलोदयः॥८७॥ वृषभो वृषभासश्च मणिर्विश्वजटाधरः॥

135/2008

इंदुर्विसर्गः सुमुखः सुरः सर्वायुधः सहः॥८८॥ निर्वेदनः क्षमंधश्च रोदनो वेदनाश्रयः॥ गंधमाली च भगवाननु-
भान्कर्मणा नरः॥८९॥ सारंगः सुप्रतिष्ठश्च ऊर्ध्वः संवा मनोवहः॥ छत्रं पत्रं सुविख्यातः सर्वभावाश्रयो महान्॥
९०॥ चंद्रो विरूपो विकृतो दंडमरुद्विभूषणः॥ हर्यक्षश्च ककुभश्च वज्री शतजिह्वः सहस्रपात्॥९१॥ सहस्रमूर्धा
देवेंद्रो मांसलः प्रांशुरुत्तमः॥ मंडलाक्षो मंडलश्च तुरण्यः सर्वमंगलः॥९२॥ पवित्रस्त्रिमधुर्गंधः कालियः कृ-
ष्णश्मश्रुर्भक्त॥ ब्रह्मदंडनिधिर्मेधावराहो गजचर्मधृक्॥९३॥ ब्रह्मगर्भो वृषावासो गंतनो जलसंभवः॥ गभस्ति-
हृत्पतनयोगी विफलो वारिवाहनः॥९४॥ मंत्ररूपश्चैककालश्चित्रमतेजाः प्रतापवान्॥ मूर्धगः पिंगरश्मीभ्रा-
वानरंहो मनोजवाः॥९५॥ चंदनी पद्मसर्पश्च अंगुल्यंतरयोत्तरः॥ कर्णिकारो महास्रग्वी नीलमौलिः पिनाक-
धृक्॥९६॥ सोमः शंभुरुमाकांतो मानी सोमप्रियो गदः॥ जान्हवीधरणोपायो वरो वारो वरेण्यभूः॥९७॥
शुभांगः श्वेतकपिलश्चिरात्मा संयताग्रणीः॥ प्रधानतत्वं सोमेशः सोमदीप्तिरनात्मकः॥९८॥ सर्वाश्रयः स-
धरः स्रष्टा सर्वसाधारणो धरः॥ पारावारमतिर्ज्ञाली वृषांगश्च वृषेश्वरः॥९९॥ साध्यो बुधवसुर्दक्षो विव-
स्वान्याम्बलोचनः॥ व्यासः सर्वसहः क्षेप्यो विस्तरः पर्ययो नरः॥१००॥ ऋतुः संवत्सरो मासः पक्षो होरा-
त्रिसंततिः॥ कलाकाष्ठा लवो यात्रा मुहूर्तानुक्रमः क्षणः॥१॥ विश्वक्षेत्रः प्रजाबीजं लिंगमाद्यः सदारयः
सदसत्संगमः श्राधी पिता माता पितामहः॥२॥ स्वर्गवांश्च प्रजावांश्च मोक्षवान्विषपासुकृत्॥ निर्वाणाह्ला-
दनश्चैव सत्यलोकः परागतिः॥३॥ देवासुरमहामात्रो देवासुरमहाश्रयः॥ देवासुरगणाध्यक्षो देवासुरवि-
मर्दकः॥४॥ देवाधिसत्वदेवर्षिर्देवलः पिरुपामनः॥ सर्वदेवमयोऽचिंत्यो देवानां सर्वसंभवः॥५॥ उद्भवो विक्र-
मोवंगो विरजो विगतप्रियः॥ मौलिहस्तः सुरव्याघ्रो देवसिंहो गतप्रियः॥६॥ ध्यानो ध्यांतो ध्वनिर्धीरेनि-
तः स्वगेः प्रजागरः॥ अयुक्तः शोभनो गर्भः प्रीतिसंहरणो युवा॥७॥ मृगाश्वंगी पयो वक्रः रजरः पातिवस्मि

रे॰ख॰ कः॥ललाटाक्षो विश्वदिग्धो हिरण्यो ब्रह्मवर्चसि॥८॥स्थावराणां पतिश्चैव विषयेंद्रियवर्धनः॥सर्वदेवः सर्वभू
६७ तार्थी नित्यः सत्यव्रतः शुचिः॥९॥विरक्तो दीप्ततेजाश्च तितिक्षुः क्रूरः गाढोगजः॥स्वप्रदेहो यथामानी प्रस्कंनः स्कंद
वर्धनः॥१०॥योन ब्रह्मादिभिर्देवैर्ज्ञायते न महर्षिभिः॥स्तोतव्यः स कथं नाथः परमात्मा परावरः॥११॥स्तो
तुं त्वां नैव शक्तोहम वाङ्मनसगोचरं॥जिह्वाचापलमस्माकं क्षमस्व परमेश्वर॥१२॥शिवं कुरुष्व देवानां स्व
र्गिणां पुष्टिमावह॥मार्कंडेय उ॰॥इति ब्रह्मादिदेवानां स्तोत्रं श्रुत्वा महेश्वरः॥१३॥दीप्तिमान भवत्साक्षाद्दीप्त्या
विश्वं विभासयन्॥प्रसन्नो हि नववीद्देवान्प्रार्थयध्वं वरं सुराः॥१४॥स्तुतः सहस्रनाम्नाहं केन कार्येण सुव्रताः॥
ब्रह्मोवाच॥यदि तुष्टो महेशान देवानां वरदः प्रभुः॥१५॥तद्विनाशाय दैत्यानां ख्यातो भव महेश्वरः॥यस्माद्दी
प्त्या जगत्सर्वं तेजसा ते विभासितं॥१६॥दीप्तिकेश्वरनाम्ना त्वं तस्माद्देनाव सप्रभो॥दीप्तेश्वरं ति द्युलिंग
चामरकेश्वरं॥१७॥नर्मदेश्वरमित्यन्यत् कपिलेश्वरमेव तु॥पंचमं शुक्लतीर्थे तु शुक्लेश्वरमिति प्रभो
॥१८॥पापकर्माधमश्चैव पंचलिंगानि योर्चयेत्॥सोपि तां गतिमाप्नोतु दुर्लभा याम रैरपि॥१९॥इति ब्रह्मवचः श्रुत्वा
देवदेवो महेश्वरः॥एवमस्त्विति देवानां दत्वा वरमनुत्तमं॥२०॥निजघ्ने दानवान्सर्वान् गणकोटिसमावृतः॥एतत्ते क
थितं पार्थ दीप्तिकेश्वरसंज्ञितं॥२१॥तीर्थवरं पुण्यतमं सर्वाशुभविनाशनं॥तिलोदकं तु यो दद्याद्देवपित्र्यर्षिषु स्व
यं॥२२॥स्नात्वा पार्थ विधानेन तेन स्यात्तर्पितं जगत्॥पितरः श्राद्धदानेन प्राप्नुयुस्तृप्तिमक्षयां॥२३॥पूजनाद्दीप्त
केशस्य दिवि मन्वंतरं वसेत्॥बहुतीर्थाश्रयं राजन् तीर्थमेतं न संशयः॥२४॥इति ते दीप्तिकेशाख्यं प्रोक्तं तीर्थं
मयानघ॥श्रवणात्कीर्तनादस्य वाजपेयफलं लभेत्॥१२५॥इति श्रीवायुप्रोक्तसंहितायां रेवाखंडे दीप्तिके
श्वरतीर्थनाम षट्पंचाशत्तमोध्यायः॥५६॥मार्कंडेय उ॰॥ततो गच्छेत राजेंद्र वैश्रवणं तीर्थमुत्तमं॥यत्र तुष्टो हृ ६७
षीकेशो ब्रह्मणो योगसिद्धये॥१॥कोकिला नाम विख्याता सर्वपापविमोक्षणी॥वैश्रवं क्षेत्रमिख्या हुतत्रय

तं विधिं पुरा॥२॥समाहरत पुण्यदेशे कल्पगातीरमाश्रितः॥हूयमाने तदा तस्मिन्दैत्यदानवराक्षसैः॥३॥विघ्नार्थं
द्रव्यहरणं कृतं वाविद्यासिता द्विजा॥ततः खिन्नं ददर्श ब्रह्मा त्रातित घ्रयत्नमसु॥४॥द्रव्योद्धापहरणे किं कर्तव्यं तु म
याधुना॥नारायणं देवदेवं देवेशं शंखचक्रगदाधरं॥५॥व्रजामीति मतिं चक्रे स ब्रह्मा पद्मासिद्धये॥ततो रेवाजले स्ना
त्वा उपविश्य कुशासने॥६॥दर्भपाणिः पवित्रपाणिस्तु स्वस्थो बद्धांजलिः स्वयं॥स्तोतुं प्रचक्रमे विष्णुं दानवांतकरं हरिं॥७
ब्रह्मोवाच॥नमस्ते पुंडरीकाक्ष वासुदेव नमोस्तु ते॥ईश्वरोसि जगन्नाथः किमतः परमुच्यते॥८॥भक्तानां यच्छि
तार्थाय गुरवे परमेश्वर॥सममे भव पतिस्त्वं हि प्रभुर्जन्मनि जन्मनि॥९॥अग्निसोमार्करुद्राणां ग्रहेंद्रवसुयोगि
नां॥यस्तेजयति तेजांसि स मे विष्णुः प्रसीदतु॥१०॥अज स्वगमनः पंथा जंगमस्तीर्थवृक्षमूर्तिमान॥परः प्रधानः
पुंसोयः स महात्मा प्रसीदतु॥११॥सर्वमध्ये स्थितः सोमः स्तस्य मध्ये तु या कला॥तन्मयो योमृताधारः स महा
त्मा प्रसीदतु॥१२॥समस्तमभिकांक्षंते यदृक्षा नान्यचेतसा॥योजः सर्वात्मना ज्ञेयः स॰॥१३॥चराचरमिदं स
र्वं भूतग्राममचेतसं॥त्वयात्थं वततत्प्रोक्तं सूत्रे मणिगणा इव॥१४॥इंद्रियाणि गुणा यां तु स्वासु स्वासु च योनि
षु॥तत्त्वं निष्कलं देव कांक्षेहं परमं तव॥१५॥त्वत बुद्धिस्त्व दृतः प्राणस्त्व द्भक्तस्त्वत्परायणः॥त्वामेवाहं स्मराम्य
कं व्यसने पर्युपस्थिते॥१६॥प्रातरुत्थाय सततं मध्याह्ने च दिनक्षये॥जपामि त्वामहं देवं सर्वपापोपशांतिदं॥१७
हरिं हृषीकेशं वासुदेवं जनार्दनं॥प्रणतोस्मि जगन्नाथं सर्वाशुभविनाशनं॥१८॥गोवर्धनधरं धीरं गोब्रा
ह्मणहिते रतं॥प्रणतोस्मि गदापाणिं स मे पापं व्यपोहतु॥१९॥शंखिनं चापिनं शांतं चक्रिणं मधुसूदनं॥प्रण
तोस्मि पतिं लक्ष्म्याः स मे विष्णुः प्रसीदतु॥२०॥दामोदरं मुदा पुंडरीकाक्षमव्ययं॥प्रणतोस्मि स्थितं स्थिरं स
स मे पापं व्यपोहतु॥नारायणं नरं शौरिं माधवं च जनार्दनं॥प्रणतोस्मि हृषीकेशं स॰॥२२॥केशवं केशिहंतारं
कंसारिं कामपालकं॥प्रणतोस्मि चतुर्बाहुं स मे॰॥२३॥श्रीवत्सं श्रीवपुः श्रीशं श्रीधरं श्रीनिकेतनं॥प्रणतो

137/2008

स्मिन्प्रियः कौंतेय मे॥२४॥ यमाराध्य सर्वभूतानां ध्यायंति प्रणवात्परं॥ वासुदेवमनिर्देश्यं तमस्मि शरणं गतः॥२५॥ सम
स्तालंबनं स्वस्थं संहृत्य मनसो गतिं॥ ध्यायंति वासुदेवाख्यं तमस्मि शरणं गतः॥२६॥ सर्वगं सर्वभूतेशं सर्वस्याधार
मीश्वरं॥ वासुदेवं परं ब्रह्म तमस्मि॰॥२७॥ सदसत्कर्मनिर्मुक्तं परमात्मानमव्ययं॥ कर्मक्षये तु यं यांति त॰॥२८॥ सर्व
बंधविनिर्मुक्ता यं प्रविश्य पुनर्भवं॥ प्राप्नुवंति न योगज्ञास्त॰॥२९॥ कृत्वा ब्रह्मवपुः सर्वं सदेवासुरमानुषं॥ यः सृजत्य
च्युतो देवस्तमस्मि॰॥३०॥ ब्रह्मरूपधरं देवं जगद्योनिं जनार्दनं॥ ध्वता महद्दता हि स्वाः पाति त्राता स्थामराः॥३१॥ येन तं
विष्णुमायेशं प्रणतोस्मि सनातनं॥ वर्णाश्रमान्मार्गस्थान्यः स्थापयति वर्त्मनि॥३२॥ तमादिपुरुषं विष्णुं प्रणतोस्मि
सनातनं॥ कल्पांते रुद्ररूपेण संहरत्यखिलं जगत्॥३३॥ तमादिपुरुषं विष्णुं प्रणतोस्मि सनातनं॥३४॥ यः पाति ह
हिंसलीलीलया बलिदर्पहा॥ तमादिपुरुषं विष्णुं प्रणतोस्मि जनार्दनं॥३५॥ भक्षयित्वा च सकलं यथा सृष्टमिदं
जगत्॥ यो नर्त्तति च रुद्रात्मा तं नतोस्मि जनार्दनं॥३६॥ सुरासुराः पितृगणा यक्षगंधर्वराक्षसाः॥ यदंशा भूतादे
वस्य सर्वगं तं नमाम्यहं॥३७॥ यस्मान्नान्यत्परं किंचिद्यस्मिन्सर्वमिदं जगत्॥ यः सर्वमध्यगोनंतः सर्वगं तं॰॥३८
यथा सर्वेषु भूतेषु स्थावरेषु चरेषु च॥ विष्णुरेव समारोप्यं तथा पापं प्रणश्यतु॥३९॥ प्रवृत्तं च निवृत्तं च कर्मवि
स्मार्यं यथा कृतं॥ जनैकजन्मतंत्रे धा पापं नश्यतु मे तथा॥४०॥ यत्त्रिशायां तथा प्रातर्यन्मध्यान्हापराह्नयोः॥ तिष्ठ
ता व्रजता पश्यता शयानेनागतेन च॥४१॥ भुंजानेन कृतं यच्च कर्मणा मनसा गिरा॥ अज्ञाना ज्ञानतो वापि कृतं पापं
क्रियन्मया॥४२॥ तत्सर्वं विलयं यातु वासुदेवस्य कीर्तनात्॥ विलयं यातु मे पापं तोयस्थं लवणं यथा॥४३॥ परदा
रपरद्रव्यवांछाक्रोधाद्रुवचयत्॥ परपीडां च निंदां च कुर्वता यन्मयार्जितं॥४५॥ यच्च मोह्यतथापि येयच्च कटुय
नादिपु॥ यद्बाल्ये यच्च कौमारे यौवने वार्द्धके कृतं॥४५॥ आर्द्रं शुष्कं लघु स्थूलं वासुदेवकीर्तनात्॥ तत्पापं विलयं या ६८
तु मे पापं लवणं यथा॥४६॥ विष्णवे वासुदेवाय हरये केशवाय च॥ जनार्दनाय कृष्णाय नमो भूयो नमो नमः॥४७

139
2008

एवं स्तुवतस्तस्य वेपमानो जनार्दनः॥ साक्षाद्विश्वेकमूर्तिस्तु प्रसन्नो वाक्यमब्रवीत्॥४८॥ वद ब्रह्मन्महाभाग मन
कारणं॥ स्तुतोहं केन कार्येण ब्रूहि शीघ्रं तपोधन॥४९॥ ब्रह्मोवाच॥ देवदेव जगन्नाथ पद्मनाभ श्रृणु प्रभो॥ नर्मदाती किमाग
तमाश्रित्य मारकंडेय यज्ञमुत्तमं॥५०॥ राक्षसाश्च विवर्द्धंते याः परिलुंपंति केशव॥ क्रोधेन ख्यापिताः सर्वे यज्ञोपकर
णाहृतं॥५१॥ किं करोमि न पश्यामि किं सृष्टं सृष्टमेव मे॥ दानवा पद्ध्वंदे साध्वनाशयिष्यंति राक्षसाः॥५२॥ इति ब्रह्म
वचः श्रुत्वा कुपितो मधुसूदनः॥ चक्रमादाय यज्ञस्य रक्षार्थं स ययौ प्रभुः॥५३॥ पालकत्वं निजं विष्णुर्विचार्याभ्य
द्रवच्च तान्॥ निजघ्ने राक्षसान्सर्वान्यज्ञमुख्याजनातयः॥५४॥ हिंसांश्च दानवान्स्तांस्तान् ब्रह्मणश्चाभयं द
दौ॥ स यज्ञपुरुषो विष्णुर्ब्रह्मणाभ्यर्चितो मखे॥५५॥ नम च यज्ञसिद्धिश्चवेप सौधर्मनंदन॥ यज्ञोपकरणं सर्वं पु
नः प्राप्तं द्विजैः सह॥५६॥ ह्रीमणस्य च तीतेवध सा प्रार्थितं पुनः॥ विष्णो जिष्णो जगन्नाथ स्थित्वात्र पावते कमीश्वरं॥
५७॥ इदं तीर्थं च नाम्ना ख्यातिं यातु जगत्त्रये॥ स्थानमेतत्परं पुण्यं न संसार्ज्यं त्वया क्वचित्॥५८॥ स्तोत्रेणानेन च
यो नरः स्तौति जनार्दनं॥ तस्य भुक्तिश्च सिद्धिश्च सुनवांछितं॥५९॥ एवमुक्ते तदा धात्रा प्रत्युवाच सनातनः॥
ब्रह्मन्सर्वं त्वया प्रोक्तं भविष्यति न संशयः॥६०॥ एवमन्यच्च सर्वं वैकांक्षितं सिद्धिमेष्यति॥ इत्युक्त्वांतर्हितो देव
श्रीपतिः प्रभुरव्ययः॥६१॥ ब्रह्मा स्वस्थानमगमद्धिमानेंदुवर्चसा॥ संस्थाप्य देवेन्नाम तत्तीर्थं चाखिलपुण्य
दं॥६२॥ इति ते कथितं राजन्तीर्थं वैस्माख्यमुत्तमं॥ कोकिलास्थानमाश्रित्य कल्पगात्र संस्थितं॥६३॥ विष्ण
स्तरास्म यज्ञे विष्णुं ध्यात्वा सनातनं॥ चकार स्तोत्रमसमं वैष्णवं स प्रजापतिः॥६४॥ ब्रह्मणो गिरसा प्राप्तं च लि
ष्टनतनौ नृप॥ वसिष्ठः श्रावयामास नाभागं राजसत्तमं॥६५॥ सापि गत्वा च तत्तीर्थं स्नात्वा संतर्प्य देवता॥ अ
भ्यर्च्य केशवं राजा स्तुत्वा स्तोत्रेण चानघ॥६६॥ दत्वा दानान्यनेकानि संतोष्य च जनार्दनं॥ कामिकं यानमारुह्य
नाभागः स्वपुरं ययौ॥६७॥ तत्र स्नात्वार्चयेद्देवं चक्रपाणिं सुरेश्वरं॥ स्तोत्रेणानेन यः स्तौति भक्त्या देवं जनार्दनं॥६८

रे॰ खं॰ ततस्य पुनराख्यलिघोरे संसारसागरे ॥६॥ इति श्रीरेवाखंडे विष्णुतीर्थनाममसप्तचत्वारिंशोऽध्यायः ॥४७॥ मार्कंडेय
६९ उ॰॥ ततो गच्छेन्महाराज चिरव्याते धौतपापे ॥१॥ यत्र पुंडरीकाक्षो माहात्म्या लब्धा ॥१॥ हरिणा पूर्वपार्थ ब्रह्म
हत्यादि क्लेशं आरत ॥ अवश्यं सपदं तेषां चक्रोत्तमनितप्रिवान ॥ ॥ तत्र स्नात्वाभ्यर्च्य विष्णुं वैकुंठपदमाप्नुयात ॥ यादि
ताहान नाथस्यापतन्त्रैलोक्यकंटकाः ॥ ॥ तेनतत्पौवनपुरमकलाती रमाभवत ॥ ४॥ इति धौतपापतीर्थ ॥ ततो ग
च्छेन्महाराज नर्मदेश्वरसंज्ञितं ॥ स्नात्वाभ्यर्च्य महादेवं शिवलोके महीयते ॥५॥ इति नर्मदेश्वरतीर्थ ॥ वरुणेश्वरम
न्यत्तीर्थं परमसिद्धिदं ॥ तीर्थकपालतमापनीवरुणाय भारत ॥६॥ देवदेवप्रसादेन तत्र स्नात्वार्च्य यच्छिव ॥ न
रो वर्षसहस्राणि शिवलोके महीयते ॥ ७॥ इति वरुणेश्वरतीर्थ ॥ मार्कंडेय उ॰॥ मारुतेश्वरमन्यच्च शिवं योगश्च
रं तथा ॥ सततं नर्मदातीरे देवदेवेन शंभुना ॥८॥ स स्नात्वा कन्यगातीर्थे बिल्वपत्रैः समर्चयेत ॥ एतज्ज्ञानं च मो
क्षं च ब्रह्मचर्यं तपस्तथा ॥९॥ दुर्लभं च शिवज्ञानं दुर्लभं नर्मदाजलं ॥ येनकेन प्रकारेण येनकेनापि कर्मणा ॥१०
कन्यगामाश्रयेद्धीमान शिवं विष्णुं च पूजयेत ॥ किं करोति यमस्तस्य चित्रगुप्तश्च लेखकः ॥११॥ कालोऽप्यक
ल्पितं प्रायस्मरेत कन्यगांशिवं ॥ एतत्ते कथितं राजन यथा ज्ञानं श्रुतं मया ॥१२॥ मोहितानाभिज्ञानं तिसंसारपा
पकर्मभिः ॥ यत्र देवो महेशानो यत्र तिष्ठति नर्मदा ॥१३॥ न तत्र मरणं योऽन्यं प्रयातो याति शिवालयं ॥१४॥ इति श्रीरे
वामाहात्म्ये मरुतेश्वर योगेश्वरतीर्थ द्वयं तीर्थ समुच्चयं कथनं नामाष्टाचत्वारिंशत्तमोऽध्यायः ॥४८॥ ॥मार्कंडेय
उ॰॥ यथान्यच्च प्रवक्ष्यामि रोहिणीतीर्थमुत्तमं ॥ यत्र स्नात्वा तर्पयित्वा पितृन्देवान तिलोदकैः ॥१॥ सर्वपापवि
निर्मुक्तः सर्वसौभाग्यसंयुतः ॥ तस्याहिष्टान्महाराज पितृन्नुद्धरते निज्ञान ॥२॥ तत्राभ्यर्च्य जपेद्दीशं तथा मातृग
णान्नरः ॥ प्राप्नोति सप्तजन्मानि सौभाग्यं पुत्रपौत्रिकं ॥३॥ पूर्वमासीन्निषादी तु गिरिदुर्गनिवासिनी ॥ निषादं ६९
नृपतिं प्राप्य बाल्यानत्रावसंनृप ॥४॥ ममास्य कदाचित्स निषादो व्याधिपीडितः ॥ ततः सा विधवा जाता तारुण्ये

नृपसत्तम ॥५॥ निषादी दुःखसंतप्ता विषादं परमं ययौ ॥ शोचित्वा सा चिरं कालं समुत्थाय यावहद्वृत्तं ॥६॥ बध्वा चक्रि
रमानिसायथो सारुद्रसंभवं ॥ सा वाहयन नर्मदायां स्वर्याहीति मतं पति ॥ ७॥ निराहारा वसं मांसं स्थिता रेवा तटे
तु सा ॥ नित्यं स्नात्वा शिवं गौरीं तथा मातृगणान्नृप ॥८॥ संपूजयति स प्रातः सायं च नियतव्रता ॥ बिल्वपत्रैर्निराहा
रा शिवं गौरीं चार्चयन ॥९॥ मासांते साग्निमादाय कृत्वा काष्ठचितां शुभां ॥ मत्वात्य चततः स्नात्वा पूजयित्वा वि
काहरौ ॥१०॥ तथा मातृगणं सर्वं निषादी चाब्रवीदिदं ॥ बद्धांजलि पुटा पार्थ संप्रार्थ्य वनदेवताः ॥११॥ हरं गौरीं च
मातृणां गणं विज्ञापयत्तदा ॥ शृण्वंतु देवताः सर्वा मम वाक्यं सुखीभव ॥१२॥ पापजाति समुत्पन्ना मलिना विस
तीकचित ॥ निषादं च पतिं प्राप्य निषादी स्नेहभाविता ॥१३॥ बालवैधव्यमापन्ना आत्मानं वा निवेदयेत ॥ यथाहं
भर्तृ शुश्रूषा निरता हि पतिव्रता ॥१४॥ इह जन्मनि मे भर्ता निजः प्राणेश्वरो मम ॥ अहर्निशं यथा नान्यं चिंतया
मि स्वभर्तृतः ॥१५॥ विधवा मासपर्यंतं निराहारा सुरार्चिका ॥ वाग्यता नान्य चित्ता च स्नाता रुद्रोद्भवाजले ॥१६
तेन सत्येन पुण्येन प्रसादाद्भवतां सुराः ॥ द्विजराजश्चौषधीशो भर्ता मे स्यान्मतां शुभान ॥१७॥ इति त्रिः सत्यमुक्ता
सा प्रणम्याग्निं समाविशत ॥ नर्मदायास्तटे राजन साद्भुता नान साधनात ॥१८॥ दिव्यं विमानमानमारुह्य गो
रीलोकमवाप सा ॥ वर्षाणामयुतं तत्र गौर्याः सा परिचारिका ॥१९॥ बभूव भोगान तु नान भुंजाना भरतर्षभ ॥
ततः कालांतरे जाता दक्षस्य दुहिता शुभा ॥२०॥ सा विधुं प्राप भर्तारं सारं स्वर्गनिवासिनां ॥ इति ते कथितं राजन
रोहिणी तीर्थमुत्तमं ॥२१॥ यत्रागस्य पुनः स्नात्वा चंद्रं प्राप्ति तु भर्तरि ॥ स्मृत्वा ज्ञात्वानु तत्तीर्थं निषादी यत्र चावसत ॥
२२॥ अस्मिं तीर्थे महाराज नारी वा पुरुषोऽपि वा ॥ स्नात्वा सौभाग्यमाप्नोति सप्त जन्मानुगं ध्रुवं ॥२३॥ पुत्रपौत्रादि
वृद्धिश्च भवेत्स्वर्गे वसेच्चिरं ॥२४॥ इति श्री वायुपुराणे चतुर्विंशति साहस्र्यां संहितायां रौद्रीयेन नर्मदा माहात्म्ये रो
हिणी तीर्थं नामएकोनपंचाशत्तमोऽध्यायः ॥४९॥ मार्कंडेय उ॰॥ शृणु राजन्नखरारस्य स्थानं विनश्वरं ॥

141
2008

रे·खं· प्रातःसिद्धं यदन्नं वै सायं तच्च विनश्यति॥१॥ न जातरससंपुष्टे देहे कानि स्वतान्नप॥ शुक्रशोणितसंभूतं शरीरं पांच
७० भौतिकं॥२॥ अधःशिरश्चोर्ध्वपादं मलमूत्रेरुदेधते॥ मानुषी प्रमुखानां तु स्त्रीणां गर्भे चिरं वसेत्॥३॥ असंतपी
डितं दीमं यान द्वारे विनिःसरेत्॥ स्तनपानं च कुरुते वातपित्तकफाहितः॥४॥ स्त्रीयते गर्भगो बालो कुमारो युवा
वापि वा॥ अपि मध्यवयो वृद्ध इति देहस्य लक्षणं॥५॥ दानं वित्तादृतं वाचः कीर्तिधर्मौ तथायुषः॥ परोपकरणं
कायाद सारात्सारमुद्धरेत्॥६॥ शक्ते देहः कथं नाम न कुर्यात्तीर्थसेवनं॥ अविज्ञस्य यमायत्तं पापघ्नं पुण्यव
र्धनं॥७॥ स्वर्गमोक्षप्रदं पार्थ मर्त्यानां तीर्थसेवनं॥८॥ इति शारीरव्यवस्था॥ क॰ मार्कंडेय उ॰॥ नर्मदा उत्तरे कु
ले दारुतीर्थमनुत्तमं॥ यत्रासिद्धो महाराज तपस्त्वा द्विजोत्तम॥९॥ युधिष्ठिर उ॰॥ को सौ द्विजवरस्तत्र केक
र्मसिद्धो महामुने॥ कस्य पुत्रः किं नाम एतद्विस्तरतो वद॥१०॥ मार्कंडेय उ॰॥ भार्गवे विपुले वंशे विप्रर्षेर्दे
वशर्मणः॥ दारुर्नाम सुतस्त्वासीद्वेदवेदांगपारगः॥११॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थविधिः क्रमात्॥ यतिधर्मवि
धानेन चचार विपुलं तपः॥१२॥ ध्यायमानो महादेवं मिताहारो नरोत्तमं॥ तत्र तीर्थे च सत्ता वर्षा वस्त्राणपरिक्षि
प॥१३॥ तस्य नाम्ना तु तत्तीर्थं त्रिषु लोकेषु विश्रुतं॥ तत्र स्नातो विधानेन संपूज्य विधिपूर्वकं॥१४॥ सत्यवादी
जितक्रोधः सर्वभूतहिते रतः॥ सर्वान्कामानवाप्नोति राज्यं चात्र न संशयः॥१५॥ सत्यवादी जितः कुर्यादुपवा
सं तु प्राणानां पंचगव्यकं॥ पंचामृतेन संस्थाप्य शिवं भक्त्या समन्वितं॥१६॥ पूजयेद्विधियोगेः सराज्यमतुलं
लभेत्॥ ऋग्वेद जाप्याद्यजुर्वेदी सामजाप्यात्तु सामगः॥१७॥ यजुर्जाप्याद्यजुर्वेदं लभते जन्मनः फलं॥ प्राणत्या
गं भवेद्यस्य तस्मिन्तीर्थे विधानतः॥१८॥ अनिवर्तिका गतिस्तस्य इत्येवं शंकरोऽब्रवीत्॥१९॥ इति श्रीरेवा
महात्म्ये नर्मदायां दारुतीर्थं नाम॥ मार्कंडेय उवाच॥ ततो गच्छेत राजेंद्र तीर्थं त्रैलोक्यविश्रुतं॥ ब्रह्मावर्तं ७०
मिति ख्यातं सर्वपापप्रणाशनं॥२०॥ तत्र संनिहितो ब्रह्मा नित्यं देवः सनातनः॥ ऊर्ध्वबाहुर्निरालंब आदि

143
2008

त्यभ्रमणात्मकः॥२१॥ नित्यमावर्तते ध्येयं चिंतयानो महेश्वरं॥ तेन पुण्यतमं ख्यातं ब्रह्मावर्तमिति ध्रुवं॥२२॥
एकांतरस्त्रिरात्री द्वादशाहान स्तथा॥ तस्मिंतीर्थे विधानेन रुद्रमाराधयेन्नृपः॥२३॥ स याति परमं
स्थानं यत्र गत्वा न शोचति॥ तत्र स्नात्वा महाराज तर्पयित्वा देवताः॥२४॥ अर्चयेद्वै वमीशानं विष्णुं च परमे
ष्ठिनं॥ यत्फलं सर्वयज्ञेषु तीर्थेषु वा विधेषु च॥२५॥ तत्फलं समवाप्नोति तत्तीर्थस्य प्रभावतः॥ यस्मिंतीर्थे
ह्रियो देवो दानवो वा द्विजोत्तमः॥२६॥ सिद्ध स्तेनेव तन्नाम्ना ख्यातं तत्तीर्थमुच्यते॥ सैमाधेनियमो कोत्स सामर्थ्यान्नि
ध्यंति पुरुषान्नृप॥२७॥ प्रमादालस्यसंयुक्ताः पतंति धरणीतले॥ संनिरुध्येंद्रियग्रामो यत्र यत्र वसेन्मु यमो ह्युपा ५
निः॥२८॥ तत्र तत्र कुरुक्षेत्रं नैमिषं पुष्करं गया॥२९॥ इति श्री वायवीये रेवामाहात्म्ये एकोनपंचाशत्तमो
ध्यायः॥४९॥ ॥मार्कंडेय उ॰॥ पुत्रेश्वरं ततो गच्छेत्सर्वपापप्रणाशनं॥ यत्र सिद्धो महात्मा वै चित्रसेन
सुतो बली॥१॥ युधिष्ठिर उ॰॥ न किंचिदुत्कारा ज्ञानं तत्रैवांतरधीयत॥ गतेचाद्यौनं देवे विप्ररूपेद्भुता
शनि॥ कोसौ सिद्धः कदा ब्रह्मन् तस्मिंतीर्थे महामनाः॥ पुत्रः कस्य च को हेतुरेतदिच्छामि वेदितुं॥२॥
मार्कंडेय उ॰॥ चित्रसेनो महातेजा इंद्रस्य दयितः सखा॥ तस्य पुत्रो नृपश्रेष्ठ पत्रेश्वर इति स्मृतः॥३॥ रू
पवान्सुभगः श्रीमान् सर्वशत्रुभयंकरः॥ स कदाचित्सुधामध्ये सर्वदेवसमागमे॥४॥ मेनकान्तः सगी
तेन मोहितः सुचिरं किल॥ स्थितस्य गतमर्यादो गतः प्राणश्च वक्षणात्॥५॥ तावदिंद्रेण शापेन तत्काल
मजितेंद्रियं॥ यस्मात्त्वं स्वर्गसंस्थो पिमर्यभावं न मुंचसि॥६॥ तस्मान्मर्त्येचिरं कालं निवित्स सिनसंश
यः॥ एवमुक्तः सुरेंद्रेण चित्रसेनसुतो बली॥ प्रांसंहितस्तंतस्य प्रसादं कर्तुमर्हसि॥ शतक्रतु उ
वाच॥ यत्त्वं प्रसादयसि मां मर्त्यमर्त्यत्वमाश्रितः॥७॥ + वेपमानं सुरश्रेष्ठं कृतांजलिरभाषत॥ पत्रेश्व
र उ॰॥ मया पापेन मर्त्येन अजिता सेवा वा स च॥८॥ + नर्मदातटमाश्रित्य द्वादशाब्दं जितेंद्रियः॥ आ

रे॰ खं॰ ध्याय महादेवानं ततः आप्तसिद्धिं कृतिं ॥१०॥ समुद्गौ च रतानां तु धर्मिष्ठानां पतात्मना ॥ तोऽकीर्यं सर्वं या प्रोक्ता
७९ नलुपापालननोक्रुत्वेन ॥११॥ एवमुक्ता सुरश्रेष्ठ पातयामास तं भुवि ॥ सापि प्रणम्य देवेशं जगाम द्रुमिमंडलं ॥
१२॥ नर्मदाविमले तीर्थे स्नात्वा तं समीपतः ॥ स्नात्वा तत्र विधानेन पूजयामास शंकरं ॥१३॥ कर्णं धूपिपण्याक
फलैश्च पुष्पैः पत्रैश्च फलैः कणमार्वकैश्च ॥ तुष्टस्तस्य भवानीश चचार ततः प्रसन्नो भगवानमरेश्वरः ॥१४॥
पिनाकपाणिर्वरदं त्रिशूली प्रोवाच पत्रेश्वर मुज्वलाभ्यः ॥१५॥ महेश्वर उ० ॥ वरं वरय भद्रं ते वरदोऽहं त
वानघ ॥ तदहं संप्रदास्यामि यत्ते मनसि वांछितं ॥१६॥ पत्रेश्वर उ० ॥ यदि तुष्टोऽसि मे देव यदि देयो वरो मम
अत्र तीर्थे महेशान वास्तव्यं सततं त्वया ॥१७॥ एवं श्रुत्वा महादेवो रुद्रो गद्गदया गिरा ॥ तथेत्युक्त्वा च तत्रैव
स्तथांतर्धानमाप्तवान् ॥१८॥ सोपि तत्तीर्थमासाद्य रुद्रं चांतर्हिते सति ॥ स्नात्वा तत्र विधानेन तर्पयित्वा पि
तॄन्नृप ॥१९॥ स्थापयामास देवेशं तस्मिन्तीर्थे नृपोत्तम ॥ पत्रेश्वरेति विख्यातं त्रिषु लोकेषु भारत ॥२०॥ रुद्र
लोकं ततः सोपि सर्वाश्च भवैर्विर्जितः ॥ वरं विमानमारूढो वीज्यमानस्तु चामरैः ॥२१॥ एतत्ते कथितं राजन्
तीर्थं परमशोभनं ॥ स्नानदानार्चनेर्यस्तु सर्वपापैः प्रमुच्यते ॥२२॥ ये चर्चयंति महादेवं तस्मिन्तीर्थे नृपो
त्तम ॥ गच्छंति रुद्रलोकं ते सर्वदोषमलोद्धृताः ॥२३॥ इति पत्रेश्वरतीर्थं ॥ मार्कंडेय उ० ॥ ततो गच्छेत राजें
द्र जन्हितीर्थमनुत्तमं ॥ यत्र संनिहितो वह्निर्गतः कामेन मोहितः ॥२४॥ युधिष्ठिर उ० ॥ कथं देवो जग
न्नाता कामेन कलुषीकृतः ॥ किंनिमित्तमिह प्राप्तो नर्मदातत्र संश्रये ॥२५॥ एतदाश्चर्यमतुलं सर्वलो
कानुरंजनं ॥ कथयस्व महाभाग परं कौतूहलं हि मे ॥२६॥ मार्कंडेय उ० ॥ साधु पृष्टं महाराज सोमवं
शविभूषण ॥ कथयामि यथापूर्वं श्रुतं मे देवदेवतः ॥२७॥ आसीत्कृतयुगे राजा नाम्ना दुर्योधनो नृप ७९
॥ हस्त्यश्वरथसंपूर्णो मेदिनी प्रतिपालकः ॥२८॥ एकदा नर्मदाकूले वने षु मृगयां गतः ॥ खेलन्ना खेट

145
2008

कं राजा सर्वोपकरणान्वितः ॥२९॥ इतश्चेतश्च बभ्राम तस्मिन्भो वरायन ॥ तं च सर्वांगसंपूर्णं सत्लक्ष्मीकं ब
लान्वितः ॥३०॥ रूपयौवनसंपन्नं दृष्ट्वा तं पृथिवीपतिं ॥ इयं रेवा महाराज याता तस्य कलत्रतां ॥३१॥ मुदा परम
या युक्ता साक्षाद्रूपगुणान्विता ॥ स्वयमागत्य तं वव्रे मायाहि प्रसोः पतिं नृपं ॥३२॥ रमयामास सततं या तेन साच
यज्ञाचिनी ॥ नर्मदा जनयामास कन्यां पद्मदलेक्षणां ॥३३॥ अंगप्रत्यंगसंपन्नां सर्वलोकमनोहरां ॥ माधुर्य
शील संयुक्तां त्रिषु लोकेषु विश्रुतां ॥३४॥ चक्रतुः प्रथमं तत्र तस्या नाम सुदर्शनां ॥ कालेन महता जाता यौ
वनस्थानितं विना ॥३५॥ प्रार्थ्यमानं नु राजन्यो नात्मानं दातुमिच्छति ॥ ततोऽभ्येत्य वसवन्हिर्द्विजरूपो महातपाः
॥३६॥ राजानं प्रार्थयामास तां कन्यां चारुलोचनां ॥ भो भो रघुकुलश्रेष्ठ द्विजोऽहं मंदसंततिः ॥३७॥ दरिद्रश्चास
हायश्च भार्यार्थी वरयाम्यहं ॥ कन्यां सुदर्शनां नाम रूपेणाप्रतिमां तव ॥३८॥ तां दद स्व महाभाग मम
संततिहेतवे ॥ ब्रह्मचर्येण निर्विण्ण एकाकी कामपीडितः ॥३९॥ याच मानस्य मे तात प्रसादं कर्तुमर्हसि
॥ राजोवाच ॥ नाहं द्रव्यविहीनस्य असवर्णस्य कर्हिचित् ॥४०॥ दास्यामि स्वसुतां दिव्यां याहि त्वं द्विज
पुंगव ॥ एवमुक्तः स्तदा वन्हिः परां व्रीडामुपागतः ॥४१॥ नाकिंचिदुक्त्वा राजानं तत्रैवांतरधीयत ॥ गते चाद
र्शनं वि प्रकृपे कुताग्ने ॥४२॥ ततः कश्चिद्दहोमिश्चरा आमंत्रि पुरोहितैः ॥ मंत्रवित्सा सहस्त्रां यज्ञं प्रारब
धवां स्तदा ॥४३॥ यजतस्तस्य यज्ञे तु भक्त्या ब्राह्मणसत्तमैः ॥ गतश्चादर्शनं वन्हिः सर्वेषां पश्यतां तदा ॥
४४॥ विषादुर्मनसा जाता गत्वा राज्ञः समीपतः ॥ चकिता वन्हि नाशे तु राजानमिदमब्रुवन ॥४५॥ दुर्योधन
महाराज श्रूयतां महदद्भुतं ॥ अदृष्टस्तु सर्वेषां अस्माकं भवतामपि ॥४६॥ अग्निकार्यं प्रवृत्ता नो विप्राणां
विधिवंनृप ॥ केनापि हेतुना वन्हिर्नष्टोन ज्वलति स्फुटं ॥४७॥ तच्छ्रुत्वा वचनं घोरं राजापि प्रमुखो कृतं ॥ आ
सनान्नपतितो भूमौ छिन्नमूल इव द्रुमः ॥४८॥ आश्वास्य च मुहूर्तेन उन्मत्त इव चेतदा ॥ निरीक्ष्य च द्विजाः

रे.ख. सर्वोन्विश्वस्य च पुनः पुनः ॥४९॥ करं करेण चाहत्य इदं वचनमब्रवीत् ॥ आश्चर्यमिदं परमं लोके ब्राह्मणा
७२ सत्तमाः ॥५०॥ कथ्यतां कारणं सर्वं यत्त्वं दृष्ट्वा निवार्यते ॥ मम वा दुष्कृतं किंचिद्वृत्तं हि भवतामिह ॥५१॥ येन प्रन
ष्टो यज्ञे मे हुतभुक् सर्वथा हि द्विजाः ॥ मंत्रच्छिद्रमिहायातं अथवा किमदक्षिणा ॥५२॥ विधिच्छिद्रं यदि वा नैवात्र
न वह्निर्न दीप्यते ॥ अन्नहीनो दहेद्राष्ट्रं मंत्रहीनस्तु ऋत्विजः ॥५३॥ यज्ञारं दक्षिणाहीनो नास्ति यज्ञसमो रिपुः
॥ ब्राह्मणा ऊचुः ॥ न मंत्रहीनो हीनास्त्वयैव च राजन्सर्वे तथा ॥५४॥ न द्रव्यहीनो हि न गवान् अन्यस्यापि विचार्य
तां ॥ राजोवाच ॥ तथापि भो द्विजश्रेष्ठा उपायं चिंत्यतामिह ॥५५॥ येनायं याति वह्निः स्याद्धि लोकपरत्र च ॥
एवमुक्तास्ततस्तेन ब्राह्मणाः कृतनिश्चयाः ॥५६॥ निराहारास्थितास्तत्र यत्र नष्टो हुताशनः ॥ तावत्स्वप्ने महातेजा हु
तभुग्ब्राह्मणांस्तथा ॥५७॥ उवाच श्रूयतां सर्वं मम नाशस्य कारणं ॥ प्रार्थितोयं महाराजः स्वसुतां देहि मे नृप ॥५८
अनेन मे न दत्ता सा ततो नष्टोहमादरात् ॥ यदि मे स्वसुतां राजा ददाति परमार्चितं ॥६०॥ ज्वलमानस्ततो यज्ञे विप्राः
क्षिप्रामि नान्यथा ॥ तच्छ्रुत्वा वचनं विप्रा वैश्वानरमुखाच्च्युतं ॥६१॥ विस्मयोत्फुल्लनयना राजानमिदमब्रुवन् ॥ भ
वतो मतमाज्ञाय सर्वे गत्वाग्निमंदिरं ॥६२॥ निराहारास्थिता राजन् त्रिरात्रं भक्तिभाविनः ॥ रात्रौ स्वप्ने ततो येन्हिप
स्यामो जातवेदसं ॥६३॥ तेनोक्तं स्वसुतां स यो ददाति यदि मे नृप ॥ ततोस्य यज्ञे भूयोपि ज्वलिष्ये नान्यथा द्विजाः ॥६४
न दत्ता प्रार्थिता पूर्वं तेन तन्नाशकारणं ॥ एवं ज्ञात्वा महाराज क्रियतां यदनंतरं ॥६५॥ श्रीमतां दुहितां तस्मै यज्ञसं
सिद्धिकृतये ॥ राजोवाच ॥ भवतां नान्यथा कार्यं देवस्य वचनं मया ॥६६॥ समयं कर्तुमिच्छामि कन्यादाने द्विजोत्तमाः ॥
एवं ते ब्राह्मणाः श्रुत्वा समाराध्य हुताशनं ॥६७॥ प्रत्यक्षं तमकुर्वंत द्विजरूपं सुतेजसं ॥ राजोक्तं वचनं तेन कृतं त
स्य रक्षणं ॥६८॥ राजोवाच ॥ मम सान्निहितो नित्यं गृहे तिष्ठतु पावकः ॥ ददामि सुतां चिरं विप्रास्त्वत्कृते विधियोगतः ७२
॥६९॥ अग्निनांगीकृते विप्रा अभिनंद्य हुताशनं ॥ कथयित्वा विवाहेन योजयंति स्म पावकं ॥७०॥ सुदर्शना याम्रा

147/2008

भेन परितुष्टो हुताशनः ॥ ज्वालकुंडमध्ये तु माहिष्मत्यां युधिष्ठिर ॥७१॥ ततः प्रभृति तत्तीर्थं अग्नितीर्थं प्रचक्षते ॥ त
त्र तीर्थे तु यः कश्चित्स्नानदानैः सुभावितः ॥७२॥ तर्पयेच्च पितॄन्देवान् सोश्वमेधफलं लभेत् ॥ सुवर्णं यः प्र
यच्छेच्च घृतमन्नं च भारत ॥७३॥ स्वर्गलोके चिरं स्थित्वा भुवि राजाभिजायते ॥ रूपवान् सुखसंपन्नो दीर्घायुर्व्या
धिवर्जितः ॥७४॥ अनाशकं तु यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ स तो सावग्निलोकस्य क्रीडते सुरपूजितः ॥७५॥
एष ते ह्यग्नितीर्थस्य संभवः कथितो मया ॥ सर्वपापहरः पुण्यः श्रुतमात्रेण पावनः ॥७६॥ इति श्रीरेवामाहात्म्ये
अग्नितीर्थं ॥ ॥ तथैव च नृपराजेंद्र सारं तीर्थमनुत्तमं ॥ नर्मदातीरसंभूतं रादित्यस्य महात्मनः ॥१॥ कीर्तयामि कुरु
श्रेष्ठ यदि ते श्रवणे मतिः ॥ युधिष्ठिर उ० ॥ एतदाश्चर्यमतुलं श्रुत्वा तव मुखाद्द्विज ॥२॥ विस्मयात् हृष्टरोमाहं जा
तोस्मि द्विजसत्तम ॥ पुरुषाकृतिस्त्वत्र देवो उताहो तपसः फलं ॥३॥ कस्य गोत्रे समुत्पन्नः कस्यैव देवो भवद्द्विजो ॥
सहस्रकिरणो देवो हर्ता कर्ता निरंजनः ॥४॥ अवतारं कथं तात कृतवान्नर्मदातटे ॥ मार्कंडेय उ० ॥ नृपराजन्प्र
वक्ष्यामि सर्वसंभवमुत्तमं ॥५॥ कुशिकान्वयसंभूतो ब्राह्मणो भक्तिमान् शुचिः ॥ परमं व्रतमास्थाय तीर्थया
त्रां जगाम सः ॥६॥ योजनानां शतं गत्वा नर्मदातटमाश्रितः ॥ निराहारस्थितस्तत्र सूर्यस्याराधने रतः ॥७॥ पार
तुष्टस्ततः सूर्यः प्राह विप्रं स्वयं स्थितः ॥ भो भो मुने महासत्त्व जलं ते व्रतमीदृशं ॥८॥ सर्वव्याप्य स्थितं पश्य स्था
वरं जंगमं च गां ॥ तपाम्यहं तपो वर्षं निग्रहाम्यसृजामि च ॥९॥ अमृतं नैव मर्त्यं च यः पश्यति स पश्यति ॥ वरं
वरय विप्रेंद्र यत्ते मनसि वांछितं ॥१०॥ ब्राह्मण उ० ॥ यदि तुष्टोसि देवेश यदि देयो वरो मम ॥ अस्मिन् हि नर्मदा
कूले सदा संनिहितो भव ॥११॥ योजनानां शतस्यापि भक्त्याः परमपावनः ॥ स्मरंति ये च तेषां वै स याति प
रमां गतिं ॥१२॥ स हि तु विष्णुस्थितो नित्यं पुत्रदारधनान्वितः ॥ जायते तात् समुद्भवं स महाज्ञानसंज्ञयः ॥१३॥ कु
ष्ठांगो वधिरा मूकाः पंगवो विकलेंद्रियाः ॥ संप्राप्य दर्शनं तुभ्यं ते भवंतु निरामयाः ॥१४॥ जीर्णप्रायां हि द

रे॰ खं॰ स्नात्वा अस्थि च यो नरो पिता॥ तेषां सकलकारुण्यं कुरुष्व सुरसत्तम॥१६॥ पितॄणां नर्मदातोये पानात्संप्रतर्पितेहि
७२ ॥तेषां त्वं वरदानेन प्रसादं कर्तुमर्हसि॥१७॥ पतनाग्रे च पतनं देवकुर्वंति मानवाः॥ स्वामिने पौरुदाय एष मे पर
मेश्वर॥१९॥ एवमाख्याति तिले पौलकामुनिसकरुणानिधि॥ मृत्कालकां नितांतं प्रतिष्ठाद्दृष्टिं न गतः॥१८॥ तत्र ती
र्थेतु यो राजन् भक्त्या स्नात्वा जितेंद्रियः॥ तर्पयेत्पितृदेवांश्च सोग्निष्टोमफलं लभेत॥१९॥ अग्निप्रवेशं यः कुर्यात्
तस्मिंतीर्थे नराधिप॥ पातयानो द्विजाः सर्वाः सर्वलोकं स गच्छति॥२०॥ आदित्यतीर्थे यः कश्चित् संन्यासेन त्यजेत्त
नुं॥ षष्टिवर्षसहस्राणि सर्वलोके महीयते॥२१॥ अप्सरोगणसंकीर्णो दिव्यगंधर्वनादिते॥ ततो भवति लक्ष्मीवान्
वेदवेदांगपारगः॥२२॥ व्याधिहीनो ... कोटिपतिर्महान्॥ पुत्रदारसमोपेतो जीवेच्च शरदां शतं॥
२३॥ प्रातरुत्थाय यस्तत्र संस्मरेद्भास्करं सदा॥ आत्मना सह तौ पापान्मुच्यते नात्र संशयः॥२४॥ इति श्रीरेवा
खंडे आदित्यतीर्थं॥ ॥मार्कंडेय उ०॥ ततो गच्छेत राजेंद्र मेघनादेति विश्रुतं॥ जलमध्ये महादेवो यत्र तिष्ठति सद्गु
णः॥१॥ युधिष्ठिर उवाच॥ जलमध्ये महादेव तिष्ठते केन हेतुना॥ उत्तरं दक्षिणं कूलं वर्जयित्वा द्विजोत्तम॥२॥ मा
र्कंडेय उ०॥ एतदाख्यानमतुलं पुण्यं श्रुतिसुखावहं॥ यत्पुराणे श्रुतं तात तत्ते वक्ष्याम्यशेषतः॥३॥ त्रेतायुगे महा
भागः पौलस्त्यो देवकंटकः॥ त्रैलोक्यविजयी रौद्रः सुरासुरभयंकरः॥४॥ अवध्यः सर्वभूतानां देवगंधर्वरा
क्षसां॥ कदाचित्स विमानेन नचचार सकलां महीं॥५॥ तावद्विंध्यागिरौ राजन् राक्षसो बलदर्पितः॥ मयो नाम
सुविख्यातो गुहावासी तपश्चरन्॥६॥ तस्य पार्श्वे स्थितां कन्यां दृष्ट्वा रूपवतीं शुभां॥ पतितो दानवेंद्रेण वा
क्यं चेदमथाब्रवीत्॥७॥ कस्येयं पद्मपत्राक्षी पूर्णचंद्रनिभानना॥ किं नामधेया कस्मात्त्वं कुरुते तप उत्तमं॥
८॥ मय उ०॥ दानवानां पतिः श्रेष्ठो मयोहं लोकविश्रुतः॥ भार्या मे तेजोवती नाम तस्यां तनया शुभा॥९॥ मंदोदरी ७२
ति विख्याता पत्यर्थे तप्यते तपः॥ आराधयंती देवेशं पार्वतीपतिमव्ययं॥१०॥ तच्छ्रुत्वा वचनं तस्य रावणो मदमो

हितः॥ प्रसन्नः प्रयतो भूत्वा वाक्यमेतत्तथाब्रवीत्॥११॥ पौलस्त्योहं सुविख्यातो देवदानवदर्पहा॥ प्रार्थयामि महा 141/2008
भाग त्वत्सुतां दातुमर्हसि॥१२॥ दत्ता पित्रा महं वत्स मयेनापि महात्मना॥ रावणाय सुता दत्ता प्रजापतिविधान
तः॥१३॥ गृहीत्वा तां ततो लंकां जगाम विचरोत्तमः॥ ततो विमानमारूढः कुर्वन् क्रीडां समंततः॥१४॥ चचारा
नंदितो रावणः पुष्पवने पुरा॥ केनापि अथ कालेन रावणो लोकरावणः॥१५॥ पुत्रं पुत्रवतां श्रेष्ठं जनयामास
भारत॥ जातेन पिता तन्मात्रेण रावो मुक्तो महात्मना॥१६॥ संवर्तकमेघस्येव येन लोका जडीकृताः॥ श्रुत्वा तं
निनदं घोरं ब्रह्मलोके पितामहः॥१७॥ नाम चक्रे ततस्तस्य मेघनादेति विश्रुतं॥ कृतनामा ततः सोपि परमं
व्रतमास्थितः॥ तोषयामास देवेशं उमया सहितं प्रभुं॥ व्रतैर्नियमदानैश्च होमजाप्यैर्विशोषितः॥१९॥ कृच्छ्र
चांद्रायणैर्नित्यं कर्शयन्नात्मनस्तनुं॥ ततोन्यदिवसे तात गत्वा कैलासपर्वतं॥२०॥ दिव्यं लिंगद्वयं लब्ध्वा प्रत्य
तो दक्षिणामुखः॥ स्थितस्तत्र महातेजा नर्मदायास्तटे शुभे॥२१॥ निधाय पूजयामास तत्र लिंगद्वयं नृप॥ कृत
कृत्यमिवात्मानं मानयित्वा निशाचरः॥२२॥ लंकां प्रति ततो गामी श्रमात् लिंगद्वयं तदा॥ एकं तत्याज राजेंद्र प्रयत्नात्
सव्यपाणिना॥२३॥ द्वितीयं च द्वितीयेन भक्त्या पौलस्त्यनंदनः॥ तावदेकं महालिंगं पतितं नर्मदाजले॥२४॥ या
हितं वत्स दृष्ट्वा जलमध्ये प्रतिष्ठितं॥ प्रणम्य रावणिस्तत्र जलमध्ये महेश्वरं॥२५॥ जगामाकाशमार्गेण नृप पू
ज्यमानो निशाचरैः॥ तदाप्रभृति तत्तीर्थं मेघनादेति विश्रुतं॥२६॥ सर्वलोकेषु विख्यातं महापापक्षयंकरं
॥ तस्मिन्तीर्थे तु राजेंद्र स्नात्वा यः पूजयेच्छिवं॥२७॥ अहोरात्रोषितो भूत्वा अश्वमेधफलं लभेत्॥ पिंडदानं तु यः
कुर्यात्तस्मिंतीर्थे युधिष्ठिर॥२८॥ तेन द्वादशवर्षाणि पितरः संततर्पिताः॥ यश्च भोजयते विप्रान् पदूरस्नाने
न भारत॥२९॥ असंख्याता यते तृप्तिः पितॄणां युगसंख्यया॥ प्राणत्यागं तु यः कुर्यात्तत्र निर्वृत्तचेतसा॥३०॥ व
सते च्छांकरलोके यावदाहूतसंप्लवं॥ एषते नरशार्दूल मेघनादस्य संस्थितिः॥ कथिता सर्वभावेन सर्वथा

रे० खं० पस्यंकरी॥१२॥ इति श्रीरेवाखंडे मेघनादतीर्थं॥ ॥मार्कंडेय उ०॥ ततो गच्छेन्नरश्रेष्ठ दारुतीर्थमनुत्तमं॥ दारुतीर्थं
७४ यथा पूर्वमभवत्तच्छृणुष्व मे॥१॥ अहं ते कथयिष्यामि पुरावृत्तं द्विजोत्तम॥ पर्वस्वर्गे सभामध्ये ऋषीणां भावितात्म
नां॥२॥ सतां वज्रधरश्चैव शोभमानो निरामयः श्रुतः॥ कुर्वन्ति विप्राः पदार्थं संसतावसः शक्रेण भारत॥३॥ मर्त्यस्य च यतो बुद्धि
स्तव जाता दुरात्मक॥ विप्रापहासं कुरुषे नीचभावाश्रितो बुध॥४॥ स्वर्गलोकपरिभ्रष्टो मर्त्यो मर्त्ये च वासः॥ शा
पाहतोसौ राजेंद्र इंद्रस्य चरणौ ततः॥५॥ प्रपीड्य सुरनाथं तं विज्ञप्तुमुपचक्रमे॥ ममत्वापानि तस्य जनाथस्य
सुरेश्वर॥६॥ कर्मणा केन पापस्य घोरस्यांतो भविष्यति॥ स्वामी स एव दैवे ज्ञाय शापानुग्रहे क्षमः॥७॥ शक्र उवा०
नर्मदातटमाश्रित्य पूजयस्व महेश्वरं॥ बिल्वपत्रैः प्रतिदिनं स्नात्वा सर्वेश्वरं विभुं॥८॥ स एव भगवान्तुष्टः शापस्यां
तं करिष्यति॥ यावच्चक्रधरो देवः पृथिव्यां संनिविश्यति॥९॥ तावत्त्वं तत्र तत्ते भवदर्पितो दध्रुकः॥ दारुको नाम
विख्यातो वासुदेवार्जुन सारथिं॥१०॥ मानुषं भावमापन्नः ततः सिद्धिमवाप्स्यसि॥ एवमुक्तः स देवेन सह स्रावेण
भारत॥११॥ प्रणम्य शिरसा भक्त्या गतौ सौभाग्य पूर्जितः॥ नर्मदातटमाश्रित्य कृत्वा यन्त्रितविग्रहः॥१२॥ रुक्मिणी
पतिसारथ्यं वांछमानः समग्रधीः॥ व्रतोपवाससंक्लिष्टो जपहोमरतः सदा॥१३॥ देवमाराधयामास ततस्तुष्टो म
हेश्वरः॥ उवाचैनं महाभागं प्रसन्नेनांतरात्मना॥१४॥ अंशावतीर्णो वि शौः सूतो भूत्वा महीपतिः॥ तोषयित्वा जगं
नाथं ततः संस्थानमाप्स्यसि॥१५॥ एवं ते संभवस्तात दारुतीर्थस्य सुव्रत॥ कथितो वै मया पूर्वं यथैवाकर्णितो नृ
प॥१६॥ तस्मिंस्तीर्थे नरः स्नात्वा विधिपूर्वं युधिष्ठिर॥ उपास्य संध्यां देवेशमर्चयेत्तं महेश्वरं॥१७॥ वेदाभ्यासं च
तत्रैव द्विजः कुर्यात्समाहितः॥ अश्वमेध फलं प्राप्य स्वर्गलोके महीयते॥१८॥ स्नानं दानं जपो होमो स्वाध्यायो
देवतार्चनं॥ यत्कृतं शुद्धभावेन तदानंत्याय कल्पते॥१९॥ इति श्रीरेवाखंडे दारुतीर्थं॥ ॥मार्कंडेय उवा० ततो ७४
गच्छेत राजेंद्र देवतीर्थमनुत्तमं॥ यत्र देवा महेंद्राद्याः स्नात्वा सिद्धिं परां गताः॥१॥ युधिष्ठिर उ०॥ कथं ते तात सुराः स

वै नर्मदातटमाश्रिताः॥ भक्त्या वारिप्रसंगाद्धा तन्ममाचक्ष्व सुव्रत॥२॥ मार्कंडेय उ०॥ पुरा देवासुरे युद्धे दानवैर्बलदर्पि
तैः॥ इंद्रादिदेवगणैः सार्धं स्वाराज्याच्च्यावितो नृप॥३॥ जंभशुंभनिशुंभाद्यैः कुंभांडकुहकादिभिः॥ संग्रामे निर्जिता देवाः
प्रहारैर्जर्जरीकृताः॥४॥ विलोप्यमानाः समरे ब्रह्मणो मुपतस्थिरे॥ प्रणम्य शिरसा देवं ब्रह्माणं परमेष्ठिनं॥५॥ तदा
विज्ञापयामासुर्महेंद्राद्याः सुरास्ततः॥ पश्यास्मान्देवदेवेश दानवैर्जर्जरीकृतान्॥६॥ स्थानविच्युता राज्यसंभारात्त्वामेव
शरणं गताः॥ परित्रायस्व देवेश सर्वलोकपितामह॥७॥ नान्या गतिः सुरादीनां मुक्त्वा त्वां परमेश्वर॥ ब्रह्मोवाच॥ नेसां
प्रतमुपायोस्ति कश्चिद्देवसुरोत्तमाः॥ ताविनात्वर्थचेरवां न सर्वोपद्रवनाशनां॥ नर्मदातटमाश्रित्य दानवानां विना
शने॥९॥ संयतं संयतात्मानः कुरुध्वं परमं तपः॥ ततस्तपप्रभावेन परतेजोवलोर्जिताः॥१०॥ विजयश्चैव वो युद्धे
भविष्यति न संशयः॥ तच्छ्रुत्वा वचनं देवा ब्रह्मणः परमेष्ठिनः॥११॥ नर्मदातटमाश्रित्य तपः परममाश्रिताः॥ तस्था
तत्र तपो दिव्यं सततं नृपसत्तम॥१२॥ संकल्पोर्वैर्विधैः कृत्वा देवमाराध्य शंकरं॥ तोषयामासुरव्यग्रास्ततस्तुष्टो म
हेश्वरः॥१३॥ ददौ समीहितं तेषां देवदानवनाशनं॥ भविष्यथ सुरा यूयमजेयाः समरे रपि॥१४॥ स्वस्त्वा मां दानवैः
सार्धं कुरुध्वं युद्धमुत्तमं॥ हनिष्यथ रिपून्सर्वान्संग्रामे वै न संशयः॥१५॥ ततो महेशान वचः श्रुत्वा सर्वे सुरोत्त
माः॥ शिवं संस्थाप्य तत्रैव देवदेवं वृषध्वजमुत्तमं॥१६॥ कृत्वा च दानवैर्युद्धं ततः सिद्धिं परां गताः॥ तदा प्रभृति तत्तीर्थं
देवतीर्थमिति स्मृतं॥१७॥ गीयते त्रिषु लोकेषु सर्वपापक्षयंकरं॥ तत्र गत्वा तु यो मर्त्यो विधिवत्संयतेंद्रियः॥१८॥
स्नानमाचरते भक्त्या स लभेत्तन्मनः फलं॥ यश्च संपूजयेद्देवं सर्वदेवेश्वरं नृप॥१९॥ स लभेदश्वमेधस्य सकलं
फलमुत्तमं॥ यस्तु भोजयते विप्रं तस्मिंस्तीर्थे नराधिप॥२०॥ सहस्रविप्रभोज्यस्य फलमाप्नोति मानवः॥ तत्र देव
शिला पुण्या महत्पुण्यविवर्धिनी॥२१॥ संन्यासेन मृतानां तु नराणां मस्स या गतिः॥ अग्निप्रवेशं यः कुर्यात्तस्मिं
स्तीर्थे नृपोत्तम॥२२॥ रुद्रलोके वसेत्तावद्यावदाहूतसंप्लवं॥ स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनं॥२३॥

151/2008

रे॰ ख॰ सुकृतं दुष्कृतं चापि सर्वमक्षयतां व्रजेत्॥ एष ते विधिरादिष्टो देवतीर्थस्य भारत॥२४॥ एतत्ते कथितं तीर्थं सर्वदुःखवि
७५ मोचनं॥ एवमुत्पादितं देवैर्दानवानां च पार्थिव॥२५॥ इति श्रीरेवाखंडे देवतीर्थं॥ ॥मार्कंडेय उ॰॥ ततो गच्छेत राजेंद्र
गुहावासीति विश्रुतं॥ गुहावासी महादेवो यत्र सिद्धः सनातनः॥१॥ युधिष्ठिर उ॰॥ केन कार्येण विप्रेंद्र देवदेवो जग
द्गुरुः॥ गुहायामनयत्कालं सुचिरं तः परिस्थितः॥२॥ एतद्विस्तरतः सर्वं कथयस्व ममानघ॥ श्रोतुमिच्छामि तत्त्वेन कौ
तूहलसमन्वितः॥३॥ मार्कंडेय उ॰॥ साधु प्रश्नो महाराज पृष्ठश्चायं कृतस्त्वया॥ पुराणे विस्तराण्यस्य बहुशः श्रूय
ते नृप॥४॥ सांप्रतं कलियोगेन मंदचेतस्ततो नृप॥ संक्षेपात्तेन ते तात कथयामि निबोध मे॥५॥ पुरा कृतयुगे राज
न्नासीद्दारुवनं महत्॥ नानाद्रुमलताकीर्णं नानावल्ल्युपशोभितं॥६॥ सिंहव्याघ्रवराहैश्च गजहस्तिनिषेवितं॥ ब
हुपक्षिस्वरैर्जुष्टं यथा चैत्ररथं तथा॥७॥ वसंति तत्र विप्रेंद्राः सततं संशितव्रताः॥ महातपसि संयुक्ताश्चतुराश्र
मवासिनः॥८॥ ब्रह्मचारी गृहस्थाश्च वानप्रस्थाश्च भिक्षवः॥ स्वधर्मनिरताः सर्वे वांछंतः परमं पदं॥९॥ तावद्ब
संतसमये कस्मिंश्चित्कारणांतरे॥ गच्छमानो वृषारूढो भवः स्वप्रियया सह॥१०॥ ददर्श तापसावासं रुक्सामध्व
निवादितं॥ यज्ञाग्निधूमसंयुक्तं सर्वपापहरं करं॥११॥ तं दृष्ट्वा मुदिता देवी हर्षगद्गदया गिरा॥ प्रपच्छ देवदेवेशं
सर्पाकल्पितभूषणं॥१२॥ कस्यायमाश्रमो देव वेदध्वनिनिनादितः॥ यं दृष्ट्वाश्रुतिपापाश्च श्रमश्च परिहीयते॥
॥१३॥ ईश्वर उ॰॥ किं त्वया न श्रुतं देवि महादारुवनं शुभं॥ बहुविप्रजनो यत्र गृहधर्मेण वर्तते॥१४॥ अत्र यः क
श्चिन्मुमुक्षुः शुश्रूषणे रतः॥ नान्यं धर्मं न देवं वा जानिते शैलनंदिनी॥१५॥ एतच्छ्रुत्वा परं वाक्यं देवदेवेन भाषितं॥
कौतूहलपरा देवी शंकरं चाब्रवीदिदं॥१६॥ यत्त्वयोक्तं महादेव पतिधर्मरताश्च ये॥ ता तांस्त्वं मन्मथाभत्वा चरि ७५
त्रं स्त्रीणां च प्रभो॥१७॥ तस्यास्तु सा वचः श्रुत्वा स देवः पुनरब्रवीत्॥ एतत्त्वयोक्तं वचनं न हि मे रोचते प्रिये॥१८॥ ब्रा
ह्मणा हि महद्भूतं न तेषां विप्रियं चरेत्॥ मन्युप्रहरणा विप्राश्चक्रप्रहरणो हरिः॥१९॥ चक्रात्तीव्रतरो मन्युस्तस्मा

153/2008

द्विप्रं न कोपयेत्॥ न ते दृष्ट्वा न ते लोका न ते नागा न ते सुराः॥२०॥ दृश्यते त्रिषु लोकेषु ये ते रुष्टैर्न नाशिताः॥ तेषां मो
हस्तथा सर्गो भामिनि सर्वफलानि च॥२१॥ येषां तु स्त्री महाभागा ब्राह्मणाः क्षितिदेवताः॥ एवं ज्ञात्वा महाभागे असकृ
द्दमिमं प्रिये॥२२॥ यज्ञलोकविरुद्धं तु चक्षुः कोपविवर्धनं॥ देव्युवाच॥ नाहं ते यदि ता देव न भर्तुर्मेऽप्यनुग्रहः॥२३॥
यदि नो धर्षणं तासां नारीणां ग्लस्य बुधप्रभो॥ कौतुकेन मया ख्यातं तत्त्वे न क्रियते त्वया॥२४॥ एवमुक्तो महादेवो
देव्या वाक्यहितेरितः॥ कृत्वा कापालिकं रूपं ययौ दारुवनं शिवः॥२५॥ महाहिनानुयातं दंनियम्य ग्रानि भूषणं॥ कं
कणं परं कृत्वा गोनासौ कर्णिकुंडले॥२६॥ व्याघ्रचर्मपरीधानो मेखलाहारभूषणः॥ नूपुरध्वनिनिर्घोषैर्नादय
न्सकलां महीं॥२७॥ कृत्वा कापालिकं रूपं महाचित्रतमद्भुतं॥ महाडमरुनिर्घोषैः पूरयन्सर्वतोदिशः॥२८॥ एवं प्रभा
तसमये विभुर्दारुवनं गतः॥ तावद्विप्रजनाः सर्वे पत्रपुष्पफलार्थिनः॥२९॥ निर्गता बटुभिः सार्धं पठमानं द्विजस्ततः
आश्चर्यरूपं तद्भूतं दृष्ट्वा देवस्य भारत॥३०॥ ऋषीणामंगनास्तत्र कामेन कलुषीकृताः॥ नग्नं पुरुषं दृष्ट्वा सर्वा
स्ताक्षपिर्याविताः॥३१॥ वैकल्यभावमापन्नास्तद्दारुवनस्त्रियः॥ विकाराबहवस्तासां दृष्ट्वा देवं समुद्गताः॥३२
मोहश्चक्षेपलौ नो संजातश्चित्तमेदनः॥ स्रस्तानि परिधानानि काश्चित्तत्र वरांगनाः॥३३॥ उत्तरीयमथान्य
न्या भूषणान्यपराः स्त्रियः॥ विश्लिष्टकेशभाराश्च काश्चिद्दर्वीकराः पतांः॥३४॥ दातुकामस्तथा भैक्ष्यं नेष्टितुं चे
च नाशकन्॥ काचिद्दृष्ट्वा महादेवं रूपयौवनगर्विता॥३५॥ उत्संगस्थं स्वबालं वै विस्मृता पायितुं स्तनं॥ कामबा
णहता चान्या बाहुभ्यां पीड्य सुस्तनौ॥३६॥ निश्वसंती सदा सोश्लंनविं, चिंतयतित्स्यति॥ एवं संक्षोभ्य तं सर्वं स्त्री
जनं परमेश्वरः॥३७॥ जगाम दर्शनं तासां दृग्गोचरगतो विभुः॥ ताः पृष्ठतः प्रधावंति विकला विस्मृताश्रमाः॥
३८॥ तावत्ते ब्राह्मणाः सर्वे भ्रमित्वा काननं नृप॥ आगता ददृशुर्दारान्महामोहविमोहितान्॥३९॥ यासां पूर्वं
परा भक्तिरासीत्तासां प्रियं प्रति चलितां तां विदित्वा तु निर्ममत्वं द्विजसत्तमाः॥४०॥ ततो दृष्ट्वा तु ते सर्वे संभ्रांता

रे॰ ख॰ मुक्तधीश्च ॥ ततः समाधितानेन ज्ञातं देवस्य चेष्टितं ॥ ५१ ॥ सो नन्दिनामानं ध्यानेनागत्य स्वाद्रिनंदितः ॥ कोपावि
७८ ष्टेन तेन ऋषिणा रुद्रस्य पश्यपातितं ॥ ५२ ॥ ततस्तु सापराधश्चित्तस्तथा नारदं नमुक्तिकं ॥ दृष्ट्वा लिंगं ततः सर्वे आजग्मु
स्तन्महत्तप ॥ ५३ ॥ एकत्र मिलिता सर्वे कोपाद्ववृत्तिदेव च ॥ पतितस्य हृतं च लिंगस्य नीलि पिनाकिनः ॥ ५४ ॥ तेन
सन्नरुद्रस्य लिंगे पतितं भूतले ॥ त्वामाहाधूर्मा सर्वे नस्यतामो विपिन मानवा ॥ ५५ ॥ तेन सस्येन पतल्लिंगेन भु
विपिना किमतः ॥ जगत्समाहितापि नत्रसमावग्रह पापितः ॥ ५६ ॥ तस्य नोपमं पापनं लिंगं पतनं तु भूतले ॥ ए
वं सप्त भावेन निरुक्ते नादि तन्मनां ॥ ५७ ॥ हरस्यामापतल्लिंगं पपात धरणीतले ॥ देवस्य पतिते लिंगे जगत्र
तामिव संस्रये ॥ ५८ ॥ हाहाकारो महानासीत सर्वलोके भयानले ॥ लिंगस्य पतमानस्य तत्र शब्दो महानभूत्
॥ ५९ ॥ सोऽभयाभाससकलं त्रैलोक्यं सचराचरं ॥ रत्नाकरा नदीनां द्रोहागमिके पल्लवा पदं ॥ भवन् ॥ ६० ॥ पर्व
तिपर्वता ग्राविण्णामा पातिसागराः ॥ शिवस्य पतिते लिंगे देवाविमनसोऽभवन् ॥ ६१ ॥ समस्यसहिताः स
र्वे ब्रह्माणं शरणं ययुः ॥ कृतांजलिपुटाः सर्वे स्तुवंति स्म तथा भवं ॥ ६२ ॥ ततस्तुष्टो जगन्नाथश्चतुर्वदनपं
कजः ॥ उवाचालोन सुरान् सर्वान् मानिपादं गमिष्यथ ॥ ६३ ॥ ब्रह्मणा पालिभतो सोऽदेवदेवस्त्रिलोचनः ॥
तुष्टस्ततपसा युक्तैः पुनर्मोक्षं गमिष्यति ॥ ६४ ॥ वरतश्रुत्वा सुपर्वा यथागमम् रिंदम ॥ भावयित्वा जगं
नाथं तस्य वाक्यमनुत्तमं ॥ ६५ ॥ देवोऽपि पतिते लिंगे ब्रह्मणापि न भूतले ॥ ततोऽदारुवनं तिष्ठन्मसादपि
नु आगतः ॥ ६६ ॥ विश्वामित्रश्च सिद्धापा ... ॥ पंग्पः सुमंतुर्जैमिनिः कण्वः प्रः ...
... ॥ ६७ ॥ विभांडकमतंगापराश्यर्धैर्न्यान्वितं ॥ समस्यसहिताः सर्वे तत्र शुक्ल त्रिपुरांतकं ॥ ६८ ॥ महाज्ञानो हि
बलवान् क्रोधश्च ताननारके ॥ ससमायस्त्वं ते कार्यं सम्यतो प्राप्तं फलं ॥ ६९ ॥ नारीर्नतथा पतं यथातल्लिं ७८
गमुत्तमं ॥ चराचरस्य विश्वस्य रक्ष्यं लिंगमर्तिमान ॥ ७० ॥ सांप्रतं न महादाता पमाश्रित्य लपसि स्थितः ॥ शांतिसु

कोमहादेवस्तापमोक्षमवाप्स्यति ॥ ७१ ॥ नर्मदा पुण्य विप्राणां पद्भ्यां विनतत्सन्यदा ॥ अस्मन्स्नानं मा हरदास्य पालिं
गं पतितं ततः ॥ ७२ ॥ देवर्षिपितृगंधर्वं सरितां ... चावकं ॥ तथा पुण्यगिरिश्चात्र वनानीकविद्या स्तुतो ॥ ७३ ॥ ब्रह्मवि
ष्णुरुद्रादीनां प्रहारान् सर्वेन दियत ॥ तत्स्वं तत्र लिंगस्य दर्शनं निर्भविष्यति ॥ ७४ ॥ एवमुक्ते जगन्नाथः प्रणिप
त्य हितो भवान् ॥ मुहापरम पापयुक्तैः कृतांजलिर्भारत ॥ ७५ ॥ ब्रह्मणा निर्ज्ञातं तीर्थं तन्मम सार्वकामिकं ॥ तेषां वा
मुरकेन च मुच्यंति मलिनीतना ॥ ७६ ॥ नततः शत्रुनं तत्तीर्थं परं पुण्यं राजिना ॥ कालेन भूमितलं नर्मद विप्रवा
क्यनुन्नतप्लावनं ॥ ब्रह्मणा मन्युमुक्तापापत्र गत्वा विश्रुप्यति ॥ ७७ ॥ ततः स्नात्वं यत्र लिप्पप्रणीतं नतत्रानं प
त्तविप्रवदे ॥ ततः सोऽयंपन्नविप्रप्रसादान्नतदुःखं यं न विप्रप्रकोपात ॥ ७८ ॥ पृथिव्यां यानि तीर्थानि गं
गाद्या सरितस्तथा ॥ ७९ ॥ कस्य विप्रवाक्यस्य कलां नार्हंति षोडशीं ॥ ८० ॥ अध्वानिनं यत्प्रदानं ज्ञानो महर्
षिभिः ॥ जगाम सह सारवानसंदारत्मुत्तमं ॥ ८१ ॥ परम चेत मास्थाय गुहायां संजितेंद्रियः ॥ मानं च चार पटलत्रपति
भगवान् तप स्नान परायणः ॥ ८२ ॥ तेजोयापरयायुक्तो गुहायां समुपाश्रयः ॥ समासनियमेता तल्लिंगं स षितः ॥ ८
मध्यमीकर ॥ ८३ ॥ वर्धमानः सुरैर्देवैः वर्ना सममा गमब्रभुः ॥ नर्मदाभक्तिनु स्नानं आत्मानं स्थापितं यतः ॥
८४ ॥ ख्याति रमेरह नानतनामा नर्मदेश्वरः ॥ गुहायां वसनाद्वो गुहावासी निगद्यते ॥ ८५ ॥ यपरा चरति
श्रद्धया ततद्वतपरायण ॥ मयत्प्रमाणं कुरुते लोके तदनुवर्तते ॥ ८६ ॥ तत्रतीर्थे नरः स्नात्वा विधिना जिते
द्रियः ॥ यः पूजयेन्महेशानं सोऽश्वमेधफलं लभेत् ॥ ८७ ॥ पितृणां ददते यस्तु तिलमिश्रं तिलोदकं ॥ त्रिः
सप्त वै तान स्वर्गं गच्छंति पितामहा ॥ ८८ ॥ यस्तु मौलं पतेत्विप्रान् तस्मिन् तीर्थे न राधिपः ॥ सहस्रविप्रभो
जस्य फलं विपुलं तस्य ॥ ८९ ॥ सुवर्णं रत्नं वस्त्रं तिलभक्षिः कुंभोदकं ॥ प्रदत्तं तत्र विप्रे दृश्यः सर्वमक्ष
यं भवेत् ॥ ९० ॥ अष्टम्यां च चतुर्दश्यां निराहारो वसेन्तु यः ॥ नर्मदेश्वरमासाद्य लभते जन्मतः फलं ॥ ९१

रवानदपदटोन ६

155/2008

रे॰खं॰ अग्निप्रवेशं यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ तस्य पापभयं नास्ति सप्तजन्मानि भारत ॥ ८१ ॥ अनाशकं यतं ग
७७ च्छेत्तत्र तीर्थे विधानतः ॥ अनिवर्तागतिस्तस्य रुद्रलोकात्कदाचन ॥ ८२ ॥ एतत्ते सर्वमाख्यातं पुराणे यन्मया श्रु
तं ॥ नर्मदेश्वरमाहात्म्यं सर्वपापप्रणाशनं ॥ ८३ ॥ कीर्तयिष्यंति ये तत्र नर्मदेश्वरसंभवं ॥ श्रोष्यंति वा महाराज ते
षां पापं प्रयास्यति ॥ ८४ ॥ इति श्रीरेवामाहात्म्ये नर्मदेश्वरोत्पत्तिः ॥ ॥ मार्कंडेय उ॰ ॥ ततो गच्छेत राजेंद्र कपि
लातीर्थमुत्तमं ॥ स्नानमात्रो नरो यत्र मुच्यते सर्वकिल्बिषैः ॥ १ ॥ युधिष्ठिर उ॰ ॥ आश्चर्यं भूतले लोके स्मिन्क
थितं द्विजसत्तम ॥ नर्मदेश्वरमाहात्म्यं सर्वपापहरं परं ॥ २ ॥ इदानीं कपिलातीर्थमाहात्म्यं कथ्यतां प्रभो ॥ कु
तो वा कथमुत्पन्नं सर्वं विस्तरतो वद ॥ ३ ॥ मार्कंडेय उ॰ ॥ शृणुष्वैक महाराज कपिलातीर्थमुत्तमं ॥ श्रुतमात्रे
ण येनात्र सर्वं पापं विलीयते ॥ ४ ॥ पुरा कृतयुगस्यादौ ब्रह्मा लोकपितामहः ॥ उत्पादयित्वा सकलं भूतग्रा
मं चतुर्विधं ॥ ५ ॥ ततोग्निहोत्रशालायां यावत्तिष्ठति भारत ॥ दृश्यमाना कपिला तावत्कुंडाद्भूतिःसृता ॥
६ ॥ अग्निज्वालोज्वलैः शृंगैः सुनेत्रा सुपयस्विनी ॥ सर्वलक्षणसंपूर्णा घंटाकलितनिःस्वना ॥ ७ ॥ दृष्ट्वा
तु तां महाभागां कपिलां कुंडमध्यतः ॥ ब्रह्मा लोकगुरुस्तात प्रणम्येनामुवाच ह ॥ ८ ॥ नमस्ते कपिले पु
ण्ये सर्वलोकैकधेनुत्तमे ॥ मंगल्ये मंगले देवी देवानां स्नापनाशिनी ॥ ९ ॥ त्वं लक्ष्मीस्त्वं धृतिर्मेधा स्मृतिस्त्वं
शिवरानने ॥ उमा त्वं भारती देवी ब्रह्माणी त्वं न संशयः ॥ १० ॥ कौमारी त्वं महाभागे शक्तिः श्रद्धा तथैव च
॥ कालरात्रिश्च भूतानां माता त्वं परमेश्वरी ॥ ११ ॥ नास्ति किंचित्त्वया हीनं त्रैलोक्यं सचराचरं ॥ त्वमेव स
र्वभूतानां बुद्धिरूपा प्रतिष्ठिता ॥ १२ ॥ एवं स्तुता हि सा तेन कपिला परमेष्ठिना ॥ तमुवाच महाभागा प्रहृ ७७
ष्टा पद्मसंभवं ॥ १३ ॥ प्रसन्नात्र वचाक्येन स्तुत्यर्थेन जगद्गुरो ॥ किं करोमि प्रीयते घ ब्रूहि सर्वं पितामह ॥
१४ ॥ ब्रह्मोवाच ॥ जगद्धिताय जनिता मया त्वं परमेश्वरी ॥ नास्ति किंचित्त्वया हीनं त्रैलोक्यं सचराचरं ॥

157/2008

॥ १५ ॥ स्वर्गान्मर्त्यं ततो गच्छ लोकानां हितकाम्यया ॥ सर्वदेवमयी त्वं हि सर्वपापप्रणाशिनी ॥ १६ ॥ प्रेतां दास्यंति ये दे
वि तेषां वासस्त्रिविष्टपे ॥ एवमुक्ता तु सा देवी कपिला ब्रह्मणा ततः ॥ १७ ॥ वंद्यमाना सुरैः सर्वैराजगाम धरातले ॥
युधिष्ठिर उ॰ ॥ कथं सा दीयते तात ब्राह्मणे वेदपारगे ॥ १८ ॥ तस्याः का देवतास्तात अंगप्रत्यंगसंस्थिताः ॥ कु
त्र वा संस्थिता गत्वा कपिला विश्ववाहिता ॥ १९ ॥ किं कृतं च तया तीर्थं एतत्कथय मे प्रभो ॥ मार्कंडेय उ॰ ॥ सा तदा
ब्रह्मणा प्रोक्ता मातालोकस्य भारत ॥ २० ॥ ब्रह्मलोकाच्च्युता पुण्या नर्मदा लोकपाविनी ॥ तपः कृत्वा सुविपुलं
नर्मदातटमाश्रिता ॥ २१ ॥ चचार पृथिवीं सर्वां सशैलवनकाननां ॥ नर्मदा प्रभृति तत्तीर्थं कपिलातीर्थमुच्यते ॥ २२
सर्वपापहरं ख्यातं ऋषिसंघनिषेवितं ॥ तत्र तीर्थवरे स्नात्वा कपिलां यः प्रयच्छति ॥ २३ ॥ प्रदत्ता पृथिवी तेन स
शैलवनकाननां ॥ तां च पश्यंति ये भक्त्या दीयमानां नराधिप ॥ २४ ॥ तेषां च पैकृतं पापं सहसा याति संक्षयं ॥ भू
र्भुवः स्वर्महश्चैव जनः सत्यं तपस्तथा ॥ २५ ॥ एते तस्य समाश्रित्य स्थिता लोका नृपोत्तम ॥ मुखे यस्यग्निः स्थितो
देव्याः दंते पुनर्भुजंगमाः ॥ २६ ॥ धातारौ ओष्ठयोर्यस्या जिह्वायां च सरस्वती ॥ सहस्र [illegible] किरणाश्चा चंद्रा
दित्या सुलोचने ॥ २७ ॥ नासिकामध्यगा देवा मारुता नृपपुंगव ॥ ललाटे च महादेवो ह्यश्विनौ कर्णसंस्थितौ ॥
२८ ॥ नरनारायणौ शृंगे शृंगमध्ये पितामहः ॥ कंबले तर्गता स्तात वरुणो लोकनायकः ॥ २९ ॥ यमश्च भगवान्
देव उदरे संप्रतिष्ठितः ॥ नाभिमध्ये स्थितः स्कंदो वेदांगधा सुभारत ॥ ३० ॥ गंगाद्याः सरितः पुण्यास्तत्र देवो व्य
वस्थितः ॥ लांगले माश्रितो धर्मः ककुदे मेरुमंदरे ॥ ३१ ॥ पृथिव्यां पर्वता ये च स्थितास्ते सर्वसंधिषु ॥ कु
क्षौ समुद्राश्चत्वारस्तनेषु च व्यवस्थिताः ॥ ३२ ॥ श्रोणीतटस्थाः पितरः पश्चवेता थ संचयाः ॥ यन्मंगलं पवि
त्रं च पुण्यं तद्गोमये स्थितं ॥ ३३ ॥ स्थावरं जंगमं चैव तद्गात्राभ्यंतरे स्थितं ॥ खुरेषु पन्नगाः सर्वे पुच्छाग्रे सूर्य
रश्मयः ॥ ३४ ॥ एवंभूता हि कपिला सर्वदेवमयी नृप ॥ येषां मंदिरसंस्था सा तिष्ठत्या मानवा नृप ॥ ३५ ॥

रे.खं. प्रातरुत्थाय यस्तस्याः कुरुते तु प्रदक्षिणां ॥ प्रदक्षि णीकृता तेन पृथिवी दैवतैः सह ॥ ३६ ॥ कपिलायां च यच्छ्रि
७८ न यस्त्वा पूजयति शंकरं ॥ निरंजनं भास्करं देवं स यज्ञफलमाप्नुयात् ॥ ३७ ॥ ब्राह्मणान्भोजयेत्तत्र भोज्यं पायसमप
॥ सहस्रं विप्रभोज्यस्य फलं प्राप्नोति मानवः ॥ ३८ ॥ उपवासपरो यस्तु तस्मिंस्तीर्थे नराधिप ॥ स्नात्वा विधानतो भ
क्त्या तर्पयेत्पितृदेवताः ॥ ३९ ॥ तस्य ते द्वादशाब्दानि दशपूर्वे दशापरे ॥ तत्र प्रमोदमायांति स्वर्गे पर्वमनोर
थाः ॥ ४० ॥ एष ते संभवस्तात कपिलायाः प्रकीर्तितः ॥ तीर्थस्य च फलं पुण्यं सर्वपापविनाशनं ॥ ४१ ॥ धर्म्यं य
शस्यमायुष्यं सर्वविघ्नविनाशनं ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ ४२ ॥ इति श्रीनर्मदामाहात्म्ये
कपिलातीर्थं ॥ ॥ मार्कंडेय उ० ॥ ततो गच्छेत राजेंद्र करंजेंद्र करंजेश्वरमुत्तमं ॥ यत्र सिद्धो महावीर्यः करंजो दा
नवोत्तमः ॥ १ ॥ युधिष्ठिर उ० ॥ करंज इति विख्यातः कोत्र सिद्धो द्विजोत्तम ॥ कस्य पुत्रः स कस्माच्च तपश्च
क्रे महामतिः ॥ २ ॥ मार्कंडेय उ० ॥ पुरा कृतयुगे राजन्मानसो ब्रह्मणः सुतः ॥ वेदवेदांगतत्वज्ञो मरीचिर्ना
म विश्रुतः ॥ ३ ॥ तस्यापि तपसो राशेः कालेन महतानघ ॥ पुत्रोथ मानसो जातः साक्षाद्ब्रह्मेवापरः ॥ ४
समा तपो दयादानं सत्यं शौचमथार्जवं ॥ मरीचस्य गुणा ह्येते संति भारत सत्तम ॥ ५ ॥ एवं गुणगणा
कीर्णं तं ज्ञात्वा कश्यपं द्विजं ॥ ततः प्रजापतिर्दक्षो भार्यार्थं स्वसुता ददौ ॥ ६ ॥ अदितिर्दितिर्दनुश्चैवं मुख्याः
श्रेष्ठास्त्रयोदश ॥ तासां पुत्राश्च संजाताः पौत्राश्च भरतर्षभ ॥ ७ ॥ अदितिर्जनयामास पुत्रानिंद्रपुरोग
मान् ॥ दितिश्च जाता दैतेया दानवाश्च दनोस्तथा ॥ ८ ॥ नागान्प्रेतपिशाचांश्च पतत्रीन्यक्षराक्षसान् ॥ सिं
हव्याघ्रवराहांश्च तथान्यांश्च महाबलान् ॥ ९ ॥ प्रसूतास्तस्य भार्याश्चान्याः कश्यपस्य महात्मनः ॥ येस्तु लो
कत्रयं व्याप्तं स्थावरं जंगमं च यत् ॥ १० ॥ तथान्यश्च महासत्त्वो दनोः पुत्रो व्यजायत ॥ सर्वलक्षणसंपन्नः ७८
करंजो नाम दानवः ॥ ११ ॥ स बाल एव सहसा चचार विपुलं तपः ॥ नर्मदातटमाश्रित्य नियमस्थो जितेंद्रि

159/2008

यः ॥ १२ ॥ दिव्यं वर्षसहस्रं तु व्रतैश्चांद्रायणादिभिः ॥ शोषयामास चात्मानं जपहोमपरायणः ॥ १३ ॥ तत
स्तुष्टो महादेव उमया सह शंकरः ॥ वरदानोद्यतः साक्षात्त्रिपुरांतकरः प्रभुः ॥ १४ ॥ श्रीशंकर उ० ॥ भोः करं
ज महासत्व परितुष्टोस्मि तेनघ ॥ वरं वरय भद्रं ते यद्यपि स्यात्सुदुर्लभं ॥ १५ ॥ करंज उवाच ॥ यदि तुष्टोसि
देवेश यदि देयो वरो मम ॥ त्वत्पादपद्मभक्तिर्मे सदैवास्तु सुरेश्वर ॥ १६ ॥ नान्यं वरमहं याचे -- नाभक्तिनु
गांकरीं ॥ तथेत्युक्त्वा महादेव उमया सहितस्तदा ॥ १७ ॥ वृषारूढो गणैः सार्धं तत्रैवांतरधीयत ॥ गते चा
दर्शनं देवे सोपि दैत्यो मुदान्वितः ॥ १८ ॥ करंजेश्वरनामानं शिवं स्थाप्य ततो गतः ॥ तदाप्रभृति तत्तीर्थं
प्रसिद्धं सार्वकामिकं ॥ १९ ॥ तत्र स्नातो नरो राजन्मुच्यते सर्वकिल्बिषैः ॥ तत्र तीर्थे तु यः स्नात्वा तर्प
येत्पितृदेवताः ॥ २० ॥ सोग्निष्टोमस्य यज्ञस्य फलं प्राप्नोत्यसंशयं ॥ अनाशकं तु यः कुर्यात्तत्र तीर्थे यु
धिष्ठिर ॥ २१ ॥ अनिवर्तिगतिस्तस्य रुद्रलोकात्कदाचन ॥ ततस्तस्माच्च्युतः कालाज्जायते राजसत्तमः ॥ २२
इति श्रीरेवा० करंजेश्वरतीर्थं ॥ ॥ मार्कंडेय उ० ॥ ततो गच्छेत राजेंद्र कुंडेश्वरमनुत्तमं ॥ यत्र सिद्धो महादेवः
कुंडो नाम नृपोत्तम ॥ १ ॥ तपः कृत्वा सुविपुलं सुरासुरभयंकरं ॥ ततः स्वर्गं जगामाशु परिपूर्णमनोरथः ॥ २ ॥ यु
धिष्ठिर उ० ॥ कस्मिन्युगे समुत्पन्नः कस्य पुत्रो महामुने ॥ तेन तप्तस्त्वा सुविपुलं तोषितो येन शंकरः ॥ ३ ॥ एतद्विस्तरतः स
र्वं कथयस्व ममानघ ॥ शृण्वतो न हि मे तृप्तिस्त्वद्वाक्यामृतं मुने ॥ ४ ॥ मार्कंडेय उवाच ॥ त्रेतायुगे ब्रह्मसमः पौल
स्त्यो नाम विश्रवाः ॥ भरद्वाजसुतां पत्नीमुपयेमे महातपाः ॥ ५ ॥ पुत्रं पुत्रगुणैर्युक्तं तस्यां तस्यां सुतो पिता ॥ धन
दं जनयामास सर्वलक्षणसंयुतं ॥ जातमात्रं सुतं ज्ञात्वा ब्रह्मलोकपितामहः ॥ चकार नाम सुप्रीतो मुनिवृंदस
मन्वितः ॥ ७ ॥ यस्माद्विश्रवसो जातो मम पौत्रसुतो यतः ॥ तस्माद्वैश्रवणो नाम लोके ख्यातो भविष्यति ॥ ८ ॥ त
थात्वं सर्वदेवानां धनगोप्ता भविष्यति ॥ चतुर्थो लोकपालानां मध्ये यश्चाव्ययो भुवि ॥ ९ ॥ तस्य भद्रेश्वरी नाम

रे॰ खं॰ भार्या रूपवती शुभा॥ तस्यां यक्षाधिपश्चैव सलस्य कुंडो भवत्सुतः॥१०॥ स च रूपपरं प्राप्य मातापित्रोरनुज्ञया॥
७९ तपश्चचार विपुलं नर्मदातटमाश्रितः॥११॥ ग्रीष्मे पंचतपा भूत्वा वर्षासु स्थंडिलाश्रयः॥ हेमंते जलमध्यस्थो वायु
भक्षः शतं समाः॥१२॥ एवं वर्षशतेपूर्णे एकांगुष्ठेन संस्थितः॥ अस्थिचर्मावशेषो भूत् ऊर्ध्वबाहुः परंतप॥१३॥ त
तस्तस्य तपो दृष्ट्वा तुतोष वृषवाहनः॥ महादेव उ॰॥ वरं वृणीष्व यक्षेंद्र यत्ते मनसि वांछितं॥१४॥ तद्ददामि न संदे
हस्तपसानेन तोषितः॥ कुंड उ॰॥ यक्षाधिपत्यं देवेश ददस्व मम शंकर॥ अवध्यः सर्वभूतानां भवामि त्वत्प्रसाद
तः॥ तथेत्युक्त्वा महादेवः सर्वलोकनमस्कृतः॥१६॥ जगाम कैलासं गिरिं धरणीतलं॥ गते चादर्शनं दे
वे कुंडः सोपि मुदान्वितः॥१७॥ स्थापयामास देवेशं कुंडेश्वरमिति श्रुतं॥ संपूज्य च महादेवं पुष्पधूपानुलेपनैः॥
१८॥ कुसुमैर्विविधैश्चैव तथा वै लिंगपूरणैः॥ तर्पयित्वा द्विजान् सम्यगन्नपानादिभिर्धनैः॥१९॥ प्राणपित्वा महा
देवं ततः स्वभवनं ययौ॥ तदाप्रभृति तत्तीर्थं त्रिषु लोकेषु विश्रुतं॥२०॥ परमं पुण्यजननं कुंडेश्वरमनुत्तमं॥ तत्र
तीर्थे तु यः कश्चित् उपवासपरायणः॥२१॥ अर्चयेद्देवमीशानं सर्वपापैः विमुच्यते॥ सुवर्णं रजतं वस्त्रं मणिमौ
क्तिकमासनं॥२२॥ सर्वं तदक्षयं तत्र तत्तीर्थस्य प्रभावतः॥ तत्र तीर्थे च गोदानं यः कुर्याद्द्विजसत्तम॥२३॥ पाव
ति तस्य रोमाणि शरीरे राजसत्तम॥ तावद्वर्षसहस्राणि रुद्रलोके महीयते॥२४॥ अन्नोदकं भूमिरथाश्वदानं ध
नं च दद्याद्द्विजपुंगवाय॥ दाता सुखी नंदति देवलोके गंधर्वसिद्धाप्सरसोभिमृष्टः॥२५॥ एवं हि धर्मात्मज सुप्रभा
वस्तीर्थस्य सर्वः कथितो मया ते॥ श्रुत्वा तु यं पुण्यमनोरथस्य पापानि तस्य प्रलयं प्रयांति॥२६॥ इति श्री रेवा
खंडे कुंडेश्वरतीर्थं॥ ॥मार्कंडेय उ॰॥ ततो गच्छेत राजेंद्र पिप्पलेश्वरमुत्तमं॥ यत्र सिद्धो महायोगी पिप्पला ७९
दो महातपाः॥१॥ युधिष्ठिर उ॰॥ कस्य पुत्रो महाभागः किमर्थं तप्तवांस्तपः॥ एतद्विस्तरतः सर्वं कथयस्व म
मानघ॥२॥ मार्कंडेय उ॰॥ मथिलास्थो महाभागो वेदवेदांगपारगः॥ याज्ञवल्क्यः पुरा तात चचार विपुलं त

पः॥३॥ तापसी तस्य भगिनी याज्ञवल्क्यस्य धीमतः॥ सा प्राप्य समयेवर्षे वैधव्यं दैवयोगतः॥४॥ पूर्वकर्मविपाकेन हीना
भर्तृमातृतः॥ नान्यत्र सति पक्षेपि कोपि स्याच्चाक्लिनि स्थिता॥५॥ भमौ भ्रमंती भ्रातुः सा समीपमगमत्तनौ॥ ती
र्थसेवा परा सा तु परलोकसुखैषिणी॥६॥ चचार सापि तत्र स्था शुश्रूषंती महत्तपः॥ कस्मिंश्चित् समये सापि स्ना
ता हन्नी रजस्वला॥७॥ अंतर्वासः कृतवती दृष्ट्वा कर्परमाश्रये॥ तन्मुनेर्यो ज्ञवल्क्यस्य रेतसाभिप्लुतं निषि॥८॥ पुन
भगिनी स्त्विषयत्तत्र कौपीनं समहामुनिः॥ ततः सा ब्राह्मणी प्राह किमत्वेषसि मानद॥१०॥ केन कार्येण तच्चि भो भ्रातर्मंत्र
दितत्वतः॥ याज्ञवल्क्य उ॰॥ जपवित्रो मया भद्रे स्वप्ने प्राट् क्षेत्रे वै निशि॥ संरतस्तत्र मे वस्त्रं निक्षिप्तं तन्न दृश्यते॥ त
च्छ्रुत्वा ब्राह्मणी वाक्यं भीत भीता वदं नृप॥११॥ तद्वस्त्रं हि मया विप स्नाना तत्परीधानकेकृतं॥ तस्यास्तद्वचनं श्रुत्वा
हाहा सत्का महातपाः॥१२॥ पपात सहसा भूमौ भग्नशाखिनद्रवद्रुमः॥ किमेतदुच्यते सा प्रोक्ता आकाशमिव निर्म
ला॥१३॥ कथिमाश्वासयामास पतितं नृपसत्तम॥ अच्छिन्न कारणं तात गुह्याद्गुह्यतरं यदि॥१४॥ प्रतीकारो
स्य यन्ते वाव मन्नृपक्रियतां धुना॥ ततः समुचिरं ध्यात्वा लज्जपावनतः स्थितः॥१५॥ प्रोवाच सा व्यसमनाः श्रृणु
शेतिनृपोत्तम॥ तवात्र दोषो नास्तीह मम चैव शुभव्रते॥१६॥ अज्ञानाद्दैवयोगाच्च जातो गर्भा त्वत्तवोदरे॥ तस्य
तत्वेन रक्षा च त्वया कार्या सदैव हि॥१७॥ विनाशो नैव कर्तव्यो यावत्कालस्य पर्ययः॥ तथा कार्या इति ना सापि द
यमाने न चेतसा॥१८॥ पालयामास तं गर्भं पावत्सूतौ व्यतायत॥ जातमात्रं तु तं गर्भं कथयित्वा द्विजोत्तमः॥१९॥
छायामश्वत्थजां प्राप्य सोत्सृज्य महीतले॥ यानि सत्वानि लोकेस्मिन् स्थावराणि चराणि च॥२०॥ तानि सर्वाणि
रक्षंतु सतं वैबालकं मया॥ एवमुक्त्वा गता सा तु ब्राह्मणी नृपसत्तम॥२१॥ स बालोपि स्थितस्तत्र मुहूर्तमिव
निश्चलः॥ प्रसारयन् पाणिपादौ निकुंचयन् यनेशुभे॥२२॥ आस्यं च विकृतं कृत्वा रुरोद विकृतैः स्वरैः॥ तेन
नादेन वित्रस्ता स्थावरा जंगमाश्च ये॥२३॥ आकंपिता मही तात सनीलवनकानना॥ ततो ज्ञात्वा महद्भूतं

सुभाविष्टं द्विजर्षभं ॥२४॥ न जहाति निगच्छायां दृष्टो पानार्थिनं पयः ॥ आप्यायितस्ततस्तेन स्तनेनामृतेनैव भारत ॥२५॥
चिंतयामास विश्रब्धः कोनु मे ग्रहगोचरः ॥ ततः क्रूरसमाचारः क्रूरदृष्ट्यानिरीक्षितः ॥२६॥ पपात सहसा भूमौ
शनैश्चारी शनैश्चरः ॥ उवाच च भयत्रस्तः कृतांजलिपुटस्तदा ॥२७॥ किं मया पकृतं विप्र पिप्पलाद महामुने ॥
निरीक्ष्य गगनाद्येन पातितो धरणीतले ॥२८॥ शौरिणा ह्येवमुक्तस्तु पिप्पलादो महाबलः ॥ कोपादवदब्रवीद्वाक्यं
तच्छृणुष्व युधिष्ठिर ॥२९॥ पितृमातृविहीनस्य मम बालस्य दुर्मते ॥ पीडा प्रकुरुषे कस्मात्तन्ममाच स्खलत्व
तः ॥३०॥ शनैश्चर उ० ॥ सर्वदा क्रूरभावोहं क्रूरदृष्टिर्महामते ॥ मुंच मां नहि कृतोस्मि यद्ब्रवीषि महामुने ॥३१॥
पिप्पलाद उ० ॥ अद्य प्रभृति बालानां न कदाचिच्छनैश्चर ॥ प्रकर्तव्या त्वया पीडा एष ते समयः परः ॥३२॥ एवम
स्त्विति चोक्तोथ स गाम पथागतं ॥ देवमार्गं शनैश्चारी प्रणम्य ऋषिसत्तमं ॥ गते शनैश्चरे तत्र सोपि बालो
महाग्रहे ॥ विचिंतयन्वै पितरं कोपेन कलुषीकृतः ॥३४॥ आग्नेयीं धारणां कृत्वा जनयामास पावकं ॥ कृत्या
मुत्पादयामास तत्राग्निर्हृद्ररूपिणीं ॥३५॥ तावत्प्रतस्थि सा कृत्या ज्वालामालाविभूषिता ॥ कृतांजलिः समा
काराकिं करोमीति चाब्रवीत् ॥३६॥ शोषयामि समुद्रांश्च चूर्णयामि हि पर्वतान् ॥ त्रैलोक्यं क्षोभयाम्यद्य पातया
मि नभस्तलं ॥३७॥ तस्य मूर्ध्नि पतिष्यामि यो त्वामपराध्यति ॥ शीघ्रमादिश यत्तां विप्र मा मे कालात्ययो भवेत् ॥३
८॥ तस्यास्तद्वचनं श्रुत्वा पिप्पलादो महातपाः ॥ कोपरक्तांतनयनः इदं वचनमब्रवीत् ॥३९॥ महता क्रोधवेगे
न मया त्वं चिंतिता शुभे ॥ पितुर्मे याज्ञवल्क्यस्य त्वं घातं पतमर्दनि ॥४०॥ एवमुक्ता ततस्तेन सोत्पपात तदा नभ
स्तलं ॥ कोपेन निर्गता कृत्या यत्रास्ते स महामुनिः ॥४१॥ मिथिलाख्यो महाप्राज्ञ उग्रेन तपसि संस्थितः ॥ याव
सश्यति दिग्भागं ज्वलनार्कसमप्रभं ॥४२॥ याज्ञवल्क्यो महातेजा महद्भुतमुपस्थितं ॥ तं दृष्ट्वा सहसा यातं ८०
भीतिस्तत्र महामुनिः ॥४३॥ भतेनानुगतः शीघ्रं जनकं नृपतिं ययौ ॥ शरणार्थिनमायांतं विद्धि मां नृपसत्त

163/2008

॥४४॥ महद्भुतं भयाद्रक्ष यदि शक्नोषि पार्थिव ॥ जनक उ० ब्रह्मतेजो द्रुतं भूतमनिवार्यं दुरासदं ॥४५॥ तं निषेधुं न
शक्यामि बहुना किं नृपोऽब्रवीत् ॥ ततश्चान्यं नृपश्रेष्ठं शरणार्थी महातपाः ॥४६॥ जगाम तेन निर्मुक्तः इंद्रस्य भव
नं ययौ ॥ देवराजानमभ्येत्य महाभूतभयान्नृप ॥४७॥ कंपमानो ब्रवीद्वाक्यं रक्ष रक्षेति पुनः पुनः ॥ तस्य तद्वचनं श्रु
त्वा देवराजोब्रवीदिदं ॥४८॥ न शक्तोपि परित्रातुं ब्रह्मकोपान्महामुने ॥ ततः स तेन मुक्तस्तु जगाम ब्रह्मणोंति
कं ॥४९॥ ब्रह्मणा न परित्रातो भयभीतो मुनिस्ततः ॥ जगाम शरणं विष्णुं सत्कृतेनापि सत्तम ॥५०॥ ततः स पर
मोद्विग्नो निराशो जीविते नृप ॥ अनुगम्यमानो भूतेन स गतः शंकरालयं ॥५१॥ तेन योगबलोपेतो महादेवे
न पांडव ॥ न स्वमांसांतरं गुप्तो यथा देवी न विंदति ॥५२॥ तत्रागतं तदा भूतं ज्वलनार्कसमप्रभं ॥ मुंच मुंचेति
पुरुषं महादेवमुवाच ह ॥५३॥ एवमुक्तो महादेवस्तेन भूतेन भारत ॥ योगींद्रं दर्शयामास स्वमांसांतररक्षि
तं ॥५४॥ संस्थाप्य भूतं भूतज्ञः परमापद्गतं मुनिं ॥ उवाच शंभुर्विप्रर्षे निर्गच्छस्व महामुने ॥५५॥ ततस्तं सुसम
द्धृतं तु कृत्वेदं भूतमब्रवीत् ॥ किमस्य त्वं महाभूत करिष्यसि वद स्वयं ॥५६॥ कृत्या उवाच ॥ क्रोधाविष्टेन देवेश
पिप्पलादेन प्रेषिता ॥ अस्य देहं दहिष्यामि क्षणार्धेन सुरेश्वर ॥५७॥ एतच्छ्रुत्वा महामहादेवो भूतस्य तद्वचनं
तदा ॥ ततस्तद्वचनात्कार्यं विचार्याथ महेश्वर ॥५८॥ आगत्य समुनिर्युक्तो पिप्पलादे प्रति विभुः ॥ पिप्पलादं
समस्यैवमुवाच वचनं हरः ॥५९॥ मुने त्वद्वचनं सत्यं नान्यथा जायते मया ॥ प्रसादयामि त्वां ब्रह्मन्नरक्षेनं पि
तरं तव ॥ यथातथ्यं करोमि कृत्वां मुंचास्य दुःकृतं प्रति ॥६०॥ प्रार्थयामि सतां कोपः शारदभ्रसमः स्मृतः ॥ इत्यु
क्ते पिप्पलादेन दृष्ट्वा शिवमुपागतं ॥६१॥ प्रणम्य कृतवचित्तेन तथेत्युक्तं विभुं प्रति ॥ रक्षार्थं याज्ञवल्क्यस्य वे
पयामास चेश्वरः ॥६२॥ योगीश्वरेति विप्रस्य कृत्वा नाम युधिष्ठिर ॥ पिप्पलादमुवाचेदं कृत्या दहतु दुःकृ
तं ॥६३॥ तदाज्ञया तदा कृत्या मंत्रास्तरयुतं मुनिं ॥ ज्वालयामास तत्पादं दृढाहृत्य यदृच्छया ॥६४॥ ततस्तु भ

रे॰ खं
८२

गंधर्वाश्च रुद्रः स्वपापहरमापतत्॥ तावन्मात्रं तु माहात्म्यं पातकं नाशमाप्नुयात्॥१९॥ विमलं पिप्पलादेवं ग्रामत्रैवांतरेश्री
पतेः स्वयं तितनी भवति पिप्पलादोपि हूमेना॥२०॥ पितरः स्त्रीयोगा चनर्मदां तट माश्रितः॥ एकांबुधार्मिनं गहारो श्रिय
लाच्चर्वं व्रतेन प॥२१॥ तीर्थयात्रासदेवं नां पार्वती परमंपियं॥ ततस्तत्र पवमानस्य तीर्थं प्रसरथनीमतः॥२२॥ ईश्व
र उ॰॥ पारत्वराश्मिते निपतत्पत्सालेन सुव्रते॥ वरं वृणीष्व भद्रं ते मनसो यद मीप्सितं॥२३॥ पिप्पलाद उ॰॥ पादिमि
मयी वो सुरी यदि देवो वरोमम॥ पितरः ह्लीनं जत दोषं कस्यामे तेन मानसम्॥ नान्यं यस्य मद्विना न पापं हर सुरेश्वर
उक्ष संनिहितो देवतीर्थं भव सदाशिव॥२४॥ एवमुक्तस्तथेत्युक्त्वा पिप्पलादं महामुनिं॥ जगामादर्शनं देवो भ
तसंघान्तिषेवितः॥२५॥ पिप्पलादोपि गते देवे स्नात्वा रेवाजलाते तः॥ स्थाप्य शिवं महादेवं जगाम निर्जरपर्वतं॥ तत्र ती
र्थे नरो भक्त्या स्नात्वा मंत्रपूतं नृप॥ तर्पयेत्पितृदेवान् पूजयित्वा महेश्वरं॥२६॥ अश्वमेधस्य यज्ञस्य फलं प्रा
प्नोत्यनुत्तमं॥ मृतो रुद्रपुरं याति दिव्याभरणभूषितः॥२७॥ तत्र यो भोजयेद्विप्रान् स्वल्पेनापि भारत॥ तस्य ते द्वाद
शाब्दानि तृप्यंति सुरालयं॥२८॥ सन्यासेन तु यः कश्चित्तत्र तीर्थे तनुं त्यजेत्॥ अनिवर्तिका गतिस्तस्य रुद्र
लोकात् कथंचन॥२९॥ एतत्सर्वं मयाख्यातं यत्पृष्टोऽयं मयानघ॥ माहात्म्यं पिप्पलादस्य तीर्थस्यापि च संभवं॥
३०॥ एतत्पुण्यं पापहरं धन्यं दुःस्वप्ननाशनं॥ पठतां शृण्वतां वापि सर्वपापक्षयो भवेत्॥३१॥ इति श्री रेवा
खंडे पिप्पलादितीर्थमाहात्म्यं॥ ॥ मार्कंडेय उ॰॥ ततो गच्छेत राजेंद्र विमलेश्वरमुत्तमं॥ नर्मदा उत्तरे कूले
सर्वपापप्रणाशनं॥१॥ तत्र देवशिला रम्या स्वयं देवेन निर्मिता॥ तत्र स्नात्वा तु यो भक्त्या ब्राह्मणं भोजयेन्नृप
२॥ सहस्रविप्रभोज्यस्य फलं प्राप्नोति मानवः॥ सुवर्णं रजतं वापि मणिमौक्तिकमेव वा॥३॥ भूमिं वस्त्रं
च गोदानं सर्वमक्षयतां व्रजेत्॥ तत्र तीर्थे तु यः कश्चित्कुरुते प्राणसंक्षयं॥४॥ रुद्रलोके वसेत्तावद्याव
दाहूतसंप्लवं॥ अनावृष्टिहते लोके पुरा काले नराधिप॥५॥ गंगायमुनयोर्मध्ये ऋषिभिस्तप्तसास्थितैः॥

165
2008

अभक्ष्यभक्षणेश्चैव कृतं वै प्राणधारणं॥६॥ नित्यकर्म भवाद्धानिस्तेषां तद् दुःखमभवत्॥ एवं तत्र कियत्कालं स्थिता
स्तावत्समुपागताः॥७॥ श्रुत्वा तु नर्मदातीरं अमरेश्वरमपापदं॥ अत्रावसन् समागत्य ऋषयः शंसितव्रताः॥८॥ त्रिकाले
स्नाननिरताः कंदमूलाशना सह॥ कदापि च त्रिरात्रं वै सप्तरात्रं व्रते स्थिताः॥ कृच्छ्रातिकृच्छ्रपाराकचांद्रायणप
रायणाः॥ स्तुवंतः शिवमव्यग्राः सर्वे वेदविदो नृप॥१०॥ कालेन कियता तेषां शर्वः प्रत्यक्षतां गतः॥ साक्षाद्रूपमु
वाचेदं प्रसन्नः पार्वतीपतिः॥११॥ महादेव उ॰॥ ऋषयो वः प्रसन्नोऽस्मि व्रतं किं करवाणि वः॥ प्रार्थयध्वं वरं श्रेष्ठमपापप
विस्यात्सुदुर्लभं॥१२॥ ऋषय ऊचुः॥ अनावृष्टिहते काले मलिनत्वमुपागतं॥ आपद्गतानां विप्राणां वै मत्स्यं कुरु शं
कर॥१३॥ यथा विहाय कालुष्यं लोकान् गच्छति वांछितान्॥ ततस्तेषां तथा कृत्वा विभुर्वै मत्स्यदोऽभवत्॥१४॥ जगा
म कामाममाविश्य कैलासं नगसत्तमं॥ ततस्ते ऋषयः सर्वे विमलत्वमुपागताः॥१५॥ तत्र संस्थाप्य यामास्तु वि
मलेश्वरसंज्ञितं॥ शिवं शांतं जगन्नाथं प्रणतार्तिहरं हरिं॥१६॥ संस्नाप्य नर्मदातोयैर्बिल्वपत्रैरपूजयन्॥ कं
चित्कालं स्थितास्तत्र ततः सिद्धिमुपागताः॥१७॥ इति ते कथितं तात विमलेश्वरसंभवः॥ स्मरणात्कीर्तनाद
स्य विमलो जायते नरः॥१८॥ इति विमलेश्वरतीर्थं॥ ॥ मार्कंडेय उ॰॥ ततः पुष्करिणीं गच्छेत्सर्वपापप्रणाशिनीं॥
॥ तत्र स्नात्वा जपेद्देवं तेजोराशिं दिवाकरं॥१॥ ऋचमेकां जपेत्साम्नां साम वेदफलं लभेत्॥ यजुर्वेदस्य यजु
षा ऋग्वेदस्य तथा ऋचा॥२॥ अक्षरं वाक्षयं मंत्रं ध्यायमानो दिवाकरं॥ आदित्यहृदयं जप्त्वा मुच्यते सर्वकि
ल्बिषैः॥३॥ तत्र तीर्थे तु यः स्नात्वा विधिना पूजयेद्रविं॥ तस्य लक्षगुणं दानं जायते नात्र संशयः॥४॥ अना
शके जले वा पि कृत्वा पंचाग्निसाधनं॥ तस्मिन् तीर्थे मृतो यस्तु स याति परमां गतिं॥५॥ तिलोदकं तिलस्नायी
कामक्रोधविवर्जितः॥ ब्राह्मणान् ज्ञानसंपन्नान् स्वल्पेनापि तु भोजयेत्॥६॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वा
यत्र पालनं॥ कुर्वन्ति विहितं कर्म प्राप्नोति परमां गतिं॥७॥ संग्रामे मृत्युं तीर्थे तान क्षत्रियो निधनात् भवेत्॥ तद

भावान्महादेव सिवमानोल भेहिति॥ ८॥ व्याधिग्रहग्रहीतो वा वृद्धो वा विकलेंद्रियः॥ आत्मा वैनं दाह यित्वा ग्नौ विधि
ना सकृत्तिलं भेत्॥ ९॥ वैश्यो वापि हि महादेवं पूजयित्वाग्निमाविशेत्॥ जले वा शुद्धभावेन स क्रो प्राणान्विमोची भवेत्
१०॥ शूद्रो वा पि द्विजशुश्रूषां कुर्वन्नाचार संस्थितः॥ पूजयित्वाग्निं वल्लिंगे ततो मोक्षमवाप्नुयात्॥ ११॥ अथवा भक्तिसं
युक्तो गुरुद्विजरतः सदा॥ व्रतं कुर्यां यथार्हं तु विप्रवाक्येन भारत॥ १२॥ शांतो दांतो जितक्रोधो शान्त्रवांश्च विच
क्षणः॥ तेषां चैवापदेशेन कुर्वन्कारीष साधनं॥ १३॥ एवं वर्णान्यथा त्वेन मत्वाहंकार मोहिताः॥ पतंति नरके घो
रे यथांधो गिरिगह्वरे॥ १४॥ ये शास्त्रविधिमुत्सृज्य वर्तंते कामचारतः॥ कृमियोनिं प्रपद्यंते सर्वधर्म बहिष्कृतः
॥१५॥ अष्टाविंशतिकोट्यो वै नरकाणां युधिष्ठिर॥ प्रत्येकं तत्र पच्यंते मग्ना नरकसागरे॥ १६॥ दुर्लभं मानुषं
जन्म बहुजन्मार्जितं नृप॥ तल्लब्ध्वा मदमात्सर्ये यो दधाति स मोहितः॥ १७॥ यमितव्य सदात्मा वै नरेण ज्ञानच
क्षुषा॥ अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया॥ १८॥ यस्य नोन्मीलितं चक्षुर्ज्ञेया ज्ञात्वंध एव सः॥ एतत्ते क
थितं सर्वं यत्पृष्टं हि त्वयानघ॥ १९॥ वर्णानां विहितं यच्च पुराणेषु प्रकीर्तितं॥ युधिष्ठिर उ०॥ यदाह मुनिवर्यो वै
मत्सत्यं नान्यथा भवेत॥ २०॥ किंत्वत्र प्रष्टुमिच्छामि तन्मे ब्रूहि द्विजोत्तम॥ कस्मात् पुष्करिणी नाम कदा केन वा च
तारिता॥ २१॥ मार्कंडेय उ०॥ यदा शूलेन निर्भिन्ना पुरा वै शूलपाणिना॥ नर्मदा दक्षिणे कूले कर्तुं सेत्र परोक्षणं
॥ २२॥ तदा निर्घातसंत्रस्ता भानोरश्वाः किलांतरे॥ तथा चकितसर्वस्य हस्तात्सुष्कर मुत्तमं॥ २३॥ पपात नर्म
दातोये स्कत्तरेन्नपसत्तमे॥ तन्निस्यंद भवान्नाम्ना तेन पुष्करिणी स्मृता॥ २४॥ नर्मदा सरिता श्रेष्ठा रुद्रदेहाद्वि
निर्गता॥ तारयेत्सर्वभूतानि स्थावराणि चराणि च॥ २५॥ सर्वदेवाधिदेवेन ईश्वरेण महात्मना॥ लोकानां च हि
तार्थाय पुण्येयमवतारिता॥ २६॥ वाचिकं मानसं वापि कर्मजं नपयद्भवेत्॥ यस्मात् दर्शनाद्देव सर्वं पापं वि
लीयते॥ २७॥ प्रातरुत्थाय योनित्यं नर्मदा भक्तिसंयुतः॥ मंत्रमेनं जपेन्नित्यं सुस्नान फलमाप्नुयात्॥ २८॥ नमः पु ८२

167/2008

ण्यजले देवी नमः सागर गामिनी॥ नमस्ते पापनिर्मोचेन मो देवी वरांगने॥ २९॥ नमोस्तु ते ऋषिगण सिद्धसेवि
ते विविशेषत स्त्रिपुर हराद्विनिःसृते॥ नमोस्तु ते सुकृतधृतां सदोवरेन मोस्तु ते सकल पवित्र पाविनी॥ ३०॥ इ
ति श्रीरेवामाहात्म्ये वायुपुराणोक्ते विमलेश्वर पुष्करिणी संगमः॥ ॥ मार्कंडेय उ०॥ तीर्थानां परमं तीर्थं शृणु
ष्व नृपसत्तम॥ रेवायां दक्षिणे कूले निर्मितं शूलपाणिना॥ १॥ रक्षार्थं मानवेंद्राणां सर्वपापप्रणाशनं॥ तत्र ती
र्थं त्यक्ते न प्राप्यते सुमहत्फलं॥ २॥ युधिष्ठिर उ०॥ श्रुता मया महाधर्मास्तीर्थानि विविधानि च॥ व्रतानि चापि सर्वा
णि त्वत्प्रसादाद्द्विजोत्तम॥ ३॥ इदानीं श्रोतुमिच्छामि तीर्थमेतत्सुशोभनं॥ संसारच्छेदकरणं सद्यो मोक्ष फल
प्रदं॥ ४॥ तदाख्याहि महाभाग सद्यः प्रत्ययकारकं॥ प्रसादं परमं कृत्वा ममोपरि मुनीश्वर॥ ५॥ मार्कंडेय उ०
शृणुष्वावहितो भूत्वा तीर्थं पुण्यतमं महत्॥ श्रुते यस्य प्रभावे वि संक्षयं याति पातकं॥ ६॥ वाचिकं मानसं वापि
कर्मजं चाविशेषतः॥ कीर्तनात्तस्य तीर्थस्य सर्वं पापं क्षयं व्रजेत्॥ ७॥ पंचक्रोश प्रमाणं तु तीर्थमेतं नृपोत्तम॥
भुक्तिमुक्ति प्रदं प्रोक्तं प्राणिनां पापकर्मणां॥ ८॥ रेवायां दक्षिणे कूले पर्वतो भृगुसंज्ञितः॥ तस्यैव मूर्ध्नि तत्ती
र्थं प्रधानमवनीतले॥ ९॥ उत्पादितं पुरा तीर्थं स्वयमेवेह शूलिनां॥ शूलभेद मिति विख्यातं त्रिषु लोकेषु भ
पते॥ १०॥ तत्र स्थिता श्च याव स्यो महावस्राश्च तु र्दिशं॥ पतिता शूलपूताश्च रुद्रस्य भुवनं गता॥ ११॥ मृता स्त
त्रैव ये केचिज्जंतवो दक्षिणे विश्व॥ ते गता शांकरं लोकं तत्तीर्थस्य प्रभावतः॥ १२॥ पातालान्निःसृता गंगा भो
गवतीति संज्ञिता॥ निःक्रांता शूलभेदेन सर्वपापक्षयंकरी॥ १३॥ सा सा निर्वाण संज्ञिति वहते पुण्यलक्षणा॥
पतिता कुंडमध्ये तु यत्र भिन्नं त्रिशूलिना॥ १४॥ शंभुना च पुरा तात आनीता च सरस्वती॥ सा तत्र पतिता राजन्
मा चीना पविमोचनी॥ १५॥ तत्र तस्याः समीपे तु शिला निर्वाण संज्ञिता॥ तत्र तीर्थानि तत्तीर्थं न भूतं न भ गो
विष्यति॥ १६॥ केदारं च प्रयागं च कुरुक्षेत्रं तथा गया॥ शूलभेदस्य चान्यानि कलां नार्हंतु षोडशीं॥ १७॥ पंच

रे०खं स्थानानि पुण्यानि पृथग्भूतानि यानि तु ॥ प्रवक्ष्यामि समासेन तदेकैकं पृथक्पृथक् ॥१८॥ गयाश्राद्धेन यत्पु-
८२ ण्यं चक्रतीर्थे च तत्समं ॥ प्रभासे च यथा कूपे रुद्रकुंडे च तत्समं ॥१९॥ अन्नस्य च यथा पुण्यं तथा परमा लिकाशुभा
॥ यथा च पुष्करं पुण्यं मार्कंडेयं तथा नृप ॥२०॥ तिलोदकं तत्र तीर्थे पितॄणां दत्तमक्षयं ॥ यस्तत्र कुरुते स्नानं तो-
यं पिबति वा पुनः ॥२१॥ स मुंचति महापापात् उरगः कंचुकं यथा ॥ तत्र तीर्थे तु यद्दानं विप्रेभ्यो दीयते नृप ॥२२॥ त्र-
योदशाहिनान्येव तत्र योदत्तं गुणं भवेत ॥ तत्र तीर्थे निर्मलं दृष्ट्वा गणनाथं गजाननं ॥२३॥ सर्वविघ्नानि नश्यंति दृ-
ष्ट्वा सिंहपतिं शुभं ॥ संपूज्य परया भक्त्या शूलपाणिं महेश्वरं ॥२४॥ देवीमुमां च संपूज्य प्राप्नोति परमां गतिं ॥ गु-
हवासिनमाराध्य मार्कंडेयं मनूत्तमं ॥२५॥ मुच्यते पातकैः सर्वैर्ज्ञानाज्ञानसमुद्भवैः ॥ गुहामध्ये प्रविष्टस्तु त-
पेत्स तत्समाहितः ॥२६॥ स सर्ववेदपाठस्य फलं प्राप्नोत्यसंशयं ॥ त्रयोदशात्र तिष्ठंति आदित्या मारुतैः स-
ह ॥२७॥ सर्वदेवमयं तीर्थं कोटिलिंगसमन्वितं ॥ यथा नद्यो नदाः सर्वे सागरे यांति संक्षयं ॥२८॥ तथा पा-
पानि नश्यंति शूलभेदस्य दर्शनात् ॥ प्रत्यक्षो दृश्यते यावि प्रत्ययो नृपसत्तम ॥२९॥ पतितो जलमध्ये तु
तैलबिंदुर्न सर्पति ॥ यः स्मरेच्छूलभेदं तु त्रिकालं नित्यमेव च ॥ स पूतस्तु भवेत्सद्यः स बाह्याभ्यंतरं नृप ॥ न
कस्यचिन्मया ख्यातं पृष्टोहं त्रिदशैरपि ॥३१॥ गुह्याद्गुह्यतरं तीर्थं सदा गोप्यतरं कृतं ॥ सर्वपापहरं पुण्यं
सर्वदुःखप्रनाशनं ॥३२॥ सर्वतीर्थमयं तीर्थं शूलभेदं जनेश्वर ॥ श्रुते यस्य प्रभावेपि मुच्यते सर्वपातकैः ॥ न
३३॥ इदं तीर्थं मया पुत्र संक्षेपात्कथितं तव ॥३४॥ इति श्रीरेवाखंडे शूलभेदप्रशंसा ॥ ॥ मार्कंडेय उ०
एतदेव महाराज परिपृष्टो महेश्वरः ॥ राज्ञा उत्तानपादेन ऋषिदेवसमागमे ॥१॥ उत्तानपाद उ० ॥ शूलभे-
दमिति ख्यातं यत्तीर्थं सुरसत्तम ॥ इदं तीर्थं महापुण्यं सर्वदेवमयं परं ॥२॥ गुह्याद्गुह्यतरं स्थानं न दृष्टं ८३
न श्रुतं हर ॥ शूलभेदं कथं ख्यातं केनाप्युत्पादितं पुरा ॥४॥ महात्म्यमस्य तीर्थस्य कथयस्व प्रसादतः ॥

169
2008

श्रीमहादेव उ० ॥ आसीत्सुरा महावीर्यो दानवो बलदर्पितः ॥४॥ न लोके तादृशः कश्चिद्विक्रमेण बलेन च ॥ स-
नुर्ब्रह्मसुतस्यायमंधको नाम दुर्मदः ॥५॥ स सदानंदितमना सुरासुरयेभंकरः ॥ जिनस्थानेय सन्यापः कुर्वन्रा-
ज्यमकंटकं ॥६॥ एतस्मिन्नेव काले तु चिंतयामास दानवः ॥ तोषयामि महादेवं येन मे नुग्रहो भवेत् ॥७॥ प्रार्थ-
यामि वरं दिव्यं यन्मे मनसि वांछितं ॥ नान्यं देवमहं मन्ये मुक्त्वैकं कृत्तिवाससं ॥८॥ एवं स निश्चयं कृत्वा अंध-
कोनिः सतो गृहात् ॥ स गंगातटमाश्रित्य दानवस्तपसि स्थितः ॥९॥ उग्रं तपश्चचारासौ दारुणं लोमहर्षणं
॥ दिव्यं वर्षसहस्रं तु निराहारः स्थितो भवत् ॥१०॥ द्वितीयं च सहस्रं स स्थित एवांबुभोजनः ॥ तृतीयं च स-
हस्रं वै भ्रमपानपरो भवत् ॥११॥ चतुर्थं वर्षसाहस्रं योगाभ्यासेन संस्थितः ॥ न केनापि दृष्टं तमं तपो
लोकभयंकरं ॥१२॥ अस्थिचर्मावशेषस्तु संजातो दानवोत्तमः ॥ तस्य मूर्धस्तनो राजन्धूम्रवर्तिर्विनि-
सृता ॥१३॥ देवलोकमतीत्यासौ कैलासं व्याप्य संस्थिता ॥ पार्वत्युवाच ॥ चतुर्वर्षसहस्राणि दिव्यान्येवं
महेश्वरः ॥१४॥ न केनापीदृशं तप्तं तपो दृष्टं श्रुतं मया ॥ तस्यावज्ञां कथं देव कुरुषे परमेश्वर ॥१५॥ कथ-
मन्यस्य देवेश त्वं स्ये न तपसा प्रभो ॥ नास्त्र क्रीडां त्वया सार्धं करोमि त्रिदशेश्वरः ॥ यावन्नोत्थापितो
देवदानवो भक्तवत्सल ॥ महादेव उ० ॥ साधु साधु महादेवी सर्वलोकहितैषिणी ॥१७॥ अहमेनं न जा-
नामि क्रिश्यंतं दानवेश्वरं ॥ योगाभ्यासस्थितं भद्रे ध्यायंतं परमं पदं ॥१८॥ तत्रागच्छ मया सार्धं यात्रा
सौ तप्यते तपः ॥ उमया सहितो देवो यत्र तत्र महेश्वरः ॥१९॥ अस्थिचर्मावशेषं तु तं दृष्ट्वा दानवोत्तमं ॥ उवाच भ-
गवान्रुद्रः प्रसन्नेनांतरात्मना ॥२०॥ महेश्वर उ० ॥ भो भो कष्टकृतं वत्स दारुणं लोमहर्षणं ॥ यदीदृशं तपो
घोरं कृतं पूर्वं न केनचित ॥२१॥ प्रीतस्तेहं सुरश्रेष्ठ वरं वरय सुव्रत ॥ मनसोभीप्सितं यत्ते तत्प्रयच्छामि
दानव ॥२२॥ अंधक उ० ॥ यदि तुष्टोसि देवेश यदि देयो वरो मम ॥ सुरान्सर्वान्विजेतास्मि संग्रामे त्वत्प्रसा-

रे॰खं॰ दत्तः॥२३॥ ईश्वर उ॰॥ पराजयो हि देवानां दुर्लभो दानवेश्वरः॥ असंभाव्यवरो मह्यं मनसा यं न रोचते॥२४॥ अ
८४ न्यल्लोकार्थपमाप्तिप्रं यत्ते मनसि वर्तते॥ त्रैलोक्ये दुर्लभं यत्ते तदास्यामि न संशयः॥२५॥ राज्यं प्रार्थय सर्वांगं भो
गांश्चैव मनोरमान्॥ स्वर्गैश्वर्यं परं तात भुंक्ष्व त्वं शक्रहा यथा॥२६॥ मार्कंडेय उ॰॥ देवस्य वचनं श्रुत्वा अंध
को विस्मयान्वितः॥ चिंतयामास निर्विण्णो वृथा क्लेशः कृतो मया॥ ततस्तु स्वस्य परमं पपात धरणीतले॥ म
लच्छिन्नो यथा वृक्षो निरुच्छ्वासस्तदाभवत्॥२८॥ मूर्छापन्नं स्थितं दृष्ट्वा देवी देवमथाब्रवीत्॥ यं यं प्रार्थय
ते दैत्य वरं सुरवरोत्तम॥२९॥ तं तमस्मै प्रयच्छाय यहं ते प्रियाप्रभो॥ त्रैलोक्ये परमा तेय वाच्यता संभ
विष्यति॥३०॥ ईश्वर उ॰॥ यदा दर्शो वरो देवि दीयते दानवाय हि॥ अस्मापां च हरिं मां च अन्यानपि सुरा
सुरान्॥३१॥ उच्चभावं गतो देवि न किंचिन्मानयिष्यति॥ उमा उ॰॥ उपायश्चिंत्यतां देव दानवार्थं विचक्ष
ण॥३२॥ वर्जयित्वा रणे विष्णुं अन्यान्देवान्विजेष्यति॥ ईश्वर उ॰॥ उपायः शोभनो देवि दृष्टो यो मे मनोगतः॥
३३॥ दृष्ट्वास्य स्य वरं देवी छलेनानेन सुंदरी॥ विसंज्ञं पतितं दृष्ट्वा भस्मीतं दानवेश्वरं॥३४॥ अमृतेन पुनर्दे
वस्तस्य कायं व्यवर्धयत्॥ ततस्तं प्राह देवेशो वरं वरय दानव॥३५॥ विष्णुवर्जं सुरान्सर्वान्विजेष्यसि
महारणे॥ अंधक उ॰॥ भवत्वेवं दृढं याचे बलमास्थाय केवलं॥३६॥ विष्णुमेकं विजेष्यामि स्वबलेनापि
धूर्जटे॥ एवं कृतार्थमात्मानं मन्यमानो हि दानवः॥३७॥ प्रदक्षिणीकृत्य देवं प्रणाममकरोत्ततः॥ ईश्व
रोपि वरं दत्वा दानवाय यथेप्सितं॥३८॥ रूपं प्रधानमारुह्य तत्रैवांतरधीयत॥३९॥ इति श्रीरेवाखंडे
अंधकवरप्रदानं नाम॥ ॥मार्कंडेय उ॰॥ दानवेंद्रो वरं लब्ध्वा सजगाम निजां पुरीं॥ ददर्श स्वपुरीं
तत्र चित्रलंचे रशोभितां॥१॥ हृष्टतुष्टजनाकीर्णां तुंगतोरणमंडितां॥ विभक्तगोपुरद्वारां पताकाध्व
जमालिनीं॥ विस्तारायामसंयुक्तां कृतकौतुकमंगलां॥ देवतायतनैः शुभ्रैः समंतादुपशोभितां॥२॥ ८४

171
2008

नानावृक्षसमोपेतां शस्त्रवल्लीलतावृतां॥ हंसकारंडवाकीर्णां चक्रवाकानुनादितां॥४॥ उत्फुल्लपद्मस
हितैस्तडागैरुपशोभितां॥ वेदाध्ययननिर्घोषैर्गीतवाद्यैर्निनादितां॥५॥ तां तथा शोभितां दिव्यां स्वर्ण
प्राकारवेष्टितां॥ प्रविवेश पुरीं रम्यां मुदितो दानवेश्वरः॥६॥ ततो निजगृहं प्राप्य उपविष्टः कृतार्थवत्
ददर्श सर्वदारांश्च पुत्रभृत्यान्सदारकान्॥७॥ ततो जनपदं सर्वं परिभ्रमति दानवे॥ जनाः शोभां प्रकु
र्वंति सदानंदितमानसाः॥८॥ तोरणानि विचित्राणि पताका वस्त्रवल्लरीः॥ पुष्पमाला विचित्राश्च पू
र्णकुंभकराः पृथक्॥९॥ पुरे जनाश्च दृश्यंते भाजनैर्मणिमंडितैः॥ दानवं वर्धयंति स्म वरदानाभिपूरि
तं॥१०॥ मंगल्यगीतनिर्देत्यशातनास्तत्र योषितः॥ मंत्रध्वनिभिरत्यंतं ब्राह्मणानां समंततः॥११॥ अन्ना
भिः पूर्यमाणोसौ दानवेंद्रः प्रतापवान्॥ वर्धापयंति ते सर्वे पौरजानपदा जनाः॥१२॥ ततस्तुष्टमना
राजन्दानवेंद्रोभवत्तदा॥ अमात्यैः सहितस्तत्र चतुरंगबलान्वितः॥१३॥ गजवाजिरथैश्चैव कां
चनमंडितैः॥ सर्वतः परिपूर्णोसौ दानवो बलदर्पितः॥१४॥ न कंचिन्मन्यते शूरं न पुमांसं वरैधि
तः॥ न कश्चित्सुखेनास्य तिष्ठति भुवनत्रये॥१५॥ एवं वसंस्तत्र पुर्यां सर्वकामैः सुपूजितः॥ चिरकालं
महादेववरदानेन मोहितः॥१६॥ तं चलब्धवरं ज्ञात्वा देवास्तु द्वयशंकिताः॥ एकीभूय ततः सर्वे शक्र
स्य शरणं गताः॥१७॥ शक्र उ॰॥ कथमागमनं वोत्र सर्वेषां तु दिवौकसां॥ कस्माच्च भयमुत्पन्नं किमे
तत्कथ्यतां मम॥१८॥ देवा ऊचुः॥ अस्ति तद्दोल्वणः पापः अंधको नाम दानवः॥ तद्भयाच्छंकिता देवाः
आगताः शरणं तव॥१९॥ एतस्मिन्नंतरे सोपि दानवो वरदर्पितः॥ ज्ञात्वा देवसमूहं ते शास्त्रसंस्थं च
निर्गतः॥२०॥ एकाकी रथमारूढो बहुशास्त्राभिसंवृतः॥ परिभ्रमंस्ततः सोपि मेरुपृष्ठं समासवा
न्॥२१॥ ददर्श नगरीं तत्र स्वर्णप्राकारतोरणां॥ परिखादुर्गगमनां समंतादमरावतीं॥२२॥ प्रवि

रे॰ खं॰ ८५ बेगासुरस्तत्रलीलया स्वर्गदुर्गपथा॥ इंद्रोपि दानवं दृष्ट्वा यथारूपं भयानकं॥२३॥ निजासनं ततः प्रादादुत्थाय
स्त्रिदशेश्वरः॥ उपविष्टोंधकस्तत्र शक्रस्यैवासने शुभे॥२४॥ आस्थानं कल्पयामास सर्वं तस्त्रिदशाः शतं॥श
क्र उ॰॥ किमर्थमागमनं तुभ्यं किंकार्यं दानवेश्वर॥२५॥ यद्यस्मदीयं सर्वं त्वं तत्तेदास्यामि दानव॥ अंधक उ॰॥ न
मे कोपि नतेकार्यं नगजैर्न तुरंगमैः॥२६॥ स्वकार्यं दर्शयस्वाद्य स्वर्गशृंगारभूषितं॥ ऐरावणो महानागस्त
थैवोच्चैःश्रवा हय॥२७॥ उर्वश्याद्या निसर्वाणि रत्नान्यप्सरसामपि॥ पारिजातकपुष्पाणि वृक्षजातीरनेक
शः॥२८॥ वादित्राणि समस्तानि वज्रं वा पितवायुधं॥ तस्य तद्वचनं श्रुत्वा भयभीतः सुरेश्वरः॥२९॥ सुचिरं चिं
तयित्वा च किं कार्यमिति तत्त्वतः॥ दर्शयामास सर्वं स्वं मेक्षणीयादिकं ततः॥३०॥ उपविष्टाः सुराः सर्वे य
क्षकिंनरपंनगाः॥ सर्वाश्चाप्सरसस्तत्र तथा मंत्रिपुरोहिताः॥३१॥ एकैकशोप्सरसो नत्य संति स्वस
माहिताः॥ प्रारब्धे प्रेक्षणीये च नत्यगीतमनोहरे॥३२॥ ततोस्य चित्तविश्रामो न क्वचित्तत्र जायते॥ श
चीं प्रति मनस्तस्य सकाममभवन्नृप॥३३॥ ततोस्य पत्नीं संरब्धो गृहीतुमुपचक्रमे॥ बलादेव महापा
पो दानवो बलदर्पितः॥३४॥ ततः प्रवृत्तं युद्धं तस्य तैस्त्रिदशैः सह॥ तेन देवगणाः सर्वे ध्वस्ताः पार्थिवस
त्तम॥३५॥ संग्रामे विविधैः शस्त्रैर्जर्जरीकृतविग्रहाः॥ संतापिताः सुराः सर्वे स्वयं नीतास्त्वनेकशः॥३६॥ स्व
ताश्च मरुतस्तेन भग्नाः संग्राममंडले॥ यथा सिंहः करीन्सर्वान्विचित्सविचारेहुनं॥३७॥ तद्दृष्टेकेन ते सर्वे
जिता जाताः पराङ्मुखाः॥ गृहीत्वा शक्रभार्यां स दानवो निर्गतो बलात्॥३८॥ इति श्रीरेवाखंडे अंधकयु
द्धे शचीग्रहणं॥ ॥ ईश्वर उ॰॥ इंद्राद्या देवताः सर्वे ब्रह्माणं शरणं गताः॥ गजैश्च पर्वताकारैर्हयैश्चैव ग
जोपमैः॥१॥ स्यंदनैर्मकराकारैः सिंहव्याघ्रैर्दैत्यैर्जितैः॥ कच्छपैर्मकरैश्चान्यैर्मृगैर्मेषैस्तथापरैः॥२॥ ८५
ब्रह्मलोकमनुप्राप्ता देवा इंद्रपुरोगमाः॥ दृष्ट्वा पद्मोद्भवं देवं साष्टांगं प्रणताः सुराः॥३॥ देवा ऊचुः॥ अं

धको हि महावीर्यो दानवो बलदर्पितः॥ तेन देवगणाः सर्वे धनरत्नैर्वियोजिताः॥४॥ जित्वा देवगणान्सर्वान् 173/2008
असिचक्रगदायुधैः॥ शक्रभार्यां गृहीत्वा स निर्गतो दानवो बलात्॥५॥ देवानां वचनं श्रुत्वा ब्रह्मलोकपि
तामहः॥ चिंतयामास सर्वेशो दानवस्य वधं प्रति॥६॥ अवध्यो दानवः पापः सर्वेषां वो दिवौकसां॥ मुक्त्वा ज
नार्दनं देवं सर्वदानवनाशनं॥७॥ तत्रैव सर्वे गच्छामो यत्र देवो जनार्दनः॥ सत्राता सर्वदेवानां विश्वस्या
पि न संशयः॥८॥ एवमुक्त्वा सुरैः सार्धं ब्रह्मालोकपितामहः॥ इंद्रादिदेवतैः सार्धं गतो यत्र जनार्दनः॥९
अस्तुवन्विविधैः स्तोत्रैः सर्वदेवा जगत्पतिं॥ जयत्वं देवदेवेश लक्ष्मीवक्षस्थलाश्रय॥१०॥ दानवेनातिनाशाय पत्नी
मेव शरणं गता॥ एवं हि स्तूयमानोसौ सर्वैर्देवैर्जनार्दनः॥११॥ संप्रहृष्टमना भूत्वा सुरसंघानुवाच ह॥ श्रीभग
वानुवाच॥ स्वागतं देवविप्राणां सुविभाता यशर्वरी॥१२॥ किं कार्यं प्रोच्यतां शीघ्रं कस्य रुष्टा दिवौकसः॥ किं दुःखं
केनु संपातः कुतो वा भयमागतं॥१३॥ कथयंतु महाभागाः कारणं यन्मनोगतं॥ एवमुक्तास्तु देवेन कथयंति स्म
देवता॥१४॥ प्रदर्श्यंतः स्वानं दहान लज्जमाना ह्यधोमुखाः॥ हतराज्याः स्म सर्वे वि दैत्यंधकेन निराकृताः॥१५॥ पारि
त्रास्व तस्मान्नः प्रसादं कर्तुमर्हसि॥ एवमुक्तः सुरैः सर्वैर्देवदेवो जनार्दनः॥१६॥ शंखचक्रगदाचापसंग्रहमप
रमेश्वर॥ उत्थितो नागपर्यंकाद्देवानामभयप्रदः॥ श्रीभगवानुवाच॥ पातालं यदि वा मर्त्यं नाकं वाय दितिष्ठति।
वधिष्यामि नु तं पापं येन संतापिताः सुराः॥१८॥ स्वस्थानं यांतु निर्विण्णाः संतोषाद्विगतज्वराः॥ विष्णोस्तु वच
नं श्रुत्वा ब्रह्माद्याः सुरसत्तमाः॥१९॥ स्वस्वयानं समारूढा हृष्टतुष्टा दिवं ययुः॥२०॥ इति श्रीरेवाखंडे गिवोवाच्या
स ननाम॥ ॥ उत्तानपाद उ॰॥ कस्मिन्स्थाने वसं देवस्त्वं पकोपि कयं गतः॥ सर्वान्देवान्विनिर्जित्य कस्मिन्स्था
ने समाश्रितः॥२१॥ महादेव उ॰॥ प्रविष्टो दानवो यत्र कथयामि नराधिप॥ पातालं लोकमाश्रित्य कन्या विध्वं
स तेनु सः॥२२॥ तत्रास्थितं तं विज्ञाय चापं संगृह्य केशवः॥ मुमोच बाणमार्गेण संकुपितो दानं प्रति॥२३॥ इत्वा

रे·खं· पीठं चिनिर्भिद्य गतो बाणस्तु सत्वरं ॥ दानवो दह्यमानस्तु तेन बाणेन सर्वतः ॥२४॥ अस्त्रं विसर्ज्जयामास वारुणं केश
८६ वं प्रति ॥ वारुणास्त्रेण स धीवै आग्नेयं नापितं तदा ॥२५॥ तत्रासौ चिंतयामास केन बाणो विसर्ज्जितः ॥ कस्येषितो ह
षीकेशः क्रोधयास्यति संक्षयं ॥२६॥ ततोंधकः कोपयुक्तो बाणमार्गेण निःसृतः ॥ स दृष्टो महात्मानं चापहस्तं
जनार्दनं ॥२७॥ अंधक उ० ॥ न मामेयास्य सिंहसम मया दृष्यानिरीक्षितः ॥ नतं पकुनीति यथा गौनु नागाः सिंहनिरी
क्षितः ॥२८॥ अहमन्वेषयं नूनं मया स्यां किल ते गृहं ॥ तावत्वं कालपाकेन समानीतोसि मम मांतिकं ॥ येन यानि र्जिताः
पूर्वं दानवाः सत्ववर्ज्जिताः ॥ न भवंति पुमांसस्ते योपि सत्वा मतो मम ॥३०॥ परं नास्त्रसंग्रामं कारयामि त्वया
सह ॥ बाहुयुद्धं मया सार्धं कुरु यत्नं यथाबलं ॥ सएवमुक्त्वासुरः पापः केशवं योद्धुमुद्यतः ॥ सकृद्देमेन पदा सि
त्यपातितो धरणीतले ॥३२॥ न योत्स्यामि त्वया सार्धं रुक्षवाचांधकं ततः ॥ ततोंधकः समाश्वस्य चिंतयित्वा मु
हुर्मुहुः ॥३३॥ साष्टांगं प्रणतो भूत्वा स्तुतिं चक्रे हरेस्तदा ॥ अंधक उ० ॥ नमस्ते पद्मायहरये विष्णवे जिष्णवे नमः ॥
३४॥ हृषीकेशाय केशाय जगद्धात्रेच्युताय च ॥ नमः पंकजनेत्राय नमः पंकजनाभये ॥ जनार्दनाय श्रीशाय श्री
पते पीतवाससे ॥ गोविंदाय नमोनिसं नमस्ते याधिनापिने ॥ नमः करालवक्त्राय नमः श्रीवत्सवक्षसे ॥३६॥
शार्ङ्गिणे शांतवक्त्राय शंखचक्रगदाभृते ॥ नमस्ते मत्स्यरूपाय कूर्मरूपाय ते नमः ॥३७॥ नमो वाराहरूपाय
नृसिंहाय निनादिने ॥ नमो वामनरूपाय क्रांतलोकत्रयाय च ॥३८॥ नमः परशुरामाय रामचंद्राय ते नमः ॥ न
मस्ते कृष्णरूपाय कंसविध्वंसकारिणे ॥३९॥ नमस्ते बुधरूपाय कल्किरूपाय ते नमः ॥ हयमौले नमस्तुभ्यं
हंसाय परमात्मने ॥४०॥ नमस्ते यज्ञरूपाय विश्वरूपाय ते नमः ॥ व्याप्तसर्वदिगंताय केशवाय नमो नमः ॥४१॥
वासुदेव नमस्तुभ्यं नमः कैटभनाशिने ॥ नमोस्तु सृष्टिकर्त्रे हि नमस्ते सुरनायक ॥४२॥ अस्य यज्ञवराहस्य ८६
विक्रमार्पिततेजसः ॥ प्रणामं ये प्रकुर्वंति तेषामपि नमो नमः ॥४३॥ तस्येतत्स्तुतिवाक्यं हि श्रुत्वा देवो जनार्द

175
2008

नः ॥ प्रसन्नः प्राह सहसा दानवेंद्रं सुरेश्वरं ॥४४॥ श्रीभगवानुवाच ॥ संतुष्टो दानवेंद्रोहं वरं वरय सुव्रत ॥ दद्या
मि ते वरं त्वद्य याच्यमानं हि दानव ॥४५॥ अंधक उ० ॥ यदि तुष्टोसि मे देव यदि देयो वरो मम ॥ ततो ददस्व मे देव यु
द्धं परमशोभनं ॥४६॥ त्वद्दत्त पतो येनाहं लोकानगं नास्मि शोभना ॥ श्रीभगवा० ॥ कथं ददामि ते युद्धं नापितोहं
त्वया पुनः ॥४७॥ न त्वां प्रतिभवेत्कोपः कथं युध्यामि चांधक ॥ यदि ते वर्त्तते वुद्धिर्युद्धं प्रति न संशयः ॥४८॥ ततो
गच्छ त्वं शीघ्रं त्वं देवं प्रति महेश्वरं ॥ अंधक उ० ॥ न तत्र सिध्यंति कार्यं देवं प्रति महेश्वरं ॥४९॥ पुत्रवन्मन्यते मां
हि न मे युद्धं प्रदास्यति ॥ श्रीकृष्ण उ० ॥ भद्रं ते कथयिष्यामि येन युध्यति शंकरः ॥५०॥ कैलासशिखरं रम्यं धून
य स्व मुहुर्मुहुः ॥ धूनिते सति देवेशो महाकोपं करिष्यति ॥५१॥ कोपितः शंकरो रौद्रं युद्धं दास्यति दानव ॥ ततो
सौ विष्णुवाक्येन गतो यत्र महेश्वरः ॥५२॥ कैलासशिखरं गत्वा धूनयामास दानवः ॥ धूनिते चापि शैलेंद्रे कं
पितं भुवनत्रयं ॥५३॥ पतंति शिखराण्याशु पिष्यमाणान्यनेकशः ॥ चत्वारः सागरास्तु द्वैक्यभावं हि भेजि
रे ॥५४॥ तथा पतंति प्रासादाः पादपाश्च समंततः ॥ उमया सहितो देवो विस्मयं परसं गतः ॥५५॥ गाढमा
लिंग्य सा देवी शंकरं वाक्यमब्रवीत् ॥ किमर्थं कंपते शैलः किमर्थं कंपते धरा ॥५६॥ किमर्थं कंपते नाथ कोमलः
पातालमेव च ॥ किंवा युगक्षयो देव तन्ममाख्यातुमर्हसि ॥५७॥ ईश्वर उ० ॥ कस्येय पादुर्मतिर्जाता केनेदं दुष्कृतं
कृतं ॥ ललाटाख्यावितो धर्मः लोचयास्यति संक्षयं ॥५८॥ कैलाससंस्थितो येन सुप्तोहं प्रतिबोधितः ॥ तं च धि
ध्येन संदेहो पद्य विस्मातसुतो गुह ॥५९॥ एवमुक्त्वा सदेवेशश्चिंतयामास तत्त्वतः ॥ तमंधकं परिज्ञाय कौ
पं चक्रे ततो विभुः ॥६०॥ उपायं चिंतयामास येनासौ वध्यते सुरः ॥ तत्र ज्ञात्वा ह्वाययामास ब्रह्माद्यासुरसत्तमा
न् ॥६१॥ रथं देवमयं कृत्वा सर्वलक्षणसंयुतं ॥ आरूढस्तत्र देवेशो विश्वत्राता जगद्गुरुः ॥६२॥ ययौ सदा
नवो यत्र कोपाविष्टो महेश्वरः ॥ अब्रवीत्तिष्ठतिष्ठेति कथं यास्यसि दुर्मते ॥६३॥ दानवेंद्रोपि संगत्य शरास

रे. खं. नवरं ततः॥ चकार युद्धमतुलं देवदेवेन शंभुना॥६४॥ देवमुक्तान् शरान् सर्व्वान् चिच्छेद सनिशैः शरैः॥ देवेन दान
८७ वेंद्रो ऽथ च्छादितः शरसंचयैः॥६५॥ न तत्र दृश्यते सूर्यो नाकाशं नैव चंद्रमाः॥ अथाग्नेयेन बाणेन दानवो दह्यते
शरान्॥६६॥ दह्यमानस्ततो दैत्यास्तेनाग्नेयेन कंपिताः॥ रक्ष रक्ष महादेवेत्युक्त्वा च पुनः पुनः॥६७॥ ततो दैत्या
धिदेवेन वारुणास्त्रं विसर्जितं॥ तेनैव वारुणास्त्रेण आग्नेयं शमितं तदा॥६८॥ दानवेन ततो मुक्तं वायव्यं वारु
णं प्रति॥ वारुणं शोषितं तत्र वायव्येन रणाजिरे॥६९॥ देवो विसर्जयामास सार्प्यं सक्रोधचेतसा॥ वायव्यं ना
शितं तेन सार्पेण नृपसत्तम॥७०॥ दानवेन ततो मुक्तं गारुडास्त्रं बलायसा॥ तेनास्त्रेण तु तत्सार्पं उद्दिष्टं सम
नायत॥७१॥ ततो रुद्रेण नारसिंहं विसर्जितं॥ नारसिंहेन बाणेन गारुडास्त्रं विनाशितं॥७२॥ एवम
स्त्राण्य संबाधे तदा दानवदेवयोः॥ महद्युद्धमभूत्तत्र सुरासुरभयंकरं॥७३॥ चक्रनालीकनाराचैस्तोमरैः ख
ड्गमुद्गरैः॥ एवं न शक्यते हंतुं दानवो विविधायुधैः॥७४॥ अस्त्रयुद्धं परित्यज्य बाहुयुद्धमुपाययौ॥ करं करे
ण संगृह्य मुष्टिप्रहरणैस्ततः॥७५॥ दानवेनाथ देवेशो बाहुनाक्रम्य पीडितः॥ निःस्पंदभावमापन्नस्ततो मू
र्छामवाप सः॥७६॥ मूर्छागतं मिमं कुत्र मोचयामि महेश्वरं॥ गृहीत्वा देवमुत्संगे ततः कैलासपर्वते॥७७॥ शा
य्यायामुपरि स्थाप्याथ अंधकोऽपि गतस्ततः॥ यावत्तथा स्थितः स्थाणुस्तत्क्षणाल्लब्धचेतनः॥७८॥ तदा सोऽचिंत
यामास स्वकीये भुवने स्थितः॥ पराभवः कृतो मह्यं दानवेन दुरात्मना॥७९॥ पुनः क्रोधसमाविष्टो निर्गतो दा
नवं प्रति॥ आयसी लकुटी गृह्य प्रभुर्भारसहस्रिका॥८०॥ दानवेंद्रं ततः प्राप्य ताडयामास मूर्धनि॥ सोऽपि ख
ड्गेन देवेशं ताडयामास वेगतः॥८१॥ अथ देवो विसस्मार कौबेरास्त्रं महाहवे॥ अस्त्रेण तेन हृदये ताडया
मास दानवं॥८२॥ ततः स ताडितस्तेन रुधिरोद्गारमुद्वमन्॥ पतितो ह्यधोमुखो भूत्वा ततः शूलेन भेदितः॥ ८
८३॥ शूलाग्रसंस्थितः पापश्चक्रेव द्रुमनेन तदा॥ यच्च भूम्यां पतंति स्म तत्कायाद्रक्तबिंदवः॥८४॥ एतत्तु

समुत्तस्थुर्दानवाः शस्त्रपाणयः॥ व्याकुलस्तु कृतो देवो दानवैनरक्षिना॥८५॥ सस्मार शंकरो दुर्गां चामुंडां मुंडभूष
णां॥ स्मृतमात्रागता तत्र महाभूतगणावृता॥८६॥ महादंष्ट्रा महाकाया पिंगाक्षी लंबमूर्धजा॥ रक्तं च देवदेवेशं सु
धाविह्वलतोविका॥८७॥ आदेशं दीयतां देव किं न यामि यमक्षयं॥ शिव उवाच॥ पिब त्वं रुधिरं भद्रे दानवस्यास्य
सर्वतः॥ पतितं रुधिरं भूमौ दुर्गे गृण्हस्व यत्नतः॥ यथैनं दारयाम्यपसोहायान्तव सुंदरी॥८८॥ एवमुक्ता तु सा दु
र्गा पपौ तद्रुधिरं ततः॥ अंधकोऽपि च तां दृष्ट्वा वध्यमानोऽथ दानवान्॥९०॥ ततो वाग्भिः सुपुष्टाभिरस्तौद्देवं महे
श्वरं॥ अंधक उ०॥ नमस्ते जगतां धात्रे शार्वाय त्रिगुणात्मने॥९१॥ वृषभयान संस्थाय शशांककृतभूषण॥ न
मः खट्वांगहस्ताय नमः शूलधराय च॥९२॥ नमो डमरुकोदंडकपालानलधारिणे॥ स्मरदेहविनाशाय म
खदक्षमलापते॥९३॥ नमः सुरूपदेहाय अरूपबहुधारिणे॥ उत्तमांगविनाशाय विरंचेः सृष्टिकारिणे॥९४॥
श्मशानवासिने नित्यं नमो भैरवरूपिणे॥ सर्वगः सर्वकर्ता च त्वं हंता नान्य एव हि॥९५॥ त्वं भूमिस्त्वं जलं चैव
त्वं ज्योतिस्त्वं नभस्तथा॥ त्वं वपुः सर्वभूतानां जीवभूतो महेश्वर॥९६॥ अस्तौदेवं दानवेंद्रो देवं शूलाग्रसंस्थितः॥
बद्धांजलिपुटं प्रह्वं ततः प्राह महेश्वरः॥९७॥ महादेव उ०॥ साधु साधु महासत्व तुष्टोऽहं तव दानव॥ वरं वरय
सुप्रीतो यत्ते मनसि वांछितं॥९८॥ अंधक उ०॥ यदि तुष्टोऽसि देवेश यदि देयो वरो मम॥ तदात्मसदृशो देव कर्तव्यो
हं प्रसादतः॥९९॥ भस्मोद्धूलित्रिशूली च त्रिनेत्रश्च चतुर्भुजः॥ व्याघ्रचर्मोत्तरीयश्च नागयज्ञोपवीतिकः॥१००॥
एवं भूतो भविष्यामि त्वत्प्रसादान्महेश्वर॥ महादेव उ०॥ तव दत्तो वरो ह्येष प्रसन्नेनांतरात्मना॥१॥ अन्यदेहस्थि
तः पुत्र भृंगीरिति भविष्यति॥२॥ इति श्रीरेवाखंडे अंधकवधो नाम अध्यायः॥ ॥ मार्कंडेय उ०॥ दानवें
द्रं निगृह्याथ गतो देवो महेश्वरः॥ उमया सहितः श्रीमान् कैलासं पर्वतोत्तमं॥१॥ आगताश्च ततस्तत्र ब्रह्मा
द्याः सुरसत्तमाः॥ दृष्ट्वा तु ताश्च ते सर्वे प्रणमंति स्म शंकरं॥२॥ तत्रागतान् सुरान् सर्वान् वाचेदं महेश्वरः॥

177/2008

घातितोहं नवःपापा गतोर्थं पितामह ॥ ३ ॥ तस्य रक्तेन मिश्रत्वं समरत्यत्तो पुना ॥ कर्तव्यमत्र किं देव उपायं मे धेहि वि
नट ॥ ४ ॥ सुव्रतः सुव्रतात्मा च कश्यपस्य सुतो मया ॥ निरर्थं घातितो तस्मात् युद्धमिच्छन् द्विजानघः ॥ ५ ॥ कर्तुमिच्छाम्य
हं सम्यक् तीर्थयात्रां चमुत्तरव ॥ ततो सौ निश्वस्य च तदा निर्वेदाकुलचेतसः ॥ ६ ॥ देवैः सह देवेशः प्रभासं प्रतिनि
र्ययौ ॥ प्रभासाद्यानि तीर्थानि पृथिव्यां यानि कानि च ॥ ७ ॥ गतस्तत्र महादेवो गंगायाः सरितस्तथा ॥ अवगात्वा
विश्वलस्य निर्मलत्वं न दृश्यते ॥ ८ ॥ नीलारक्तं यथा स्तत्रं निर्मलत्वं न गच्छति ॥ नर्मदायां ततो गत्वा देवो देवैः सम
न्वितः ॥ ९ ॥ उत्तरं दक्षिणं कूलं गाहयामास यत्नतः ॥ गतस्तु दक्षिणे कूले पर्वते भृगुसंज्ञके ॥ १० ॥ तत्रावलोकया
मास देवो देवैः समन्वितः ॥ मनोहारि च तत्स्थानं सर्वपापचदिवौकसां ॥ ११ ॥ ज्ञात्वा तीर्थवरं पं तु स्थितो देवो
महेश्वरः ॥ गिरिं विव्याध शूलेन भिन्नं तेन रसातलं ॥ १२ ॥ निर्मलं चाभवच्छूलं न लेपो दृश्यते क्वचित् ॥ देवैराख्यातिता त
त्र महापुण्या सरस्वती ॥ १३ ॥ पर्वतान्निःसृता भूप सर्वतीर्थमयी शुभा ॥ छिद्रात् यः संगमस्तत्र यथा वेण्यां सिता
सित ॥ १४ ॥ तत्रस्नात्वा स्वयं देवो ब्रह्मलिंगमुत्तमं ॥ सर्वपापहरं पुण्यं सर्वदुःखप्रणाशनं ॥ १५ ॥ स्थापयामास देवेशा
दृष्ट्वा तीर्थं महद्भुतं ॥ तस्यस्याम्यदिशा भागे स्वयं देवो जनार्दनः ॥ १६ ॥ सतिष्ठति तदा तत्र जगत्त्राता महाप्रभुः ॥ तोय
स्य नाभवन्मार्गः कुंडमध्ये न भारत ॥ १७ ॥ शूलेन घंटलतो रेवां ततस्तेन तलं ययो ॥ तत्तोयं च गतं तत्र यत्र रेवा महान
दी ॥ १८ ॥ तत्र तद्धि समुत्पन्नं चक्रतीर्थं हि चोत्तमं ॥ शूलभेदे तु विधिवत् स्नानं कृत्वा द्विजो नरो ॥ १९ ॥ आत्मानं मन्यते
शुद्धं नाकिंचित्कलुषं कृतं ॥ तस्यैवान्तरकायामां देवदेवो जगद्गुरुः ॥ २० ॥ शूलभेदं प्रतिष्ठाप्य पश्यन्नात्मानमात्म
ना ॥ सर्वं तीर्थमयं तीर्थं सर्वदेवमयं परं ॥ २१ ॥ सर्वपापहरं पुण्यं दुःखदुर्गतिनाशनं ॥ तत्र तीर्थं प्रतिष्ठाप्य दे
वदेवो महेश्वरः ॥ २२ ॥ मुमोच रक्षपालानां शतमष्टौ नरेंतदा ॥ शतं च षष्टि श्रपालानां रक्षणाय प्रयत्नतः ॥ २३ ८८
उत्पादयंति विघ्नानि यस्तत्र स्नातुमिच्छति ॥ तानि विघ्नानि वक्ष्यामि शृणु राजेंद्र तत्त्वतः ॥ २४ ॥ केचित्कुर्वंति

179
2008

नामुग्रहस्य पुत्रापरं ॥ केचिद्दुःसवसंगेषु केचिद्द्रव्यार्जने रताः ॥ २५ ॥ परदाररतान्ये श्वो परद्रव्यानि चापरे ॥
परापवादं कुर्वंति येन्ये हिंसारतास्तथा ॥ २६ ॥ मुच्यंते पातकान्मर्त्या स्तत्र स्नात्वा यथाविधि ॥ पापाश्चारश्च येम
र्त्यास्तेषां स्नानं न जायते ॥ २७ ॥ अन्येपि च वदंत्येवं कस्तीर्थं पुगम्यते ॥ केचिच्छंसंति रोगित्वं केचिदेकाकिनां तथा
॥ २८ ॥ हेतुवादांस्तथा केचित् स्वाम्यं पथि चापरं ॥ एवं हि मोहितालोके नरक्षयंति स्मरक्षकाः ॥ २९ ॥ तत्रैवं पापरुग्री
नां गमनं न हि विद्यते ॥ संरक्ष्यते हि तत्तीर्थं देवरक्षगणास्तथा ॥ ३० ॥ धन्याः पुण्याश्च ये मर्त्यास्तेषां स्नानं प्रजा
यते ॥ सरस्वती देवनद्यो भोगवत्यां विशेषतः ॥ ३१ ॥ अयं हि संगमं पुण्यो यथा वेण्यां सितासित ॥ दृष्ट्वा तीर्थं च ते
सर्वे गीर्वाणा हृष्टचेतसः ॥ ३२ ॥ देवस्य संनिधौ भूत्वा वर्णयंति परस्परं ॥ इदं तीर्थवरं देव सर्वतीर्थेष्वनुत्तमं ॥ ३३
गुप्ताद्गुप्ततरं तात न भूतं न भविष्यति ॥ ततो देवाः सगंधर्वा ब्रह्मशक्रपुरोगमाः ॥ ३४ ॥ देवेशं पूजयामासुस्तो
त्रैश्च विविधैस्तदा ॥ संपूज्यमानो देवेशः सर्वदेवैर्नमस्कृतः ॥ ३५ ॥ स्थितस्तत्रैव भगवान् शूलभेदेति विश्रु
तः ॥ देवेन भेदितं यत्र शूलाग्रेण नृपोत्तम ॥ ३६ ॥ त्रिधा तिर्याविनिर्यंते तोयावर्ताः सुपूरिताः ॥ कुंडं कृतिस्तु
तीर्थेन तत् अगाधं जलपूरितं ॥ ३७ ॥ सर्वपापक्षयकरं सर्वदुःखविनाशनं ॥ तत्र तीर्थे पयःस्नाय उपवासपरायणाः ॥
३८ ॥ दीक्षामंत्रविहीनो विमुच्यते सर्वपातकैः ॥ ये पुनर्विधिवत्स्नात्वा रौद्रमंत्रैस्तु पंचभिः ॥ ३९ ॥ वेदोक्तैः पंचभिर्मंत्रैर्ज
पंत स्वर्गमाप्नुयुः ॥ ब्रह्मक्षत्रविशो वापि शूद्राश्चाप्या स्त्रियस्तथा ॥ ४० ॥ तत्र देवं हृदि ध्यात्वा स्नानं कुर्वंति ये नराः ॥ द
शाक्षरेण मंत्रेण जपंति च समाहिताः ॥ ४१ ॥ ते गच्छंति परं लोकं यत्र देवो महेश्वरः ॥ केदारे च यथा पीतं रुद्रकुंडे तथै
व च ॥ ४२ ॥ तत्र तीर्थे कृतं सर्वं सफलं जायते नृणां ॥ ततः स्नात्वा नरः सम्यग्विधियुक्तो जितेंद्रियः ॥ ४३ ॥ तिलमिश्रे
ण तोयेन तर्पयेत्पितृदेवताः ॥ कुलानि तारयेत्तत्र दश पूर्वान् दशापरान् ॥ ४४ ॥ गयादिषु च स्थानेषु कृतं श्राद्ध
तु यत्फलं ॥ इह तत्फलमाप्नोति शूलभेदे न संशयः ॥ ४५ ॥ यस्तत्र विधिना युक्तो दानं दद्याद्विजोत्तम ॥ तस्यास्त

रे. खं. यत्फलं तत्र जायते नात्र संशयः ॥ ४६ ॥ ददाति भक्त्या पात्रेभ्यः कांचनं गां महीं तथा ॥ आसनं पानं दीयस्यां चाक्षयं
८९ श्च मंदिरं ॥ ४७ ॥ वस्त्रोपानह धान्यानि रथं शकटमेव च ॥ श्रोत्रियेकुलसंपन्ने शुचौ शांते जितेंद्रिये ॥ ४८ ॥ श्रुताध्ययन
संपन्ने दंभहीने क्रियान्विते ॥ त्रयोदशादिदानान्येव त्रयोदशागुणं भवेत ॥ ४९ ॥ इति श्रीरेवाखंडे अलभेदोत्पत्तिर्नाम ॥
॥ ॥ उत्तानपाद उ० ॥ हिताश्च कीदृशाः प्रोक्ता अपात्राश्चैव कीदृशाः ॥ श्राद्धे चैवाह्निके कार्ये दान चैव विशांपते ॥ १ ॥
तदाख्याहि मे देव दानं कस्य प्रदीयते ॥ श्री महादेव उ० ॥ यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः ॥ २ ॥ ब्राह्मणश्चा
नधीयानस्त्रयस्ते नाम धारकाः ॥ यथा षंढो फलः स्त्रीषु यथा गौर्गवि चाफलः ॥ ३ ॥ तथा चाज्ञे फलं दानं एवं विप्रोऽन
पाफलः ॥ यथा रिणे बीजमुप्त्वा वस्तानलभते फलं ॥ ४ ॥ तथा ऋचा विना पात्रे दातानलभते फलं ॥ रोगिहीनाति
रिक्तांगः काणः पौनर्भवस्तथा ॥ ५ ॥ अवकीर्णी स्यावदंतः सर्वाशी वृषलीपतिः ॥ मित्रध्रुकपिशुनाश्चैव कुनखी
सोमविक्रयी ॥ ६ ॥ पितृमातृगुरुत्यागी नित्यं ब्राह्मणनिंदकः ॥ शूद्रान्नं मंत्रसंयुक्तं यो वि प्रोजुहुयाद्धविः ॥ सोऽस्प
स्यः कर्मचांडालः स्पृष्ट्वा स्नानं समाचरेत ॥ माहिष्यः कुनखी स्तेयी वार्धुष्यः कुंडगोलकौ ॥ ८ ॥ महादानरताय
श्च सर्वाशी बालघातकः ॥ भृतकाध्यापकः क्लीबः कन्यादूष्यभिशस्तकः ॥ ९ ॥ एते विप्राः सदा त्याज्याः परिभाव्य
प्रयत्नतः ॥ एषां दानं न दातव्यं दत्तं तेभ्यो वृथा भवेत ॥ १० ॥ श्रुताध्ययनसंपन्ना ये विप्रा व्रततत्पराः ॥ तेभ्यो यद्दी
यते दानं तन्ममाख्यातुमर्हसि ॥ ११ ॥ महादेव उवाच ॥ श्राद्धं कृत्वा गृहे भक्त्या शुचिर्भूत्वा जितेंद्रियः ॥ गुरुं प्रदक्षिणी
कृत्य सर्वभक्त्या परः ॥ १२ ॥ वाग्यतः प्रव्रजेत्तावद्यावत्सीमां नघेयेत ॥ जलमेदंतंततो गत्वा स्नानं कृत्वा यथा
विधिः ॥ १३ ॥ पंचस्थाने पुवै श्राद्धं हव्यकव्यादिभिः क्रमात ॥ पिंडदानं प्रकर्तव्यं पायसैर्मधुसर्पिषा ॥ १४ ॥ पित
रस्तस्य तुष्यंति यावदाभूतसंप्लवं ॥ अक्षते र्बदरैर्बिल्वैरगुडैर्मधुसर्पिषा ॥ १५ ॥ पिंडदाने कृते तत्र सर्वतीर्थ ८९
फलं लभेत ॥ उपानहौ च यो दद्याद्ब्राह्मणेभ्यः प्रयत्नतः ॥ १६ ॥ सोपि स्वर्गमवाप्नोति अश्वारूढो न संशयः ॥ शय्या

181/2008

दानं च यो दद्याच्छत्रिकां च विशेषतः ॥ १७ ॥ वरं विमानमारूढः स याति परमं पदं ॥ गृहं च यो शुभं दद्यात्सप्तधान्ये न पू
रितं ॥ १८ ॥ स्वर्गलोके वसेत्सोपि दिव्ये कांचनमंदिरे ॥ तिलधेनुं च यो दद्यात्सवत्सां विधिना नरः ॥ १९ ॥ नाकपृष्ठे वसेत्ता
वद्यावदाभूतसंप्लवं ॥ गृहे वा यदि वारण्ये तीर्थमार्गे प्रतिश्रये ॥ २० ॥ तोयमन्नं च यो दद्याद्यमलोकं न पश्यति ॥ सर्वेषा
मिह दानानां अक्षय्यं फलमाप्नुयात ॥ २१ ॥ अन्नदानात्परं दानं न भूतं न भविष्यति ॥ कन्यादानं च यो दद्याद्रूपयौवनस
मुत्सृजेत ॥ २२ ॥ तस्य वासो भवेत्तत्र यत्र ब्रह्मा न्यसत्तम ॥ उत्तानपाद उ० ॥ कन्यादानं कथं देव कर्तव्यं धर्मबुद्धिभिः ॥ २३ ॥
कीदृशाश्च विधिस्तत्र कस्य दानं विधीयते ॥ २४ ॥ कथं दानं महादेव दत्तं भवति चाक्षयं ॥ २४ ॥ उत्तमं मध्यमं चैव कनी
नः स्यात्कथं विभो ॥ दातुमंतामसं यच्च नेश्चेयसमथापि वा ॥ २५ ॥ एतत्सर्वं महादेव कथ्यतां मे महेश्वर ॥ महादेव
उ० ॥ सर्वेषामेव दानानां कन्यादानं विशिष्यते ॥ २६ ॥ दातव्यं परया भक्त्या ह्यभिगम्य प्रयत्नतः ॥ कुलानाय सु
रूपाय गुणज्ञाय विशेषतः ॥ २७ ॥ मूलमंत्रे सुमुहूर्ते च दद्यात्कन्यामलंकृतां ॥ तस्या वासो भवेत्तत्र यत्र देवः प्रजापतिः ॥ २८ ॥
येन स्वदुहिता दत्ता प्राणेभ्योपि गरीयसि ॥ प्रदत्ता तेन पृथिवी सशैलवनकानना ॥ २९ ॥ कन्यार्थं याचते वस्तु सधनो नि
र्धनोपि वा ॥ अभोज्यः स भवेन्मर्त्यः सर्वधर्मबहिष्कृतः ॥ ३० ॥ यद्वा कन्यार्थतो लब्धं भक्षयेपरतु तद्धनं ॥ स भवेत्कृमिर्वा
डालकाप्टकीटो भवेन्मृताः ॥ ३१ ॥ गृहे पितृस्य योऽश्नीयाज्जिह्वालं पदतां गतः ॥ चांद्रायणेन शुध्येत तप्तकृच्छ्रत्रयेण वा ॥
३२ ॥ उत्तानपाद उ० ॥ नास्ति यस्य धनं देव कन्या द्वारि विवर्धते ॥ कथमुद्धरयेत्कन्यां पो वा नु कुरुते दि ॥ ३३ ॥ महा
देव उ० ॥ स्ववित्ते नैव कर्तव्या ॥ कन्याद्याहोन्नचोत्तम ॥ कन्या नाम परित्यक्ता नरो दोषायाचतो भवेत ॥ ३४ ॥ अभिगम्यो
त्तमं दानं आहूतं चैव मध्यमं ॥ याच्यमानं कनीयान स्याद्दृष्टिहिदेहितिचाधनं ॥ ३५ ॥ यथा जन्तुमानि बध्नश्च क्षिप्यते वा
रिमध्यतः ॥ दाचैतो मज्जतां याति तथा तौ दातृयाचकौ ॥ ३६ ॥ दानं नाम समर्थे तु नदेयं वै कथंचन ॥ स्वावैदाता
रमात्मानं अधस्तान्नयते नृप ॥ ३७ ॥ समर्थस्तारयेद्द्वौ च शुभ्रकाष्ठं यथा जले ॥ यथा नौ तारयेत्सर्वं प्रापयेत परं त

रे० खं० रे॥३८॥व्रतनियमसंस्रष्टा दातारं तारयेन्नृप॥ आहिताग्निर्द्विजो भक्त्या कुर्यात्क्षुद्रप्रतिग्रहं॥३९॥ इदं तन्म निश्च ट्रो
९० तिम्रतश्चा चैव जायते॥ अग्निहोत्रस्य शुश्रूषा वृथा तस्य प्रजायते॥४०॥ यो सत्प्रतिग्रहं कुर्यात् दुर्मनाश्च स्य गर्हितं॥ इ
हतन्मानं चांडालो भवेत्तथा जंबुकः खरः॥४१॥ कृत्वा दारिद्र्ययोगेन यद्दानं क्रियते नृप॥ अजमस्य पुनस्तस्य वें यथाभ
वति निश्चितं॥४२॥ इति श्रीरेवामाहात्म्ये शूलभेदोपाख्याने पात्रपरीक्षणं नाम॥ ॥उत्तानपाद उ०॥ श्राद्धकालाश्च
के देवपुराणेषु प्रकीर्तिता॥ कस्मिन् तीर्थे हि यात्रा च कर्तव्येति समादिश॥१॥ शंकर उ०॥ पितृतीर्थे यथा पुण्यं सर्वका
मिकमुत्तमं॥ इदं तीर्थं तथा पुण्यं स्नानदानादिकर्मसु॥२॥ विशेषेण प्रकुर्वीत श्राद्धं चैव युगादिषु॥ मन्वंतरादयो
भपश्च यतो वच चतुर्दशा॥३॥ अश्वयुक्शुक्लनवमी द्वादशी कार्तिकस्य च॥ तृतीया चैत्रमासस्य तथा भाद्रपदस्य
च॥४॥ आषाढे चैव दशमी माघमासस्य सप्तमी॥ श्रावणस्याष्टमी कृष्णा तथाषाढस्य पूर्णिमा॥५॥ फाल्गुन
स्य च अमावास्या पौषे च एकादशी तथा॥ कार्तिकी फाल्गुनी चैत्री ज्येष्ठी पंचदशी तथा॥६॥ मन्वंतरादयश्चैता
अनंतफलदाः स्मृता॥ उत्तरायणमायंतं दक्षिणायनमेव च॥७॥ कार्तिकी च तथा माघी वैशाखी च तृतीय
का॥ पौर्णमासीत्व चैत्रस्य ज्येष्ठस्य च विशेषतः॥८॥ संक्रांतौ व्यष्टिकाश्चैव व्यतीपातादयस्तथा॥ श्राद्धकाला
श्च शायंते पुराणेषु प्रकीर्तिता॥९॥ चैत्रे मासि सिते पक्षे एकादश्यां तु पोषितः॥ क्षिपाजागरणं कृत्वा तत्र विध्माः
समीपतः॥१०॥ पूजां करोति यो भक्त्या पठन् पौराणिकी स्तुतिं॥ सधूपदीपनैवेद्यैः स्रग्माल्यैः शिष्य चंदनैः॥
११॥ ऋग्यजुःसामवेदानां सूक्तं यो जपते द्विजः॥ प्रभाते कुरुते श्राद्धं द्विजान्संपूज्य शक्तितः॥१२॥ ददाति दानमा
त्मीयो यथा शक्त्या नृपोत्तम॥ पितरस्तस्य तृप्यंति यावदाभूतसंप्लवं॥१३॥ वसति श्राद्धदस्तत्र यत्र देवो जना
र्दनः॥ त्रयोदश्यां ततो गत्वा गुहामध्यगतं नृप॥१४॥ मार्कंडेश्वरमीशानं दृष्ट्वा पापात्प्रमुच्यते॥ उत्तानपाद उ०॥
गुहामध्ये कथं देव लिंगं परमशोभनं॥१५॥ कथं प्रतिष्ठितं केन तन्ममाख्यातुमर्हसि॥ महादेव उ०॥ त्रिषु लोकेषु वि

183
2008

ख्यातो मार्कंडे महातपाः॥१६॥ तत्र वर्षसहस्रं तु तपस्तेन कृतं नृप॥ गुहामध्ये प्रविष्टोसौ योगाभ्यासेन संस्थितः॥१७
लिंगं प्रतिष्ठितं तेन मार्कंडेश्वरसंज्ञितं॥ तत्र स्नात्वा च यो भक्त्या उपवासपरायणः॥१८॥ रात्रौ जागरणं कृत्वा दत्वा दीपं च
यत्नतः॥ देवस्य स्नपनं कार्यं पंचामृतसमन्वितं॥१९॥ चंदनेन समालिप्य पूजां कृत्वा यथाविधि॥ वरप्रोक्तैस्तथा मं
त्रैर्जाप्यं कृत्वा प्रयत्नतः॥ नैवेद्यादिप्रमाणं च कुर्याद्रूपस्य शक्तितः॥ एवं कृत्वा नृपश्रेष्ठ जन्मनः फलमाप्नुयात्॥२१॥
चतुर्दश्यां ततः स्नात्वा श्राद्धं कृत्वा विधानतः॥ पात्रदाने प्रकर्तव्यं आत्मनः श्रेय इच्छता॥२२॥ पितरस्तस्य तृप्यंति
द्वादशाब्दानि सत्तम॥ दाता वै याति तत्रैव यत्र भोगा ह्यनेकशः॥२३॥ गुहामध्ये प्रविष्टः सन् यो लुंठेत स्वशक्तितः
नास्ति गिरौ हि यः पुण्यं तत्समस्तं लभेत सः॥२४॥ सोपि स्वर्गमवाप्नोति नानाभोगांश्च पुष्कलान्॥ रुद्रकुंडे च यः कुर्या
च्छ्राद्धं पर्वणि पर्वणि॥२५॥ विशेषाच्चैत्रमासे तु तस्य पुण्यफलं शृणु॥ केदारे च प्रयागे च कुरुक्षेत्रे नृपेश्वर॥२५॥
प्रभासे चैव गोमत्यां गंगासागरसंगमे॥ पुष्करे पुष्करावर्ते रुद्रावर्ते विशेषतः॥२६॥ गंगादिसर्वतीर्थेषु यत्पुण्यं ल
भते नरः॥ तत्र तीर्थे तु तत्सर्वं लभते नात्र संशयः॥२७॥ विधिमंत्रसमायुक्तः संतर्प्य पितृदेवताः॥ कुलास्तारयते त
त्र दश पूर्वान्दशापरान्॥२८॥ दक्षिणां मूर्तिमासाद्य शुचिर्भूत्वा जितेंद्रियः॥ न्यासं कृत्वा तु पूर्वोक्तं प्रदद्यादष्टपु
ष्पिकां॥२९॥ वारुणं सौम्यमाग्नेयं वायव्यं पार्थिवं तथा॥ यानस्पर्शं भवेत्षष्ठं प्राजापत्यं च सप्तमं॥३०॥ अष्टमं शैव
पुष्पं च शृणु तत्पानि निर्णयं॥ वारिजं सलिलं ज्ञेयं सौम्यं मधुघृतं पयः॥३१॥ आग्नेयं धूपदीपाद्यैर्वायव्यं चंदनादि
कं॥ पार्थिवं कंदमूलाद्यं यानस्पर्शं फलादिकं॥३२॥ प्राजापत्यं च स्तुत्याद्यं शैवपुष्पं तु वासना॥ अहिंसा प्रथमं पु
ष्पं पुष्पमिंद्रियनिग्रहः॥३३॥ तृतीयं च दया पुष्पं क्षमा पुष्पं चतुर्थकं॥ ध्यानपुष्पं तपः पुष्पं ज्ञानपुष्पं च सप्तमं
॥३४॥ सत्यं चैवाष्टमं पुष्पं एभिस्तुष्यंति देवताः॥ अत्र तीर्थे महाराज पूजयेद्यस्तपस्विनं॥३५॥ तेन पूजितमात्रे
स्व ण पूजिताः पुरपार्श्व॥ वसति स्वर्गलोके स यावदाभूतसंप्लवं॥३६॥ शूलपाणिस्तु यो भक्त्या कारयेत्स्नापनं न

रे॰खं॰ रु॥धूपं दत्वा स्वलेन दिव्येन कुंकुमेन समन्वितं॥३७॥समालभन् ततो देवं गंधकर्पूरागरुचंदनैः॥नानाविधैश्च कुसुमैर्महापूजां
८१ करोति यः॥३८॥त्रियां जागरणं कृत्वा दीपं दद्यात्ततः॥नैवेद्यं विविधं दद्यात्तस्मै सौराणिकं यथा॥३९॥पुरुषसूक्तेन
श्रीसूक्ते एवमादि समाहितः॥तत्रस्थाने स्थितो ताम्यं यः करोति दिने दिने॥४०॥शिवसंकल्पकं जप्त्वा मुच्यते सर्वपा
तकैः॥स्थाप्यातिपरं स्थानं यत्र देवो महेश्वरः॥४१॥पादौ तौ वंदितौ यस्य पञ्चकुलेन नृप॥गोदानेनैव यत्पुण्यं तद्भवेन्न
नात्र संशयः॥४२॥ब्राह्मणान् भोजयेत्तत्र पायसं मधुसर्पिषा॥सहस्रविप्रभोज्यस्य फलं लभते नरः॥४३॥सुवर्णं र
जतं वस्त्रं धान्यमन्नं कुर्यात्तद्गतः॥तत्र यद्दीयते दानं सर्वमक्षय्यतां व्रजेत्॥४४॥चंद्रसूर्यग्रहे ज्ञाने स्नानं कुर्वंति ये नराः
फलं भवेद्द्विमहापर्वांतपरोऽपि विशेषतः॥४५॥दद्याद्दानं यथाशक्त्या ब्राह्मणे वेदपारगे॥गजमश्वं यथाशक्त्या तु रूप्यपुरु
षमेव च॥४६॥स्यंदनं शकटं चैव सस्यधान्यप्रपूरितं॥संयुक्तं लांगलं दद्याद्युग्यानीत्य पुरंधरौ॥४७॥गोभूतिलहिर
ण्यादि पात्रे देयं विजानता॥अपात्रे विदुषा किंचिन्न देयं श्रेयमिच्छता॥४८॥अन्यच्च शृणु राजेंद्र महादानमनुत्तमं॥
दत्तो भयमुखीं मर्त्यो लभते त्वक्षतार्थतां॥४९॥यावद्वत्सस्य पादौ द्वौ मुखं योन्यां प्रदृश्यते॥तावद्गौः पृथिवी ज्ञेया या
वद्गर्भं न मुंचति॥५०॥यस्तु तां परया भक्त्या ब्राह्मणाय प्रयच्छति॥प्रदत्ता पृथिवी तेन सशैलवनकानना॥तास्य
स्याः प्रदत्ता हि सार्धं कुलशतं नृप॥स्वर्णशृंगीं रौप्यखुरीं कांस्यदोहां सवस्त्रकां॥५२॥घंटाभरणसंयुक्तां ताम्रपृष्ठां
पयस्विनीं॥ये प्रयच्छंति धर्मिष्ठा अस्मिंस्तीर्थे नराधिप॥विप्राय वेदसंपन्नाय चंद्रसूर्यग्रहादिके॥तेषां स्युरक्षया लो
का दानं चैवाक्षयं भवेत्॥५४॥सर्वस्यापि हि दानस्य संख्या विप्रोच्यते बुधैः॥चंद्रसूर्योपरागे च दानं विप्रोच्यते
बुधैः॥चंद्रसूर्योपरागे च दानसंख्या न विद्यते॥यत्र गौस्तत्र तत्तीर्थं तत्र तीर्थानि सर्वशः॥५५॥जातिस्मरत्वं ल
भते तत्र तस्याः प्रदानतः॥पुनस्तस्त्वो तत्तत्तीर्थं तत्तीर्थं यात्रो रोचते नृप॥५७॥तत्रासौ मृत्कमासाद्य रुद्रस्यानुचरो भवे ९३
त्॥५८॥इति श्रीनर्मदामाहात्म्ये दानधर्मकथनं नाम॥ ॥महादेव उ॰॥अन्यदाख्यानकं वक्ष्ये पुरावृत्तं निशामय॥

सकुटुंबो गतः स्वर्गं ऋषिर्दीर्घतपा यथा॥१॥उत्तानपाद उ॰॥कथं स्वर्गं गतो विप्रः सकुटुंबो महामुनिः॥कौतुकं मे परं
देव कथयस्व प्रसादतः॥२॥महादेव उ॰॥काशिराजेति विख्यातो चित्रसेनो महाबलः॥धर्मवान् शीलसंपन्नो गुणर
त्नमहोदधिः॥३॥नगरी तस्य संपूर्णा नानारत्नोपशोभिता॥वाराणसीति विख्याता गंगातीरसमाश्रया॥४॥शरच्चं
द्रप्रतीकाशा विद्वज्जनविभूषिता॥बहुद्विजसमाकीर्णा वेदध्वनिनिनादिता॥५॥चारुचत्वरसंपन्ना गोपुराट्टालका
वृता॥यत्राग्निधूमनिचयैः पवित्रीकृतदिङ्मुखा॥६॥तस्याश्चोत्तरदिग्भागे आसीत्परमशोभनं॥तन्मंदारवनं ना
म त्रिषु लोकेषु विश्रुतं॥७॥नानाद्रुमलताकीर्णं नानापुष्पोपशोभितं॥बहुमंदारसंयुक्तं तेन मंदारकं स्मृतं॥८॥
विप्रो दीर्घतपा नाम सर्वदा तत्र तिष्ठति॥तपः कुर्वन् दीर्घकालं तेन दीर्घतपाः स्मृतः॥९॥स तिष्ठति सपत्नीको बहु
पुत्रसमन्वितः॥शुश्रूषयंति ते तत्र सुताः पंच मीपगाः॥१०॥तस्य पुत्रः कनिष्ठस्तु ऋष्यशृंगो महातपाः॥वेदाध्यय
नसंपन्नो ब्रह्मचारी गुणान्वितः॥११॥योगाभ्यासरतो नित्यं कंदमूलफलाशनः॥तिष्ठते मृगरूपेण मृगमध्ये वसन् स
दा॥१२॥ततो दिनांते संप्राप्ते पित्रोः पादाग्रसंस्थितः॥अभिवादयते नित्यं भक्तिमान् द्विपुत्रकः॥१३॥प्रातः पुनः प्रया
त्येवं कानने गिरिगह्वरे॥क्रीडन् वने मृगैः सार्धं तरमे हर्षसंयुतः॥१४॥एवं पर्यटतस्तस्य मृगमध्ये महात्मनः॥मृग
रूपेण राजेंद्र कालो याति महांस्ततः॥१५॥अथ काश्यां महाराज महाबलपराक्रमः॥चित्रसेन इति ख्यातः कुरुते रा
ज्यमुत्तमं॥१६॥वेदधर्मरतो नित्यं प्रजापालनतत्परः॥सर्वराज्यगुणैर्युक्तो धर्मराज इव स्वयं॥१७॥तत्र धर्माश्रि
तः सोऽपि संग्रामेष्वपराजितः॥गजवाजिसमृद्धिश्च युक्तो ज्ञानमहान्वितः॥१८॥श्रुताध्ययनसंपन्नैः पंडितैः सह संग
तः॥ख्यातं तेन सर्वलोकेषु केलासेनोकरोपथा॥१९॥एवं स कुरुते राज्यं सदा निहतकंटकं॥अथान्यदिवसे राजन् मृ
गयां निर्गतो नृप॥२०॥अश्वारूढो धनुर्धारी चतुरंगबलान्वितः॥निर्ययौ स्तेन सहितो राजा नो मंडलाधिपः॥२१॥
छत्रैश्छत्राणि दर्पं तेन गच्छतः काननं प्रति॥रजस्तत्रोत्थितो भूमौ गगनं जिवोपदादतं॥२२॥तेन संछादितं सर्वं भूसे

185/2008

 उत्तमं रूपितः ॥ न तत्र दृश्यते सर्वा नाकाशं न दिशस्तथा ॥ २३ ॥ पादपाश्च न दृश्यंते गिरिसानुर्निसर्वतः ॥ ततस्ते दद
 शुस्तत्र मृगयूथमवस्थितं ॥ २४ ॥ धावंति स्म ततः सर्वे राजानो राजपुत्रकाः ॥ चंद्रकोटीरयभृत पां शीघ्रं जग्मुर्दिशो
दिशः ॥ २५ ॥ पथि केन गतो राजा चित्रसेनो महीपतिः ॥ मृगयूथं समासाद्य एकाकी पृष्ठतो गतः ॥ २६ ॥ प्रविष्टः स त
तो दुर्गं काननं परिवर्जितं ॥ वल्लीगुल्मलताकीर्णं सर्वतः सुभयंकरं ॥ २७ ॥ अथ नष्टा मृगास्तत्र दिग्धो राजा व्यलोक
यत् ॥ दृष्ट्वा काकिनमात्मानं बलमध्यविवर्जितः ॥ २८ ॥ कां दिशं तु गमिष्यामि क च सैन्यसमागमः ॥ कां गति
कं तु यास्यामि इति चिंतान्वितो नृपः ॥ २९ ॥ एवं कष्टगतो राजा चित्रसेनो महीपतिः ॥ वृक्षच्छायां समाश्रित्य विश्रा
मम करोत्तदा ॥ ३० ॥ क्षुत्पिपासार्तो भ्रमन् दुर्गकानने गिरिगह्वरे ॥ ददर्श तत् सरो दिव्यं पद्मिनीखंडमंडितं ॥ ३१ ॥ हंस
कारंडवाकीर्णं चक्रवाकोपशोभितं ॥ सरो दृष्ट्वा राजेंद्रः समानंदितमानसः ॥ ३२ ॥ तर्पयित्वा पितॄन् देवान् मनु
ष्यांश्च यथाविधि ॥ आछिद्य शतपत्राणि पूजयामास शंकरं ॥ ३३ ॥ ततः पपौ स पानीयं यथावत्स मभीप्सि
तं ॥ उत्तीर्य व जलात्तीरे दृष्ट्वा वृक्षं समीपतः ॥ ३४ ॥ उत्तरीयमधः कृत्वा उपविष्टो महीपतिः ॥ चिंतयामास धर्म
ज्ञः किं कार्यमिति तत्वतः ॥ ३५ ॥ अथापश्यन् मृगांस्तत्र छायामाश्रित्य संस्थितान् ॥ केचित्पूर्वमुखास्तत्र अप
रे दक्षिणामुखाः ॥ ३६ ॥ वारुण्याभिमुखाः केचित् केचित्कौबेरदिङ्मुखाः ॥ केचिन्निद्रां प्रकुर्वंति स्तब्धकर्णाः
स्थितापरं ॥ ३७ ॥ तेषां मध्ये स्थितो योगी ऋष्यशृंगो महातपाः ॥ विचचार वनोद्देशे क्रीडते सहसर्वतः ॥ ३८ ॥ मृगा
न् दृष्ट्वा ततो राजा आहारार्थमचिंतयत् ॥ व्यापाद्य मृगमेकं तु भक्षयामि यदृच्छया ॥ ३९ ॥ स्वस्थोपश्चाद्भवि
ष्यामि मृगमांसस्य भक्षणात् ॥ ततः कां दिशं गमिष्यामि मार्गमन्विष्य यत्नतः ॥ ४० ॥ विचिंत्यैवं ततो राजा वृक्षमू
लं समाश्रितः ॥ चापं गृह्य वरं दृढं शरं संधाय चाशुगं ॥ ४१ ॥ विचिक्षेप शरं राजा यत्र ते संस्थिता मृगाः ॥ तेषां मध्ये
संविविद्धो ऋष्यशृंगो महातपाः ॥ ४२ ॥ प्रजग्मुरन्ये वित्रस्ता श्रुत्वा रावं धं वनौकसः ॥ स ऋषिः पतितस्तत्र कृष्ण

187/2008
कृष्णेति चाब्रवीत् ॥ ४३ ॥ हा हा कष्टं कृतं केन येनाहं घातितोऽधुना ॥ कस्यैषा दुर्मतिर्जाता पापबुद्धेर्दुरात्मनः ॥ ४४ ॥
तां वाचं मानुषीं श्रुत्वा स राजा विस्मयान्वितः ॥ शीघ्रं गतस्ततोऽपश्यद् ब्राह्मणं ब्रह्मचारिणं ॥ ४५ ॥ मया कृतं दुःकृतं वै
येनासौ घातितो द्विजः ॥ चित्रसेन उ॰ ॥ अकामाद्घातितस्त्वं हि मृगभ्रांत्या मयानघ ॥ ४६ ॥ किमिदानीं करिष्यामि कथं स्तंहि
शुद्धिर्भविष्यति ॥ गृहीत्वा बहुकाष्ठानि स्वतनुं दाहयाम्यहं ॥ ४७ ॥ अन्यथा ब्रह्महत्यायाः शुद्धिर्मे न भविष्यति ॥ दृ
ष्टापतं च यत्किंचित्तन्नश्ये ब्रह्महत्यया ॥ ४८ ॥ शृंग ऋषिरुवाच ॥ न ते शुद्धिर्भवेत्काचिन्मयि पंचत्वमागते ॥ जन
नी मे पिता वृद्धो भ्राता च तपस्विनः ॥ ४९ ॥ भ्रातृजाया मरिष्यंति कथं शुद्धिर्भवेत्तव ॥ उपायं कथयिष्यामि य
दि त्वं कुरुषे नृप ॥ ५० ॥ राजा उ॰ ॥ उपायं कथ्यतां तात कारुण्येन मनयानघ ॥ तं करिष्यामि सकलं प्रयत्नेन महामु
ने ॥ ५१ ॥ ऋष्यशृंग उ॰ ॥ कस्त्वं कथमिहायातः कस्य पुत्रः क संस्थितिः ॥ ब्रह्मक्षत्रविशां मध्ये शूद्रो वाप्यं यजो
भवेत् ॥ ५२ ॥ नाहं शूद्रो न वैश्यो वै न च ब्राह्मणसत्तमः ॥ नो यतोपि ऋषिश्रेष्ठ क्षत्रियोऽहं महामुने ॥ धर्मज्ञश्च कृ
तज्ञश्च सर्वसत्वहिते रतः ॥ अकामात् सतकं जातं कथं शुद्धिर्भविष्यति ॥ ५४ ॥ ऋषिरुवाच ॥ मां गृहीत्वाश्रमं गच्छ
यत्र तौ पितरौ मम ॥ आवेदयस्व चात्मानं पुत्रघातिनमातुरं ॥ ५५ ॥ तौ दृष्ट्वा मां करिष्येते कारुण्यं च तवोपरि ॥ उ
पायं कथयिष्येते येन शुद्धिर्भविष्यति ॥ ५६ ॥ तस्य तद्वचनं श्रुत्वा चित्रसेनो नृपोत्तमः ॥ स्कंधे कृत्वा तु तं विप्रं ज
गामाश्रमसंनिधौ ॥ ५७ ॥ असक्तोपि च तं वोढुं विश्रम्य च पुनः पुनः ॥ तावत्पश्यति तं विप्रं मूर्छितं विकलेंद्रियं ॥ ५८ ॥
मुमोच चित्रसेनोपि वृक्षच्छायां समाश्रयत् ॥ वस्त्रं चतुर्गुणं कृत्वा मृदु मृदुः ॥ ५९ ॥ पश्यतस्तस्य राजेंद्र ऋषि
शृंगो महातपाः ॥ पंचत्वमगमत्तत्र ध्यानयोगेन योगवित् ॥ ६० ॥ दाहयामास तं विप्रं विधिदृष्टेन कर्मणा ॥
स्नानं कृत्वा तु शोकार्तो रुरोद च मुमोह च ॥ ६१ ॥ इति श्री रेवाखंडे शूलभेदोपाख्याने ऋष्यशृंगस्वर्गगम
नं नाम ॥ ॥ मार्कंडेय उ॰ ॥ ततश्चानंतरं राजा उद्वेगं परमं गतः ॥ कथं किं वा करिष्यामीत्येवं चिंताभवत् ॥
परी

रे॰खं॰ ॥१९॥ ब्रह्महत्यासमाविष्टो जुहोत्यग्नौ कलेवरं॥ अथ वा ऋषिवाक्येन तं गच्छाम्याश्रमं प्रति॥ २॥ गृहीत्वा ऋषिशृंगस्य
९३ सर्वाण्यस्थीनि त्वरान्वितः॥ दक्षिणमार्गे स्थितस्य स्वस्तिमहर्षेर्भावितात्मनः॥ ३॥ मुक्त्वास्थीनि ततस्तस्य प्रणाममकरोत्ततः
॥ दीर्घतपा उ॰॥ आगच्छ स्वागतं ते घ त्वासने उपविश्यतां॥ ४॥ अर्घं ददाम्यहं येन मधुपर्कसमन्वितं॥ राजा उ॰॥ संभा
षस्य न योग्योहं किमुतार्घस्य सत्तम॥ ५॥ मृगमध्ये स्थितो विप्र तव पुत्रो मयाहतः॥ पुत्रघ्नं विद्धि मां तात तीव्रदंडे
न दंडय॥ ६॥ मृगभ्रांत्या विनिहतो ऋषिशृंगो महातपाः॥ इति मत्वा ऋषिश्रेष्ठं कुरु मे त्वं यथोचितं॥ ७॥ मातात
द्वचनं श्रुत्वा गृहान्निःक्राम्य विह्वला॥ हा हतास्मीति चोक्त्वा सु पतिता धरणीतले॥ ८॥ विलापस दुःखार्ता पु
त्रशोकेन पीडिता॥ हा हता पुत्र पुत्रेति क्रंदती कुररी यथा॥ ९॥ रुरोद करुणं माता क्व गतो मां विहाय वै॥ श्रुता
ध्ययनसंपन्नं जपहोमपरायणं॥ १०॥ आगतं त्वां गृहद्वारी कदा द्रक्ष्यामि पुत्रक॥ श्रयते कवाक्येन चंद
नं किल न शीतलं॥ ११॥ पुत्र गात्रपरिष्वंगश्चंदनादपि शीतलं॥ परित्यक्तुं न वेद्मि त्वां मद्भं पुत्र सुप्रियं॥ १२॥
पंचत्वमगमिष्यामि त्वद्विहीना सुदुःखिता॥ एवं विलपती दीना पुत्रशोकेन पीडिता॥ १३॥ मूर्च्छिता विह्वली
भूता पतिता धरणीतले॥ तां भार्यां पतितां दृष्ट्वा पुत्रशोकप्रपीडितां॥ १४॥ चुकोप स मुनिश्रेष्ठ चित्रसेनं
नृपं प्रति॥ दीर्घतपा उ॰॥ याहि याहि महापाप मा मुखं दर्शयस्व मे॥ १५॥ किं त्वया घातितो विप्र स्वकामाच्च सुतो मम॥ ब्र
ह्महत्या भविष्यंति वध्यस्ते येन पाप्मना॥ १६॥ स कुटुंबस्य मे त्वं हि मृत्युभूत उपागतः॥ एवमुक्त्वा ततो विप्रो विचिंत्य
च पुनः पुनः॥ १७॥ स्वयं कोपं परित्यज्य मुनिभावमुपागतः॥ दीर्घतपा उ॰॥ उद्वेगस्त्यज्यतां वत्स दुरुक्तं गदितं मया॥
१८॥ पुत्रशोकाभिभूतेन दुःखितेन नपार्थिव॥ किं करोति नरः प्राज्ञः प्रेर्यमाणः स्वकर्मभिः॥ १९॥ प्रायेण हि मनु
ष्याणां बुद्धिः कर्मानुसारिणी॥ अनेनैव विधानेन पंचत्वं लिखितं हि नः॥ २०॥ हत्या तव भविष्यंति पूर्वदत्ता न ९३
संशयः॥ अलक्षत्र विन्नां मध्ये दृष्टो वाष्पंस्त्वजो पिवा॥ २१॥ कस्त्वं कथय मे तथ्यं कस्मान्मे निहतः सुतः॥ चित्र

सेन उ॰॥ विज्ञापयामि ते वर्षे सांतिका यामनोपरि॥ २२॥ न विप्रो मे हं निश्रेष्ठ न वैश्यो नैव शूद्रजः॥ नव्याधो नोस्य
189
2008
अश्वावि सत्रियोहं महामुने॥ २३॥ काशिराज्ञो मृगान्हंतुं आगतो वनमुत्तमं॥ भ्रांत्या निपातितस्तत्र मृगरू
पधरो मुनिः॥ २४॥ इदानीं तव पादांते संश्रितः पातकान्वितः॥ किं कर्तव्यं मया विप्र उपायं कथयस्व मे॥ २५॥ ऋ
षिरुवाच॥ ब्रह्महत्या न राज्येन एकाभिस्वरितं नृप॥ एकादश कथं राज्या जन्मांतरगतैरपि॥ २६॥ चत्वारो मे सु
ता राजन भार्या मातृपूर्वकः॥ मया सह न जीवंति ऋषिशृंगस्य कारणे॥ २७॥ उपायं कथयिष्यामि येन शांतिर्भ
वेत्तव॥ शक्नुनो वियदितं कर्तुं सुखोपायं न सत्तम॥ २८॥ कुटुंबं मे मृतं सर्वं दाहयित्वा यथाविधि॥ गृहीत्वास्थी
नि सर्वेषां नर्मदातटमाश्रय॥ २९॥ नर्मदादक्षिणे कूले शूलभेदमिति श्रुतं॥ सर्वपापहरं तीर्थं दुःखदुःस्वप्नना
शनं॥ ३०॥ मुक्तिस्तत्र सर्वपापानां स्वर्गोस्माकं भविष्यति॥ चित्रसेन उ॰॥ सर्वमेतत्करिष्यामि तव वाक्यान्न संशयः
३१॥ सर्वं स्वमपि यत्किंचिज्जीवितं च ममानघ॥ त्वदाधीनं स्थितं सर्वं प्रयच्छामि प्रसीद मे॥ ३२॥ एवं वचनसंवा
दे वर्तमाने नृपोत्तम॥ ऊर्ध्वं स्फोटस्ततो जात मृतो सौ मुनिसत्तम॥ ३३॥ मुनिशोकसमाक्रांता मृता भार्यापि त
त्क्षणात्॥ पुत्राश्च मातृशोकेन सर्वे पंचत्वमागताः॥ ३४॥ स्नुषाः पतिव्रताः सर्वा मृतास्ता भर्तृभिः सह॥ पंच
त्वमागतान्दृष्ट्वा मुनिमुख्यान्नृपोत्तम॥ ३५॥ विमान्त्वा ह्यायया मा सयेत्तत्राश्रमवासिनः॥ तेभ्यो निवेदयामास
यथावृत्तं स पार्थिवः॥ ३६॥ स तैस्तदाभ्यनुज्ञातः काष्ठान्यानीय यत्नतः॥ दाहं संचयनं कृत्वा चित्रसेनस्ततः स्वयं॥
३७॥ गृहीत्वास्थीनि सर्वेषां रुदन्नार्तः सुदुःखितः॥ उत्तरीये द्विधा कृत्वा संवेष्ट्यास्थीनि सर्वशः॥ ३८॥ याम्यां याम्यां
प्रस्थितो राजा महादुःखसमन्वितः॥ न शक्नोति यदा गंतुं छायामाश्रित्य तिष्ठति॥ ३९॥ विश्रामं च तथा कृत्वा पुन
र्याति त्वरान्वितः॥ सचैलं कुरुते स्नानं मुक्त्वास्थीनि दिने दिने॥ ४०॥ पयो जलं निराहारः स गच्छन्दक्षिणामुखः
अचिरेणैव कालेन संगतो नर्मदातटं॥ ४१॥ आश्रमस्थान्द्विजान्दृष्ट्वा प्रणिपत्य नृपोत्तम॥ चित्रसेन उ॰॥ कथ्य

रे॰खं॰ तांश्रुत्वा मेदृश्यभागो मे हि द्विजसत्तमः॥४७॥ येन यामि महाभागाः स्वकीयार्थस्य सिद्धये॥ ऋषय ऊचुः॥ इतः क्रोशांत
९४ रादर्वाक्तीर्थं परमशोभनं॥४८॥ नर्मदादक्षिणे कूले गतो दृक्ष्यसि नान्यथा॥ ऋषिवाक्यं ततः श्रुत्वा गतः शीघ्रं नृपस
तः॥४९॥ सददर्श ततस्तीर्थं द्विजसंघसमाकुलं॥ बहुद्रुमलताकीर्णं फलपुष्पोपशोभितं॥५०॥ सेव्यमानं ऋषिकुले
र्नानाव्रतधरैः शुभैः॥ एकपादस्थिताः केचित्सूर्यावर्तास्तथापरे॥५१॥ एकांतकस्थिताः केचिदपरे चोर्ध्वबाहवः॥
दिनैकभोजनैः केचित्केचिद्वनफलाशनाः॥५२॥ त्रिरात्रभोजनाः केचित्साराकव्रतिनोऽपरे॥ चांद्रायणरताः केचित्
केचित्पक्षोपवासिनः॥ मासोपवासिनः केचित्केचित्तु कालभोजिनः॥ शीर्णपर्णाशनाः केचित्केचिच्छैवालभोजिनः॥
५३॥ जलाहारास्तथा केचित्केचिद्वायुमारुताशनाः॥ धूम्रपानरताः केचित्केचिद्दिग्वाससः॥५४॥ योगाभ्यासर
ताश्चान्ये ध्यायमानाः परं पदं॥ एवं विधान्द्विजान्दृष्ट्वा तानुभ्याम वनिर्गतः॥५५॥ प्रणाममकरोत्तेषां भक्तिप
वैर्नृपस्तदा॥ स तैस्तत्राभ्यनुज्ञातो ज्ञात्वा तीर्थवरं ततः॥५६॥ जगाम तत्र तत्तीर्थं कुंडत्रयविभूषितं॥ दृष्ट्वा चैव
तु तत्तीर्थं कुंडत्रयमनोपमं॥५७॥ गंगा तत्र समासाद्य नाम्ना देवनदी तथा॥ प्राचीसरस्वती दृष्ट्वा श्रांतिर्जाता नृप
स्य वै॥५८॥ ततो विस्मयमापन्नश्चिंतयानो मुहुर्मुहुः॥ ददर्शामिषसंयुक्तं आकाशे कुररं तदा॥५९॥ अन्ये च कुर
रास्तत्र आगता आमिषार्थिनः॥ अभयुद्धं ततस्तेषां आकाशे त्वामिषार्थिनां॥६०॥ अथ पक्षिमुखात्सर्पं आमिषं
पतितं जले॥६१॥ स्खलन स्खलितायत्र सभागो भेदितो जले॥६२॥ कुंडे पतितमात्रस्तु स सर्पः पुरुषोऽभवत॥ विमान
स्थं तु तं दृष्ट्वा प्रभावं तीर्थसंभवं॥६३॥ अस्थीनि भस्मनि निक्षिप्य स्नानं कृत्वा यथाविधिः॥ तर्पयित्वा पितॄन्देवान्
पूजयित्वा महेश्वरं॥६४॥ गृह्यास्थीनि ततो राजा विक्षेपांतर्जले तदा॥ वीक्षते क्षणमेकं तु राजा ऊर्ध्वमुखस्थितः ९४
॥६५॥ तां ददर्श ततः सर्वान्दिव्यमूर्तिधरान्शुभान॥ दिव्यवस्त्रैश्च संवीतान्दिव्याभरणभूषितान॥६६॥ वि
मानवरमारूढा पृथग्भूतान्समंततः॥ आकाशस्थान समालोक्य राजा संहर्षितो भवत॥६७॥ ऋषिर्विमान

मारूढश्चित्रसेनमथाब्रवीत॥ भो भो राजंश्चित्रसेन कृतं साधु महामते॥६८॥ त्वत्प्रसादान्नृपश्रेष्ठ दिव्यां गतिमहं गताः 191 / 2008
॥ सकुटुंबस्त्वतीर्थस्य प्रभावादुधमाश्चते॥६९॥ इदं त्वया कृष्टं कृतं परमदुष्करं॥ स्वसुतोऽपि न शक्नोति पितॄणां
कर्तुमीदृशं॥७०॥ मदीयवचनात्त्वं हि निःपापो भव पार्थिव॥ फलं प्राप्स्यसि राजेंद्र मद्वाक्यान्मनसेप्सितं॥७१॥
आशीर्वाक्यानि दत्त्वाथ चित्रसेनाय धीमते॥ स्वर्गं जगाम स मुनिस्ततो दीर्घतपा मुनिः॥७२॥ इति श्रीवायुपुराणे रेवाखं
डे श्रूलभेदोपाख्याने दीर्घतपास्वर्गगमनो नाम॥ ॥उत्तानपाद उ॥ माहात्म्यं तीर्थजं दृष्ट्वा चित्रसेनो नृपोत्तमः॥ ततः
परं किं चकार तन्मे वद सुरेश्वर॥१॥ महादेव उ॥ भृगुतुंगं समारुह्य ईशान्यां दिशि संस्थितः॥ तपश्चचार विपुलं कुंडे
तस्मिन्महीपतिः॥२॥ त्रींदेवान्स सदा ध्यात्वा ब्रह्मविष्णुमहेश्वरान॥ पतनाय मतिं चक्रे भृगुपर्वतमस्तकात॥३॥ एत
स्मिन्नंतरे देवो जगत्कर्ता महाप्रभुः॥ करे गृहीत्वा राजानं रुद्रो वचनमब्रवीत॥४॥ ईश्वर उ॥ प्राणत्यागमकाले त्वं मा
कुरुष्व महीपते॥ आयाति त्वं युवा तात न युक्तं मरणं तव॥५॥ स्वस्थानं गच्छ शीघ्रं त्वं भुंक्ष्व भोगान्यथेप्सितान॥ कुरु निः
कंटकं राज्यं नाकेत्वत्रारि वत्स यं॥६॥ चित्रसेन उ॥ न हि राज्येन मे कार्यं न पुत्रैर्न च बांधवैः॥ न भार्यया न कोशेन न गजै
र्न तुरंगमैः॥७॥ मुंच मुंच महादेव मा विघ्नं क्रियतां मम॥ स्वर्गप्राप्तिर्ममाद्यैव त्वत्प्रसादाद्भविष्यति॥८॥ महादेव उ॥
यस्याग्रतः स्थितो विष्णुर्ब्रह्मा रुद्रस्तथैव च॥ स्वर्गेण तस्य किं कार्यं स्वर्गतः किं करिष्यति॥९॥ तुष्टा वयं त्रयो देवा वर
णीष्व वरमुत्तमं॥ यथेप्सितं महाराज तमस्यमनं न संशयः॥१०॥ चित्रसेन उ॥ यदि तुष्टास्त्रयो देवा ब्रह्मविष्णुमहेश्वराः॥
अद्यप्रभृति युष्माभिः स्थातव्यमिह सर्वदा॥११॥ इदं तीर्थं महापुण्यं सर्वतीर्थवरप्रदं॥ श्रूलभेदमिति ख्यातं त्रैलो
क्येऽपि भविष्यति॥१२॥ यत्र यत्र स्थिता यूयं तत्र तत्र वसाम्यहं॥ गणानां क्रियासर्वेषां भवेयमधिपस्तथा॥१३॥
महादेव उ॥ अद्यप्रभृति तीर्थेऽस्मिन्स्थास्यामो नृपसत्तम॥ कल्पांते न त्रयो देवा स्थिकालं दिवसामहे॥१४॥
नंदिसंज्ञो गणस्त्वं हि भविष्यसि न संशयः॥ भविष्यस्यय पज्ञाच मत्समीपे सदा त्वयि॥१५॥ एवं देवा वरं दत्त्वा चित्र

रे.खं.
९५

सेनापपार्थिव॥कुंडसांनिध्यमासाद्य नयोदेवाश्च वस्थिता॥२६॥परस्परं वदंत्येवं पुण्यतीर्थमिदं शुभं॥सर्वतीर्थमयं ती
र्थं शूलभेदं भविष्यति॥२७॥इदं तीर्थं महापुण्यं यथापुण्यं गयासुर॥सकृत्पुण्योदकेनैव तुष्यंति पितरः सदा॥२८॥ए
कं गयाशिरो मुक्ता सर्वतीर्थाण्यशेषतः॥शूलभेदस्य तीर्थस्य कलां नार्हंति षोडशीं॥२९॥कुंडमुत्तरयाम्यायां दशहस्त
प्रमाणतः॥ऐंद्रवारुणकाष्ठायां प्रमाणं चैकविंशति॥२०॥एतत्प्रमाणं तीर्थस्य पिंडदानादिकर्मसु॥लोकापुण्याः
श्चंतेम सौदातु मत्र लभंतु ये॥२१॥विष्णुर्वै पितृरूपेण ब्रह्मरूपी पितामहः॥प्रपितामहश्च रुद्रो भ त्रयस्तत्रैव संज्ञिताः
२२॥पितरः पितामहा ये च तथा ये प्रपितामहाः॥अत्र तीर्थे स्थिता नित्यं प्रजां गृह्णंति ताश्च ते॥२३॥जातं जातं निरीक्ष
ते स्वपुत्रं तत्र संस्थिताः॥कदायास्यति तीर्थेस्मिन्कदानस्तारयिष्यति॥२४॥शूलभेदवने राजन्शाकमूलफले
रपि॥एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता॥२५॥पंचस्थानेषु यः श्राद्धं कुरुते भक्तिमान्नरः॥तारयेत्तेन संदे
हः सकुलान्येकविंशति॥२६॥पितृदेवप्रसादेन विप्राणां भाषितेन च॥श्राद्धदस्तु वसेत्तत्र यत्र देवो महेश्वरः॥२७
आत्मघातकरा ये च गोब्राह्मणहताश्च ये॥दंष्ट्रिभिर्जलपाते च विद्युत्पाते च ये मृताः॥२८॥नयेषामग्निसंस्कारो ना
शौचं नोदकक्रिया॥अत्र तीर्थे तु यस्तेषां श्राद्धं कुर्याच्च शक्तितः॥२९॥मोक्षप्राप्तिर्भवेत्तेषां पिंडदानान्न संशयः॥अ
ज्ञानाद्यत्कृतं पापं बालभावाच्च यत्कृतं॥३०॥तत्सर्वं नश्यते तत्र महातीर्थप्रभावतः॥रजकेन यथा धौतं वस्त्रं नि
र्मलतां व्रजेत॥३१॥तथा तत्र महातीर्थे स्नातो भवति निर्मलः॥संन्यासेन मृतो यस्तु तत्र तीर्थे विधानतः॥३२॥ऽ
ध्यायमानो महादेवं स याति परमां गतिं॥क्रीडां कृत्वा यथाकामं स्वेच्छया शिवमंदिरे॥३३॥ततो वेदांतगस्त्रोजा
यते विपुले कुले॥रूपवान्सुभगो वाग्मी सर्वव्याधिविवर्जितः॥राजा वा राजतुल्यो वा धर्माचारसमन्वितः॥एत
ते कथितं राजं तीर्थस्य फलमुत्तमं॥३५॥यः श्रुत्वा मानवो नित्यं सर्वपापैः प्रमुच्यते॥यश्चेदं श्रावयेद्भक्त्या ख्यानं द्वि ९५
जसंनिधौ॥३६॥श्राद्धे देवकुले चैव भवे सर्वेणि पर्वणि॥गिर्वाणस्तस्य तुष्यंति मनुष्याः पितृभिः सह॥३७॥पठतां शृण्व

193
2008

तां श्चैव नश्यते पापसंचयः॥लिखित्वा तीर्थमाहात्म्यं ब्राह्मणेभ्यो ददाति यः॥३८॥जातिस्मरत्वं स लभेत्तथा चाभिमतं फलं
॥३९॥इति श्रीरेवाखंडे शूलभेदे चित्रसेनापाख्यानं नाम॥ ॥उत्तानपाद उ०॥अन्यच्च श्रोतुमिच्छामि केन गंगावतारि
ता॥रुद्रमूर्ध्नि स्थिता देवी पुण्या कथमिहागता॥१॥तथा देवशिलानाम तस्या माहात्म्यमुत्तमं॥एतदाख्याहि मे सर्वं प्रसा
दात्परमेश्वर॥२॥श्रीमहादेव उ०॥शृणुष्वैकमना भूप यथा गंगावतारिता॥पुरा देवैर्महाभागैः सर्वलोकहितार्थिभिः॥३॥
अस्ति विंध्योनगो नाम याम्यां भागमाश्रितो नृप॥गीर्वाणा वै गतास्तत्र तपोनिष्ठा नृपोत्तम॥४॥तत्रादृज्ञातगंगा ब्रह्माद्याः
सुरसत्तमैः॥समभ्यर्च्य जगन्नाथं देवदेवं महेश्वरं॥५॥महेशस्य जटामध्ये दृष्टा तां गंगा स्थिता तदा॥जटामध्ये स्थितां गंगां
मोचयस्व जगत्पते॥६॥तपःसिद्धिमिहेच्छामि विंध्याद्रेर्नर्मदातटे॥तेषां वाक्यात्ततो मुक्ता रुद्रेण शिरसः सरित्॥७॥तत्र
स्थाने महापुण्ये देवैरुत्सादिता स्वयं॥ततो देवनदी जाता हिताय तु नृणां भुवि॥८॥वसंति पितरस्तस्याः स्नानं कुर्वं
ति भक्तितः॥पिबंति विमलं तोयं न ते यांति यमालयं॥९॥सा यत्र पतिता कुंडे शूलभेदे नराधिप॥देवनद्याः प्रतीच्यां
तु तत्र प्राची सरस्वती॥१०॥याम्यायां शूलभेदस्य तत्र तीर्थमनुत्तमं॥यत्र देवशिला पुण्या स्वयं देवेन निर्मिता॥११
तत्र स्नात्वा तु यो भक्त्या तर्पयेत्पितृदेवताः॥पितरस्तस्य तृप्यंति यावदाभूतसंप्लवं॥१२॥तत्र तीर्थे तु यो भक्त्या ब्रा
ह्मणान्भोजयेन्नृप॥एकविप्रेण भुक्तेन दानसंख्या न विद्यते॥१३॥ उत्तानपाद उ०॥कति दानानि शस्तानि देवेश
धरणीतले॥यानि दत्वा नरो भक्त्या मुच्यते सर्वकिल्बिषैः॥१४॥तत्र देवशिलायाश्च माहात्म्यं विस्तराद्वद॥फलं च यस्य तु तीर्थ
स्य स्नानदानादिकं प्रभो॥१५॥महादेव उ०॥आसीत्पुरा महावीर्यश्चेदिनाथो नराधिप॥वीरसेन इति ख्यातः सर्वभूतहि
तेरतः॥१६॥गुणवान्शीलसंपन्नो धर्ममूर्तिरिवस्वयं॥कुरुते राज्यमव्यग्रः सदा निहतकंटकं॥१७॥सदा मुदान्वितो रा
ज्ञा सभार्यो बहुपुत्रकाः॥एका रूपवती तस्य दुहिता गिरिजा यथा॥१८॥नाम्ना भानुमती नाम रूपेणाप्रतिमा भुवि॥दृ
ष्ट्वा च पितृमातृभ्यां वभूव गुणसंश्रया॥१९॥कृत्वा वैवाहिकं कर्म काले प्राप्ते यथाविधि॥अनंतरं चेदिपतिर्द्रव्यता

रे॰ख॰ हमरवेस्थितः॥२०॥तस्यास्ततश्च योभर्त्तासमरवेत्रामागतः॥ विधवां तां सुतां दृष्ट्वा राजा शोकसमन्वितः॥२१॥उवाचवच
९५ नं तत्र स्वभार्यां दुःखपीडितां॥ महद्दुःखमिदं जातं यावज्जीवं सुदुःसहं॥२२॥नेषा चिरं रक्षितुं शक्या रूपयौवनसंयुता॥ गछ
द्विदिवसैर्दुःखैः कुलं नौ दूषयिष्यति॥ नोपायो विद्यते भर्त्रा भानुमत्या हि रक्षणे॥ परस्परं विवादं तौ श्रुत्वा तौ पितरौ तदा॥
२४॥ प्रहस्य भानुमत्याह वचनं गौरवान्वितं॥ भानुमत्युवाच॥ परिभावय राजेंद्र विषादं मा करिष्यसि॥२५॥ सत्येनात्मस्यते
दोषो मदर्थे ते नराधिप॥ नाद्यप्रभृति केशान्वै धारयामीति मस्तके॥२६॥ शुक्लवस्त्रमहं तात धारयिष्ये जितेंद्रिया॥ तपि
ष्यामि व्रतानीह पुराणविहितानि च॥२७॥ आत्मानं शोषयिष्यामि तोषयिष्यामि माधवं॥ मामिषान्नर्तेन बुद्धिर्यदि त्वं ता
त मन्यसे॥२८॥ भानुमत्या वचः श्रुत्वा राजासं हर्षितो भवत्॥ ततः प्रस्थापयामास तनयां वृद्धसंयुतां॥२९॥ तीर्थया
त्रां समुद्दिश्य धनं दत्वा तु पुष्कलं॥ विससर्ज नृपः पुत्रीं नानाव्रतपरायणां॥३०॥ पुरुषान्सा प्रधानविप्रान्विदुषः स
पुरोहितान्॥ दत्वा दासीः पदातींश्च तस्याः संरक्षणक्षमान्॥३१॥ ततः पितुर्मतेनैव गंगातीरं जगाम सा॥ गाहयामास
राजेंद्र गंगायाश्चोत्तरे तु सा॥३२॥ नित्यं पूजयती देवान्प्रार्थिनन्यांश्च तापसान्॥ भूषणाच्छादनैर्भोज्यैः गंधमाल्यैः
सुभक्तितः॥३३॥ द्वादशाब्दानि सा तीरे गंगायाः समवस्थिता॥ सत्का गंगां ततो राज्ञी प्राप्य काष्ठां तु दक्षिणां॥३४
जगाम ब्राह्मणैः सार्धं यत्र रेवा महानदी॥ समाः पंच स्थिता तत्र ॐकारे मरकंटके॥३५॥ उदग्याम्यां ततो नानातीर्था
न्तीर्थं जगाम सा॥ तत्र स्नात्वा द्विजान्पूज्य भक्तिपूर्वं मतं[?] व्रता॥३६॥ जगाम वारुणीं काष्ठां देवनद्याश्च संगमे॥ ददर्श आ
श्रमांस्तत्र ऋषिसंघनिषेवितान्॥३७॥ दृष्ट्वा ऋषिसमूहं सा प्रणिपत्येदमब्रवीत्॥ माहात्म्यमस्य तीर्थस्य नाम चा
प्यस्य न श्रुतं॥३८॥ कथयंतु महाभागाः प्रसादः क्रियतां मयि॥ ऋषय ऊचुः॥ चक्रतीर्थं तु विख्यातं चक्रं दत्तं पुरा हरे
३९॥ महेश्वरेण तुष्टेन यत्र देवेन शूलिना॥ अत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः॥४०॥ अनिवर्तिगतिस्तस्य ९६
जायते नात्र संशयः॥ द्वितीयेन्हि ततो गच्छेत्शूलभेदं तपस्विनि॥४२॥ पूर्वोक्तेन विधानेन स्नानं कुर्यात्प्रयत्नतः॥

जन्मत्रयकृतं पापं नश्यति तस्य संक्षणात्॥४३॥ तिलमिश्रेण तोयेन प्रदद्याद्यो जलांजलित्रयं॥ तृप्यंति पितरस्तस्य द्वादशाब्
दानि पंच च॥४४॥ श्राद्धं कुरुते तत्र तु नित्यं वै ब्राह्मणैर्नरः॥ जायते पिंडदानेन पितॄणां तृप्तिरक्षया॥४५॥ अपरेन्हि ततो ग
छेत्पत्रं देवशिलां शुभां॥ यत्र साक्षाज्जान्हवी पुण्या देवैरुत्पादिता पुरा॥४६॥ स्नात्वा तत्र जलं दत्वा तिलमिश्रं नराधिप॥ स
र्वपिंडप्रदानेन मुच्यते सऋणत्रयात्॥४७॥ एकादश्यामुपवसेत्कृष्णभक्तिपरायणः॥ कृत्वा जागरणं रात्रौ श्रुत्वा पौ
राणिकीं कथां॥४८॥ कृष्णपूजां प्रकुर्वीत पुष्पधूपादिभिः क्रमात्॥ प्रभाते भोजयेद्विप्रान्दानं दद्याच्च भक्तितः॥४९॥ च
तुर्थेन्हि ततो गच्छेद्यत्र प्राची सरस्वती॥ ब्रह्मांडं द्वादिभिः क्रांता जगत्त्रयहिताय वै॥५०॥ तत्र स्नात्वा नरो भक्त्या तर्पयेत्पि
तृदेवताः॥ श्राद्धं च विधिवत्कुर्यात्पूजार्हान्पूजयेद्द्विजान्॥५१॥ पितरस्तस्य तुष्यंति बहुवर्षाण्यसंशयं॥ सर्वदेवम
यं स्थानं तीर्थानामुत्तमं परं॥५२॥ सर्वपापहरं पुण्यं कोटिलिंगनिषेवितं॥ त्रिकालं कुरुते यस्तु तत्र स्नानं जितेंद्रियः॥५३
न तस्य संभवो मर्त्ये कदाचिदपि जायते॥ नियमस्थो विमुच्येत त्रिजन्मजनिताद्घात्॥५४॥ भर्तृहीना तु या नारी त
त्र तिष्ठति सुव्रता॥ लभते साक्षयं लोकं गौर्याः सायुज्यमाप्नुयात्॥५५॥ मुनीनां वचनात्सौ चैव मुदा परमया युता॥
गाहयामास तत्तीर्थं महानिंद्रा मतं व्रता॥५६॥ दृष्ट्वा तीर्थप्रभावं तु राज्ञी वचनमब्रवीत्॥ शृण्वंतु वचनं मे यब्राह्म
णाः सपुरोहिताः॥५७॥ न त्यजामीदृशं तीर्थं यावज्जीवं महर्निशं॥ मत्पितुश्च तथा मातुः कथयध्वमिदं वचः॥५८॥ पु
त्री वः शूलभेदे नैस्था तिष्ठति व्रतचारिणी॥ एवमुक्त्वा स्थिता सा तु तत्र भानुमती शुभा॥५९॥ एकांतरोपवासस्था
विविधव्रततत्परा॥ नित्यं देवशिलासंस्था ध्यायमाना जगत्पतिं॥६०॥ समयं परमं कृत्वा नित्यं तत्कृतमानसा॥ चरण
शाकनं कृत्वा तत्र भोजयती द्विजान्॥६१॥ द्वादशाब्दानि सा राज्ञी सुव्रता तत्र संस्थिता॥ मार्कंडेय उवाच॥ अथापरं
देवशिलामाहात्म्यं कथयामि ते॥६२॥ शृणु राजन्महाबाहो इतिहासं पुरातनं॥ कश्चिद्वनवरो व्याधः पत्न्या वरो स
ह भार्यया॥६३॥ दुर्भिक्षपीडितस्तत्र ग्रामिषार्थी समागतः॥ नापश्यत्स क्षिणस्तत्र मृगानन्यान्पशूनपि च॥६४॥

195
2008

ततः संचिंतयामास सखुधापीडितविग्रहः॥ ददर्शाथ सरस्तत्र पद्मिनीखंडमंडितं॥६८॥ तं दृष्ट्वा हर्षसंयुक्तो शबरी वा
क्यमब्रवीत्॥ कुमुदानि गृहाणात्वं द्विव्यान्याहारसिद्धये॥६९॥ हे नाथ पंकजना थं चम्ब्लभेद स्यभर्जितः॥ विक्रयः कम
लानां हि कर्तव्यो भवतानघ॥६०॥ कमलानि गृहीष्यंति धर्मज्ञा कामलोजनाः॥ भार्यायास्तु वचः श्रुत्वा जग्राह कुसुमा
नि वै॥६८॥ उत्तीर्णस्तु ददर्शाथ तत्र श्रीवृक्षसमन्वितः॥ श्रीफलान्यपि जग्राह सुपक्वानि बहूनि च॥६९॥ फलभेदे सम
प्राप्ते ददर्शा बहुमानवान्॥ मधुमासि सितेपक्षे एकादश्यां नराधिप॥७०॥ तत्रोपवासिनः सर्वे बालावृद्धास्तथा स्त्रि
यः॥ ददर्श मंडपं तत्र कृतं देवशिलोपरि॥७१॥ वस्त्रैः संवेष्टितं दिव्यैः सग्माल्यैरुपशोभितं॥ रूपपश्यागतेसर्वे ये
तत्राश्रमवासिनः॥७२॥ सोपवासाः सनियमाः सर्वे सान्निपरिग्रहः॥ द्वेवनयास्तरे रम्ये ऋषिसंघनिषेविते॥७३
आगच्छद्भिर्नरैस्तत्र मार्गोपि हि न लभ्यते॥ दृष्ट्वा जनसमद्धं स तां भार्यां शबरो ब्रवीत्॥७४॥ गच्छ प्रच्छस्व किमपि
किमद्य स्नानकारणं॥ किमद्य पर्वसंज्ञातं चंद्रसूर्यग्रहादिकं॥७५॥ किमयायनमन्वादि युगादि रविसंक्रमः॥
ततः सा भर्तृवचना च्छबरी तत्र वै गता॥७६॥ पप्रच्छ नारीमध्यस्थां दत्वाह्निकमंगलतदा॥ का तिथिः कोद्य वै वारः किंप
र्वः कथयस्व मे॥ किमर्थं स्नाति लोकोयमेतत्कथयशोभनं॥ स्त्र्यु०॥ एकादशी ह्यद्य पुण्या सर्वपापक्षयंकरी
॥७८॥ उपोषिता सती नूनं नानाकर्मफलप्रदा॥ तस्यास्तद्वचनाच्छ्रुत्वा शबरी शबरायवै॥७९॥ कथयामास त
त्सर्वं स्त्रीवाक्यं नृपसत्तम॥ अद्य एकादशी शुक्ला बालवृद्धैरुपोष्यते॥८०॥ मदानैकादशी नाम सर्वपापक्ष
यंकरी॥ तथा तत्र मया दृष्टा एका राज्ञी शुभानना॥८१॥ व्रतस्थानियता हारा नाम्ना भानुमती श्रुता॥ तेन स्यास
दृशीः कापि त्रिषु लोकेषु विद्यते॥८२॥ मन्यादिश्या वरारोहा ज्ञवतीनां महीतले॥ भार्याया वचनं श्रुत्वा शब ९७
रस्तामथाब्रवीत्॥८३॥ पक्वानि भानुमत्याया दत्वा त्वं भुंक्ष्व सत्वरं॥ ममैषा वर्तते बुद्धिर्न भोक्तव्यं मयापि च॥८४
न मयोपार्जितं भद्रे पापशुद्धिकरं क्वचित्॥ शबर्युवाच॥ न कदाचिन्मया भार्या भुक्तं तुभ्यं पूर्वं हि सत्तम॥८५॥ त्वद्

१०७
२००८

त्तशेषं मे भुक्तं यावत्कालं स्मराम्यहं॥ भार्याया निश्चयं ज्ञात्वा स्नात्वा तीर्थं जगाम सः॥८६॥ अथोत्तरीयवस्त्रेण स्नानं
कृत्वा तु भक्तितः॥ सर्वान्देवान्नमस्कृत्य गतो देवशिलां प्रति॥८७॥ तत्र स्थौ शंकमानौ तु ध्यायमानौ जनार्दनं॥ यस्मा
त्तु कमले दत्ते तया राज्ञी निवेदिते॥८८॥ दृष्ट्वा भानुमती पश्चेदासीं पप्रच्छ विस्मिता॥ कुत्र पुष्पद्वयं लब्धं दूदं वै कथ्य
तां मम॥८९॥ शीघ्रं तत्रैव गत्वा तं पुष्पाण्यनानि चानय॥ धान्येन वसुना वापि सर्वं त्वं नापि भामिनी॥९०॥ भानुमत्या व
चः श्रुत्वा सा गता शबरं प्रति॥ प्रार्थयामास देहीति पद्मानी श्रीफलानि च॥९१॥ धान्येन वसुना वापि पूजनार्थं जनार्द
नं॥ शबर उवाच॥ विनामूल्येन दास्यामि पद्मानि श्रीफलानि ते॥९२॥ मूल्ये मम स्पृहा नास्ति गत्वा राज्ञी निवेदय॥ त
या च सत्वरं गत्वा यथावच्च निवेदितं॥९३॥ तद्दासी वचनं श्रुत्वा सा च राज्ञी स्वयं गता॥ उवाच शबरीं प्रीत्या पुष्पाण्यर्प
य मूल्यतः॥९४॥ शबर उ०॥ न मूल्यं कामये देवी फलपुष्पसमुद्भवं॥ विना मूल्येन पुष्पाणि यथेच्छं मम गृह्यतां॥९५॥
पूजां कुरु यथान्यायं वासुदेवे जगत्पतौ॥ राज्ञ्यु०॥ विनामूल्यं न गृह्णामि कमलानि तवाधुना॥९६॥ दशद्रोणमि
तं धान्यं साधिकं वा प्रगृह्यतां॥ वसु रत्नं सुवर्णं च अन्यं ते यदीप्सितं॥९७॥ तत्सर्वं तत्प्रदास्यामि कमलार्थे तवा
धवे॥ शबर उवाच॥ नाहारं चिंतयाम्यद्य मुक्त्वा देवं वरानने॥९८॥ देवकार्यं विनामेघ नान्या बुद्धिः प्रवर्तते॥ राज्ञी
उ०॥ नत्वयान्नं परित्याज्यं सर्वमन्ने प्रतिष्ठितं॥९९॥ तस्मात्सर्वप्रयत्नेन ममान्नं प्रतिगृह्यतां॥ तपस्विनो महा
भागा ये चारण्यनिवासिनः॥१००॥ गृहधर्मरताः सर्वे याचंते चान्नकांक्षिणः॥ शबर उ०॥ नियमो मे कृतः पूर्वं
सर्वं सत्ये प्रतिष्ठितं॥१॥ सत्येन तपते सूर्यः सत्येन यो ततेन्नरी॥ सत्येन तिष्ठत्युदधिर्वायुः सत्येन वाति वै॥२॥ स
त्येन पच्यते सस्यं गावः क्षीरं ददंति हि॥ सत्याधारमिदं सर्वं जगत्स्थावरजंगमं॥३॥ तस्मात्सर्वप्रयत्नेन सत्यं देवि
न लोपये॥ देवकार्ये हि मुक्त्वा मे नान्या बुद्धिः प्रवर्तते॥४॥ गृहाण राज्ञि पुष्पाणि कुरु पूजां जनार्दने॥ श्रूयते हि
नया स्पंहि अदोषास्या ददामि वः॥५॥ कुशाः शाकं पयो मत्स्या गंधाः पुष्पं दधिक्षितिः॥ मांसं शय्या सनं वस्त्रं प्र

रे·खं· ९८ स्वाख्येयंनवारिच॥ ६॥ राज्ञीउ०॥ आरामोपहृतंपुष्पंआरण्यंपुष्पमेवच॥ क्रीतंप्रतिग्रहेलब्धंपुष्पमेतच्चतुर्विधं॥
७॥ उत्तमावनपूजाचक्रयक्रीताचमध्यमा॥ अधमायाचितापूजास्तेयेनान्यअधमाधमा॥ ८॥ पुरोहितउ० गृहाण
राज्ञीपुष्पाणिकुरुपूजांजनार्दने॥ उपकारोस्यकर्तव्योव्यपदेशोनकर्हिचित्॥ ९॥ तस्यतद्वचनंश्रुत्वाश्रद्धासंसक्तमा
नसा॥ गृहीत्वातानिपुष्पाणिपूजांचक्रेजनार्दने॥ १०॥ क्षिपाजागरणंचैवश्रुत्वापौराणिकींकथां॥ शबरस्तुततो
भार्यामिदंवचनमब्रवीत्॥ ११॥ दीपार्थंगृह्यतांतैलंदीयधालाभेनसुंदरी॥ साग्रहीत्वाततःस्नेहंकृत्वादीपंचभक्ति
तः॥ १२॥ कृत्वाजागरणंरात्रौध्यायमानौजनार्दनं॥ ततःप्रभातसमयेदृष्टःस्नातोतसकोजनः॥ १३॥ रुद्रकुंडेस्थिताः
केचित्तैस्नानंकुर्वंतिभक्तितः॥ शुचिर्भूयजनाःसर्वेस्थितादेवजलोपरि॥ १४॥ श्राद्धंकुर्वंतितेतत्रप्रयत्नेनद्विजर्ष
भाः॥ तंदृष्ट्वाशबरोविलैःपिंडांनिर्वपतेततः॥ १५॥ भानुमत्यातथाभर्तुःपिंडनिर्वपनंकृतं॥ अनिंद्यान्भोजयामा
सविप्रान्सर्वार्थसाधकान्॥ १६॥ हविष्यान्नैस्तथादध्नान्नार्करामधुसर्पिषा॥ पायसेनचगव्येनकृतान्नेनविशेष
तः॥ १७॥ भोजयित्वाद्विजान्राज्ञीददौदानंयथाविधिः॥ तत्रतीर्थेमहाराजकपिलांयःप्रयच्छति॥ १८॥ तेनपृथ्वीभ
वेद्दत्तासशैलवनकानना॥ उत्तानपादउ०॥ यानियानितुदानानिशस्तानिजगतीतले॥ १९॥ तानिसर्वाणिदेवेश
कथयस्वप्रसादतः॥ माहादेवउ०॥ तिलप्रदःप्रजामिष्टांदीपदश्चक्षुरुत्तमां॥ २०॥ भूमिदःस्वर्गमाप्नोतिदीर्घायु
श्चहिरण्यदः॥ गृहदोरोगरहितोभूपतिर्जायतेध्रुवं॥ २१॥ गंधदोभवतेभोगीरूप्यदोरूपवान्भवेत्॥ वासोद
श्चंद्रलोकंतुअश्वदोर्कस्यलोकभाक्॥ २२॥ वृषदस्तुश्रियंपुष्टांगोदातात्रिविष्टपं॥ यानशय्याप्रदोभार्यामे
श्वर्यमभयप्रदः॥ २३॥ धान्यदःशाश्वतंसौख्यंब्रह्मदोब्रह्मशाश्वतं॥ सर्वेषामेवदानानांब्रह्मदानंविशिष्यते॥
२४॥ दानंयोमहिषीदद्यान्ननतेपश्यंतिसूर्यजं॥ येनयेनहिभावेनदानंविप्रायदीयते॥ २५॥ तेनतेनहिभावेन ९८
प्राप्नोत्यप्रतिमंफलं॥ दृष्ट्वादानानिसर्वाणिराज्ञीदत्तानियानिच॥ २६॥ उवाचशबरोभार्यांतच्छृणुष्वनराधिप

शबरउ०॥ पुराणंपवित्रंभद्रेब्राह्मणैर्वेदपारगैः॥ २७॥ श्रुतंचतन्मयासर्वंदानधर्मफलंशुभं॥ पूर्वजन्मार्जितंपापंस्नान
दानादिभिर्हतं॥ २८॥ शरीरंदुस्त्यजंमुक्त्वालभामिगतिमुत्तमं॥ संसारसागराद्घोरान्नित्यंभद्रेवसाम्यहं॥ २९॥ अनेकानि
च पापानिकृतानिबहूनिमया॥ घातिताजंतवोभद्रेनिर्दग्धाःसर्वतामया॥ ३०॥ तेनपापेनदग्धोहंदारिद्र्येननिवर्तते
॥ मातुर्गृहंप्रयाहित्वंत्यजस्नेहंममोपरि॥ ३१॥ भृगुश्रृंगंसमासाद्यक्षेप्स्यामिआत्मदेहंतनुं॥ शबरीउ०॥ मातापित्रानमे
कार्यंस्वजनैर्नचबांधवैः॥ यागतिर्वैभवेत्तेद्यसमामपिभविष्यति॥ नस्त्रीणांभिद्यतेधर्मोविनाभर्ताहिजीवितं॥ ३३
कुरुमभो॥ भार्यायावचनंश्रुत्वासानंदःशबरस्तदा॥ ३५॥ गृहीत्वाश्रीफलंशीघ्रंदेवायाविनिवेद्यच॥ सर्वान्देवान्नम
स्कृत्यभुक्त्वाचसहभार्यया॥ ३६॥ चैत्र्यांचविषुवंज्ञात्वातस्थौतत्रदिनत्रयं॥ १३७॥ इतिश्रीरेवाखंडेशबरोपाख्या
ना॥ नाम॥ ७४॥ ॥ माहादेवउ०॥ विप्रान्भानुमतीभोज्यवभुक्तेशेषमग्रतः॥ भुक्त्वाचसुखमास्थायतदव्रजंपरिणा
म्यच॥ १॥ नर्मदायांततोगत्वामर्त्याभानुभानुमतीतदा॥ मार्कंडस्यहृदेस्नात्वापूज्यदेवंगुहास्थितं॥ २॥ कृतोपवा
सः॥ क्षिपाजागरणंकृत्वाश्रुत्वापौराणिकींकथां॥ ४॥ नृत्यगीतैस्तथास्तोत्रैर्ध्यायमानंमहेश्वरं॥ प्रभातेभोजयामास
विप्रान्पायससर्पिषा॥ ५॥ दत्वादानानिविप्रेभ्योभक्त्यानृत्त्यानुसारतः॥ चातुर्वर्ण्यास्ततोलोकान्भोजयामाससर्व
तः॥ चतुर्दश्यांदिनेदेवंसंपूज्यवृषभध्वजं॥ वादित्रशंखभेरीभिःपटहध्वनिनादितं॥ ७॥ रात्रौजागरणंकृत्वाप्रभात
जनसंकुलं॥ कथाश्रवणव्याजेनप्रेषितानुज्ञानिसातदा॥ ८॥ ततस्तेब्राह्मणाःसर्वेवेदाध्ययनतत्पराः॥ तसर्वंकी
र्तयामासपद्मकंनामनामतः॥ ९॥ आदित्यस्यदिनंत्वपतिथिःपंचदशीशुभां॥ वाष्ट्रमेवचनक्षत्रंसंक्रांतिर्विषुवत्त
था॥ १०॥ व्यतीपातस्तथायोगःकरणंविष्टिसंज्ञितं॥ पद्मकंनामपर्वस्यापद्मदानैःशताधिकं॥ ११॥ अस्मिंदत्तंकृतं

149
2005

रे॰ खं॰ तस्मात्स्वर्गस्य सोपान सन्धेयं भवेत॥ ततो राजा द्विजो सोऽपि शब्दो गगनमागतः॥१३॥ इति श्रीशबरं कृत्वा शीघ्रं यथा सह पार्थिव॥ राजोवाच॥ निष
९९ विधमहात्मा तत्रैव शृणुष्व वचनं मम॥१३॥ किमर्थं त्यक्तं प्राणान्नं यथाविधि भवान्॥ किंतु वदता का नु संतापः कारिका कस्य
हेतवे॥१४॥ सुखात्व दुःखे पापि मरणं कारणाद्व॥ शबर उ॥ कारणानानि मे वर्तन्ते किं विवहार॥१५॥ संसारना
मतात्स्थना स्यात्तु शिवं प्रवर्तते॥ दुःखेन लभ्यते यस्मान्मानुषत्वं वरानने॥१६॥ मानुषं जन्म संप्राप्य यो न धर्मं समाचरेत॥
स्वाति नरकं घोरं आत्मदोषेण सुंदरि॥१७॥ तस्मात्पातितुमिच्छामि तीर्थे स्मिन् मुखमिच्छया॥ राजोवाच॥ अथापि वर्तते
कालो धर्मस्योपार्जने तव॥१८॥ पापसंभवं तेषां द्विनानि वा विलुप्यति॥ यदृच्छायाम्यतिधान्यं वा मामिद्र विगतया॥१९॥
नित्यमाचर धर्मं त्वं ध्यायमानो महेश्वरं॥ शबर उ॥ नर्मदा विपार्श्वे या यान्नं प्रार्थयामि कदाचन॥२०॥ योऽयं स्यान्नं समाप्नोति
सतस्याश्नाति किल्बिषं॥ राजोवाच॥ कंदमूलफलाहारो भ्रमित्वा भक्ष्य मुत्तमं॥२१॥ अवगाहयन्नर्मदा तीर्थे सर्वपापैः प्रमु
च्यते॥ ततो विमुक्तपापस्तु यत्किंचित्कुरुषे शुचिः॥२२॥ कर्मणा तेन तत्र त्वं सद्गतिः प्राप्स्यसि ध्रुवं॥ शबर उ॥ अन्नमय
मयात्यक्तं प्राणादिष्टतरा हि यत॥२३॥ मरणं न कोऽपि पाप्यमिति मे वर्तते मतिः॥ प्रसादं क्रियतां देवि समस्तं तव जनैः सह
॥२४॥ इत्युक्त्वा निश्चयं कृत्वा प्राणं पत्यवतां ततः॥ अथोत्तरीयवस्त्रेण बध्वात्मानं प्रयत्नतः॥२५॥ भार्यया सहितो
व्याघ्रोहरिध्यात्वा प्रपातह॥ न गार्त्तं स्पृष्टितो यावद्भूतजीवा बभूवतुः॥२६॥ चर्णाभितो ततस्तत्रानुपतितो कुंडमध्यतः॥
त्रिमुहूर्तं गते काले शबरो भार्यया सह॥२७॥ दिव्यं विमानमारुह्य रुद्रलोकं जगाम ह॥२८॥ इति श्रीरेवाखंडे भ्रूलभे
दशबरस्वर्गगमनं नाम॥७५॥ ॥उत्तानपाद उ॥ स्वर्गतं शबरं दृष्ट्वा दैविका मकरोत्ततः॥ अतः परं चरितं वद दे
वप्रसादतः॥१॥ मार्कंडेय उ॥ चिंतयित्वा मुहूर्तं सा गत्वा कुंडस्य सन्निधौ॥ दृष्ट्वा कुंडस्य माहात्म्यं देवी हर्षेण पूरिता॥
२॥ विप्रानाहूय चव हूनपूजयामास भामिनी॥ दत्वा तु विविधं दानं ब्राह्मणेभ्यो नराधिप॥३॥ निश्चयं परमं कृत्वा स्थि ९९
ता सा शांतचेतसा॥ ततः संपूज्य विधिवत् पितृदेवद्विजार्चिनः॥४॥ क्षपित्वा पक्षमेकं तु मधुमासस्य सत्वरा॥ पक्षांते

चत्वारो राजगता पर्वतमूर्धनि॥५॥ नराश्टंगं समारुह्य चकार करसंपुटं॥ आहूय ब्राह्मणान्सर्वान् इदं वचनमब्रवीत॥६॥ 201/2008
मम माता पिता भ्राता तथान्यान् सर्वबांधवान्॥ सर्वांक्षमापयत्वेति वचनं मम कथ्यतां॥७॥ पुत्री ति भ्रूलभेदस्था तपः कृत्वा
सुदुःकरं॥ प्रक्षिप्य शृंगादात्मानं तस्मिंतीर्थे दिवंगता॥८॥ विप्रा उ॥ संदेशं कथयिष्यामि त्वया योक्तं शोभनव्रते॥ मातुः पितुस्ते
बंधूनां मा ते दंभं त्रसंशयः॥९॥ ततो विसृज्य तान् लोकान् स्थिता पर्वतसंनिधौ॥ अथोत्तरीयवस्त्राभ्यां गाढं कृत्वात्मनस्त
नुं॥१०॥ ततश्चिक्षेप चात्मानमेकचित्तान् पात्मजा॥ न गार्त्तं पतिता यावत्तावत्प्राप्ताः सुरांगनाः॥११॥ भो भो वत्से महाभागे
राजपुत्री तपस्विनी॥ दिव्यं विमानमारुह्य कैलासं व्रज शोभने॥१२॥ ततो वै पश्यतां तेषां जनानां सा दिवं गता॥ वरं विमा
नमारूढा वीज्यमानाः सुचामरैः॥१३॥ एषते कथितः सर्वं भ्रूलभेदस्य विस्तरः॥ यः श्रुतः शंकरात्सर्वं ऋषिदेवसमागमे॥
॥१४॥ यइदं पठते भक्त्या तीर्थे देवकुले पि वा॥ समुच्यते पापसंघानपि जन्म नातार्जितान्॥१५॥ ब्रह्महा च सुरापी च स्ते
यी च गुरुतल्पगः॥ गोघाती स्त्रीविघाती च देवब्रह्मस्वहारकः॥१६॥ स्वामिद्रोही मित्रघाती तथा विश्वासघातकः॥
परन्यासापहारी च परनिक्षेपलोपकः॥१७॥ रसभेदी तुलाभेदी तथा वार्धुषिकस्तु यः॥ कन्याविघ्नप्रकर्ता च क्रयविक्र
यकारकः॥१८॥ परभार्यां भ्रातृजायां स्नुषां यो कन्यकां सुयः॥ अभिगामी परद्वेषी तथा धर्मप्रदूषकः॥१९॥ वेदानां
वेदविप्राणां निंदकः कार्यदूषकः॥ एतान्यापान्प्रमुच्यंते शिवस्य वचनं यथा॥२०॥ इयं दंष्ट्रा च ये श्राद्धे ब्राह्मणं भुंजतोन्न
प॥ मुदं प्रयांति तित्प्राः पितरस्तस्य सर्वदा॥२१॥ यश्चेदं शृणुयाद्भक्त्या पठ्यमानं नरोत्तमं॥ समुक्तः सर्वपापेभ्यो
सर्वकल्याणमाप्नुयात्॥२२॥ इदं यशस्यमायुष्यं पुण्यं पापप्रणाशनं॥ आख्यानं भ्रूलभेदस्य किमतः परमुत्तमं॥
२३॥ इति श्रीरेवाखंडे भ्रूलभेदोपाख्याने भानुमतीस्वर्गगमनं नाम॥७६॥ ॥मार्कंडेय उ॥ अतः परं महाराज रे
वाया उत्तरे तटे॥ कपिलेश्वरतीर्थं तु दुःखदुःस्वप्ननाशनं॥१॥ पुरा नारायणांशस्तु कपिलो वै महामुनिः॥ तेनैवं स्था
पितं तीर्थं तपः कृत्वा सुदारुणं॥२॥ सागरान् पश्चिमान् हत्वा नदृग्गोचरगतान्नपि॥ भस्मीचकार पाताले निमेषार्धे

नसर्वशः॥३॥ दुर्हृष्ट्वातानसदग्धादोतर्णमत्रागतोमुनिः॥ तपोव्ययाच्चकपिलः स्वदोषंत्वंविचार्यया॥४॥ नर्मदातीरमासा
यततत्तेपेसुदुष्करं॥ बहुकालंनपश्चेष्ठस्थापयामासशंकरं॥५॥ स्वनाम्ना सर्वपापघ्नंलोकानांचहितायवै॥ ततः प्रभृति
पर्यंतेकपिलेश्वरसंज्ञितं॥६॥ अत्रस्नानंतथाश्राद्धंदानंदेवार्चनंनृप॥ तिलोदकंपितृणांचसर्वमक्षयतांव्रजेत॥ ७॥ संपूज्य
कपिलेशंचभवेदुःखप्रनाशनं॥ पुण्यलोकमवाप्नोतियत्रसिद्धाःसनातनाः॥८॥ इतिश्रीरेवाखंडेकपिलेश्वरतीर्थंनाम॥
७७॥ ॥मार्कंडेयउ॰॥ ततोगच्छेनराजेंद्रसंगमंपापनाशनं॥ नर्मदादक्षिणेकूलेमोक्षनद्याःशुभावहं॥१॥ क्रोशद्वयांतरे
पार्थपुण्यंऋषिनिवेदितं॥ पुरामुमुक्षुभिःसिद्धैःनर्मदातीरमाश्रितैः॥२॥ संगमार्थंसरिच्छ्रेष्ठामोक्षसंज्ञाविनिर्मिता॥ सं
गमेद्विगुणंपुण्यंमहानद्याश्चतुर्गुणं॥३॥ इतिमत्वाफलाधिक्यंदृष्ट्वाद्विर्मुक्तिलक्षणं॥ विप्रैरावाहितंपर्वतेनमोक्षनदीस्मृ
ता॥४॥ तत्रस्नात्वामहाराजसंगमेःपापनाशने॥ पुण्यांगतिमवाप्नोतिपितॄंस्तारयतेतथा॥५॥ तिलोदकप्रदानेनक
ष्टान्मोच्यतेपितॄन॥६॥ इतिमोक्षनदीसंगमोनाम॥७८॥ ॥मार्कंडेयउ॰॥ ततोगच्छेतराजेंद्रविमलेश्वरमुत्तमं॥ वि
मलत्वमिदंपुण्यंपुरावैश्यप्रकाशितं॥१॥ गोपालःकपिलोनामचारयन्बहुगोधनं॥ निर्दयस्तेनगाःपापःपरंताडयतिस्म
जन॥२॥ एकदागोधनाद्दूरागौरेकाकुपथाश्रिता॥ दृष्ट्वातेनद्रुतंगत्वाताडिताल्कुटेनहि॥३॥ मूर्छितासाततःपार्थपपा
तचममारच॥ वत्सस्तस्यागृहेबद्धोविनास्तन्यंमृतस्तथा॥४॥ ततःकालेनराजेंद्रराज्ञोनित्यसुभरुधीः॥ सुप्तोभवेद्यदा
तस्यमुखाद्धूंभारवोभवेत॥५॥ कृमिराशिश्चमुखतःकर्णनासास्थितोमहान॥ निःसरत्यनिशंपार्थपुनःस्वस्थानमाप्नु
यात॥६॥ एवंगतेतस्यभार्याकालेनमहताततः॥ एकदाशब्दमाकर्ण्यजाग्रतीविस्मिताभवत॥७॥ दीपद्योतंततःकृ
त्वायावत्सन्पश्यतिसर्वतः॥ तावत्तत्रैवभर्तारंददर्शकृमिदूषितं॥८॥ सर्वश्रोतेषुसर्वांगेकृमिभिःपरिवेष्टितं॥ ततःसा
बोधयामासपतिंकुत्सितमादरात॥९॥ यावद्बोधयतेनिस्सेतावत्तेकृमयोगताः॥ यथास्थानेनृपश्रेष्ठसतथैवपुनः १००
स्थितः॥१०॥ तयानुकथितंसर्वंगोवेष्टादिविचेष्टितं॥ सभार्यावचनंश्रुत्वाविषादंपरमंगतः॥११॥ विहायगेहव्या

203/2005

पारंकर्मगोरक्षणादिकं॥ तीर्थांतीर्थंव्रजंदीनोयथालाभेनवर्तयन॥ इमंदेशमनुप्राप्तोरेवायाउत्तरेतटे॥ द्वादशाहंनिराहा
रस्थापयामासशंकरं॥१३॥ नार्मदंशिवलिंगंतुसर्वदोषमलापहं॥ विनिद्रश्चनिराहारस्त्रिस्नायीमौनमाश्रितः॥१४॥
बिल्वपत्रार्कधत्तूरैःपूजयन्पार्वतीपते॥ त्रयोदशोह्निसंप्राप्तेरात्रौजाग्रद्घटास्थितः॥१५॥ पूजांकृत्वागतःपार्थतावत्सां
शान्महेश्वरः॥ प्रत्यक्षस्तस्यैवैश्यस्यतमुवाचजगत्पतिः॥१६॥ भोवैश्यवर्यतुष्टोस्मित्वद्दास्यकिंतेददाम्यहं॥ वैश्यउवाच
॥ यदितुष्टोसिदेवेशममसर्वजगत्पते॥१७॥ ज्ञाताज्ञातंलघुस्थूलंकृतंनानाविधंमया॥ तंपापसंघसकलंनाशयस्व
मयिस्थितं॥१८॥ त्वमत्यमतुलंदेहिशिवभक्तिंचशाश्वतं॥ कृत्यांतेत्वत्पुरीभूयामिमंदेहिमहेश्वर॥१९॥ येनयेनहिभा
वेनपरत्वामर्चयतेत्रवै॥ तेनतेनहिभावेनतंकामंतस्यपूरय॥२०॥ सांनिध्यमत्रसततंतीर्थेभवसनातनं॥ श्रीमहादे
वउ॰॥ एवंभवतुभोवत्सदत्तमेतन्मयातव॥२१॥ विमलत्वंसदाभूत्वागणत्वंममयास्यति॥ विमलेश्वरनाम्नाहंचि
रंस्थास्येभयापह॥२२॥ इत्युक्त्वांतर्दधेदेवोवरंदत्वायुधिष्ठिर॥ ततःकालेनाकियतावैश्योरुद्रगणोभवत॥२३॥ इति
तेकथितंतीर्थंविमलेश्वरमुत्तमं॥ विमलेश्वरतीर्थंतुयःस्नानंकुरुतेनृप॥२४॥ सर्वपापमलंत्यक्त्वाशिवलोकमवाप्नु
यात॥ पूजयित्वामहेशानंविमलेश्वरसंज्ञितं॥२५॥ महेश्वरगणोभूत्वाचिरंकालंसमोदते॥ तिलोदकेनपितरस्तृ
प्तिंगच्छतिशाश्वतं॥२६॥ इतिश्रीविमलेश्वरतीर्थंनाम॥७९॥ ॥अतःपरंप्रवक्ष्यामिउलूकहृदमुत्तमं॥ संगमान्
मोक्षनद्यास्तुस्थितंक्रोशत्रयांतरे॥१॥ गौरग्रामसमीपेतुस्मृतंक्रोशांतरेनृप॥ रेवायादक्षिणेकूलेपापक्षयकरंशुभं
॥२॥ उलूकश्चिरजीवीतुपुरारेवातटाश्रितः॥ बिल्वसंस्थश्चिरंकालंवर्ततेनिशिसंचरन॥३॥ काकव्यापादनंनित्यं
कुरुतेनिशिसंचरन॥ यथालब्धेनचसदाकरोतिप्राणधारणं॥४॥ एवंवर्षशतानांहिव्यतीतानितुतस्यवै॥ भ्रमाद्
एकदाकाकैर्दृष्टस्तत्रबिलेशयः॥५॥ तन्मध्येचिरजीवीतुःमहाध्वांक्षोहिकश्चन॥ काकराडितेनसर्वैश्चकृतान्मा
रणेमतिः॥६॥ भोकाकाःशत्रुरस्माकंमयंउलूकश्चिरजीविनः॥ सर्वैर्मिलित्वापापात्मामारणीयोरिपुर्हिनः॥७॥ इति

रे॰ खं॰ कृत्वा मतिं सर्वे काष्ठान्यानिन्युस्ततः॥ कोलाहलं प्रकुर्वाणा विलंबेन्तु परस्परं॥८॥ वह्निं चापि समानीय ज्वालया मा समु
१०१ द्गता॥ ज्वाला न पश्यति रिपुर्वयं राज्ञीकदाचन॥९॥ तस्माद्दूर्वाधः पापात्मा दग्ध एष ममारच॥ गच्छध्वं स्वस्व निलयान्निवसध्वं
यथासुखं॥१०॥ शत्रुश्चिरकालीनो दग्धः सर्वे रुपायतः॥ इति संभाष्य सर्वे पि परस्परहितैषिणः॥११॥ नानागतिः प्रकुर्वाणा
जग्मुः सर्वे यथागतं॥ ततः संज्ञातनिर्वाणं विलं हार्यं नलः खगः॥१२॥ मत्वा निःज्ञागमं तस्मान्मंदं विनिर्गतः॥ दग्धपक्ष
स्तथार्तो वैमांसपिंड समोनृप॥१३॥ क्षुधितो ग्लानिमापन्नः परितप्तवपुः क्रमन्॥ पपात तां भसि रेवायाः दग्धपक्षो ममार च
१४॥ ऊर्मिभिस्तु समाकृष्टो मत्स्यैर्जग्धं तदामिषं॥ रेवाह्रदे तदस्थीनि स्थितानि चिरमंजसा॥१५॥ उलूकश्च महाराज तेन क
र्मा पुरे भवत्॥ राजा कासीश्वरः पार्थ तीर्थस्यास्य प्रभावतः॥१६॥ जातिस्मरः स वै राजा तीर्थं स्मरति नित्यशः॥ प्रच्छन्न
स्यारतां रेवां तथा गृध्रह्रदं ततं॥१७॥ निवासं तस्य तीर्थस्य रोचयत्स निशां नृप॥ एवं ते कथितं सर्वं उलूकं तीर्थमुत्तमं
१८॥ ततः प्रभृति विख्यातं नाम्ना गृध्रह्रदं शुभं॥ कुल्यानदीसमीपे तु तत्र स्नानं समाचरेत्॥१९॥ लभते चाक्षयान्
लोकान्नृपति र्जायते भुवि॥ श्राद्धं प्रकुरुते यस्तु येन केनापि पांडव॥२०॥ पितरस्तस्य तृप्यंति द्वादशवर्षाणि पंच च॥२१॥
इति श्री रेवा उलूक तीर्थं नाम॥८०॥ ॥ मार्कंडेय उ॰॥ ततः पुष्करिणीं गच्छेत् सर्वपापप्रणाशिनीं॥ रेवाया उत्तरे कू
ले कोनान्द्वे विमलं ततः॥१॥ श्रुते यस्याः प्रभावे तु सर्वपापैः प्रमुच्यते॥ यत्रास्ते सर्वदा देवो वेदमूर्तिर्दिवाकरः॥२॥ कु
रुक्षेत्रं यथा पुण्यं सर्वकामिकमुत्तमं॥ इदं तीर्थं तथा पुण्यं सर्वकामिकमुत्तमं॥३॥ प्रत्यक्ष प्रत्ययो यात्र दृश्यते सज्ज
नैः सदा॥ विनिर्त्रायते वैमनुष्या पुष्करिण्यां सदा नृप॥४॥ कुरुक्षेत्रे यथा नृणां दानस्यानंतगतिः पते॥ पुष्करिण्यां तथा दानं
वर्धते नात्र संशयः॥५॥ यव मेकं तु यो दत्वा सौवर्णं मस्तकेनृप॥ पुष्करिण्यां कृतस्नानः सर्वपापैः प्रमुच्यते॥६॥ सू
र्यग्रहे तु यः स्नात्वा दद्याद्दानं यथाविधिः॥ हस्त्यश्वरथरत्नानि गृहं गावो धुरंधुरान्॥७॥ सुवर्णं रजतं वा पि ब्राह्मणे १०१
भ्यो ददाति यः॥ त्रयोदशादिनान्येवं त्रयोदशगुणं भवेत्॥८॥ तिलोदकेन यस्तत्र तर्पयेत्पितृदेवताः॥ द्वादशाब्दं भ

वेत्तृप्तिः तत्र तीर्थे नृपोत्तम॥९॥ यस्तत्र कुरुते श्राद्धं पायसैर्मधुसर्पिषा॥ पिंडदो लभते स्वर्गे पितृणां दत्तमक्षयं॥१०॥ इंगु 205/2008
दैर्बदरैर्बिल्वैरक्षतैर्वा तिलैस्तथा॥ अक्षय्यं फलमाप्नोति तस्मिंस्तीर्थे न संशयः॥११॥ तत्र स्नात्वा तु यो देवं पूजयेत्तं दिवाक
रं॥ आदित्यहृदयं जप्त्वा मुच्यते सर्वपातकैः॥१२॥ यस्तत्र त्यजति प्राणान्विधिवन्नृपसत्तम॥ स याति परमं स्थानं यत्र देवो
दिवाकरः॥१३॥ इति श्री रे॰ पुष्करिणी तीर्थं नाम॥८१॥ ॥ मार्कंडेय उ॰॥ भूयोन्यत्संप्रवक्ष्यामि आदित्येश्वरमुत्तमं॥ सर्वदुः
खहरं पार्थ सर्वपापप्रणाशनं॥१॥ आयुः श्रीवर्धनं नित्यं पुत्रदं स्वर्गसाधनं॥ यस्य तीर्थस्य चान्यानि तीर्थानि कुरुनंद
न॥२॥ नलभंते श्रियं नाके मर्त्यपातालगोचरे॥ कुरुक्षेत्रं गयां गंगां नैमिषं पुष्करं तथा॥३॥ वाराणसीं च केदारं प्रया
गं रुद्रसंभवं॥ महाकालं सहस्राक्षं शुक्लतीर्थं नृपोत्तम॥४॥ एतत्तीर्थस्य सर्वाणि कलां नार्हंति षोडशीं॥ रवितीर्थं च य
त्पुण्यं शृणु धन्नृपसत्तम॥५॥ स्नेहात्ते कथयिष्यामि बाधकेनापि पीडितः॥ शृण्वंतु ऋषयः सर्वे तपोनिष्ठा महौजसः॥६॥
श्रुतं मे रुद्रसांनिध्ये नंदिस्कंदगणैः सह॥ देव्या पृष्टो महादेवो रवितीर्थस्य यत्फलं॥७॥ शंभुना पितदाख्यातं गिरि
जाया ससंभ्रमं॥ तत्सर्वमेकचित्तेन रुद्राद्गीतं श्रुतं मया॥८॥ तत्तेहं संप्रवक्ष्यामि शृणु यत्नेन पांडव॥ दुर्भिक्षोपह
ताः पूर्वं नर्मदामाश्रिता द्विजाः॥९॥ उद्दालको वसिष्ठश्च मांडव्यो गौतमः कविः॥ याज्ञवल्क्यो थगर्गश्च शांडिल्यो
भार्गवो यमः॥१०॥ नाचिकेतो विभांडश्च वालिखिल्यादयस्तथा॥ शातातपश्च शंखश्च जैमिनिर्गालिकोवसुः॥११॥
जैगीषव्यः शतानीको लिखितो विष्णुदवलौ॥ एते चान्ये च बहव ऋषिसंघसमावृताः॥१२॥ तीर्थयात्राकृतास्ते तु
नर्मदायाः समंततः॥ आदित्येश्वरमायाताः प्रसंगाद्विपुंगवाः॥१३॥ तत्र दृष्टं वनं तैस्तु प्रसंगात्कौतुकान्वितः॥ ख
लैः संछादितः शालैः धवैस्तिंदुकपाटलैः॥१४॥ जंबीरैरर्जुनैर्बिल्वैः केसरैर्नागकिंशुकैः॥ पुंनागैर्नारिकेलैश्च
खदिरैः कल्पपादपैः॥१५॥ अनेकश्वापदाकीर्णं मृगमार्जारसंकुलं॥ ऋक्षहस्तिसमायुक्तं चित्रकैश्च सुशोभि
तं॥१६॥ प्रविष्टा ऋषयस्तत्र वने पुष्पफलान्विते॥ नारीवनांते तेर्दृष्टा रक्तारक्तांबरावृता॥१७॥ रक्तमाल्य सुशो

रे.खं. भाल्या रक्तचंदनचर्चिता॥ रक्ताभरणसंयुक्ता पाशहस्ता भयानका॥१८॥ तस्याः समीपे पुरुषो दृष्टो जीमूतसंनिभः॥
१०२ महाकायो भीमवक्त्रः पाशहस्तो भयावहः॥१९॥ अनाधृष्यो पमो दृष्टो विकटः पिंगलोचनः॥ दीर्घजिह्वः करालास्यो लो
ल्पादंष्ट्रो विरावणः॥२०॥ द्वितीयार्स्त्री कुरूपा च दृष्टान्या ऋषिपुंगवैः॥ नरश्चमंतथा भीष्मं भीमरूपं भयानकं॥२१॥ ए
वंतत्संचकं दृष्टं पापरूपं तपोधनैः॥ ऋषयस्ते चते दृष्ट्वा तापसा मतिं पातकैः॥२२॥ ऊचुस्ते तु समुद्विग्नतान्पापानाग
तान्नृप॥ आदित्येश्वर तीर्थेस्मिन्नर्मदासंगमिच्छथ॥२३॥ तत्रासमतस्वामिनः सर्वे तिष्ठंति कृतसंश्रयाः॥ आश्रिता
जीवनार्थाय नर्मदातटमुत्तमं॥२४॥ प्रस्थाप्याः सत्वरं सर्वे ते भवाद्दुर्मुनीश्वरः॥ तत्तेषां वचनं श्रुत्वा ते विप्राः शंसित
व्रताः॥२५॥ प्रजग्मुर्नर्मदातीरं द्रष्टारो वा द्विजोत्तमैः॥ प्रणतास्त्वस्तुवंस्ते नां जयदे वनमोस्तुते॥२६॥ नमोस्तु ते सि
द्धगणैर्निषेविते नमोस्तु ते सर्वपवित्रमंगले॥ नमोस्तु ते विप्रसहस्रसेविते नमोस्तु रुद्रांगसमुद्भवे शिवे॥२७॥ न
मोस्तु ते सर्वपवित्रनीरे नमोस्तु ते देवि वरप्रदे शिवे॥ नमोस्तु ते शीतजले सुखप्रदे सरिद्वरे पापहरे विशोधने॥
२८॥ अनेकभूतौघसुसेवितांगे गंधर्वयक्षोरगसंश्रितांगे॥ महागजौघे महिषैर्वराहैः पापीयसे तोयमहोर्मिमा
ले॥२९॥ नमोस्तु ते सर्वेश्वरि सर्वभूते विमोचयास्मानघपाशबद्धान्॥ भ्रमंति तावन्नरकेषु मर्त्या यावत्तवांभो न
हि संस्पृशंति॥२९॥ अनेन संसारभयार्दितानां पापैरनेकैरभिवेष्टितानां॥ गतिस्त्वमंभोजसमानवक्त्रे द्वंद्वैरनेकै
रभिसंवृतानां॥३०॥ न यो विपत्ता विमलाभवंति त्वत्तोयमासाद्य नसंशयोत्र॥ दुःखातुराणामभयं ददासि देवैरनेकै
रभिपूजितासि॥३१॥ विण्मूत्रकीटार्णवमग्नदेहा भ्रमंति तावन्नरकेषु मर्त्याः॥ महानिलोद्धूततरंगभंग यावत्तवां
भो न हि संस्पृशंति॥३२॥ म्लेच्छाः पुलिंदास्त्वथ यातुधानाः पिबंति ते भक्तवरं दिवि पुण्यं॥ ते मुक्तपापाः प्रभवंति सद्यः
किमत्र विप्रा भव पापभीताः॥३३॥ सर्वापि नद्यः स्वयमभ्युपेता घोरे युगे स्मिन्कलिनावसृष्टे॥ त्वं भ्राजसे देवि ज १०२
लौघपूर्णा दिवीव नक्षत्रपथे व गंगा॥३४॥ तव प्रसादाद्धर देवी निष्टकालं पथिष्टं परिपालयित्वा॥ यास्यामि मोक्षं

खलु मुक्तबंधाः वयं तथा त्वं कृपया कुरुष्व॥३५॥ त्वामाश्रितास्त्वां शरणं गतास्म गतिस्त्वमेवेव पितेव पासि॥ त्वां संश्रि
ताया वद इमं सुघोरं कालं त्वनाचष्टिहृतं स्मिपाम॥३६॥ रुद्रोद्भवे मदेव धुनि प्रसन्ना येषां सुधासारजलं मलत्वं॥ किं यज्ञ
दानैः सुतपोभिरर्चिनैः तेषां सुखस्वर्गविमुक्तिदायि॥३७॥ योगाभ्यासेन किं तेषां किमन्यैस्तीर्थसेवनैः॥ किं तपोभिः प्र
दानैर्वा ये त्वयासंगभाजिनः॥३८॥ एवं स्तुता नर्मदा देवी नर्मदा सरितां वरा॥ भक्त्या देवी समस्तान्द्विजवृंदमुवाच ह॥३९॥ न
र्मदा उ०॥ पठंति ये स्तोत्रमिदं द्विजेंद्राः शृण्वंति भक्त्या परया प्रशांताः॥ ते यांति रुद्रं वृषसंयुतेन यानेन दिव्यांबरभ
षणाढ्याः॥४०॥ ये स्तोत्रमेतत्सततं जपंति स्नात्वा तु ते पि खलु नर्मदायाः॥ हित्वा वसाने सरिदुत्तमे पंगतिं विशुद्धाम
विराद्ददाति॥४१॥ प्रातः समुत्थाय तथा शयानो यः कीर्तयत्स्वानुदिनं तवेंद्रं॥ देहस्य ये स्वि सलिले ददाति समा
श्रयं तस्य महानुभावाः॥४२॥ प्रसन्ना नर्मदा देवी स्तोत्रेणानेन भारत॥ जलेनाप्याता न्विप्रान्प्रददौ वरमुत्तमं
४३॥ योगिगम्यपदं दिव्यं अमृतं शाश्वतं ध्रुवं॥ दुर्लभं यत्सुरैः सर्वैर्मत्प्रसादाद्भविष्यथ॥४४॥ इति ते ब्राह्मणारा
न्लब्ध्वा तं वरमुत्तमं॥ स्थिता तत्रैव सुप्रीता ददृशुः परमाद्भुतं॥४५॥ दृष्टास्तैः पुरुषाः पार्थ नर्मदाजलतीरगाः॥
स्नानदेवार्चनरताः पंचापि वसुतेजसः॥४६॥ दृष्टास्ते च महाराज यथा तद्वधारय॥ विप्रा ऊचुः॥ वनांते महिला
युग्मं दृष्टं रौद्रं भयावहं॥४७॥ त्रयो वृद्धाश्च पुरुषाः पाशहस्ता भयंकराः॥ दुर्धर्षा दुर्निरीक्ष्याश्च दृष्टश्चैतश्च चं
चलाः॥४८॥ व्याहरंत इमा वाचा येन चास्माकं गतिर्भवेत्॥ तैस्तु यद्वचनं प्रोक्तं तत्सर्वं कथयामहे॥४९॥ अस्मा
कं पुरुषाः पंच तत्र तिष्ठंति सत्तमाः॥ ते प्रस्थाप्याः हि वेगेन सर्वे स्मत्स्यवो द्विजाः॥५०॥ मार्कंडेय उ०॥ अथ ते पुरु
षाः पंच श्रुत्वा वाक्यमिदं तदा॥ परस्परं निरीक्ष्यं ते वदंति च मुहुर्मुहुः॥५१॥ केते कुतः समायाताः किं तेषां कार्यमुत्तमं॥ ऋ
षय ऊचुः॥ इति यत्कथितं तैस्तु तच्छृणुध्वं यथातथं॥५२॥ तीर्थावगाहनं पुण्यं दक्षिणोत्तरतः कृतं॥ पंचभिस्तैर्नरैर्भक्त्या
तत्त्सापं च्यवोहितं॥५३॥ निःपापास्त्व पते जाता स्तीर्थस्यास्य प्रभावतः॥ शृण्वंति ऋषयः सर्वे तपोनिधा महौजसः॥५४

2077
2005

रे.खं. पातकान्यति घोराणि यान्यपि स्मरति देहिनः॥ कृतानि तानि सर्वाणि पंचभिः पंचमुच्यते॥५५॥ एकेन पापमतिना गुरु
१०२ दारं निषेवितं॥ हृतं चान्येन सर्वस्वं सुवर्णं च महाधनं॥५६॥ एकेन पापिना विप्रो धनार्थे निहतो द्विजः॥ सुरापानमथान्ये
न कृतं चैकामतः पुरा॥५७॥ गोवधश्च कृतोन्येन कथंचिदपि पापिना॥ एवं पापानि सर्वेषां संजातान्यपि कामतः॥५८
प्रसंगाण्यपि तान्यत्र वयमेव द्विजोत्तम॥ इति तेरुक्तः पर्वतेनापि नातिसंस्थिते स्तदा॥५९॥ मार्कंडेय उ०॥ ब्राह्मणानां तु त
द्वाक्यं श्रुत्वातीर्थे विस्मयान्विताः॥ सद्य एव तदा जाता ज्ञात्वा विगतकल्मषाः॥६०॥ परस्परं वदंत्येवं प्रभावं तीर्थसंभवं
॥ अस्माकं पातकं नष्टमज्ञानाज्ज्ञानतः कृतं॥६१॥ सुतीर्थस्य प्रभावोयं येनो जातं विशोधनं॥ पातकानां प्रवेशोन्नि नक
श्चिद पिविद्यते॥६२॥ एवं संचिन्त्य ते सर्वे पापविघ्नाः पापशंकिताः॥ आत्मनो दहनार्थाय मतिं चक्रुः समाहिताः॥६३॥ कृत्वा
समिद्धं ज्वलनं विचिंत्य हृदये हरिं॥ स्नात्वा रेवाजले पुण्ये तर्पिताः पितृदेवताः॥६४॥ प्रणम्य भास्करं देवं हृदि ध्यात्वा
जनार्दनं॥ प्रदक्षिणं ततः कृत्वा ज्वालितं जातवेदसं॥६५॥ पतिताः पांडुकश्रेष्ठ पापोद्विग्ना नरास्तदा॥ सात्विकीं वासना
कृत्वा संसारिकं सुखं॥६६॥ क्षणांतरे ततो जाता तस्मिंस्तीर्थे नरोत्तमाः॥ विमानस्थास्तदा दृष्टा ब्राह्मणैस्ते युधिष्ठि
र॥६७॥ आश्चर्यमतुलं दृष्टं मुनिभिर्नर्मदातटे॥ तदाप्रभृति ते सर्वे रागद्वेषविवर्जिताः॥६८॥ रवितीर्थे मुनिश्रेष्ठा न
त्यजंति मुमुक्षवः॥ मार्कंडेय उ०॥ सुतीर्थस्यास्य यत्पुण्यं तच्छृणुष्व नराधिप॥६९॥ पीडितो हृद्भावेन भक्तिप्रीतो नरे
श्वरः॥ उद्दिश्य कथयिष्यामि प्रभावं तीर्थसंभवं॥७०॥ कुरुक्षेत्रं यथा पुण्यं रवितीर्थं तथा श्रुतं॥ ईश्वरेण पुराख्या
तं देवसिद्धगणैः सह॥७१॥ महादेव उ०॥ मार्तंडग्रहणे प्राप्ते ये व्रजंति षडानन॥ रवितीर्थे कुरुक्षेत्रतुल्यमेतत्फलं
भवेत्॥७२॥ स्नाने दाने तथा जाप्ये होमे चैव विशेषतः॥ कुरुक्षेत्रसमं पुण्यं जायते नात्र संशयः॥७३॥ ग्रामे वाप
द्वारण्ये पुण्याः सर्वत्र नर्मदा॥ रवितीर्थे विशेषेण सूर्यपर्वणि सत्तम॥७४॥ षष्ठ्यां सूर्यदिने भक्त्या दिवस्याग्रे नरा १०२
धिप॥ रात्रौ जागरणं कृत्वा दीपमुज्वाल्य यत्नतः॥७५॥ कथां पौराणिकीं पार्थ शृणुयाद्भक्तिमान्नरः॥ ऋग्वेदं वाय

जुर्वेदं सामवेदं तथर्वणं॥७६॥ ऋचमेकां जपेद्यस्तु सर्ववेदफलं लभेत्॥ गायत्र्या वाय जुर्वेदफलं प्राप्नोति पांडव॥ 2009
॥७७॥ प्रभाते भोजयेद्विप्रान्विशेषान्नेन भारत॥ भूमिवस्त्रान्नदानेन स्वर्णदानेन शक्तितः॥७८॥ छत्रोपानहयाना 2005
नां गृहदानेन पांडव॥ ग्रामधर्वोहदानेन गतकन्याहयादिकं॥७९॥ विद्यापुस्तकदानेन सर्वं सत्वाभयेन च॥ समानि
सर्वदानानि रवितीर्थे युधिष्ठिर॥८०॥ तीर्थसेवाप्रभावेन व्याधयो यांति संक्षयं॥ शत्रवो मित्रतां यांति विषमप्यमृ
तायते॥८१॥ ग्रहा भवंति सुप्रीता विशेषेण दिवाकरः॥ रवितीर्थे समासाद्य प्राणत्यागं करोति यः॥८२॥ स सूर्यलो
कमासाद्य मोदते कल्पमक्षयं॥ सप्तम्यां शुक्लपक्षस्य रविवारो यदा भवेत्॥८३॥ तथा सूर्योपरागे च समं कोटिगु
णं फलं॥ एतत्ते सर्वमाख्यातं रवितीर्थफलं नृप॥८४॥ ये शृण्वंति नरा भक्त्या रवितीर्थस्य संभवः॥ विमुक्ताः सर्व
पापेभ्यः सूर्यलोकं व्रजंति ते॥८५॥ गोदानेन तु यत्पुण्यं यत्पुण्यं व्रतसेवनात्॥ केदारनंदिने पुण्यं तत्पुण्यं क
र्तेनाप्नुवेत्॥८६॥ अष्टमश्च क्षमे वा यो तिलपात्रप्रदो पि वा॥ तत्फलं समवाप्नोति आदित्येश्वरकीर्तनात्॥८७॥
पापानि च प्रलीयंते भिन्नपात्रे जलं यथा॥ तीर्थस्याभिमुखो नित्यं जायते सोन्नपोत्तम॥८८॥ श्रुत्वा तीर्थप्रभावं
हि भवेच्च विमलं मनः॥ गुह्याद्गुह्यतरं तीर्थं कथितं यन्न कस्यचित्॥८९॥ तव भक्त्या हि तुष्टेन कथितं पांडुनंदन॥
श्रोतव्यं हि सदा भक्त्या पापक्षयमभीप्सुभिः॥९०॥ इति श्रीरेवाखंडे आदित्येश्वरतीर्थं नाम॥८२॥ ॥ मार्कंडेय
उ०॥ तत्र कमलनाथस्य पूजनं पापनाशनं॥ कमलेश्वरपूजायां कार्यसिद्धिर्भवेन्नृणां॥१॥ तीर्थमार्गे भवेत्तत्र स्था
पितः सर्वदेवतैः॥ पूजयित्वा तु तं देवं यो दद्यात्कंबलं नृप॥२॥ सम्यक्वेत्पापनिर्मुक्तः सुखं पूर्णफलं भवेत्॥ कुष्टा
नि विलयं यांति निष्कृहमतिर्भवेत्॥३॥ इति श्री कमलनाथतीर्थे॥ ततो गच्छेत राजेंद्र भीमकुल्यासमागमं
॥ उत्तरे नर्मदाकूले ऋषिसिद्धनिषेवितं॥४॥ भीमेन नाम्ना रुद्रेण स्थापितं यत्सुरान्नृप॥ शृणु त्वा गृह्य दृष्टमार्गो तु
भीमकुल्या सरिच्छुभा॥५॥ भोभोर्यसप्तमे नाम भीमेति प्रथितं श्रुतौ॥ नदूपं नाम चासाद्य देवाना मभयप्रदः॥६

रे॰खं॰ श्लपाणिर्महादेवो देवैः सर्वैः समाहृतः॥ संस्थापयामास शिवं स्वयं भीमेश्वरसंज्ञया॥ ७॥ असुराणां भयं चक्रे पूजितः सं
१०४ स्तुतः सुरैः॥ संगमेश्वरनाम्ना च स्वयं तस्थौ महेश्वरः॥ ८॥ तत्र स्नानं प्रकुर्वंति ये नराः पुण्यजीविनः॥ पितॄणां श्राद्धदा
नेन लभंते हंसवाहिनीम्॥ ९॥ संपूज्य भीमं देवेशं भीषणैः नैव बाध्यते॥ पापसंक्षयमासाद्य शिवलोकमवाप्नुयात्॥
१०॥ भीमकुल्यासंगमे भीमेश्वरतीर्थं नाम॥ ८३॥ ॥ मार्कंडेय उ॰॥ श्रुत्वा संस्थापितं लिंगं भीमेन सुरपूजितं॥ गतो
हं तत्र पूजार्थं यात्राभावेन पांडव॥ १॥ मया च स्थापितं लिंगं मम नाम्ना सुशोभनं॥ मार्कंडेश्वरनामानं पूजयेद्भक्ति
संयुतः॥ २॥ तस्य भीमेश्वरे यात्रा संपूर्णा जायते नृप॥ ३॥ इति श्रीरेवा॰ मार्कंडेश्वरतीर्थं नाम॥ मार्कंडेय उ॰॥ ततो
गच्छेत राजेंद्र पिप्पलादाश्रमं शुभं॥ यत्र सिद्धो महाभागाः पिप्पलादो महामुनिः॥ ४॥ ऋषिर्दीर्घतपा नाम तस्य पुत्रो
महातपाः॥ यथा ते कथितं पूर्वं जन्म तस्य महात्मनः॥ ५॥ बाल्यात्प्रभृति चर्यात्मा तपस्तेपे सुदुश्चरं॥ विविक्तेन र्म
दातीरे दक्षिणे पुण्यलक्षणे॥ ६॥ इह कृत्वाश्रमं पुण्यं ऋषिसिद्धजनान्वितः॥ प्रतिष्ठाप्य शिवं शांतं स्वनाम्ना भुवि
मुक्तिदं॥ ७॥ त्रिकालसवनासक्तो रेवातीरवनोद्भवैः॥ पूजयत्यनिशं पुष्पैः फलैश्च स्वयमर्जितैः॥ ८॥ कालेन बहु
ना पार्थ तस्य तुष्टो महेश्वरः॥ उवाच वरदोस्मीति साक्षाद्भूतो जगत्पतिः॥ ९॥ पिप्पल उ॰॥ यदि तुष्टोसि देवेश याव
राहोयमहं मतः॥ स्थापितोसि स्वनाम्ना मे स्थानेस्मिन्स्थिरो भव॥ १०॥ यावत्प्रार्थयते देवं संपूज्य त्वां महेश्व
र॥ अष्टम्यां च चतुर्दश्यां स्नात्वा रेवाजले शुभे॥ ११॥ त्वया तत्तस्य देयं वै यदि देयो वरो मम॥ पितॄञ्श्राद्धदानेन तथा
च तिलतर्पणैः॥ १२॥ रेवातोये भविष्यंति सदा दर्शादिपर्वसु॥ पितरस्तस्य तृप्यंति चिरकालं मुदान्विताः॥ १३॥ ऋ
षीणां संनिधौ देहि स्थानं मे मर्त्यदुर्लभं॥ येते सप्तर्षयः प्रीता वरं स्थानं विराश्रिताः॥ १४॥ तेषां मे संनिधौ स्था
नं प्रार्थये वात वांतिके॥ महादेव उ॰॥ एवं भवतु ते विप्र यत्त्वं मनसि वांछितं॥ १५॥ भविष्यते च तत्तद्वै नराणां वि १०४
जितात्मनां॥ इत्युक्त्वांतर्दधे वीर्यं महादेवो युधिष्ठिर॥ १६॥ पिप्पलादोपि तीर्थे वै तत्र स्थित्वा चिरं नृप॥ विधूतपाप

पंकोसौ स्थानमिष्टं ततो गतः॥ १७॥ इति ते कथितं राजन्तीर्थं परमशोभनं॥ श्रुत्वा विप्रस्य माहात्म्यं मुच्यते किल 211/2005
बिषान्नरः॥ १८॥ इति श्रीरेवा॰ पिप्पलादेश्वरतीर्थं नाम॥ ८४॥ ॥ मार्कंडेय उ॰॥ ततो गच्छेत राजेंद्र करोटीश्वरसं
ज्ञितं॥ नर्मदा उत्तरे कूले तीर्थं सुरनिषेवितं॥ १॥ गरुडेन धृतः पूर्वं गजरूपी महासुरः॥ भक्षितश्चात्र शिखरे पर्वत
स्याद्भुतोपमः॥ २॥ करोटी तस्य शिखरात्पपात जलसंनिधौ॥ रेवायाः पांडवश्रेष्ठ स्पर्शाद्दिव्यं वपुर्दधौ॥ ३॥ ज्ञात्वा
तीर्थप्रभावं स तपस्तेपे सुदानवः॥ दृष्ट्वात्मानं दिव्यदेहं शांतावस्थाः गतं समाः॥ ४॥ ततः स भगवानीशः प्रत्यक्षः
समजायत॥ ज्ञात्वा संतोषितं तनुं शांतात्मानं तु दानवं॥ ५॥ महादेव उ॰॥ भो वत्स दानवेंद्र त्वं किं क्लिश्यसि वदाय
मे॥ प्रसन्नोस्मि महाभाग वरं वरय तत्कृतं॥ ६॥ दानव उ॰॥ नमामि देवमीशानं जगतः प्रभवाव्ययं॥ वरदं विश्वज
ननं समे पापं व्यपोहतु॥ ७॥ यद्वपुः प्रभवाद्देवी रेवा पापौघनाशिनी॥ स एव भगवान्प्रीतः किं न दद्यात्तु क
पार्थिवः॥ ८॥ धर्मो ज्ञानं च वैराग्यं सदा यन्मूलसंस्थितं॥ भुक्तिमुक्तिप्रदो देवः दुःखं मे किं न नाशयेत्॥ ९॥ य
न्मौलिसंस्थिता गंगा नेत्रे कालानलस्थितः॥ अमृतांशुस्थितो भाले सदा तद्रूपतां तु मे॥ १०॥ जगद्धिता
य विधृतं कालकूटं विषं गले॥ येन सो वांछितं वा मम सनीलकंठपिनाकधृक्॥ ११॥ श्मशानवासो भस्मांगो भक्तानां च्या
लभूषणः॥ परिधानं चर्म कृत्तिं किं न दद्यात्तु वा मम॥ १२॥ एवं स्तुतस्तदा तस्य पुनः प्राह महेश्वरः॥ प्रसन्नोस्मि प्रसन्नोस्मि
ब्रूहि यत्ते मनोवांछितं॥ १३॥ अदेयमपि दास्यामि दानवेंद्र त्वया स्तुतः॥ स्तोत्रेणानेन च नरो ये मां स्तोष्यंति नित्यशः॥
१४॥ तस्य दास्यामि भोगांश्च सुखं ज्ञानं च निर्मलं॥ गजासुर उ॰॥ यदि तुष्टोसि देवेश वरं दास्यसि वांछितं॥ १५॥ यस्त
त्र कुरुते स्नानं तर्पणं च तिलोदकैः॥ तस्य पापक्षयः सद्यो जायतां सुरसत्तम॥ १६॥ पर्वतान्मे करोटिर्या पपात ग
जरूपिणः॥ यत्र सा पतिता तात तत्र तीर्थमतः परं॥ कुरु॥ यामोदेवश्चतीर्थं च करोटीश्वरनामतः॥ यत्र मे जलसंस्प
र्शात्करोटी दिव्यतां भवेत्॥ १८॥ पापाच्चोपरतं चैतः सुशांतं त्वयि भक्तितः॥ इंद्रदुःसहये चैत्रमासि गजच्छायार्कपर्वं

रे॰खं॰ णि॥१९॥व्यतीपाते च संक्रांतौ वारे च रविसोमयोः॥ स्नानदानार्चनैः श्राद्धैस्तिलतोयेन तर्पणैः॥२०॥ फलं लक्षगुणं प्रोक्तं
१०५ यत्कुरुक्षेत्रे यथा ग्रहणे॥ अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि॥२१॥ उपोषणपरो यस्तु पूजयेत्तं महेश्वरं॥ करोटी
श्वरनामानं कुर्वन् जागरणं निशि॥२२॥ स पापसंघनिर्मुक्तः पुत्रपौत्रसमन्वितः॥ भुक्त्वेह विपुलान् भोगानंते लोकं
प्रयाति तं॥२३॥ महादेव उ॰॥ एवं हि भविता सर्वं यत्त्वया परिकीर्तितं॥ करोटीस्थानमासाद्य पश्य लिंगं मनोहरं॥२४॥ ग
जासुरवाहा बाहो पूजयस्वात्र मं सुरं॥ ततो गत्वासुरेणादौ कृत्वा पूजां निशाकरं॥२५॥ अन्यैः पत्रैश्च फलैर्नानावि
धैरपि॥ समभ्यर्च्य महेशानं पुनः स्तुत्वा प्रणम्य च॥२६॥ उवाच वचनं हृष्टः ध्यानं धूर्जटिं प्रणतः स्थितः॥ गजासुर उ॰॥ पुनर्यो
चे महादेव प्रसन्नो भव सर्वदा॥२७॥ वरत्रयं मम प्रीत्या दातुमर्हसि शंकर॥ यथा विषं यथा वह्निर्यथा पन्नगभूषणं॥
मुंडमाला यथा धत्से यथा भस्मानुलेपनं॥ व्याघ्रचर्मोत्तरीयं च तथा मे कृत्तिमावह॥२९॥ गजचर्मपरीधानो भव भ
क्तप्रियं च पः॥ इत्युक्त्वा प्रददौ दैत्यः सुगंधः शुक्लपुत्तमं॥३०॥ स्वयं स्वचर्म देवाय परिधानार्थमुद्धिमन्॥ पुनर्ययाचे
देवं गाणमुख्यत्वमात्मनः॥३१॥ शंकरे च सति लोके भक्तिं चाव्यभिचारिणीं॥ तथापि च वरं याचे गरुडस्योपकार
कं॥३२॥ गजासुर उ॰॥ जयदेव महादेव शंकर त्रिपुरांतक॥ गरुडेन कृतो मह्यमुपकारः स्वयं महान्॥३३॥ पापात्मा पा
पकृत्पापोहं पापकर्मा सदैव हि॥ नितरां पेन मे पापः कृतो रुद्रगणस्तथा॥३४॥ वांछामि तस्योपकृतिं येनैतेन पश्य
धूर्जटे॥ पत्रकृत्वा कृतं तेन स्वयं मन्मांसभक्षणं॥३५॥ तत्रैव तस्य नाम्ना त्वां स्थापयिष्ये हमीश्वर॥ तत्रापि नत्वया
त्याज्यं स्थानं पाशुपते क्वचित्॥३६॥ गरुडेश्वरनामानं यस्त्वां पूजयति प्रभो॥ तत्र सर्वार्थसिद्धिः स्यात्तथा कुरु महे
श्वरः॥३७॥ इत्युक्त्वा प्रणतो भूमौ साष्टांगमसुरोत्तम॥ महादेव उ॰॥ उत्तिष्ठोत्तिष्ठ भद्रं ते जोगेसुर महामते॥३८॥ एवं प्रद
त्तं वरं सर्वं मयानुष्ठेन तेन घ॥ धृतं ते चर्म वासा मे प्रीत्या चिरमभिप्सितं॥३९॥ गरुडेश्वरसंज्ञं मां स्थापयित्वा गिरिस्तटे॥
विहरस्व चिरं स्वर्गे भविता त्वं गणो मम॥४०॥ एवमुक्त्वा महादेवस्तत्रैवांतरधीयत॥ दानवोपि ततः स्नात्वा नर्मदां १०५

भक्तिभारत॥४१॥ करोटीश्वरमभ्यर्च्य जगाम गिरिमूर्धनि॥ तत्र संस्थाप्य परमं शिवलिंगमनुत्तमं॥४२॥ गरुडेश्वरना 213/2008
मानं समभ्यर्च्य स्वयं च तं॥ जगाम कैलासं धामा विजय विमाने नार्कवर्चसा॥४३॥ मार्कंडेय उ॰॥ एतत्ते कथितं पार्थ करोटी
श्वरमुत्तमं॥ तीर्थं तीर्थवरं पुण्यं भुक्तिमुक्तिफलप्रदं॥४४॥ तत्र तीर्थे नरः स्नात्वा यः कश्चित्पूजयेच्छिवं॥ स याति शिव
सांनिध्यं यावदिंद्राश्चतुर्दश॥४५॥ अष्टम्यां च चतुर्दश्यां कृष्णपक्षे विशेषतः॥ उपोष्य शंकरस्याग्रे रात्रौ जागरणेन च॥
४६॥ वित्तं नु हरते नूनं दत्त्वा पश्चादन्नापरान्॥ प्रभाते विमले तद्वत्पूजयेत्त्रिदशेश्वरं॥ पंचामृतेन संस्नाप्य श्रीखंडेन च
थार्चयेत्॥ पुष्पैश्चापि यथाप्राप्तैः पूजयेत्तं प्रयत्नतः॥४८॥ बहुरूपं जपेन्मंत्रं दक्षिणाशां व्यवस्थितः॥ यथोक्तेन वि
धानेन नाभिमात्रे जले स्थितः॥४९॥ जलांजलिं तु पितृणां निक्षिपेद्दक्षिणामुखः॥ दद्याच्छ्राद्धं च सर्वेषां सार्धं शक्त्या
नैव॥५०॥ गोहिरण्येन संपूज्य वस्त्रान्नताम्बूलभोजनैः॥ भूषणैः पददानैश्च ब्राह्मणान् पांडुनंदन॥५१॥ अस्मिंस्तीर्थे
यथाशक्ति मिष्टान्नेन च भारत॥ एकस्मिन् भोजिते विप्रे लक्षं भवति भोजितं॥५२॥ धान्यं नानाविधं वापि दद्यात् द्विजाय म
यंगजं॥ असंख्यं फलमाप्नोति विरंचदिविमोदते॥५३॥ तत्र तीर्थे तु यः कश्चिद्देहं त्यजति मानवः॥ यावदस्थीनि तिष्ठ
ति नर्मदातोयमध्यतः॥५४॥ तावद्वसति धर्मात्मा शिवलोके सुदुर्लभे॥ ततः कालाच्च्युतस्तस्मादिह मानुष्यतां गतः
॥५५॥ महाधनपतिः श्रीमान् जायते राजपूजितः॥ सर्वधर्मसमायुक्तो मेधावी जीव पुत्रकः॥५६॥ विख्यातो वसुधा
पृष्ठे दीर्घायुर्लोकसंमतः॥ पुनः स्मरति तत्तीर्थं तत्र गत्वा नृपोत्तम॥५७॥ करोटीश्वरमभ्यर्च्य प्राप्नोति परमां गतिं॥
दुर्लभां योगिगम्यां वै यां प्राप्य तु न शोचति॥५८॥ तस्मिन् तीर्थे सुरश्रेष्ठ कारयेद्यः सुरालयं॥ तेषां कश्चिच्च पा
षाणेन संज्ञो स्याद्युधिष्ठिर॥५९॥ श्रुत्वा तीर्थस्य माहात्म्यं करोटीश्वरसंज्ञितं॥ यत्र तत्र स्थितो वापि मुच्यते दु
ष्कृतान्नरः॥६०॥ इति श्रीरेवा॰॥ करोटीश्वरनामतीर्थं॥९५॥ ॥मार्कंडेय उ॰॥ ततो गच्छेत राजेंद्र नर्मदा दक्षिणे
तटे॥ क्रोशमात्रे स्थितं पुण्यं पिप्पलेश्वरतीर्थतः॥१॥ ऋषितीर्थं सुविख्यातं त्रैलोक्ये पापघनाशनं॥ जन्मकुंभ

रे॰खं निकुंभपोद्भवेराज्ये सुराधिप ॥३॥ इत्यागम्य तपस्विपस्याद्दैवं च पश्यतं ॥ सर्वाहिनस्य यकरं सर्वैश्वर्यप्रदं शिवं ॥ अपर
१०६ अग्रजः पुरा राजन् लोके संपूजितं स्तथा ॥ निर्ममे लोषयामास हरं पापहरं परं ॥४॥ ततः संतोषितेन लिंगेन भवानी वल्लु
भादि शुभ ॥ हदीरात्यं च जलतुले शाक्तिं जनचधायच ॥५॥ ग्राक्रोशिपा वश्च छलन्नधाराश्च निलपुन ॥ मन्नामनसिसाम
र्थे लभाद्दिरिपुनाद्गानं ॥ स्नात्वा नागेश्वरं नाम शिवं संस्थाप्य यत्नतः ॥ तत्र संपत्स्य देवगानतः स्वर्गं जगाम ह ॥ आप
बं पुण्यतमं तीर्थं संजातं नसुपातकं ॥ कृष्णपक्षे चतुर्दश्यां कार्तिके मासि यो नरः ॥८॥ उपोष्य पूजयेद्देवं सर्वपापैः
प्रमुच्यते ॥ दुःस्वप्नं च न भिर्दृष्टं सुःस्वप्नं जायते नृप ॥९॥ गुरुणांतिभं यत्तपा दुर्निमित्तं प्रणाश्यति ॥ नागेश्वरं प्रपश्य
तियेभक्त्या पांडुनंदन ॥१०॥ तेषां जन्मकृतं पापं नश्यते नात्र संशयः ॥ गोप्रदानं प्रकर्तव्यं तत्र ब्राह्मणपुंगवः ॥११॥
धुर्यो वा दीयते तत्र सर्वांगरुचिरो नृप ॥ दानं देयं यथाशक्त्या स्वर्गवासमभीप्सता ॥१२॥ एतत्ते सर्वमाख्यातं दंडेश्वर
फलं नृप ॥ यच्छ्रुत्वा तीर्थमाहात्म्यं नराजुमयमाप्नुयात् ॥१३॥ इति श्री रेवा॰ दंडेश्वरतीर्थं नाम ॥८६॥ ॥ मार्कंडे
य उ॰ ॥ ततो गच्छेत् राजेंद्र कुमारेश्वरमुत्तमं ॥ समाराध्य परं भक्त्या सिद्धिः प्राप्ता नरेश्वर ॥ प्रसिद्धं सर्वतीर्थानां करो
रीश्वरसंनिधौ ॥१॥ षण्मुखेन पुरा तात देवतीर्थे महेश्वरं ॥२॥ देवसेनाधिपो जातः सर्वशत्रुविमर्दनः ॥ उच्यते ता
महात्मासौ संजातस्तीर्थसेवनात् ॥३॥ तदाप्रभृति तत्तीर्थं संजातं नर्मदातटे ॥ तत्र तीर्थे तु यो गत्वा एकचित्तो जितें
द्रियः ॥४॥ कार्तिकस्य चतुर्दश्यां अष्टम्यां च विशेषतः ॥ पंचामृतेन दिव्येन स्नापयेत्परमेश्वरं ॥५॥ समामर्थ्यमवा
प्नोति शत्रुभिर्नैव बाध्यते ॥ पत्तनं गीतवादित्रं नीराजननिवेदितं ॥६॥ पिंडदानं प्रकर्तव्यं पितॄणां तृप्तिकारकं ॥
षट्कर्मनिरतानां च ब्राह्मणानां नृपोत्तम ॥७॥ यत्किंचिद्दीयते तत्र तदक्षयफलं भवेत् ॥ सर्वतीर्थोत्तमं तीर्थं
कुमार्या विनिर्मितं ॥८॥ चंदनं योगपट्टं च कंबलं सितवाससी ॥ यज्ञोपवीतदानं च ब्राह्मणानां जितात्मनां ॥९॥ १०६
छत्रं च पादुकां चैव यथा संपन्नभोजनं ॥ प्रदत्तं द्विजवर्येभ्यो निखिलं षण्मुखप्रियं ॥१०॥ आयुष्यं भोगसौख्यानि

साधनं स्वर्गतिः प्रदं ॥ एतत्ते सर्वमाख्यातं कुमारेश्वरमुत्तमं ॥११॥ कुमारेश्वरमाहात्म्यं यः शृणोतीह मानवः ॥ सर्व 215/2008
पापविनिर्मुक्तो देहांते स्वर्गमाप्नुयात् ॥१२॥ इति श्री रेवा॰ कुमारेश्वरतीर्थं ॥८७॥ ॥ मार्कंडेय उ॰ ॥ अतः परं महाराज
अगस्त्येश्वरमुत्तमं ॥ सर्वपापहरं तीर्थं स्थितं कोशांतरे नृप ॥१॥ अगस्त्येन मुनींद्रेण स्थापितं नर्मदातटे ॥ स्वधर्मा
नस्य विंध्याद्रेर्मेरुणा सह भारत ॥२॥ वर्धमानस्य शिखरैः रुद्धा सूर्यगतिर्दिवि ॥ अहोरात्रिव्यवस्था च भग्ना सूर्येण
तिष्ठता ॥३॥ ततो ब्रह्मादयो देवाः सर्वे चिंतान्विताः किल ॥ अगस्त्यस्याश्रमं गत्वा प्रोचुः सर्वे महामुनिं ॥४॥ समर्थः
सर्वकार्येषु देवकार्ये विशेषतः ॥ विंध्याचलं स्थापय त्वं मर्यादां च महामुने ॥५॥ पश्यविश्वानवस्थां त्वं मतत्कार्यप
रं हि नः ॥ अगस्त्य उ॰ ॥ स्वागतं वोस्तु देवानां ब्रह्मादीनां ममाश्रये ॥६॥ धन्योस्म्यनुगृहीतोस्मि भवंतो यत आगताः
सर्वे त्विनन्नारीरिणा कथ्यं देवनोदितं ॥७॥ सुरकार्यं विधातव्यमिति मे हृद्गतं सदा ॥ इत्युक्तरसमाकर्ण्य देवा ब्रह्मा
दयस्ततः ॥८॥ जग्मुर्यथागतं सर्वे दत्वाशीर्वचनानि च ॥ अगस्त्योपि ययौ विंध्यं सशिष्यः सह भार्यया ॥९॥ विंध्यमा
वाहयामास मार्गो मे दीयतामिति ॥ ततः कोपभयाद्विंध्य साक्षान्मूर्तिरूपागतः ॥१०॥ अर्घपाद्यैः प्रपूजयेश्वतो
षयामास तं मुनिं ॥ ब्रूहि किं भोद्भव मुने स्वागतं ते मुसत्तम ॥११॥ अगस्त्य उ॰ ॥ तीर्थयात्रां प्रयास्येहं क्षेत्रव्यायतने
षु च ॥ दक्षिणान्नागां प्रति श्रीमन् गंतास्मि सह भार्यया ॥१२॥ मार्गो मे दीयतां शिघ्रं सुखं यामि यथा यथा ॥ ततो विं
ध्याद्रिरात्मानं खर्वयामास भारत ॥१३॥ विमृश्य बहुधा कार्यं चिंतापरमवाप्नुयात् ॥ प्रसिद्धोयं ऋषिः श्रीमानग
स्त्यः कुंभसंभवः ॥१४॥ क्रोधनस्तनुधाविध्वंसितस्मादेय पथा मया ॥ विचिंत्यैवं ददौ मार्गं प्राप्ये पूर्वसंस्थितं ॥
गच्छ गच्छ गच्छ ऋषिश्रेष्ठ मा गौ दत्तो मया तव ॥ इत्युक्त्वा वस्यद्विराजेन यया चैतं मुनिः पुनः ॥१५॥ अगस्त्य उ॰ ॥ विंध्याद्रे
किंतु या चैतां यावदागमनं पुनः ॥ तावद्वृद्धिर्न कर्तव्या महाप्रासादाज्ञन स्वपा ॥१७॥ अन्यथा मागतं चापि कोपि
त्स्यसि नगाधिप ॥ तथेत्युक्ते च गिरिणा ययौ मुनिवरस्ततः ॥१८॥ लोपामुद्रापतिः श्रीमान् सभार्यो दक्षिणां दि

रे॰ खं॰ गं॥ उत्कृष्य पर्वतवरं विंध्यमाद्रिस्थितोस्थितं॥ १९॥ मार्कंडेय उ॰॥ तदाविगच्छता तेन मुनिना मेनेनेदं नृप॥ स्थापितं परमं लिंगं
१०७ स्नात्वा सर्वस्य भारत॥ २०॥ स्वनाम्ना तथाभ्यर्च्य वीक्ष्य तीर्थान्यनेकशः॥ ततस्तमुत्कृष्य गिरिं गतो गस्त्यसुरार्थिनः॥ २१॥
ततः प्रभृति विख्यातं अगस्त्येश्वरसंज्ञया॥ तीर्थं सिद्धिप्रदं पार्थ सुराणां प्रीतिवर्धनं॥ २२॥ तत्र स्नात्वा नरो राजन्मुच्यते ब्र
ह्महत्यया॥ कृष्णपक्षे चतुर्दश्यां कार्तिके मासि पांडव॥ २३॥ देवं घृतेन संस्नाप्य संपूज्य च महेश्वरं॥ सपर्व पुरुषोपेतो
न्यत्वेदीश्वरास्तदात्॥ २४॥ तत्र प्रदीयते दानं तथा च घृतकंबलं॥ भोजनं ब्राह्मणानां च सर्वमस्य प्रतांव्रजेत्॥ २५॥ ति
लोदकं पितृणां च दत्तं पर्वणि भूपते॥ श्राद्धं च श्रद्धया दत्तं पितृणां तृप्तिकारकं॥ २६॥ इति श्री रेवा॰ अगस्त्येश्वरतीर्थं॥
नाम॥ ८८॥ मार्कंडेय उ॰॥ ततो गच्छेत राजेंद्र व्यासेश्वरमनुत्तमं॥ शंकरेश्वरात्तु तत्तीर्थं स्थितं क्रोशांतरे नृप॥ १॥ नर्मदा
दक्षिणे कूले द्वैपायनविनिर्मितं॥ तीर्थानि परिभ्रम्याथ पुरा द्वैपायनो मुनिः॥ २॥ विश्वप्रख्याततीर्थानि वेदव्यासो
वलोकयन्॥ शूलभेदमिति ख्यातं त्रैलोक्ये च सुरापि च॥ ३॥ तत्तीर्थमागतो द्रष्टुं व्यासः सत्यवतीसुतः॥ सतीर्थं
मवगाह्याथ शूलपाणिं प्रपूज्य च॥ ४॥ पुनर्निवर्ततस्तत्र स्थापयामास शंकरं॥ स्वनाम्ना तीरमासाद्य विविक्तं पां
डुनंदन॥ ५॥ निकटं शूलभेदात्तु सर्वकल्मषनाशनं॥ स्वयं व्यासेश्वरं देवं स्थापयित्वा महामतिः॥ ६॥ स्नात्वा संपू
ज्य च पुनर्गंगामाथ स्वमाश्रमं॥ तदाप्रभृति विख्यातं व्यासेश्वरं परं॥ ७॥ तत्र स्नात्वा च संतर्प्य पितृश्रीवतिलोदकैः
आधिव्याधिविनिर्मुक्तो जायते पितृवल्लभः॥ ८॥ तथा यः पूजयेद्देवं भक्त्या व्यासेश्वरं परं॥ तत्र स्नात्वा च संतर्प्य पितृं
श्रीवतिलोदकैः॥ आधिव्याधिविनिर्मुक्तो जायते पितृवल्लभः॥ तथा यः पूजयेद्देवं भक्त्या व्यासेश्वरं नृप॥ १०॥ पंचा
मृतेन संस्नाप्य वस्त्रैः पुष्पैस्तिलैस्तथा॥ अर्धनारीश्वरं नाम पिष्ट स्तुतिपाठैर्द्विजार्चनैः॥ ११॥ सर्वसिद्धिर्भवेत्तस्य वांछि
तान्नृपसत्तम॥ द्वैपायनः परां प्रीतिं प्राप्नोति हि द्विजार्चनात्॥ १२॥ इति श्री रेवा॰ व्यासेश्वरतीर्थं॥ ८९॥ ॥मार्कं १०७
डेय उ॰॥ तत्रैव परमं तीर्थं वैद्यनाथाख्यं नृप॥ धनुःशतद्वयं तद्धि स्मृतं व्यासेश्वरान्नृप॥ १॥ अश्विभ्यां स्थापितं पू

217/2008

र्वं ह्यायुर्वेदस्य सिद्धये॥ समुत्पन्नौ च संग्रामे तपः कर्तुमिहागतौ॥ २॥ रेवाकूले सुविपुले विविक्ते शांतिदे नृप॥ बहु
कालं तपस्तप्त्वा तोषयामासतुः शिवं॥ ३॥ सर्वज्ञं सर्वभूतेशं सर्वदुष्टनिबर्हणं॥ तुष्टुवुर्विविधैः स्तोत्रैरेकमव्यय
मीश्वरं॥ ४॥ अश्विना वृजयदेव महारुद्र त्र्यंबक जगत्पते॥ सर्वतीर्थमयी गंगा सा धृता शिरसा त्वया॥ ५॥ तेन गंगा
धरोसि त्वं नाम्ना च वृषभवाहनः॥ दुःकृतं व्याधिनाशाय तेन वैद्योसि धूर्जटे॥ ७॥ सर्वामृतमयश्चंद्रः सभाले विधृत
स्त्वया॥ सचंद्रशेखरो नाम्ना तेनासि त्रिपुरांतकं॥ ८॥ सर्वव्याधिविनाशाय तेन वैद्यः परो मतः॥ कल्पांतवह्निरत्नु
लो येन जगद्भस्मकारकः॥ ९॥ स संपन्नस्य नेत्रैवे भीमो भीमत्वया धृतः॥ विश्वदाना प्रतीकार तेन वैद्योसि
निश्चितं॥ १०॥ विषं यत्कालकूटाख्यं विश्वनिर्नाशनक्षमं॥ तत्त्वया विधृतं कंठे नीलकंठोसि तेन वै॥ ११॥ विश्वना
शप्रतीकारी तेन वैद्यो भवान्मनः॥ १२॥ येदं दश्यकास्तव्हयः सर्वप्राणिभयंकरः॥ तत्त्वया विधृता दिहं स्वयं विश्वहि
तायच॥ १३॥ अहिमपणासंज्ञं तां तेन विश्वविदुर्बुधः॥ कश्यपाय प्रदत्ता च विप्रोपेक्षिति स्तनानां नी॥ १४॥ विश्वोपद्र
वनाशाय तेन वैद्योसि वीर्यवान्॥ त्वयं विषमशीलत्वं आश्रितानां दुःखनाशनः॥ १५॥ भजतां दुःखनाशाय त्वं विपं
त्वामिवमन्महे॥ ताभ्यामेवं स्तुतः सर्वः साक्षाद्रूपी जगद्गुरुः॥ १६॥ प्रोवाच स यो भगवान्युवां जातौ भिषग्वरौ॥ स
र्वव्याधिहरौ वैद्यौ विख्यातं भाविष्यति॥ १७॥ व्याधयः देवलोकेपि ये मर्त्ये पाताल गोचरे॥ तेषां संशामनोपायं मत्प्रसा
दाद्धि तोत्तम॥ १८॥ उत्क्रांते तदर्थे देवो वरं दत्वा यथेप्सितं॥ तावुभावश्विनौ तत्र स्थापयित्वा महेश्वरं॥ १९॥ वैद्यना
थमिति ख्यातं सर्वव्याधिविनाशनं॥ संप्राप्य वांछितं सिद्धिं मुदितौ नमतुर्दिवं॥ २०॥ तदाप्रभृति विख्यातं तत्तीर्थं
पांडवर्षभ॥ तत्र स्नात्वा नरो राजन्तथा संतर्प्य पूर्वजान्॥ २१॥ आधिव्याधिविनिर्मुक्तः पापनाशमवाप्नुयात्॥ तथा
नानोपचारैश्च प्रपूजयित्वा महेश्वरं॥ २२॥ वैद्यनाथं नृपश्रेष्ठ शिवलोके महीयते॥ दद्यादंनोदकं तत्र मेषतं च पृथग्वि
धं॥ २३॥ सर्वपापविनिर्मुक्तो भवेद्व्याधिविवर्जितः॥ २४॥ इति श्री रेवा॰ वैद्यनाथनामतीर्थं॥ ९०॥ ॥मार्कंडेय उ॰॥

रे॰खं॰ ततः क्रोशांतरे पार्थ तीर्थं परमशोभनं॥ रेवाया उत्तरे कूले केदारमिति विश्रुतं॥१॥ शांडिल्यो नाम धर्मात्मा ब्राह्मणो वेद
१०८ पारगः॥ अंप्रदेशे सुविख्यातः पुरा तीर्थमना भवत्॥२॥ केदारदर्शनाकांक्षी नियम्यान्नं स निर्ययौ॥ रेवायामागतो विप्र
कियत्कालेन पोत्तम॥३॥ श्रांतो निरंनः सुक्षुधाः सुधाम्लानेंद्रियो नृप॥ स्नात्वा रेवाजले पुण्ये तर्पयित्वा सुरान् पितॄन्॥४
सुप्तोसौ श्रांतभावेन निद्रामुक्तोभवद्द्विजः॥ तावत्स्वप्ने ददर्शाग्रे केदारं वेषयाश्रुतं॥५॥ केदार उ॰॥ भो भो विप्र न यातव्यं
त्वया श्रांतेन दूरतः॥ अहमेवागतो नूनं त्वत्प्रसादरव्रतेन ते॥६॥ दृष्टे यतिष्ठ मां पश्य स्थितं केदारसंज्ञितं॥ नियम्यान्नं प्र
यातं त्वां ज्ञात्वाहं कृपयागतः॥७॥ अत्राहं नर्मदातीरे स्थितो भिन्नत्वसाहसात्॥ ब्राह्मण उ॰॥ न मन्ये हमिदं किं विघ
तः सुप्तो भ्रमितया॥८॥ हिमाद्रौ तिष्ठते देवः केदारः पापनाशनः॥ तत्र स्थान नर्मदातीरं स देवः कथमागतः॥९॥ यदि प्राप्तो
सि नियतं नमन्येमर्त्यमागतं॥ साहसं स्वप्नकरणं मायाचेयं बिभीषिका॥१०॥ यद्धि लिंगात्मकं देवं केदारमहमीक्ष
ये॥ उत्सीर्षकसमीपस्थं यथावस्थं श्रुतं मया॥११॥ हिमाद्रिसंनिधिं प्राप्तं ततो मन्ये तु नान्यथा॥ एवमुक्ते तु विप्रेण
स्वप्न एव युधिष्ठिर॥१२॥ शिरःसमीपे भगवान् लिंगरूपो भवत्किल॥ हिमाद्रिशिखरं पार्श्वे स्थापयित्वा महेश्वर॥
१३॥ ईश्वर उ॰॥ भो विप्र वर्यं पश्य त्वं लिंगरूपं हिमो स्थितं॥ हिमाद्रेः शिखरं चैतन्न मन्यसे यदि निश्चयं॥१४॥ मा क
पीस्तत्र यानं त्वं क्लेशं सुनृशामदेहभ्रकं॥ यात्रा ते सफला जाता संपूर्णा चैव दर्शनात्॥१५॥ पश्येम मेवं केदारं मा
ततो नियमं त्यज॥ इत्युक्त्वा स्वापयामास यावद्दृष्टो द्विजं हितं॥१६॥ तावत्प्रबुद्धः सहसा विस्मयाविष्टचेतसः॥ किमे
तदिति संचिंत्य न नंस्वप्नो मम भवत्॥१७॥ को देवः किं मया दृष्टः कलिंगं तद्दिशा कृतं॥ इति संचिंतयावद्धि पश्यते सर्व
तो दिशं॥१८॥ तावद्दृष्टं गिरिवरं विप्रेणादूरतः स्थितं॥ ददर्श च समीपस्थं लिंगं केदारसंभवं॥१९॥ पुनर्विस्मयमा
पन्नो अतीव द्विजसत्तमः॥ शेषा निशा व्यतीता च तस्य चिंतयतो भृशं॥२०॥ प्रभाते विमले स्नात्वा संतर्प्य पितृदेवताः १०८
बिल्वपत्रैश्च मंदारैः पूजार्थं स्वयमाहृतैः॥२१॥ सिंदुवारैश्च कल्हारैः पूजयामास शंकरं॥ केदारमिति निश्चित्य ध्या

त्वा च मनसा विभुं॥२२॥ श्रीफलैरर्घदानं च नैवेद्यं वै तदा द्विजः॥ वेदसूक्तैः शिवं सुना प्रणम्य च पुनः पुनः॥२३॥ यावन्नियम
मोक्षार्थं संत्रायं समुपागतः॥ तावदाकाशवाणी चैवं भाषितं द्विजं प्रति॥२४॥ वा॰ग॰ उ॰॥ पारणं कुरु भो विप्र पूर्णा यात्रा तवा
भवत्॥ मा संत्रायं कुरु घात्र संत्रायःफलनाशनः॥२५॥ श्रीफलैः पक्वबदरैर्वन्यैश्चान्यैः स्वयं हृतैः॥ पारणं कुरु देवाग्रे वि
सृज्य नियमं द्विजः॥२६॥ इत्युक्त्वा परता देवी ब्राह्मणोपि मुदान्वितः॥ फलानि स्वयमाहृत्य विसृज्य नियमं तदा॥२७॥
पारणं कृतवान् भूप विप्रहर्षसमन्वितः॥ सप्तरात्रं स्थितस्तत्र ततो देशं स्वकं ययौ॥२८॥ तदा प्रभृति राजेंद्र विख्यातं
तीर्थमुत्तमं॥ केदारतीर्थे यः स्नात्वा तर्पयेत् पितृदेवताः॥२९॥ यथा प्राप्तोपहारैश्च केदारं पूजयेच्छिवं॥ सर्वपापवि
निर्मुक्तो वसेच्छिवपुरे चिरं॥३०॥ श्रुत्वा केदारतीर्थस्य माहात्म्यं पांडुनंदन॥ गोदानफलमाप्नोति श्रद्धया परया प
र॥३१॥ इति श्रीरेवा॰ केदारतीर्थं नाम॥१३॥ ॥मार्कंडेय उ॰॥ ततो गच्छेत राजेंद्र नर्मदा दक्षिणे तटे॥ वेधनाथाच्छ्रो
शमात्रे आनंदेश्वरसंज्ञितं॥१॥ रुद्रस्य परमानंदो यत्र जातो युधिष्ठिर॥ तत्तीर्थं कथयिष्यामि सर्वपापक्षयंकरं॥२
दैत्यास्ते बलिनः पार्थ पार्वसाप्रेरितेन तु॥ महादेवेन शक्तेन नाशिताः सर्वशो सुराः॥३॥ के पि मग्ना जले चाब्धेः के
पि मग्ना दिशो दश॥ दानवानां वधं कृत्वा देवदेवो महेश्वरः॥४॥ युधिष्ठिर उ॰॥ आनंदो येन संजातो रुद्रस्य मुनिस
त्तम॥ कथ्यतां तत्पुरा त्वं नः संक्षेपात्सगणस्य मे॥५॥ मार्कंडेय उ॰॥ कथयामि नृपश्रेष्ठ आनंदेश्वरमुत्तमं॥ प्रार्थ
त्वाहरणे प्राप्तिसुरांतकमुखैः पुरा॥६॥ कुशं भचंद्रपीडापेर्युद्धं रुद्रस्य चाभवत्॥ पूर्णं वर्षं तु देवानां विद्रवस्य तु भयं
करं॥७॥ दैत्यास्ते बलिनः पार्थ पार्वसाप्रेरितेन तु॥ महादेवेन शक्तेन नाशिताः सर्वशो सुराः॥८॥ के पि मग्ना जले
चाब्धेः के पि मग्ना दिशो यथु॥ दानवानां च वधं कृत्वा देवदेवो महेश्वरः॥९॥ पूजितस्त्रिदशैः सर्वैर्यक्षकिंनरपन्नगैः
पपात पुष्पवृष्टिः खात् दिव्यवादित्रनिःस्वनैः॥१०॥ आनंदे परमे युक्तो भगवान् वृषवाहनः॥ भैरवं रूपमास्थाय व्या
ळावलिविभूषितं॥११॥ ननर्त विनालकंकालैर्भैरवैरावृतस्तदा॥ ननर्त नर्मदातीरे दक्षिणे पांडुनंदन॥ तुष्टिर्मरुद्भ

219/2008

रे.खं. णः सर्वैः स्थापितः कामनाशनः॥ आनंदेश्वरनामासौ यस्मादानंदमागतः॥१३॥ विरूपाक्षाहि पुत्रिकेषु मकरंदप्र
१०९ दः शिवः॥ स्थापयित्वा महादेवं तस्मिन् स्थाने सुरोत्तमाः॥१४॥ हित्वा पदाति संप्रयत्नं गर्दभाय यथागतं॥ अथर्वदं श्रीमहा
देवी जगाम दिशिमुत्तरां॥१५॥ कैलासं पर्वतश्रेष्ठं स्वगणैः परिवारितः॥ अष्टम्यां च चतुर्दश्यां पार्थिमास्यां तथैव च॥
१६॥ स्नापयित्वा विधानेन पूजयित्वा पार्वतीपतिः॥ भक्त्या गीतवादित्रैः लोपयेद्धि रात्रिपतिं॥१७॥ ब्राह्मणान्भोजयेत
ततः यथाशक्त्यान्नपोत्तम॥ धेनुं दद्यात्पयस्विनीं च वस्त्रं गात्रं च कांचनं॥१८॥ वसंतस्य त्रयोदश्यां श्राद्धं तत्रैव कारये
त यथाशक्त्यान्नपोत्तम॥ धेनुं दद्यात्स तां च वस्त्रं गात्रं च कांचनं॥ आनंदेश्वरतीर्थे
त॥ दृष्टुं देवं दरेवि त्वेरसंतेवोपि भारत॥१९॥ स्नात्वा संतर्प्य च सुरान् पितॄन् तीर्थे नपर्वजान्॥ आनंदेश्वरती
र्थे तु श्राद्धं तत्रैव कारयेत॥२०॥ आनंदिता भवंत्यस्य पितरः स्वर्गसंस्थिताः॥ संततिर्न च विच्छेदो जायते जन्म
सप्तकं॥२१॥ आनंदो जायते तेषां दर्शनादेव भारत॥ आनंदमयमाप्नोति देहांते मानवं पदं॥२२॥ इति श्रीरेवा
आनंदेश्वरतीर्थं नाम॥९२॥ ॥मार्कंडेय उ॥ ततो गच्छेत राजेंद्र मातृतीर्थमनुत्तमं॥ संगमस्य समीपस्थं
मेदा दक्षिणे तटे॥१॥ मातरस्तत्र संप्राप्तास्तुष्टुवुः परमेश्वरं॥ उमार्धधारिणं देवं नागयज्ञोपवीतिनं॥२॥ मात
र ऊ॥ जयानुकरणा नयज्ञयज्ञांकर शाश्वत॥ जय रुद्र जगन्नाथ जगद्गुरो जगत्प्रिय॥३॥ विश्वसंतानकाम त्वं
विश्वनिर्मल नमः॥ सृष्टिसंहारबीजं त्वं दधारात्मनि धूर्जटे॥४॥ अंतकः कालयो वह्निः विश्वरूप भुविश्व
वाः॥ जगत्त्वं परश्यामि विश्वं तज्जठरे स्थितं॥५॥ गिरिजार्धं च पुंदेव विभावं स्मरनाशन॥ गुणांतामसमा
श्रित्य त्वां तारुद्र त्वमेव हि॥६॥ गुणत्रयस्वरूपासि तदवस्था समाश्रयात्॥ निर्गुणश्चासि भगवान्नलभे
व प्रकृतेः परः॥७॥ विभावि रूपं भुवनांतकारणं ददासि राज्यादिकमर्थितस्त्वं॥ सर्वज्ञमेकं भुवनाधिदेवं म
न्यामहे त्वां सुखदं नारक्यं॥८॥ सर्वा देवत नाक यो भवतवांयबुजः समभ्यर्चितुं॥ प्राप्ता या स्त्वस्मादिग्यतीर १०९
विलसनतीरगभीरि स्थिताः॥९॥ त्वां याचंत्व रिनाज्ञानं पशुपतिं ब्राह्मी तथा वैष्णवी गौरी माहेश्वरी कुमारश्क

रव पुत्तिनी इंद्राः सर्वे॥१०॥ तत्र तुष्टो महादेवः स्तोत्रेणानेन भारत॥ प्रसन्नश्चाभयेत्तासां प्रददौ वरमुत्तमं॥११॥
याचध्वं वः प्रसन्नोस्मि किं कार्यं तपसा कथय॥ मातर ऊ॥ अजेयाः सर्वदेवानां तस्य साद्य महेश्वर॥१२॥ असुराः सं 221/2008
ति सर्वत्र देवानां प्रतिबाधकाः॥ स्पर्धमानाः सदा युद्धे नियासास्त्रि पुरांतक॥१३॥ अस्माभिरेव योद्धव्यं किमान्यैर्
देवतैः॥ तदर्थं प्रार्थितास्माभिर्दैत्यैर्बाधकनाशनः॥१४॥ प्रसादात्तव देवेश सिद्धिर्भवतु सर्वदा॥ अस्माकम
भिधानेन तीर्थं मेतद्भवत्विह॥१५॥ यो यं कामयते कामं स तं प्राप्नोतु शोभनं॥ तासामेतद्वचः श्रुत्वा स देवः पार्वतीपतिः॥१६॥
एवं भविष्यतीत्युक्त्वा पुनः प्रोवाच शाश्वतः॥ मया च स्थीयमत्रैव युष्मत्प्रीत्यास्तु मातरः॥१७॥ एवमुक्त्वा महादेवस्तत्रै
वांतरधीयत॥ मातरस्तत्र तपसा गिरिकूटे स्थितास्तदा॥१८॥ स्वैः स्वैः रंशैस्तत्र तस्थुः सर्वं स्थाप्य सरित्तटे॥१९॥ त
त्र तीर्थे तु यो भक्त्या नवम्यां नियतेंद्रियः॥ उपोष्य तत्र चास्नात्वा पजपेन्मातृसंचयं॥२०॥ मातरस्तस्य सुप्रीता भ
वंति तव संयुता॥ नभस्ये कृष्णपक्षे तु नवमी या तिथिर्भवेत॥२१॥ तस्यामेव च या भक्त्या श्राद्धं प्रकुरुते नरः॥ मा
तरस्तस्य तुष्यंति मुच्यते मातृकादणात्॥२२॥ बंध्यायां मृतवत्सायां पुत्रायां युधिष्ठिर॥ स्नापनं कारयेत्तत्र
दंपत्योर्द्विजसत्तम॥२३॥ सहिरण्येन कुंभेन स्नानं मंत्रविधानतः॥ स्नापयेत्पुत्रकामां तां कांस्यपात्रे यादृशि
कः॥२४॥ होमं च कारयेत्तत्र ग्रहादीनां गात्रं च भारत॥ तुष्ट्यर्थं चैव मातॄणां स्वशक्त्या नियमस्थितः॥२५॥ चतुरः कल
शानन स्थाप्य कलशं वा सुशोभनं॥ पंचपल्लवसंयुक्तं रत्नपंचकगर्भितं॥२६॥ प्रक्षिप्यात्तर्जले पंचमृत्स्नाः स
र्वौषधीस्तथा॥ सितवस्त्रेन पुष्पैश्च सितचंदनचर्चितं॥२७॥ कांस्यपात्रेण सहितं सप्तधान्योपरि स्थितं॥ सप्त
धान्यबीजमुख्यैः फलैश्च समन्वितं॥ चतुर्वेदोक्तमंत्रैश्च तत्पतिर्ब्राह्मणास्ततः॥ पुण्याहवाचनं कृत्वा दंपत्यो
स्नापयेद्द्विजः॥२९॥ पर्वं स्नात्वा संगमे तु विधिमंत्रपुरःसरं॥ एकवस्त्रेण सुस्नातः तर्पयित्वा सुरान्पितॄन्
३०॥ भद्रासनोपविष्टौ तौ स्नानमंत्रैः सुमंगलैः॥ भगांते वरुणाराजेत्यादिमंत्रैः सुशोभितैः॥३१॥ ततश्चापा

रे.खं. पावमानीभिश्चतुर्वेदोदितैःपृथक्॥कांस्यपात्राणिदेयानिसप्तवस्त्रयुतानितु॥सहिरण्यानितत्रैवगांचदद्यात्प
११० यस्विनीं॥३१॥दंपतीपरिधानंचभोजनंदापयेत्ततः॥ब्राह्मणान्भोजयेत्तत्रगौरीश्चकुमारिकाः॥३२॥संतो
षयेत्तत्रसर्वंसंपूर्णमितिवाचयेत्॥आचार्यंपूजयेद्भक्त्यातत्रकल्याणवाचनं॥३३॥एवंकृत्वामहाराजविधिदृष्टे
नकर्मणा॥सापुत्रंलभतेनारीवीर्यवंतंगुणान्वितं॥३४॥यंयंकाममभिध्यायेत्स्नातस्तंप्राप्नुयान्नृप॥मातृतीर्थात्प
रंतीर्थंनभूतंनभविष्यति॥३५॥श्रुत्वैवयस्यमाहात्म्यंप्रीतास्युर्मातरः॥सदा॥३६॥इतिश्रीरेवा०मातृतीर्थनाम॥१०३
मार्कंडेयउ०॥ततोगच्छेत्राजेंद्रनर्मदातीर्थमुत्तमं॥कौबेर्यांमातृतीर्थात्तुरेवायादक्षिणेतटे॥१॥पुरादवंत्यांबलकोराजासू
र्यवंशसमुद्भवः॥तस्यपुत्रंसमभवत्पुरारिपुगणोः॥मह॥२॥त्रिंशन्नाम्नासौश्वरिपवस्तेतुसर्वबलान्विताः॥बलकोश्वा
दिकंसर्वंस्वयंयातिहितस्यतु॥३॥कदाचिन्मध्यरात्रेवबालपुत्रःसभार्यकः॥निर्गतोनगराद्राजापलायनमतिर्नृप
४॥निर्गच्छन्विध्वतःश्वापिदुर्गरोधकरैर्नरैः॥विहायपुत्रंभार्यांचतमस्युःश्चैपलायितः॥५॥विषादंपरमंप्राप्तश्च
रन्नेकोवनाद्वनं॥चिंतार्थःक्षुधितःसोपिक्रमंदेवामवाप्तवान्॥६॥विमृष्यचस्वयंप्राप्तंबलकोनापरिच्छदं॥कुटुं
बंपुत्रभार्यादिसर्वंनाशंविचिंत्यच॥७॥वियोगार्तैःसंखायाआगतोदक्षिणेतटे॥गाढंपरिकरंबध्वापतिष्या
मितिचिंतयन्॥८॥दृढदिनाद्भिर्हृद्यहृदेतूर्णंपपातच॥ततस्तंपतितंदृष्ट्वानर्मदाशार्दूयेनतं॥९॥दधारो
त्संगेपितेनयतमानंयुधिष्ठिर॥प्रापयित्वातटंदेवीतिष्ठतिस्मकवाचह॥१०॥माकर्षीसाहसंवत्सेत्युक्त्वा
चांतरधीयत॥ततःस्वस्थोभवद्राजाविस्मयाच्चाविचिंतयत्॥११॥नान्यस्यकर्मैतदिहमुक्त्वादेवींतुनर्मदां॥कः
समुद्धर्तुमिच्छेन्मांमुक्त्वामांविश्वमातरं॥१२॥ततःप्रणम्यसाष्टांगंदयाचक्रुःसैनिकः॥राजाउ०॥नमस्येन
र्मदांदेवींरुद्रदेहसमुद्भवां॥त्रैलोक्यवंदितांदेवींनरकोपनिवारिणीं॥योविमलंश्रुताद्दत्तातापार्तिघ्नीस्मृता ११०
पिवा॥१४॥स्तुतावांछितदात्रीयारूपंधत्तेचतापसी॥यासेविताचघोघ्नीपुण्यामिननेपिच॥१५॥यादृशे

शोकरंलोकंपूजितापुण्यवर्द्धिनी॥जननीलौकिकंवाह्यंकेवलंक्षालयेन्मलं॥१६॥शुष्काद्रमलविलंरेवासबाह्या
भ्यंतरंमलं॥जयदेवीजगन्मातःप्राकृतंतारयस्वमां॥१७॥त्वदंकेपतितंभीतंविवर्धयविनतिभिः॥त्वंगंगालोक
शोकघ्नीत्वमेवासिसरस्वती॥१८॥विश्वस्यबीजभूतासिबहुकल्यानुगामिनी॥यथादेवत्रयेनास्तिभेदोभुवन
पावनि॥१९॥नदीत्रयेतथानास्तिभेदोभक्तविभाविनि॥त्वंब्राह्मीवैष्णवीरौद्रीजगन्मंगलकारिणी॥२०॥त्वमेव
परमाशक्तिःपापसंतापहारिणी॥कथंभवेद्विश्वमिदंवराकेनचेतभवेत्तंनभविष्यति॥२१॥योगीश्वरभवाभू
तिर्भवयोगविमोचनी॥बहुदुःखाभिसंतप्तंजनंकोपातिपावनि॥२२॥त्वांविनानर्मदेमातर्मद्दुःखणमनामयं
॥एवंस्तुनवतस्तस्यजलमध्याद्विनिर्गता॥२३॥स्त्रीरूपानर्मदादेवीरणत्कंकणकंकणा॥क्वणन्नुपुरशब्दा
ढ्यामेखलादामगुंफिता॥२४॥इंदुनीलनिभंवासोदधानानीरजेक्षणा॥विभ्रतीकमलंत्रोपर्णाभयंचसरि
द्वरा॥२५॥तुष्टास्मितिनृपंप्राहदेवीमगरगामिनी॥राजाउ०॥यदितुष्टासिमेदेवीपूर्णांसंक्षपेकुरु॥२६॥शोकेनातुरम्य
मेदेवीकोशंसंपादयांविके॥सैन्यंमेचतुरंगंचक्षीणंदेहिपुनर्मम॥२७॥भार्यापुत्रैःपरित्रातोयथात्वांप्रणमेपुनः॥
तथाकुरुप्रसंनाचेदेहिदक्षिणतान्हवि॥२८॥मार्कंडेयउ०॥इतिसंप्रार्थितारेवानृपंदत्त्वाबलंप्रति॥ददौशोणंसुरत्ना
मानंमणियष्टिंचमल्लिकां॥२९॥मणिज्ञानेनसंलिख्यपश्चात्त्वंताडयस्वतत्॥यद्यद्युत्त्वमिराजेंद्रतत्तल्लिखधरातले॥
॥३०॥तत्सर्वंभवितासद्योभार्यापुत्रादिकंतथा॥दंतिनोदशसाहस्रंदत्वालक्षंतथाहयाः॥३१॥दत्वायुतानिरथिनांद
शकोटयःपदातयः॥अक्षयश्चापिकोशस्तेयावद्राज्यंस्थितिस्तव॥३२॥मणियष्टिंततोराजन्मत्प्रवाहेप्रवास्यन॥
प्राप्स्यसिमात्तंनचेद्राजन्नुक्त्वांतरधीयत॥३३॥राजाचतत्रतीर्थेवैनर्मदामूर्तिमादरात्॥कारयित्वाप्रतिष्ठाप्य
पूजयित्वाजगामह॥३४॥विपुलंपुलिनंप्राप्यकृत्वागजरथादिकं॥सज्जीकृत्यबलंदेव्याउक्तंतथायथा॥३५॥
ततस्तानजयच्छत्रून्युधिष्ठिरमर्षणान्नृप॥भार्यापुत्रादिकंलेभेस्वंराज्यंप्राप्तवान्पुनः॥३६॥इतितेकथितंपा

223/2008

रे. खं. र्थं नर्मदातीरमुत्तमं॥ त्रैलोक्ये तीर्थे च यः स्नात्वा पूजयेन्नर्मदां नृप॥ ३७॥ यथोक्तेन विधानेन यथाशक्त्या च भक्तितः॥ नस
१११ म्यग्विमुच्यते सर्वपापैर्मुच्यते ध्रुवं॥ ३८॥ तिलोदकेन दत्तेन नमोदंते पितरो दिवि॥ यः पठेद्यदमं स्तोत्रं नर्मदाप्रीतिका
रकं॥ ३९॥ सुविधो ब्राह्मणो भक्त्या क्षत्रियो वैश्यो भवेत्॥ राज्ञा वा राजपुत्रो वा नरा राज्यं भ्रंशमामुयात्॥ ४०॥ मर्त्यलोके
चिरं स्थित्वा ततः स्वर्गे महीयते॥ तुष्ट्यर्थं नर्मदा या विभाजये ब्राह्मणान्भुवि॥ ४१॥ यथाशक्त्या च भक्त्या च गौरि
णीश्च कुमारिकाः॥ संभूष्य भूषणैश्चित्रैर्नर्मदाप्रीतिकारणात्॥ ४२॥ पतितं न भवेत्तुष्टा नर्मदा तस्य भारत॥ ४३
इति श्रीरेवा०॥ नर्मदानाम तीर्थं॥ ०५॥ ॥मार्कंडेय उ०॥ ततो गच्छेत राजेंद्र तीर्थं मुंडेश्वरं परं॥ मातृतीर्थे क्रीडामा
त्रं सर्वपापक्षयंकरं॥ १॥ महादेवगणः पूर्वं मुंडो नाम नृपोत्तम॥ पार्वत्या रक्षणे युक्तः शिवेनाज्ञापितो गणैः सह॥ २॥ एक
दा कौतुकं द्रष्टुं गजयुद्धं जगाम सः॥ तावत्कालं महादेवः प्राप्तो वै गिरिजांतिके॥ ३॥ न ददर्श गणं तत्र रक्षार्थं ये
समादिष्टं॥ ततः क्रुद्धः पशुपतिस्तं शशाप समागतं॥ ४॥ कौतुकं गजयुद्धस्य त्वं द्रष्टुं गतवानसि॥ उमया रक्षणं
त्यक्त्वा गतो मर्त्यधरातलं॥ ५॥ मर्त्ये विमूढचेतस्त्वं भविताऽसि न कौतुकी॥ मुंडो विगतसंस्कारो वाचा तस्य नृपपा
तथा॥ ६॥ एवं शापं ससरुद्रेण लुठन्नग्ने गणोत्तम॥ पुनः पुनः सविरूपं प्रचुरं दीनमानसः॥ ७॥ उवाच देव मत्कोऽस्मि
पाहि मां शरणं गतं॥ त्वयि प्रकुपिते थापत्वमेव शरणं मम॥ ८॥ भक्तोऽस्खलितपादानां भमिरे वावलंबनं॥ त्वदी
यो हं महादेव त्वामेव शरणं गतः॥ ९॥ तस्मात्कारुण्यमास्थाय [illegible] रक्ष रक्ष महेश्वर॥ त्वां मुक्त्वा वद कोऽन्यो
क्तिर्यो महान्भिगम्यते॥ १०॥ एक एव पतिर्मह्यं भवानीपतिरीश्वर॥ तमेव वाहिनं देवी लुठंतं वीक्ष्य चाब्रवीत्॥ ११
दयालो देव मुंडाय दीयतां चाप्यनुग्रहः॥ क्रियते सलिलं कः कोपो भक्तस्योपरि धूर्जटे॥ १२॥ शिव उ०॥ शापोऽयं भ १११
विता मुंड भव जातिस्मरो भुवि॥ ब्राह्मणस्य कुले भूत्वा यथोक्तं सर्वमामुहि॥ १३॥ कालेन क्रियता प्राप्य रेवाम
द्रेहसंभवं॥ तत्र तप्त्वा तपश्चोग्रं स्थापयित्वा च मां ततः॥ १४॥ पुनः प्राप्स्यसि मे पार्श्वे न वाच्यं बहुलं पुनः॥ मा

र्कंडेय उ०॥ इत्युक्तो देवदेवेन पपात धरणीतले॥ १५॥ स मुंडः प्राप्तवान्सर्वं यथोक्तं हरभाषितं॥ जातिस्मरस्तु कालेन रे 225/2008
वाया दक्षिणे तटे॥ १६॥ तपश्चचार विपुलं स्थापयामास शंकरं॥ शिवं मुंडेश्वरं नाम पूजयामास भक्तितः॥ १७॥ मंदा
रैः सिंदुवारैश्च कल्हारैः कुमुदैरपि॥ अरण्ये बिल्वपत्रैश्च मुंडो मुंडवनेचरः॥ १८॥ ततः प्रसन्नो भगवान्ददौ लोकं पुनर्निजं॥
साक्षाद्रूपो महादेव एहीत्यब्रवीद्वचः॥ १९॥ पार्वत्या सहितो रुद्रो गगने वृषवाहनः॥ यमोपरि दयालुत्वात्तीर्थेऽस्मिन्त्वं सन
निधिं कुरु॥ आचंद्रार्कमिदं तीर्थं नत्वा त्वं गिरिजापते॥ यो यं कामयते कामं तत्र तीर्थे गणेश्वर॥ २१॥ सततं लभतामाशु
यथानुग्रहवानसि॥ महादेव उ०॥ एवं भवतु यच्चोक्तं त्वया किंकरसत्तम॥ २२॥ सर्वं भविष्यतीत्युक्त्वा तं चनीलाजगा
म ह॥ महादेवस्तु कैलासं तेन सार्धं युधिष्ठिर॥ २३॥ अत्र तीर्थे तु यः स्नात्वा तर्पयित्वा सुरान्पितॄन्॥ मुंडेशमभ्यर्चयति
यथाशक्त्यानुभक्तितः॥ २४॥ पंचामृतेन यः स्नाप्य शाम्यारण्यैश्च पुष्पकैः॥ यथालब्धैर्धूपदीपैरर्पणीराजनादिभिः॥
२५॥ गीतवाद्यैश्च नृपते तोषयेत्परमेश्वरं॥ अष्टम्यां वा चतुर्दश्यां तस्य पुण्यफलं शृणु॥ २६॥ दशवर्षसहस्राणि तथा पं
च शतानि च॥ शिवलोके मुनिप्राप्य पितृभिः सह मोदते॥ २७॥ केवलं योगपरं च वरस्त्रमनं मृगाजिनं॥ यो दद्याद्व्रतः
श्रेष्ठ तीर्थे मुंडेश्वराह्वये॥ २८॥ कनकं कलशं घंटां तस्य पुण्यफलं शृणु॥ नीरोगो रूपवान्वाग्मी विद्यावान्सुकुलसं
मतं॥ २९॥ सष्टान्नीशीलवान्दाता ससप्तजन्मनि जायते॥ इति ते कथितं पार्थ तीर्थं मुंडेशमुत्तमं॥ ३०॥ श्रवणात्कीर्त
नादस्य सर्वपापैः प्रमुच्यते॥ ३१॥ इति श्रीरेवा०॥ मुंडेश्वरनाम तीर्थं॥ ०८॥ ॥मार्कंडेय उ०॥ ततो गच्छेत राजेंद्र संग
मं पापनाशनं॥ अनड्वाही नदी यत्र रेवाया सह संगता॥ १॥ मुंडेश्वरात्क्रोशमात्रं तच्च तीर्थं शृणुष्व मे॥ पुरा देवसमाक्रांतो
रुद्रो द्रावयांडव॥ २॥ स्वकादेस्य निधिधार्थं वृषभं दरतो विभुः॥ पार्वत्या सह राजेंद्र यावद्दीप्ता भियाति वै॥ ३॥ तावता वृषभे
नासौ देसो युद्ध परोधितः॥ गर्जता पुच्छदंडेन दिवो लेखं प्रकुर्वता॥ ४॥ तदा तेनात्र दीर्घो यं गर्तः शृंगखुरैः कृतः॥ खुर
खातेन गर्तेन च भवानड्वाहनदी॥ ५॥ शास्त्रार्थे शिवयानस्य वृष्यामैयैः प्रवर्तिताः॥ तदा पुण्यतमा जाता तन्स्वेदजलपूरि

रे·खं· ता॥८॥हितायसर्वलोकानांरेवयासहसंगता॥विधिनासंगमेस्नानंकर्तव्यंनृपसत्तम॥ ७॥देवान्पितृंश्च संतर्प्य श्राद्धंकु
१११ र्यात्प्रयत्नतः॥ समुच्यतेपापसंघात्पितॄन्उद्धरतिस्वकान्॥८॥वसेद्वर्षसहस्रंच शिवलोकेयुधिष्ठिर॥९॥इतिश्रीरेवा०
माहात्म्येब्रह्मदुहितासंगमतीर्थ॥०७॥मार्कंडेयउ०॥तत्रैवपश्चिमतटेभीमेश्वरमितिप्रजपेत्॥तववंशेपुरात्यासीत्सेना
रातसमावृतः॥१॥भीमसेनइतिख्यातःसोमवंशपरोमहान्॥पृथिव्यांसागरांतायांतत्समःशत्रुतापनः॥२॥पत्नीबद्धा
न्योब्रह्मण्योपतृत्वानांभवत्परः॥भीमसेनस्यपौत्रात्तातवंशेयुधिष्ठिर॥३॥परिक्षित्तनयस्तस्याधीयोनाम्नातीर्थमुत्तमं॥द्दु
तीयोऽकृस्तनृपतेभीमसेनःसुतोभवत्॥४॥पांडोःपुत्रस्ततीयश्चयोयंपार्थतवानुजः॥द्रोकसौतववंशेस्मिन्द्वावेवतुपरिक्षि
तौ॥५॥भीमसेनस्ययोराजन्द्वावेवजनमेजयौ॥परिक्षित्तनयःपर्वंकथ्यतेयोयुधिष्ठिर॥६॥सभीमसेनःसकलांविजित्य
पृथिवींपुरा॥सचिवान्स्वपुरेन्यस्यययौसमृगयांप्रति॥७॥विंध्यपार्श्वेषुविचरन्प्राप्तोसौमेनदातटं॥तत्रस्नात्वाचपी
त्वाचस्वसैन्यंचाप्यपाययत्॥८॥वनछायासुविश्रांतोसैन्यंकुरुसुतात्मज॥न्यग्रोधतलमाश्रित्यमुख्याप्यांदिव्यतेयदा॥
९॥यदेयंनर्मदादेवीतत्कालहन्नीयेचाययौ॥रूपयौवनसंपन्नासर्वाभरणभूषिता॥१०॥दिव्यवस्त्ररतादेवीरणन्नूपुरमेख
ला॥मृगनेत्राम्मगांकास्यामृगराजोदरीशुभा॥११॥मृगनाभीसुगंधाचभीमसेनाग्रतःस्थिता॥सतांदृष्ट्वावरारोहाम
नलोलयतेक्षणं॥१२॥उवाचमधुरंवाक्यंकासिकांन्यासिभामिनी॥देवीवामानुषीवापिकिंवापिवनदेवता॥१३॥देव्यु
वाच॥नर्मदाहंमहाभागारुद्रदेहसमुद्भवा॥नदेवीमानुषीवास्यानचाहंवनदेवता॥१४॥त्वांवृणोमिविवाहार्थे ब्रह्मण्यं
सत्यवादिनं॥ऐश्वर्यरूपसंपंनंकोनकामस्तरादितं॥१५॥राजाउ०॥पृच्छतियासिलोकानांदेवानांचसरिद्वरे॥आगतांमा
नुषंमांत्वंभर्तुंबुध्यानुकिंशुभे॥१६॥जननीचासिलोकानांचराचरगुरोःसुता॥साकिंमांप्रतिभावेनस्वैरिणीचागतान
रं॥१७॥देव्युवाच॥नविचार्यंमहाराजकामकेलिरुतंकचित॥तथापिकार्यंयोगेनभवितव्यवलेनच॥१८॥त्वामिछती १११
हसंप्राप्ताकियत्कालंनृपोत्तम॥ततोहंस्वेछयायास्येपुनःस्थानंस्वकंनृप॥१९॥राजाउ०॥एवंत्वानवृणोम्यद्यस्वेछयागं

नुमिछती॥यद्यपिस्यान्नकार्यंयोगाद्भवितव्यवलेनवा॥२०॥श्रीदेव्युवाच॥पुत्रैकमससंयावत्तस्यास्येहंयदिमन्यसे॥
त्वयहंरममाणात्तुलंवाभयकिमिछसि॥२१॥राजाउ०॥मयिनस्थास्यसेचेत्त्वयावज्जीवंसरिद्वरे॥त्वत्यकालस्यहेतोत्वंनस्त 227/2008
र्गामिनवोद्भवे॥२२॥देव्युवाच॥एवंचेदिछसिविभोत्वणीधममयेनमां॥किंचित्कृत्वाचित्कर्मकामानविधिक्रमात्वमायदि॥२३॥
ततास्मिछामिराजेंद्रत्वयिसत्कानवेछया॥एवंभवतुकल्याणीतिष्ठमत्केरवासिनी॥२४॥मार्कंडेयउ०॥एवंतेसमयंकृत्वापर
स्परमथाद्दतौ॥राजानदेवतांदेवीनर्मदानरउत्तरे॥२५॥वैवाह्यविधिनाविप्रैःपुण्यमंत्रैःसुमंगलैः॥दत्वागांहेमवासांसिवे
दिमध्येस्थितोनृप॥२६॥किंचित्कालंस्थितस्तत्ररेवातीरेचनोत्तमे॥प्रीत्यासंस्थापयासेमोनाम्नाभीमेश्वरंशुभं॥२७॥त
त्रैवदेव्यावचनात्प्रजापत्यपत्नजं॥युधिष्ठिर०॥किंतद्राव्यंयत्कंविप्रयत्वयापूर्वभाषितं॥२८॥कारणंतन्ममाचक्ष्व
येनरेवासमाश्रिता॥मार्कंडेयउ०॥साधुपृष्टंमहाराजधर्मपुत्रयुधिर॥२९॥श्रेष्ठप्रश्नमेतंनकेनापिकृतंनोत्तमंमयात
था॥तथापिकथयिष्येहंसमाहितमनाःशृणु॥३०॥शृणुध्वंबांधवाःसर्वेब्राह्मणाःसहभारत॥येनरेवाश्रणोतिस्मभी
मसेनंनृपंपुरा॥३१॥दित्यांजातःकश्यपेनहिरण्यकशिपुर्हियः॥दैत्यश्चमानवःसिंहेननिहतोयोरणाजिरे॥३२॥त
स्यवंशेमहादैत्योनाम्नातुगगनप्रियः॥हृष्यमानेषुदैत्येषुश्चान्सिंहेनमानवता॥३३॥पतितेषुनष्टेषुसनतासमहासु
र॥पुरतोलोकपालानांलज्जयाधोमुखोभवत्॥३४॥हसितोलोकपालैःसमगर्वैर्भास्करादिभिः॥तेनरोषेणगोक
र्णगिरिमासाद्यचासुरः॥३५॥दिव्यंवर्षसहस्रंसतपस्तेपेसुदुःकरं॥शीर्णपर्णांबुवाताशीवामपादाग्रसंस्थितः॥३६॥तो
षयन्पूर्वंपुरुषंब्रह्माणंप्रपितामहं॥ततस्तत्तपसातुष्टोब्रह्मलोकपितामहः॥३७॥दर्शयित्वासचात्मानमुवाचगगन
प्रियं॥ब्रह्माउ०॥वरंवरयभोवत्सकुंर्तोसजनपःकृतं॥३८॥परितुष्टोस्मिदैत्येंद्रतपसानेननतेसुत॥किमिछसिमहा
वाहोराज्यस्वर्गापवर्गिकाः॥३९॥दैत्यउ०॥यदितुष्टोसिमेतातयदिदेयोवरोमम॥लोकपालानविजित्यामितथा
देहिपितामह॥४०॥रथंचदेहिमेब्रह्मन्देवासुरनिवर्हणं॥अंतरिक्षचरंसिद्धंजसंगगतिचारिणं॥४१॥अमरत्वं

रे॰ खं॰ अवध्यत्वं विना सर्वं भविष्यति ॥ विजेतास्मि भुवं सर्वान् लोकपालादिकान् सुरान् ॥ ४३ ॥ तस्मात्वं सर्पश्रेष्ठ मम संगमनिवा
११२ रिणं ॥ अमरत्वं च मे देहि यदि तुष्टोसि मे विभो ॥ ४४ ॥ ब्रह्मोवाच ॥ दुर्निरीक्ष्यः सुराध्यक्षैस्त्रिपुरारिर्यथा ॥ अवध्योहं च सर्वे
षां दुरासदादिषु ॥ भवामीह यथा ब्रह्मन् देहि मे त्वं वरं त्रयं ॥ अमरत्वं यथा वत्स यदि च्छसि त्वया स्तुतं नन ॥ ४५ ॥ अद्य मा
मादितः कृत्वा अमरत्वं न कस्यचित् ॥ दैत्य उ॰ ॥ न देवासुरगंधर्वैर्न यक्षोरगराक्षसैः ॥ ४६ ॥ वधो मे स्यात्कदाचित्तात देहि हि
पितामह ॥ न मर्त्यैश्चिंतये ब्रह्मन् मनसापि कदाचन ॥ ४७ ॥ दुर्बलं कृपणं दीनं सर्वतः परिशंकितं ॥ ब्रह्मोवाच ॥ एवं ते प्रार्थितं
सर्वं भविष्यति न संशयः ॥ ४८ ॥ नरोयमवजानाति तस्मादस्य भयं भवेत् ॥ एवमुक्त्वा स भगवान् भाविकार्यं विचिंत्य च ॥ ४९
दत्तमेतन्मया तुभ्यं इत्युक्त्वांतरधीयत ॥ युधिष्ठिर उ॰ ॥ भाविकार्यमिति प्रोक्तं यत्त्वया द्विजसत्तम ॥ ५० ॥ यन्मे कार्यं च दानवे
परं कौतूहलं हि मे ॥ मार्कंडेय उ॰ ॥ शृणु पार्थ प्रवक्ष्यामि यथावृत्तं पुरातनं ॥ ५१ ॥ वसंतसमये चैत्रे मासि कैलासवासि
नं ॥ गौरीपतिं नमस्कर्तुं स्तोतुं वाप्यर्चितुं सुराः ॥ ५२ ॥ इंद्रादयस्तथा सर्वे लोकपालाः समागताः ॥ देवर्षयस्तथा चान्ये गं
धर्वा यक्षकिंनराः ॥ ५३ ॥ पुराणानि च सर्वाणि सेतिहासानि तत्र तु ॥ एवं समागमो भव्यः कैलासे शिवसंनिधौ ॥ ५४ ॥ त
तथैवाप्सरसो नद्यस्तीर्थान्यब्धिपुरागमान् ॥ वेदान् सांगांश्च शास्त्राणि मूर्तानि मनुजर्षभ ॥ ५५ ॥ प्रणम्य च स्तुवं
ति स्म गिरिशं विविधैः स्तवैः ॥ समभ्यर्च्य सुरेशानं लोकपालाः सवासवाः ॥ ५६ ॥ तेषां मध्ये तदा वह्निर्दृष्ट्वा नारीं मनोहरां
॥ शिववामस्थितां चैषां दक्षिणे शुभलक्षणां ॥ ५७ ॥ दिव्यांबरधरां दिव्यभूषणोरूपशोभितां ॥ पृथुश्रोणीं विशाला
क्षीं पीनोन्नतपयोधरां ॥ ५८ ॥ हावभावविलासैस्तु मोहयंतीं जगत्त्रयं ॥ तां दृष्ट्वा चारुसर्वांगीं हव्यवाहः स्मरार्दितः ॥ ५९
वीक्ष्यमाणः सकुटिलं दृष्टः सर्वेण भारत ॥ शापमश्च याहि मर्त्यत्वं मर्त्येषु तरमंदधीः ॥ ६० ॥ यस्मान्मनुष्यभावस्त्वे
तस्मान्मर्त्यत्वमाप्नुहि ॥ इति शप्तः सदेवेन शंभुनाग्निरधोमुखः ॥ ६१ ॥ दंडवत्प्रणिपत्याशु प्रार्थयामास लक्षि ११२
तः ॥ मूढोहं मंदभाग्योहं अस्या दर्शनतो विभो ॥ ६२ ॥ सत्यमेतन्महादेव कृपां कुरु मयि प्रभो ॥ किं करोमि विमू

ढात्मा देवमायाभिमोहितः ॥ ६३ ॥ शापानुग्रहसामर्थ्यं त्वयि देव सनातन ॥ दीनस्य तव भक्तस्य शापांतं वद धूर्जटे ॥ 229/2008
६४ ॥ कोपो महात्मनां देवगृहदासेषु कीदृशः ॥ नन्विदं विश्वमिदं देवत्वादेशकरं विभो ॥ ६५ ॥ महादेव उ॰ ॥ यज्ञामहाप्रभा
वस्त्वं मर्त्यलोके भविष्यति ॥ भीमसेन इति ख्यातो भीमपाकेन पावकः ॥ ६६ ॥ इयं च कुटिला देवी त्वया प्राप्स्यति नर्मदा
॥ अस्यां च पुत्रमुत्पाद्य शरंगाशु प्रमापनं ॥ ६७ ॥ ततः प्राप्स्यसि वह्ने त्वं स्वस्थानं पुनरुत्तमं ॥ एवमुक्तः स देवेशोप्यपाता
न्निरिलातले ॥ ६८ ॥ अवतीर्णः समाख्यातो भीमसेनो नृपोत्तम ॥ वर्तितवान्महाराज यथा प्रोक्तं तथा मया ॥ ६९ ॥ मार्कं
डेय उ॰ ॥ प्रचलद्वधावरो दैत्यो लब्धाकाशचरं रथं ॥ देवान् हंतुं यदा मासं यज्ञान्विध्वंसयन्नृप ॥ ७० ॥ तपोवनेषु तो
येषु ब्राह्मणान् पीडयत्खलः ॥ तेन संतापिताः सर्वे लोकपालाः सवासवाः ॥ ७१ ॥ ब्रह्माणं शरणं जग्मुः सिद्धर्षिगणा
संयुताः ॥ मेरुपृष्ठस्थितं शांतं देवगंधर्वसेवितं ॥ ७२ ॥ विधिं प्रणम्य ते सर्वे देवाः प्रागद्विलाशयाः ॥ दर्शयंतः परं दै
न्यं तुष्टुवुर्विविधैः स्तवैः ॥ ७३ ॥ ब्रह्मोवाच ॥ स्वागतं वो लोकपालाः शक्राद्यास्त्र तत्कारणं ॥ किमागमनमिष्टं वः केन
यूयं विमानिताः ॥ ७४ ॥ केनेदं स्वं परं प्राप्ताः को भयानस्त्व पराध्यति ॥ इंद्र उ॰ ॥ हिरण्यकशिपुर्वंशे नाम्नातु गगनप्रियः
७५ ॥ त्वत्तः प्राप्तवरो ब्रह्मन् बाधते स्मान्महाबलः ॥ तेन देवाः सगंधर्वाः ऋषयः सिद्धचारणाः ॥ ७६ ॥ प्रायशः पीडिताः
तात पीडितं च जगत्त्रयं ॥ अजेयश्चावध्यश्च वरदानान्महासुरः ॥ ७७ ॥ स्थानि स्थानानि संस्यत्य प्रापिताः पशुचे
ष्टितं ॥ कुरु तस्य वधोपायं दैत्यस्यास्य तदुमते ॥ ७८ ॥ गोविप्रदेवसाधूनां ब्रह्मन् स्वस्ति यथा नवेत ॥ इत्युक्ते लोक
पालैस्तु शक्रमुख्यैर्युधिष्ठिर ॥ ७९ ॥ प्रजापतिः पतिर्देवः क्षणं ध्यात्वाब्रवीदिदं ॥ ब्रह्मोवाच ॥ शृण्वंतु लोकपाला मे शक्रा
द्याश्चिंतितं पुरा ॥ ८० ॥ कल्पितोस्ति वधोपायस्तस्य दैत्यस्य वै मया ॥ पुरेदं प्रार्थितं तेन तप्यमानेन वै तपः ॥ ८१ ॥ दृष्ट्वा
द्विभिरवध्यस्यां मनुष्यैः किं भवेन्मम ॥ मानुषान् सोवजानाति तस्माद्दस्यास्ति वै वधः ॥ ८२ ॥ न मनुष्यसमः कोपि त्रिषु

रे॰ खं॰ लोकेषु विपते॥ समानुषे निजं प्राप्य पद्विज्ञानातिमापितुं॥८२॥ देवत्वममरेशात्वं तेन प्राप्तं च मानवाः॥ यत्किंचिद्वांछि
११४ तं चाप्यहर्ठं पैत्र्यवसाधिन:॥८४॥ यथा पुरा ध्रुवो प्रोप्यं स्थानं प्राप्य महामतिः॥ ज्ञानपादनपतेः पुत्रमनभपिगाच
र:॥८५॥ आचिरेणैव कालेन पुष्करो वरुणात्मजः॥ भीमसेनस्य नप्ता ते सोमवंशोद्भवस्य तु॥८६॥ तस्य देवस्य नाज्ञाय
नर्मदायां भविष्यति॥ स्वेषु स्थानेषु सुखिनो देवास्तिष्ठंति निश्चिताः॥८७॥ इत्युक्ता लोकपालास्ते ब्रह्मणा परमेष्ठि
ना॥ प्रणम्य च विधातारं जग्मुः सर्वे यथागतं॥८८॥ युधिष्ठिर उ॰॥ एकस्माद्वद विप्र संज्ञापोऽद्वितीममहान॥ देवगं
धर्वयक्षेषु स्वसैन्येषु बहुष्वपि॥ वरुणस्यात्मजः कस्मात्पुष्करो वज्ञरोदिह॥ एतन्मे कारणं ब्रूहि संज्ञायोऽमेमहा
नहदि॥ मार्कंडेय उ॰॥ कथयामि परं गोप्यं ब्रह्मणा भाषितं पुरा॥८९॥ पार्थ त्रैविक्रमे कल्पे संगरे देवदैत्ययोः॥ म
तेऽसतावसिष्ठे च दैत्यसैन्ये पलायते॥९०॥ इंद्रं तस्यापि गर्जंतो देवास्तिहर्षमागताः॥ आस्फोटयंतो वाद्यानि वादयं
तश्च सत्वराः॥९१॥ वाचस्पतिमुपागम्य प्रणम्योचुः पुरःस्थिताः॥ देवासुरे सुरायुक्ते यज्ञयंतो हृयाव्यते॥ येषामाचा
र्येवर्यस्त्वं सदेवाभ्युदये रतः॥९३॥ बृहस्पति उ॰॥ साधु साधु सुरश्रेष्ठा भवंतः शूरसंमताः॥९४॥ युष्माभिर्यज्जितं पु
रुत्कृतं स्वकुलोचितं॥ दानवानाजिताः सर्वे निरपायं जगत्कृतं॥९५॥ एवं ब्रुवन् सुरगुरुर्ददृशे पुरतःस्थिता
न्॥ लोकपालसुतांस्तत्र जयंतप्रमुखानपि॥९६॥ नाशत्यावह्निसुताश्च चंदं यमसुतस्तथा॥ वरुणः पुष्करो ना
म्ना वेगवाननिलात्मजः॥९७॥ सुवर्चाश्चंद्रपुत्रोऽथ नासत्यास्य संभवौ॥ एवमन्यानपि तदा दृष्ट्वा देवसुतान् गुरु
न्॥९८॥ हसन्नपप्रच्छ विजयं जितं केनेति सर्वतः॥ वदंतु देवतनयाः सर्वे वै पुरतःस्थिताः॥९९॥ जितं केनात्र भूरेण
कोजपस्यत्रसत्तमाः॥ शिखी उ॰॥ शक्रो जयति नान्योऽत्र जितं शक्रेण वै गुरो॥१००॥ जितमिंद्रेण विप्रेंद्र सर्वैस्तेन जि
तं जितं॥ वेगवानुवाच॥ जितं तेन द्विजश्रेष्ठ यन्मंत्राय कुरुभेवान॥१॥ सुवर्चा उ॰॥ कृते सुरेश्वरं देवमन्यको ११४

जयवानिह॥ पुष्कर उ॰॥ असंगा ऊचे पाशो यो जीवनाय पतिश्च यः॥२॥ मत्वासित्रावरुणेनेह जितं तेन महौजसा॥
प्राणार्थी यं समभ्येत्य येन विद्रुतमिदं धृतं॥३॥ प्लावयंपृथिवीं यो वै जितं तेन महेतसा॥ जयंत उ॰॥ सत्यमेतत्सुरगुरो
भाषितं पुष्करेण यत्॥४॥ भूरेनाविजितं सम्यग्जितं तत्स्वामिना ध्रुवं॥ नविस्मयाद्धंवरान्त्र यज्ञायंत सुरनायकः॥५॥ ध
र्मोजायतिना धर्मः सत्यं जयति नानृतं॥ तस्माज्जयति नक्रोधो विष्णुर्जयति नासुरा॥६॥ एकोऽविष्ण्वाधिपो विष्णुस्तद्गतेन
पराजयेत्॥ जितं भगवता तेन हरिणा लोकधारिणा॥७॥ तदुक्तं सनापि त्रिकोणं जितं वै हरिरीश्वरः॥ मार्कंडेय उ॰॥ उत्क्रांत
वति राजेंद्र शक्रपुत्रेन देवाहि॥८॥ साक्षित्वका च गीरसः पुष्पवृष्टिपपातखात्॥ प्रत्यायांशुश्च तं देवा जयंतं सुभाषिनं॥
९॥ ततो बृहस्पतिर्वाक्यं पुष्करं क्रोधमूर्छितः॥ शशापसचरांभपधिग्धिगस्य सकृत्कुवन॥१०॥ बृहस्पति उ॰॥ यतस्त्व
सुरस्थानात् अहंकारयुतो भुवि॥ प्रकृत्याने चचपलदुर्बुद्धे मर्त्यता नज॥११॥ बाल्योसि बालभावेन भाषसे त्वं यथा
तथा॥ तावानेव ज्ञाघष्टे यन्मर्त्ये त्वं भविष्यसि॥१२॥ पुष्कर उ॰॥ बालत्वेन मयाहानं यदुक्तमविचारितं॥ नचेतनासि तत्पाथा
यं समममरुष्यवाक्यतं॥१३॥ मत्तोन्मत्तव्याधितेतिर्गिभिर्यत्कालिकृतः पः कुमारसुरवात्ययः॥ मरेष्वप्रः क्षुधितेर गना
निश्चिंतधीरोनानयंतो हि किंचित॥१४॥ अतोदं दुप्रणामेनया चत्वां सुरपूजित॥ मत्कृमापि सुराचार्यो ज्ञापस्यांतो वि
धीयतां॥१५॥ बृहस्पति उ॰॥ मर्यानीतको हि वत्थानस्या च्छापांतस्य भविष्यति॥ स कृतां कुमिवध्यात्वा पुनः प्रोवाच पुष्करं
१६॥ कर्तास्त्वं देवकार्यस्य भविष्यसि नृपो भुवि॥ तत्र त्वं देवकार्यं हि कृत्वा स्वस्थानमाप्स्यसि॥१७॥ इत्युक्तो गुरुणा स
यो भूनिर्भीमसुतो भवत्॥ मार्कंडेय उ॰॥ इति ते कथितो हेतुः पुष्करोत्पत्तिलक्षणं॥१८॥ राज्ञो विरममाणस्य रेवातीर
वने पुरा॥ कालेन महता पुत्रं नर्मदासमजीजनत्॥१९॥ स पुष्करोभवत्पुत्रो नाम्ना दुःखामनोत्तप॥ ऊनषोडशवर्षः स
विप्रेकमपि दृष्टवान॥२०॥ देवज्ञाराधनं ब्रह्मिह्यथा शर्वेः प्रसादात्तनुतं नाके नविधानेन तपस्तेपि शिवार्चकः॥२१॥
समरं कल्मासापशिरं गिरीपा सेवितं॥ तत्र गत्वा तपस्तेपे शिवपाणि भारत॥२२॥ विस्नाप॥ सनियध्याय॥

231/2008

रे॰ खं॰ निहारस्तथाभवत्॥ प्रसन्नः शंकरो देवो वरं ब्रूहि स्मृवाचतं॥ २२॥ दुःशासन उ०॥ वरमेकं हि वरये वैरिणः सो मदारुणः॥ वि
११५ चित्रयुद्धकरणो युद्धेनाप्य पराजयं॥ २४॥ महादेव उ०॥ एवं तं भावितावत्स तं यथा त्वं तु हामिति॥ दुर्धरं दिव्यमस्त्रं शक्तिः शक्ति,
नीनामना मतः॥ २५॥ मयादत्तं ग्रहाणेमां अमोघां शत्रुनाशिनीं॥ युद्धसंकुलमासाद्य मोचनीया च नान्यथा॥ २६॥ श
स्त्राणि प्रतिभास्यंति शास्त्राण्यपि च सर्वशः॥ सुरकार्यं महत्कार्यं त्वया कार्यं महेश्वरः॥ २७॥ जगामादर्शनं शंभुर्वरं दत्वा
स्य वांछितं॥ तस्मिन्नंतर्हिते देवे राजा दुःशासनस्ततः॥ २८॥ युद्धाभियोगमाश्रित्य चक्रे दिग्विजयं प्रति॥ समंतान्नसारि
पून्जित्वा ततो द्वीपानि सर्वशः॥ २९॥ दुर्गाणि यानि विजित्य सगिरिद्रोणीगतानि च॥ एवं बहूनि वर्षाणि राजा दिग्विजये
स्थितः॥ ३०॥ अक्षौहिण्यो दशाष्टौ च प्रचकर्षारितापनः॥ सर्वो पि मानुषे लोके नास्ति द्वीपेषु सप्तसु॥ ३१॥ यो यन
पुरतस्तिष्ठेत प्रतिमल्लतया नृप॥ ततः स्वर्गजये बुद्धिं यदा राजा विधास्यति॥ ३२॥ तदांतरिक्षाद्यांतं नारदं सुददर्श
ह॥ पुरः समागतं वीक्ष्य मुनिं ब्रह्मविदांवरं॥ ३३॥ स संपूज्यार्घपाद्यैश्च प्रणम्य च मुनिं नृप॥ उवाच स्वागतं तस्तु मु
ने त्वमस्मृत प्रभो॥ ३४॥ विज्ञापं कथय स्वार्थं समागमनतं तव॥ धन्योस्म्यनुगृहीतोस्मि दर्शनादद्य ते मुने॥ ३५॥ ना
रद उवाच॥ दिव्यांतं विजयी राजन् दिव्यांते रिपवो जिताः॥ दिव्यादिग्मरुदानिलं कोनाकं दृश्यते मे॥ ३६॥ दुःशास
न उ०॥ भगवंस्त्वत्प्रसादेन मयाभवत्समर्जितं॥ जिताश्चारिनृपाः सर्वे गिरिदुर्गनिवासिनः॥ ३७॥ सुराश्चापि बलाः स
र्वे तथा द्वीपांतरेषु ये॥ यावन्न लोकपालानां पुर्यामे विजिता मुने॥ ३८॥ तावन्मयापि न जितं किंचिदेव हि दृश्यते॥ ब
हिकः को विजेतव्यो यामि तं प्रति नारद॥ ३९॥ नारद उ०॥ किं जिते लोकपालैस्तैः किं च भवत्यर्जितं॥ यावत्तयानवि
विजितो दैत्यारिर्गगनप्रियः॥ ४०॥ तस्मिं जिते जितं सर्वं जन्म यावितमानं तं॥ एक एव महानवीरः सदेवमपतिहत्य
धीः॥ ४१॥ न मन्यते त्रयपुरुषमपि देवेषु किंनरैः॥ राजा उ०॥ कोवं गगनप्रियो दैत्यस्य क च स्थानं क्व तद्बलं॥ एतन्मे सर्व
माख्याहि तत्त्वादस्य नारद॥ नारद उ०॥ हिरण्यकशिपोर्वंशे ह्रादपुत्रस्तु बाल्कः॥ ४३॥ तस्य पुत्रो महावीर्यो ना ११५

म्ना तु गगनप्रियः॥ स च ब्रह्मवरदानेन गर्वितो तिबलो दुःसहः॥ ४४॥ रथो गगनगस्तस्यापि क्षेत्यः संगवर्जितः॥ तमारुह्य स
पर्वकालदेवासुरनरोरगान्॥ ४५॥ हिमाद्रेस्तु हिमद्रोण्यां पुरं तेन निवासितं॥ नाम्ना तच्छोणितपुरं हिमेन परिवेष्ठितं॥ ४६ 233/2008
पुरे तस्मिन्निवसति सदैत्यः सानुगः सदा॥ भवान्यदि रिपोर्जेता यदि राजा तिमिश्च तज्जये॥ ४७॥ मा गास्त्वमन्यं राजेंद्र यस्त्वया
भवतज्जये॥ स्वस्ति ते स्तु गमिष्यामि ध्रुवं जेष्यति तं रिपुं॥ ४८॥ इत्युक्त्वा स जगामाशु नारदो मुनिसत्तमः॥ ततो दुःशासनो
राजा स्वसैन्यपरिवारितः॥ ४९॥ तस्मिन्नेव मुहूर्ते तु निर्ययौ तं रिपुं प्रति॥ गत्वा कतिपयाहोभिस्तं गिरिं हिमसंज्ञितं॥ ५०॥
आग्नेयमस्त्रं सौरं च मुमोचारिमनाशने॥ ततस्तच्छोणितपुरं प्राप राजा यदा नृप॥ ५१॥ तदैवासनं दैत्यस्य शिरसा मु
कुटो पतन्॥ प्राकंपश्चासनं तस्य ध्वजे गृध्रः पपात ह॥ ५२॥ सर्वाण्यदुर्निमित्तानि या चिंतान्वितो सुरः॥ तावद्राजा
पुरद्वारी प्राप्तः संवेष्टयत्पुरं॥ ५३॥ ध्वजिताः स्फोरनादैश्च बृंहारावैश्च धन्विनां॥ तयैव चापनिर्घोषैः प्रतिशब्दप
रस्कृतैः॥ ५४॥ विस्मितो दैत्यराट् तूर्णं सपुत्रा हुस्तिरावयो॥ स गर्जन्नाजगामाशु संवर्तक घनो यथा॥ ५५॥ सिंहना
देन महता नादयन् रोदसी नृप॥ ततो युद्धं समभवत्संकुलं नृपतिदैत्ययोः॥ ५६॥ अस्त्रैर्महद्भिश्च ततो मानुष्यैर्वस
प्य शंकरात्॥ प्रकाशितं च तल्लिंगं नाम्ना वै सत्यकेश्वरं॥ ७८॥ तस्मिन्मन्वंतरे भूप नामासी सत्यकेश्वरः॥ तस्यांते चक्र
मायाते पुनर्लिंगे धरातले॥ ७९॥ षष्ठे च चाक्षुष मनोरंतरे नृपसत्तम॥ चाक्षुषस्य मनोः पुत्रः शातद्युम्नो महीपतिः॥
८०॥ स तु तीर्थप्रियः साधुः सात्विकः सत्यसंगरः॥ स्वप्ने सो भूत्तमासाद्य प्रेरितस्तेन पार्थिवः॥ ८१॥ तीर्थानुकरणं
कुर्वन्प्राप्य दक्षिण जाह्नवीं॥ एतदेव परं स्थानं अवाप्याश्रुत पश्वरन्॥ ८२॥ जपन्नंचाक्षरीं विद्यां शातद्युम्नो मही
पतिः॥ प्राप हृष्टो चैरुद्रं पश्वंव लिंगरूपिणं॥ ८३॥ तजोनिधिं महादेवं तुष्टाव च नृपेश्वरः॥ शातद्युम्न उ०॥ नमो दे
वाप्रमेयाय निराहाय च ते नमः॥ ८४॥ नमो विषमनेत्राय नमस्ते धकनाशिने॥ उन्मत्तरूपाय नमस्त्र्यो न्म
तप्रियाय ते॥ ८५॥ नमो जगामुराराति प्राणानिर्यापहेतवे॥ अर्केण बिल्वपत्रेण काशपत्तरपुष्पकैः॥ ८६॥ पूजि
तो भक्तियोगेन बध्नामि फलेर पि॥ सुलभे दुर्लभां लक्ष्मीं यो ददेत्कस्यनातिगां॥ ८७॥ तं नमामि सुरेशान महामर
तिं महेश्वरं॥ किं नरस्य कृतैः पुण्यैर्यदि चित्ते स्थितो हरः॥ ८८॥ किमर्चितैः सुरैरन्यैर्नार्चितो यदि शंकरः॥ रमरवः साभि
लाषाभ्यो मुक्तिमुक्त्योः स्वयंवरः॥ ८९॥ वांछिताभीष्ट फलदः सकिंनः प्रार्थ्यते भगः॥ इत्येवमादिभिर्वाक्यैः स्तुयमा
नो महेश्वरः॥ ९०॥ प्रत्यक्षो भूज्जगन्नाथ उवाच च नृपोत्तमं॥ ईश्वर उवा०॥ तुष्टोस्मि भो नृपश्रेष्ठ वरं वरय सुव्रत
९१॥ किमत्र ते तपस्त्वमं किं पार्थ्यमसिलत्तम॥ इहयच्चांछसे भूप मया तद्दृष्यमेवते॥ ९२॥ राजोवाच॥ देवदेव जगन्ना
थ प्राप्तं सर्वं मयाधुना॥ यद्दिव्यमतुलं तेजो दृष्टं त्वद्देहजं विभो॥ ९३॥ तथापि वेत्प्रसन्नोसि मम त्रिलोक्यस्य शंक १२९

र॥ मम नाम्ना महेशान तीर्थमेतत्समर्थय॥ ९४॥ तप एवं नो ख्यातिर्दीनास्ते मख भाग्य वर्जिताः॥ न लब्ध्वा यदि
चेतो येषु मत्प्रीति भगवान्॥ ९५॥ ईश्वर उ०॥ एवमस्तु नृपश्रेय यत्ते मनसि वांछितं॥ स्थितोहमत्र त्वन्नाम्नायाव
न्मन्वंतरांतिदं॥ ९६॥ चाक्षुषं राजशार्दूल शातद्युम्नेश्वरो नृपः॥ इत्युक्त्वा गिरिशः साक्षात्तत्रांतर्धानमगाद्विभुः॥ ९७॥ लिं
गरूपस्थितश्चात्र समीहितफलप्रदः॥ मन्वंतरांते चात्यन्त्यमभवल्लिंगमैश्वरं॥ ९८॥ शातद्युम्नोपि नृपतिर्जगाम स्वा
नमात्मनः॥ साम्राज्यं चाप संतानं चाक्षयं चाप्योर्जयं॥ ९९॥ गौतम उवा०॥ तथैव सप्तमं प्राप्तं मंतरं नृपसत्तम॥ वै
वस्वतमिदं पुण्यं यत्र वैवस्वतो मुनिः॥ १००॥ नरिष्यंत सुतश्च त्वं पौत्रो वैवस्वतस्य च॥ नाम्ना तिलकः ख्यातिं प्रा
प्तोसि वसुधातले॥ १॥ प्रसंगाद्दिह संप्राप्तः शिवस्याराधनं कुरु॥ यथाशक्ति यथाचेतो यथावृत्तं यथाश्रुतं॥ २॥
तं नरणप्रकर्तव्यं यथा तुष्यंति देवताः॥ मार्कंडेय उ०॥ एवमाकर्ण्य नृपतिस्तिलकः पुण्यपेशलः॥ ३॥ पप्रच्छ
गौतमप्रायं पंहृष्टं स्वकुलोचितं॥ तिलक उ०॥ साधु साधु मुनिश्रेष्ठ सुधातुल्या त्वदुक्तयः॥ ४॥ किं किं न प्राप्य
ते पुंभिः प्रसादाद्यजन्मनां॥ ब्राह्मणे हि संतुष्टे तुष्टं स्यादखिलं जगत्॥ ५॥ तत्संगतिफलं किंचित्प्रष्टुमि
च्छामि गौतम॥ तपसः साधनं ब्रूहि विधानं तपसश्च किं॥ ६॥ तपसो मे फलं ब्रूहि सद्वृत्तस्य च लक्षणं॥ गौत
म उ०॥ साधु पृष्टं महाराज धन्यस्त्वं ज्ञानवानसि॥ ७॥ सात्विकं पृच्छन सदा सर्वं प्राप्नोति लभते नरः॥ धर्मश्रुतोथ
दृष्टश्च विहितः कारितोपि वा॥ ८॥ प्रोत्साहितो वा नृपते पुनात्यासप्तमं कुलं॥ शृणु सर्वं प्रवक्ष्यामि तपसः सा
धनं फलं॥ संत्यज्य ग्राम्यमाहारं चाचिह्नं धं च विवर्जयेत्॥ मुन्यन्नैर्विविधैर्मेध्यैः शाकमूलफलेन वा॥ १०॥ त्रि
स्नायी जटिलो मुंडश्चीरवल्कलवान्नरः॥ यद्भक्ष्यं स्यात्तन्नो दद्याद्बलिं भिक्षां च शक्तितः॥ ११॥ दाता च संय
ताहारः सर्वभूतानुकंपकः॥ वाक्पाणि पादचापल्यं दक्षु चापल्यं च वर्जयेत्॥ १२॥ निर्जने नियमी भूत्वा स
त्यकाकुयवरूत्तात्मकः॥ तपसः सिद्धिमाप्नोति स्वंत्यथालब्धधानो भवेत्॥ १३॥ स्मरन्स्मरहरं देवं संसेव

261
2008

रे॰खं॰ न्वस्तु यदिर्यं॥ शांतो दांतो स्तथा मैत्रः सर्वकालं समाहितः॥१४॥ योगयुक्तः सदा भ स्याद्दर्पिता मा कृतिः शिवे॥ ध्यायन्दे
१३० वं जपदेवं यजन्सं कीर्तयन् शिवं॥१५॥ शनैः शनैः स्तनं कुर्वन् तनं मनुजपुंगव॥ प्राणधारणमात्रेण तिष्ठन्ध्यानः
सदा॥१६॥ एवं युक्तो नरो भूप तमसः सिद्धिमाप्नुयात्॥ यदुग्रं कुरुते मर्त्यः स्तस्तप्याति – शंकरः॥१७॥ न किंचिद्दीप
तेद्देवैः फललब्धिः स्वसाधनात्॥ यद्दुःखं यद्दुराराध्यं यच्च दूरव्यवस्थितं॥१८॥ तत्सर्वं तपसा साध्यं तपो हि दुरति
क्रमं॥ आदृत्य सर्वाविघ्नानि मनः कृत्वा चिरं स्थिरं॥१९॥ इदानीं हांतरति च तु योगी योगफलं लभेत॥ कृच्छ्रातिकृ
च्छ्रैः पाराकैः स्तथा संतपनव्रतैः॥२०॥ ब्रह्मकूर्चैस्तथा चांद्रैः शोधयन् स्वपुरात्मनः॥ देहस्य नियदा यत्नेयदात्म
नो व्रतमाचरन्॥२१॥ तथा मूलफलैः पुण्यैः तपधैः पयसा यथा॥ धारयेद्वा मनो देहं तद्दोषो जायते क्वचित्
॥२२॥ अष्टावेतावव्रतघ्नानि आपो मूलफलं पयः॥ हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधं॥२३॥ तपसा ज्ञानं च ज्ञा
नं च तपसाधनमुत्तमं॥ सिद्धयस्तपसा साध्या स्तपसा युविवर्धते॥२४॥ नासाध्यं तपसा किं कृत्यं सत्वस्य समं
तपः॥ सूर्यचंद्रादयः सर्वे दीप्यंते दिविस्थिताः॥२५॥ ध्रुवो ध्रुवपदं प्राप्त तपसैव नराधिप॥ पुरा सृष्टिरियं
चक्रे ब्रह्मणा तपसैव हि॥२६॥ तपसा हि विदे देवाः नाकौकस्त्वं तथा नृप॥ तपसा विष्णुरजय हुलिमुख्यांश्च दा
नवान्॥२७॥ भवेद्देवातिथिर्नत्नं तपस्वी सर्वथा जितः॥ तपो नामेंद्रियजयस्तपो देहदमः परं॥२८॥ विश्वासम
ता तपो मुख्यं तथाद्वंद्व सहिष्णुता॥ शृणु सद्वृत्तयोगस्य – लक्षणं नृप सत्तम॥२९॥ यनेमं च परं चापि लोकं ज
यति मानवः॥ वयसः कर्मणोर्थस्य श्रुतस्याभिजनस्य च॥३०॥ वेषवाग्बुद्धिसारूप्यमाचरन्विहरेदिह॥ बु
द्धिवृद्धिकराण्याशु धन्यानि च हितानि च॥३१॥ नित्यं शास्त्राण्यवेक्षेत भजन् सद्वृत्तलक्षणं॥ यथा यथा हि
पुरुषः सच्छास्त्रमधिगच्छति॥३२॥ तथा तथा विजानाति विज्ञानं चापि विंदति॥ न जीर्णमलवद्वासो धारये १३०
च्च यथाश्रमेत॥३३॥ नाक्रामेद्दंतजच्छायामेतत्सद्वृत्तलक्षणं॥ नेक्षेतोद्यंतमादित्यं नास्तं यांतं कदाचन

॥३४॥ नोपसृष्टं न वारिस्थं एतत्सद्वृत्तलक्षणं॥ उपवीतमलंकारं स्रजं करकमेव च॥३५॥ उपानहौ च वासश्च 263/2008
धृतमन्यैर्न धारयेत्॥ स्त्रीजनोपरवगमनमेतत्सद्वृत्तलक्षणं॥३६॥ अहिंसा सत्यमस्तेयं शौचमिंद्रियनिग्रहः॥
दमः क्षमार्जवं दानं सर्वेषां धर्मसाधनं॥३७॥ कुर्यात्प्रदक्षिणं देवगोमद्वृक्षवनस्पतीन्॥ न पंतपस्विनं साध्वी
मेतत्सद्वृत्तलक्षणं॥३८॥ नाहितं नानृतं राजन्नेतत्स॰॥ जले पिबेन्नांजलिना नग्नं शयानं प्रबोधयेत्॥३९॥ नच्छ्रो
पसेवी यतवागेतत्स॰॥ शुचिं देवाश्च रक्षंति रक्षंति पितरः शुचिं॥१५॥ शुचिर्विभ्रंति रक्षांसि येचान्ये दुष्टचारि
णः॥ दानं ज्ञानं तपस्त्यागो मंत्रकर्मविधिक्रिया॥४१॥ मंगलाचारनियमाः शौचभ्रष्टस्य निष्फलाः॥ छेदनं भेद
नं चैव मर्दनास्फोटनं स्वतंत्र॥४२॥ कुलं कुलं रहस्यार्थी नयायात्कारणं विना॥ नच्छिन्नाति वं देजातुनचसं
प्रपयेद्दपि॥४३॥ नासीनः स्यात्स्थितेष्वेषु आयुरस्य न रिष्यति॥ यज्ञात्म एान्नदः सस्त्री ज्ञाता युधर्मिकः श्रु
चिः॥४४॥ ज्ञाननिष्ठस्तपोनिष्ठः सेव्याः श्रेयोर्थिना सदा॥ अभिवादनशीलस्य नित्यं वृद्धोपसेविनः॥४५॥
चत्वारि तात वर्धंते बलमायुर्यशः श्रियः॥ नमस्कर्माणि संप्राप्ते श्रुते स्नाते च भोजने॥४६॥ व्याधितानां च
सर्वेषां मायुष्यमभिवादनं॥ क्षमा सत्यं दमः शौचं दानमिंद्रियनिग्रहः॥४७॥ अहिंसा गुरुशुश्रूषा तीर्थानु
सरणं दया॥ आर्जवं लोभशून्यत्वं देवब्राह्मणपूजनं॥४८॥ अनभ्यसूया च तथा एतत्सद्वृत्तलक्षणं॥ संध्य
योरुभयोर्जाप्ये भोजने दंतधावने॥४९॥ पितृकार्ये च दैवे च तथा मूत्रपरीषयोः॥ गुरूणां संनिधौ दाने
योगे चैव विशेषतः॥५०॥ दत्वा स्वपि चरन्मौनं एतत्स॰॥ एषतद्वै शौनः प्रोक्तो विधिश्च तपस्विनां॥५१
तपसश्च फलं चापि तथा सद्वृत्तलक्षणं॥ संक्षेपेण वत प्रोक्तं मया सर्वं न विस्तरात्॥५२॥ एतं देवपरिज्ञा
य सर्वं संपद्यते नृणां॥ मार्कंडेय उ॰॥ एवमाकर्ण्य तत्सर्वं गौतमान्नृपसत्तम॥५३॥ सविस्मयः सतिलको
मं नस्तपसि सत्प्रभवान्॥ गौतमानुज्ञया स्नात्वा वाग्मनःकायबुद्धिमान्॥५४॥ शिवध्यानरतः शांतस्तपोतप्य

रे॰खं॰ समाहितः॥तपसाशुद्धदेहश्चनिर्विकल्पोयदान्नृप॥५८॥पूर्ववत्पुरतःप्रादुर्भूतःसपरमेश्वरः॥तदालिंगमूल
१३१ कोरुद्रःप्रणवेतपुरस्कृतः॥५९॥रौप्यंमहत्तदापश्यद्राजयानंहिनोदरा॥राजोवाच॥अहोभाग्यमिदंमन्येम
मामानुष्यमीश्वर॥६०॥काहंमन्दाकसद्भावःकत्वविश्वेश्वरोहरः॥धन्योहंकृतकृत्योहंधुरिभाग्यवतामहं
॥६१॥इत्यथंमयदायातःसाक्षाच्छर्वःसनातनः॥इत्युक्त्वादंडपातेनप्रणम्याशुनरेश्वरः॥६२॥बद्धांजलिपु
टस्तस्थौपार्श्वस्तोवाचत्र्यंबकः॥ईश्वरउ०॥साधुभोवत्सनृपतेभाग्यवानसिनिश्चितं॥६३॥तपसातोषितस्त्व
हंवरंवरयसुव्रत॥राजोवाच॥यदितुष्टोसिमेदेववराहोयद्यहंमतः॥६४॥अंतरंमेपितुर्यावत्ममनाम्ना
स्थिरोभव॥इहतीर्थंमहत्तातिलकेश्वरसंज्ञितः॥६५॥तिलकंदेहिमेवंशेस्वराज्यस्यधुरंधरं॥संतानम
क्षयंचास्तुवंशोमेत्वपराजितं॥६६॥दानशक्तिःशिवेभक्तिर्विरक्तिःफल्गुसाधने॥रक्तिर्विशेषविज्ञाने
मुक्तिरस्तुततःपरं॥६७॥ईश्वरउ०॥एवंभवतुराजेंद्रप्रियोसित्वमतीवमे॥सुभक्तस्याप्रियस्यायकि
मदेयंमयान्नृप॥६८॥यदन्यद्दयितेचित्तेतत्सर्वंभवितातवअद्यप्रभृतियत्किंचिदिहमर्त्योविधास्यति
॥६९॥यावैसुदान्हयेतीर्थेफलंतस्यनिशामय॥शुभंवाप्यशुभंवापिकृतमत्रानुवासरं॥७०॥मत्प्रसा
दादसंदिग्धंभविष्यतितिलाधिकं॥प्रारंभेतपसोयस्मात्तिलप्राशाःकृतास्त्वया॥७१॥यस्मात्तिलेश्वरो
नामत्वंनाम्नातिलकेश्वरः॥तिलापवित्रमतुलंतिलाःपापविशोधनाः॥७२॥सिताःसर्वत्रशस्यंतेद
नेस्नानेचभोजने॥देवकार्येतथाहोमेमांगल्येमनुजर्षभ॥१७०॥विलर्णास्तुष्टिदाःकृष्णानान्यकार्ये
षुकर्हिचित्॥तिलामलकतांबूलान्यौषधंक्षारवर्जितं॥७१॥मार्गेजनसमाजेवाभक्षन्निक्लन्नदो
षभाक्॥मामभ्यर्च्यतिलैःशुक्लैस्तिलपिष्टेनवान्नृप॥७२॥प्रणम्यगौतमंदेवंततःपुरमितोव्रज॥इ १३१
त्युक्त्वांतर्दधेदेवस्तेजोरूपःसनातनः॥७३॥लिंगरूपंततोराजास्नात्वासंपूज्यततिलैः॥प्रणम्यद

त्वादानानिगोहेमान्नांबराणिच॥७४॥तिलदानानिबहुशःशिवःप्रीतोभवत्विति॥तथाप्रदक्षिणीकृत्य 265
गौतमंमुनिसत्तमं॥७५॥मायासिद्धिरियंप्राप्तात्वत्प्रसादादितिब्रुवन्॥प्रणम्यापृच्छलब्धाशीःस्वंजगाम 2008
पुरंनृपः॥७६॥मार्कंडेयउ०॥इतितेकथितंपार्थतीर्थंचतिलकेश्वरं॥यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्र
संशयः॥७७॥तत्रतीर्थेनरःस्नात्वाविधिवच्चतिलोदकैः॥तर्पयेद्यःसुरपितॄन्श्राद्धंकुर्याच्चभक्तितः॥७८
तस्यपुण्यफलंयत्स्यात्तच्छृणुष्वयुधिष्ठिर॥तस्मात्तुःपितरस्तस्ययावन्मन्वंतरंनृप॥७९॥पश्चाच्छुक्लति
लैकुर्याद्धेमोवैलिंगपूरणं॥तिलपिष्टेनवापार्थपवित्रेणस्वशक्तितः॥१८०॥तिलेतिलेतिद्रोणपुण्यंप्रा ल
प्नोतिमानवः॥यावन्मन्वंतरंचेदंपुण्यवृद्धिस्तिलाधिका॥८१॥प्रसहृंनरस्तद्रूढतथैवाभ्यर्च्यभास्वरं॥वृ
द्धिमायातिसततंशिवेनोक्तंतथापुरा॥८२॥तिलहेमान्नवासांसियोददातिद्विजन्मपते॥शिवोमेप्रीय
तांदेवइत्युक्त्वासद्विजायतु॥८३॥शिवसंतोषणात्सोपिशिवलोकेमहीयते॥उपहारैश्चविविधैस्तथा
पंचामृतेनतु॥८४॥संस्नाप्यपूजयेद्यस्तुतिलकेश्वरमीश्वरं॥नानापुष्पैस्तथाधूपदीपनीराजनैरपि॥
८५॥अर्घ्यताबूलवस्त्रैश्चतथानैवेद्यदानतः॥पूजितःपरमेशानःप्रदद्याद्वांछितंफलं॥८६॥पुत्रपौत्रा
भिवृद्धिंचआयुरारोग्यतांतथा॥एतद्धिपरमंतीर्थंभुक्तिमुक्तिफलप्रदं॥८७॥इष्टंदत्तमथोजप्तमेध
तेत्रानुवासरं॥१८८॥इतिश्रीवायुपु॰शिवसंहितायांरेवाखंडेतिलकेश्वरमाहात्म्यं॥१०९॥ ॥मा
र्कंडेयउ०॥तथैवगौतमेनात्रतपस्तप्त्वामहात्मना॥स्थापितंपरमंतीर्थंनाम्नावैगौतमेश्वरं॥१॥रे
वायाउत्तरेकूलेसर्वपापक्षयंकरं॥नतीर्थंतादृशंल्याद्दुर्नस्थलस्यवनस्यवा॥२॥यदध्यासितमहोद्धि
स्तद्धितीर्थंविदुर्बुधाः॥गौतमेनाश्रितंतीर्थंलोकानांहितकाम्यया॥३॥स्वर्गसोपानभूतंतुतीर्थंपुः
ण्यंयुधिष्ठिर॥तपसातोषितःशर्वोविश्वात्माकेप्रियोभवत्॥४॥उवाचचमहात्मानंगौतमंतपतांवरं॥ई

रे॰खं॰ श्वर उ॰॥भोभोविप्रवरश्रेष्ठ शमतीव कुरुषे कुतः॥६॥ वरं वरय भद्रं ते तपसा तोषितस्त्वया॥ ददामि वांछितं तेद्य
१३२ यद्येमनसितेप्सितं॥७॥गौतम उ॰॥जयदेव जगन्नाथ महारुद्र कृपानिधे॥ यदि प्रसन्नो भगवान् दातुमिहेच्छति॥
७॥ दाता त्वमेव जगति नान्योस्ति जगदीश्वर॥ गार्हस्थ्यं मया याचे हंत्र इष्टभार्यां सिन्शंकर॥८॥ न गार्हस्थ्यात्स
रोधर्मो यतो धर्माः पृथग्विधः॥ भार्याहीनो व्रतभ्रष्टो वृषलीपतिरातुरः॥९॥ द्विजो न योग्यतामेति देवे पित्र्ये
च कर्मणि॥ त्रिवर्गसाधनं भार्या भार्याहीने कुतः सुखं॥१०॥ भार्याहीने गृहं भ्रष्टं यं पितरश्च पराङ्मुखाः॥
तस्मात्त्वं देहि मे भार्यां शुद्धां तामेव शंकर॥११॥ स्थापितस्त्वं मया चात्र मम नाम्ना स्थिरो भव॥ पवित्रतीर्थ
मापाद्य लोकानां वांछितप्रदः॥१२॥ महेश्वर उ॰॥ एवं भविष्यति मुने स्वल्पकालेन गौतम॥ विष्णुपाद
रजःपूतान्निर्धूताखिलकल्मषां॥१३॥ भार्यां ते मातरः सर्वाः सत्यरूपाः पुरातनाः॥ आदाय तामुपागम्य
तवदास्यंति ते प्रियां॥१४॥ तपःक्लिष्टां परां साध्वीं शापमुक्तामिहैव तां॥ न ते स्वविहितं किंचित्तया पित्रा
नियोजय॥१५॥ तयारमस्व कल्याणं साध्व्या ब्रह्मर्षिसत्तम॥ दोषो योषा सुनारीण्यो नापवित्रं बहिःक्रि
याः॥१६॥ नयारूप्यं न वाधिक्यं नरैः स्वहितमिप्सुभिः॥ इह स्थेयं मया यावत्कल्पांतं मुनिसत्तम॥१७॥ गौ
तमेश्वरनाम्ना वै लोकानां हितकाम्यया॥ इत्युक्त्वा देवदेवेशस्तत्रैवांतरधीयत॥१८॥ स्थापयित्वा शिवं
तत्र गौतमो मुनिसत्तमः॥ पूजयित्वा पूजांतं नवरात्रमतंद्रितः॥१९॥ वेदपारायणं चक्रे शिवस्य पुरतस्त
था॥ ततस्तृतीये दिवसे सर्वास्ता देवमातरः॥२०॥ मुनिभार्यां महत्यां तां शुद्धां विमलां हि रेणुभिः॥ गृही
त्वा तत्र संप्राप्ता गौतमस्य समीपतः॥२१॥ ब्रह्माणी वैष्णवी रौद्री कौमारी शक्रसंभवा॥ नारसिंही च वा
राही सप्तैता लोकमातरः॥२२॥ दृष्ट्वा समागतास्तत्र मुनिरभ्युत्थितस्तदा॥ प्रणम्य सर्वाः साष्टांगं बद्धांजं १३२
लिपुटस्थितः॥२३॥ जय त्वाब्दि दिनसंपूज्य प्रोवाचैवं मुनिस्तताः॥ गौतम उ॰॥ हंसगा कं गमया देवी कमंड

लु सधारिणी॥२४॥ वरदा विश्वजननी ब्रह्माणी पातु मामघात्॥ शंखचक्रगदाहस्ता गौरी गरुड वाहना॥२५॥ यजुर्म 267/2008
या जगद्धात्री वैष्णवी पातु मामघात्॥ त्रिशूलखट्वांगधरा देवी वृषभवाहना॥२६॥ सामवेदमयी रुद्राणी मां सा सेद्रीपा
तु मामघात्॥ मयूरवाहना देवी शक्तिकुक्कुटधारिणी॥२७॥ धनुर्वेदमयी धीरा कौमारी पातु॰॥ सहस्रनयना देवी
गजगा वज्रधारिणी॥२८॥ राजा विद्यामकारक्ताऐंद्री सा पा॰॥ लंबोष्ठी घुर्घुरारावा सुश्वेता चक्रधारिणी॥२९॥ दी
र्घदंष्ट्रा धृतमही वाराही पा॰॥ तीक्ष्णदंतोच्छ्रितकरा सुहरा वधारिणी॥३०॥ कराला दैत्यमथिनी नृसिंही पा॰॥ दि
क्पाला लोकपालाश्च ब्रह्माद्याः सुरसत्तमाः॥३१॥ यदाराधनतः सिद्धा विश्वरूपां नतोस्मितां॥ एकानेकस्वरूपाया
महाशक्तिरनादिजा॥३२॥ प्रधानतत्त्वरूपाया विश्वरूपां नतोस्मितां॥ सृष्टिपालनसंहारकारणी विश्वधारिणी
॥३३॥ जगद्व्याप्य स्थिता शक्तिर्विश्वरूपां नतोस्मितां॥ कालकूटोपमा रुष्टा तुष्टा या चामृतोपमा॥३४॥ सर्वस्य
बीजभूता या विश्वरू॰॥ स्वर्गमोक्षप्रदा देवी सुखसौभाग्यदायिनी॥३५॥ वर्णाश्रमाणां या धात्री विश्व॰॥ या
च बंधुरबंधूनां या वै चक्षुरचक्षुषां॥३६॥ या चनाथा नाथानां विश्व॰॥ पुरा पुरुषमाविश्य ससर्जाखिलमाशु
या॥३७॥ सृजशक्तिर्महादेवी विश्व॰॥ एकैव सप्तरूपा या कृपया मामुपागता॥३८॥ ज्ञानगम्या परा काचिद्विश्व॰
इति संस्तूयमानास्ता गौतमेनाशु मातरः॥३९॥ हृदि कारुण्यसंयुक्ताः प्रोचुर्विप्रं पुरः स्थितं॥ मातर ऊ॰॥ प्रसन्नाः
स्मो मुनिश्रेष्ठ स्तोत्रेणानेन गौतम॥४०॥ वरं वरय कल्याण यत्ते मनसि संस्थितं॥ गौतम उ॰॥ भार्याहीनस्य दी
नस्य प्रसन्ना यदि मातरः॥४१॥ अत्र संस्थापितो देवो मया हि पुरुषः शिवः॥ मम नाम्ना तु तीर्थे स्मिन् तपस्तस्या
स्य शक्ति तः॥४२॥ भवंत्यो यदि संप्राप्ता मामहदिवानुशासनात्॥ एवमत्र स्थितिं श्रेष्ठां कुर्वंतु रूपयान्विताः॥४३॥ वि
श्वस्य मातरश्रेष्ठाः सर्वलोकहिते रताः॥ युष्माभ्यं पूजयिष्यंति ये नराश्चात्र भक्तितः॥४४॥ बलिपूजोपहारैश्च
तेभ्यो देयं हि वांछितं॥ बंध्यादिदोषहरणं कर्तव्यं स्त्रीपुंशक्तयः॥४५॥ पुत्रपौत्राभिवृद्धिश्च दुःखदौर्भाग्यना

रे॰खं॰ दानं॥ कर्तव्यं कृपया तेषु युष्मद्भक्त्या सुखेन रः॥४६॥ न चरत्यस्मिन्तीर्थे आकल्पं जगदंबिका॥ मातर उ॰॥ एवं भव
१३२ तु देवर्षे स्थियमस्माभिरत्र तु॥४७॥ संतिष्ठौ गौतमेनापि स्वतनव प्रीत्या यथोदितं॥ महादेव निषेवा गाद्दृ आ मातृभिर्द्वि
जसत्तम॥४८॥ तत्र भार्या भिमां नित्वा निर्दोषां शापवर्जितां॥ विष्णुपादरजः पूतां शिवदृष्ट्याभिशोधितां॥४९॥
इमामस्माभिरानीतां साध्वीं कन्यामिवस्थितां॥ गृहाण गौतममुने न विचारोत्र कश्चन॥५०॥ ज्ञानवान सि नूनं त्वं वे
त्सि सर्वं यथातथं॥ निषेधो नात्र कर्तव्यः संग्राह्यश्च द्विजोत्तम॥५१॥ तूर्णं ते कृपया प्रामाः शिव संप्रेरिताव यं॥ इत्यु
क्त्वा प्रददुस्तस्मै साध्वीं तां गौतमाय तु॥५२॥ पत्नीमहल्यां तपसा शोधितां दोषवर्जितां॥ स्वीचकार मुनिः प्रीत्या
दत्तां मातृभिरुत्तमां॥५३॥ लब्ध्वा पत्नीं मातृवृंदात्स गृहस्थाश्रमं माश्रितः॥ पूजिता मातरस्तेन तस्थुस्तत्र युधि
ष्ठिर॥५४॥ गौतमस्य मुनेः प्रीत्या लोकानां हितप्रदाः॥ गौतमोपि मुनिर्यातस्तीर्थात्तीर्थं वनाद्वनं॥५५॥ पुनः पर्वणि
चागत्य सदा पूजयतीश्वरं॥ इति ते कथितं पार्थ तीर्थं वै गौतमेश्वरं॥५६॥ गंतव्यं हि नरैस्तत्र यत्र देवो जगद्गुरुः
॥ पातकस्य विनाशार्थं स्वर्गमोक्षादिसिद्धये॥५७॥ सौभाग्य सुख संतानजयदं दुःखनाशनं॥ पिंडदानेन चैकेन
कुलत्रितयमुद्धरेत्॥५८॥ यत्किंचिद्दीयते भक्त्या स्वल्पं वा यदि वा बहु॥ तदनंतफलं पार्थ आज्ञया गौतमस्य तु॥५९
वस्त्रमन्नं जलं छत्रं उपानत्करकादिकं॥ विप्राणां भोजनं चापि कर्तव्यं नृपसत्तम॥६०॥ देवाय दीपकं दद्याद्द्वारा
त्रमखंडितं॥ घृतेन वाथ तैलेन आयुस्तेजोभिवर्धनं॥६१॥ गौतमेच ह्रदे स्नात्वा मासमेकं युधिष्ठिर॥ विधिवत्कां
चनं दत्वा शुश्रोतजन्मशतत्रयं॥६२॥ तीर्थानां परमं तीर्थं स्वयं रुद्रेण भाषितं॥६३॥ इति श्रीरे॰॥ गौतमेश्वर तीर्थं॥
११०॥ ॥मार्कंडेय उ॰॥ तथैव मातृनिवहं पूजयेत्तत्र भक्तितः॥ पत्रपुष्पार्घधूपैस्तु दीपगंधनिवेदनैः॥१॥ गौरि
णी कन्यका विप्रभोजनैर्हवनैस्तथा॥ नीराजनैस्तथा वाद्यैस्तिहनैर्वस्त्रगुंठनैः॥२॥ अष्टम्यां च नवम्यां च चतुर्द १३२
श्यां युधिष्ठिर॥ मातृतीर्थे नरः स्नात्वा कुर्याद्वै मातृपूजनं॥३॥ गीतवाद्येश्च नृत्यैश्च स्तुतिभिस्तोषिताश्च ताः॥

ददंतीष्टफलं सम्यक् यद्यद्मनसि वांछितं॥४॥ इति श्रीरेवाखंडे मातृतीर्थं॥ ॥मार्कंडेय उ॰॥ ततः क्रोशांतरे पार्थ गो 269/2008
पेश्वरतीर्थतः॥ नर्मदादक्षिणे कूले तीर्थं परमशोभनं॥१॥ शंखचूडस्य नागस्य प्रसिद्धं भूमिमंडले॥ शंखचूडः
स्थितस्तत्र स्वयं वै पांडुनंदन॥६॥ वैनतेयभयात्सर्वे मागतो नर्मदातटे॥ तपस्तप्त्वा सुविपुलं स्थापयामास शंकरं
॥७॥ शंखचूडेश्वरं नाम शिवं सर्वभयापहं॥ तत्र तीर्थे हि यो भक्त्या शुचिः स्नात्वा समाहितः॥८॥ स्नापयेत् शंखचूडे
शं क्षीरक्षौद्रघृतादिना॥ संपूज्य तागारं कुर्यान्निशि दीवा यतो नृप॥९॥ दधिभक्तेन देवस्य कर्तव्यं लिंगपूरणं॥ तथै
व ब्राह्मणाः पूज्याः दधिभक्तैः सुवासितैः॥१०॥ शंखचूडेश्वरं प्रेक्ष्य गांगेयदर्शनपुण्यतोत्तम॥ तत्र तीर्थे तु यो राजन् सर्पदष्टं प्रत
र्पयेत्॥११॥ सर्वे सद्गतिमाप्नोति शंखचूडवचो यथा॥१२॥ इति श्रीरेवामाहात्म्ये शंखचूडेश्वरतीर्थं॥ ॥मार्कंडेय
उ॰॥ शंखचूडेश्वरात्पार्थ न्यून क्रोशांतरे ततः॥ तीर्थानामुत्तमं तीर्थं केदारमिति विश्रुतं॥१२॥ तत्र स्नात्वा तथा ज
ष्ट्वा संपूज्य शंकरं॥ हिमाचलस्य यात्रायां यत्फलं तदवाप्नुयात्॥१३॥ युधिष्ठिर उ॰॥ विस्मयो मे महानत्र श्रुत्वा
केदारमुत्तमं॥ पुराश्रुतो हिमाद्रौ यः सं कनेत्र गतो मुने॥१४॥ मार्कंडेय उ॰॥ व्रतिभिर्मुनिभिः पूर्वं ब्राह्मणैर्व्रतचारि
भिः॥ हिमाद्रिगमनं कर्तुं श्रुत्वा बद्धदिलंपनैः॥१५॥ तुहिनेन परं चार्ते तथाव्यालकृतं भयं॥ विचिंत्य सर्वे तत्रमिलिता
नर्मदातटे॥१६॥ लोकानामुपकाराय स्थापितं लिंगमुत्तमं॥ शांडिल्यो गालवः कौत्सो वत्सुमैत्पातिथिर्यमः॥१७॥
मांडव्यो मार्गलः कश्यपः कपिंजलविभांडकौ॥ त्रिःसौपर्णस्तथा शांतिश्च्यवनो वाघकस्तथा॥१८॥ जातूकर्ण्यः सुधा
माच काश्यपो वह्निरादुलो॥ इत्येवमादयः सर्वे मुनिसिद्धतपोधनाः॥१९॥ रेवातीरं समाश्रित्य स्थितास्तपसिप्र
ज्वलाः॥ चक्रुस्त्रिषवणं नित्यं नियमस्थाः समाहिताः॥२०॥ वेदपारायणं चक्रुरेकाभय युधिष्ठिर॥ केदारं दृष्टुमिच्छं
तो ब्राह्मणाः शंसितव्रताः॥२१॥ स्तुवंतोन्ये जपंतोन्ये यजंतोन्ये विधानतः॥ तपंतोन्ये पठंतोन्ये ध्यायंतोन्ये महेश्वरं॥
२२॥ हिमाद्रिकृतनिलयं महापापहरं हरं॥ एवं नियमयुक्तानां सद्भक्तानां द्विजन्मनां॥२३॥ मासत्रयांते पार्थ द

गोचरमगात्सभुः॥ततः प्रणम्य ते सर्वे प्रसन्नं शंकरं स्थितं॥२५॥तुष्टुवुर्वाग्भिरिष्टाभिः पृथक्पृथग्मनेकधा॥ततः प्र
सन्नो भगवानुवाच द्विजसत्तमान्॥२५॥ईश्वर उ॰॥ प्रार्थयध्वं द्विजवराः प्रसन्नो वः पुरस्थितः॥निःसंशयमहं दास्ये दुः
प्राप्यमपि तोषितः॥२६॥ब्राह्मणा ऊ॰॥यदि प्रसन्नो भगवान्नादिदेवोरिनापहः॥यदि देयो वरो स्माकं मानायोप धर्म।
द्विजाः॥२७॥हिमाद्रिनिलयो पीशः केदाराख्य त्रिलोचन॥अत्रैव स्थाप्यतोऽस्माभिः कृपया संस्थिरो भव॥२८॥
लोकानामुपकाराय सुखप्राप्त्यो भवाव्यय॥यत्फलं तत्र गत्वा वै हिमाद्रौ जायते नृणां॥२९॥इह तज्जायतां तेषां उप
सत्वां रुषाकपे॥हिमाचलतटस्थं त्वां गत्वा क्लेशेन यत्फलं॥३०॥प्राप्नोति मर्त्यस्तदिह नापतां सुखयात्रया॥ईश्व
र उवाच॥एवंभवतु विप्रेंद्रा मुनयः सिद्धतापसाः॥३१॥केदाराख्यो वसिष्यामि युष्मत्प्रीत्या घनानेत्राः॥इहापि स
ततं वासो भवतां च भविष्यति॥३२॥माघे वा मार्गशीर्षे वा कार्तिके चाद्विजोत्तमाः॥अष्टम्यां वा चतुर्दश्यां उभि ने
मासि वादरात्॥३३॥स्नात्वा रेवाजले पुण्ये पूजयिष्यंति मामिह॥विविधैरुपचारैश्च विधिवद्यतमानसाः॥
३४॥वेदपारायणं ये च पुराणानां विशेषतः॥करिष्यंति हि ये विप्राः कारयिष्यंति ये नराः॥३५॥द्वादशाहस्य स
त्रस्य फलं तेषां भविष्यति॥इत्युक्त्वा देवदेवेशस्तत्रैवांतरधीयत॥३६॥मुनयश्चापि ते सर्वे संपूज्य वृषभध्वजं
॥केदाराख्यं स्थापयित्वा महेशानं विधानतः॥३७॥स्थिताः सर्वे यथाकालं तपोनिष्ठाः समाहिताः॥इति ते कथि
तं पार्थ केदारं तीर्थमुत्तमं॥३८॥तत्र गत्वा नरो राजन्सर्वपापैः प्रमुच्यते॥गत्वा हिमाद्रिकेदारं यत्फलं तदवाप्नु
यात्॥३९॥पितॄणां श्राद्धदानेन तृप्तिरत्राक्षया मता॥अष्टम्यां वा चतुर्दश्यां पक्षयोरुभयोरपि॥४०॥स्नात्वा
त्र तत्र ह्रदे पुण्ये यः पूजयति शंकरं॥उपोष्य परया भक्त्या दीपं दत्वाप्य खंडितं॥४१॥सर्वपापविनिर्मुक्तः शिव
लोके महीयते॥४२॥इति श्रीरेवा॰केदारेश्वरतीर्थं॥ ॥मार्कंडेय उ॰॥पराशरेश्वरं नाम ततो गच्छेद्युधिष्ठि १३५
र॥केदारस्य समीपे तु तीर्थं पापप्रणाशनं॥१॥पुरा पराशरो राजन्नपुत्रो वृद्ध एव च॥परं विषादमापन्नः

किं कर्तव्यं मयेति च॥२॥बहुवारं मया तप्तं शप्तं वै चेष्टयः कृताः॥नाभवत्पुत्रसंतानं किं कृत्वा सुकृतं भवेत्॥३॥अपुत्रता
महद्दुःखं इति संचिंत्य वै मुनिः॥बहुदुःखान्वितो गत्वा नर्मदायास्तटे शुभे॥४॥तपश्चचार विपुलं पुत्रार्थं पांडुनंदन॥
गौरिमहेश्वरौ देवौ तोषयन्नात्मसंभवः॥५॥हिमवद्दुहितां तेन गौरीं नारायणीं शुभां॥तोषितापरया भक्त्या तपसा
च युधिष्ठिर॥६॥तस्य तुष्टा महादेवी शिवदेहार्धधारिणी॥देव्युवाच॥भो भो ऋषिवरश्रेष्ठ तुष्टाहं तव सुव्रत॥७॥
वरं वरय भद्रं ते पराशर महामते॥पराशर उ॰॥यदि तुष्टासि मे देवी यदि देयो वरो मम॥८॥देहि पुत्रं सुपुत्रं मे सत्ववंतं
गुणान्वितं॥वेदाभ्यसनशीलं च सर्वशास्त्रविशारदं॥९॥संनिधानं तथा तीर्थे पुनर्योरस्तु पार्वति॥इह लोकोपका
राय स्थीयतां हि भवत्कृते॥१०॥महादेवेन सहिता मम नाम्ना सुरेश्वरी॥नर्मदादक्षिणे कूले यावदाहूतसंप्लवं॥११॥
१२॥देव्युवाच॥अदेयं दत्तं यत्ते विप्र नते पत्न्यां सुतोद्भवः॥तथापि शिववाक्येन यद्दत्तं तच्छृणुष्व मे॥१२॥अयोनिसंभ
वां नारीं विध्यांशाजनितां हितां॥सत्स्वरूपां गुणवतीं प्राप्य पुत्रमवाप्स्यसि॥१३॥नान्यथा भविता पुत्रस्तव सत्यं ऋषि
सत्तम॥इह तीर्थे च भविता सन्निधिर्नौ पराशर॥१४॥यथा ते वांछितं विप्र इत्युक्त्वांतरधीयत॥ऋषिः पराशरस्त
त्र स्थापयामास शंकर॥१५॥पराशरेश्वरं नाम्ना सुरासुरनमस्कृतं॥अंबिया प्रतर्क्यं च देवानामुत्तमं विभुं॥१६॥स्थाप
यित्वा तथा गौरीं विश्ववंद्यां शिवप्रियां॥पराशरो महात्मा वै कृतार्थः स ययौ नृप॥१७॥तत्र तीर्थे तु यो भक्त्या शुचिः प्रयत
मानसः॥मार्गे चैत्रे यथा वैशाखे श्रावणे नृपनंदन॥१८॥मासि मार्गशिरे वापि शुक्लपक्षे तु सर्वदा॥गच्छेद्वै पांडवश्रेष्ठ गि
रिजाजन्मतिथौ॥१९॥अष्टम्यां वा चतुर्दश्यां सूर्यवारे तु संक्रमे॥चंद्रार्कयोश्च यो ग्रहणे व्यतीपाते च वैधृते॥२०॥ना
री वा पुरुषो वापि कामक्रोधविवर्जितः॥पराशरेश्वरं प्राप्य नर्मदादक्षिणे तटे॥२१॥उपोष्य परया भक्त्या तीर्थे तत्र
युधिष्ठिर रात्रौ जागरणं कुर्वन्दीपदानं च पूजनं॥२२॥गीतनृत्यकथाश्चापि कारयेद्देवसन्निधौ॥प्रभाते विमले प्रा
प्ते विप्राः पूज्याश्च शक्तितः॥२३॥सपत्नीकाः सुरूपाश्च व्रतस्याः लक्षणान्विताः॥तांश्चापि पूजयेद्दानैर्वस्त्रखडाद्यन्न

271
2008

रे॰खं॰ कांचनैः॥२७॥ गौमांमिष्टान्नतांबूलैः प्रीणयेच्छंसितव्रतान॥ श्राद्धं कुर्यान्नरश्रेष्ठ आमंनैन फलेन वा॥२८॥ तीर्थे स्त्रीणां
१३५ चशूद्राणां आमश्राद्धं प्रशस्यते॥ आमं चतुर्गुणं देयं ब्राह्मणेभ्यो युधिष्ठिर॥२८॥ विप्राद्द दृष्टमुखाः कार्याः स्वयं रेद्दक्षिणामु
खाः॥ आमं दर्भैः पुनिःसिप्यबहेदेवं द्विजायतः॥२९॥ प्रेताः स्वर्गगतिं यांतु वृद्धिं यातु भूमंमम॥ वर्धतां सन्ततं वंशो ज्ञातिवर्गो
द्विजोत्तमाः॥३०॥ एवमुच्चार्य विप्राय दानं देयं स्वशक्तितः॥ गोभूतिलहिरण्यादि वस्त्रान्न शयनादिकं॥ परानारेश्वरप्रा
सेदेयं श्राद्धं विधायच॥ तीर्थस्यास्य च माहात्म्यं ये शृण्वंति पठंति च॥३०॥ ते विये पापसंघातान मुच्यंते पार्थिवर्षभ॥
३१॥ इतिरेवाखंडे परानारेश्वरतीर्थं॥ ॥मार्कंडेय उ॰॥ ततो गच्छेत राजेंद्र धनुषां षट्शतांतरे॥ तीर्थं भीमेश्वरं नाम स
र्वपापक्षयंकरं॥१॥ स्थापितं ऋषिसंघैस्तु इमवत पर्येतः॥ भीमं रौद्रं व्रतं यस्मात् ऋषिभिर्धृतमादरात॥२॥ तस्माद्भीमो
महादेवो नाम्नाप्रख्यातां गतः॥ स्तुतः संस्थापितस्तैश्च ततोलब्धवरैर्नरैः॥ भीमव्रतस्य धरणात् स्वामिस्तोषितो
यतः॥ तीर्थेस्मिन् रूपयातिष्ठ भव भीमेश्वराह्वयः॥४॥ इत्यं संप्रार्थितः शर्वो ऋषिभिर्मुद्गलादिभिः॥ स्थास्येहं शार
जासार्धं इह भीमेश्वराह्वयः॥५॥ भीमव्रतधरैर्यैश्च इव द्विर्वांछितं द्विजाः॥ सर्वं भविष्यति स्फक्षात त्रैवानरधीयता
॥६॥ तत्रतीर्थे तु यः स्नात्वा सोपवासो जितेंद्रियः॥ जपेदेकाक्षरं मंत्रं मंत्रं स्वबाहुर्भिनार्कदक्॥७॥ तस्य जन्मार्जितं पा
पं गायत्र्या नश्यति ध्रुवं॥ दशाभिर्जन्मजनितं शतेन तु पुराकृतं॥८॥ त्रिजन्मजं सहस्रेण गायत्री हंति किल्बिषं॥ वे
दिकं चागमोक्तं वा जपं जप्तं नरेश्वर॥९॥ दहतीह क्षणात्पापं जातवेदास्तृणं यथा॥ न वेदबलमाश्रित्य कदापि पाप
माचरेत॥१०॥ अज्ञानात् नश्यति क्षिप्रं नोत्तरं तु कदाचन॥ भक्त्या भीमेशमभ्यर्च्य नानासंभारविस्तरैः॥११॥ भक्ताया भानु
वारेवाभवेंतरति भीषणं॥ मिष्टान्न भोजनं दत्वा विप्राणां तु स्वशक्तितः॥१२॥ एकस्मिन् भोजिते विप्रे कोटिर्भवति भोजि
ता॥ स सर्वपापनिर्मुक्तः शिवलोके महीयते॥१३॥ दीपदानं च यो दद्यात् तद्दीपादिनानरः॥ भवेद्दिव कि नामु रूयोन १३५
वसुलस्यहीयते॥१४॥ तत्र तीर्थे तु यो दानं भक्तिमाश्रित्य वै ददेत॥ तदक्षय फलं सर्वं जायते पांडुनंदन॥१५॥ इति श्रीरे

वाखं॰ भीमेश्वरतीर्थं॥ ॥मार्कंडेय उ॰॥ ततो गच्छेत राजेंद्र रेवाया उत्तरे तटे॥ तीर्थं चंद्रेश्वरं नाम सर्वकामफलप्रदं॥१॥ 2013
गौतमेश्वरतीर्थाच्च गव्यूताकोशांतरे नृप॥ जैरीयस्मात्दितः श्वंद्रः पुराकृतान्नृप॥२॥ अश्वारूढो द्विजैः सार्धं नृपसत्तमं महत 2018
टा॥ दृष्ट्वोपविश्य विश्रम्य विमलान् ऋषिसत्तम॥३॥ तपसस्थान मतुलं निश्चिनोति स्म भारत॥ रेवारिसंगमं पुण्यं यत्र पापा
न्यनेकशः॥४॥ विनश्यंत्याशु सर्वेषां स्वर्ग प्राप्तिस्तथा क्षया॥ तत्र सिद्धिर्भवेन्नूनं तपसस्त्विति निश्चयः॥५॥ यस्मात्तु पु
प्रयागोयं दक्षिणस्यां दिशि स्थितः॥ रेवारिसंगमः पुण्यो यत्र गुप्ता सरस्वती॥६॥ तस्माद्गुप्त प्रयागो वै गंगायमुनयोर्य
था॥ भारते भरतश्रेष्ठ ब्रह्मापापस्तत्व दर्शनः॥७॥ महापातकनाशाय प्रयागस्थितयं विदुः॥ गंगायमुनयोरेकः संगो रेवो
रिजेपरः॥८॥ इति निर्णयमयात व्यंद्विजैस्तत्र विधानतः॥ द्विजराजस्य विश्रामभूमौ संस्थापितः शिवः॥९॥ चंद्रवाटाह्वयो
ग्रामो द्विजानां वसनाय च॥ शर्वश्चंद्रेश्वरो नाम ऋषिभिः स्थापितस्तदा॥१०॥ पूजयित्वा शिवं चंद्रः स्वनाम्ना स्थापितं
द्विजैः॥ ग्रामे द्विजांश्च संस्थाप्य प्रतस्थे संगमं प्रति॥११॥ ततः प्रभृति राजेंद्र तीर्थं चंद्रेश्वरं स्मृतं॥ अत्रतीर्थे तु यो गत्वा
स्नात्वा चंद्रेश्वरं यजेन्॥१२॥ ग्रामं प्रदक्षिणीकृत्य स्यात्विप्रांश्च भोजयेत॥ सर्वपापविनिर्मुक्तः चंद्रलोके चिरं वसे
न॥१३॥ ततः शिवपुरं याति च ततः शिवगणो नृप॥१४॥ इति श्रीरेवा॰ चंद्रेश्वरतीर्थं॥ ॥मार्कंडेय उ॰॥ ततो गच्छेत राजेंद्र
धनुः पंचशतांतरे॥ अश्वपर्णीनदी यत्र रेवया सह संगता॥१॥ उच्चैःश्रवः सुताख्याताश्चत्वारः पुण्यलक्षणाः॥ अश्व
पर्णः सुपर्णश्च मधुपर्णो मरुद्गतिः॥२॥ चत्वारस्तु रगः श्रेष्ठाः शक्रवाह सुता नृप॥ अश्वपर्णस्तु शक्रेण दत्तश्चंद्राय वै
पुरा॥३॥ प्रीत्याश्वरत्नं राजेंद्र सुपर्णः शंबराय च॥ मधुपर्णश्च सूर्याय चतुर्थो नंदिने तथा॥४॥ एवं चंद्रस्तमारुह्य सततं शा
कार्पितं यैः॥ आगतो नर्मदातीरं संगमं पापनाशनं॥५॥ दृष्ट्वा गतेन चंद्रेण अश्वपर्णो विसर्जितः॥ चंद्र उ॰॥ उच्चैः
श्रवः सुत ज्ञानिन् न त्वमिहं तपउत्तमं॥६॥ शारीरं शोषयिष्यामि नियमव्रत धारणैः॥ तस्मात्त्वमस्तु तव क्रीडाः शीघ्रं या
हि सुरालयं॥७॥ पुनर्नवं समाकर्ण्य पुनः प्राप्तेपदं हय॥ प्रस्यागच्छः सुखं मत्वात मुच्चैःश्रवसः सुत॥८॥ तुरग उ॰॥

रे॰खं॰ नथास्थिहंविधौयस्मात्पापंस्यादुद्धितेतथा॥संप्राप्तव्यसनःस्वामीनत्याज्यःसेवकैःक्वचित्॥९॥व्यसनैःस्वामिनांत्यागा
१३६ त्सेवकंतैरूपरत्रच॥तस्मान्त्यक्ष्येहमपिचविषादंचंद्रमाःकृथा॥१०॥इत्तःप्राक्केणतेप्रीत्यात्वमेवशरणंमम॥तथेत्युक्तःसचे
द्रुणास्थितस्तत्रैवपार्थिव॥११॥स्नात्वात्रिसंध्यंरेवायांदूरंगत्वास्थिरोभवन्॥जीर्णपर्णाशनःशांतश्चापल्यगतिवर्जितः॥
१२॥स्मरन्नतंद्रुश्वंद्वंचचंद्रोत्वरमेवच॥एकोनश्चतपसंचंद्ररूदन्मंद्रंतुरंगरार॥१३॥स्वकैवासारसर्वंसस्वामिन्ने
हायुधिष्ठिर॥खिन्नःखिंनःपरांग्लानिंप्राप्यनैवापतद्भुवि॥१४॥तदस्योभगवान्शर्वस्तंदृष्ट्वास्वामिवत्सलं॥तपसाः
ग्लानिमापंनांतैमापन्नार्तिहरोहरः॥१५॥प्रवाहरूपमकरोदार्थैरकृचित्तमाश्रितः॥द्रवत्वंप्रापयामासतेस्याश्वस्यतन
नुन्नृप॥१६॥प्रवाहरूपमैशिवभावंददौतस्यप्रसन्नस्तुरगात्मनः॥ततःप्रभृतिसंजाताप्रवाहात्सरिदुत्तमा॥१७॥अश्वा
वतीचाश्वपर्णानामाहितयभाषिता॥द्रवीभूताश्वदेहात्तुपवित्रापापनाशिनी॥१८॥तस्याश्चपश्चिमेतीरेस्थितोवृद्धे
श्वरोहरः॥नारदेनसमंतत्रांकरोवदुरूपधृक्॥तदाश्वस्यतपोदृष्ट्वापरीक्षार्थंसमागतः॥उवाचाश्वंहितंदेवोबटु
रूपेणलीलया॥२०॥चापल्यमाचरन्भूपतथैवोहेजयन्हरिं॥बटुरुवाच॥रेमरुत्सुखंजीववृथाक्लिश्नासिमाकु
था॥२१॥त्यजमूढतपःशीघ्रंपशुरूपस्यकिंतप॥क्वास्तिचंद्रस्यचंद्रत्वंकिंस्वाम्यंतस्यरोगिणः॥२२॥तपःफलेवैसंदेहो
मरणेनास्तिसंशयः॥इत्येवमादिभिर्वाक्यैस्तेननिर्भर्त्सितोहयः॥२३॥नोवाचनात्यजद्धार्ष्ट्यंपरंस्थाणुरिवास्थितः॥प
श्यतोबटुरूपस्यनारदस्यचभारत॥२४॥यदानियमवान्दिह्वान्निश्चयेनैक्यतांगतः॥तदातस्यातुलंज्ञात्वानियम
मंनिश्चलंतपः॥२५॥निश्चयात्परमग्लानिंगच्छमानंविलोक्यच॥वैक्लव्यमतुलंप्रापसापराधइवेश्वरः॥२६॥सह
सातंद्रवीभूतमश्वंदृष्ट्वामहेश्वरः॥विमुच्यनारदंतद्वद्दुलिंगात्मकोभवत्॥२७॥नारदोपिशिवंज्ञात्वावटुत्वाल्लिंगतां
गतं॥स्वयमुद्भूतपुलकोद्रवभूतोश्वदर्शनात्॥२८॥जगौगाथांचसमुनिर्विस्मयाविष्टमानसः॥नारदउ॰॥अहो १३६
पश्यतमाहात्म्यमेकाग्रतपसोजनाः॥२९॥पशुर्येनद्रवीभूतःशिवभावंगतोहयः॥नजातिर्नकुलंमन्येनविद्यास्तु

द्धिकारणं॥३०॥प्रकृष्टेष्टपदप्राप्तिस्तपोवृत्तंचसाधनं॥तावन्मात्रंयदुक्तंहिप्राप्यंयज्ञादिभिःकिल॥३१॥कर्मभिर्धर्मनि
पुणास्तापसावांछितंलभेन्॥तपोगरीयःसर्वेषांकर्मणामितिनिश्चयः॥३२॥पशुरप्याशुयत्प्रापवांछितादधिकंहय॥
इत्युक्त्वानारदस्तत्रविस्मयाविष्टचेतनः॥३३॥वृद्धेशमितिविख्यातंशिवंसंस्थाप्यचागमत्॥ततःप्रयातोवृत्तांतं
कुचंद्रायचागमन्॥३४॥इतितेकथितंपार्थअश्वावस्तास्तुकारणं॥वृद्धेश्वरस्यचोत्पत्तिरखिलंपांडुनंदन॥३५॥तस्या
बेसंगमेस्नात्वाश्राद्धंकुर्यान्नुयोन्नृप॥पितरस्तस्यमुच्यंतेप्रेतत्वाच्छतसंख्यया॥३६॥नदुर्गतिंकुलेतस्यप्रेतायांतिपरां
गतिं॥वृद्धेश्वरंविधानेनपूजयेयःसमाहितः॥३७॥अष्टम्यांवाचतुर्दश्यांस्नापयित्वास्वशक्तितः॥कलत्राष्टत्र
तेनादौपुण्यंसंगमवारिणा॥३८॥दीपनीराजनैर्धूपैर्नैवेद्यस्तुतिवंदितैः॥तोषयेयःशिवंपार्थसयातिशिवसंनि
धौ॥३९॥पापसंघविनिर्मुक्तःशिवलोकेमहीयते॥४०॥इतिश्रीरेवा॰अश्वपर्णीसंगमवृद्धेश्वरमाहात्म्यं॥ ॥मा
र्कंडेयउ॰॥ततोगच्छेतराजेंद्रनारदेश्वरमुत्तमं॥क्रोशार्धमात्रेवृद्धेशात्पापतापहरंपरं॥१॥तीर्थानांपरमंतीर्थं
निर्मितंनारदेनतु॥युधिष्ठिरउ॰॥नारदेनमुनिश्रेष्ठकस्मात्तीर्थंविनिर्मितं॥२॥कस्मात्तप्तंतपःकिंचफलंप्राप्तं
मुनीश्वर॥एतदाख्याहिमेसर्वंकथंतुष्टोवृषध्वजः॥३॥मार्कंडेयउ॰॥परमेष्ठिसुतःपार्थनारदोयोगवित्तमः॥र
वायाउत्तरेकूलेतपस्तेनाप्यतप्यत॥४॥कामंमनसिसंचिंत्यदृष्ट्वासिद्धिप्रदांधुनिं॥नचनाड्डुनिरोधेनकाष्ठावस्थां
गतेनच॥५॥तोषितोगिरिजाःशंभुर्नारदेनयुधिष्ठिर॥स्नेहार्द्रहृदयःशर्वःसाक्षान्नारदमागतः॥६॥महेश्वरउ॰॥तु
ष्टोहंतवविप्रेंद्रयागश्रेच्छाकिमिच्छसि॥अयोनिजवरंब्रूहियस्तेमनसिवर्तते॥७॥नारदउ॰॥धन्योस्मिकृतपुण्योऽ
स्मितपस्तप्तंमयेवच॥भाग्यवानहमेवेहयन्मेतुष्टोमहेश्वर॥८॥यदिप्रसन्नोभगवान्यरदीयघहंमतः॥त्वत्प्रसादेन
देवेशयोगसिद्धिरस्तुमे॥९॥अचलाभवभक्तिस्तेसर्वकालंतथास्तुच॥स्वेच्छाचारीभवेद्वैचवेदवेदांगपारगः॥
॥१०॥त्रिकालज्ञोजगन्नाथगीतज्ञोहंसदाभवं॥दिनेदिनेतथायुद्धंदेवदानवमानुषैः॥११॥तोपीलेस्वर्गमर्सेवाप

275/2008

रे·खं· त्वत्प्रसादतः ॥ इह तीर्थमिदं पुण्यं सोमेनाधिष्ठितं पुरा ॥ १२ ॥ नाम्ना सोमेश्वरं तत्र भो जायतां जनतारितं ॥ प्रत्यहं पार्वतीकां
१३९ तं प्रणम्य पदपंकजं ॥ १३ ॥ तव धाम विधेयो मे समाप्रयत्नयात्मम ॥ कलिप्रियस्त्वं गतिश्च स्थाने घन्ये षपिप्रभो ॥ १४ ॥ मात्तुमे
बाधको रागोप्यो गनाशश्च कर्हिचित ॥ महेश्वर उ० ॥ एवं नारद ते सर्वं भविष्यति न संशयः ॥ १५ ॥ चिततं मत्प्रसादेन सिद्धं यास्य
ति ते ध्रुवं ॥ स्वेच्छाचारो भव त्वं हि त्रैलोक्ये सचराचरे ॥ १६ ॥ निःसंगो निर्ममो योगी न केनापि निवार्यसे ॥ सप्तस्वराश्रयो
ग्रामा मूर्छनाश्चैकविंशतिः ॥ १७ ॥ तानाश्चैकोनपंचाशत्प्रसादान्मे त्वयि ध्रुवाः ॥ नमस्त्रिपततां हि त्वं गीतं नृत्यं च वेत्स्य
सि ॥ १८ ॥ कलिहप्रियतिसिनित्यं त्वं देवदानवकिंनरैः ॥ मनुष्यैर्वा कृतं चान्यपशुभिर्वा विधेः सुत ॥ १९ ॥ नियमस्यास्य
भंगस्ते भविता न कदाचन ॥ स्वर्गे भूतले नित्यं मत्प्रसादाद्भविष्यति ॥ २० ॥ मया संनिहितं नित्यं ख्यातिं लोके च यास्य
ति ॥ वेदवेदांगतत्त्वज्ञो सत्रोपज्ञानकोविदः ॥ २१ ॥ एकस्त्वं भव निःसंगो मत्प्रसादेन नारद ॥ इत्युक्त्वांतर्दधे देवो ना
रदश्चापि शूलिनं ॥ २२ ॥ स्थापयामास तत्राशु सर्वसत्त्वोपकारकं ॥ एतद्वृत्तांतरं तीर्थमुत्तमं नारदेश्वरं ॥ २३ ॥ तत्र तीर्थे
नृपश्रेष्ठ योगख्यातिं तं द्विजः ॥ कृष्णाष्टम्यां पदे पक्षे चतुर्दश्यां हि मानवः ॥ २४ ॥ उपोष्य परया भक्त्या रात्रौ कुर्वीत जा
गरं ॥ वितानं ध्वजितं छत्रं घंटां धूपस्य पात्रकं ॥ २५ ॥ नीराजनं नृपश्रेष्ठ दद्याद्देवाय भक्तितः ॥ शास्त्रेण तु हुतार्य वै तर्पा
श्राद्धं समाचरेत ॥ २६ ॥ तर्पयंति परं लोकं पिंडदानप्रभावतः ॥ कपिला तत्र दातव्या पितॄणां तुष्टिर्नृप भारत ॥ २७ ॥ गुरु
श्चार्यं द्विजेंद्राय दक्षिणा च स्वशक्तितः ॥ हविष्यान्नं तु मिष्टान्नं भोजयेच्च द्विजोत्तमान ॥ २८ ॥ तद्देवस्य यमश्नीयान
निवेद्यं च शिवायमत ॥ भक्त्या दीपप्रदातव्यो विधिनाभ्यर्च्य शंकरं ॥ २९ ॥ स्तुतिवादित्रनिर्घोषैर्गीतं नृत्यं च कारयेत
अवाप्स्यं तेन वै पार्थ प्राप्नुयाकृतिमक्षयां ॥ ३० ॥ शक्त्याधवीहदानं च भूमिं सस्यवतीं ददेत ॥ अत्र तीर्थे महा
राज प्राणायेज्जातवेदसं ॥ ३१ ॥ आज्येन तु प्रभूतेन होमद्रव्येण वै पृथक ॥ यथज्ञं विसदा भक्त्या त्रिकालं वा १३९
सकृन्नृप ॥ ३२ ॥ नारदेश्वरतीर्थे वै रेवाया उत्तरे तटे ॥ चित्रभानुमुखाद्देवाः सर्वदेवमयो हरिः ॥ ३३ ॥ प्रीणिते

प्रीणिताः सर्वे तस्मात्सर्वोदुताशनः ॥ पूजितं दृश्य चाहे तु दारिद्र्यं नैव जायते ॥ ३४ ॥ धनेन विपुला कीर्तिर्जायते नृप 2007
नंदन ॥ कुलीनता सुवेशश्च चकुलं च प्रवीणता ॥ ३५ ॥ इंद्रादिभिर्लोकपालैः स्यतीर्थस्य सेवनात ॥ पदमासादि 2008
तं पुण्यं तस्मात्तत्सरं विदुः ॥ ३६ ॥ अन्यैरपि महीपालैः पार्थिवत्वमुपार्जितं ॥ दानशक्तिस्तथा शौर्यं पुत्रपौत्राः
न्वितं यशः ॥ ३७ ॥ इहास्तेत्स भते स्वर्गं नारदेश्वरसेवनात ॥ पृथिव्यां सागरांतायां रेवायाश्चोत्तरे तटे ॥ ३८ ॥ सर्व
तीर्थवरं त्वेतं निर्मितं नारदेन हि ॥ रूपः सिद्धिकरं पार्थ सर्वपातकनाशनं ॥ ३९ ॥ इति श्रीरेवाखंडे नारदेश्वरती
र्थ ॥ ॥ मार्कंडेय उ० ॥ ततो गच्छेत राजेंद्र रेवा पादक्षिणे तटे ॥ वैद्यनाथाह्वयं तीर्थं सर्वक्लेशापहं शुभं ॥ १ ॥ युधि
ष्ठिर उ० ॥ वैद्यनाथः कथं जातः को वै यत्नेन किंकृतं ॥ एतत्कथय मे ब्रह्मन्नकदानीर्थस्य संभवः ॥ २ ॥ मार्कंडेय उ०
साधु पृष्टं महाराज धर्मपुत्र युधिष्ठिर ॥ शृणु सर्वं यथावृत्तं कथयिष्यामि तेनघ ॥ ३ ॥ रौद्रकल्पे पुरा पार्थ महा
देवात्श्रुतं मया ॥ कैलासशिखरासीनं देवदेवं जगद्गुरुं ॥ ४ ॥ उमासहायं वरदं स्कंदः पप्रच्छ शंकरं ॥ स्कंद
उ० ॥ भगवंस्त्वत्प्रसादान्मे श्रुतो वै शास्त्रसंग्रहः ॥ ५ ॥ तीर्थानि योनिबहुशो व्रतानि विविधानि च ॥ तवदेहो
द्भवा देवी स्वर्गमोक्षप्रदायिनी ॥ ६ ॥ नर्मदा सरितां श्रेष्ठा तीर्थावलिविभूषिता ॥ तस्या दक्षिणकूलस्थं तीर्थ
मेकं वद स्व मे ॥ ७ ॥ श्रोतुमिच्छामि माहात्म्यं वैद्यनाथस्य सांप्रतं ॥ प्रसादं कुरु देवेश यदि तुष्टोसि शंकर ॥ ८
महादेव उ० ॥ साधु वत्स त्वया पृष्टं भक्तोसि त्वं प्रियो मम ॥ महात्म्यं कथयिष्यामि वैद्यनाथस्य पुत्रक ॥ ९ ॥ सं
क्षेपात्तस्य तीर्थस्य विस्तरान्नैव शक्यते ॥ सर्वपापहरं पुण्यं सर्वतीर्थपुरोत्तमं ॥ १० ॥ सर्वरोगहरं चैत
त्सर्वानिष्टविनाशनं ॥ विवादादिदोषहरणं सर्वकामफलप्रदं ॥ ११ ॥ द्विपराधावसाने वै विष्णोरंतगते
विधौ ॥ शेषपर्यंकशायने पुरा सुप्ते जनार्दने ॥ १२ ॥ एकार्णवं तदा जातं महाकल्पे महात्मनः ॥ नाभ्यां पद्मं स
मुत्पन्नं तत्र ब्रह्मा व्यजायत ॥ १३ ॥ सृष्टिं सृजेति नोऽब्रवीच्चागुवाचाशरीरिणी ॥ विस्मयाविष्टयानस्य कि

दे॰खं॰ मेतक्षितिपुत्रक॥२४॥पुरः प्रध्यौ तदा जातौ नरनारायणावृषी॥ ब्रह्मा प्रोवाच वा वत्सौ सृष्टिं सृजति माच्चिति॥२५
१३८ तावब्रूतां ततो ब्रह्मन् स्थास्यावो न प्रयोजनं॥ इत्युक्त्वा मौनिनः शांता बुत्तरांगां गता वृषी॥२६॥ततः कोपः समुत्पन्नो
ब्रह्मणः परमेष्ठिनः॥ कोपाक्षं ध्यायतः कृत्स्नं ललाटं त्रिनेउत्तमं॥२७॥निर्गतं सुमहद्रूपं नीलकंठं त्रिलोचनं॥ स्व
यमुत्पादितं वत्स मयैवात्मानमात्मनः॥२८॥ रुद्रन्नीकगतं ब्रह्मा रोदमानं मुहुर्मुहुः॥ ब्रह्मोवाच॥ रोदनाद्रु
द्रनामासि शिवमावहन्॥२९॥ भीमो भीमस्य रूपत्वाद्रूपेनाशयमेनघ॥ मयाचोक्तं ततो वत्स ब्रह्मन्किं करो
म्यहं॥२०॥ सृष्टिं सृजेति युगपत् ब्रह्मा प्रोवाच मां प्रति॥ ततः सृष्टा मया पुत्र शतशोथ सहस्रशः॥२१॥ मद्गु
णाः कोपनिलया जटिला भस्मधूसरा॥ पंचास्या कोटयः सृष्टा रुद्रा भीमपराक्रमाः॥२२॥ रौद्रीः सृष्टिस्तदा ख्या
ता नाम्ना लोके हि सा गुह॥ भयं त्रगामाश्रुतदा ब्रह्मा लोकपितामहः॥२३॥ स्तुतिभिः तोषयित्वा मामुवाच
वै प्रजापतिः॥ उपसंहर भूतेश रुद्रसृष्टिमिमां लघु॥२४॥ संहृताश्च मया वत्स रुद्राः कोपपरायणाः॥ तेजस्ते
षां तदा ह्येकमेकत्वमुपगच्छतां॥२५॥ सर्पार्बुद प्रमाणं तद्दुर्निरीक्ष्यं च दुःसहं॥ गोपयामास सहसा जल
मेकार्णवं तदा॥२६॥ दृष्टा च कन्यका तत्र श्रीउमा नो मया सह॥ पृष्टा कासि कुतो वासि कथमेकाकिनी शुभे
२७॥ सा चोवाच मया स्निग्धं ललितं मधुरं वचः॥ तव देहोद्भवा देव रुद्रदेहेति विश्रुता॥२८॥ तव प्रसादाद्धू
र्कंठ नमस्ताहं महार्णवे॥ मयोक्ता सा तदा वत्स वरं वरय शोभने॥२९॥ वरं वव्रे तदा सा च सर्वभूतहितेषि
णी॥ अनेन तेजसा देव मम तीरे सदा वस॥ भव त्वं त्रिवरो मह्यं यदि तुष्टोसि शंकर॥ तेजोरूपमिदं प्राप्य
तेजोनाथ इति श्रुतः॥३१॥ मयोक्ता च तदा देवी भव त्वं वै हि शोभने॥ त्वत्तीरे दक्षिणे पुत्री रक्षास्येहं त्वत्समी
पगः॥३२॥ तेजोनाथ इति ख्यातः सर्वदुःखविनाशनः॥ तत्र स्नात्वा शुभे तीर्थे पितॄणां श्राद्धदानतः॥३३॥ १३९
भविष्यस्त्वत्पात्रमिर्यावदाहृतसंप्लवं॥ तत्र तीर्थे नरः स्नात्वा पापः कुर्याद्दर्शनं मम॥३४॥ दारिद्र्यरोगनिर्मुक्तः

शिवलोकमहीयते॥ एवं दत्वा वरान्पुत्र तत्रैवांतर्हितोस्म्यहं॥३५॥ ततः प्रभृति तत्तीरे तेजोनाथ इति श्रुतः॥३६॥ इति 2079/2008
श्रीरेवाखंडे वैद्यनाथमहात्म्ये प्रथमोध्यायः॥ ॥रुद्र उ॰॥ शृणु वत्स प्रवक्ष्यामि पुनराख्यानमुत्तमं॥ तेजोनाथस्य मा
हात्म्यं मनस्तुष्टिकारकं॥२॥ क्षीरसागरमध्ये तु श्वेतद्वीपपतिः प्रभुः॥ आसीन शेषपर्यंके दिव्ये वै जनार्दनः॥३॥ सं
मान वाह्यचरणो लक्ष्म्या कमललोचनः॥ सनकाद्यैर्योगिवरैः स्तूयमानस्तथा प्रभुः॥३॥ सेव्यमानः परं भक्तैर्वेदैः सांगप
दक्रमैः॥ मरुत्वानपि तत्रासन् गोविंदस्याग्रतो गुह॥४॥ पक्षीन्द्रकार संकल्पं मनसार्णवमुद्वहन्॥ आम्नियं देवरारी
रहि ब्रह्मांडानां च कोटयः॥५॥ वसंति समही दुर्गवनाद्रिभुवनार्णवाः॥ मदधीनस्तु सोदेव स्तं वहामि सदा विभुं॥६॥ मां
विना पदमेकं तु कथं याति सलीलया॥ कथं गुरुमिमं भारं मदन्यो वोढुमर्हति॥७॥ नास्ति विश्वसृजा सृष्टः पुरुषार्थ
कसाधः॥ योदयं पृष्ठमारोप्य चरेत्कामगतिः सदा॥८॥ इति चिंतयतस्तस्य गरुडस्य महात्मनः॥ विज्ञाय मनसो ग
र्वं देवो वचनमब्रवीत्॥९॥ पक्षिराज महासत्व न लोके त्वत्समो बली॥ समर्थः सर्वभूतेषु मरुति त्वं न संशयः॥१०
एवं ब्रुवन् हृषीकेशो वामस्वं प्रपदं तथा॥ पृष्ठे वै पक्षिराजस्य दत्तौ गौरवसंयुतं॥११॥ न पादभारं जगदीश्वराहितं
नाशाक वोढुं गरुडो द्विजोत्तमा॥ हा तात तातेति च कंदमानो मुखाद्ववाम प्रथम सशोणितं बहु॥१२॥ विशीर्णपक्षः
स च भग्नपादः प्रभग्नदंष्ट्रो ममयोरुवित्तः॥ गात्रे च कंपो हृदये च दाहः कोहं क्व गच्छेन पतेति संज्ञः॥१३॥ ततः स्व
णाल्लब्धसंज्ञो वराको दीनमानसः॥ गर्वो द्राव समोत्तानः पंगुपक्षविवर्जितः॥१४॥ स लब्धसंज्ञो गरुडो मांसपिंडोप
मस्तदा॥ गंतुं नाशक्नोति नेवासौ पदात्सदमपि कंचित॥१५॥ प्रणम्य शिरसा देवं वाक्यमेतदुवाच ह॥ क्षंतुमर्हसि मे
स्वामिन् यन्मोहाज्जल्पितं मया॥१६॥ दासोस्मि तव च श्योस्मि तव मे च शरणं मम॥ भक्तिहीनस्य दीनस्य चपलस्य
तु पक्षिणः॥ कृपां कुरु महाविष्णो त्वमेव शरणं मम॥१७॥ भगवानुवाच॥ न मां वोढुं समर्थस्त्वं वैनतेय कदाच
न॥ मुधा गर्वं गतोसीह पक्षिणां च स्वभावतः॥१८॥ मयानुज्ञात एवासीत् कुरु षतपसे मतिं॥ ध्याय स्व मनसा

रे॰ख॰ देवं शंकरं लोकशंकरं ॥२०॥ शरीरारोग्यमैश्वर्यं मयि तुष्टः प्रदास्यति ॥ गरुड उ॰ कस्मिंस्तीर्थे मया देव ध्यातव्यो सौ वृषध्व
१३९ जः ॥२१॥ गतिश्च नास्ति मे क्वापि गंतुं न यति वासितो ॥ इत्युक्तो मौनमास्थाय वेननेमपश्यत नवसन ॥२२॥ योगमायाव
लेनाथ प्रस्थितो हरिणा खगः ॥ पपात नर्मदातीरे तेनानाथ समीपतः ॥२३॥ तपश्चचार सुमहद् दुर्नेतिपः खगोत्तमः ॥ शुष्क
पर्णाम्बुवाताशी वातरोधपरायणः ॥२३॥ दिव्यं वर्षसहस्राणि द्वापंच चपुत्रक ॥ तपसाराधयामास देवदेवं वृषाकपिं ॥
२४॥ तुष्टोहं तपसा तस्य देव्या सह भवान्यया ॥ ततो दत्तं मां तत्र दर्शीचपुरतस्थिता ॥२५॥ मया शोभनेन तपश्च वरान् व
रय सुव्रत ॥ दास्येहं ते वरान् तुष्टः सुप्रीता च भवानिका ॥२६॥ अर्धनारीत्यरूपिणं पक्षी गतो स्म सहसा महं ॥ स्तुतिं च
के ततो दिव्याममाविश्व स पक्षिराट् ॥२७॥ गरुड उ॰ ॥ कपर्दं वृपुरेना रुं स्तौमि त्वां जगदीश्वरं ॥ अंडजोहमल्पशक्तिस्त्वां कथ
मीडे त्रियंबकं ॥२८॥ न शक्तिः पक्षिणां वक्तुं शिव्यादारसमन्वितं ॥ सकायविभवं नायक रोमीश्वर गिरार्चनं ॥२९॥ संत
व्यं धूर्जटे तत्र कुत्रपत्र रथे पुरी ॥ नमामि देवं जगतामधीशं वाचामवाच्यं न च वेदवेद्यं ॥३०॥ कालत्रयातीतमवेदवे
द्यं गुणत्रयातीतमहं प्रपद्ये ॥ अजममरमभेद्यं निर्मलं निष्कलं यत्सपसममणुवंद्यं स्थूलमेवात्मवेद्यं ॥३१॥ मुनिव
रसुरसिद्धैर्ध्येयमत्राप्रतर्क्यं निरवयवमनीहं योगिगम्यं प्रपद्ये ॥ इति स्मवाक्यैर्बहुशो गरुत्मान स्तुवन्न शक्तः स
मुद्रूर्मुमर्छ ॥३२॥ ईश्वर उ॰ ॥ तुष्टोहं तपसोग्रेण स्तोत्रेणानेन चानघ ॥ वरं वरय भो वत्स यत्त्वमनसि वांछितः ॥३३॥
गरुड उ॰ ॥ वरदोयदि देवेश वरार्होयदहं मतः ॥ शरीरं देहि मे नाथ बलवीर्यगुणान्वितं ॥३४॥ पक्षिनाथेति विख्या
तं लिंगमत्र भवत्विति ॥ अत्र तीर्थे नरः स्नात्वा यः कुर्याच्छिवपूजनं ॥३५॥ देवलोकमवाप्नोतु सर्वभोगसमन्वितं ॥ दुःख
शोकादिरहितं वपुस्तेवे भविष्यति ॥३६॥ ये पक्षिनाथं पश्यंति स्नात्वा रेवाजले मले ॥ अक्षय्यः शिवलोकश्च तेषां
नूनं भविष्यति ॥३७॥ पक्षिनाथं स्मरिष्यंति प्रातरुत्थाय ये नराः ॥ व्याधिदारिद्र्यनाशो वै तेषामिह भविष्यति ॥३८ १३९
अस्मिन् क्षेत्रे च पक्षीन्द्र यः कुर्याच्छ्राद्धमुत्तमं ॥ उद्धृताः पितरस्तेन कुलस्यैकोत्तरं शतं ॥३९॥ अत्र क्षेत्रे पवित्रे यः क

न्याद्दानं ददाति वै ॥ यावद्रोमाणि वर्तंते कन्यादेहे खगोत्तम ॥४०॥ तावद्वर्षसहस्राणि रुद्रलोके महीयते ॥ त्रीण्याहुरतिदा 281/2008
नानि पक्षिराज महीतले ॥४१॥ गावः पृथ्वी तथा विद्या दद्यात्तत्र यदि प्रियः ॥ रोममूलार्धसरैः संख्यं वसिताममसन्निधौ ॥४२
देवलोके वसेत् सोश्वाद्यप्सरोगणसेवितः ॥ हेमधान्यं जलं वस्त्रं वेश्मशय्योपपादुके ॥४३॥ यो ददाति द्विजातिभ्यः तस्य पुण्य
फलं शृणु ॥ सप्तजन्मानि भूलोके च क्रवर्ति भविष्यति ॥४४॥ तदंते शिवलोकश्च यावदाहूतसंप्लवं ॥ गजाश्वाश्व तथा धेनुं
नरस्यानाजिनपदं ॥४५॥ द्विमुखीकालपुरुषं दत्वा भुवि न जायते ॥ दुर्भगा विधवा नारी स्नात्वा दृष्ट्वा शिवं यजेत् ॥४६॥ गो
रितुल्यं च सौभाग्यं वर्धते स्यान्नसंशयः ॥ अपुत्रा जनते पुत्रं कन्या वरमवाप्नुयात् ॥४७॥ सह भर्तौ यथा नारी स्नात्वालि
प्रपूजयेत् ॥ न सा वैधव्यमाप्नोति दश जन्मनि सप्तच ॥४८॥ शिवालयं च यः कुर्यात्सीतीर्थे चद्विजालयं ॥ तृणकाष्ठेष्टकाभि
र्वाशिलाधातुभिरेव वा ॥४९॥ द्विनाष्टयुगकल्पानि महाकल्पानि चाष्टुत ॥ सर्वसौख्यवलोके हि सत्यं सत्यं मयोदितं ॥५०
दत्वा वरांत देवाहं गतश्चादर्शनं गुरु ॥ रूपस्यं वैनतेयोपि बलवीर्यगुणान्वितं ॥५१॥ अवाप्योत्सस च वियत जगाम
हरिसन्निधौ ॥ कालेन गच्छता तात उत्तमाधममध्यमाः ॥५२॥ लोकालोकं व्रजंति स्म शैवलिंगस्य दर्शनात् ॥ अर्चिता
दर्शनात्स्पर्शाल्लिंगस्यास्य च पुत्रक ॥५३॥ संकुलः शिवलोको भस्यमलोकस्तथोद्भसः ॥ इदं मुद्रामथादाय सत्यलोक
मगाद्यम ॥५४॥ नमस्कृत्य सभ्रानाथ मुवाचेदं सत्वरः ॥ यम उ॰ ॥ ब्रह्माण देवदत्तां ने मुद्रां दंडं च कमेव ॥५५॥ व्यापा
रे बहवो विप्राः स्त्वया दत्ते पितामह ॥ बहु संतापदं कर्मेतत्स्मात्यक्तमिदं मया ॥५६॥ धर्मराजवचः श्रुत्वा ध्यात्वा ज्ञात्वा
च तत्वतः ॥ लोकाः पक्षीनाममाहात्म्याच्छिवलोकं व्रजंति हि ॥५७॥ ज्ञात्वेति त्रिदशैः सार्धं ब्रह्मलोकास्थितो महाः ॥ शिव
लोकं जगामाशु यत्र देवो महेश्वरः ॥५८॥ अनादिनिधनो देवः सर्वव्यापी वृषध्वजः ॥ तं प्रणम्य सुरश्रेष्ठानं पप्रच्छ यो
निरुवाचरु ॥५९॥ जय देव महेशान नमो भक्तेश धूर्जटे ॥ सृष्टिमार्गसमग्रोयं उपसंहारतां गतः ॥६०॥ भूलोके पक्षिना
थस्य तव दर्शनमात्रतः ॥ लोकमुश्वा वर्चा लोकाश्रीवंते ते प्रयांति वै ॥६१॥ देवानुज्ञां महादेव यथा सृष्टिप्रथिस्थितिः

रे.खं. पुनः संज्ञायते ज्ञानं व्रतमस्वास्थ्यं च जेहिति ॥८२॥ एवं श्रुत्वा वचस्तस्य ब्रह्माणं कृपया विभुः ॥ मेघगंभीरया वाचा उवाच जग-
१४० दीश्वरः ॥८३॥ महेश्वर उ० ॥ ब्रह्मन् मद्वचनात्सद्यस्तव प्रियचिकीर्षया ॥ लिंगं यास्यति पाताले पूजयिष्यंति पन्नगाः ॥८४
स्थाने नेतन्मया त्याज्यं कल्पकोटिशतैरपि ॥ पुनस्तृतीयकल्पांते भुवि भूयो भविष्यति ॥८५॥ इति श्रीरेवाखंडे वैद्यनाथ
माहात्म्ये ॥ ॥ स्कंद उ० ॥ विचित्रमिदमाख्यातं तेजोनाथप्रभावजं ॥ पश्चिनाथस्य संभूतिस्त्वया च मया श्रुता ॥१॥ क-
थं भयः समुद्भूतः स भवान्वद मे विभो ॥ कारुण्याद् वद देवेश परं कौतूहलं हि मे ॥२॥ ईश्वर उ० ॥ हंत ते कथयिष्यामि नदिदैक-
मनाः शृणु ॥ गुह्याद्गुह्यतमं तीर्थं महापातकनाशनं ॥३॥ यच्छ्रुत्वा सर्वपापेभ्यो नरः सद्यो विमुच्यते ॥ दुःखदारिद्र्यशम-
नं सर्वकामफलप्रदं ॥४॥ पुनश्चासौ करे कल्पे ब्रह्मलोकपितामहः ॥ सृष्ट्वा सृष्टिं समभ्यागतस्याः संचिंत्य जीवनं ॥५॥
स ससर्ज चाश्विनौ सर्वरूपयाप्रतिमौजसौ ॥ उवाचेदं विधिस्तौ च श्रूयतां वचनं सुतौ ॥६॥ त्रिषु लोकेषु कर्तव्यं व्याधि-
दुःखविनाशनं ॥ केचिद्दुष्कर्मजा रोगाः केचिद्दुष्प्रकोपजाः ॥७॥ केचिद्विप्राववमानाच्च केचिद्देवतवैकृतात् ॥ आंगिकाः
केचिदस्कग्रा वातपित्तकफोद्भवाः ॥८॥ तेषामुपशमः कार्यो भवद्भ्यां वचनान्मम ॥ इति लब्धादेशौ तौ नाद्य विक्र-
वमाप्तौ ॥९॥ विषण्णवदनौ दीनौ चेरतुः पृथिवीमिमां ॥ आवाभ्यां नु कथं किं वा कार्यं व्याधिविनाशनं ॥१०॥ भ्रमंतौ
त्वचिंतितौ तौ नारदेन समागतौ ॥ नारद उ० ॥ कस्माद्विषण्णवदनौ दीर्घनिःश्वासधारिणौ ॥११॥ चिंताप्रपन्नमनसौ तु
ःकश्चिद्यथा वने ॥ अश्विना उचतु० ॥ आदिष्टौ ब्रह्मणा ब्रह्मन्लोके व्याधिविनाशनं ॥१२॥ तेन चिंतान्वितौ मद्रौ ना-
धिनः करवाम किं ॥ तयोरेवं वचः श्रुत्वा नारदो ज्ञानवान्मुनिः ॥१३॥ उवाच मधुरं वाक्यं तयोः प्रियचिकीर्षया ॥ नारद
उ० ॥ नश्यतां तु तपः स्कंध्यं यथा स्मान्मनसा स्थितं ॥१४॥ विना तपः कथं सिद्धिश्चिंतितार्थस्य भानुजौ ॥ पूर्वैरपि तपस्तप्त-
ता कार्ययोगाः प्रसाधिताः ॥१५॥ अश्विनावचतुः ॥ भगवंस्त्वं त्रिकालज्ञो ज्ञाताज्ञातं विपश्चित च ॥ कस्मिंस्तीर्थे तु कर्तव्यमा- १४०
वाभ्यां तप उत्तमं ॥१६॥ साधं क्रोशद्वयं तच्च संगमाद्दक्षिणे तटे ॥ क्रोशमात्रे ये कुले ग्रामश्च अनुलोमेन गच्छतां ॥१८॥ + तत्स

मास्यादिकारणं यातास्यः कतमः प्रभुः ॥ नारद उ० ॥ रेवाया दक्षिणे तीरे संमुखं तु समाश्रमात् ॥१९॥ + वनं गुल्मलताकी- 283
र्णं स्यग्रोधाश्वत्थपादपैः ॥ किंशुकैः कोविदारैश्च रसालैर्नारिकेलिदुकैः ॥१९॥ तत्र चाग्नीसमं दृष्ट्वा मध्ये स्थानं सुशोभनं ॥ ई- 2008
श्वराधिष्ठितं सिद्धसंघैश्च परिसेवितं ॥२०॥ परं नियममास्थाय गच्छतां तत्र मा चिरं ॥ इत्युक्तौ नारदेनेत्थं चेरतुस्तौ तपस्ततः ॥
२१॥ पादांगुष्ठस्थितौ नित्यं निराहारौ जितेंद्रियौ ॥ पंचाग्निसाधकौ ग्रीष्मे वर्षासु स्थंडिलशायिनौ ॥२२॥ सहमानौ महादुःखं हे-
मंते तत्र वासिनौ ॥ ध्यायमानौ महादेवमव्यक्तं दोषवर्जितं ॥२३॥ दिव्यवर्षसहस्रं तु तोषितो जगदीश्वरः ॥ निर्गतं सुमह-
न्तेजो निर्भिद्यावनिमंडलं ॥२४॥ सूर्यकोटिप्रतिकाशं ज्वालाव्याप्तदिगंतरं ॥ तं दृष्ट्वा सुमहत्तेजः शोभमानाववोचतुः
॥ किमिदं व्याकुलास्माकं तपसो हानिकारकं ॥ चिंतयानौ महादेवमद्राष्टां लिंगमप्रमं ॥२५॥ सौम्यरूपं शिवं देवमना-
दिमुमया युतं ॥ ईश्वर उ० ॥ वरं प्रार्थयतां मत्तो वांछितं पुत्रकौ सुतौ ॥२७॥ अदेयमपि दास्यामि यद्यपि स्यात्सुदुर्ल-
भं ॥ अश्विना उ० ॥ आदिष्टौ ब्रह्मणा देव लोकव्याधिप्रशांतिकं ॥२८॥ तत्र प्रसादं कुरु नो सर्वभूतहिताय वै ॥ ईश्व-
र उ० ॥ विख्यातौ त्रिषु लोकेषु वै परा तौ भविष्यथ ॥२९॥ अहं च पुनर्योनीम्ना ख्यातिं यास्यामि सर्वतः ॥ सर्वकामप्र-
दं पुण्यं लिंगमेतद्भविष्यति ॥३०॥ वैद्यनाथमिति ख्यातं रोगघ्नं ख्यातमत्र भविष्यति ॥ सर्वरोगप्रशांत्यर्थं सर्पं प्रपंचज्ञौ भविष्यथ ॥
३१॥ देवासुरमनुष्याणां रोगनाशे सुविपश्चितौ ॥ पंगुबधिराणां च पंगूनां कुष्ठिनां तथा ॥३२॥ महारोगाभिभू-
तानां कलोपस्य यकारकं ॥ भविष्यति न संदेहो मासद्वां मोक्षमिच्छतां ॥३३॥ राज्यपुत्रप्रदं भोगसुखसौभाग्यसिद्धि-
दं ॥ नारारोग्यदं लोके दुःखनिर्नाशकं गुह ॥३४॥ ददाति सर्वकामांश्च लिंगमेतत्स्वपूजितं ॥ पूर्णदर्शं तमासाद्य
शिवलोकप्रदं परं ॥३५॥ रविवारे तथाष्टम्यां चतुर्दश्यां च ये नराः ॥ रुद्रमभ्यर्चयिष्यंति मन्याको वाश्विने स्मवाः ॥३६॥
तथा कनुसमं पुण्यं भावनाराज्यपुत्रदं ॥ रविवारे तु सप्तम्यां कृष्णपक्षे यदा भवेत ॥३७॥ तदा रवौ नरसिलला वै-
द्यनाथस्य पूजनात् ॥ न कुलेतस्य वै कुष्ठी नवांधान च पंगुकः ॥३८॥ वैद्यनाथं समासाद्य दीपप्रज्वालयेत्सभीः ॥

रे॰खं॰ घृतेन वाथ तैलेन पुण्यसंख्या न विद्यते ॥ ३९ ॥ रात्रौ जागरणं कुर्यात् पूजयेद्यो जगद्गुरुं ॥ मालतीजातपत्राद्यैर्नानापुष्पैश्च तुष्ट
१४१ वे ॥ ४० ॥ ग्राम्यैर्वन्यैर्यथालब्धैः प्राप्य पंचामृतेन तु ॥ कोटिजन्मार्जितं पापं एकेनैव दहेन्नरः ॥ ४१ ॥ सूर्यग्रहे कुरुक्षेत्रे
प्रभासे सोमवासरे ॥ कार्तिक्यां पुष्करे स्नात्वा यत्फलं पुरुषोऽश्नुते ॥ ४२ ॥ तत्फलं समवाप्नोति वैद्यनाथस्य पूजनात्
मत्स्यो ममानोमभविता विप्रहृष्टो महीतले ॥ ४३ ॥ धन्वंतरिरिति ख्यातो वैद्यराट् व्याधिनाशनः ॥ सोऽस्य लिंगस्य माहा
त्म्यं विज्ञाय हृष्टो भविष्यति ॥ ४४ ॥ यदा यदास्य लिंगस्य प्रभावो वृद्धिमेष्यति ॥ तदा सर्वोमतच्छायां भयज्ञाच्छादयि
ष्यति ॥ ४५ ॥ इत्युक्त्वा चाश्विनौ वाक्यमंतर्धानं गतौ स्म हं ॥ ततः प्रभृति विख्यातो नाम्ना सर्वो वैद्यनायको ॥ ४६ ॥ अ
हं च वैद्यनाथाख्यो प्राप्तो लिंगतदाद्वितः ॥ यद्दृश्यमानं वै श्रोष्यंति श्रद्धया नरः ॥ ४७ ॥ तेन पापं दुःकृतं किंचि
दुष्कृतो स्थानचापदः ॥ यत्र तत्र स्थितस्यापि पठतः शृण्वतोऽपि वा ॥ ४८ ॥ यात्रायां यत्फलं प्रोक्तं तत्तस्य स्यान्न
संशयः ॥ ४९ ॥ इति श्रीरे॰ वैद्यनाथतीर्थं ॥ ॥ मार्कंडेय उ॰ ॥ ततो गच्छेत राजेंद्र वानरेश्वरमुत्तमं ॥ क्रोशांतरे वैद्य
नाथाद् दृतिः क्लेशनाशनं ॥ १ ॥ युधिष्ठिर उ॰ ॥ वानराख्यात्र किं तीर्थं विख्यातं कथमुत्तमं ॥ एतदाश्चर्यमाख्याहि कोऽब
भवात्र वानरः ॥ २ ॥ मार्कंडेय उ॰ ॥ शृणु राजन् प्रवक्ष्यामि यथा भद्रान राधिपः ॥ किष्किंधाधिपतिः श्रीमान् सुग्रीवो नाम
वानरः ॥ ३ ॥ स खाश्री रामचंद्रस्य वालेश्चतारवेः सुतः ॥ श्रुतो भविष्यति पुरा त्वया पिन्नपसत्तमः ॥ स राजा वानराणां
तु ऋक्षाणां चापि कोटिशः ॥ स पुरा रामचंद्रस्य साह्यमतुलं भुवि ॥ करोति स्मात्मस्वत्तया वै मित्रत्वं सो युधिष्ठिर ॥ ४
रामभार्यां पुरानीतां सीतां रावणमंदिरात् ॥ छद्मना पहृतां ज्ञात्वा यात्वा हत्वा च रावणं ॥ ५ ॥ मरुमध्ये महाराज महा
स्त्रैः समहाबलं ॥ देवदुंदुभिनिर्घोषैः पुष्पवृष्ट्याभिपूजितः ॥ ६ ॥ रामो दाशरथिः श्रीमान् स सुग्रीवः किलानयन्
॥ विभीषणं स्थापयित्वा लंकाराज्ये युधिष्ठिर ॥ ७ ॥ पुण्यं विमानमारुह्य सम्यक् पथि विततः ॥ सुग्रीवो जांबवान्ना १४१
लो हनुमान्नल एव च ॥ ८ ॥ गजो गवाक्षो गवयः शरभो गंधमादनः ॥ सुखिनपन स तारो मंदो द्विविदगोमु

खिः ॥ ९ ॥ अंगदाद्यास्तदा सर्वे कपयः कामरूपिणः ॥ पुरस्कृत्य नृपं रामं ससीतं सहलक्ष्मणं ॥ १० ॥ रेवानर्मुपाज 285
म्मुर्दक्षिणं शुभलक्षणं ॥ दृष्ट्वा गत्वा यथा सर्वे वितयश्चक्रुः समाहिताः ॥ ११ ॥ प्रथमं मागमाश्रित्य रेवातटनिवासि 2008
नः ॥ संग्रामे क्रूरकदनाद्यात्मकल्मषविनाशिनि ॥ १२ ॥ स्तुता पमा स्ततः पार्थलिंगसंस्थापने रताः ॥ पृथक्तीर्थानि स
र्वेषां वश्याम के॰ कन्ये नृप ॥ १३ ॥ सुग्रीवेण तपस्तप्त्वा पतोषितः परमेश्वरः ॥ चिरमत्र महाराज वानराभिवंदि
तन् ॥ १४ ॥ प्रत्यक्षो भविषतत्र प्रोवाच कपिसत्तमं ॥ शिव उ॰ ॥ वरं वरय भद्रं ते तपसा तोषितस्त्वया ॥ १५ ॥ कपि
सत्तम दास्ये दं व्रतियथन्न वंचितं ॥ सुग्रीव उ॰ ॥ नमस्तु महादेव यदि तुष्टोसि शंकर ॥ १६ ॥ अमी ते वानराः
सर्वे किंकराः पर्युपासते ॥ रक्षःसंग्रामसंभूतमेतेषां कल्मषं हर ॥ १७ ॥ नानाकदनबीभत्स भवं पापं प्रणाश
य ॥ वानरैः स्थापितैः सर्वैः लिङ्गैर्वै स्थिरो भव ॥ १८ ॥ वानरेश्वरनाम्ना त्वां पूजयंतु जना भुवि ॥ देहांते स हृ
तिं देहि वानराणां महेश्वर ॥ १९ ॥ ईश्वर उ॰ ॥ एवमस्तु कपिश्रेष्ठ यत्ते मनसि वांछितं ॥ वानरेश्वरनाम्नाहं
स्थास्यामि त्वत्पार्थिवः ॥ २० ॥ वे मत्यं वानराः सर्वे प्राप्स्यंति सद्गतिं ॥ इत्युक्त्वा वानरान्सर्वान् सुग्रीवं च क
पीश्वरं ॥ २१ ॥ तत्रैवादर्शनं जातः शिवः सत्यस्य पश्यतः ॥ मार्कंडेय उ॰ ॥ ततः प्रभृति विख्यातं तीर्थं वैवानरे
श्वरं ॥ २२ ॥ तत्र तीर्थे नरः स्नात्वा श्राद्धं कृत्वा विधानतः ॥ उद्धरेत्सर्वपितॄन्नाश्रुदतापत्वान्नदद्यात्परान् ॥ २३ ॥ प्रेता
श्च सद्गतिं यांति पिंडेनैकेन भारत ॥ यो भक्त्या पूजयेद्देवं स्नात्वा त्यावानरेश्वरं ॥ २४ ॥ सर्वपापविनिर्मुक्तः
शिवलोके महीयते ॥ दीपदानेन दैवाय स्नात्वा त्यान्नपसत्तम ॥ २५ ॥ आयुरारोग्यमैश्वर्यं प्राप्नोति भुवि मा
नवः ॥ ब्राह्मणान्भोजयेद्यस्तु स्नात्वा त्यात्र पांडव ॥ २६ ॥ सिकृष्णसिकृष्ण भवेत्रृभिः पितृणां युगसंख्यया
॥ २७ ॥ इति श्रीवायुपुराणे॰ नर्मदामा॰ वानरेश्वरतीर्थं ॥ ॥ मार्कंडेय उ॰ ॥ अतः परं महाराज शृणु तीर्थं पु
रातनं ॥ पुराणेश्वयतं तद्धि शृणु मोक्षास्पदं परं ॥ यस्मिन् श्रुते तापसर्वेषां शयोद्दुःकर्मणां भवेत् ॥ कैलासशिख

रे॰खं॰ रे पूर्वं देवदेवं जगद्गुरुं ॥ २ ॥ स्कंदः प्रणम्य पप्रच्छ श्रद्धापूतमनानृप ॥ स्कंद उ॰ ॥ पृथिव्यां यानि तीर्थानि मुख्यान्या
१४२ यतनानि च ॥ ३ ॥ क्षेत्राणि च वनानीह त्वत्प्रसादाच्छ्रुतानि मे ॥ पुरेन्यतरं गोप्यं सरित्श्रेणां तपस्विनां ॥ ४ ॥ संपंनं
सर्वतीर्थेषु सर्वयज्ञेषु चोत्तमं ॥ यस्मिन्तीर्थे नरः स्नात्वा मुक्तिमाप्नोति शाश्वतीं ॥ ५ ॥ तत्तीर्थं श्रोतुमिच्छामि कृपया
मे वद प्रभो ॥ इत्येतत् पुत्र वचनं श्रुत्वाथ मेनमुमापतिः ॥ ६ ॥ प्राह प्रीतमनाः पुत्रं विश्वासा परया मुदा ॥ महादेव
उ॰ ॥ शृणु स्कंद परं गोप्यं विश्वस्यापि तव प्रियं ॥ ७ ॥ क्रोशमात्रे हि तत्तीर्थं रेवातटमुपाश्रितं ॥ कारार्धे वानेरे
शातुरेवाया दक्षिणे तटे ॥ ८ ॥ स्वर्गमोक्षप्रदं तीर्थं सप्तकल्पस्मरं पदं ॥ तस्मिन्तीर्थे नरः स्नात्वा कुलकोटिं समु
द्धरेत् ॥ ९ ॥ काशीवासेन वै पुण्यं यज्ञस्यायुतसंख्यया ॥ तत्पुण्यं प्राप्यते तत्र स्नानमात्रेण षण्मुख ॥ १० ॥ स्कं
द उ॰ ॥ तीर्थानामुत्तमं तीर्थं रेवातीरे स्थितं विभो ॥ कस्माज्जातं पृथिव्यां तत्कदा कथय मे प्रभो ॥ ११ ॥ स्थानं च
देवतां मंत्रान् पूजनं दानजं फलं ॥ विस्तराद्वद देवेश परं कौतूहलं हि मे ॥ १२ ॥ काशीसमं यत्पुण्यं स्नानमात्रे
ण लभ्यते ॥ ईश्वर उ॰ ॥ वाजीमत्तपुरी ख्याता तत्समीपे वनं महत् ॥ १३ ॥ अत्र जंबूकदंबैश्च बिल्वपाटलकिं
शुकैः ॥ अश्वत्थोदुंबरप्लक्षदाडिमैर्बीजपूरकैः ॥ १४ ॥ चिंचिणीवकुलैर्भल्लैः कुंभीवृक्षैश्च शोभितं ॥ ना
रीन्यग्रोधजंबीरकोविदारकरंजकैः ॥ १५ ॥ वृक्षमालाकुलं रम्यं रेवातीरमुपाश्रितं ॥ कुंभीवृक्षबहुलाच्च
कुंभीवनमिति स्मृतं ॥ १६ ॥ वनमध्ये च विख्यातः सुरेशोहं जगत्त्रये ॥ इतिहासं संप्रवक्ष्यामि वृत्तांतं पुत्र पौ
र्विकं ॥ १७ ॥ यस्य वै श्रवणादेव सर्वपापैः प्रमुच्यते ॥ आदौ तत्र तपश्चक्रे ब्रह्मा कल्पे पुरातने ॥ १८ ॥ स्थापि
तं तेन तल्लिंगं प्राणिनां मुक्तिदायकं ॥ ब्रह्मेश्वरमिति ख्यातं तदा तीर्थं जगत्त्रये ॥ १९ ॥ नमस्यंति य दायेत
न्मुक्तिस्तेषां सुनिश्चिता ॥ ततो द्वितीये कल्पे वै तत्र रेवाजलांतिके ॥ २० ॥ विष्णुना स्थापितं लिंगं तपः कृ १४२
त्वा तु पुत्रक ॥ चक्रं देसय धा जातं मलिनं क्षालितं तदा ॥ २१ ॥ तपस्यता पुरा मुक्तं तत्र तल्लिंगमुत्तमं ॥ ते

न चक्रेश्वरमिति ख्यातं विश्वनमस्कृतं ॥ २२ ॥ ऋषिभिस्तु पूजितं नित्यं सर्वसौख्यप्रदायकं ॥ येन मस्यंति देवेशं 287
मानवा गतमत्सराः ॥ २३ ॥ न लभंते पुनर्जन्म संसारे दुःखसागरे ॥ कल्पे तृतीये शक्रेण तत्र तप्तं तपो महत् ॥ २४ 2008
प्रकाशितं पुनर्लिंगं तस्मिन्स्थाने तटे वहि ॥ शक्रेश्वरमिति ख्यातं तदा प्रभृति षण्मुख ॥ २५ ॥ तत्र स्थाने स्ना
नपानान्न भूयो जठरे वसेत् ॥ ईश्वरं हृदि संस्थाप्य यः पुमान् पूजयेत्कलौ ॥ २६ ॥ तस्य पुण्यं प्रशंसंति मुनयो
मरुतां गणाः ॥ तदा मेघाश्च शक्रेण सप्ततीर्थे समागताः ॥ २७ ॥ ते पतेपुस्तपस्तीव्रं नित्यं रेवाजलाश्रिताः ॥
स्थापिताश्च पुरा रम्या ते शंभक्तेः स्वनामतः ॥ २८ ॥ रंभाद्यप्सरसः सर्वाः समं शक्रेण संगताः ॥ जलक्रीडां हृदे च
क्रुरप्सरोहृदं द्रवतः ॥ २९ ॥ मेघेश्वरसमीपे तु कथितः पापनाशनः ॥ शक्रेश्वरसमीपे तु दिनमेकं वसेत्तु यः
३० ॥ तपस्तप्त्वा तु दिव्यान् सहस्रं नर्मदातटे ॥ शिवमाराध्य तं लिंगं स्वनाम्ना संस्थाप्य चर्चितं ॥ ३२ ॥ धर्मेश्व
र इति ख्यातं पुत्राहं तत्र वै तदा ॥ धर्मेश्वरमिदं लिंगं सिद्धदेवर्षिपूजितं ॥ ३३ ॥ येन मस्यंति मां तत्र तेषां
सिद्धिस्तु वांछिता ॥ पंचमे वरुणः कल्पे तपस्तेपे वने शुभे ॥ ३४ ॥ महेश्वरं ध्यायमाने रेवाया दक्षिणे तटे
तं देवो द्रुदमग-लिंगं वरुणपार्श्वतः ॥ ३५ ॥ जलेश्वरे यातल्लिंगं पूजितं परया मुदा ॥ वरुणेश्वरनाम्ना
तदाख्यातं जगतीतले ॥ ३६ ॥ स्नात्वा पीत्वा शिवं दृष्ट्वा तत्र पुत्र कलौ युगे ॥ नरः सौख्यं च संतानं प्राप्नोत्यंते
शिवांतिके ॥ ३७ ॥ षष्ठे यक्षेश्वरस्तत्र पनदो नर्मदातटे ॥ ध्यायमानो महेशानं तपश्चक्रे महावने ॥ ३८ ॥ उग्रे
ण तपसा तस्य प्रत्यक्षोहं तदा स्थितः ॥ लिंगरूपश्च धर्मात्मा धनदेनाहमर्चितः ॥ ३९ ॥ यक्षेणास्थापितो यस्मा
न्नाम्ना यक्षेश्वरस्ततः ॥ तत्र स्नात्वा च मां दृष्ट्वा सर्वपापैः प्रमुच्यते ॥ ४० ॥ मार्कंडेय उ॰ ॥ इति श्रुतं मया रा
जन्महेशाद्गुरुसन्निधौ ॥ देवर्षिप्रमथानां तु कैलासे शृण्वतां तदा ॥ ४१ ॥ प्राप्ते च सप्तमे कल्पे मया तत्र त
पस्यता ॥ वेदपारायणं कृत्वा लिंगं तद्वै प्रकाशितं ॥ ४२ ॥ तस्मिन्नेव तदा कल्पे तथा पार्थ शनैश्चरः ॥ कश्य

रे॰ ख॰ पस्य कुले जातः सर्वे पुत्रो महाबलः ॥४४॥ तीव्रकोपप्रसादः स प्रोच्यते सकलैर्जनैः ॥ पादांबुजं प्रणम्य भक्तिपूर्वेण चेतन
१६३ सा ॥४५॥ भक्तियुक्तेन च हस्याति देव गुरुं पर्यपृच्छन्नेश्वरः ॥ ज्ञानेश्वर उ० ॥ कथं तात गुरो मम मादृ मे तीव्रकोपप्रशांतये ॥४६॥
आख्याहि परमं तीर्थं तपोदानं व्रतं तु वा ॥ उपायं परमं ब्रह्मन्वद कोपप्रशामनं ॥४७॥ त्वं गुरुः सर्वदेवानां वाचस्पतिः
स्तीर्यते ॥ ब्रह्मन्नंगिरसः पुत्रः सर्वज्ञस्त्वं सदा मतः ॥४८॥ गुरुरु० ॥ शृणु भो रिपुघातस्त्वं पि यं पन्नं न सो छसि ॥ सकं कु
म्भेश्वरं नाम तीर्थं परमशोभनं ॥४८॥ छायासुतश्च भक्तिमंश्च सते भुवनत्रये ॥ कुंभेश्वराख्यं तीर्थं संतकल्पस्मरं विदुः
॥४९॥ स्वर्गं मर्त्ये च पाताले विख्यातं पूजितं नतैः ॥ मध्ये सिद्धस्थितं गोदायं यावत्स्थिति सुरपेय ॥५०॥ ते सर्वे तत्र चायांति
मंद कुंभेश्वरं तदा ॥ ज्ञानेश्वर उ० ॥ ऋषिपुत्र गुरुश्रेष्ठ वद मे नामनिर्णयं ॥५१॥ कुंभेश्वराख्यं तीर्थं कस्मादुक्तं मनी
भिः ॥ संसपाद पिम प्रातः वद मे विस्मयो हृदि ॥५२॥ वाचस्पतिरुवाच ॥ शृणु कौतुकं परं गुह्यं पत्र विस्मयकारकं ॥ क
थयिष्यामि तीर्थस्य यथावन्नामकारणं ॥५३॥ पुरा मृकंडुतनयो मार्कंडो मुनिसत्तमः ॥ प्रपौत्रो ब्रह्मणः पौत्रो
भृगोरुग्रतपाः सुधीः ॥५४॥ रेवायां दक्षिणे कूले वेदपारायणोत्सुकः ॥ प्रदेशं रुचिरं मत्वा वनं पुण्यं चकार भवनं ॥५५
कल्पवृंगास्थापयामास पुराणपुरुषं स्मरन् ॥ नित्यं त्रिषवणस्नायी वेदाध्यायी निवार्चकः ॥५६॥ वासरं न च मे मंद
विसर्जेन परो मुनिः ॥ अभिषेक्तुं शिवं देवं प्रेकलशोद्धरणे मतिं ॥५७॥ तदा मित्वा भुवं कुंभमुद्भूतं लिंगमुत्तमं ॥ मुनिस्तु
ष्टाव तं लिंगं प्रसंनो भक्तदांहरः ॥५८॥ उवाच च प्रसंनोस्मि ब्रूहि यत्ते वरो हृदि ॥ मार्कंडेय उ० ॥ भगवन्देवदेवेशा
तवनुष्टेन शंकर ॥५९॥ धन्योस्म्यनुगृहीतोस्मि प्राप्तमखिलं फलं ॥ यदि प्रसंनो भगवान्वरमेकं प्रयच्छतु ॥
६०॥ त्वया पुण्यमिदं देव स्थानं नत्याज्यमेव हि ॥ कल्पे कल्पे च सततं कृपां कृत्वा मयि प्रभो ॥६१॥ यस्त्वामाराध
येत्कामान् तां तां सिद्धिं स विंदतु ॥ मया च भगवत्पार्श्वे भाव्यं भक्त्या तथा कुरु ॥६२॥ यं यं भावमिहाश्रित्य यस्त्वा १६३
मर्चयतेश्वर ॥ स तत्सिद्धिमवाप्नोतु कुंभेशात्त्वत्प्रसादतः ॥६३॥ स्नानं श्राद्धं जपो होमो महादानानि षोडश ॥ त

सहोमादिकं कुर्याद्द्विजभोज्यादिकं तथा ॥६४॥ तद्दर्शनं च विश्वस्य तत्पुण्यं चेति वा भवान् ॥ गुरुरु० ॥ मुनेरेतद्वचः श्रुत्वा 289/2005
तथेत्याह शिवो भक्तं ॥६५॥ ईश्वर उ० ॥ यत्त्वया प्रार्थितं यच्च तथा कृतं भविष्यति ॥ अहं कुंभसमुद्भूतस्तस्मात्कुंभेश्वराख्य
या ॥६६॥ प्रतितस्तं मुनिश्रेष्ठ ख्यातिं यास्ये जगत्त्रये ॥ एवमुक्त्वा महादेवस्तत्र लिंगे लयं ययौ ॥६७॥ गुरुरु० ॥ एवं कुंभेश्व
रनाम तीर्थं शोके प्रकाशितं ॥ मार्कंडेयेन मुनिना एतेषं नाम निर्णयः ॥६८॥ कुंभेश्वरं महातीर्थं सर्वाशुभविनाशनं ॥
दुरदुस्तराणां च विशापानां तपुण्यदं ॥६९॥ येन रांगेन मांगत्वा सिद्धस्थिम थियुगावः ॥ तिलोदकैः पितृदानैस्तर्पयिष्य
ति पवैतान ॥७०॥ तपादिह्निगुणं पुण्यं भवेत्कुंभेशदर्शनात् ॥ तारोत्रस्नानपस्तेपद्धितीये च जनार्दन ॥७१॥ शाकल्प
तीयकल्पे च चतुर्थे परमेष्वरे च ॥ पंचमे वरुणः षष्ठ यक्षराजो धनेश्वरः ॥७२॥ मार्कंडः सप्तमकल्पे कृतवान्प्रकटं
शिवं ॥ लिंगरूपं रवेः पुत्र सो प्रतं पापनाशनं ॥७३॥ तथा त्वमपि गांत्वा च प्रजयस्व महेश्वरं ॥ तमेव लिंगरूपं तु स्तु
तिध्याननिवेदनैः ॥७४॥ समाराध्य त्वया तात मानपमात्तशांपितोद्भियः ॥ एभिर्देवेयेथा पर्वेष जेदिः परितोषितः ॥७५॥ तथा
त्वमपि शांतात्मा शिवमाराधयाशुभं ॥ ससकल्परितादिंगं भुक्तिदं भुक्तिपावनं ॥७६॥ मोक्षदं मुक्तिकामानां सर्वेषां
वांछितार्थदं ॥ मार्कंडेय उ० ॥ गुरुणा वं समादिष्टः शापः श्यात्वु यर्योशनिः ॥७७॥ तीर्थं कुंभेश्वरं नाम सप्तकल्पस्मरं शुभं ॥
पत्रैवाहं स्थितो नित्यं पत्ना कल्मि निर्वातिक ॥७८॥ शनिः समाधिमास्थाय प्राणानायम्य यत्नतः ॥ द्विव्यं वर्षसहस्त्रं स
तपस्तेपे निवातिकः ॥७९॥ शनिना राधितस्तत्र तपोभिर्विविधैर्नृप ॥ प्रत्यक्षोभवत्देवः ज्ञात स्वस्य भक्तपावनाकृतं ॥८०
तुष्टोस्मीति वरं पुत्र प्रार्थयस्व वदस्व तत् ॥ शनिरुवाच ॥ त्वयदिदं यदि देवेश विभो विषमदर्शन ॥८१॥ विरूपाक्ष विपर्यावक्ष्या
मकृतात्पापकर्म ॥ अहो भाग्यमिदं मन्ये मम मंदस्य चैव महत ॥८२॥ त्वं पदयार्चितः धारतुष्टो त्रिपुरांतक ॥ यदि तुष्टोसि
भगवन्कोपं मे नाशमीश्वर ॥८३॥ तीव्रकोपप्रसादं मां विदुर्लोकाश्च पञ्चत ॥ प्रसादस्त्वनन्कतो मे स्तु कोपं तीक्ष्णं प्रशा
मय ॥८४॥ येन चाहं गमायांति भयं भारि जनाः सदा ॥ तस्य शांति महं मन्ये श्रेयसि सुरसत्तम ॥८५॥ जीवितं न हृयस्यशा

रे॰ खं॰ जनस्तत्र द्विजतेधन॥नमस्ये त्वां जितं तं देवं त्यनस्य हृष्यतु॥८८॥हरापहरनत्वान्मे॥नमस्कोपस्यतीत्रता॥मर्यादाश्चैर्यश्री
१४४ लोके संबंधे सर्ववस्तुषु॥८०॥तथैवान्यंतरं यात्रे मयासेपूजितो यथा॥तथा महर्षमार्गाय्य तामक्ष पीरतोषितः॥८८॥
मुनिरेनमेद्यतो यथस्थिरो भव महेश्वर॥आकल्पं मत्तीर्थे मार्कंडेयक्षतान्वय॥८०॥कुंभेश्वर इति ख्यातः क्षिप्रलोके
षपूर्जटे॥कुंभीवने तांकुंभेशा कुंभराशिगते मयि॥९०॥ये नराः पूजयिष्यंति स्नात्वा नानोपचारतः॥तेषां जन्मसहस्रा
र्जनानां मापातुपातकं॥९१॥मयाच विषमस्थेन विषमस्थानजं फलं॥नंदेयं तस्य गिरिजा कदाचिद्भुवनत्रये॥९२॥यदा
दा गोदावरीमात्रा सिंहस्थे च बृहस्पतौ॥तदा देवर्षिसिद्धाश्च मनुष्या यांति गौतमीं॥९३॥तथैव हि समायांतु ते सर्वे
दर्शनायते॥यत्तु गोदावरीस्नानात्र्यंबकस्यार्चनात्फलं॥९४॥तं देवद्विगुणं भयाद्दिह कुंभे शातर्चनात्॥मार्कंडेय
उ॰॥इति संप्रार्थिते पार्थ शक्तिनाशांतचेतसा॥९५॥तस्मै दत्तं हितत्सर्वं वररूपं यदीप्सितं॥महादेव उवाच॥वत्से
ह साधु तत्सर्वं भविष्यति शनेश्वर॥९६॥एतद्भविष्यति मद्रूपं दूरान्निकृततो दिवा॥भुद्धनत्स्यार्तं तेन पापुण्यसं
ख्यान विपते॥९७॥कुंभराशिगतस्त्वं हि सिंहस्थे वा बृहस्पतौ॥तदा कुंभेश्वरे यात्रा सदा सौरे भविष्यति॥९८॥
स्नानं श्राद्धं तथा दानं होमं देवार्चनं तथा॥यस्तु कुंभेश्वरे कुर्यात्तस्य पुण्यमनंतकं॥९९॥मार्कंडेय उ॰॥इति
दत्वा वरं तस्मै शर्वो लिंगे लयं गतः॥एवं ते कथितं राजंतीर्थं कुंभेश्वरं मया॥१००॥कीर्तनाच्छ्रवणादस्य सर्वपा
पैः प्रमुच्यते॥वध्यहं न परो वेत्ति गोप्यमेतज्जगत्त्रये॥१॥एतद्रा जन्म यापूर्वं श्रुतं तत्र महेश्वरात॥कार्तिकेयस्य
संवादे तीर्थयक्षेश्वराह्वयं॥२॥मयाप्रकाशितं तत्र हृतं त्वेस्मिन्भरतर्षभ॥कुंभेश्वरं नाम कुंभात्किमन्यत्ला
वनं ततः॥३॥तीर्थानां परमं तीर्थं मोक्षकं सार्वकामिकं॥तावत्नुगर्जंति तीर्थानि यावद्देतन्न कीर्त्यते॥४॥धेनुस्व
र्णगृहं छत्रं वस्त्रोपानद्व्यादिकं॥भोजनं च वृषं चाश्वं दद्याद्भूमिं तथा तिलान्॥५॥कुंभेश्वरस्य तु स्पर्शे तथै १४४
वन्नाशितांतये॥कुंभेश्वरं पुमान्गत्वा प्राक मलफलेरपि॥६॥अप्येकं भोजयन्विप्रं कोटिभोज्यफलं लभे

त्॥तस्मिंतीर्थे विषवृक्षाः पतंति कालपर्यये॥७॥नर्मदासंस्पृष्ट्वा ते वियांति परां गतिं॥अपि प्रमादिनो विप्राः प्रसंगादपि 291/2008
येगता॥८॥तेपापायानि नश्यंति हिमं सूर्योदये यथा॥तं मार्गमाश्रयेन्मर्त्यो यदा तत्तीर्थवांछया॥९॥न संति पितरस्त
स्य मोक्षमार्गविचिंतकाः॥कुंभराशिगते मंदे सिंहस्थे वा बृहस्पतौ॥१०॥शनैर्दिने सदा यात्रा रवावपि च नाश्यते॥पुनः
स्तिकथयिष्यामि विशेषं पांडुनंदन॥११॥यदा कदाचिमर्त्यस्य स्वसतो भाग्ययोगतः॥सिंहस्थिते गुरौ पार्थ कुंभराशि
गते भंजेत्॥१२॥भद्रातिथौ शनेर्वारः संबंधो योगविशेषतः॥एकैकस्य यदा धिक्यं चतुर्णां प्राप्नुयान्नरः॥१३॥तथा
तीर्थं समुद्दिश्य व्रजेद्यो भक्तिमान्नरः॥पदे पदेऽश्वमेधस्य फलं प्राप्नोति निश्चितं॥१४॥स्नानात्सर्वेषु तीर्थेषु यत्फ
लं तदवाप्नुयात्॥यतो गच्छंति तीर्थानि तदा कुंभेश्वरं नृप॥१५॥आगमः सर्वदेवानां मृषीणां सरितां तथा॥तदा यो
गसमायाति त्र्यंबकः सा च गौतमी॥१६॥तदा प्रयागजं तीर्थं यथा सित्रं हि कोरवं॥सर्वतीर्थमयं तो यं सर्वदेवमयानन
गाः॥१७॥काशीवासाच्च यत्पुण्यं कुरुक्षेत्रे रविग्रहे॥स कृत्रिवण्यां स्नातस्य तत्कुंभेश्वरदर्शनात्॥१८॥श्राद्धदाने
न पितरस्तृप्ता युगसहस्रकं॥भवंति पतिते सर्वे सर्वदेवाः सुपूजिताः॥१९॥तत्र तीर्थे च यद्दत्तं श्रद्धया शक्तितो न
प॥त्रयोदशाद्दिनान्यत्र योदशागुणं भवेत्॥२०॥तस्मिन्योगे नरः पार्थ पुराणोषितिनिश्चयः॥तिलितिलि तिलद्रो
णपुण्यं तेकुतो क्वि॥२१॥तस्मात्पार्थ विशेषयातिलहोमः प्रशस्यते॥प्राप्य तं योगमद्विव संमतं भक्त्या करोति यः
२२॥तत्सहस्रमुखैः शेषप्रवक्तुं नक्षमो भवेत्॥शतहोमं सहस्रं वा लक्षहोमादिकं तु वा॥२३॥शतमेव सहस्राद्वि
द्विजवर्षा शतानि च॥सुवर्णकपिलानाप्योदानान्यन्यानि शक्तितः॥२४॥योदद्यात्तत्र राजेंद्र महीतिना च मंडिता॥
देवा शांतं विजानीयाच्छिति योगः प्रकीर्तिताः॥२५॥एवं योगं समासाद्य तदाप्लुत्यार्चनादिकं॥गृहं प्रति प्रयातस्य
पितृदेवर्षि मानवाः॥२६॥वर्धयंति तदाशीर्भिः पुण्याभिर्भरतर्षभ॥अपि नः सकुले भूयात्कोपि वंशविधः सुतः॥
२७॥वर्षयुगसहस्राय योगमिन्यनतारिताः॥धन्यं कुंभेश्वरं तीर्थं धन्यो योगोयमुत्तमः॥२८॥सुव्रतः ससुतो धन्यो

यः प्रीणयति नाश्चिरं ॥ किं सुतेन गयां गत्वा यमासं कुरुजांगले ॥ ३० ॥ तीर्थान्यन्यानि तीर्थेऽस्मिन् कुंभजानंभजेन्नृप ॥ एवं सपितृपितामहाः संह्यंति च ये कि ॥ ३१ ॥ तेषां पापानि नश्यंति कीर्तनाच्छ्रवणादपि ॥ लिखित्वा ये प्रयच्छंति तीर्थाख्या नमिदं नृप ॥ ३२ ॥ पाठयंति च ये विप्रान्ते पि धन्यान संशयः ॥ यात्रामात्रप्रराविभ्रमणं महातीर्थे तु कुंभेश्वरे योगस्मिन् जातमस्य पर्वतुल्तिं कुर्वंति यत्फलं ॥ ३३ ॥ चिरमुनेव चतुर्मुखोथ गिरिजाः स्कंदः षडास्यापि सन् ज्ञाप्यापि समस्वस हस्रगणितैर्वक्तुं न शक्तो भवेत् ॥ ३४ ॥ इति श्रीवायपुत्रणि वसंहितायां चतुर्विंशतिसाहस्र्यां श्रीभवाद्वा माहात्म्ये कुंभेश्वरतीर्थं ॥ ॥ मार्कंडेय उ॰ ॥ ततः प्रभृति राजेंद्र प्रसन्नो गिरिजापती ॥ स्थितोहं तत्र पुरतः प्रासादकुंभेश्वरस्य हि ॥ १ ॥ विधिवस्तुतिं तं देवमनुजं मनुजर्षभ ॥ प्रीतोभूतिमवापाथ मम संतोषभावतः ॥ २ ॥ वेदपारायणासीन स्तदा तत्रैव तस्थिवान् ॥ इति संपूजितः सर्वैर्देवैर्ज्ञातमस्याम्यथा ॥ ३ ॥ शिवेति मम नाम्नाहं कृतईश्वरसंस्थित ॥ ४ ॥ इति मार्कंडेश्वरतीर्थं ॥ ॥ मार्कं॰ ॥ ततो गच्छ तु राजेंद्र रामेश्वरमनुत्तमं ॥ धनुः शतानि चत्वारि तद्धि कुंभेश्वरात् स्थितं ॥ ५ ॥ उत्तमं सर्वतीर्थेषु तीर्थं पापप्रणाशनं ॥ अत्र दाशरथी रामो हत्वा लंकेश्वरं पुरा ॥ ६ ॥ विमुक्तो ब्रह्महत्यायाः दोषाद्दा राध्य शंकरं ॥ चरितं रामचंद्रस्य पुराणे बहुविस्तरं ॥ ७ ॥ नतद्वर्णयितुं शक्यमिहतीर्थानुसंततो ॥ ह्युक्त्वा नरसैन्येन सह रामः समागतः ॥ ८ ॥ सीतया सह राजेंद्र निहत्य युधि रावणं ॥ तपश्चचार सुमहद्ब्रह्महत्यापनुत्तये ॥ ८ ॥ फल मूलाशनो नित्यमुपोषणपरस्तथा ॥ एकरात्रं त्रिरात्रं च कृच्छ्रचांद्रायणानि च ॥ ९ ॥ पक्षमासोपवासांश्च रामः सौमित्रिणा सह ॥ ततः कालेन महता प्रसन्नोभूत् महेश्वरः ॥ १० ॥ ददौ वरानीप्सितांश्च राघवाय महात्मने ॥ रामेण रामेण स्थापितं लिंगं पावनं लक्ष्मणेन च ॥ ११ ॥ रामेश्वरमिति ख्यातं तथा वै लक्ष्मणेश्वरं ॥ रामः प्राप्य वरान् शंभो तीर्थं कृत्वा स्वनामतः ॥ १२ ॥ अंतर्धानं गते देवे प्रययौ स्वपुरं प्रति ॥ पावनानि बहून्यत्र भारते संति भारत ॥ १३ ॥ परं १४५
पापहरं नास्ति रामतुल्यं जगत्त्रये ॥ त्रिधा तापस्तथा पापः प्रतिजन्म कदर्थितः ॥ १४ ॥ हा कि ज्ञ मर्त्यैः क्रियते रवासिवा

कलौ युगे ॥ तेम स्वद्दुर्गमास्तिच तेषां जन्म निरर्थकं ॥ १५ ॥ लिंगं शैवं तु लंकेरे वं मुविनो न भजंति ये ॥ रामनाम गुणग्राम कीर्तनं कलिनाशनं ॥ १६ ॥ तेनापि स्थापितं धाम शैवं लिंगात्मकं नृप ॥ तनमस्यंति ये देवं रामेशं राजसत्तम ॥ १७ ॥ ते षां पापानि नश्यंति तमः सूर्योदये यथा ॥ रामेश्वरे नरः पार्थ स्नात्वा चव विधानतः ॥ १८ ॥ पितृन्देवांश्च संतर्प्य श्राद्धं कुर्यात् समाहितः ॥ तृप्यंति पितरस्तस्य संवत्सरशतानि च ॥ १९ ॥ स्नानमात्रेण राजेंद्र पापं याति सहस्रधा ॥ भो जयेद्ब्राह्मणांश्चाद्य सर्वदोषविवर्जितान् ॥ २० ॥ एकस्मिन् भोजिते विप्रे कोटिर्भवति भोजिता ॥ अन्नं वस्त्रं रथं गां यो ज्ञश्वद्दे मधनादिकं ॥ २१ ॥ भोगांश्च विविधान्दत्वा प्राप्नुयात्परमं पदं ॥ तिलोदकैः पितृणां च जायते तृप्तिर क्षया ॥ २२ ॥ एवं कृत्वा महाराज नरः पापात्प्रमुच्यते ॥ त्रिरात्रमेकरात्रं वा स्थातव्यं भक्तितत्परैः ॥ २३ ॥ रामेशं लक्ष्म णेशं च संपूज्य विधिपूर्वकं ॥ घृतेन वाथ तैलेन दीपं दद्याद्दिने दिने ॥ २४ ॥ आ सूर्यलक्षीयेज्ञाः मोक्ष्यते नात्र संशयं परं ॥ इति ते कथितं पार्थ तीर्थं रामेश्वरं परं ॥ २५ ॥ कीर्तनाच्छ्रवणाद्यस्य सर्वपापैः प्रमुच्यते ॥ २६ ॥ इति श्रीरेवा खंडे रामेश्वरलक्ष्मणेश्वरतीर्थं ॥ ॥ मार्कंडेय उ॰ ॥ ततो गच्छ तु राजेंद्र मंघेश्वरमनुत्तमं ॥ पुरस्य पश्चिमे भागे तीर्थमन्यस्य भारत ॥ १ ॥ यथा तत्कथितं सर्वं मंघेशं स्थापितं पुरं ॥ आमंतारस्यं नृपश्रेष्ठ घृतपक्वात्तथाज्ञ्वा वः ॥ २ ॥ स्थापितः परया भक्त्या मंघेश्वर इति स्मृतः ॥ सुरेंद्र वचना पार्थ उपसरोहृद संनिधौ ॥ ३ ॥ तत्राप्सरो हृदे स्नात्वा तर्पयित्वा सुरान् पितॄन् ॥ मंघेश्वरं च संपूज्य सर्वकामफलं लभेत् ॥ ४ ॥ दीपं दद्याद्यथाशक्त्या न स्त्री पात्रकर्म दत्तः ॥ अन्नोदकं च दत्वा वैनंशान्यस्थानरोत्तम ॥ ५ ॥ तत्र च मत्स्यको नाम सिद्धः कोप्यभवत्पुरा ॥ तेनात्र स्थापितः शंभो नाम्ना वै मत्स्यकेश्वरः ॥ ६ ॥ पूजयित्वा सदेवेशानिवलोकं जगाम ह ॥ तत्र मंघेश्वरतीर्थे श्राद्धं कृत्वा नृपोत्तम ॥ ७ ॥ चतुर्युगं पितृणां हि तनयेत्तरेण सया ॥ ८ ॥ इति श्रीरे॰ मंघेश्वरतीर्थं ॥ अप्सरो हृदतीर्थं ॥ ॥ मार्कंडेय उ॰ ॥ ततो गच्छ तु राजेंद्र नर्मदा उत्तरे तटे ॥ कुमारस्थापितं नारदेशा छत्तुः पंचशतांतरे ॥ ९

203
2008

रे.खं.
१४८ दधिस्कंदं मधुस्कंदं पुण्यं तीर्थद्वयं स्थितं ॥ यत्र स्नात्वा च पीत्वा च पूजयित्वा शिवं नृप ॥१०॥ शिवलोकमवाप्नोति
रुद्रस्येतौ वरकिंकरौ ॥ युधिष्ठिर उ० ॥ त्वया प्रोक्तं मुनिश्रेष्ठ तीर्थद्वयमिदं महत् ॥११॥ कस्मान्न दधिमध्वाख्यं केना
म्ना स्थापितं मुने ॥ तदहं श्रोतुमिच्छामि परं कौतूहलं हि मे ॥१२॥ मार्कंडेय उ० ॥ साधु पृष्टं महाराज त्वया पुण्यकथाश्रि
तेनघ ॥ पुराष्टौ गोपबालाश्च गोपस्त्रीचनवनिर्गतौ ॥१३॥ पार्श्वे रेवातटे पुण्यं विक्रेतुं नृपसत्तम ॥ दध्ना च मधुना चैव
पूर्णौ स्कंधे घटावुभौ ॥१४॥ आरोप्य तौ रात्रिकाले सहसा वै भयंकरं ॥ व्याघ्रं पार्श्वे प्रचलितं दृष्ट्वा ते घुर्घुरं ॥१५॥
गोपश्चैव बालिका तत्र भयभीतौ पलायितौ ॥ द्रवमाणौ च पतितौ तयोर्भग्नं घटद्वयं ॥१६॥ दध्नश्च मधुनश्चैव
तीरे रेवासमुद्भवे ॥ स्रुतश्च शंकरस्ताभ्यां तत्र वायनिवेदितं ॥१७॥ घटभंगस्य निर्घोषात्तत्र तौ व्याघ्रौ युधि
ष्ठिर ॥ घटभंगपदे तत्र जातं लिंगद्वयं ततः ॥१८॥ दृष्ट्वा ताभ्यां महाराज पूजितं च स्वभक्तितः ॥ हृष्टतुष्टौ गतौ तौ च स्वं
स्वं स्थानं युधिष्ठिर ॥१९॥ स च गोपो बालिका च कृत्वा तीर्थे च तावुभौ ॥ दधिस्कंदेश्वरं चापि मधुस्कंदेश्वरं तदा
॥२०॥ गोपश्च बालिका चापि शिवलोके भयतयोः ॥ तावपापि स्थितौ लोके शिवस्य भरतर्षभ ॥२१॥ इति ते कथि
तं पार्थ कारणं तीर्थसंभवं ॥ दधिस्कंदं मधुस्कंदं सर्वपापक्षयंकरं ॥२२॥ दधिस्कंदे नरः स्नात्वा यः प्रदद्यान्न
रो दधि ॥ द्विजाय गुणयुक्ताय दक्षिणासहितं नृप ॥२३॥ उपतिष्ठेत तत्तस्य पतनानि च भारत ॥ दध्ना च स्नाप
येद्देवं कुर्याद्दालिंगपूरणं ॥२४॥ न व्याधिर्न जरा तस्य न रोगो न च मत्सरः ॥ सहस्रवर्षं जीवेच्च जायते विपुले
कुले ॥२५॥ मधुस्कंदे च मधुना मिश्रितान्यस्तिलानदेत् ॥ नासौ वैवस्वतं देवं पश्यति द्विजसत्तम ॥२६॥ मधुना
स्नापयेद्देवं मधुस्कंदेश्वरं हि यः ॥ न तस्य पातनापार्थ नारकीया कदाचन ॥२७॥ मधुनामिश्रितांश्चापि ति
लान्यस्तत्र भोजयेत् ॥ शिवमंत्रैः सुविधिवत् कुर्याद्दालिंगपूरणं ॥२८॥ अष्टम्यां वा चतुर्दश्यां पक्षयोरु १५५
भयोरपि ॥ न तस्य पुत्रपौत्रेभ्यो दारिद्र्यं न वियोजनं ॥२९॥ यो दद्यादिह तीर्थे वै पिंडान् दधिमधुप्लुतान् ॥ य

स्य नाम समुच्चार्य तृप्तिस्तस्याक्षया मता ॥३०॥ ह्रादस्याब्दानि राजेंद्र नात्र कार्या विचारणा ॥३१॥ इति श्रीरेवा० 295/2008
दधिस्कंदमधुस्कंदतीर्थमाहात्म्यं ॥ ॥ मार्कंडेय उ० ॥ ततो गच्छेत राजेंद्र तीर्थे वै नंदिकेश्वरं ॥ किंचिन्न्यूने क्रो
शमात्रे दधिस्कंदाद्युधिष्ठिर ॥१॥ यत्र नंदिगणाः सिद्धः स्तत्सर्वं वदाम्यहं ॥ भक्तभक्त्या पुरा दृष्टा स्तुष्टमारु
सनंदिनं ॥२॥ कैलासाद्दाप्तुनिर्गसमयो भक्तं तु तं प्रति ॥ सम्यगाराधनात्तस्य त्रावत्तयौच यावता ॥३॥ तावत्
कैलासमागत्य कश्चिद्दैदानवाधमः ॥ देवीं गौरीं त्वरन्यायै प्राप्य हर्तुं प्रचक्रमे ॥४॥ शिवपार्श्वस्थितेनाश्रुत
द्विज्ञातं हि नंदिना ॥ अनापृच्छ्य च देवेशं तत्र तूर्णं जगाम ह ॥५॥ ततः किं बहुना तेन युद्धे वै दानवो हतः ॥ भवानी
रक्षिता देवी विश्वांबा वरदा तदा ॥६॥ पुनरागात्तत्र नंदी विभुं वोढुं हि वगतः ॥ ज्ञातश्च सन्निवेनाशु मस्थय
स्मा कृतः क्वचित् ॥७॥ मां विहाय सहायः सन् अनापृच्छ्य स्वलीलया ॥ मया न हं परित्यक्तस्तस्मात् कुछ मही चर
॥८॥ पत्रोऽरिवयतो बुद्धिस्तदस्तु पश्यते वंत ॥ इति शप्तो महेशेन नंदी प्राह यथातथं ॥९॥ सर्वं दानववृत्तांतं
कैलासे गिरिजाकृते ॥ देवदेव महेशान शापस्यानुग्रहं वद ॥१०॥ न वृथागमनं मह्यं ज्ञेयं ज्ञानवतां वर ॥ ई
श्वर उ० ॥ दत्तशापो वृथा न स्यान्नमदुक्तं वृथा भवेत् ॥११॥ सिद्धिर्भविष्यति पुनस्त्वं नंदीन्म हीं व्रज ॥ नर्मदां
पुरतः कृत्वा मां त्वमाराध याश्रुगः ॥१२॥ मार्कंडेय उ० ॥ इति शर्वसमादिष्टो नंदी ध्यात्वा महेश्वरं ॥ पिबन्न र
वाजलं पुण्यं तमुंजस्तुं पचक्रमे ॥१३॥ आरभ्य नर्मदां द्रुतं तीर्थातिर्थे जगाम ह ॥ दधिस्कंदं मधुस्कंदं याव
त्स तांस गच्छति ॥ तावत्तुष्टो महादेव स्तनं नंदिनमुवाच ह ॥ ईश्वर उ० ॥ भो भो नंदीन प्रसन्नोऽस्मि वरं वृणुय
वांछितं ॥१४॥ तपसा तेन तुष्टोऽस्मि तीर्थयात्राकृतेन वै ॥ नंदी उ० ॥ चराचरगुरुर्देवः प्रसन्नो यदि शंकरः
॥१५॥ दासानुदासस्य वदमे न्यूनतास्ति का ॥ नाहं प्रकामये वित्तं न चाहं कुलसंततिं ॥१६॥ मुक्ता
नकामये चान्यत्तव राचरणांबुजं ॥ कृमीकीटपतंगेषु तिर्यग्योनिगतेष्वपि ॥१७॥ भवं भवत्सितस्या

रे०खं० विभवभक्तिः स्थिरास्तु मे ॥ त्वयि पूर्वं स्थितं देहि नाधिकं किंचिदेव हि ॥ १८ ॥ तथेति चोक्तः शर्वेण नंदी स्नात्वा त्वम
१४७ ले जले ॥ शिवं स्वनाम्ना संस्थाप्य पूजयित्वा प्रणम्य च ॥ १९ ॥ साष्टांगं वाग्यतो गत्वा ववंदे वरदं भुवि ॥ ततः प्रीत्या
महादेवः करुणानिधिरादरात् ॥ २० ॥ गृहीत्वा तं करे सिद्धिं जगाम निलयं हरः ॥ तस्मिंस्तीर्थे तु यः स्नात्वा भक्त्या
त्र्यक्षं प्रपूजयेत् ॥ २१ ॥ अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ श्राद्धं दत्वा पितॄणां च यथालब्धेन भारत ॥
२२ ॥ शिवस्यानुचरो भूत्वा मोदते कालमक्षयं ॥ ततः कालेन महता जायते विपुले कुले ॥ २३ ॥ वेदवेदांगतत्वज्ञो
जीवेच्च शरदां शतं ॥ एतत्ते कथितं पार्थ तीर्थाख्यानमनुत्तमं ॥ २४ ॥ दुर्लभं भाग्यहीनस्य पापक्षयकरं महत् ॥
इति श्रीरेवा० नंदिकेश्वरतीर्थं ॥ ॥ मार्कंडेय उ० ॥ वरुणेशं ततो गच्छेत्सर्वपापहरं नृप ॥ स्मृतं क्रमसह स्राघं
नंदिकेश्वरतः शुभं ॥ १ ॥ यत्र सिद्धो महाराज वरुणो जलनायकः ॥ त्रिंश्याकशाकपर्णैश्च कृच्छ्रचांद्रायणा
दिभिः ॥ २ ॥ समाराध्य महेशानं ततः सिद्धिं परां गतः ॥ प्राप्तवाल्लोकपालत्वं प्रसादाच्छूलपाणिनः ॥ ३ ॥
तथैवाकस्मिकाख्यानां पापीनां बंधनाय च ॥ स्पूर्णं च महाभाग सहसा बंधनप्रदान् ॥ ४ ॥ स्थापितं पर
मं लिंगं स्वनाम्ना तत्र तेन तु ॥ स्नात्वा रेवाजले पुण्ये पूजयित्वा महेश्वरं ॥ ५ ॥ ततः स्वलोकमगमत्सादेगण
निषेवितः ॥ तत्र तीर्थे नरः स्नात्वा तर्पयेत्पितृदेवताः ॥ ६ ॥ पूजयेच्छंकरं भक्त्या स लभेद्वांछितं फलं ॥ कुंडिकां
वर्धनीं वापि महद्वा जलभाजनं ॥ ७ ॥ अन्नेन सहितं दद्यात्तस्य पुण्यफलं शृणु ॥ यत्फलं लभते मर्त्यः सत्रे
द्वादशवार्षिके ॥ ८ ॥ प्राप्नोति तत्फलं तेन नात्र कार्या विचारणा ॥ सर्वेषामेव दानानामग्र्यमन्नोदकं स्मृ
तं ॥ ९ ॥ सद्यः प्रीतिकरं तोयं तत्रापि नृपसत्तम ॥ गलंतिकां प्रपां वापि ग्रीष्मे यः पूजयेत्सुधीः ॥ १० ॥ प्रत्य
हं वर्धते पार्थ तस्य पुण्यमनंतकं ॥ लोकास्तु लोकपालानामक्षयास्तस्य भारत ॥ ११ ॥ तत्र तीर्थे मृतानां १५०
तु नराणां भावितात्मनां ॥ वरुणस्य पुरे वासो यावदाभूतसंप्लवं ॥ १२ ॥ ततः कालेन महता मर्त्यलोके

भिजायते ॥ अन्नपानप्रदो नित्यं जीवेच्च शरदां शतं ॥ १३ ॥ इति श्रीरेवा० वरुणेश्वरतीर्थं ॥ ॥ मार्कंडेय उ० ॥ त
तो गच्छेन्महाराज पावकेश्वरमुत्तमं ॥ स्मृतं क्रमसहस्रं तद्वरुणेशाद्युधिष्ठिर ॥ १४ ॥ यत्र सिद्धो महाराज तप
स्तप्त्वा हुताशनः ॥ स्थानभ्रष्टः सर्वभक्षी दंडके मुनिना कृतः ॥ १५ ॥ भृगुणा स पुरा शप्तः ततश्च तदनुग्रहा
त् ॥ नर्मदातटमाश्रित्य प्रचचार ततः परं ॥ १६ ॥ ततः कतिपयाहोभिर्भर्गोदृग्गोचरोऽभवत् ॥ प्रसादात्तस्य
देवस्य जातः पूतो हुताशनः ॥ १७ ॥ पुनः स्थानं निजं प्राप निर्दोषः सर्वभक्षणे ॥ स्थापयित्वा महेशानं पूजयि
त्वा स्वनामतः ॥ १८ ॥ शिवाद्धुव्यधवरो वन्हिः स जगामेप्सितां गतिं ॥ तत्र तीर्थे नरः स्नात्वा पूजयित्वा महेश्वरं
१९ ॥ स यज्ञफलमाप्नोति अग्निष्टोमातिरात्रयोः ॥ अग्निप्रवेशं यः कुर्यात्स गच्छेदग्निसाम्यतां ॥ २० ॥ तत्र स्ना
त्वा तु यः कुर्याच्छ्राद्धं संतर्प्य देवताः ॥ पितॄणामतर्पणी भूत्वा स याति परमं पदं ॥ २१ ॥ वन्हिसक्तं जपेयस्तु
तत्र स्नात्वा समाहितः ॥ कृत्वा तिलाज्यहोमं च स्वशक्त्या भरतर्षभ ॥ २२ ॥ न भवेत्तस्य दारिद्र्यं गच्छेद्व
न्हिसलोकतां ॥ २३ ॥ इति श्रीरेवा० ॥ अग्नितीर्थं ॥ ॥ मार्कंडेय उ० ॥ तस्यैवानंतरं पार्थ कौबेरं तीर्थमुत्त
मं ॥ धनुःशतत्रयस्याद्दूरं तरे वन्हितीर्थतः ॥ १ ॥ कुबेरो यत्र संसिद्धो यक्षाणामधिपः पुरा ॥ परिभ्रम
न्वने पार्थ तेजस्वी रूपवान्युनी ॥ २ ॥ कस्याश्रमे क्वचिद्दृष्ट्वा मुनिपत्नीं रहोगतां ॥ स धीतां च परिघृत्य
तथा शप्तः स कुष्ठवान् ॥ ३ ॥ मदांधः स यौवनमदाद्दोषं प्राप कुबेरजं ॥ कुबेर इति संज्ञां च लब्धवान्लघु
तां तथा ॥ ४ ॥ सा संप्रसादिता तेन ऋषिपत्नी तपस्विनी ॥ तया च तपसा सिद्धिरित्युक्तो नरवाहनः ॥ ५
ब्रीडितः प्राप तत्कालान्नर्मदातीरमुत्तमं ॥ तपश्चचार विपुलं यक्षेशः संगमांतिके ॥ ६ ॥ कालेन महा
ता तस्य तपसा तोषितस्तदा ॥ रेवोपकंठे श्रीकंठः प्रत्यक्षः प्राह गुह्यकं ॥ ७ ॥ ब्रूहि यक्ष प्रसन्नोऽस्मि त
पसा तव सुव्रत ॥ वरं ब्रूहि महाभाग यत्ते मनसि वांछितं ॥ ८ ॥ कुबेर उ० ॥ जय रुद्र जगन्नाथ सर्वपाप

297
2008

रे॰ खं॰ क्षयंकरं ॥ वरं दास्यामि चेन्मत्तस्त्वं वरार्हो यद्यहं मतः ॥ ९ ॥ तारूप्यमदसंप्राप्तं प्रकारं कुत्सितं त्विदं ॥ नंदीशं नाशयापि त्वामे सु
१४८ रूपं कुरु मां पुनः ॥ १० ॥ त्वया सत्यं त्वमित्थं पमाधिपत्यं निधिपः ॥ प्रतिजन्म तथादेव त्वयि भक्तिः स्थिरास्तु मे ॥ ११ ॥ यत्र
मे तपसः सिद्धिस्तत्र संनिहितो भव ॥ मम नाम्ना महेशान लोकानां वांछितप्रदः ॥ १२ ॥ इति संप्रार्थितो देवः कुबेरेणापि स्वना
मतः ॥ वरान्प्राप्य महेशाच्च ययौ पार्थ यथागतं ॥ १३ ॥ तदाप्रभृति विख्यातं कौबेरं तीर्थमुत्तमं ॥ तत्र तीर्थे नरः स्नात्वा स
मभ्यर्च्य जगद्गुरुं ॥ १४ ॥ उमया सहितं भक्त्या सर्वपापैः प्रमुच्यते ॥ तत्र तीर्थे च यः प्रातः प्रदद्यात्कांचनं नृप ॥ १५ ॥
विप्राय तत्त्वमध्यस्थः सत्यभेदस्य यं पनं ॥ दधिस्कंदे मधुस्कंदे नंदीतीर्थे वारुणे तथा ॥ १६ ॥ आग्नेये यत्फलं पार्थ स्नात्वा तत्
फलमाप्नुयात् ॥ नंदिकेश्वरतः पार्थ यावत्कौबेरमुत्तमं ॥ १७ ॥ कोशमात्रांतरे प्रोक्तं मया ते तीर्थपंचकं ॥ तेषु यामा
नुषा लोके धन्याः पूर्णमनोरथाः ॥ १८ ॥ ये स्नुहृष्टं महापुण्यं एतद्वै तीर्थपंचकं ॥ ते भास्करेण पश्यंति नते पापमयात
तना ॥ १९ ॥ यांति तत्परमं लोकं भास्करस्य सुखोज्वलं ॥ भास्करादीश्वरं लोकं यावदिंद्राश्चतुर्दश ॥ २० ॥ ततः स्वर्गा
च्युतः सोपि राजा भवति धार्मिकः ॥ रोगदुःखविनिर्मुक्तो भुनक्ति सकलां महीं ॥ २१ ॥ कुले तस्य भवेत्सार्थं त्रिवर्गावि
च्छिन्नं वंशे सतं ॥ अखंडितः प्रतापस्यान्नर्मदातीरसेवनात् ॥ २२ ॥ गंगा कनखले पुण्या कुरुक्षेत्रे सरस्वती ॥ ग्रामे वा
यदि वारण्ये पुण्या सर्वत्र नर्मदा ॥ २३ ॥ रेवातीरे वसेन्नित्यं रेवातीरं सदा पिबेत् ॥ स्नातः सर्वतीर्थेषु सोमपानं दि
ने दिने ॥ २४ ॥ गंगाद्याः सरितः सर्वाः समुद्राश्च सरांसि च ॥ कल्पांते संक्षयं यांति न नर्मदैका सक्षेदा या ॥ २५ ॥ इति श्री
रेवा॰ कुबेरतीर्थं नाम ॥ ॥ मार्कंडेय उ॰ ॥ ततो गच्छेत राजेंद्र नर्मदादक्षिणे तटे ॥ सिंधेश्वरान्नक्रोशमात्रे कपितीर्थ
मनुत्तमं ॥ १ ॥ हनुमंतेश्वरं नाम तापत्रयविनाशनं ॥ ब्रह्महत्याहरं तीर्थं नाख्यातं कस्यचिन्मया ॥ २ ॥ युधिष्ठिर उ॰ ॥
हनुमंतेश्वरं विप्र कथं जातं वदस्व मे ॥ ब्रह्महत्याहरं तीर्थं रेवादक्षिणसंस्थितं ॥ ३ ॥ मार्कंडेय उ॰ ॥ साधु साधु मा १४८
हाभाग सोमवंशविभूषण ॥ गुह्याद्गुह्यतरं तीर्थमगण्यगुणगुंफितं ॥ ४ ॥ तव स्नेहात्प्रवक्ष्यामि शृणुष्वैकाग्रया

भर्गां ॥ पुलस्त्यो ब्रह्मणः पुत्रो विश्रवास्तस्य चात्मजः ॥ ५ ॥ रावणस्तस्य पुत्रोभूद्दशास्यो ब्रह्मराक्षसः ॥ त्रिलोकविजयी जातः प्रसा 294/2008
दाद्ब्रह्मणः पुरा ॥ ६ ॥ गीर्वाणा विजिताः सर्वे त्रैलोक्यं परिपीडितं ॥ नारदाद्गीतिमश्रुत्वा जमहिम्नान्नद्विपतः ॥ ७ ॥ सूर्यवंशोस्य
यं ततो विष्णुर्दशरथात्मजः ॥ स सलक्ष्मणपितास सकलौघविनाशनः ॥ ८ ॥ सीतां रामोपयेमे स परस्य स्वयं जानकीं नृप ॥ स
वनं भ्रातृभार्याभ्यां पितृवाक्याद्वने वसत् ॥ ९ ॥ चतुर्दशसहस्राणि रक्षसां महतां रणे ॥ रक्षसा रावणेनाथ लंकाद्वीप
निवासिना ॥ १० ॥ तेन चैव वनात् रामस्य गृहिणी हृता ॥ विभीषणेन सभ्रात्रा कुंभकर्णेन रावणः ॥ प्रसह्य बोधितेः पत्न्या
मंदोदर्या च भारत ॥ लज्जितो ब्रह्मवंशोत्थ तिमिरं रक्षःकुलांतकः ॥ १२ ॥ परभार्यां तथा मा स्प्रांकीमिं च मुंचाशु जानकीं ॥ वर्जितः का
लेऽर्थिर्यतः स रामेण निर्जितः ॥ १३ ॥ रामोपि रामचंद्रेण सीता तीर्णो बभाषत ॥ सत्यं दशगुणं श्रुत्वा हृता येन स्वराचयः ॥
१४ ॥ क्षणात्तु बद्धसाहस्रात्तस्य संख्येव कथं तपः ॥ एवं तैः सन्निविष्टो पि न मुमोचाहृतां सतीं ॥ १५ ॥ ततो भद्रां मचंद्रस्य वा
नरैः सह संगतं ॥ तेऽन्वर्थं वनेतोत्सुग्रीवादिभिरावृतः ॥ १६ ॥ सुग्रीवो हनुमांश्चैव जांबवान्कुमुदोंगदः ॥ नलनी
लसुखेनाद्याः सर्वे रामेण संगताः ॥ १७ ॥ तैर्वानरैस्तथा ऋक्षैः कोटिभिर्बहुभिर्वृतः ॥ रामः सलक्ष्मणः तूर्णं गत्वा लंकां
महापुरीं ॥ १८ ॥ युद्धं कृत्वा बहुदिनं हत्वा रक्षांसि भूरिशः ॥ छित्वा दशशिरांस्याशु हतवान् रावणं मृधे ॥ १९ ॥ संबंधेन तस्य
रामस्य कृतं वैरं हनूमता ॥ जानकी प्रदत्ता भग्नं वनं रक्षोगणा हताः ॥ २० ॥ लंका सर्वा विनिर्दग्धा गंधवाहसुतेन वै ॥ राव
णस्य सुतः संख्ये हतश्चाक्षकुमारकः ॥ २१ ॥ पार्थ किं बहुनोक्तेन रामायणकरः कपिः ॥ हनुमानेव वीरेणोन तुल्यस्तस्य
कश्चन ॥ २२ ॥ काभ्रंद्रा मस्य रामत्वं जीवितं लक्ष्मणस्य च ॥ जीवितं कपिसंघस्य कृतवांश्च मारुतिर्विना ॥ २३ ॥ एवं रामा
यणं वृत्तं सीता मोक्षकृतं मतिः ॥ अयोध्यामगमद्रामो हनुमत्प्रमुखैर्वृतः ॥ २४ ॥ तदा रेवातटं प्राप्य दक्षिणं पुण्यलक्ष
णं ॥ तपस्तेपे यथापूर्वं मयोक्तं तव भारत ॥ २५ ॥ अनुमान्य तदा रामो हनुमान्वानरो नमः ॥ तापप्यं कपिचापल्यं तपसा
किं भमति च ॥ २६ ॥ कैलासमगमत् गच्छन्नमस्कर्तुं महेश्वरं ॥ तिष्ठ तिष्ठेति तत्रोक्तो नंदिना वानरर्षभ ॥ २७ ॥ ब्रह्महत्यापु

तत्त्वं हि ब्रह्मरक्षो वधेकृते ॥ महेश्वरसभा पुण्या न गम्या त्वद्विधैः कपे ॥२८॥ हनुमानुवाच ॥ स्वामिकार्यप्रवृत्तानामादिष्टानां
बलीयसा ॥ रक्षसां नाशने स्यात्कथं दोषः किं न दिश भाषसे वचः ॥२९॥ नंद्युवाच ॥ रक्षो न दोषभागी स्यादीदृक्कृत्यं पतत्यनु कपे ॥
तद्वधेति त्वयाद्य यन्नेषत्रास्त्वस्य निषण्णय ॥३०॥ निर्जीदरदर्नितं सदसत्कर्मणा नरैः ॥ रक्षना मम माश्रितस्य भर्तव्येति
तवाज्ञायः ॥३१॥ नैवमुक्तं निरुक्तं ते कपे न मलयेवकृ ॥ लोकद्वयहरं कर्म न कर्तव्यं विपश्चिता ॥३२॥ रक्षसा तापितभारोपि
कर्मणः फलभाक्प्रभुः ॥ अंशभागी भवेद्दूत्यस्तत्रापि कपिसत्तम ॥३३॥ हनुमानु॰ ॥ नंदिन्कमप्युपायमेव दपापो पत्नागति
दं ॥ पापोहं पूर्वगोयस्मात्संजातः प्रथमोत्तमः ॥३४॥ तत्रापि भक्षभावेन विज्ञो पापस्यापमर्जितं ॥ पापं कुर्वन् हि पापात्मा पा
पमेवाश्नुते फलं ॥३५॥ पुण्यं कुर्वन् हि पुण्यात्मा पुण्यवानिह जायते ॥ नंद्युवाच ॥ नीलीपापोपस्रां स्वर्धेउपायं श्रणु वानर
॥३६॥ रुद्रदेहो द्रुवा पुण्यान् श्रुतो भूतले त्वया ॥ श्रवणात्तन्मजनितं कीर्तनाद्द्विजन्मजं ॥३७॥ त्रिजन्मजनितं पापं
नश्येद्वा गोवैहनात ॥ तस्मात्त्वं नर्मदातीरं गत्वाचर विपुलं तपः ॥३८॥ कुरु षतीर्थसेवां च शिवभक्तिपरायणः ॥ मार्कं
डेय उ॰ ॥ जगत्प्राणसुतोपीदं नंदिनोक्तं निशम्य च ॥३९॥ आयातो नर्मदातीरं यत्र रामोप्यवस्थितः ॥ रामात्क्रोशांतरे
स्थित्वा चकार पुरवत्स्थितं ॥४०॥ कपिस्थितिपुरं नाम ततः प्रभृति भारत ॥ तत्रातेपे तपस्तीव्रं हनुमानंजनीसुतः ॥४१
ध्यायमानो विरूपाक्षं त्रिशूलधरमीश्वरं ॥ व्यालबद्धजटाजूटं नागयज्ञोपवीतिनं ॥४२॥ भस्मोपचितसर्वांगं डमरु
ध्वनिमंडितं ॥ सोमं सोमाग्निवत्सोमनेत्रोग्वरं गंकरंप्रियं ॥४३॥ वत्सरान्सुबहून्न्यात्वा ध्यायन्वैतद्भृतः कपिः ॥ तत
स्तुष्टो महादेवः पार्वत्या सहितोभ्ययात् ॥४४॥ उवाच नंदनंमंतं मेघगंभीरया गिरा ॥ साधु साधु कपे ब्रूहि कष्टं वत्स
त्वयाकृतं ॥४५॥ न वानर त्वया पापं कृतं राक्षससंक्षये ॥ स्वामिकार्यरतस्त्वं च भृत्योसि मम दर्शनात् ॥४६॥ हनूमांश्च
हरं दृष्ट्वा सोमं वरदमागतं ॥ साष्टांगं प्रणतो भूत्वा तुष्टाव वृषकेतनं ॥४७॥ जय शंभो जयानीय जय चांधकसूदन ॥ १४९
जय भक्तपतेनाथ जय भैरवशासन ॥४८॥ जय कामरिपो वंद्य त्रिपुरप्रगणप्रिय ॥ जय गंगापराज्ञे पत्रिशूलध

रांक ॥४९॥ जयागण्यगुणाक्रांत भुवनैकसुराश्रय ॥ गौनसारि गदैदर्पहर्षहो पार्वतीगिरजाधर ॥५०॥ सद्विषो पनिषद्रू
पमुंडमालाविभूषण ॥ नमः पितृवनावासभक्तानां मंगलप्रद ॥५१॥ नमो वृषभवाचिताश्व सने नागविलालय ॥ नमः कै
लासनिलयानेकैकपुरनिष्कल ॥५२॥ नमः कैतवरूपाद्रिज्ञानुपुत्रप्रियंकर ॥ महीरथाणिमायष्टाम्बद्धनाथाविषापह
५३॥ नमः परमनिर्वाणकारणाग्निविलोचन ॥ विधिविद्रावणानेकवियोपनिषदाहित ॥५४॥ नमः कर्पूरगौरांग सांगवे
दवपुर्धर ॥ विष्णुचित्ताहितेकात्मन् गुणातिगमनोस्तुते ॥५५॥ अहंनविन्नितिचित्रं चरित्रं चलचेतसा ॥ कथं स्तोमि कपि
त्वाद्यवेसु ब्रह्मादिपिनक्षमः ॥५६॥ कपेर्यं कच मे बुद्धिः कावाणी शास्त्रसंमता ॥ क्व च मे तद्गुणग्रामपरिज्ञानं महेश्वर ॥५७
किंतु याहग्विसृष्टोहं त्वया रूपं च मे यथा ॥ तेन भक्त्यानुसारेण केवलं प्रणमामि ते ॥५८॥ एवं स्तुतो महादेवो वानरेणा
ब्रवीद्वचः ॥ वरं प्रार्थय मे पुत्र जगत्प्राणसुतेप्सितं ॥५९॥ मत्प्राणसुतपुत्र त्वं तुष्टस्तोत्रेण तेनघ ॥ हनुमानु॰ ॥ ब्रह्म
त्वस्त्रसविश्वं विष्णुत्वं पासि लीलया ॥६०॥ रुद्रत्वे संहरस्येव त्वमेवान्यो न कश्चन ॥ एकस्त्वमखिलाधारो जगत्
लोकविलातिगः ॥६१॥ अहो भाग्यमिदं मन्ये यन्मे तुष्टः सनातनः ॥ यदि तुष्टोसि देवेश वराहों यद्यहं मतः ॥६२॥ ब्र
ह्मरक्षोवधाज्जातपातकात्सरि मोचय ॥ निःपापोहं यथा देव भवेयं मां तथा कुरु ॥६३॥ त्वमनातिष्ठमन्नाम्ना रेवाती
रवरप्रद ॥ आकल्पं कल्पितान्नाथ तीर्थे तीर्थमिदं श्रितः ॥६४॥ महेश्वर उ॰ ॥ भो वत्स त्वच्छभविनतोपितो हं त्वयानघ ॥
नुस्याप्रणुत्या भक्त्या च भीत कपिकुलोत्तम ॥६५॥ नर्मदार्थमाहात्म्याध्यानयोगप्रभावतः ॥ मन्मूर्तिदर्शनाच्चापि
निःपापस्त्वं न संशयः ॥६६॥ अन्यं च ते प्रयच्छामि वरं वानरपुंगव ॥ उपकाराय लोकानां तं शृणुष्व समाहितः ॥६७॥
नामानि तव लोकेस्मिन्यो नरः कीर्तयिष्यति ॥ नार्वद्घ्नःश्वापि नारोगः सर्वं प्राप्नोति वांछितं ॥६८॥ हनुमानंजनी
सूतो वायुपुत्रो महाबलः ॥ रामेष्टः फाल्गुनसखः पिंगाक्षोमितविक्रमः ॥६९॥ उदधिक्रमणश्चैव दशग्रीवस्य
दर्पहा ॥ लक्ष्मणप्राणदाता च सीताशोकविनाशनः ॥७०॥ तेजस्वी सर्वविद्याध्यक्ष्य सुग्रीवसचिवाग्रणीः ॥ जीवनः

301
2008

रे·खं· कपिवंशानांश्री मानरसः कुलांतकः॥ ७१॥ नामाष्टदशकं चैतत्प्रातःसायं च यः पठेत्॥ सर्वत्र सर्वकार्येषु सकदा
९५० चिन्महीयते॥ ७२॥ ईश्वर उ०॥ तथा त्वया कृतं स्तोत्रं ये पठिष्यंति मानवाः॥ श्रोष्यंति च महापुण्यं मम प्रीतिविवर्धनं॥ ७३
मत्प्रसादात्सदा तेषां न भाव्यं भविता क्वचित्॥ आरोग्यं धनसंपत्तिः संतानं चापि संततं तथा॥ ७४॥ सुखसौभाग्यमतुलं
तस्याव्ययं भविष्यति॥ अत्र तीर्थे तव प्रीत्या स्थास्येऽहं वायुनाकुलः॥ ७५॥ कपिकामप्रदो नित्यं यावदाभूतसंप्लवं॥ इत्यु
क्त्वांतर्दधे देव उमया सह शंकरः॥ ७६॥ हनुमोऽपि हरं तत्र स्थापयामास भक्तितः॥ आत्मयोगबलेनैव ब्रह्मचर्य
स्वभावतः॥ ईश्वरानुग्रहाच्चापि स्थापितः कामदः शिवः॥ अद्यापि यत्र तत्रैव नाम्ना सततिवर्जितः॥ ७८॥ मा
र्कंडेय उ०॥ हनुमंतेश्वरे राजन् प्रत्यक्षं प्रत्ययं शृणु॥ यद्वृत्तं द्वापरस्यांते त्रेतांते नुनराधिप॥ ७९॥ सुपर्वा नाम रा
जा वै बभूव वसुधातले॥ तस्य राज्ये सदा सौख्यं नरादीघौ पुष्पस्तथा॥ ८०॥ सुपुत्रा धनयुक्ताश्च सर्वोपद्रववर्जि
र्जिता॥ सुपर्वणः सुतश्चासीत् शतबाहुरभून्नृप॥ ८१॥ आसन्को सौ सदा कालं पापर्द्धिविषये नृप॥ क्रीडते पृथिवी
सर्वां पर्वतांश्च वनानि च॥ बधार्थं मृगयूथानां आगतो विंध्यपर्वते॥ नानातरुसमाकीर्णे गजयूथसमावृते॥
८३॥ सिंहचित्रकशोभाढ्ये मृगशूकरशोभिते॥ भ्रमितापर्वते राजा रेवायामागमत्तदा॥ ८४॥ समारूते वने प्रा
प्तः सार्धक्रोशप्रमाणके॥ न्यग्रोधाश्वत्थनिंबबिल्वकदंबबकुलान्विते॥ ८५॥ पलाशानि बजंबीर करंज खदिरैस्त
था॥ कर्कंधुपाटलाम्लैश्च शामितिंदुकशोभिते॥ ८६॥ हंससारसचक्रैश्च समतात्परिशोभिते॥ नारिकेलर
मद्राक्षाकृष्णपक्षक्षिनस्यतु॥ वनमध्ये यदा प्राप्य भ्रमंतं पिंगलं द्विजं॥ तं पृष्टकर्कराजाचापस्या दवद्द्विजं॥
८८॥ शतबाहुरु०॥ एकाकी त्वं वने कस्मात् भ्रमसे पुस्तिकाकरः॥ दृष्टश्चैतो निराक्षन्ये वद सत्यं द्विजोत्तम॥ ८९॥ वि
प्र उ०॥ कन्याकुब्जात्समायातः प्रविष्टो राजकन्यया॥ अस्थिक्षेपाय वै राजन् हनुमंतेश्वरे जले॥ ९०॥ राजोवा ९५०
च॥ अस्थिक्षेपो जले कस्य हनुमंतेश्वरे द्विज॥ क्रियते केन कार्येण कौतुकं कथ्यतां मम॥ ९१॥ दृष्टकालपरितो

यानं सत्कारमां प्रणम्य च॥ कृतांजलिपुटोऽभूत्वा ब्राह्मणाश्च नरेश्वर॥ ९२॥ समाहितः स्थितस्तत्र श्रोतुं विप्रमुखो 303/2008
क्तं॥ विप्रः प्रोवाच तत्सर्वं यद्वृत्तांतं पुरातनं॥ ९३॥ ब्राह्मण उ०॥ शिखंडी नाम राजा वै कन्याकुब्जेश्वरो नृप॥ तस्याः
पुत्रस्य भूपाल कन्या जातोपयाचितैः॥ ९४॥ जातिस्मरा सुता सा च नर्मदायाः प्रभावतः॥ पित्रा च सकदा सा च विवाहाय
प्रकल्पिता॥ ९५॥ पुत्र्य पुत्रस्य मे त्वं हि जाता रूपगुणान्विता॥ अस्मिन्नसारे संसारे कन्यादानं करोम्यहं॥ ९६॥ श्वः कृत्यम
द्य कुर्वीत पूर्वाह्णे चापराह्णिकं॥ नहि प्रतीक्षते कालः कृतं चास्य न वाकृतं॥ ९७॥ कन्या उ० सुता वाक्यादसौ राजा वि
स्मयाविष्टचेतनः॥ पुत्री किं कर्तुकामे मंद्रातिचिंतामवाप च॥ ९९॥ अस्मिन् काले त्वहं त्विष्ठ तात त्वं द्रष्टुमिच्छ दा॥ सां
प्रतं नाहमिच्छामि वरपाणिग्रहं पितः॥ ९८॥ विप्र उ०॥ शिखंड्युवा॥ कथ्यतां मे महाभागे किं त्वया तन्मनोरथं॥ पित्रवा
क्यं न माचाल्या विह स्यप्रणता भुवि॥ १००॥ कथयामास यद्वृत्तं हनुमंते पुरास्थिते॥ कन्योवाच॥ कलापिनी त्वहं तात पु
ना भर्त्रा च वसे सदा॥ १॥ उरसं गमतः पूर्वं रेवाया दक्षिणे तटे॥ हनुमंतेश्वरे नित्यं पूर्वं विहरामि यदृच्छया॥ २॥ भर्त्रा सह हृष्ट
मुमार त्रस्ये सरले नगे॥ आगता लुब्धकास्तत्र शुष्यान्ती वनमुत्तमं॥ ३॥ भर्तृपार्श्वगता दृष्टा पापैस्तैर्हृष्टमानसा॥ पाशा
बंधं समादाय बद्धाऽहं पतिना सह॥ ४॥ ग्रीवा भंगं चैव दुष्टाश्च कुः पिच्छा वन्यं च तं॥ वह्नौ तदा च मां मां संपचि प्रच्यात्मानं
व्यधुः॥ ५॥ तत्र रात्रौ सुखं सुप्ता गता स्ते शर्वरीक्षये॥ प्रभाते मांसचोपं तज्जं युक्तेर्न्न प्रबायसे॥ ६॥ मखरौ गो द्रुचंचा
स्थि स्नायु मांसेन संयुतं॥ गृहीत्वा न क्रुद्धकः को विगमं चास पातह॥ ७॥ सामिषं त्राकुनिं दृष्ट्वा तदैवान्ये च पक्षि
णः॥ संमत्तकलहं चक्रु रामिषार्थं न पोत्तमः॥ ८॥ मिथो विवादितेपात दस्थिखंडं पपात ह॥ विहंगानां धावतां वै
व पश्यतो॥ ९॥ पतितं नर्मदातोये हनुमंतेश्वरे नृप॥ मदीयमस्थिखंडं तद् यावि हृदि मध्यगं॥ ११०॥ प्रभावा
त्तस्य तीर्थस्य जाताहं तव पुत्रिका॥ कन्याभव्यर्थं हि दशाशार्वं द्रसुनिर्मला॥ ११॥ जातिस्मरा पर्मपराती तीर्थस्या
स्य प्रभावतः॥ तस्माद्विवाहं नेच्छामि सम भर्ता यतो भवन्॥ १२॥ विपमे वर्तते याविन्नाकुंतमृगजातिषु॥

रे.खं. तस्यास्थिशेषं गतं हनुमत्तीर्थे हि वर्तते ॥ ११ ॥ ततस्ते पणार्थं तातायमेष यस्त्वाहि तीर्न मं ॥ कथयिष्यामि तानेये
१८९ नतस्य मतिर्भवेत् ॥ १२ ॥ एतत्ते सर्वमाख्यातं कारणं परमं नृप ॥ श्रुत्वं मद्दुर्लभं तत्त्वं लब्धं योनविष्यति ॥ १५ ॥ अथ प्र
स्थाप्य तां कोपिन मंद्वात्तरमादरात् ॥ तस्याविक्षयिष्यामि स्थानं विन्हे स्तुलक्षितं ॥ १६ ॥ विप्र उवाच ॥ शिवविंशात च सा च
यैश्रुत्वा पुत्री च वत्सदा ॥ अपितीन र्मदा तीरे हनुमतेश्वरे सह ॥ १७ ॥ यामान विंशति दास्यामि रेवातीरं अतद्विज ॥ इति
तां प्रत्युवाचोहं संदिष्टः कन्यया तथा ॥ १८ ॥ कन्योवाच ॥ गच्छ त्वं नर्मदा पुण्यं विप्रसर्वापनाशिनी ॥ आनेयां सोमनाथस्य
हनुमतेश्वरं परं ॥ १९ ॥ अर्धकोशोत्तरे वापांतिलोर्जोवरुपादपः ॥ करंतः कुरु तत्रैव संनिधाने वटस्य च ॥ २० ॥ न्यग्रो
धमूलसांनिध्ये सस्थास्थानि दृश्यति ॥ मत्स्यना सह संगत्य व्रतं रोवाज तद्दिन ॥ २१ ॥ आश्विनस्य सिते पक्षे त्रि पुरांत
स्तु वेति थौ ॥ स्नापयित्वा शिवं भक्त्या रात्रौ तं कुरु जागरं ॥ २२ ॥ प्रगे च प्रक्षिपः श्रीधं नाभिमात्रे जले स्थितः ॥ इत्या
में हि जन्मेष्ठ विमुक्तिस्तस्य जायते ॥ २३ ॥ क्षिप्त्वास्थानि पुनः स्नानं कर्तव्यमघनाशनं ॥ एवं हि सुगतिस्तस्य
द्विज वर्यभविष्यति ॥ २४ ॥ कथितं कन्यया यत्तत्सर्वं पुस्तके कृतं ॥ आगतोहं ततो भक्तार्थं स्निन्मल नाश
नं ॥ इत्युक्त्वा तेन राज्ञा च सममस्थिरो व्योलोकयन् ॥ अभिज्ञानं च तं दृष्ट्वा वास्थानि प्रगत्य च ॥ २५ ॥ प
रोक्तेन विधानेन प्राक्षिपन्नर्मदाजले ॥ पुष्पवर्षं पपाताशु साधु साध्विति वन सुराः ॥ २७ ॥ विमानं च
ततो दिव्यमागतं शिविनं प्रति ॥ स च दिव्यतनुर्भूत्वागतः स्वर्गं नृपोत्तम ॥ २८ ॥ एवं तु प्रत्ययं दृष्ट्वा
हनुमंतेश्वरं नृप ॥ जनानां करुविज्ञातः शतबाहुर्नरेश्वरः ॥ २९ ॥ आत्मानं शोषयामास शिवा
राधनतत्परः ॥ ध्यायन् सर्वेश्वरं देवं शतबाहुः सुनिश्चितं ॥ १३० ॥ मासार्धेनास्य जेहे संनर्मदांभ
सि नृपिपः ॥ तस्याप्सरोगणोवृत्तं विमानं चागतं तदा ॥ ३१ ॥ तानि रुक्मे महाराज विमानारोहणं कु १८९
रु ॥ शतबाहुरुवाच ॥ नयामि स्वर्गमार्गेण विप्रो यावद्दिहस्थितः ॥ ३२ ॥ उपदेशप्रदो मत्संगु

रुरेषद्विजोत्तमः ॥ अप्सर उवाच ॥ लोभः प्रतिष्ठा पापस्य प्रसूतिर्लोभ एव च ॥ ३३ ॥ लोभाद्वृत्तोयं विप्रो लोभात्पाप 305/2008
स्य संचयः ॥ हनुमंतेश्वरे राजन् ये मृताः सत्यमाश्रिताः ॥ ३४ ॥ ते प्रयांति श्वरे लोके सर्वपापक्षयंकरे ॥ नैव
पापक्षयोस्यस्य ब्राह्मणस्य नरेश्वरः ॥ ३५ ॥ गृहं च गृहिणी ग्रामा हृतं ते ब्रह्मणाशये ॥ शतबाहुस्ततो वि
प्रमुवाच प्रहसन्निव ॥ ३६ ॥ सत्यमूलमधर्मस्य लोकतद्धर्मो द्विजोत्तम ॥ इत्युक्त्वा प्रययौ राजा स्वर्गता
भिः समावृतः ॥ ३७ ॥ दिनैः कैश्चिद्गतो विप्रः स्वर्गं चेतानि कैर्वृतः ॥ स बद्दरिकाशि राज्यस्य पुत्रत्तीर्थप्र
भावतः ॥ ३८ ॥ पर्वतन्मप्रभावेन पतितो सावपावृतं ॥ मार्कंडेय उवाच ॥ एतद्वृत्तांतमभवत्तत्कीर्ती
र्थे नृपोत्तम ॥ एतस्मात्कारणात्पुण्यं तीर्थं मतं सदा नृप ॥ वरदानान्महेशस्य प्रभावाच्च हनुमतः
१४० ॥ महात्म्यान्नर्मदायाश्च सर्वतीर्थोत्तमोत्तमं ॥ अष्टम्यां च चतुर्दश्यां सर्वकालं युधिष्ठिर ॥ ४१
विशेषश्चाश्विने मासि कृष्णभूतादिने नृप ॥ स्नापयेदीश्वरं भक्त्या क्षौद्रक्षीरेण सर्पिषा ॥ ४२
दध्ना शर्करया पार्थ कुंभेस्तीर्थांभसा भृतैः ॥ श्रीखंडेन तु शुभ्रेण विलिप्य परमेश्वरं ॥ ४३ ॥ सु
गंधैर्विविधैः पुष्पैर्बिल्वपत्रैश्च पूजयेत् ॥ कुंदेन मुचुकुंदेन कुसुमैः कुशकाशजैः ॥ १४४ ॥ अर्को
न्मत्तमुनिब्रह्मतरुपुष्पैरुत्तरूवैः ॥ पूजयेत्परया भक्त्या हनुमंतेश्वरं नृप ॥ १४५ ॥ घृतेन बोध
येद्दीपं तिलतैलेन वा पुनः ॥ रात्रौ जागरणं कृत्वा गीतवाद्यकथानकैः ॥ १४६ ॥ स्नात्वा प्रभाते
विमले श्राद्धं कुर्यात्प्रयत्नतः ॥ पितृनुद्दिश्य कामस्तु ब्राह्मणो वेदपारगः ॥ १४७ ॥ ब्रह्मलक्ष
णसंपूर्णः कुलजो गृहशालिभः ॥ तांश्चैव पूजयेद्भक्त्या वस्त्रान्नकनैरपि ॥ १४८ ॥ नरकस्थादि
वं यातु पितरश्चित्कृदीरयन् ॥ स्वर्गस्थाः परमं लोकमिच्छन्ता प्रणमेद्द्विजान् ॥ ४९ ॥ पतितानव
र्जयत्सार्थं वृषलीपतिकानपि ॥ स वृषं यः परित्यज्य वृषेरन्येनृपायतं ॥ ५० ॥ वृषली तां विदुर्देवानश्च

वृषली भवेत्॥ ब्रह्महत्यादि पापानि मित्रद्रोहादिकानि च॥५१॥ हनुमंतेश्वरं पार्थ नश्यंती स ब्रवी
त्विवः॥ वाकृपलापेन किं पार्थ बहुनोक्तेन सांप्रतं॥५२॥ सर्व पाप युतो वापि दद्याद्दानं द्विजोत्तमे॥ गो
दानं च प्रकर्तव्यमस्मीत्तीर्थे विशेषतः॥५३॥ गोदानं हि यतः पार्थ सर्वदानादिकं स्मृतं॥ व्रततीर्था
दिपुण्यानां सर्वसंपूर्णतारकं॥५४॥ कृच्छ्रादिनियमानां च सिद्धिसंपादकं परं॥ सर्वदेवमया गा
वः सर्वदेवास्तदात्मकः॥५५॥ समासात्कथ्यते पार्थ गवामंगाधिदैवतं॥ शृंगाग्रयोर्महीपाल
शक्रो वसति नित्यशः॥५६॥ उरस्कंदः शिरो ब्रह्मा ललाटे वृषवाहनः॥ चंद्रार्कौ लोचने देवी जि
ह्वा देवी सरस्वती॥५७॥ मरुद्गणास्तथा संध्या दंतानाश्रित्य वैश्रिताः॥ हुंकारे चतुरो वेदाः सष
डंगपदक्रमाः॥५८॥ ऋषयो रोमकूपेषु यस्या देव्या महत्तराः॥ दंडहस्तो महाकायः कृष्णो महि
षवाहनः॥५९॥ पृष्ठवंशाश्रितो यस्याः शुभश्च भनिरीक्षकः॥ चत्वारः सागराः पुण्या यस्यो धस्त
न संश्रिताः॥६०॥ विष्णुपादोद्भवा गंगा दर्शनात्पापनाशिनी॥ प्रस्रवे चाश्रिता यस्याः सा धेनुर्विश्व
वंदिता॥६१॥ गोमये चाश्रिता लक्ष्मीः पवित्रा सर्वमंगला॥ गोमयालेपनं तस्मात् दर्शनं स्पर्शनं शुभं॥६२
गंधर्वाप्सरसो नागाः खुराग्रेषु च संस्थिताः॥ विष्णुः पुच्छं च तीर्थानि योनौ मरुत्त्वाश्रितानि च॥६३॥ अश्विनौ
च तथा कर्णौ शृंगमध्ये प्रजापतिः॥ पृथिव्यां सागरांतायां यानि तीर्थानि भारत॥६४॥ तानि सर्वाणि जानीया
द्गवां मध्ये तु नित्यशः॥ युधिष्ठिर उ॰॥ सर्वतीर्थमया धेनुर्गीर्वाणैः समलंकृता॥६५॥ एतन्नकथय मे तात क
स्माद्गावः श्रिताश्च नैः॥ मार्कं उ॰॥ सर्वदेवमयो विष्णुर्गावो विष्णुशरीरजाः॥६६॥ देवास्तद्देहजास्तस्मात्क
ल्पिता बहुधा जनैः॥ गवां हि बहुधो सति तां शृणुष्व नराधिप॥६७॥ श्वेता विष्णुसमीपस्था क्षीराब्धिमथ १५२
नोद्भवा॥ रक्ता सर्पसमुद्भूता पाटला वन्हिसंभवा॥६८॥ धूम्रा रुद्रोद्भवा नात कृष्णा च यमसंभवा॥ कपिला

सर्वदेवैश्च विष्णुजिष्ण्वार्कपावकैः॥६९॥ दिक्पालैर्लोकपालैश्च ऋषिभिर्ब्राह्मणैः सह॥ सर्वैः संभूय यागार्थं च
न्द्रेरुत्पादिता पुरा॥७०॥ तस्मा सवित्राप स्याच्च कपिला वै विशेषतः॥ यथैवैकादशी पुण्या सिता वाप्यसिता पि
वा॥७१॥ तथा गावः सदा पुण्या नानावर्णाश्च सर्वशः॥ श्वेता वा कपिला वापि किशोरी पांडुनंदन॥७२॥ सवत्सा
च सुशीला च सितवस्त्रावगुंठिता॥ सकांस्यदोहना दिव्या स्वर्णशृंगादिभूषिता॥७३॥ हनुमंतेश्वरस्या
ग्रे भक्त्या विप्राय भारत॥ नियमस्थेन दातव्या आत्मनः श्रेय इच्छता॥७४॥ न समर्थो यमस्तेषां विष्णुरु
द्राभियापितां॥ पुण्यलोकाच्च्युतः सोपि जायते शिवमानसः॥७५॥ विप्रोत्तमकुले जातो विद्वान्विभवसंयु
तः॥ धर्मनिष्ठस्तथा दाता शतवर्षाणि जीवति॥७६॥ सर्वपापहरं तीर्थं हनुमंतेश्वरं नृप॥ श्रवणाद्विमुच्यते पा
पाद्वर्णसंकरसंभवात्॥७७॥ दूरस्थाश्चिंतयन्नित्यं सोपि सद्गतिमाप्नुयात्॥७८॥ इति श्री वायुपुराणे
रेवाखंडे हनुमंतेश्वरतीर्थं॥१३१॥ मार्कंडेय उ॰॥ ततो गच्छेत राजेंद्र एरंडिकेश्वरमुत्त
मं॥ क्रोशांतरस्थितं पार्थ हनुमंतेश्वरान्नृप॥१॥ नर्मदा दक्षिणे कूले सर्वपापक्षयंकरं॥ यस्थापितं जांबु
वता लोकानां हितकाम्यया॥२॥ लंकायां वै पुरा वृत्ते युद्धे वानरराक्षसां॥ रामसीतानिमित्ते तु ऋक्षाणां च
युधिष्ठिर॥३॥ तदा शत्रुजितो युद्धे दिव्यास्त्रक्षतवक्षसः॥ जांबुवत्स्कंदे पेजातो ऽस्य स्त्रव्रणकर्दमकः॥४॥ सं
रुद्धो व्योषधीभिर्यः पनाकास्त्रकृतो व्रणः॥ सराकः पक्षपक्षादौ जायते स्त्यतेपि सन्॥५॥ दुर्गंधः प्रतिमान्या
धर्वं च छत्वा च विशेषतः॥ तेनाक्रांत इहायातो जांबुवान्नर्मदातटं॥६॥ सहितो रामसैन्येन ऋक्षराट् व्रणपी
मान्॥ सत्रं रेवां भासि स्नात्वा शिवं तद्वत्रिवेरणं च॥७॥ सुग्रीवणनील सहितस्तपस्तेपे समाहितः॥ लिंगद्वयं तदा
ताभ्यां स्थापितं तस्य संनिधौ॥८॥ सायं प्रातः प्रतिदिनं स्नात्वा पूजयतीश्वरं॥ ततः केश्चिदहोभिस्तु संतुष्टः स
शिवः स्वयं॥९॥ वरं ददौ जांबुवते व्रणनाशं शिवांगतिं॥ आजन्मसंचितासापाद्विशुद्धिं च महेश्वरः॥१०॥ प्रतिके

307/2008

रे०खं०
१५२

श्वरं नृपश्रेष्ठ कृतो वानरपुंगवैः॥ दृष्ट्वा दुर्गंधयायस्मात्परिक्षिप्तः स जांबुवान्॥११॥ तदा देवा नरैः सर्वैः रुतं पूतिक
संज्ञया॥ ततस्तस्य शरीरं सत्रणं नाशाद्भवत॥१२॥ तत्तीर्थे नरः स्नात्वा निर्व्रणो जायते सदा॥ जांबुवल्लब्धवित्तं हि
गंधपूतिकेश्वरसंज्ञितं॥१३॥ भक्त्या यः पूजयेद्देवं सप्तजन्मानि निर्व्रणः॥ यस्तत्र मनुजो भक्त्या संस्नायात्सांडनंदन॥१४
स याति कामानवाप्नोति अंते याति शिवालयं॥ कृष्णाष्टम्यां चतुर्दश्यां सर्वकालं नराधिप॥१५॥ पर्वपातिनि पाभक्त्यानेतपाति
यमालयं॥१६॥ इति श्रीरेवा॰ पूतिकेश्वरतीर्थं १३२॥ मार्कं॰॥ ततो गच्छेत राजेंद्र सर्वतीर्थोत्तमोत्तमं॥ रेवाया उत्तरे कूले सोम
श्वर इति श्रुतं॥१७॥ आश्चर्यभूतं लोकेस्मिन्नर्मदायां पुरातनं॥ अन्यत्स्नाहरं तीर्थं प्रयागेन समं हितं॥१८॥ युधिष्ठिर उवाच॥ आश्च
र्यं कथ्यतां तात यद्दृष्टं नर्मदातटे॥ प्रयागेन समं कस्मादेतत्कथय मे प्रभो॥१९॥ निमग्नो दुःखसंसारे त्वत्प्रसादान्महामुने
॥युष्मद्वाक्यजलस्नातो लप्स्ये सौख्यं सबांधवः॥२०॥ मार्कं॰॥ साधु साधु महाबाहो सोमवंशविभूषण॥ पृष्टोऽसि दुर्लभं ती
र्थं गुह्याद्गुह्यतरं नृप॥२१॥ सोमनाथमिदं तीर्थं कथयिष्यामि विस्तरात्॥ आदौ पितामहः स्रष्टा सर्वस्य जगतः प्रभुः॥२२
मानसास्तस्य संजाता दश वै मुनिपुंगवाः॥ मरीचिरत्रिरंगिरसौ पुलस्त्यः पुलहः क्रतुः॥२३॥ प्रचेताश्च वशिष्ठश्च भृगुर्नारद
एव च॥ जज्ञेथ चतसो दक्षो महातेजाः प्रजापतिः॥२४॥ दक्षस्यापि तथा जाताः पंचाशत्सुत्रिकाः किल॥ ददौ स दश धर्माय क
श्यपाय त्रयोदश॥२५॥ तथैव स महाभागः सप्तविंशतिमिंदवे॥ रोहिणीनामयास्तासां मभीष्टा शशिनः सदा॥२६॥ अन्या
सां पुत्रिका श्वेला च त्यां दक्षेण चंद्रमाः॥ त्यक्तास्सर्वा सुसाम्यं ते रोहिणीं पनिषेवसे॥२७॥ भविष्यति क्षयी तस्माद्वपुषा मृ-
स त्वरं॥ इति दक्षेण शप्तः स लज्जितः शापपीडितः॥२८॥ क्षयरोगभवं दुःखं दाव वसां तेप्रजापते॥ दक्षशापप्रभावे
न निस्तेजाः शर्वरीपतिः॥२९॥ गतः पितामहं सोमो वेपमानो नृपोत्तम॥ पद्मयोने नमस्तुभ्यं वेदगर्भ पितामह॥
३०॥ त्राहि मां तात देवेश शरणार्थिनमागतं॥ ब्रह्मो॰॥ तेजसां च रसानां च पतिस्त्वं मृगलांछन॥३१॥ त्वमुद्विग्नमना तात सं १५३
जातः केन हेतुना॥ सोम उ॰॥ दक्षशापप्रभावेन पीडितोहं जगत्पते॥३२॥ निस्तारस्तस्य शापस्य कथ्यतां मे पितामह॥

ब्रह्मोवाच॥ देहि दक्षस्य शापस्य दत्ते शापेप्यनुग्रहं॥३३॥ यो वै शापप्रदृश्य स्यात्तेनैवानुग्रहो भवेत् 309/2008
दक्ष उ॰॥ त्वमेव जगतां नाथो मर्यादास्थापकः पुरा॥३४॥ त्वमेव गुरुरस्माकं यथा साधु तथा कुरु॥ ब्रह्मो
वा॰॥ वत्स सोम सम सर्वा भार्या यो न निषेवते॥३५॥ दक्षशापकृतं चिह्नं शरीरात्ते न यास्यति॥ मत्ते च
त्वं पुराप्राप्त पापतापापरं तथा॥३६॥ कुरुष्व नर्मदातीरे यज्ञं योगीश्वरं शिवं॥ तिस्रो गंगाः परिख्याता
ः पृथिव्यां पापनाशनाः॥३७॥ जाह्नवी च वैष्णवी रो जन्मेदा स्यात्सुपुत्रक॥ जाह्नवी मत्तं भवादेवी साक्षा
द्विवरजो रसः॥३८॥ सरस्वती जगद्धाविश्वपापौघनाशिनी॥ भारते मध्य गंगेति प्रोक्ता संगमचा
रिणी॥३९॥ ऋग्वेदो मंद्रवी भक्ता भारते मध्ये वाहिनी॥ तथा दिव्यसरित्सु पुण्या वैष्णवी पापनाशि
नी॥४०॥ विष्णुपादसमुद्भूता रेहस्वयं जनुपापरं॥ त्रैलोक्यचारिणी शक्तिः साक्षाद्धर्मद्रवा विष्णोः
॥४१॥ ख्याता सा सोत्तरगंगेति देवी दैत्यविनाशिनी॥ शृंगारहारः सरितां भाति भारतभूमिषु॥४२॥ पापा
ब्धिमग्नजंतूनाम वलोकवल्लिका॥ तथा द्रौ रुद्रवा राजन राजते सरिदुत्तमा॥४३॥ सामवेदसोद्भूत
मिलात लमिलन्महः॥ चिरं वद्धवरि त्रासादेवी दुःखौघनाशिनी॥४४॥ ख्याता सा दक्षिणगंगेति नर्म
दाश्रित शर्मदा॥ नानाविधानि पापानि नानाभेदोद्भवानि च॥४५॥ आर्द्रशुष्क लघुस्थूल चतुर्धा सं
स्थितानि च॥ देशकालवयोवस्था ज्ञानाज्ञानकृतानि च॥४६॥ लोकानां तु सत्त्वौकानां निर्भृतान्य
पि भारत॥ संस्मृता संश्रुता दृष्टा स्पृष्टा स्नाता च कीर्तिता॥४७॥ रेवा च रेवंउ ये तानि षड्भिर्भावेदि
जाधिप॥ नरकाब्धेर्भयं येषां त्रासो येषां यमादपि॥४८॥ ये भवद्बुद्धि जंती ह ते भजंतु भवोद्भवां॥ स
ततं वेदिपंती दपापव्याकुलं कलिं॥४९॥ भवानी वल्लभभवां ते भजंतु सरिद्वरां॥ यथादि पुरुषात्ते च
स्थिं समाप स्वलीलया॥५०॥ त्रिभागोऽप्यभवद्देव सरिद्वा त्रिधागता॥ त्रिलिपि नर्मदा देवी नरक ह

रे॰ खं॰ विणीनरणां॥५३॥ कलौ रेवाश्रितासेवा फलं चलुं न पार्यते॥ सर्वत्र दुर्लभा रेवा त्रिषु स्थानेषु विशेषतः॥ ५४॥ ॐ
कारे भृगुक्षेत्रे च नर्मदा उरिसंगमे॥ तत्र गच्छन्नरश्रेष्ठ रेवा या उत्तरे तटे॥ ५५॥ स्मृतो गुप्तप्रयागोसौ यत्र
१५४ रेवोरिसंगमः॥ नरि तोसौ गतस्तत्र यत्र रेवोरिसंगमः॥ ५४॥ काष्ठावस्थां गतः सोमो ध्यायन्नेकामना श्रा
नं॥ नित्यं संगमतोयान्नी स्नात्वा पूजयतीश्वरं॥ ५५॥ यावद्वर्षा त्तंपूर्णं तव तुष्टाम हेश्वर॥ प्रत्यक्षश्चाभव
त्तस्य सोमः सोमस्य भारत॥ ५६॥ त्रिशूलखट्वांगधरो मुंडमालाविभूषणः॥ द्विपचर्मपरीधानो गजच
र्मोत्तरीयकः॥ ५७॥ सर्वाक्षितजवभारो वृषारूढस्त्रिलोचनः॥ उमार्धांगधरो देवो भक्तलोकाभयप्र
द द:॥ ५८॥ मार्कं॰॥ दृष्ट्वा तमीश्वरं देवं चंद्रार्बुसमुज्वलं॥ साष्टांगं प्रणतो भूत्वा स्तुतिं चक्रे समाहितः॥
॥ ५९॥ चंद्र उ॰॥ जय शंकर देवेशा जय पापहराव्यय॥ जयेश्वर जगन्नाथ जय नागकिभूषण॥ ६०॥
जय भूलकपालाढ्य मुंडमालाविभूषण॥ जय दैत्यादवीदावजयांधकविनाशन॥ ६१॥ जय त्रिपु
रविध्वंस विशोषितमते विभो॥ जय भीम प्रभूते शातेजस्त्र्यविलोचन॥ ६२॥ जय निष्कल निमार
निरूमाय निरुपाधिक॥ जयाखिलकयाधार सकलश्रीमतांवर॥ ६३॥ जय कालस्वरूपाद्य कालकू
टकुलोक्षित॥ मंगलामंगलैर्भावैर्भूषितांग सनातन॥ ६४॥ जय त्वं व्रतिनामीश जय योगीशदुःस
ह॥ अणिमाद्यष्टसिद्धीनामीशश्रीशप्रियोज्वल॥ ६५॥ निरंजन निराकार निर्वर्णामे यभाति द॥ वि
श्वादि स्त्वमनादिस्त्वमनंतस्त्वं निगद्यसे॥ ६६॥ हरस्त्वं शंकरस्त्वं च त्वमेव जगतां गुरुः॥ ज्ञानदो ज्ञा १५४
नगम्यस्त्वं ज्ञानी ज्ञानवतां पतिः॥ ६७॥ वेदो न वेत्ति यं साक्षात्तमनिंद्रियगोचरं॥ किं स्तौम्यहं कथं
स्तौमि का शक्तिः का प्रगल्भता॥ ६८॥ यन्न ब्रह्मादयो देवा मूढास्तातुं न वेदितं॥ नमस्ते केवलं तत्र
नमस्तेस्तु नमो नमः॥ ६९॥ एवं स्तुतो महादेवस्तत्र सोमेन पांडव॥ तुष्टः प्रोवाचितं शंभुरुमया सह

भारत॥ ७०॥ महेश्वर उवा॰॥ वरं प्रार्थय मे चंद्र यस्ते मनसि रोचते॥ साधुश्री तस्त वस्तुस्यात्तपसा तोषि
तश्चते॥ ७१॥ सोम उवा॰॥ दक्षशापेन दग्धोहं क्षीणसत्वो महेश्वर॥ शापस्योपसमं तस्य कुरु देव
मयि प्रभो॥ ७२॥ ईश्वर॰॥ नव भक्तिगृहीतोस्मि तुष्टोहमुमया सह॥ निःशापः शापमुक्तस्त्वं संजा
तस्तीर्थसेवनात्॥ ७३॥ सोम उ॰॥ स्थापितस्त्वं मया भक्त्या संगमे पापनाशने॥ आकल्पं मम नाम्ना
त्वं स्थिरो भव भवेह वै॥ ७४॥ महेश्वर॰॥ सोमेश्वर इति ते नाम्ना ख्यातिं यास्ये जगत्त्रये॥ स्थितोहम ह
कल्पांतं लोकानां वांछितप्रदः॥ ७५॥ रमाम्यत्र समाः सोम संगमे सरितां मुखं॥ सार्धं गिरिजया भ्रा
जन् विशेषात्प्रार्थितस्त्वया॥ ७६॥ संगमा बहवः संति सरितां रेवया सह॥ रेवोरिसंगमसमो नास्ति
नास्ति जगत्त्रये॥ ७७॥ आनवीय मुनायोगे प्रयागो वै यथोत्तरः॥ रेवोरिसंगमस्तद्वत्प्रयागो दक्षि
णस्मृतः॥ ७८॥ दृष्ट्वा त्वां तपस्तेपे लोकस्यास्यार्थमाहितः॥ ईजे सबहुभिर्यज्ञैः सिध्यर्थे सृष्टिकर्मणः॥
॥ ७९॥ तथोत्तरप्रयागादि तथायतादिकं स्यधात्॥ लोकोपद्रवत्रांस्यर्थं प्रजास्वर्गं चिकीर्षया॥ ८०॥
सवारनायुधगणो निवसानीह चाप्यह॥ समं गिरिजया चापि हरिणा लोकधारिणा॥ ८१॥ स्तुतिमेतां
त्वयोक्तां मम प्रीतिविवर्धिनी॥ ये पठिष्यंति मनुजास्तेषां सिद्धिर्भविष्यति॥ ८२॥ इत्युक्त्वांतर्दधे देव स्त
त्रैव नृपसत्तम॥ क्षणं विधुरपि ध्यात्वा तल्लिंगे लीनमीश्वरं॥ ८३॥ सोमेन स्थापितं लिंगं प्राणिनां सिद्धिदं भुवि॥ स
र्व दुःखहरं शश्वत्प्रत्यहत्या विनाशनं॥ ८४॥ युधिष्ठिर॰॥ सोमनाथप्रभावोयं संक्षेपात्कथितस्त्वया॥ दुःखा
र्णव निमग्नानां पोतभूतं महामुने॥ ८५॥ मार्कं॰॥ पुनस्तीर्थप्रभावं ते संक्षेपाद्भाषितं शृणु॥ यद्वृत्तं समुत्तरे क
लेपार्थ रेवोरिसंगमे॥ ८६॥ शबरो नाम शाबासीत्सूर्यवंशसमुद्भवः॥ मनोहरोद्रामः श्रीमान् प्रतिशास्त्र
समुद्भवः॥ ८७॥ उदारचरितो वीरस्तस्य पुत्रस्त्रिलोचनः॥ त्रिलोचनसुतः कृष्णः पापधिसनिषेविते॥ ८८॥ वने

311 / 2008.

रे०खं०

ससचिवरहितो राम मृगयार्थं ददर्श नृप ॥ हतं चैतेन तत्पृथं निजो न चनसुतेन वै ॥८९॥ ब्रह्मर्षि मृगरूपेण तन्मध्ये
चरतीं नृप ॥ स हतस्तेन संगेन कण्वेन नृपपुंगव ॥९०॥ ब्रह्महत्यायुतः कण्वो निस्तेजाः कुरसन्मुखः ॥
संधितो तिया दुर्गं विधिम्य ठाल्वर महीं ॥९१॥ सर्वसैन्य मृगव्याध एकस्य कपरिच्छदः ॥ सर्वतो विचर
१२५ न्प्राप्तो नर्मदातीरमुत्तरं ॥९२॥ वीक्ष्य चैनानि वन्यानि वीरो मृगविहंगमान् ॥ तीर्थं सोमेश्वरं प्राप्तो रा
जा रेवोरिसंगमे ॥९३॥ किंशुकाशोकबकुलै जंबीरपनसावृते ॥ कदंबपाटलातिदुर्बिल्वनारंगशोभि
ते ॥९४॥ चिंचिणीचंपकोपेते नकुलाम्रवटान्विते ॥ मुनिरे सरकर्केधुमधुकाश्वत्थसंकुले ॥९५॥
आम्रातककपित्थादितरुखंडाभिमंडिते ॥ लुप्तपुष्प मृगाकीर्णे वने सर्वत्र शोभिते ॥९६॥ चित्रके मृ
गमार्जारैः सिंहशार्दूलरभ्रकैरैः ॥ गोपाच्छागक सेयुक्ते कोकिलावहिं नादितं ॥९७॥ प्रविष्टो ये वन वनं
कण्वः स्तृषार्तश्रमकर्षितः ॥ आन्वितः किं करैः कश्चित् एको राजा जलं ययौ ॥९८॥ स्नातो रेवाजले पु
ण्य संगमे पपनाशने ॥ तेनार्चितस्तथा भक्त्या सामनाथो युधिष्ठिर ॥९९॥ पीत्वा विमिश्रितं तोयं स
र्वपापक्षयंकरं ॥ फलानि च विचित्राणि भक्षयामास पार्थिवः ॥१००॥ सुप्तः छायां तरोः प्राप्य श्रांतो मृ
गवधेन तु ॥ तावत्तीर्थवरे प्राप्तः स्नानार्थं संगमे द्विजः ॥१०१॥ मार्गस्थं ब्राह्मणं दृष्ट्वा भ्रमालुं तं वनांत
मं ॥ अनला लमु वा वेदंति पतितो द्विजेनतम ॥ १०२॥ ब्रह्मस्तो निरीक्ष्यते यावद्विजास सर्वो द्विजोत्तमः ॥ ताव
द्वृक्ष समारूढां स्त्रियं रक्तांबरावृतां ॥१०३॥ रक्तमाल्यां च रक्ताक्षीं रक्तचंदनचर्चितां ॥ रक्ताभरणशो
भाढ्यां पाशहस्तां ददर्श तां ॥१०४॥ स्त्रीरुवाच ॥ संदेशः श्रूयतां विप्र यदि गच्छसि संगमे ॥ तत्र तिष्ठति १२५
मे भर्ता तं शीघ्रं प्रेषय द्विज ॥१०५॥ एकाकिनी हि ते भार्या तिष्ठते वनमध्यगा ॥ सा त्वां प्रतीक्षते नूनमि
त्य ब्रूयाः श्रुतं वदेः ॥१०६॥ इत्याकर्ण्य च वचो विप्रः संगमे सुरदुर्लभे ॥ यावत्तिष्ठाद्व्यात्समागम्य यावत्स्नयति सर्व

तः ॥१०७॥ वृक्षच्छायाश्रितः कण्वो दृष्टो विप्रेण तावता ॥ ब्राह्मण उ० ॥ नान्यं पश्यामि तीर्थेऽस्मिन्नृत्वत्तः पुरुष
सत्तम ॥१०८॥ वक्तव्यं शृणु ते शीघ्रं यदि जानासि किंचन ॥ वनांते वै मया दृष्टा बाला रुधिरलोचना ॥१०९॥
रक्तांबरधरा क्षामा रक्तचंदनचर्चिता ॥ रक्तमाल्यसुगोभाढ्या पाशहस्ता मृगेक्षणा ॥११०॥ वृक्षारूढा च वद
त्यस्मभर्तारं मे प्रेष्यतामिति ॥ कण्व उ० ॥ कस्मिं स्थाने स्थितानि प्रोक्तिं स्थितानागता नु किं ॥१११॥ कस्य
सा केन कार्येण वद सर्वमिदं द्विज ॥ ब्राह्मण उ० ॥ अर्धक्रोशे संगमात्सा वनांते पश्चिमे स्थिता ॥११२॥
संदेशः कथितस्तस्या मयाते नरसत्तम ॥ मार्कं० ॥ वचनाद्ब्राह्मणस्यैव कण्वेनालोच्य सत्वरः ॥११३॥
भृत्यैकः प्रेषितस्तत्र संदिश्य वनमध्यतः ॥ गच्छ त्वं ब्रूहि तां नारीं कुतस्त्वं कुगमिष्यति ॥११४॥ तेनैवं प्रे
षितो दूतो गतः स्त्रीपार्श्वमाशुगः ॥ वृक्षस्थां च सतां दृष्ट्वा उवाच नृपसत्तम ॥११५॥ मत्स्वामी पृच्छ
ते भीरु कुतस्त्वं कुगमिष्यसि ॥ ब्रह्महत्या उ० ॥ गुरुरात्मवतां शास्ता राजा दुरात्मनां ॥११६॥ इह
प्रच्छन्नपापानां शास्ता वैवस्वतो यमः ॥ मृगरूपस्य तु मुनेर्वधाद्दमिमं श्रिता ॥११७॥ ब्रह्महत्या
भिधानां मां किं न जानाति सो पतिः ॥ अर्धक्रोशे तु मां मुक्त्वा राजा तीर्थमुपागतः ॥११८॥ निष्ठरो नि
र्विवेको यं नामा स्थतिपुनः कथं ॥ भजमानां हि नां मुक्त्वा निःस्नेहः किं विलंबते ॥११९॥ प्रवेशं नेलभा
म्यत्र दूत वर्यक रोमि किं ॥ अर्धक्रोशमिमं क्षेत्रं समंतात्कुरुसत्तम ॥१२०॥ ब्रह्महत्यादिपापानि न
प्रवेष्टुं भवंति हि ॥ ख्यातः शिवप्रयागो यं शिवगंगोत्तरे तटे ॥१२१॥ सोमनाथः शिवो यत्र यत्र दक्षि
णजाह्नवी ॥ उरिप्रवासे हे श्लिष्टो गुप्तात्र सरस्वती ॥१२२॥ चिरं तेन स्थितिः कार्या महातीर्थे नरा
धिप ॥ गच्छ वं ब्रूहि राजानं शीघ्रं प्रेषय मां प्रति ॥१२३॥ मार्कं० ॥ गतो दूतस्ततः शीघ्रं श्रावयामास तं
नृपं ॥ समस्तां विस्तरात्तस्या यद्दृष्टां तं पुरातनं ॥१२४॥ तस्य नाक्यादसौ राजा मूर्छितः पतितो भुवि ॥ ततो

313
2008

हे॰खं॰ मत्स्यस्तमाश्वास्य पुनरुत्थाप्य सोऽब्रवीत ॥१२५॥ मत्स्य उवाच ॥ कस्मात्त्वं गोचरे सेनाथप नौपालं शुभाशु
भं ॥ यथार्जितं हि भोक्तव्यं उपायं वा विचिंतय ॥१२६॥ इत्याकर्ण्य वचस्तस्य कण्वो वाक्यमथाब्रवीत ॥
प्राणत्यागं करिष्यामि सोमनाथसमीपतः ॥१२७॥ शीघ्रमानीयतां वन्हिरिंधनं च तथा बहु ॥ तेनानी
१९९ तं तथैवेत्ती प्रं न पवाक्यात्क्षणादिव ॥१२८॥ स्नात्वा कण्वेन कौंतेय संगमे पापनाशने ॥ पूजितः परया
भक्त्या देवः सोमेश्वरो नृप ॥१२९॥ प्रदक्षिणं ततः कृत्वा ज्वलंतं जातवेदसं ॥ प्रक्षिप्रमात्मनात्मानं च
न्होध्यात्वा जनार्दनं ॥१३०॥ पीतांबरधरं देवं किरीटांगदभूषितं ॥ श्रिया युक्तं सुपर्णस्थं शंखचक्रग
दाधरं ॥१३१॥ सुरारिसूदनं सौम्यं सद्भक्तिर्मे भवेदिति ॥ वासुदेवाव्ययानंत विश्वात्मन् पापनाशन ॥
१३२॥ नारायण नारविंदाक्ष विश्वरूपाच्युत प्रभो ॥ ब्रह्मरूप त्वमेवासि त्वमेव शिवरूपधृक् ॥१३३॥
त्वयौ तस्मात्कृतं कृत्स्नं तत्त्वया त्वं प्रसीद मे ॥ जन्मप्रभृति पापानि यानि वद घादिनं विभो ॥१३४॥ आईशुष्क
उ घुसूक्ष्म ज्ञाताज्ञातकृतानि च ॥ ब्रह्मवधादि मुख्यानि तृणच्छेदांतिकानि च ॥१३५॥ वाङ्मनःका
यजानि स्युर्विहितानि मया किल ॥ तेभ्यो मे सर्वपापेभ्यो देहि मोक्षमधोक्षज ॥१३६॥ इत्युक्त्वा भूप
तिर्वन्हौ प्रविवेश समाहितः ॥ स्वामिप धीश्रिताः सर्वे पेतुस्तदनु किंकराः ॥१३७॥ ज्वलमाने ततो वन्हौ
पुष्पवृष्टिः पपात ख्वात ॥ साधु साध्विति ते देवाः प्रशशंसुर्नृपं मुदा ॥१३८॥ ऋषयः सिद्धगंधर्वाश्चा
रणादिविसंस्थिताः ॥ प्रशशंसुश्च तं कण्वं प्रविष्टं जातवेदसं ॥१३९॥ आगतानि विमानानि समारूढा
कसप्रभाः ॥ निःपापास्ते दिवं याता स्तीर्थस्यास्य प्रभावतः ॥१४०॥ स च विप्रस्तदाश्चर्यं दृष्ट्वा प्राप च १९९
मत्स्यतां ॥ कृतनित्यक्रियस्तीर्थयो ध्यायन्वृषभध्वजं ॥१४१॥ मार्कं० ॥ संगमे सोमनाथस्य प्रभावो मं
युधिष्ठिर ॥ माहात्म्यं च विधानं च शृणुष्वैकमना नृप ॥१४२॥ अष्टम्यां च चतुर्दश्यां दिने चरविसोमयोः ॥

विशेषात्कु सप्तम्यां रविवारो यदा भवेत ॥१४३॥ तदा पोष्य नरो भक्त्या रात्रौ कुर्वीत जागरं ॥ पंचामृतेन गव्येन स्ना 315/2008
पयत्परमेश्वरं ॥१४४॥ श्रीखंडेन सुगंधेन पुष्पधूपादिभिर्यजेत् ॥ घृतेन बोधयेद्दीपं गीतं नृत्यं च कारयेत् ॥
विनोदैर्विविधैर्वाद्यैः कथाभिः स्तुतिमंगलैः ॥ जागरे तत्र राजेंद्र ब्राह्मणांश्च यतीन्यजेत ॥१४६॥ प्रभाते च पुनः
पार्थ स्नातोऽश्वास्थं समाचरेत ॥ तत्र संपूजयेद्विप्रान्नात्मज्ञाजितमत्सरान् ॥१४७॥ शुचीनाभिंद्यान्संगान्
विषाहृत विभूषितान् ॥ सत्यशीलगुणख्यातान् स्वदारपरिपालकान् ॥१४८॥ गायत्रीसारसर्वज्ञान्नविकर्म
विरतान्सदा ॥ अंत्यापन्नभूई पन्नी चतुर्वेदस्य मंदिर ॥१४९॥ दूरतः संत्यजेत्स्वातु पायइछेद्य आत्मनः ॥
हीनांगानतिरिक्तांगान् ये पांपू नोपरं नाहि ॥१५०॥ ब्रतेश्रासे तथ दाने ते वर्ज्या ब्राह्मणादिभिः ॥ अयःपिंड
समा विप्रा व्रतः स्वाध्यायवर्जिताः ॥१५१॥ दातारमात्मनासार्धं मज्जयंति सुखेन तं ॥ लघुबंडासमा वि
प्राः षट्कर्मनिरताः सदा ॥१५२॥ दातारमात्मना सार्धं तारयंति सुखेन तु ॥ श्राद्धं सोमेश्वरे तीर्थे यः कु
र्याद्गतमत्सरः ॥१५३॥ आकल्पं पितरस्तस्य लभंते तृप्तिरक्षयां ॥ अन्नं वस्त्रं हिरण्यं च यो दद्याद्गजं मन
कार्या विचारणा ॥४२॥ ये स्मरंति सदा रात्रौ योजनानां शतैरपि ॥ नर्मदां पापसंमुक्तास्ते रुद्रलोकं व्रजंति हि ॥
॥४३॥ रेवातीरे शुभे नीरे येमृतामनुजर्षभ ॥ न पश्यंति पुनस्ते वै तां यमयातनाः ॥४४॥ ततस्तदुत्तरे कूले एरंड्या
संगमे शुभे ॥ नियमस्थित्वा विशालाक्षी शाकाहारेण सुंदरी ॥४५॥ देवत्रयं तोषयंती नानाविधैश्च व्रतैः ॥ ग्रीष्मे पं
चाग्निमध्यस्था वर्षासु स्थंडिलशायिका ॥४६॥ हेमंते जलमध्यस्था चरेच्चांद्रायणानि सा ॥ प्रातः सायं तु सा स्ना
ता कुर्वंती जलतर्पणं ॥४७॥ देवतानां पितॄणां च विधिना भरतर्षभ ॥ देवानामर्चनं कृत्वा करोति हवनं स्वयं
॥४८॥ यजते श्रद्धया विश्वं वीरा नैस्नानजाप्यकृतेन च ॥ एवं वर्षशते जाते ब्रह्मविष्णुशिवास्त्रयं ॥४९॥ संत्रासा
द्विजरूपेण संगमे तत्र पांडव ॥ पुरतः संस्थितास्तस्या वेदान्भ्युच्चरंति च ॥५०॥ अनुसूयाजपं त्यक्त्वानि
रीक्ष्य तान्मुहुर्मुहुः ॥ समुत्थाय विशालाक्षी ददावर्घ्यं यथाविधि ॥५१॥ बद्ध्वांजलिपुटा साध्वी प्रणता सं
वता न्हि जान ॥ अघमेषफलं जन्म अघमेषफलं तपः ॥५२॥ दर्शनेन तु विप्राणां सर्वपापैः प्रमुच्यते ॥
प्रदक्षिणं ततः कृत्वा साष्टांगं प्रणता ब्रवीत् ॥५३॥ केदमस्तफलानीह रात्कनीवारकान्शुभान् ॥ अ
प्यर्हय प्रयच्छामि मुनीनां भावितात्मनां ॥५४॥ ब्राह्मणा ॥ तपसा ते विचित्रेण तव सत्येन सुव्रते ॥ सुतुष्टाः
स्सर्वे कामं स्तु सुप्रीतास्तव दर्शनात् ॥५५॥ मतो नः कौतुकं जातं तप्यते दुःकरं त्वया ॥ स्वर्गमोक्षसुखार्थे वा

345 / 2008

रे.स्वं. तपस्तपसि दुस्तपं॥५६॥अनुसूया॥ तपसा सिध्यते स्वर्गस्तपसा सर्वसंपदः॥ अतपस्या गतिर्विज
यस्तपसा च जगद्गुरो॥५७॥आयुःकरं तपो विप्राः साध्वीभार्याप्रदं परं॥ तपो नामेति यद्विप्राः सर्वकाम
१९७ फलप्रदं॥५८॥विप्रा॥ तन्वी श्यामा विशालाक्षी स्निग्धांगी रूपसंयुता॥ हंसलीलागतिः सुभ्रूः सौम्यस
र्वांगसुंदरी॥५९॥ ऋषिपत्न्यां महाभागे दाक्षायणि पतिव्रते॥ किंनु ते तपसा कार्यं कि[ं] ख्यतां किंतु स्त्वया
६०॥ साध्वी॥ यौवने हि तपः साध्यं यौवने धनमर्जयेत॥ यौवने च सुतोत्पत्तिर्वृद्धत्वे सर्वमप्रियं॥६१॥
विप्रा॥ साधु साध्वी महाप्राज्ञे वरं वरय वांछितं॥ तपः सत्कार्यदर्शे त्वं तत्सर्वं कथयस्व नः॥६२॥ स्वरूपा
णि समाश्रित्य तत स्तामब्रुवन्सुराः॥ अहं ब्रह्मा त्वहं विष्णुरहं रुद्रो मुनिप्रिये॥६३॥ त्वत्कार्यार्थं त्रयो देवा
मर्त्यलोकमुपागताः॥ अस्मान्वीक्ष्य वरं ब्रूहि यस्ते मनसि वर्तते॥६४॥अनुसूया॥ यदि विष्णुश्च रुद्रश्च ब्रह्म
यं साक्षात्स्थिता मह॥ गरुडरूपधरा लक्ष्म्याः किंचिन्न कस्य विद्यते॥६५॥ केनचिन्हेन कं देवं संप्राप्तमुप
लक्षये॥ आयुधं वाहनं वस्त्रं रूपं मे दर्शयंत्विह॥६६॥ मार्कं॥ तस्या वाक्यावसाने तैः स्वं स्वं चिन्हं प्रद
र्शितं॥ स्वचिन्हान्याश्रिता देवाः सूर्यकोटिसमप्रभाः॥६७॥ अयं चतुर्भुजो देवः शंखचक्रगदाधरः॥ सतो
यजलदश्यामः पीतवासा गरुत्मगः॥६८॥ एष ब्रह्मा चतुर्वक्त्रश्चतुर्बाहुः सुभाशयः॥ हंसस्कंधसमारू
ढः स्रक्स्रुवाक्षधरो विभुः॥७०॥ कषायांबरधृग्देवी परेयं नः शिकारकः॥ असौ सितवृषारूढस्त्रि
नेत्रः शशिशेखरः॥७१॥ पंचवक्त्रो दशभुजः धूलीभस्मानुलेपनः॥ जटामुकुटसंयुक्तो गजकृत्तिकृ
तांबरः॥७२॥ व्याघ्रचर्मोत्तरीयश्च मुंडमालाविभूषितः॥ पाणौ डमरुखट्वांगी सर्वजीवगतः शिवः॥७२॥ १९७
एतद्रूपधरः शर्वः पश्येमं साध्वि चिन्हितः॥ अंशाः षडक्षणैर्युक्ता दर्शयाना परस्परं॥७३॥ देवास्ते दर्शि
ने रूता स्तुर्वरदा विश्वभाविताः॥ अनुसूया ततो दृष्ट्वा देवानतानरूपलक्षणे॥७४॥ वेपमानवपुः सा

ध्वी सुरान्वीक्ष्य मुहुर्मुहुः॥ अयं ब्रह्मा स्वयं विष्णुरयं रुद्रः स्वसंज्ञया॥७५॥ आनंदिता तु सा देवी ऊः प्रा 377/2008
ध्यान्वीक्ष्य सुव्रता॥ अनुसूया॥ किं व्यापारः स्वरूपास्थ विष्णुरुद्रपितामहाः॥७६॥ एतद्धि श्रोतुमिच्छा
मि तत्सर्वं कथयंतु मे॥ ब्रह्मा॥ प्राग्भूत्काले त्वहं ब्रह्मा आद्यो जीवः प्रकीर्तितः॥७७॥ मद्यमत्यां महीक्षे
त्रेदृष्ट्वा विश्वं सृजामि वै॥ अहं सृजामि भूतानि स्थावराणि चराणि च॥७८॥ अहं सर्वाणि बीजानि प्राक्
संख्याः कृत रजोगुणी॥ एतद्धि कारणं सर्वं रहस्यं कथितं तव॥७९॥ विष्णु॥ हे मते हं स्मृतो विष्णुर्विश्व
रूपं चराचरं॥ पालयामि जगत्सर्वं सार्थसंध्याय जुर्मयः॥८०॥ केवलसत्त्वमास्थाय सुरारिबलसूदनः॥
इति ते कथितं देवी विष्णुव्यापारकारणं॥८१॥ रुद्र उ॥ ग्रीष्मकालो त्वहं प्रोक्तः सर्वभूतक्षयंकरः॥
करोम्याभिजगत्सर्वं रौद्ररूपेण किं पुनः॥८२॥ तमोगुणं समाश्रित्य मध्याह्नार्कप्रभोदिवः॥ सामध्या
माश्रितः स्याध्वी व्यापारः सद्गतिःपरा॥८३॥ एयं ब्रह्मा च रुद्रश्च विष्णुश्चैकमो त्वगताः॥ वरं ददा
मतेभद्रे यत्तथा मनसीप्सितं॥८४॥ अनुसूया॥ धन्याहं कृतपुण्या च लोके श्लाघ्या च वंदिता॥ य
ब्रह्मविष्णुरुद्रेम प्रसन्नवदनाः स्थिताः॥८५॥ यदि तुष्टास्त्रयो देवा उत्पर्पाश्वे ममोपरि॥ अस्मिंस्ती
र्थे श्वसां निध्या ड्रदाः संतु मे सदा॥८६॥ देवा॥ एवं भवतु तद्रूपं क्यंयत्व या प्रार्थितं शुभे॥ प्रत्यक्षा हे
ड्डी मायाएं ऊी विष्णुनिर्मिता॥८७॥ यस्या दर्शनमात्रेण पापनाशो भवेन्नृणां॥ तत्र संनिहितानि
संदास्यामोलक वांछितं॥८८॥ अनुसूया॥ अलं बहुविधेर्वाक्यैर्देव विष्णोर मोप्रिय॥ दर्सितं तस्मि
रात व्यं यन्मया प्रार्थितं हरे॥८९॥ भवद्भिर्नान्यथा कार्यो मम पुत्रे वण्णाहितया॥ विष्णु॥ एवं भवतु भा
व्यं वु भवता यदुदीरितं॥९०॥ परं हि भृगुसंवादे गर्भवासउ पार्जितः॥ तस्यैवाहं भजन्यारं नैव पत्न्या
मि नो भव न॥९१॥ स्मरमाणः पुरावृत्तं खेदं यामि पुनः पुनः॥ एवं गतेपि तु नयंदारि त्रार्व पितामहः॥९२॥

रे॰खं॰ अयोनिजा भविष्यामः स्त्वत्सुताः शुभानने॥ योनिवासेन मर्त्यानां क्वचिद्वा भवंति हि॥ ३॥ यस्यां यात्र भ
विष्यामस्तीर्थे संनिहितास्तव॥ वरं दास्यामहे देवि यो कामनोत्र वांछितं॥ ४॥ एवं दत्वा वरां देवास्तत्रैवां
मा तर्हिता भवत्॥ वरान् प्राप्य च सा साध्वी माहेंद्रे च गतागिरिं॥ ५॥ क्षीणांगी शुष्कदेहा च कृशा कृशान
१८८ ना॥ ६॥ ततो नारीयाम्दुर्गा तपःक्लिष्टाम्दुःखरा॥ ७॥ गौर्यादि मातृमध्यस्था कालकीया सुतार्थिनी॥ सा
ध्वी त्वं वर्ण्यमाना या देवताभिः शुभव्रता॥ ८॥ ततो मातृगणं साध्वी विसर्ज्य दमुवा सह॥ ब्रह्माणी वैष्ण
वी मुख्या भो वं सो लोकमातरः॥ ९॥ मया पद्मप्रमाणेन प्रार्थिताः संतु पुत्रदाः॥ निरीक्षं संतु मे पुत्रा भ
वतीभिः सुरक्षिताः॥ भवंतो मे तपस्थाने तिष्ठंतु वरदा नृणां॥ मया सार्धं मया देव्यो मातरो लोकमात
रः॥ १०॥ इत्युक्ता ता विसर्ज्याथ सत्यव्रती ला महाव्रता॥ अनुसृत्य भर्तृमूलं जगाम गजगामिनी॥ ११॥
त्रिलात लिविष्टो सौ पश्यत्कांतां महाप्रभां॥ दृष्ट्वा तस्याभवत्तस्यै स्वागतं मुकुं रालपत॥ २॥ अत्रि॥
साधु साधु महाप्राज्ञे स्वागतं ते महाव्रते॥ अविलंगाल्वादीनां वरं प्राप्तासि दुर्लभं॥ ३॥ अनुसूया॥
त्वत्प्रसादेन देवर्षे वरः प्राप्तः सुदुर्लभः॥ त्वां हि देवाः प्रजां संतिकं पथः सिद्धचारिणा॥ ४॥ एवमुक्त्वा च
सा देवी निषण्णा भर्तुरंतिके॥ तो पश्यंति प्रिया लोपे मेलोत्सात्समन्विता॥ ५॥ आकाशृत ततः कांतेन
नाप्या लोकिता तु सा॥ इक्षणा देव संजातं दद कुभ्रमध्ये सुमंडलं॥ १६॥ मुनिवीर्य समुद्भूतं दिव्यं तद्
मत्वं नृप॥ वर्धमानं विपत्याशं भुक्षमूर्ध्वोर्ध्वं गतं तदा॥ ७॥ नवयोजन साहस्रं लंपटाद्दीप्तिमत्पृथु
कदंबगोलकाकारमाल्हादजननं नृणां॥ ८॥ तस्यां ततः संनिविष्टश्च देवे नोदितं सम र्तिमान॥ ९॥ समव १८८
र्णो मत मयः स्वर्णकोटि सम प्रभः॥ १०॥ अनुसूयाद्विजः पुत्रः स्वयं साक्षात्पितामहः॥ दीप्त्याल्हादकरो
येन चंद्रमा इति विश्रुतः॥ ११॥ उत्कृष्टलक्ष्मीसहितः सोमस्तेनाभिगद्यते॥ येनानुरंज्यते लोकस्तस्मि

देवयुधिष्ठिर॥ १२॥ तस्माद्राजेति नामास्य ख्यातं लोकत्रयेपि च॥ इदृष्ट्वर्तमयः श्रीमान् कलाषो 379
डशकारतः॥ १३॥ तिथयः प्रतिपन्मुख्याः कलास्तस्य महात्मनः॥ पूर्णिमा पंचदशमी अमावास्या च षो 2008
डशी॥ १४॥ चतुर्विधं भूतजातं सर्वमाभक्ताति पोषम॥ आप्यायमेति सर्वमिदं सुधयासौ समाश्रिता॥
१४॥ सुरासुराः सगंधर्वा यक्षराक्षसपन्नगाः॥ पन्नगादेत्या पितरः सिद्धकिंनरगुह्यकाः॥ १५॥ सर्वे तत्रो
पजीवंति हृतं दत्तं निवेदितं॥ वनस्पतिगते सोमे परान्नं यस्तु भुंजते॥ १६॥ तस्य मासकृतं पुण्यं य
स्यान्नं तस्य तत्फलं॥ वनस्पतिगते सोमे धावनपियान्नरः॥ १७॥ भुंजन्नरक मूढो दद्याद्दत्तं शुभं॥ व
नस्पतिगते सोमे यस्तु छिंद्याद्वनस्पतीन॥ १८॥ तेन पापेन पापात्मा नरकं याति दारुणं॥ वनस्पतिगते सो
मे मैथुनं योनिदर्शितं॥ १९॥ ब्रह्महत्यासमं पापं लभते नात्र संशयः॥ वनस्पतिगते सोमे मंथानं यो वि
चालयेत्॥ २०॥ गावस्तत्र प्रणश्यंति याश्चैनं पूर्वसंचितं॥ वनस्पतिगते सोमे यः पिंडान्निर्वपेत्
२१॥ क्षुधिताः पितरो रुष्टाः संतानं नाशयंति हि॥ अमावास्यां समासाद्य श्रद्धयो विधिना चरेत्॥
२२॥ अश्वमेधकं भवंतीह तृप्तास्तस्य पितरो ध्रुवं॥ हिरण्यं रजतं वस्त्रं ताप्रानं मंडु॥ २३॥ जलं यथा
सनं वापि योदद्याद्विजातिषु॥ सर्वं लक्षगुणं पार्थ लभते नात्र संशयः॥ २४॥ पितॄणां जनयत्प्रीतिं
धंते यत्र समाश्रिया॥ अमानाम कलारश्मिर्यदा चंद्रे निषेवते॥ २५॥ तदा लक्षगुणं दानं पितॄणां तु
ष्टिमावहेत्॥ एवं गुणविशिष्टो सौ सोमरूपः प्रजापतिः॥ २६॥ संजातः प्रथमः पुत्रो त्वनुसूयासुनंद
नः॥ द्वितीयश्च ततो जज्ञे दुर्वासा नाम नामतः॥ २७॥ सृष्टिसंहारसंसकादि स्वयं स क्षान्महेश्वरः॥ ऋ
षि मध्यगतः सोपि तपस्तस्यामि दुःकरं॥ २८॥ सोपि विरुद्धतां याति संप्राप्तभूतनिष्टवे॥ अतस्त्वं भज्यता क
स्त नारो नेन दुर्वासनानृप॥ २९॥ द्वितीयस्य तु पुत्रस्य संभवः कथितो मया॥ तृतीयं शृणु भूपाल वि

रे॰खं॰ चोरं तं मुनेः सुतं ॥३१॥ दत्तात्रेयस्वरूपेण भगवान्मधुसूदनः ॥ अगच्छत्पीजगन्नाथः स्वयं साक्षा
ज्जनार्दनः ॥३२॥ अत्रेः पुत्रः स आत्रेयो नाम्नादत्त इति श्रुतः ॥ अवधूतचरित्रेण योगी विचरते महीं ॥
३२॥ एते देवास्त्रयः पुत्रा अनुसूयायुधिष्ठिर ॥ वरान्दत्वा तु तस्यै ते अवतीर्णा महीतले ॥३३॥ पुत्रप्रा
१८९ प्तिप्रदं तीर्थं रेवायाः उत्तरे तटे ॥ अनुसूयाकृतं पार्थ सर्वपापक्षयंकरं ॥३४॥ संस्थितं मातृवर्गेण वि
ख्यातं भुवनत्रये ॥ तत्र स्नात्वा तु यो राजन् अनुसूयां प्रपूजयेत ॥३५॥ कुंकुमैः कज्जलैर्वस्त्रैर्दीपैर्वास्त
त्रैः सुभक्तितः ॥ विविधैरुपचारैश्च पूजयेन्मातृसंचयं ॥ सपुत्रपौत्रान्संप्राप्य मोदते कालमक्ष
यं ॥ गौरिणीर्भोजयेत्तत्र दंपत्यं चापि यो नरः ॥३७ मातरः स्तस्य सुप्रीताः सानुकूला भवंति हि ॥३८
॥ इति श्रीस्कांदे रेवाखंडे अनुसूयाकृतमनुसूयातीर्थं ॥१५६॥ ॥मार्कं॰॥ ततः क्र
मान्महाराज श्रृणु तीर्थमनुत्तमं ॥ आश्चर्यभूतं लोकेस्मिन्नर्मदा उत्तरे तटे ॥१॥ भ्रूणहत्या गता यत्र ब्रा
ह्मणस्य युधिष्ठिर ॥ अत्राप्युदाहरंतीम मितिहासं पुरातनं ॥२॥ सर्वपापहरं श्रेष्ठं दुःखार्तदुःख
नाशनं ॥ सुवर्णशिलके ग्रामे गौतमान्वयजो द्विजः ॥३॥ रूपीवहो महोत्साहो भार्यापुत्रसमन्वि
तः ॥ गोविंदस्तत्र वसतिस्म जातो विपुले कुले ॥४॥ बालपुत्रः स भार्यश्च गृहक्षेत्ररतः सदा ॥ एक
दा वनमध्यात्स संचीयेधनसंचयं ॥५॥ शकटे पूरयित्वा च काष्ठानामगमद्गृहं ॥ गृहपार्श्वोत्स
भागे तु शकटं तरुपरि पांडव ॥६॥ प्रक्षिप्ते पसकाष्ठानि एकाकी क्षुधयार्दितः ॥ दृष्टं तेरिंगमाणो
गृहस्थो सपुत्रकः ॥७॥ काष्ठेषु क्षिप्यमाणेषु पितुः शब्दात्समागतः ॥ न दृष्टस्तेन पुत्रो सौ काष्ठैः सं
छादितो भृशं ॥८॥ आगतो सौ गृहद्वारि पिपासार्तो द्विजस्ततः ॥ स वृषभो च यत्वा दृशाकटं र १८९
ज्जुसंयुतं ॥९॥ भार्या तस्य च या दृष्टा पितृशासनवर्तिनी ॥ दृष्टा निपतितं पुत्रं काष्ठैर्निर्भिन्नमस्तकं ॥१०॥

अजल्पमाना करुणं पर्यंके न्यपच्छिशुं ॥ शुश्रूषणे रता साध्वी स्वभर्तुः स नराधिप ॥११॥ ततः स स्नापितो 381
भर्त्रा भोजितः स्थापितस्तदा ॥ पश्चात्पुत्रं च पर्यंका दुत्थापयति सा यदा ॥१२॥ तदा न चेष्टते पुत्रः कि 2008
मेतदिति विभ्रमात् ॥ पुनरुत्थापितोप्येवं न चेष्टे प्रभुर्नमृतः ॥१३॥ तदा सा दीनवदना रुरोद
तीमु मोह च ॥ तच्छ्रुत्वा रुदितं तस्या गोविंदस्तु समानसः ॥१४॥ किमेतदिति चोक्त्वा पपात धरणी
तले ॥ तावुभौ मुर्छकेशातौ भूमौ निपतितौ तदा ॥१५॥ विलयंतौ नृपश्रेष्ठ स निश्वासौ सुविह्वलौ ॥
ऊचतुः पुत्रचरितं वियोगस्य च लक्षणं ॥१६॥ कमत्र प्रांगणे पुत्रं दृष्टा क्रीडंतमातुरं ॥ संधारयिष्य
हृदयं स्फुटमानं मृते त्वयि ॥१७॥ त्वयि कीर्तियशः सख्यमक्षया कुलसंततिः ॥ दृष्टा कमनं णया
हं या स्यामि परमां गतिं ॥१८॥ ममानाथस्य दीनस्य गतिस्त्वं किल जायसे ॥ मनोरथा ममाद्येते सर्वे
विफलतां गताः ॥१९॥ इमां स्तु विह्वलां दीनां विहीनां सुतबांधवैः ॥ त्राय स्वमातरं तच्च रुदंतीं शोक
कर्शितां ॥२०॥ पुंनाम्नो नरकाद्यस्मात्त्रायते पितरं सुतः ॥ तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा ॥
॥२१॥ अपुत्रस्य गृहं शून्यं दिशः शून्या हि बांधवाः ॥ मूर्खस्य हृदयं शून्यं सर्वशून्यं दरिद्रतः ॥२२॥ मि
मिथ्या वदति लोकोयं चंदनं किल शीतलं ॥ पुत्रगात्रपरिष्वंगश्चंदनादपि शीतलः ॥२३॥ वीणावा
द्यस्वनो लोके मधुरः श्रूयते किल ॥ बालालापश्च रुदितं ततोप्याल्हादनं नृणां ॥२४॥ मृगपक्षिपतं
गेषु च शरभकरखरादिषु ॥ पुत्रस्तेषु समस्तेषु वल्लभः पांडुनंदन ॥२५॥ गजाश्वमत्स्यमकराः कूर्मा
दिग्राहभूलकाः ॥ पुत्रास्ते तान्प्रहृष्यंति विपत्तौ दुःखपीडिताः ॥२६॥ देवगंधर्वयक्षाश्च हृष्यंते पुत्रजन्म
नि ॥ मरणे तेपि शोचंते ह्युवाणा मंदभाग्यतां ॥२७॥ ऋषिमिलापकं चक्रे पुत्रार्थे राघवः पुरा ॥ शक्रस्थानाधि
तस्यास्य प्राप्स्यते स्या सन्नतः ॥२८॥ विनापुत्रं कथं भूयात्स्वर्गवासः शुभा गतिः ॥ राजा दशरथस्तस्मात्पु

चार्थेयजन्मीजिमान॥२९॥ रामोलक्ष्मणशत्रुघ्नो भरतश्चाम वंसुताः॥ कार्तवीर्यो जितो येन रामेण
मितते जसा॥३०॥ सरामोरामचंद्रेणसरामःसहबांधवः॥ एवं पुत्रं विना सोस्यं मर्त्यलोके न विद्यते॥३१॥
वं-राार्थे मैथुनं यस्य वर्गार्थे यस्य भारती॥ मिष्टान्नं ब्राह्मणस्यार्थे स्वर्गार्थे तस्य जीवितं॥३२॥ अस्त्ररत्वा
१९० श्वमेधाभ्यां नपरं पुण्यपापयोः॥ पुत्रोसत्तिविपत्तिभ्यां नपरं सुखदुःखयोः॥३३॥ किं ब्रवीमीति भो व
त्सन तु सौख्यं सुतं विना॥ एवं बहुविधं दुःखं विलप्य स पुनः पुनः॥३४॥ जनेभ्यः श्वासितो विप्रो बाल
गेहाद्विनिर्गतः॥ ततः संस्कृत्य तं बालं विधिना कृतकर्मणा॥३५॥ समयेता च दुःखार्ता आगतौ स्वग
हं पुनः॥ एवं गृहागतौ विप्रदिनैः कतिपयैर्नृप॥३६॥ एकदा ब्राह्मणस्तु रात्रिं प्राप्य सुविह्वलः॥ भ्रमो
मस्तत्ो गोविंदः पुत्रशोकेन पीडितः॥३७॥ यावन्निरिक्षते भार्यां निशीथे दुःखितं पतिं॥ कृमिराश्यंतर
गतं दूरे स्तीति बकुलितं॥३८॥ दुःखादुःखांतरे मग्नो रुद्धापापाकलांकितं॥ एवं दुःखनिमग्नाया भ्य
तीथौ शीर्षशतदा॥३९॥ प्रत्यक्षपशुपालेन महिष्यो मोचिता गृहात्॥ वनेक्षेत्रांतिके ताश्च रक्षयित्वा
युधिष्ठिर॥४०॥ विहस्तः पशुपालेन गोविंदो ब्राह्मणस्तदा॥ याव द्रोष्ट्याम्यहं स्वामिन् तावत्यत्नमितो
भयात्॥४१॥ महिषीरक्षणे यत्नमास्तु तासां विपर्ययः॥ ततो सौ त्वरितो विप्रो महिषी स्थातु मागतः॥
४३॥ नायन्नृप तु मुहूर्तात्तु महिषी यूथमध्यगां॥ यावत्तिलोकये तावद्दूरेक्षांमध्यगां॥४४॥ ततः
प्रभाविते चित्र एरंडी संगमे गता॥ पंकुता तोयपानार्थं जलमध्ये विवेश सा॥४५॥ ततः ससंगमजले
विप्रो विप्रविवेश ह॥ एरंडीनर्मदासंनाभी मात्र व स्यच॥४६॥ निवर्तयामास सतां महिषीं पुन १९०
रेव हि॥ अकामात्सलिलं पीत्वा प्रक्षाल्य न पनेततः॥४७॥ अजगाम द्विजः सोपि भवनं द्विजसत्तम॥ भुं
क्त्वा दुःखान्वितो रात्रौ गोविंदः शयनं ययौ॥४८॥ निद्राभिभूतः शोकेन खिन्नश्चापि श्रमेण तु॥ पुनस्तं चा

र्धरात्रे तु तस्य भार्यावलोकमत॥४९॥ कृमिभिर्वेष्टितं गात्रमर्धपश्यत्सवेष्टितं॥ ततः सा विस्मयाविष्टा 383/2008
तस्य भार्या सुतान्विता॥५०॥ उवाच दुःखतं तस्य साध्वसाविष्टमानसा॥ भार्या॥ अतीतेपंचावं नो
न्हिकाश्चाभिक्षिपतस्तव॥५१॥ गृहपश्चागतो बालस्त्व ज्ञानान्पातितस्त्वया॥ मयाततस्ताधकं ध्योरे
रहस्यं न प्रकाशितं॥५२॥ तेन प्रच्छन्नपापेन दह्यमानादिवानिशं॥ न सुखं तव देहस्य पश्यामि नहि
चात्मनः॥५३॥ निद्रां मम पश्यतां याता रतिश्चापि त्वया सह॥ श्रूयते धर्मशास्त्रे हि वाक्यमुक्तं महर्षिणा
५४॥ तत्स्मृत्वा हानिशं चित्ते परितापो न शाम्यति॥ कीर्तनान्नश्यते धर्मो वर्धते सो जगद्गुरोत॥५५॥ इह लो
के परे चैव पापं स्यादवमे नहि॥ एवं चिंतान्वितानित्यं विनिद्रा निशि चातुरा॥५६॥ पश्यामि ते कृमीन्गा
त्रे किं कस्य कथयाम्यहं॥ पुनस्त्वंचापदुष्टो मे ब्राह्मणः कृमिभिर्युतः॥५७॥ कश्चित् भिंदंति ते गात्रं क
श्चिन्नश्यंति सर्वशः॥ इति संस्मृत्य संक्लिष्टं बिभ्रमामि पुनः पुनः॥५८॥ यं गतोसि प्रभावो यं तस्य नास्य
चिंतय॥ सर्वं गात्रं प्रतिदिनं दृष्टाते कृमिभिर्वृतं॥५९॥ अधुना धर्मराशीरस्य पश्यामि कृमिवर्जितं॥
न कारणं विनेतद्धि भवेदिति मतिर्मम॥६०॥ मार्कं॥ एवमुक्तस्तु विप्रो वै कथयामास विस्मितः॥ स्मृत्वा
तद्दिवा वृत्तं ज्ञात्वा रूमानो नृपोत्तम॥६१॥ गोविंद॥ अद्याहं महिषी साकमेरंडीसंगमं गतः॥ नाभिमा
त्रे जले गत्वा पीतवान्सलिलं शुभं॥६२॥ नान्यत्तीर्थं विजानामि सरित्सरएव वा॥ नगतोन्यत्र वैस
त्यं कथितं तव सुंदरि॥६३॥ एवं श्रुत्वा च सा सर्वमुपवासकृतक्षणा॥ सह भर्त्रा गता तत्र संगमे व
रवर्णिनी॥६४॥ स्नात्वा तत्र जले रम्ये नत्वा देवं च भास्करं॥ स्नापयामास देवेशं शंकरं लोकशंकरं॥
दीपं च गंधधूपं च क्षीरं मधु दध्यंबु खंडुभिः॥ गंधमाल्यादिनैवेद्यैर्नीराजनविनोषिते॥६५॥ पूजितं
चिन्मयं लिंगं देवी कात्यायनी तथा॥ रात्रौ जागरणं कृत्वा पत्यासह पतिव्रता॥६६॥ ततः प्रभाते सुस्ना

र०खं० त्वाविप्राणां पञ्चवलत ॥ गोदानेन हिरण्येन वस्त्रेणान्नेन भारत ॥ ६९ ॥ गोविंद पूजया मासस्वश
क्त्या ब्राह्मणान् शुभान् ॥ मुक्तपापो गृहे यातः स्वभार्या सहितो नृप ॥ मार्के ॥ एवं यः शृणुयाद्भक्त्या गो
१०१ विंदाख्यानमुत्तमं ॥ पठेद्वा पार्थ तस्यापि भ्रूणहत्या प्रणश्यति ॥ ७० ॥ गां करे क्रीडते लोके यावदाहूत
संप्लवं ॥ यश्चैतान्यवयुजे मासि श्वेत्रे वा थ नृपोत्तम ॥ ७१ ॥ सप्तम्यां नुसितेपक्षे सोपवासो जितेंद्रियः ॥
सात्विकी वासनां कृत्वा बोधसंछिवमंदिरे ॥ ७२ ॥ ध्यायमानो विरूपाक्षं शूलिनं वाशिशेखरं ॥ सुरा
रिसंघहंतारं शंखचक्रगदाधरं ॥ ७३ ॥ पक्षिराजसमारूढं विश्वैकपरिपालकं ॥ पितामहं ततो
ध्यायेथ सस्रष्टं चतुराननं ॥ ७४ ॥ चतुर्बाहुं च वरदं जपमालाधरं विभुं ॥ स्रुवं कमंडलुं चैव पापादेनस्व
र्गकारणं ॥ ७५ ॥ सर्वदं सर्वभक्तानां कमलासनशोभितं ॥ योत्र वंनिवसेन्मत्रिम स्नायेनकोत्तम
॥ ७६ ॥ सपापक्षयमाप्नोति वांछितं च लभेत्फलं ॥ ततः प्रभाते संजाते स्नात्वा तस्यां युधिष्ठिर ॥ ७७
ब्राह्मणान्भोजयेत्पश्चात् सर्वदोषविवर्जितान् ॥ सर्वावयवसंपूर्णान् सर्वशास्त्रविशारदान् ॥ ७८ ॥ वे
दाभ्यासनतिष्ठांश्च स्वदारनिरतान्सदा ॥ श्राद्धदाने प्रेतयोग्यानि ब्राह्मणान् पांडुनंदन ॥ ७९ ॥ पित्र्ण्णां
पूजनं तत्र देवपूर्वं समाचरेत् ॥ प्रेतत्वान्मोचयेच्छीघ्रमेरंड्यां तर्पणे कृते ॥ ८० ॥ तिलपिंडं च यो दद्या द्र
त्या तत्र नराधिप ॥ तिलसंख्या च तेनैव उद्धृतानि जपर्वजाः ॥ ८१ ॥ दानानि तत्र देयानि तानि मुख्या
नि भारत ॥ हिरण्यभूमि कन्याश्च पूर्वा हो शुभलक्षणो ॥ ८२ ॥ क्षीरेण सहितो पार्थ धान्यमुकुट संयुतो
॥ अलंकृतस्सवत्सा च क्षीरिणीं तरुणीं शुभां ॥ ८३ ॥ रक्तश्वेतादिवर्णां वा कपिलां गामथापि वा कांस्य
दोहनसंयुक्तां रुक्मरूपादिकल्पितां ॥ ८४ ॥ शास्त्रोक्तविधाना पार्थ ब्राह्मणाय प्रदापयेत् ॥ प्रीयतां १०१
मे जगंनाथ हररूपपितामह ॥ ८५ ॥ सर्वतः पावनी देवी सुरभी पातु मामघात् ॥ पुत्रार्थं याः स्त्रियः पा

र्थं एरंडीसंगमे द्विजे ॥ ८६ ॥ स्नाप्यं तेरुद्रसूक्तैश्च चतुर्वेदोद्भवैस्तथा ॥ चतुर्भिर्ब्राह्मणैः शस्तं द्वाभ्यां वाप्य 385
स्तु कारयेत् ॥ ८७ ॥ एकं वाप्यथ कुंभेन चतुर्वेदाभिमंत्रितं ॥ आचार्यो विधिना पार्थ दंपत्यमभिषेचयेत् ॥ 2008
चे स्नो देवलेनैवं के नाप्यथवा सागमेन तु ॥ सप्तधान्यापरिपरिकृतं कुंभं सर्वाग शोभितं ॥ ८८ ॥ पंचरत्नस
मायुक्तं छन्नाम्यं पंचपल्लवैः ॥ परितगंधतोयेन सर्वौषधिविमिश्रितं ॥ ८९ ॥ वेष्टितं सितवस्त्रेण सित
चंदनचर्चितं ॥ सितपुष्पसमाछन्नं सिद्धार्थकृतमध्यगं ॥ ९० ॥ कांस्यपात्रेण पिहितं पंचामृतसमन्वि
तं ॥ मृत्संवकां तद्युतं शुभं बीजपुष्पफलान्वितं ॥ ९१ ॥ सत्पात्रे पंचगव्यं च तथा बीजफलानि च ॥ एवं कुं
भं तु संस्थाप्य पुत्रार्थी दैशिकोत्तमं ॥ ९२ ॥ नत्वा दंडप्रमाणेन प्रार्थयेत्पुरतस्थितः ॥ ब्राह्मणा जंगमं ती
र्थं निर्जलं सर्वकामिकं ॥ ९३ ॥ तेषां वाक्योदकेनैव शुध्यंति मलिनो जनाः ॥ अपुत्रस्य द्विजश्रेष्ठ मम सत
पुत्रमिछतः ॥ ९४ ॥ कृपया शास्त्रविधिना सभार्यस्याभिषेचय ॥ प्रसन्ने ब्राह्मणे नूनं प्राप्यंते सर्वसंपदः ॥
९५ ॥ तैरवकृष्टे मनुजः संक्षयं याति सर्वतः ॥ तस्मात्त्वं संनोभव त्वा मां परयस्यभि वांछितेः ॥ ९६ ॥ आचार्य
त्वमिहास्माकं विधिमंत्रपुरस्कृतं ॥ ततः कुंभं समादाय स्वस्तिवाचनपूर्वकं ॥ ९७ ॥ कांस्यपात्रेण कलत्रा
न्वितं यस्नापयेद्विजः ॥ दंपत्यं पावमानीभिर्मंत्रैश्च स्नानं संभवे ॥ ९८ ॥ चतुर्वेदोद्भवैः पार्थ वारुणो
क्तांतिसंभवैः ॥ यत्नेन कृतो पुत्रो भाग्यमित्यादिभिरपि क्रमात् ॥ ९९ ॥ स्नापितो यजमानश्च मंगलाद्भुभने
कृते ॥ अंगलग्नं तु यद्वस्त्रं कटकाभरणं तथा ॥ १ ॥ यजेत्कर्म उद्धेस वैसिद्धिमिछंनिहात्मनः ॥ प्रणम्य
भास्करं पश्चादाचार्यं रुद्ररूपिणं ॥ २ ॥ घृतान्यवस्त्रशृंगारादेवानभ्यर्चयेत्ततः ॥ दद्यात्सफलं दक्षि
प्रछत्रं तां वृत्तमेव च ॥ ३ ॥ उपानहौ चपानं च दंपतीपरिदानकं ॥ अनंदद्यात्सद्भक्त्या विधिसंभवेदुःखवर्जितः
४ ॥ एकवस्त्रेण वै स्नातो दंपती संगमे पुरा ॥ पश्चाद्विदविधानेन प्राप्नुतः पुत्रमीप्सितं ॥ ५ ॥ क्रीडते भास्करे

रे.खं. लोके यावदाहूतसंप्लवं॥ दानं कोटिगुणं सर्वं तत्र तीर्थे तु यत्कृतं॥ ६॥ यथा नदीनदाः सर्वे प्रलये यांति संक्ष
यं॥ एवं पापानि नश्यंति एरंडी संगमे नृणां॥ ७॥ समंताच्छरपातेहि एरंडीसंगमे नृप॥ भ्रूणहत्यासमं पा
१९२ पं नश्येदेवं वदंति वै॥ ८॥ प्राणत्यागं च यो भक्त्या जातवेदसि कारयेत॥ अनाशकेन तोयेन तस्य य
त्फलं शृणु॥ ९॥ पंचसाहस्रिकं मानं वर्षाणां वह्निसाधनात॥ त्रिःसाहस्रं जले नोक्तं यदि ध्यानं च तन्
न तु॥ १०॥ मर्त्यस्याब्दसहस्राणां पूर्वमेवं श्रुतं मया॥ बकाः काकाः कपोताश्च उलूकाः पशवोऽपरे॥ ११
संगमोदकसंस्पृष्टा लोप्यं ते यांति सद्गतिं॥ रक्षाश्च तद्गतिं यांति सत्ययोगाश्च योगिनः॥ १२॥ एरंडीका
मयादृष्टा दृष्टो वै मन्मथेश्वरः॥ किं करोति यमो रुष्टो भद्रो भद्राणि पश्यति॥ १३॥ दृष्टस्तु को संगमोद्भूतम्
दायोगात्वरुठकः॥ भ्रूणहत्यादिपापानि तस्य नश्यंति सर्वतः॥ १४॥ एरंडीसंगमे मर्त्यो व दुःमानो न
राधिप॥ सर्वपापविनिर्मुक्तः पदं गच्छत्यनामयं॥ १५॥ एरंडीसंगमं मर्त्य आश्रमस्थोपि कीर्तयेत्॥ जा
यते मुक्तपापोसौ विति शंकरभाषितं॥ १६॥ एरंडीसंगमं भवेः पादपाग्रे अदूरतः॥ दृष्टे स्म स्पंति पा
पानि देहस्थानि युधिष्ठिर॥ १७॥ तीर्थाख्यानमिदं पुण्यं ये पठंति द्विजोत्तमाः॥ शृण्वंति चत था भक्त्या
मुक्तपापा भवंति ते॥ १८॥ एतत्ते सर्वमाख्यातं एरंडी संगमं नृप॥ अथान्यत्संप्रवक्ष्यामि श्रद्दधानाय भार
११९॥ इति श्रीवायुप्रोक्ते संहितायां रेवामहात्म्ये पुत्रप्रदमेरंडीसंगमतीर्थ॥ १२०॥ ॥ततः परं नृप
अथ सुवर्णशिलमुत्तमं॥ प्रख्यातमुत्तरे कूले सर्वपापक्षयंकरं॥ १॥ समंताच्छरपातेन मुनिसंघैः पुरा
कृतं॥ रेवायां दुर्लभं स्थानं संगमस्य समीपतः॥ २॥ दृष्ट्वा लोक्याथ मुनिभिर्निवासकृतनिश्चयैः॥ निःस्पृ
हैर्निरहंकारैः समलोष्टाश्मकांचनैः॥ ३॥ मुमुक्षुभिर्महाभागैस्तपो निर्धूतकल्मषैः॥ संगमात्पश्चिमे १९२
भागे विभज्यानुक्रमेण तु॥ ४॥ विभक्तं हस्तमात्रं तु पुण्यं क्षेत्रं नराधिप॥ विभागं तत्र कुर्वद्भिः क्रमेण पु

रे तो गतैः॥ ५॥ शिलास्वर्णमयी दृष्टा अकस्मात्कुतकाभुवि॥ हस्तद्वयप्रमाणां तु सुतेजस्कां मनोरमा
म्॥ दृष्ट्वा तां मुनयः सर्वे विस्मयं परमं ययुः॥ किमेतदिति चाकस्मात्किमुवो सति लक्षणं॥ ७॥ इति स्थि
तेषु तेषु संशयानेषु भारत॥ विप्रेषु तत्र सहसा दिव्या वाग् अशरीरिणी॥ ८॥ विभज्य गृह्यतामेषा भव
द्भिर्मुनिपुंगवाः॥ तपसः फलमेतद्वः शिलेयं कांचनी शुभा॥ ९॥ नोत्पाता विकृतिर्वात्र न संदिग्धं च किं
चन॥ ततस्तद्वचनाद्विप्रा विचिंत्य कृतनिश्चयं॥ १०॥ वित्तेनानेन मे रूके परस्परमतेन तु॥ वयमे
तां न गृह्णीमो तिष्ठ लेषा यथास्थिता॥ ११॥ यातु वा तत्र यत्रेमां कामं गृह्णंति मानवाः॥ मुमुक्षानपरा
भद्रे दिव्यभारति मा वद॥ १२॥ रेनयाप्नोति नेयं दत्ता सार्वेण वा द्विजाः॥ इयं स्वर्णशिला त्यक्त्वा विभज्य
ग्रापत॥ १३॥ शंकरस्य प्रसादो यं रेवावात्सल्यकारितः॥ स वैरपि सदा ग्राह्या भवद्भिश्च वि
त्यंति वाडवाः॥ १४॥ यदुवंज्ञायतां तन्नि किंतु हन्मोहिदूरगाः॥ मार्कं॥ ततस्तं निश्चयं ज्ञात्वा मुनीनां नृ
पसत्तम॥ तत्राविः समुत्तस्थौ शिलायां तर्हि तो भवत॥ उवाच च विभुः साक्षाल्लिंगरूपो महेश्वरः॥
१७॥ साधु साधु महाभागा वित्तं कामुनयोप्यवं॥ युष्मत्परीक्षणाय यथा मया स्वर्णशिला कृता॥ १८॥
प्रसन्नोस्म्यघ वो विप्रा वरं वरयतानघाः॥ मुनयः॥ यदि तुष्टोसि नो देव वरं दातुमिहेच्छसि॥ १९॥
तिष्ठात्र तीर्थे सुचिरं स्थाणो स्थाणुरिवाचलः॥ नाम्ना लोकहितार्थाय सुवर्णशिलकेश्वरः॥ २०॥ मोक्षं नस्त
प्यमानानां देहि देव सनातनं॥ ईश्वर॥ एवमस्तु द्विजश्रेष्ठास्तिरं स्थास्यत्वसमया॥ २१॥ इह लोकापका
रायतीर्थं स्वर्मोक्षदं शुभं॥ इह स्थितोस्मि सततं संगमे पार्श्वतोपि च॥ २२॥ केदारं च कपिलं तथामि
सर्वकालमिहानघाः॥ युष्मत्प्रीत्या विनिंयेण नाम्ना स्वर्णशिलेश्वरः॥ २३॥ भवद्भिश्चतपश्चर्या कर्तु

387/2008

रे.खं. न्यामोक्ष्यसि पितृभिः ॥ कालेनाल्पेन मां प्याप्तालयं मयि गमिष्यथ ॥ २४ ॥ इत्युक्त्वा देवदेवेशस्तत्रैवांतर
धीयत ॥ मार्कं० ॥ ततः प्रभृति विख्यातं सुवर्णशिलकेश्वरं ॥ २५ ॥ यत्सुवर्णशिलास्थानेपि हि भूतो
महेश्वरः ॥ सुवर्णशिलतीर्थे यः स्नात्वा पश्यते शिवं ॥ २६ ॥ प्रणम्य भास्करं भक्त्या जुहुयाज्जातवेद
१९२ सि ॥ तिलाज्यबिल्वपत्राणि सिद्धार्थाः श्रीफलानि च ॥ प्रीयतां मे महादेवो व्याधिहा मधुनाशनः ॥
विप्राय कांचनं दद्यात घृतपुष्पफलं नृप ॥ २८ ॥ फलं बहुसुवर्णस्य यत्तस्याक्षं तु यन्नृप ॥ नरस्तल्लु
भते सर्वं कांचनं यः प्रयच्छति ॥ २९ ॥ तेन दानेन पूतात्मा मृतः स्वर्गमवाप्नुयात ॥ रुद्रस्यानुचरः
स्तावद्यावद्युगचतुष्टयं ॥ ३० ॥ ततः स्वर्गावतीर्णः स जायते विपुले कुले ॥ धनधान्ययशः सौख्य
आयुश्चापि चिरं भवेत ॥ ३१ ॥ इति श्रीरेवाखंडे सुवर्णशिलेश्वरतीर्थं ॥ १९० ॥ ॥ मार्कं० ॥ ततः श्र
णुष्व भूतीर्थमंबिकेश्वरसंज्ञितं ॥ काशांतरे संगमाद्धि पुण्यं वांछितसिद्धिदं ॥ १ ॥ अंबिकानाम विख्या
ता कान्यीश्वरसता पुरा ॥ तयातत्र तपस्तप्तं भर्तुरर्थं युधिष्ठिर ॥ २ ॥ स्थापितः परमेशानः स्वोना
म्नाराधितस्तथा ॥ कालेन बहुना तस्याः प्रसन्ने शंकरे तथा ॥ ३ ॥ वांछितस्याभवत्सिद्धिस्तीर्थस्या
स्य प्रभावतः ॥ ततः प्रभृति विख्यातं तीर्थं चैवांबिकेश्वरं ॥ ४ ॥ तत्र स्नात्वा तथा दत्वा सोसिणी यस्तिलो
कं रं ॥ ईप्सितां सिद्धिमाप्नोति स्वर्गलोके महीयते ॥ अंबिकेश्वरमभ्यर्च्य यथाल्पोपहारतः ॥
स्तुतिप्रणतिभावैश्च निवृत्येगीतनर्तकैः ॥ ६ ॥ चतुर्युगशतं पार्थ शिवलोके महीयते ॥ सकृत्प्राश
प्रदानेन पितॄणां तोषतरक्षया ॥ ७ ॥ जायते मनुजश्रेष्ठ तीर्थस्यास्य प्रसादतः ॥ ८ ॥ इति श्रीरेवाखं
डे अंबिकेश्वरतीर्थं १९१ ॥ ॥ मार्कंडेय उ० ॥ ततो गच्छेन्महाराज करंजेश्वरमुत्तमं ॥ काशायं तु स्थि १९२
ततस्थि अंबिकेश्वरतीर्थतः ॥ १ ॥ करंजमुनिना तत्र स्थापितं लिंगमुत्तमं ॥ स्वनाम्ना भरतर्षभ

लोकानां हितकामया ॥ २ ॥ अद्यापि श्रूयते गाथा यस्य विप्रस्य पांडव ॥ बाल्याद्भृतं ब्रह्मचर्यं योधला स्वच्छ 389/2008
पावरः ॥ ३ ॥ पारिक्षितो लोकपालैर्दिव्यस्त्रीलोभनादिभिः ॥ सखित्वं च मुनिर्यस्य मंत्रलंजनकेन च ॥ ४ ॥ सर्व
मित्रश्च विख्यातो जातश्चांगिरसान्वये ॥ युधिष्ठिर० ॥ तस्य गाथा त्वया का यास्ते न बाल्ये न भाषिता ॥ ५ ॥
तामेव द मुनिश्रेष्ठ श्रोतुं मे त्वरते मनः ॥ मार्कं० ॥ स पूर्वं भार्गवो नाम ऋषिर्भ्रातिथः सुतः ॥ ६ ॥ जितः करा
यतस्तेन करंजस्तेन शब्दितः ॥ तस्य गाथा न पश्चात श्रोतव्या शृणु सांप्रतं ॥ ७ ॥ कीर्तिं स्वर्गप्रदं नृणां क
रणासु कृतं कृतं ॥ कृतं च दुष्कृतं तेन पातयत्सखिलं कुलं ॥ ८ ॥ करं करोति सत्कर्म निरस्तरति दुःकृतं ॥ क
रः करोति कर्माणि मनः संप्रेरयत्यपि ॥ ९ ॥ कर्मणः स्यान्न चेत्कर्ता कथं प्रेरयितुं स्थितिः ॥ स द्विजो हि हर
मंतव्यो देवस्यामेतु कारवः ॥ १० ॥ प्रति यत्तदसतं कर्मणश्चापि दुःकृतात ॥ करंजयति यो विप्रात्क
रंजो हितापरः ॥ ११ ॥ इति गाथा महाराज लोके यस्य प्रवर्तिता ॥ तेनैवात्र करंजेन मुनिना निकृतं तप
१२ ॥ स्थापितं लिंगमतुलं करंजेश्वरसंज्ञितं ॥ सर्वपापक्षयकरं दंभलोभमलापहं ॥ १३ ॥ तत्र गत्वा
महाराज सोपवासो जितेंद्रियः ॥ स्नात्वा संतर्प्य च पितॄन् सर्वपापैः प्रमुच्यते ॥ १४ ॥ पूजयित्वा करं
जेशं दद्याद्दानं स्वशक्तितः ॥ सुवर्णरजतं चापि पणिमौक्तिकविद्रुमं ॥ १५ ॥ पादुकोपानहौ छत्रं शय्या
प्रावरणानि च ॥ दत्तं कोटिगुणं सर्वं जायते नात्र संशयः ॥ १६ ॥ संपूज्य च करंजेशं तीर्थस्यास्य प्रभा
वतः ॥ पूर्णं चतुर्युगं पार्थ मोदते शिवसंनिधौ ॥ १७ ॥ इति श्रीरेवाखंडे करंजेश्वरतीर्थं ॥ १९२ ॥ ॥
मार्कं० ॥ ततो गच्छेन्महाराज भरतेश्वरमुत्तमं ॥ धनुःशतांतरे तद्धि करंजेश्वरतीर्थतः ॥ १ ॥ शाकुंतला
यां संभूतो दुष्यंततनयो नृपः ॥ तत्र तेन तपस्तप्तमीश्वराराधनेच्छया ॥ २ ॥ स्थापयित्वा महेशानं समा
राध्य यथाविधि ॥ परितुष्टे महादेवे चक्रवर्तित्वमाप्नवान ॥ ३ ॥ चिरमायुस्तथा सौख्यं संतानं वंशव

रे.खं. र्थनं ॥ दानेन विविधेनात्र ब्राह्मणांश्चाभितोषयेत् ॥४॥ ईजे स विविधैर्यज्ञैः प्रासादांश्चकार स्व
च ॥ भरतेश्वरमभ्यर्च्य सर्वपापैः प्रमुच्यते ॥५॥ द्विजाय कांचनं दत्वा प्राप्नुयाद्वांछितं फलं ॥ इतिते कथि
तं पार्थ भरतेश्वरसंज्ञितं ॥६॥ इति श्रीरेवा० भरतेश्वरतीर्थं ॥१६१॥ ॥मार्कं०॥ नागेश्वरं रवेंद्र जं त
१९४ त्रैव तदनंतरं ॥ पुंडरीकेन नागेन स्थापितं नर्मदातटे ॥१॥ अनिंद्यलोकमन्विच्छन् लघुः पुत्रं पुराऽन
घ ॥ पुंडरीकानदत्राति रक्षा तत्कोपितं यदा ॥२॥ केशवाच्छापाद्दुदंतश्च तदा भूर्निर्विषश्वसः ॥ ततः
सलज्जितः खिन्नः प्रयातः र्णं तु नर्मदां ॥३॥ प्रसादाद्देवदेवस्य दंष्ट्रिलं पुनराप्तवान् ॥ वांछितं चातु
लां सिद्धिं प्राप शंभोः प्रसादतः ॥४॥ आशीविषः समभवत्सविशेषबलः किल ॥ पूजयित्वा महादेवं ना
गेंद्रो नागसत्तमः ॥५॥ ततो जगाम स्वधाम पुंडरीको युधिष्ठिर ॥ ततः प्रभृति विख्यातो नागेनैव न
र्मदातटे ॥६॥ तत्र तीर्थे नरः स्नात्वा पूजयेद्वृषभध्वजं ॥ नागेश्वरं स्वशक्त्या तु भक्त्या भक्तदिने नृप
॥७॥ भानुवारे तथाष्टम्यां यथासंपन्नपूजया ॥ शिवलोके स तेनापि यावदिंद्राश्चतायुतं ॥८॥ तत्कुलं
च न पश्येच्च न सर्पैः परिभूयते ॥ स्नात्वा संतर्प्य पितृन् श्राद्धं कुर्याद्यथाविधि ॥९॥ न दुःखं तस्य दौ
र्भाग्यं सप्तजन्मनि जायते ॥ शक्त्या विप्रान्भोजयित्वा दक्षिणाभिश्च तोषयेत् ॥१०॥ पितृभिः सह
राजेंद्र शिवलोके महीयते ॥११॥ इति रेवा० नागेश्वरतीर्थं ॥१६२॥ मा० ॥ ततो गच्छेन्महाराज नर्मदादक्षि
णे तटे ॥ मुकुटेश्वरतीर्थं हि सर्वकामप्रदं शुभं ॥१॥ नागेश्वरात्क्रोशमात्रे स्वयमेव समुत्थितं ॥ य
त्राविध्वंसने काले दक्षस्यादौ प्रजापतेः ॥२॥ ज्ञात्वा सतीं त्यक्तदेहां शंभोः कोपाल्लधावतः ॥ पिनाक १९७
पाणेः प्रमथैर्वृतस्य वसुधाधिप ॥३॥ कोपेन कंपमानस्य शीर्षात्तु मुकुटोऽपतत् ॥ आगतस्याचिरे वा
यासात्तीरे रथबलेन च ॥४॥ तदेव मुकुटो यावद्रुणोरुतीर्मचोत्सृतः ॥ तावत्सपादितेर्द्दष्टं शिवलिंगं समुत्थि

तं ॥५॥ ततस्तत्पूजितं सर्वैर्मुकुटेश्वरसंज्ञया ॥ तात्त्विकानस्यगीतेश्च तमभ्यर्च्य शिवं विभुं ॥६॥ 391/2008
पिनाकि सगणैः सार्धं प्रयातः पांडवर्षभ ॥ विख्यातमभवल्लोके तत्तीर्थं मुकुटेश्वरं ॥७॥ तत्रैव गत्वा महारा
ज स्नात्वा यः पूजयेच्छिवं ॥ सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥८॥ इति श्रीरेवा० मुकुटेश्वरती
र्थं ॥१६३॥ ॥मार्कं०॥ ततो गच्छेन्महाराज करंजेश्वरतीर्थतः ॥ धनुःशतद्वये पूर्णे रेवाया उत्तरे तटे ॥१॥
सौभाग्यसुंदरीतीर्थं सर्वसौभाग्यदं शुभं ॥ पुरा दक्षसुता ख्यातिर्भृगुपत्नी भवन्नृप ॥२॥ अरुंधतोप
देशेन तपश्चीर्णं व्रतं त्विह ॥ दौर्भाग्यनाशनं पुण्यं पुत्रपौत्राभिवृद्धिदं ॥३॥ नर्मदारेतीमासाद्य भ
र्तुर्नो ख्यातयुधिष्ठिर ॥ सखिभिः सहिता ख्यातिरपुत्रादोषनाशिनी ॥४॥ सौभाग्यसुंदरीं नाम गौरीं
गिरिजावल्लभां ॥ एषां जेमा सविधिना यथा प्राप्नोपदेशतः ॥५॥ उपहारैश्च नानाख्यैः तैर्यावत्संवरं नृप ॥ तत
स्तुष्टा च सा तस्या देवी सौभाग्यसुंदरी ॥६॥ सुतान्सुतांश्च प्रददौ सौभाग्यमतुलं तथा ॥ भृगोः ख्याति स
मुत्पन्ना लक्ष्मीर्विष्णोः परिग्रहः ॥७॥ जया च विजया चैव गौर्याः सख्यौ च ते नृप ॥ भर्तुश्च न लुभाख्याति वं
भवातीव सुंदरी ॥८॥ पूर्वोपसं सम्यक्ख्यातदास्यैवं तवेवाह ॥ सौभाग्यमक्षयं देहि भर्तुर्वल्लभतां मम
॥९॥ ततस्तां प्रार्थयामास ख्यातिः सौभाग्यसुंदरीं ॥ प्रसन्ना यदि मे देवि संतानं देहि सुंदरि ॥१०॥ रू
पं देहि यशो देहि भाग्यं भगवन्देहि मे ॥ पुत्रान्देहि जयं देहि सर्वान्कामांश्च देहि मे ॥११॥ तीर्थं चात्र त्व
या स्थेयं यच्चमात्वा शपितामया ॥ लोकानामुपकाराय मुनीनां मुक्तिदे तव ॥१२॥ कामदं तीर्थमेतद्धि
भवाल्लोकिकामदं ॥ मार्कं० ॥ तथैवं प्रार्थितादेवि तथेत्युक्त्वा युधिष्ठिर ॥१३॥ वरदा सर्वलोकानां तत्रैवां
तरधीयत ॥ ततः प्रभृति विख्यातं ॥ तीर्थं परमशोभनं ॥१४॥ सौभाग्यकरणं दिव्यं नरनारीमनोरमं ॥
तत्र याः शुभगा नारी नरो वा नृपसत्तम ॥१५॥ स्नात्वार्चयेदुमेशानं सौभाग्यं तस्य जायते ॥ तृतीयायाम

रे.खं. होरात्रं सोपवासो जितेंद्रियः ॥१६॥ निमंत्रयद्द्विजाग्र्यान् भक्त्या सपत्नीकान् सुरूपिणः ॥ गंधमाल्यैरलंकृत्य
पुष्पधूपादिसंयुतं ॥१७॥ भोजयेज्जलपायसान्नेन ॥ स्वशक्त्या भक्तितः ॥ भोजयित्वा यथान्यायं प्रणिपत्य द्विजोत्तमान्
क्षमापयेत ॥१८॥ सौभाग्यसुंदरी देवी सुखसंतानदायिनी ॥ संपूजिता प्रीयतां मे मे गेहे च रसमन्विता ॥१९॥
१९५ यथा ते देवदेवेन न वियोगः कदाचन ॥ ममापि करुणां कृत्वा तथा त्वमिति चिंतयां ॥२०॥ एवं प्रासाद्य त
स्या यथा पुण्यं समुदाहृतं ॥ तदहं संप्रवक्ष्यामि यथा देवेन भाषितं ॥२१॥ सौभाग्यं तु परं तेषां वृद्धिर्धर्म
स्य कुवंधनं ॥ वंध्यात्वं सप्तजन्मानि जायते न युधिष्ठिर ॥२२॥ ज्येष्ठमासि सिते पक्षे तृतीयायां विशेषतः
॥ तत्र गत्वा तु या भक्त्या पंचाग्निं साधयेन्नरः ॥२३॥ सोपि पारे परो पश्च मुच्यते नात्र संशयः ॥ तत्रागत्य
तु मर्त्यश्चंद्रकांतिर्जायते नृप ॥२४॥ देहपाते प्रजेद्वर्गं गौर्भिश्चैवं शंकरोब्रवीत ॥ नानावर्णैस्तथा वस्त्रैर्द
पयं परिधापयेत ॥२५॥ पुष्पैर्नानाविधैश्चैव गंधपुष्पैः धूपैः सुशोभनैः ॥ कंठसूत्रं कसिंदूरं कुंकुमेन विलिप
येत ॥२६॥ सहस्रगुणितं सर्वं दत्तं भवति भारत ॥ कल्पयेत्तु स्त्रियं गौरीं ब्राह्मणं शंकरं तथा ॥२७॥ तद्रूपा
तावुभौ ध्यात्वा दानमुत्सृजेत्ततः ॥ कंकणं कंचुकं चैव कुंठिकां कज्जलं तथा ॥२८॥ सप्तधान्यं च भोज्यं
च चंदनान्यपि दापयेत ॥ क्रीडते शंकरे लोके शिवेन सह निश्चितं ॥२९॥ अपुत्रो लभते पुत्रमधनो ध
नमाप्नुयात ॥ मुमुक्षुर्मुक्तिमाप्नोति निर्वलो बलमुत्तमं ॥३०॥ कामदं तीर्थमेतद्धि नर्मदायां व्यवस्थितं ॥
३१॥ इति श्रीरेवा० सौभाग्यसुंदरीतीर्थं ॥१६५॥ ॥ मार्कं० ॥ ततो गच्छेत राजेंद्र धनदेश्वरमुत्तमं ॥ भोगदा १९५
यि कतीर्थं तद्विश्रुतं लोकभाषया ॥१॥ सौभाग्यसुंदरीतीर्थाद्गत्वा क्रमशो नातिदूरतः ॥ दक्षिणे करणं पु
गाम्य कोशार्धं परतः ॥२॥ धनदेन तपस्तप्तं पाप संतापसंभवे ॥ विमानं पुष्पकं प्राप्तं वित्तपालकमव्ययं ॥
३॥ अलकापुरराज्यं च प्राप्तवान् धनदस्तथा ॥ तत्र गत्वा यथा राजन् स्नातश्चैवाईश्वरं सता ॥४॥ सुवर्णं रजतं

393/2008

वा न्यच्च यस्तत्र प्रयच्छति ॥ स च सर्वाकरपूर्णो धनी चैवेह जायते ॥५॥ तस्यापि तत्परिच्छेदो न कदाचिद्भवे
दिह ॥ धनदेश्वरमभ्यर्च्य भुवि राजा भवेन्नरः ॥६॥ संतर्प्य च पितॄन्नेन तिलतोयेश्च भारत ॥ उषित्वा त्र्यं
करपुरे पतन् लोके व्रजेत्ततः ॥७॥ इति रेवा० धनदेश्वरतीर्थं ॥१६६॥ ॥ मार्कं० ॥ ततो गच्छेत राजेंद्र तीर्थं त
द्वारिणेश्वरं ॥ प्रख्यातं त्रिषु लोकेषु सर्वपापहरं परं ॥१॥ नर्मदा उत्तरे तीरे धनदेश्वर तीर्थतः ॥ युधिष्ठि०
कारो हिणी मुनिश्रेष्ठ कस्मात्तीर्थं समागता ॥२॥ चित्रतीर्थस्य माहात्म्यं तत्सर्वं वद मे विभो ॥ मार्कं० ॥
तत्सर्वं कथयिष्यामि शृणुष्वैकमना नृप ॥३॥ दक्षप्रजापतेः पुत्र्यः सप्तविंशतिरापुरा ॥ चंद्रपत्न्योभि
गदंते तासां मध्ये तु रोहिणी ॥११॥ शील वृत्त गुणोपेता रूपयौवनसंयुता ॥ अभिमानवती पार्थ तासां
त्यक्ता शिवी शिता ॥१२॥ स्वाभिमानाच्च ताश्चैव द्रष्टेन वहति न कश्चन ॥ कदाचिन्नारदं प्राप्य सापप्रच्छ
शुभेक्षणा ॥१३॥ मुने नारद त्वं वेत्सि विश्वस्य ज्ञानचानघ ॥ कमप्युपायं वद मे तीर्थदानव्रतादिकं ॥१४॥
सर्वासामपि स्त्रीणां मुख्यायेन भर्तापि तुष्यति ॥ नारद उ० ॥ दक्षात्मजे महाभागे साधु पृष्टासि रोहिणी ॥१५॥
एतमेवार्थमुद्दिश्य पृच्छमहा च उपमागतं ॥ यथाहं कथयिष्यामि तच्छृणुष्व शुभे शुभे ॥१६॥ नारद० ॥ गोष्ठा भु
मानि त्वं त्यक्त्वा गौरीं चदेहसंभवांस्तितुं ॥ यथाभियोगं मनस्त्वं वांछितसिद्धं शुभं पदं प्राप्तुं ॥१७॥ अपि
चित्त स्नापयसस्मानं स्नपयस्वेच्छतो भजेत ॥ न भेजे दीनता तांतो हि कथं भक्त्या भजेन्नरः ॥१८॥ तत्रैव तरतद
गत्वा रवाधारा जपत्सुभे ॥ भक्त्या भजभवानि त्वं यजेगौरी हरप्रिया ॥१९॥ तपश्चरंती नचिरात्ततः
प्राप्स्यसि वांछितं ॥ स्वाति तस्तु गमिष्यामि स्मर्तव्यः समयः पुनः ॥२०॥ इत्यादृष्य मुनिश्रेष्ठो ययौ गग
नमाश्रितः ॥ मार्कं० ॥ ततः सापरमं प्राप्य वैराग्यं नृपपुंगव ॥२१॥ आगत्य नर्मदातीरे चकार विपुलं त
पः ॥ एकांतरं त्रिरात्रेश्च पक्षेन च द्वादशाख्यः ॥२२॥ पक्षमासोपवासैश्च शोषयामास जं च पुः ॥ कृष्

वीक्षयमाणाश्चैश्वरस्नानं श्रीमान्अजितेंद्रियाः॥१७॥ आराधयंती सततं सोमं सतीर्थदर्शिताः॥ गुरुवृन्दस्य
थागौरीं सुरारीवलमर्दिनीं॥१८॥ देवीं भवेगौरीं पार्थ सर्वस्यार्तिविनाशिनीं॥ स्थापयित्वा ततो गौरीं
 त्रिसंध्यं सार्चयेन्नृप॥१९॥ ततस्तुष्टा महाभागा देवी देव सहराजितं॥ पत्नी चैव च मासाक्षुद्रोहिणीं
शशिनः प्रिया॥२०॥ गौरी॥ प्रसन्नास्मि महाभागे सेश्वरा नियमेन ते॥ दास्यामि तव यच्चिंतवरं वर
यथेप्सितं॥२१॥ एतच्छ्रुत्वा वचस्या रोहिणी शशिनः प्रिया॥ प्रत्युवाच तदा यद्वै तच्छृणुष्व नराधिप॥२२॥
रोहिण्युः॥ सर्वासां सोमपत्नीनां मुख्या चन्द्रस्य वल्लभा॥ यथा भवानि मनश्चिरा तथा भवा तु पार्वती॥२३॥
चंद्रेण सह पत्न्या वरस्या तातस्यांसहचारिणी॥ मार्कं॥ एवमस्त्विति सा चोक्ता भवानी भव वल्लभा॥२४॥
स्तूयमाना मुनिगणैस्तत्रैवांतरधीयत॥ रोहिणी च महाभाग वरं प्राप्य प्रहर्षिता॥२५॥ भवं भवा
नीं संपूज्य सोत्साहा स्वगमद्गृहात॥ तदाप्रभृति विख्याता रोहिणी शशिनः प्रिया॥२६॥ संजाता सर्व
कालं तु मुख्या स्त्रीणां च भारत॥ ततः प्रभृति तत्तीर्थं विश्रुतं नर्मदा तटे॥२७॥ अत्र तीर्थे तु या नारी नरा
वा भक्तितत्पराः॥ रोहिणीशं वल्लभा नीचस्नात्वा संपूजयच्छुचिः॥२८॥ परस्परं महास्नेहो दंपत्योः संप्रजा
यते॥ वल्लभा च भवेन्नारी भर्तुर्वै रोहिणी यथा॥२९॥ तत्र तीर्थे च या नारी नरः कन्यादानं करोति हि॥ सप्तज
न्मानि तस्येह वियोगो न भवेत्क्वचित्॥३०॥ तत्रैव दंपती चापि पार्थ भोजयेत्स्व सुभागिनी॥ न दुःखं हि न दौ
र्भाग्यं न वियोगमपुत्रता॥३१॥ न भजेत्स कदाचिद्वै नृप गौरीप्रसादतः॥ श्राद्धं कृत्वा तु पश्चाच्च भोजये
त ब्राह्मणान्शुभान्॥३२॥ पितॄणामक्षयां तृप्तिस्तस्य स्वर्गस्य शाश्वतः॥३३॥ इति श्रीरेवा रोहिणीश्वर
तीर्थं॥१९८॥ ॥ ततो गच्छेन्महाराज चक्रतीर्थमनुत्तमं॥ रोहिणीश्वरतीर्थात्तु स्थितं क्रमतांतत्रयं॥
१॥ सेनापुरमिति ख्यातं सर्वपापक्षयंकरं॥ सेनापतिं चाभिषिक्तं देवदेवेन चक्रिणा॥२॥ आनीतः समहा

सेनो देवः शक्रादिभिः सह॥ दानवानां वधार्थाय जयाय च दिवौकसां॥३॥ नानानादैश्च विप्रपुंगव
अभिषिच्य यथाविधि॥ शंखभेरीनिनादैश्च पटहानकनिस्वनैः॥४॥ वीणावेणुनिनादैश्च मृदंगपणवै 395/2008
स्तथा॥ झल्लरीतालघंटाभिर्जयशब्दैः सुमंगलैः॥५॥ एवं सति महानादा दानवा बलदर्पिताः॥ रुरु
र्नामविप्र तीर्थमभिषेकस्य चागताः॥६॥ हस्त्यश्वरथपादातैः परस्य सर्वतो दिशः॥ तत्र तेन महायु
द्धं प्रवृत्तं सह भारत॥७॥ गदाशक्त्यृष्टिमुशलैः खड्गतोमरकंपनैः॥ भल्लैश्च कर्णिनाराचैर्वत्सदं
तैः क्षुरप्रकैः॥८॥ ततस्तु तां महासुरास्ति वाहिनीं क्षणेन चापच्युतबाणघातैः॥ प्रमथ्य हस्त्यश्वरथां
न्महात्मा जगाह चक्रं रिपुनाशनाय॥९॥ श्रीकृष्णचक्रं निशितं भयंकरं दैत्येषु दानवेषु सुदर्शनं रणे
॥ पपात दैत्येंद्रपतेः पुरो रमहत्क राप्रमुक्तं मधुसूदनस्य॥ तं दृष्ट्वा सहसा विप्रमभिषिक्तः षडाननः
॥ संत्यज तत्र संस्थानं चचार विपुलं तपः॥११॥ मुक्तं चक्रं विनाशाय रिपोः शक्त्येन पांडव॥ द्विदलं दा
नवं कृत्वा पपातामले जले॥१२॥ तदाप्रभृति तत्तीर्थं चक्रतीर्थमिति स्मृतं॥ सर्वपापविनाशाय नि
र्मितं विश्वमूर्तिना॥१३॥ तत्र तीर्थे नृप स्नात्वा पूजयेद्देवमच्युतं॥ पुंडरीकस्य यज्ञस्य फलं सोत्र लभे
न्नरः॥१४॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत ब्राह्मणान्शुचीन्॥ क्षांतान्दांतान्जितक्रोधान्कोटिभोज्यफ
लं लभेत्॥१५॥ तत्र तीर्थे मुमुर्षुर्यः प्राणान्यस्त्वा परित्यजेत॥ विष्णुलोकं स तो याति जयशब्दादिपूजि
तः॥१६॥ क्रीडते सयथाकामं देवगंधर्वपूजितः॥ इह चागत्य भूयोपि जायते विपुले कुले॥१७॥ एतत्पु
ण्यं पापहरं धन्यं दुःस्वप्ननाशनं॥ कथितं ते महाभाग भूयश्चान्यच्छृणुष्व मे॥१८॥ इति श्रीरेवा सेना
पुरे चक्रतीर्थं॥१९९॥ ॥ मार्कं॥ ततो गच्छेन्महाराज तीर्थं चाप्युत्तरेश्वरं॥ चक्रतीर्थात्क्रमशतेपुण्यं
कामफलप्रदं॥१॥ स्थापितं तत्तु रुद्रस्य नकायीरं भगुणस्य वै॥ अभिषिच्य तदा स्कंदं स्थापयित्वा पुरः

रे॰खं॰ शिवं॥३॥ महासेनमुवाचाथ विष्णुर्विश्वैकपालकः॥ विष्णुः॥ रुद्रलिंगसमभ्यर्च्य कार्यसिद्धिर्दृढं गुह॥
४॥ उत्तरस्य च कार्येषु समाहितमना भव॥ वर्णितः शिखिमुनिभिः सुरसिद्धैः समारुतैः॥ ५॥ इत्युक्तो
त्तरकार्येषु रुद्रमुख्यैः सुरैस्ततः॥ उत्तरेश्वरनामानं लिंगमभ्यर्चितं पृथक्॥ ६॥ ततस्तद्दैत्यना
१८० शाय कार्यारंभमुपाश्रितः॥ गुह मुख्या नृपश्रेष्ठ विष्णुना त्वपरे सुराः॥ ७॥ ततः प्रभृति तत्तीर्थमुत्त
रेश्वरसंज्ञितं॥ तस्य संपूजनात्पार्थ कार्यारंभस्तु सिध्यति॥ ८॥ तत्र स्नात्वा च विधिना संतर्प्य च वसु
रान्पितॄन्॥ पूजयेद्यदि मनुज्योऽश्वमेधः स गातवा युधिष्ठिर॥ ९॥ पितॄणामक्षया तृप्तिर्यावद्वर्षायुतं
नृप॥ १०॥ इति श्रीरेवासेनापुरे उत्तरेश्वरतीर्थं॥ १६८॥ ॥मार्कं॰॥ ततो भोगेश्वरं नाम सर्वदेवैः प्रति
ष्ठितं॥ उत्तरेश्वरतीर्थात्तु स्थितं क्रमशतत्रये॥ १॥ साधिके सर्वतः श्रेष्ठं सर्वभोगप्रदं शुभं॥ सर्पेणा
संगुह्य दत्त्वा सर्वभोगा निवेदिताः॥ २॥ दिव्यास्ते देवसंघैस्तु पर्वणि यथायोजिता॥ भोगेश्वराय यदे
वस्तदा संपूजितं नृप॥ ३॥ ततस्ते कदाचित्ता न दिव्यान्दद्युर्भोगान्युधिष्ठिर॥ स्वयं दधुश्च तान्देवाः
भोगांश्च पृथग्विधान्॥ ४॥ ततः प्रभृति तत्तीर्थं नाम्ना भोगेश्वरं नृप॥ तत्र स्नात्वा शिवं पूज्य श्राद्धं
दत्त्वा यथाविधि॥ ५॥ दिव्यलोकेषु सर्वेषु लभेद्भोगाननुत्तमान्॥ दीपदानेन राजेंद्र दिव्यतेजा भ
वेन्नरः॥ ६॥ इति श्रीरेवासेनापुरे भोगेश्वरतीर्थं॥ १६९॥ ॥मार्कं॰॥ ततः केदारसंज्ञं तु तीर्थं पुण्यं यु
धिष्ठिर॥ भोगेश्वरात्तु तीर्थात्तु चत्वारिंशत्क्रमांतरे॥ १॥ पुरा महिषरूपेण दैत्यो देवमभिद्रुतः॥
हरस्तदा रके दारं हिमाद्रितटवासिनं॥ २॥ ततः प्रज्ञापितो देवस्तं महिषं विचार्य च॥ रेवातीरमिह १८०
प्राप्तः सुरैस्तत्समुह्य स्थितं॥ ३॥ चकार स्थितिमात्रेण केदारः कलिनाशनः॥ तावत्सन्निहितो देवः स्कं
दनामरबुधिना॥ ४॥ ततः प्रभृति विख्यातं तीर्थं केदारसंज्ञितं॥ तत्र स्नात्वा शिवं नाम्ना केदारं पूजयेत्तु

यः॥ ५॥ हिमाद्रिस्थितकेदारयात्राफलमवाप्नुयात्॥ श्राद्धं दत्त्वा पितॄणां च भवेत्तृप्तिर्हि शाश्वती॥ ६॥ दीप 399/2008
दानेन चरेत् शिवलोके महीयते॥ ७॥ इति श्रीरेवासेनापुरे केदारतीर्थं॥ १७०॥ ॥मार्कं॰॥ ततो गच्छेन्म
हाराजेन्निष्कलंकमहेश्वरं॥ स्थितं क्रमशते पार्थ तद्धि केदारतीर्थतः॥ १॥ निष्कलंको भवेद्यत्र राम सह
त्रेतायां किल॥ त्रिःसप्तकृत्वः पृथिवी कृता निःक्षत्रिया पुरा॥ २॥ पितुर्वैरमनुस्मृत्य पितॄणां वचनाद्धि
ह॥ रेवाया उत्तरे तीरे तपस्तप्तुं समागतः॥ ३॥ उत्तार्य कलंकं कलं ब्राह्मणानुचितार्जितं॥ पितृभिर्भा
षितस्त्वं तपस्वी प्रचचार सः॥ ४॥ स्थापयित्वा महेशानं त्रिःस्नायी शिवपूजितः॥ नतिस्तुतिविशेषैश्च
ध्यानजाप्य युधिष्ठिर॥ ५॥ कृत्वापि विश्वकर्तारं निष्कलंको यथा भवान्॥ कपालिन्मामपि तथा कलंक
रहितं कुरु॥ ६॥ त्रिकालमिति मंत्रेण नत्वा संप्रार्थयत्सदः॥ ततः प्रसन्नो भगवान् जामदग्न्यस्य भारत॥ ७॥
ददौ स निष्कलंकत्वं सिद्धिं चैवास्य शंकरः॥ तथा ततः प्रवरं रामो निष्कलंको भवन्नृप॥ ८॥ निष्कलंकेश्वरं
नाम्ना शिवं संपूज्य भारत॥ यथागतं जगामाथ पितृभिश्चानुमोदितः॥ ९॥ ततः प्रभृति विख्यातं निष्कलं
केश्वरं नृप॥ तत्र स्नात्वा पूजयित्वा महेशं चतुर्दश्यां निष्कलंको नरः स्मृतः॥ १०॥ कलंकयुक्तानुपदे चिकं वा
तं निनीषां याति तूर्णं नरस्य॥ स्नात्वा यस्तत्र राजेंद्र निष्कलंकं समर्चयेत्॥ ११॥ सर्वकलंकरहितः शि
वलोके चिरं वसेत्॥ निष्कलंकेनरस्तीर्थे ब्राह्मणान्भोजयेच्च यः॥ १२॥ उः स्वर्गभोग्यरहितः कोटिभोज
फलं लभेत्॥ १३॥ इति श्रीरेवासेनापुरे निष्कलंकेश्वतीर्थं॥ १७१॥ ॥मार्कं॰॥ ततः परं व्रजेत्पार्थ मम तीर्थ
मनुत्तमं॥ निष्कलंकात्परं तीर्थात्तद्वात्रिंशत्क्रमांतरे॥ १॥ मार्कंडेश्वरसंज्ञं वै रेवायाश्चोत्तरे तटे॥ स्कंदसे
नापतिं दृष्ट्वा शिवकोटिसमागता॥ २॥ तदाहमपि राजेंद्र स्नात्वा पश्येश्वरे वृथा॥ अभिषिक्ते तदा स्कंदे
जयार्थं च सुरर्षिभिः॥ ३॥ मया च स्थापितः शर्वः स्थितो मासचतुष्टयं॥ मम नाम्ना महाराजेंद्र शंभवे भया

पहः॥४॥ तत्र तीर्थे निरः स्नात्वा जलांते तदुपस्थितः ॥ मौनेन सर्वपापेभ्यः स्तु ताता अते तः कृते ध्रुवम् ॥५॥ तत्र
यः पूजयेद्देवं जपकर्म स्तु जपेन्नृप ॥ अपमृत्युविनाशश्च तस्यावश्यं प्रजायते ॥६॥ इति श्रीरेवा
 खंडे सेनापुरे मार्कंडेश्वरतीर्थं ॥७२॥ ॥ मार्कं ॥ धूतपापं ततो गच्छ सर्वपापप्रणाशनं ॥ समीपे च
कृतीर्थस्य विष्णुना निर्मितं पुरा ॥१॥ निहते दानवे घोरे श्रंत्यवंशसमुद्भवे ॥ कायस्थेपि च तदा पार्थ द
वदेवो जनार्दनः ॥२॥ तत्पापं स्यप्रणाशार्थं गतवांस्तत्र भारत ॥ यत्र सेनापतिः स्कंदः कृतस्तेन म
हात्मना ॥३॥ तत्र तीर्थे जितक्रोधः श्चचार विपुलं तपः ॥ ईश्वरं मौनमास्थाय यत्नात्कश्च स्तु सुरासु
रैः ॥४॥ स्नात्वा त्रिप्रातः संध्याप्युपजप्य विधानतः ॥ तत्र प्रादाद्विजातिभ्यो दानानि विविधानि च ॥५॥
तत्क्षणान्मुक्तपापाच धूतपाप बभूव तु ॥ धूतपापेश्वरं नत्वा गतवानात्मपरं हरिः ॥६॥ ने छस्वं विगतदे
षं तापत्रयविवर्जितं ॥ सर्वदोषविनिर्मुक्तं सुरसिद्धनिषेवितं ॥७॥ ततः प्रभृति विख्यातं धूतपाप
श्वरं नृप ॥ नरो गच्छेत्र यस्तत्र पापं कृत्वापि दारुणं ॥८॥ स्नात्वा संपूजयेद्देवं धूतपापं महेश्वरं ॥ स्ना
त्वा जप्वा विधानेन मुच्यते सर्वपातकैः ॥९॥ पितॄणां श्राद्धदानेन तत्र तीर्थे युधिष्ठिर ॥ भवंत्र्याक्ष
याः तृप्तिर्यावदाभूतसंप्लवं ॥१०॥ दीपं दद्याच्च देवाय यश्च तस्याप्यस्तत्र भारत ॥ तस्य वंशे कुलेपि कालु
ष्यं न प्रजायते ॥११॥ दीर्घमायुरवाप्नोति दीप्तिमांश्च प्रजायते ॥ दोग्ध्रीं दद्याद्वत्सयुतां धेनुं देवमुद्दिश्य
वाडवे ॥१२॥ सर्वोपस्करसंयुक्तां सहिरण्यां सदक्षिणां ॥ भक्त्या गुणगरिष्ठाय सशैवं परमाप्नुयात ॥
१३॥ पूजितः सुरगंधर्वैर्यावदाहूतसंप्लवं ॥ ततोवतीर्णः कालेन राजराजो भवेद्भुवि ॥१४॥ पापधूतेश्व
रे पार्थ ब्राह्मणान्यस्तु भोजयेत ॥ एकस्मिन्भोजिते तत्र कोटिर्भवति भोजिता नरः ॥१५॥ सर्वपापविनि
र्मुक्तः शिवस्य गणतां लभेत ॥ नृत्यं गीतं तथा वाद्यं दत्वा देवाय भक्तितः ॥१७॥ गांधर्वलोकमाप्नोति स

वैः सौख्यसमन्वितं ॥ स्तुतिजाप्यादिकं कृत्वा लभेत्संतानमक्षयं ॥१८॥ इति ते कथितं पार्थ धूतपापेश्वरं म 399/2008
या ॥ कीर्तनाच्छ्रवणादस्य लभेद्यत्फलं नरः ॥१९॥ इति श्रीरेवा० सेनापुरे धूतपापेश्वरतीर्थं ॥७३॥ ॥
मार्कं ॥ ततो गच्छ महाभाग तीर्थमांगिरसं शुभं ॥ स्थितं कम सहस्रांते धूतपापात्पुरातनं ॥१॥ उत्तरे नर्मदा
कूले पुत्रपौत्राभिवर्धनं ॥ पुरा येवांगिरा नाम ब्रह्मणो मानसः सुतः ॥२॥ स्ववंशे ससर्ज संतानं पुत्ररूपं प्र
थग्विधं सृष्टं च विलयं याति पुनश्चापि समुद्भवान ॥३॥ बहुकृत्वो यदा सृष्टं न स्थितिं याति भार
त ॥ तदा चिंतान्वितो विप्रः किं कार्यमिति दुर्मनाः ॥४॥ ततः प्रपच्छ धातारं पुत्रार्थः किं न सिध्यति ॥ तु
तोष्याब्रवीन्मुहूर्तं स वेधाः प्राह स्वपुत्रकं ॥५॥ ब्रह्मो० दोषो मम तवत्स्मारब्धो यदा मम पि आयत
तदाहमपि चात्मानं तपसा शोधयामि वै ॥६॥ तथा त्वमपि गच्छाशु नर्मदां शिवजां धुनीं ॥ तत्र गत्वा
तरेकूले तपसां गे विमुक्तय ॥७॥ सर्वदोषहरं चाशु तपसाराधय न्सुतः ॥ प्रपस्यसे वांछितं सर्वं त
तः शंभोप्रसादतः ॥८॥ मार्कं ॥ इत्याकर्ण्यांगिरो वाक्यं पितुराप्टच्छ सत्वरं ॥ अगम्य नर्मदातीरं स्तुती
रं सुरसेवितं ॥९॥ पुत्रहेतोर्युगस्यादौ चचार विपुलं तपः ॥ निसंत्रिषवणस्नायी यजन्देवं सनातनं ॥१०॥ पूजयंश्च महादेवं कृच्छ्रादिव्रतधारकः ॥ द्वादशाब्दे ततः पूर्णे तुतोष परमेश्वरः ॥११॥ वर
याच्छद्यामास द्विजमांगिरसं विभुः ॥ सरणो बमहादेवं पुत्रं पुत्रवरे मुनिः ॥१२॥ वेदविद्याव्रतस्ना
तं सर्वशास्त्रविशारदं ॥ राजविद्याविशेषज्ञं उपायप्रतिपादकं ॥१३॥ देवानां मंत्रिणं श्रेष्ठं आचा
र्यं विधिपारगं ॥ पूज्यं सुरगुरुं राजन् सर्वलोकनमस्कृतं ॥१४॥ आत्मलक्ष्मीममाचासं ब्रह्मण्यं ब्रा
ह्मणाधिपं ॥ अक्षयं चाव्ययं मह्यं पुत्रं देहि महेश्वर ॥१५॥ ईश्वर ॥ यथाभिलिखितः पुत्रो वेदवेदांग
पारगः ॥ भविष्यति च ते पुत्रो ह्यस्तु क्रांतरधीयत ॥१६॥ ततस्तत्रांगिरा पार्थ प्रतिष्ठाप्य महेश्वरं ॥ स्व

नाम्ना पुत्रसंतानसिध्यिदं पापनाशनं ॥१७॥ पूजयित्वाग्निजं धाम सजगाम द्विजाग्रणीः ॥ वरेण ते
नांगिरसो बृहस्पतिरजायत ॥१८॥ यथाभिलषितं पूर्वं वेदवेदांगपारगः ॥ जाते पुत्रेंगिरा पार्थ सं
तर्प्य पितृदेवताः ॥१९॥ हृष्टपुष्टमना भूत्वा जगामांतरपर्वतं ॥ ततः प्रभृति विख्यातं तीर्थमांगिरसे
 श्वरं ॥२०॥ अत्रे वांगिरसस्तीर्थे यः स्नात्वा पूजयेच्छिवं ॥ सर्वपापविनिर्मुक्तो रुद्रलोकं स गच्छति ॥
२१॥ अपुत्रो लभते पुत्रमधनो धनमाप्नुयात् ॥ कन्या प्राप्नोति भर्तारं सौभाग्यं च पतिव्रता ॥२२॥ यद्
छेत्तत्र यं कामं निश्चितं लभते नरः ॥ श्राद्धं कृत्वा विधानेन पितॄणां तृप्तिमावहेत् ॥२३॥ मार्गशीर्षे च
वा चैत्रे वा दर्शादि जमो जयेत् ॥ नं॥ अष्टम्यां वा चतुर्दश्यां छत्रोपानत्प्रदे हि यः ॥२४॥ वस्त्रयुग्मप्रदा
ता व स्वर्गलोके महीयते ॥२५॥ इति श्रीरेवा० आंगिरसेश्वरतीर्थं ॥१७४॥ ॥मार्कं०॥ ततो गच्छेत राजें
द्र तीर्थं कोटीश्वरं परं ॥ स्थितमांगिरसात्तीर्थात्पूर्णं क्रमशतत्रयं ॥१॥ स्कंदाभिषेकसमये सुरा
सुरसमागमे ॥ कोटिशो मुनयस्तत्र प्राप्ता दृष्टुं महोत्सवं ॥२॥ निवृत्ते चाभिषेके तु ऋषयस्ते युधिष्ठि
र ॥ निवृत्तिं परमां प्राप्य वीक्षमाणाः सरिद्वरां ॥३॥ मनस्सु जयसुतां पुण्यां पापतापप्रणाशिनीं ॥ रेवां
देवादिसंसेव्यां दृष्ट्वा हृष्टा मुदं ययुः ॥४॥ ऋषिकोटिस्ततस्तत्र स्थापयित्वा महेश्वरं ॥ चतुर्मासस्थि
तिं चक्रुः स्नानजाप्यार्चने रताः ॥५॥ नोदीमावाहयामासुः कोटवीं नाम नामतः ॥ विधाय संगमं तत्र
वेदपारायणं व्यधुः ॥६॥ ध्यानयोगरताश्चान्ये स्तुतिजाप्यपराः परे ॥ कोटीश्वरं नर्मदायां प्रतिष्ठाप्य द्वि
जोत्तमाः ॥७॥ महेशालिंगिलिमाच्य ययुः सर्वे यथागतं ॥ ततः प्रभृति विख्यातं कोटितीर्थं युधिष्ठिर ॥८॥
स्थापितं मुनिकोटीभिः सुरसंघनिषेवितं ॥ सर्वत्र संगमाः पुण्या नद्योन्यपतिसत्तम ॥९॥ सर्वातिसं
गमश्रेष्ठो नर्मदाकोटवीभवः ॥ तत्र तीर्थे नरः स्नात्वा पूजयित्वा महेश्वरं ॥१०॥ सर्वपापक्षयं प्राप्य धर्मेप्सि

प्सितं लभेत् ॥ कोटीश्वरं समभ्यर्च्य यथाशक्त्युपचारतः ॥११॥ यावन्मन्वंतरं पार्थ शिवलोके मही 401/2008
यते ॥ पितॄणां श्राद्धदानेन तृप्तिर्भवति चाक्षया ॥१२॥ इति श्रीरेवा० कोटवीसंगमो कोटीश्वरतीर्थं ॥ ॥१७५॥
मार्कं० ॥ अयोनिजं ततो गच्छेत् तीर्थं तापत्रयापहं ॥ तीर्थात् कोटीश्वरात् पार्थ स्थितं क्रोशद्वयांतरे ॥१॥ अ
सितो देवलः पूर्वं तपस्याकर्णितो मदि ॥ भवद्दृष्टाथ वा पार्थ तत्कुले मुनिसत्तमः ॥२॥ विधानंद इति
ख्यातः सर्वविद्यासु पारगः ॥ सानुस्वारस्य ठन्मोपि नास्मि क्यांपरे संज्ञितं ॥३॥ अपुत्रः स तु बभ्राम श्रा
मं तीर्थवनं च तं ॥ मुनीनामाश्रमांश्चापि योगिनां चापि संगतिं ॥४॥ केनापि योगिना दत्तं फलमे
कं सपुत्रकं करं ॥ दत्तात्मपत्स्वभार्यायै फलं मंत्राभिमंत्रितं ॥५॥ इत्याज्ञाया दनु क्वापि स्नेहात्तस्य फलं ददौ
॥ सस्य सुपुत्रदीमद गृहीत्वा स्वगृहं व्रज ॥६॥ एवं विसर्जिते नाथ तेन मार्गे सरित्तटे सुष्वाप तरुमूले त
त्समासीनेन भक्षितं ॥७॥ तद्देवभक्षणात्तस्य भस्मंगर्भमवाप सः ॥ दिव्यमंत्रप्रभावो यन्मितिमत्वाक
दपि सः ॥८॥ विधानंदा मुनिर्योत्वा सर्वं मे तन्यवदयेत् ॥ ततो योगबलत्यागी स ख्यातस्य युधिष्ठि
र ॥९॥ धिक्कारध्वस्तरं मित्रं भवितव्यमिति ब्रुवन् ॥ पितरं जीवयामास पुनर्वीलुस्य तस्य तं ॥१०॥ संस्का
रे योजयामास विधानंदो मुनिः सुतं ॥ अयोनिजेति नामास्य तत्समक्षं न कारसः ॥११॥ व्रतबंधं च नेरा
श्वस षडंगमदृक्रमात् ॥ विद्याश्च विविधाः प्राप स च्छिष्य विधिना सुतः ॥१२॥ पितुः कालेन चाप्येन तत
स्तीर्थानि जग्मिवान् ॥ कुमारिहागतः सोपत्रस्तचारीर योनिजः ॥१३॥ रेवातीरे तपः कुर्यात्सतिसाध्य त्र्यं
बकं ॥ ततस्तुष्टोस्य भगवानदद्वांछितं नृप ॥१४॥ गृहाश्रमं पुत्रपौत्रान् शिवलोकं च शाश्वतं ॥ ततः
प्रभृति विख्यातं तत्तीर्थं भरतर्षभ ॥१५॥ अयोनिजेश्वरं नाम सर्वकामफलप्रदं ॥ अयोनिजेश्वरे ती
र्थे स्नात्वा संपूज्य शंकरं ॥१६॥ पुत्रपौत्रान वाप्नोति देहांते च शिवं व्रजेत् ॥ अयोनिजं समभ्यर्च्य विधिना

रे.खं. भरतर्षभ॥१७॥ रुद्राध्यायं जपेद्यस्तु स सर्वपापैः प्रमुच्यते॥ स्नात्वा चोत्तरजं जप्त्वा द्रुपदां चाघमर्षणं॥१८॥
लभेद्भुक्तिं च मुक्तिं च गुरुः कृतं वापि न त्रपति॥ देवपितार्च्चनं कृत्वा श्राद्धं कृत्वा यथाविधि॥१९॥ परं पदमवा
२०० प्नोति प्राणी येच चिरं पितॄन्॥ उपानहौ तथा छत्रं कौपीनं च कमंडलुं॥२०॥ ददन्नः अश्व्यातत्र संतोषयति
द्विजं करं॥ यस्तत्र तीर्थे विधिना प्राणत्यागमवाप्नुयात्॥२१॥ स शंकरपदं प्राप्य गर्भवासं न पश्यति॥ स्नानं च
तर्पणं श्राद्धं द्विजभोज्यं सुरार्चनं॥२२॥ अनुक्रममपि कर्तव्यं सर्वतीर्थेषु भारत॥२३॥ इति श्री रेवामाहात्म्ये
अयोनिसंभवेश्वरतीर्थं॥१७६॥ ॥ततो गच्छेन्नृपश्रेष्ठ तीर्थमंगारकेश्वरं॥ अयोनिजेश्वरात्पुण्यं स्थितं क्रमं त्रा
तत्रये॥१॥ रूपसौभाग्यदं लोके विश्रुतं उत्तरे तटे॥ अंगारकेण तत्रो देवपार्थ तप्तं तपः किल॥२॥ वर्षाणामयु
तान्यष्टौ नानापायैः सुदुस्तरं॥ ग्रहैश्वर्यं रवेर्दृष्ट्वा दानवो वस्यते स्तथा॥३॥ ग्रहाणां पूजनं लोका कुर्वतीति
मत्तप सः॥ ग्रहपंक्तिमभिप्रप्सुर्महेशाराधनं ततः॥४॥ ततस्तुष्टो महादेवस्तस्मै करुणयान्नृप॥ प्रत्यक्षो भ
गवान्प्राह स्वस्तुतं क्षितिसंभवं॥५॥ वरदोस्मीह ते वत्स नरं वरयस्व व्रत॥ लभस्व वांछितं मत्तो दुर्लभं त्रिद
शैरपि॥६॥ अंगारक॥ प्रसन्नो यदि देवेश कृपयालो कराकर॥ प्रणमाम्यन्वहं चाहं कर्मणा मनसा गिरा
॥७॥ भवत्प्रसादाद्भास्वेहं एकमेव महेश्वर॥ ग्रहपंक्तिगतो नित्यं विचरामि नभस्तले॥८॥ यथा स्युर्यादयेनि
संयत्ता जगती पूजिताः॥ दीप्यंते देववद्देवत्रातथा तन्मध्यगोप्यहं॥९॥ या संस्मृत्य तो लोके यावद्भूभूधरा
श्रयः॥ यावच्चंद्रार्कं यावच्चार स्तवत्र्ययं स्यात् चाथागतिः॥१०॥ मा॥ एवमस्त्विति देवेशो दत्त्वाते स्म वरं शुभं॥ जगा
माकाशमाविश्य वंद्यमानः सुरासुरैः॥११॥ ततो भूमिसुतस्तत्र प्रतिष्ठाप्य महेश्वरं॥ गतः सुरालयं श्रीमान् २००
दृष्टतुष्टः शिवाज्ञया॥१२॥ नीत्वा सुरगणैः सर्वैर्ग्रहपंक्तौ नियोजितः॥ ततः प्रभृति विख्यातं तीर्थमंगारकेश्वरं
॥१३॥ सर्वकामप्रदं पुण्यं धन्यं दुःस्वप्ननाशनं॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरं॥१४॥ हुतहोमाजितः क्रो

403/2008

धः सोश्वमेधफलं लभेत॥ चतुर्थ्यंगारके योगे यः स्नात्वा पूजयेच्छिवं॥१५॥ अंगारकं च विधिना संस्थाप्य हितम
नान्नृप॥ उद्धरेदात्मना सार्द्धं … सप्त चापरान्॥१६॥ पूजयित्वा महादेवं दीपं दद्याच्च यो नृप॥ विमलं कुलमा
प्नोति तेजसा च महीयते॥१७॥ रक्तानडुह गोवस्त्र ताम्रं दीप्त्वा सगुडादिकं॥ दत्ते तुष्यति भूमात्रानः सम्भौमः सर्व
कामदः॥१८॥ इति ते कथितं पार्थ तीर्थमंगारकेश्वरं॥ श्रवणात्कीर्तनाद्यस्य सानुकूलः कुजो भवेत्॥१९॥ इति
श्री शिवसंहितायां नाम रेवा माहात्म्ये अंगारकेश्वरं॥१७७॥ ॥मार्कं॥ ततो याया महाराज धर्मपुत्र युधि
ष्ठिर॥ नर्मदा दक्षिणे कूले तीर्थं परमशोभनं॥१॥ मुकुटेश्वरतीर्थाद्धि स्थितं क्रोशद्वयांतरे॥ स्कंदेन निर्मितं त
पर्व तता कृत्वा सुदुष्करं॥२॥ युधिष्ठिर॥ श्रमो च मनितात प्रतथा प्वत दृष्टीमह॥ स्कंदो सोषण्मुखः करः क
स्य पुत्रः कदाभवत्॥३॥ स्कंदस्य चरितं सर्वमाजन्मादिजसत्तम॥ तीर्थस्य चाखिलं पुण्यं कथयस्व यथार्थतः॥
४॥ मार्कं॥ तपस्यता पुरा राजन् देवदेवेन शूलिना चिंतत्तिनार्थता देवी रूमा गौरी विवाहिता॥५॥ देवा॥ नास्ति
सेनापतिः कश्चित् देवानां सुरसत्तम॥ विध्वस्ता दानवैर्लोकाः जिता देवाः सवासवाः॥६॥ यथा निशा विना
चंद्रं दिवसो भास्करं विना॥ नारी पतिं विना यद्वत्तथा सैन्यमनायकं॥७॥ एवं ज्ञात्वा महादेवं रूपपापरपा
लिनो॥ सेनानीर्दीयतां कश्चिद्यः शूरो लोकविश्रुतः॥८॥ एतच्छ्रुत्वा परं वाक्यं देवानां परमेश्वरः॥ कामयानस्मु
मां देवीं संस्मार स्मरमीश्वरः॥९॥ तेन मूर्च्छितसर्वांगः कामरूपो जगद्गुरुः॥ कामयामास शर्वाणी दिव्यं वर्षश
तं किल॥१०॥ देवराजस्ततो ज्ञात्वा महामैथुनिकं हरं॥ सर्वं सर्वं सुरैः सार्द्धं प्रेषयज्जातवेदसं॥११॥ तेन गत्वा
महादेवः परमानंदसंस्थितः॥ शोभितः पक्षिरूपेण कैलासभवनांतरे॥१२॥ गार्वस्तं सहसा दृष्ट्वा हाहेत्यु
क्त्वा समुत्थितः॥ ततः क्रुद्धा महादेवी सा कंपकृज्ज्ञात्रवीदिदं॥१३॥ वेपमानामहादेवं मदेश्री प्रतिमानिनी॥ पा
वक॥ यस्मादहं सुरश्रेष्ठान्न त्याहृता पुत्रजन्मनि॥१४॥ स्वभार्यासंभवैः पुत्रैः स्तस्मात्सीनाभवं तुतं॥ देरेणा

रे. खं. कृत्तोवह्निरस्मद्वीर्यं समुद्वह॥१५॥ अस्तु स्वस्तीति लोकानां तथा त्वं कर्तुमर्हसि॥ मरोज स्त्वं स्ववक्त्रेण
द्रुतमग्निसुरान म॥१६॥ कृत्वा नो पापसंतापं नो वृथा पमवाप्स्यसि॥ त्वत्तस्तु भविता पुत्रः सेनानी सुर
२०१ पूजितः॥१७॥ सिद्ध्यर्थं देवकार्यस्य नान्यः शक्तो जगत्त्रये॥ अग्निरु०॥ तव वीर्यस्य महादेव का शक्तिः धार
णे विभो॥१८॥ करोति भस्मसात्सद्यस्त्रैलोक्यं सचराचरं॥ महेश्वर उ०॥ उदरस्थेन बीजेन यदि ते जायते
रुजा॥१९॥ तदा क्षिप ताः स्वतेजो गंगातोये कृतानन॥ मार्कं०॥ एवमुक्तस्तथा ज्ञात्वा सुरमोघं बीजमात्मनः॥२०
हव्यवाहमुखेन तूर्णं प्रक्षिप्यं तरधीयत॥ गते वा दृष्टेन देवे दत्त्वा मानोऽक्षतानन॥२१॥ गंगाम्भसि विनिक्षिप्य ज
गाम स्वं निवेशनं॥ असहंती च तत्तेजो गंगापि सरितां वरा॥२२॥ तत्क्षिप्य शरस्तंबे जगामाशु यथागतं॥ अ
त्र जातं सुतं दृष्ट्वा सर्वे देवाः सवासवाः॥२३॥ कृत्तिका प्रेषयामासुः स्तन्यपानाय भारत॥ दृष्ट्वा समागतास्ताश्च
गांगेयो गौरवं भजत्॥२४॥ भूत्वा स षण्मुखः षड्भिर्मुखैस्तासां स्तनान्पपौ॥ जातकर्मादिसंस्कारान् वेदोक्ता
न्स संभवः॥२५॥ कारतस्य राजेंद्र विधिदृष्टेन कर्मणा॥ कृत्तिकाभ्यः कार्तिकेयः षण्मुखैः षण्मुखः स्मृतः॥
२६॥ कुमारः स कुमारत्वाद्गांगेयो गंगया धृतः॥ उद्धृतस्तथाग्निना यस्मादग्निभूश्चोच्यते नृतः॥२७॥ वह्निरेद
रसं स्पर्शाद्धार्कुलयः प्रकीर्तितः॥ रेतस्कन्नमतः स्कंदः स्वामुक्तो देवसेनया॥२८॥ एवं सुसंभवो बालो कालि
तो देवतागणैः॥ वेदानधीत्य निखिलान्षडंगान्सवेदवित्॥२९॥ शास्त्राण्यनेकानि ततः॥ ततः स चचार वि
पुलं तपः॥ देवारण्येषु गिरिषु नदीषु च नदेषु च॥३०॥ पृथिव्यां सर्वतीर्थेषु समुद्रांघेषु भारत॥ ततः प
र्यायोगेन नर्मदातटमाश्रितः॥३१॥ विंध्याचलमतिक्रम्य रेवा दक्षिणतीरजाक॥ निलंत्रिपवणस्ना २०१
यी च चार विपुलं तपः॥३२॥ ऋग्यजुः साम विहितं तपं जाप्यमहर्निशं॥ ध्यायमानो महादेवं जटामुकु
टमंडितं॥३३॥ अष्टं त्रिभू लिनं चेंदु धूलिनं नागहारिणं॥ वृषस्थं विश्वनाथं च पार्वतीपतिमव्ययं॥३४॥

महाहिवलयं ध्याय-कृत्ते नाधमनिसंततः॥ ततो वर्षसहस्रांते पूर्णे देवो महेश्वरः॥३५॥ उमया सहितः साक्षा
न्महासेनमुवाच ह॥ ईश्वर०॥ अहं ते वरदो वत्स गौरीसुत ममात्मज॥ वरं वृणीष्व यन्मेष्टं त्रिषु लोकेषु दु
र्लभं॥ अलं क्लेशेन ते वत्स कुमारोसि ममात्मज॥३७॥ कृशितो बहुधा त्वं तु सर्वत्र भ्रमता चिरं॥ किमिच्छ
सि महाबुद्धे शीघ्रं वरय वांछितं॥३८॥ स्कंद उ०॥ नमस्ते जगतां नाथ कालात्मन् कालनातिगः॥ कालश्चो
कयलाक्ष कलितात्रायवे भव॥३९॥ नमः कालाग्निनेत्राय कालकूटधराय च॥ नमः कामकृतांताय करा
लाय कपर्दिने॥४०॥ गिरिशाय गिरिस्थाय गौरीशाय गुणात्मने॥ गुणातिगाय गौराय गोनसालंकृताय
च॥४१॥ नमस्तेस्तु महेशाय मृडाय मृत्युमर्तये॥ महोक्षगाय मोक्षाय मुमुक्षोर्मुंडमालिने॥४२॥ सत्या
य सत्यरूपाय सर्वज्ञाय तदात्मने॥ सनातनाय शांताय सर्वसंहरणाय च॥४३॥ नमो वामांग वामाय वा
मदेवाय वेधसे॥ वरदाय वरेण्याय व्योमकेशाय वेधसे॥४४॥ अजरामररूपाय अघोराय मलापच॥
नमोस्तु ते विचित्राय अनंताया खिलाय च॥४५॥ नमस्ते नुस्तनुभृत्तेतापत्रयहराय च॥ तन्नभृतां च तीर्था
य तत्स्वरूपाय ते नमः॥४६॥ नमो ज्ञानाय ज्ञानरूपाय ईषदूर्ध्वीकृताक्षिणे॥ ईशाय खिलगुणोपाय ईप्सितार्थप्र
दाय च॥४७॥ यमष्टसिद्धय शश्वत्तं सेवंते सुरेश्वरं॥ तमादिपुरुषं शर्वं नीलकंठं नमाम्यहं॥४८॥ मार्कं०
इति संस्तुवतस्तस्य षण्मुखस्य महेश्वरः॥ प्रसन्नः प्राह भगवानुच्चैः साधु साध्विति॥४९॥ ईश्वर०॥
साधु भो वत्स साध्वं तस्तोत्रमुच्चरितं त्वया॥ सुप्रीतोस्म्यनया स्तुत्या ब्रूहि किं ते ददाम्यहं॥५०॥ स्कंद०॥ य
दि तुष्टोसि मे देव उमया सह शंकर॥ भ्रमणाभिमात्रपितावधानान्यागतिर्मम॥५१॥ पित्रोः पुरः प्रार्थयाद्दपु
त्रः प्रियमिहेप्सितं॥ नो वा किं प्रार्थितेनेह तावेव स्वयमिष्टदौ॥[illegible]॥ पुत्रस्य तीर्थरूपौ तौ तपोः पुत्रास्तरं न हि
॥ एतच्छ्रुत्वा शुभं वाक्यं पुत्रेण समुदीरितं॥[illegible]॥ तथेत्युक्त्वा सुतां स्नेहात्प्रेम्णा तु परिषस्वजे॥ ततो म ...

405/2008

रे॰खं॰ पापाय प्राह तं सशिवः ॥७१॥ ईश्वर ॥ पराजयो न ते पुत्र कुर्यापि भविता नघ ॥ अक्षयश्चाव्ययश्चैव सेनानी त्वं
भविष्यसि ॥७२॥ शिखी च ते वाहनं दिव्यरूपादत्तो मया शक्तिरियं लभ माघ ॥ तारे मया रानवा नां वधाय गृहाणमां
सकृदेवप्रमोच्यां ॥७३॥ सुरासुरादींश्च वधेत् त्वया लोकाजगाम कुलगिरिं महात्मा ॥ मार्कं॰ ॥ गते चादर्शनं देवे
२०२ ततः सन्निहिता हरः ॥७४॥ स्थापयित्वा महादेवं स्वनाम्नापरि पूजयत् ॥ सर्वाहत्वायुधस्तु स्वाजगाम सुरसन्नि
७५ ॥ तदा प्रभृति तत्तीर्थं स्कंदेश्वरमिति श्रुतं ॥ सर्वपापहरं पुण्यं मर्त्यानामभुवि दुर्लभं ॥७६॥ तत्र तीर्थे तु यो राज
न्भक्त्या स्नात्वा लार्चयेच्छिवं ॥ स्नाप्य पंचामृतैः पुण्यैस्तथा तीर्थोदकैरपि ॥७७॥ गंधमाल्यविलेपैश्च वस्त्रनीरा
जनार्चितैः ॥ नैवेद्यैर्विविधैः पुण्यैः फलैरपि युधिष्ठिर ॥७८॥ ध्वजच्छत्रपताकाभिश्च घंटामधुरवादनैः ॥ वीणा
वेणुनिनादैश्च शंखभेरीस्वनैरपि ॥७९॥ गीतनृत्यकथाभिश्च स्तुतिजाप्यप्रणामतः ॥ सकृदभ्यर्च्य तस्य
चक्रुः स्वर्णस्य यत्फलं ॥८०॥ स्कंदेश्वरे च यः स्नात्वा तर्पयेत्पितृदेवताः ॥ तिलमिश्रेण तोयेन पिंडदानेन भारत
८१॥ श्राद्धस्य दृष्टेन विधिना तस्य पुण्यफलं शृणु ॥ संवत्सरं तृप्तपूर्णं कुलत्रयसमुद्भवाः ॥ तृप्यंति पितरः पार्थ
सार्थं कृष्यमवेक्ष्य वः ॥ तत्र तीर्थे नृपश्रेष्ठ ब्राह्मणान्यश्च भोजयेत् ॥८३॥ सिक्थे सिक्थे भवेत्तृप्तिः पितॄणां
वर्षसंख्यया ॥ शिवश्च परमानंदं प्राप्नोति परमेश्वरः ॥८४॥ तत्र तीर्थे तु यो दद्याद्गां द्विजपुंगवे
॥ सर्वोपस्कर संयुक्तां विधिवत्पूजितायच ॥८५॥ संवत्सर सहस्राणि स वसेच्छिवसन्निधौ ॥ कार्तिक्यां
कृत्तिका योगे यत्फलं स्यान्मिथा त्रयो ॥८६॥ फलं तदिह लोकानां कार्तिक्यां शिवदर्शनात् ॥ ताम्रपा
त्रं तिलैः पूर्णं भुक्तं दत्वा सदक्षिणं ॥८७॥ तत्र स्कंदे समभ्यर्च्य न लभेद्दुःखदुर्गतिं ॥ नरो हिरण्यं दत्वा २०२
च तत्र भक्त्या युधिष्ठिर ॥८८॥ शक्रलोकमवाप्नोति दीर्घमायुश्च विंदति ॥ छत्रोपानहदानेन सुखं
स्वर्गे महीयते ॥ कुरुते तत्र यो राजन् भुभं वायदि वाशुभं ॥ इह लोके परे चापि तत्तस्य चाक्षयं भवेत् ॥

तत्र तीर्थे तु यः कश्चित्प्राणत्यागं करोति च ॥ शास्त्रोक्तेन विधानेन स गच्छेत्परमां गतिं ॥९०॥ रुद्रलोके स्थमा
प्नोति यावदाहूतसंप्लवं ॥ ततो पतित्वा कल्पमेकं सिंधुदेशे प्रजितः ॥९२॥ अनेन भारते वर्षे जायते निपुले
कुले ॥ वेदवेदांगतत्त्वज्ञः सर्वव्याधिविवर्जितः ॥९३॥ जीवेद्वर्षशतं साग्रं पुत्रपौत्रसमन्वितः ॥ अयं ते कथितो
राजन् स्कंदतीर्थस्य संभवः ॥९४॥ वक्तिं कार्तिकेयस्य च मत्कृति करं परं ॥ धन्यं यशस्यमायुष्यं दुःस्वप्ननाशनं भा
ग्यना शनं ॥ जयपुत्रप्रदं पुण्यं महादेवेन भाषितं ॥ तीर्थस्नानमिदं श्रुत्वा सर्वपापैः प्रमुच्यते ॥९५॥ इति श्री
वायुकृ शिवसंहितायां रेवा स्कंदेश्वरतीर्थं ॥१७८॥ ॥ मार्कं॰ ॥ नर्मदेश्वरतीर्थे च ततो गच्छेन्महाभुज ॥ का
र्तिकेश्वरतीर्थान्तु तत्रैव किय दूरतः ॥१॥ सर्वपापहरं पार्थ भुक्तिमुक्तिफलप्रदं ॥ यत्र सा च तु समं देवैस्तत्र
समागतैः ॥२॥ सिद्धकिंनरकगंधर्वविद्याधरमहोरगैः ॥ नदीनदैः सतीर्थैश्च मीलितमूर्तिभाजिभिः ॥३॥ त
था मुनिगणैः सर्वैः स्तपोनिष्ठैर्नराधिप ॥ तत्राहं चगतो भवं शृणु मे तत्र कारणं ॥४॥ तद्यज्ञस्य स्वकीयप्रसाद
त्वात्मे पितामहः ॥ तेन यागं मया पार्थ तत्रैवामंत्रितेन च ॥५॥ महत्त्वमाजिको हेतुस्तथैवान्यो नराधिप ॥ म
हतं मिलितं यत्र तत्र यागादितिश्रुतिः ॥६॥ विनाप्याम्नायं धर्मः श्रोतव्यस्ते स्त्रीरिति ॥ तृतीयं पञ्चविहितं
धर्मकर्मकृतं नृप ॥७॥ दृष्टोधर्म इति यत्पुराणे कंमनीषिभिः ॥ धर्मभुतो यद्दृष्टो यथाविहितः कारितोपि वा
॥८॥ नापानुमोदितो वापि पुनात्यासप्तमं कुलं ॥ तेन तत्र मया यातं समाजेयत्तु संभवे ॥९॥ देवैश्चाविस्मिते
स्तत्र मुनयः सिद्धतापसाः ॥ ऋषयो वेदनामस्तु ताः कारणं परिपृच्छिताः ॥१०॥ वेधाविष्णुपदीं पुण्यां जाह्न
वीं सुरसेवितां ॥ विहाय यज्ञनिष्पत्तिमिह कर्तुमसोरतः ॥११॥ ऋषयः कारणं किं चवि चारः क्रियतामिह ॥ इत्या
कर्ण्याथ मुनयः सुरं दृष्टं विस्मयच ॥१२॥ तानि नापि महाभागा न रदुः किं विदुत्तरं ॥ नदीः किं तारुयामा
सुर्गगाद्या सुरसन्निधौ ॥१३॥ पप्रच्छ पापानां शमस्तामर्थ्यतासु भारत ॥ ताईचुः कमलाः स्त्रीः कालिंदाण्या

2104/2008

 सिकादिकं॥३४॥सर्वपापप्रणाशाय दिनार्धरितम ईरितं॥असमुद्रंगमा या स्तु तीर्थैर्विरहितास्तथा॥[illegible]॥नद्यः स
यः सद्यःस्नानात्रिरात्रफलदा स्मृताः समुद्रगाश्च पक्षस्य यास्तीर्था युधिष्ठिर॥३६॥ सतीर्था मासफलदा या
पृथक् न निरूपिताः॥ तत्समानफलं ह्रस्वे समुद्रेपि तथा विधिः॥३७॥ षण्मासफलदा गोदा गोमती च युधिष्ठिर॥
 संवत्सरफलं ह्येतत्स्नानेनैकेन जान्हवी॥३८॥ मासत्रयोदशफलं दत्ते पुण्या सरस्वती॥तपी तीर्थे सकृत्स्नाता ला मा
साष्टकफलप्रदा॥३९॥सप्तमासफलं चापि सैसरय्म सेविता सती॥ नवमासफलं सिंधुर्यमुना च युधिष्ठिर॥२०॥
क्षिप्रा च मण्वतीवेत्रा पंचमासफलं स्मृतं॥ गलुकी सप्तमासो सकृत्स्नाता सदैव हि॥२१॥ इत्येवमादि बहुधा
ज्ञात्वितं ताभिया दरात्॥ दिवर्षीणां पुरः पार्थ विशेषाद्गुरुतरोत्तरं॥२२॥ नाकिंचिन्नर्मदा प्रोक्ता ततः पृष्ट्वा सुरर्षिभिः॥
त्वया न किमपि प्रोक्तं कोहेतुस्तत्र नर्मदे॥२३॥ ब्रूहि केनेति किं तु सामर्थ्यं पावनाय हि नर्मदे॥ इति पृष्टा यदोवाच
तु पार्थ सुरर्षिभिः॥२४॥ वीक्ष्य मत्स्य मुखं देवी हसिता हरनंदिनी॥ ततो वीक्ष्य धरां किंचिल्लज्जितेन नर्मदा यदा॥
२५॥ तदा मयैव पुरतो हि वर्षीणां निवेदितं॥ त्रिभिः सारस्वतं तोयं सप्ताहेन तु यामुनं॥२६॥ सद्यः पुनाति गांगेयं
दर्शनादेव नार्मदं॥ स्मरणाज्जन्मजनितं दर्शनाच्च त्रिजन्मजं॥२७॥ स्नाता जन्मसहस्रोत्थं हंति रेवा कलौ युगे॥ मार्कं॰॥ ततस्तथाविता तापि स सुखा च हमारत॥२८॥ स्मरणादहमप्यास्यु यत्र तत्र स्थितं तरं॥ पुनामीह
मुनिश्रेष्ठ पापपंकाकुलं सदा॥२९॥ मार्कं॰॥ सप्तकल्पस्मारारे वा पुण्यामिसह चारिणी॥ स्मृतासंकीर्तिता दृष्टा
स्नाता पापप्रणाशिनी॥३०॥ तापी उ॰॥ स्मराम्यहं मुनिश्रेष्ठ कल्यान्सार्धं कावेर्यतिः॥ स्मृता संकीर्तिता दृष्टा स्पृ
ष्टा स्नाता च पावये॥३१॥ ततः सरस्वती प्राह प्रोक्षायस्य र्धयान् प॥ एवं वेत्सदस्तिविप्रर्षे ततः शृणु वदाम्यहं
३२॥ चतुर्भिरधिकान्यष्टि कल्पानीह स्मराम्यहं॥ स्नात्वा समुत्सरेद्योमान् द्विगुणं स लभेत्फलं॥३३॥ मार्कं॰॥ ए
वं किमुच्यते देव्याः किं कल्पस्मरणेन च॥ एवं चेज्जान्हवी देवी विलोकयतवेच्छवी॥३४॥ [illegible] रक्षांसि [illegible]

कल्पान्स्मरति जान्हवी॥ साधिकान्सरितस्तत्र किं वक्तव्यमिहास्ति वः॥३५॥ देवा रक्षांसि ऋषयः सरितो यक्षपं
नगाः॥ भवंति चिरकालीना विशेषस्तत्र को मतः॥३६॥ तत्र कापात्रता पुण्या वृक्षलवः सरिद्वराः॥ ब्रह्मा जगत् 409/2008
पिता रुद्रो विष्णुः सर्वत्र पूज्यते॥३७॥ प्रारब्धे सुरकार्येपि गणेशो मोदकाशनः॥ तस्मात्स्वमानसो माद्य वक्त
व्यं हि विचक्षणैः॥३८॥ मौलौ गंगा शिरवी नेत्रे सुधा चंद्रे विषं गले॥ भूषा दृष्टिविषाः सर्पास्ता रहारश्च वा
सुकिः॥३९॥ विश्वकायाप्रमेयात्मा स्वदेहे भूषणच्छलात्॥ सृष्टिसंहारबीजानि धत्ते देवो महेश्वरः॥४०॥ तदी
शतनया तुल्याः किं भवं सो भविष्यत॥ नो वा किं क्रियते पित्रा संतनं यदि निर्गुणं॥४१॥ नास्ति मे तत्र वक्तव्यं य
त्वदा स्यादगुणा सरित्॥ पुनः सा निम्नगा नैषा स्वयं चावि विकथ्यते॥४२॥ शृणुतस्याः प्रभावं वदर्षिसरितस्थिताः
स्वभावेनैव यो वच्मि यथाज्ञातं मया किल॥४३॥ सवाहवा किनारे वादे वादी नाम यौ मुदा॥ याता नां किं पुनर्दूरात्स्ना
तानामन्वहं नृणां॥४४॥ सरितः संति शतशः स्नानादुक्तफलप्रदाः॥ निरवद्यं पदं लब्धं दत्ते दृष्टैव नर्मदा॥४५॥ गत्वा
किमन्या सुसरित्सु सर्वतीर्थपुवारिचवनादिकेषु॥ एकापि किं कानलिपा न दृष्टा धुनीधुनीते विविधाघसं
घान्॥४६॥ दीपं मयाश्च मता भूरिशो मेश्च ताद्दक्षाः सेविताः सिंधुसंघाः॥ चेतस्तादक तासु तुष्टिं न धत्ते यद्र
वा यां कीर्तिता लोकिताया॥४७॥ यज्ञादि पुण्यफलदान घ्नः सर्वास्तु सेविताः॥ तामेव सरितं मन्ये तुष्येदत्र मा य
दर्शितः॥४८॥ सरितः संति वध्यापि स हरैः र्वतः सागरंगमाः॥ किं त्वमिय त्रनाश्मानः शंकरा विश्वपूजिता॥४९॥
भवधुनि भवभयहरणं कुरु तेशरणं यतस्त्वमेवासि॥ कार क्षितुं समर्था लोका पापपीडितं जंतुं॥५०॥ भू
भागा भूरिशो याता नादस्नातुं सहस्रशः॥ नदीन दीनार्तिहराः वामस्ते कापि शंकरी॥५१॥ आतं भ्रातर्भूतले
तु सकलं दृष्टं विशेषं पुरा पापघ्नाः शतशोति पुण्यफलदाः स्नाता मया सिंधवः॥ किं त्वेकापि न सा महेश्वर
सुते या देव्याविध्यं सिनी दृष्टेवाश्रयदाश्रिताश्मनिवहास्ते सर्वएवेश्वराः॥५२॥ इति श्रुत्वा ण महिराजसिंह सु

 रर्षयस्ते मुमुदुः समस्ताः॥ नद्यश्च मांताः पत्राश्च सुरेशी वं पपात रवात त्रत्र च पुष्पवृष्टिः॥५३॥ मामामिभिर्वर्ध
यित्वा ततः सर्वे सुरर्षयः॥ स्तुत्वा च नर्मदां देवींस्नातुं प्रविविशुर्मुदा॥५४॥ स्नाते पुरेते पुनर्नर्मदा लोकपावनी॥
 मामुवाच महाभागास्तस्य चैव तु यार्मया॥५५॥ मज्जंति मुनयः सर्वे लभेत कः किंन मज्जसि॥ तथैव च मया कैर्याद्वि
नोदात्सत्यमेव तु॥५६॥ मुक्तिस्त दर्शनादेवीन जाने स्नानजं फलं॥ स्नात्वा तीर्थानि तातो दात्वा नऋषींस्ति षांस्तपा
मुनिः॥५७॥ तीर्थानि च तदारेवा प्रोवाच विनयान्विता॥ रेवा॥ एकं या मे च हा भागा जातेश्च समागमे॥ ५८॥ सं
तासमागमो नूनमिहामुत्र फलप्रदः॥ इत्युक्ता तु सुचिरं कृपांकृत्वा मपि स्थिरां॥५९॥ प्रतिष्ठाप्य महादेवं तेन
न सार्धं महात्मना॥ मार्कं॥ तैस्तुतुष्टैर्हि ते देवै मुनिभिस्सिद्धसिंधुभिः॥६०॥ तथैसु क्रा महाराज स्थापितस्तत्र चेश्व
रः॥ गौरवं तत्र रेवाया दद्युः सर्वे मुदान्विताः॥६१॥ नर्मदेश्वर नामानं च कृत्वं चाप्यप जयन्॥ ततस्ते ऋषयः
सिद्धाच प्रस्तापन्नकारणं॥६२॥ महिमा न च रेवाया पूजयंतश्च नर्मदां॥ फलश्रुतिः॥ यजंम वैगिवाणि पुन्य वद य
त॥६३॥ ऋषय॥ कृत्रिमि निर्गुणस्यापि कस्यापि सुरसत्तमाः॥ कियं तः कुर्वति संते माहिमरोपणं सदा॥६४॥ उपया
रन्वचः किंतु॥ नर्मदायां न दृश्यते॥ श्रुतेस मीक्षितेवापि वर्षपूगीनमेक चाः॥६५॥ महिमानं वरं तां वा वारं वारं वि
चार दाः॥ पारंनजग्मु रद्यापि ब्रह्माद्यस्त्रिषु कारणं॥६६॥ सितासितास मा योगे प्रयागेपि तु वेध सापुरा धृतपि
यशेपि न तुष्टिं नर्मदांविना॥६७॥ सत्यं सत्यं पुनः सत्यं भुजमुत्क्षिप्य चोच्यते॥ नदीनन मेरा तुल्या न लिंगं नामदेवि
ना॥६८॥ मार्कं॥ इत्युक्तास्तु मुनिभिः स्तत स्ते सुरसत्तमाः॥ साधु साध्विति भाषंतः परस्पर मथाद्रताः॥६९॥ नर्मदे
श्वरमभ्यर्च्य सर्वे जग्मुर्यथागतं॥ ततः प्रभृति राजेंद्र विख्यातं नर्मदेश्वरं॥७०॥ तत्र स्नात्वा महाराजपौ षकृष्णा १०४
ष्टमी दिने॥ वैशाखे वाथ विधिवत्सर्वपापैः प्रमुच्यते॥७१॥ तत्रैव पितृदेवानां यश्च दद्यात्तिलोदकं॥ श्राद्धं पिंड
दिकं कृत्वा पितॄणामनृणो भवेत्॥ अरम्यां च चतुर्दश्यां पूजयेन्नर्मदेश्वरं॥ पक्षयो रुभयो र्वापि भक्तिध्यानरतो

पिच॥७३॥ सर्वतीर्थफलं प्राप्य सर्वदेवार्चनेपि वत॥ शिवलोकमवाप्नोति यावदाहूत संप्लवं॥७४॥ दीपं दद्याच्च देवा M11/2008
यस्वचात्त्या भरतर्षभ॥ गां च सोपस्करां दद्यात् प्राप्य विधिवन्नरः॥७५॥ विप्राणां भोजनं दद्याच्छत्रोपानत्कमंडलु
इति कृत्वा महाराज कृतकृत्यो भवेन्नरः॥७६॥ श्री रेवा नर्मदेश्वरमहिमानिरूपं॥७७॥ तेरवदेवतीर्थं वैतरणीसं
गमः॥ मार्कं॥ ततो गच्छेत राजेंद्र तीर्थं त्रैलोक्यविश्रुतं॥ अलतीर्थमुनि ख्यातं यत्र श्रेतलिगि लाशुभा॥१॥ युधिष्ठिर॥ अ
लतीर्थ हरत्वामि विस्मयात्तीर्थ विस्तरं॥ किं अलतीर्थं के नादी कृतंत त्रशिला च का॥२॥ एतदिच्छाम्यहं श्रोतुं वि
स्तरान्मुनिसत्तम॥ मार्कं॥ शृणु सर्वं महाराज विस्तरा धर्मनंदनं॥३॥ उत्तानपाद नृपतेः संवादं सह शूलिना॥ य
था श्रुतं मया तात तथा ते कथयाम्यहं॥४॥ महादेवं महात्मानं प्रसन्नं मुनिभिः स्तुतं॥ उत्तानपादो नृपतिः पुरापप्रच्छ
शंकरं॥५॥ उत्तानपाद॥ देवदेव महेशान नर्मदातीर संस्थितं॥ अलतीर्थं त्वया कं यत्तत्रं अल त्रिलरूपं॥६॥ त
स्य तीर्थस्य माहात्म्यं विस्तराद्वद मे विभो॥ महेश्वर॥ शृणु राजन्महाभाग अलतीर्थं वदामि ते॥७॥ सवन स्याल क्रौती
तीरो महावीतश्च चक्रिवंतकिः॥ ना मभ्यां प्रथितौ लोके राजन्यगणमूर्धगौ॥८॥ महावीतस्य पुत्राणां सतत्त्वा भस्र पति
तेवापि ख्यातु परा सामहावीर्या महाबला॥९॥ यज्विनो दानिनिरतो क्रियावंतो बहुश्रुताः॥ तैरियं पृथिवी व्याप्ता सर्व
द्वीपे पुपार्थिव॥ दांता जितें द्रियाः शूराः क्षत्रिये लोकविश्रुते॥ धातकिश्च महाभाग पुत्रसंतान वर्जितः॥११॥ संततः
संपरिच्छेदः दृष्ट्वा सो पुष्करापिपः॥ महावीतानुजो राजन्ख्यात किं दुःखमाप्तवान्॥ कथं पुत्रा भवेन्मे त्राश्च कर्मणा
केन मे शुभा॥ भवेपु दुःखितस्यापि पितॄणामनृणो भवेत्॥१३॥ इति सस्मार सुचिरं महादुःखान्वितो नृप॥ कथं तरिष्य
तु मामिष्टं पुत्रपौत्र विनान्वृप॥ अपुत्रस्य गृहं भग्नमपुत्रस्य कुलं कुतः॥ परं पारेहि पुत्रेण भवाब्धेर्यांति पुत्रेवान्
॥१४॥ यत्तदानाति र्थानि मं बहुतक्रियाः कलाः॥ सत्तु न प्रभवस्यापि कलां नार्हं तु षोडशीं॥१६॥ तस्मात्प्रतिष्य पुत्रा
र्थं कर्म भमो महात्मनः॥ नर्मदायां तु निरतो दवतीर्थातु पश्चिमे॥१७॥ ईश्वर॥ इति निश्चित्य नृपति धातकी नर्मदां

रे.खं. ययौ॥ दक्षिणं कूलमासाद्य तपस्तेपे सुदारुणं॥१८॥ तस्यैवं तप्यमानस्य यजतश्च मखान् बहून्॥ अशीती ति
सहस्राणि वर्षाणामगमन्नृप॥१९॥ एतस्मिन्नंतरे तत्र सहदेवैः पितामहः॥ आजगाम महाभागः सृष्टिकामः प्रजा
२०५ पतिः॥२०॥ तत्र दृष्ट्वा तपस्यंतं सवनस्य सुतं नृप॥ तुतोष भक्त्या तस्याथ नियमेन च स प्रभुः॥२१॥ ब्रह्मोवाच॥ धात
के ब्रूहि राजर्षे किमहं करवाणि ते॥ तपसानेन तु तपेन तोषिताः सर्वदेवताः॥२२॥ वरं वरय तं द्यो मंमनसा वां
छितः॥ इति श्रुत्वा स राजर्षिः प्रणम्य विधिपूर्वकं॥२३॥ ब्रह्माणं नृपशार्दूल तुष्टाव नतकंधरः॥ धातकिरुवाच॥ न
मो विश्वसृजे तुभ्यं सदसत्सर्गकारिणे॥२४॥ ऋग्यजुःसामभर्त्ताय नमस्ते देवमूर्त्तये॥ नमः पालकरूपाय जगतः
कारणात्मने॥२५॥ विष्णवे व्याप्तिरूपाय तुभ्यं सर्वात्मने नमः॥ स्थूलाय सूक्ष्मरूपाय भवाय भवहारिणे॥२६
॥ रुद्राय रुद्ररूपाय नमस्ते प्रलयात्मने॥ सर्वदेवमयायाहं नमोऽस्मि सतोभितः॥२७॥ गुणागुणस्वरूपाय
नमस्ते केवलात्मने॥ पूर्वकांडप्रसक्ताय नमः कर्मक्रियात्मने॥२८॥ नैःकर्म्यकार्यसिद्धाय महानंदात्म
ने नमः॥ कथितं परमा शक्तिः कर्मत्रयविधारिणी॥२९॥ तत्त्वं विता यमहं सेन मस्तु भ्यं त्रिधात्मने॥ यस्मा
त्स्वयंभुवो वेदाः प्रादुर्भूताश्चतुर्मुखात्॥३०॥ तदहं त्वामहं स्तौमि ब्रह्माणं घ्यं जगत्पते ईश्वर॥ एवं तु स्तुवत
स्तस्य परितुष्टो जगत्पतिः॥३१॥ ज्ञात्वा प्रोवाच भगवान् सर्वज्ञो वाग्विदां वरः॥ ब्रह्मोवाच॥ ज्ञातं नृपम
या सर्वं पुत्रार्थं तप्यते त्वया॥३२॥ लप्स्यसे पुत्रपौत्रांश्च ददौ तस्मै नृपोत्तम॥ ईश्वर॥ एवं तद्दत्तसंभृ
तैः स ज पुत्रैः सहस्रधा॥३३॥ पूरिता पृथिवी सर्वा धातकीवंशसंभवैः॥ तदा कालेन राजाज धातकी
तीर्थं संज्ञितं॥३४॥ नाम्ना ख्यातिं गतं भूमौ पवित्रं पापनाशनं॥ कामिकं सर्वलोकानां तीर्थानामुत्तमं २०५
नृप॥३५॥ अस्मिन् दत्तं कृतं जप्तं यत्किंचित्सुकृतं कृतं॥ तत्सर्वमक्षयं तस्य जायते नृपसत्तम॥ अपत्या
कांक्षिभिर्यस्तु कृततद्भक्तिसाद्भवेत॥ फलैश्च भिर्यथाकामं प्राप्यते परमं पदं॥३६॥ महादेव उवाच॥

वदि देव माहात्म्यतीर्थं धातकीतीर्थमुच्यते॥ ब्रह्मतीर्थं कदा सिद्धं तद्ब्रूहि मम धूर्जटे॥३७॥ महादे 413
व उवाच॥ पुरा कल्पे महाराज सृष्टिकामः प्रजापतिः॥ इष्टिं च कारपुत्रीयामस्मिन् तीर्थे समाहि 2008
तः॥३९॥ अथ या देवता नागा सिद्धा विद्याधरास्तथा॥ समागतास्तत्र सर्वे ब्रह्मणो यज्ञसिद्धये॥४०॥ श
तानि पंच वंदं ज्ञानां देवतीर्थात् पश्चिमे॥ तत्र ब्रह्मशिलापुण्या विरंचीमखवेदिका॥४१॥ ब्रह्मणो
नि चितिः स्तत्र विद्धोरुद्रस्य चैव हि॥ देवानां मरुतां च वैमधिष्ठानं च मासिका॥४२॥ विशाख यांच
वैशाखतो शिलाया अयंत वयः॥ अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः॥४३॥ नर्मदा दक्षिणे
कूले शिवायतनवांछया॥ वेधाः संस्थापयामास शिवलिंगमनुत्तमं॥४४॥ तत्र ब्रह्मेश्वरं नाम्ना वि
श्वाधीशं कपर्दिनं॥ सप्त्नश्च महादेवं तपस्तेपे ततो महत्॥४५॥ तस्य वर्ष सहस्राणि समतीता
नि षोडश॥ दिव्यमानानि राजेंद्र स्थानस्थस्य तपस्यतः॥४६॥ दृष्ट्वा तः सिमतुलां तुतोषानंतरं शि
वः॥ साक्षाद्रूप उवाच देवं ब्रह्मन् लिपिर्भविष्यति॥४७॥ ततो नारिक्षे वा गासीदुद्वैविश्वप्रबोधिनी॥ स
ज्ञस्तु ष्टिं सदानंद यथा वेदानुशासनं॥४८॥ भविष्यति पराशक्तिः सर्गो संस्मरत स्तव॥ प्रसंने त्वादिपु
रुषे शिवे शिवगुणोत्तरा॥४९॥ ततः सा विस्मितो ब्रह्मा नमस्कृत्य महेश्वरं॥ ध्यायमानस्तु वेदेषु तप
साप्ति ध्रुमाप्तवान्॥५०॥ चंकार सिद्धिमतुलां जयन्वेदांश्चतुर्मुखः॥ पूर्वं ससर्ज भगवान् दक्षा
न्दीन् नृपसत्तम॥५१॥ तेभ्यो जाता इमे लोकाः ससुरासुरपन्नगमाः॥ मया संपूजितेनास्य प्रस
न्नेन च पार्थिव॥५२॥ सर्गसिद्धार्थं परेवं यागाद नुवभूव ह॥ तत्र ब्रह्मा च विष्णुश्च तथाहमपि
भूपते॥५३॥ सहदेवैस्तु गच्छामः सदा पर्वणि पर्वणि॥ एतद्ब्रह्मेश्वरं तीर्थं पवित्रं पुण्यवर्धनं॥
५४॥ तत्र स्नात्वा च पीत्वा च दृष्ट्वा पापं व्यपोहति॥ दर्शे तत्र कृतं श्राद्धं पितॄणामक्षयं भवेत्॥५५॥

रे.खं. वैशाखे च विशेषेण गयाश्राद्धसमं फलं ॥ वाराणस्यां कुरुक्षेत्रे नैमिषे पुष्करे नृप ॥ ५६ ॥ भक्त्या यद्द
सतां वर्षात् फलं प्राप्नोति मानवः ॥ दिने दिने न तत्पुण्यं ब्रह्मेश्वरसपर्यया ॥ ५७ ॥ दर्शे वैशाखमासस्य
२०२ कृत्वा स्नानं जितेंद्रियः ॥ श्राद्धं कृत्वापि तृणावद्ददाति निशाकितः ॥ ५८ ॥ सफलं जन्म कुरुते पितृणा
मनृणो भवेत् ॥ तीर्थोपवासं कुर्वीत रात्रौ जागरणं तथा ॥ ५९ ॥ ब्रह्मेश्वरं समभ्यर्च्य ब्रह्महत्यां व्यपोह
ति ॥ तत्र ब्रह्मेश्वरे तीर्थे गां दद्यात् नरो नृप ॥ ६० ॥ ब्रह्मलोकमवाप्नोति नात्र कार्या विचारणा ॥ अश्वदानी
द्देवलोके यावन्मन्वंतरं वसेत् ॥ ६१ ॥ नानावस्त्रप्रदो याति वाचस्पतिसलोकतां ॥ सुवर्णं रजतं ताम्रं ना
नाधातंश्च यो ददेत् ॥ ६२ ॥ स शाक्रं लोकमाप्नोति तथा भूमिप्रदो नरः ॥ विद्यादानाद्ब्रह्मलोके सासेरत
मथापि वा ॥ ६३ ॥ नरश्चेंद्रं इद्भुवनं याति यज्ञानराधिप ॥ प्रातर्मध्याह्न सवनी पूजयेद्यः सुरेश्वरं ॥ ६४ ॥
न शिवपुरं याति यावदाहूतसंप्लवं ॥ रात्रौ जागरणं कृत्वा शिवस्याग्रे तु भक्तितः ॥ ६५ ॥ वैकुंठादिषु लोके
षु सुचिरं न च महीयते ॥ अन्नोदकप्रदानेन न स वेदान फलं लभेत् ॥ ६६ ॥ सकामः स्वर्गमाप्नोति निःकामो
ब्रह्मसाद्भवेत् ॥ पुत्रपौत्रान् वाप्नोति तीर्थयात्राविधानतः ॥ ६७ ॥ तीर्थयात्राफलं राजन् सर्वदा दक्षिणेत
टे ॥ ब्रह्मेश्वरं ब्रह्मशिलां ब्रह्मकुंडानि पार्थिव ॥ ६८ ॥ दृष्ट्वा स्पृष्ट्वार्चयित्वा च नरो मुक्तिपदं लभेत् ॥ तत्र वि
ष्णुपदमस्मावानु समं पदं ॥ ६९ ॥ ब्रह्मपदं शिलायां तु दर्शयागाहि दृश्यते ॥ माघे मासि राजेंद्र श्राद्धं
कुर्यात्ततस्ततः ॥ ७० ॥ स याति सर्वलोकेषु विमानेनार्कवर्चसा ॥ मार्कं ॥ एवं शिवस्य वदतः पुरा स्तुतन्मे
या श्रुतं ॥ ७१ ॥ उत्तानपादं नृपतिं प्रति पार्थ सुराचले ॥ एतं ब्रह्मेश्वरं नाम तीर्थं त्रैलोक्यविश्रुतं ॥ ७२ ॥ ततः २०३
प्रभृति राजेंद्र ख्यातं कीश्वरमादितः ॥ कीर्तनाच्छ्रवणादस्य सर्वपापैः प्रमुच्यते ॥ ७३ ॥ लिखित्वापि गृहे
स्थाप्यं नो वा विप्राय दीयते ॥ ब्रह्मा विष्णुश्च रुद्रश्च तस्य तुष्यंति देवताः ॥ ७४ ॥ इति श्रीवायुप्रोक्ता संहि

तायां रेवामहात्म्ये ब्रह्मेश्वरतीर्थं ॥ ३८० ॥ ॥ मार्कं ॥ ततो गच्छेन्महाराज वाल्मिकेश्वरमुत्तमं ॥ कोशद्वयां
तरे पुण्यं ब्रह्मतीर्थाद्युधिष्ठिर ॥ १ ॥ पुरा महर्षिर्वाल्मीको भृगुवंशसमुद्भवः ॥ तेन तत्र तपश्चीर्णं सि
द्धिः प्राप्ता निरत्यया ॥ २ ॥ युधिष्ठिर ॥ कस्य पुत्रः कथं जातः कस्मात्तेपे तपो मुने ॥ एतदाख्याहि मे सर्वं कृ
पया यद्यस्थिरा मयि ॥ ३ ॥ मार्कं ॥ शृणु पार्थ प्रवक्ष्यामि स्नेहान्नेयकृतं मया ॥ तपश्चरन्वने पार्थ भार्गवोऽत्र
पुरा कृतिः ॥ ४ ॥ पुरूरवो समायांतीं दृष्ट्वा नुर्वशीं पुरा ॥ तां दृष्ट्वा रूपसंपन्नां कामार्त्तो मनस्मुनेः ॥ ५ ॥ पपा
त वीर्यं वल्मीके तत्र जातो महामुनिः ॥ सर्वावयवसंपूर्णः परमाकृतिपूजितः ॥ ६ ॥ उपवीताक्षवलयः मेख
लाजिनसंयुतः ॥ वेदानुदीरयन्नुच्चैर्जटामुकुटमंडितः ॥ ७ ॥ उवास सद्दृढ्या बुद्ध्या न वल्मीके किल भारत ॥
कदाचित्स्थितरं प्राप्तं ह्लात्वा तत्र महामुनिः ॥ ८ ॥ भित्वा वल्मीकराशिं तं ववंदे पितरं मुदा ॥ कालिः समाधि
मास्थाय विस्मितस्तस्य दर्शनात् ॥ ९ ॥ तस्य सर्वं पूर्ववृत्तांतं ज्ञातवान् चिंतयन्मुनिः ॥ मत्पुत्रो निजं विश्व
म योनिजमकल्मषं ॥ १० ॥ वाल्मीकेतीव नामास्य चकार मुदितः पिता ॥ संस्कारान् खिलांस्तस्य विधि
नाचाप्य योजयन् ॥ ११ ॥ ततः प्रणम्य पितरं वाल्मीको मुनिसत्तम ॥ कृपिनन्यांश्च सर्वत्र तीर्थानि जग्मिवान् ततः
॥ १२ ॥ क्रमेण नर्मदातीरमासाद्य विमलं ततः ॥ तत्र तेपे तपस्तीव्रं स्थापयित्वा परं शिवं ॥ नित्यं त्रिषवणस्नायी
निराध्यायी शिवार्चकः ॥ ततः सिद्धिं परां प्राप्तो निःकर्मपदपेशजां ॥ १३ ॥ शंकरस्य प्रसादेन सर्वपूज्यो भवन्मुनिः
कल्पस्थायी जगद्ध्यायी त्रैलोक्यस्याभिवंदितः ॥ १४ ॥ ततः प्रभृति राजेंद्र वाल्मीकेश्वरसंयुतं ॥ तीर्थं सर्वत्र विख्यात
तं सिद्धिदं पापनाशनं ॥ पापिनां पापनाशाय पुण्यानां मुक्तिदं परं ॥ तत्र तीर्थे तु यः पार्थ स्नात्वा संपूजयेच्छिवं
॥ १६ ॥ चिरमायुर्वाप्नोति देहांते शिवलोकभाक् ॥ दीपदानं च देवाय गामन्नं वाससी च ददेत् ॥ १७ ॥ श्राद्धं दत्वा
पितृणां च तत्र तीर्थे युधिष्ठिर ॥ संवत्सरं त्रातं साग्नं पितृणां तृप्तिरक्षया ॥ १८ ॥ श्रुतिध्यानप्रणामैश्च जायते

M15/2008

रे॰खं॰ सर्वैः पूजितः॥२०॥इ॰ श्रीरेवा॰ वाल्मीकेश्वरतीर्थं॥१०१॥मार्कं॰॥ततः कोशांतरे पार्थ कोटितीर्थमनुत्तमं॥पुरा कापालिकं वे
षं समास्थाय जगत्पतिः॥१॥नीत्वा करे कपालं च भिक्षार्थं विचचार ह॥रेवाया दक्षिणे तीरे चगादर्शविदितः शिवः
२०७ ॥२॥भिक्षार्थं भ्रमतस्तस्य कपालं न्यपतद्भुवि॥खिन्नमेवात्मनात स्य तत्र लोकाग्रतस्तदा॥३॥स्वयं नाद्य ततः पा
र्थ पात्रं लोकैः समुत्स्थितं॥भिक्षान्ने चापि विक्षिप्ते कपालं यावदुत्स्थितं॥४॥न शक्यते समुत्थातुं तदा भरतर्ष
भ॥तदा लिंगं महद्दृष्टमुत्थितं तत्र शोभनं॥५॥विशेषात्सहसा तत्र निपपात कपालिकः॥प्राणांस्त्यक्त्वा
मि तपसा लोकानां श्रावयन्निति॥६॥लोके रूकं कृतरं नानावाक्यैः प्रलोभनैः॥न प्रकारेण केनापि मन्य
ते लिंगिनां वरः॥७॥एवं कालो महांस्तत्र व्यतिक्रांतो युधिष्ठिर॥विरुद्धिश्चात्मणोः भूरि भूपरपि संबाधितः॥८
देशादेशांतरायाते लोकैश्चापि तबाधितः॥एतस्मिन्नंतरे पार्थ नारदो नभसि गच्छता॥९॥नारदेन तदा दृष्टास्ते
संघमिलितान्नृप॥कौतुकं द्रष्टुमायातो नारदः कौतुकप्रियः॥३०॥आगतो वीक्ष्य तांस्तत्र तं दृष्टो देवं महेश्वरं
॥महेशो नापि दृष्टोसौ प्राप्तस्तत्र कलिप्रियः॥३१॥तापरस्परसंकेताद भिवीक्ष्य युधिष्ठिर॥मीलितो तत्र
लोकानां पश्यतां नारदोब्रवीत॥३२॥अहहा संविहस्याशु जनं यत्नि स्मयं जने॥वारितो पितरास्तं
मामेति मकपालिना॥३३॥नारद उ॰॥परिस्त्यज्य ये कैलासं लिंगी लीलामुपाश्रितः॥कस्मात्तव दूषसे लो
कान्वराकान्धूर्तधूर्जटे॥३४॥अपराधः कृतस्तेषां त्वया तद्विजितात्मही॥त्वया किं कर्तुमारब्धं वद सत्यं म
हेश्वर॥३५॥लोकान्मुंच गिरिं गच्छ वद रूपं स्वरूपं कुरु॥धूर्तोयं भ्रंशतिर्लोकाः खेदं नालं भजंतु च॥३६॥किं
कपः किं कपालं हि शव स्यास्य तु लिंगिता॥मार्कं॰॥इत्युक्तवति तत्रालं नारदे नृपसत्तम॥अंतर्धानमगाः २१०
च्छंभस्तत्रैवाखिलसंवृतः॥गते चादर्शनं देवे नारदः प्राह तान्जनान्॥३८॥कोटिशो मिलितान्पार्थ पि
थातत्वं शिवाज्ञया॥शृण्वंतु लोकाः सर्वेपि चतुर्वर्णसमन्विताः॥३९॥अनुग्रहोस्य भवतां यद्द्रागो

चरंततः॥कपालं यत्र पतितं तत्र लिंगं समुत्थितं॥४०॥तं चाप्यनुग्रहं मन्त्वा पूजयंतु स्वभक्तितः॥कपालेश्वर
नामानं भुक्तिमुक्तिफलप्रदं॥४१॥इदं तीर्थं महापुण्यं लोकानां पापनाशनं॥अत्र स्नात्वा च संतर्प्य श्राद्धं कृ 417/2008
त्वा विधानतः॥४२॥कपालेश्वरमभ्यर्च्य यथाशक्त्या च भक्तितः॥नरो न नरकं यांति यावन्मनु चतुष्टयं॥४३॥शि
वस्यानुचरो भूत्वा शिवलोके महीयते॥इत्युक्त्वा नारदस्तत्र जगामादर्शनं ततः॥४४॥लोकाश्च विस्मितास्स
र्वे स्नात्वा तत्र विधानतः॥पूजयां चक्रिरे देवं कपालेश्वरसंज्ञितं॥४५॥स्थिता त्रिरात्रं ते तत्र मीलिताः कोटिशो
परे॥परस्परमुपामंत्र्य ब्राह्मणाद्या युधिष्ठिर॥४६॥ईश्वरं स्थापयामासुः पृथक्कोटीश्वराह्वयं॥कोटिशो मीलि
ते लोकैः प्रतिष्ठापितमादरात्॥४७॥लिंगं प्रपूजितं लोकैः स्नात्वा विधिवदीश्वरं॥केचिन्नृत्यंति गायंति स्तु
वंति च यजंति च॥४८॥के विध्यायंति विश्वेशं पूजयंति तथापरे॥एवं नैविविधैर्भेदैः शिवस्याराधने रताः॥
॥४९॥कोटीश्वरमिति स्थाप्य ते तो जग्मुर्यथाक्रमं॥कालेन गच्छता ते पि मुक्ता भावानुसारतः॥५०॥पापसंघान्म
हाराज स्वर्गं प्रापुः पृथग्विधं॥ततः प्रभृति विख्यातं तीर्थं कोटीश्वराह्वयं॥५१॥पापक्षयकरं पार्थ स्वर्गमोक्ष
प्रदं शुभं॥तत्र स्नात्वा तु विधिना संतर्प्य पितृदेवताः॥५२॥श्राद्धं दत्वा पितृणां च पूजयेच्छंकरं मुदा॥सर्वपाप
विनिर्मुक्तः शिवलोके महीयते॥५३॥दीपदानं च देवाय ब्राह्मणांश्चापि भोजयेत्॥कपालेश्वरमभ्यर्च्य ततः
कोटीश्वरं व्रजेत्॥५४॥इति ते कथितं तीर्थं कपालेश्वरसंज्ञितं॥तथा कोटीश्वरं तीर्थं तव भक्त्या युधिष्ठिर॥५५
इति श्रीरेवा॰ कोटीश्वरकपालेश्वरतीर्थद्वयं॥१०२॥मार्कं॰॥ततो गच्छेत राजेंद्र नर्मदाउत्तरे तटे॥पांडुतीर्थमि
ति ख्यातं कृष्णहत्याविनाशनं॥१॥अंगारकेश्वरात्तीर्थात्स्थितं क्रमतस्त्रयं॥न्यूनाधिकेन पश्यंति न वपु
श्चानिपविने॥२॥विचित्रवीर्यनृपतेः पुत्रः पांडुः पितानव॥मृगया प्रटमानस्तु पुनरानि घ्नन्मृगान्व
ने॥३॥जघान किल बाणेन ब्राह्मणं मृगरूपिणं॥स तं दोषमनुप्राप्तस्तेन त्रासिश्च भूपतिः॥४॥का

मालिस्तु हि मां निष्ठ्रं त्वमथ्यैवं भविष्यसि॥ एवमुक्त्वा सतत्त्यज प्राणान्विप्रो युधिष्ठिर॥५॥ ततस्तं द्विज
रे०खं० मावस्तु हि मां निष्ठुं त्वमथ्यैवं भविष्यसि॥ एवमुक्त्वास ततत्याज प्राणान्विप्रो युधिष्ठिर॥५॥ ततस्तं हिन
शिन्नः सप्राणांस्त्यक्तुं मनाभिजान्॥ विहाय सर्वं न पतिनर्मदातीरमाश्रयान्॥६॥ निराहारस्तपस्तेपेन
तस्तुष्टो महेश्वरः॥ प्रत्यक्षः प्राह राजानं अतीते वत्सरत्रये॥७॥ ईश्वर उ०॥ किं तप्यते त्वया भूपतपः
तस्तुष्टो महेश्वरः॥८॥ पांडुरुवाच॥ देवदेव जगन्नाथ लोकानुग
वरमदारुणं॥ कोहेतुः कामिवांछाति मम सर्वं निवेद्य॥९॥ वक्तुं नेच्छाम्यहं विभो प्राणांस्त्यक्तुमिहोत्स
हकारक॥ अस्ति वर्मा वक्रो घोषोहं क्षमो मे मनिसंततः॥१०॥ यद्यामयि प्रसन्नोसि कृपयापार्वतीपते॥ अज्ञानाद्ब्राह्मणं
हे॥ किं जीवितेन मे देव सदोषेण सुरेश्वर॥११॥ यद्यामयि प्रसन्नोसि कृपया पार्वतीपते॥ अज्ञानाद्ब्राह्मणं
हत्या मे मां दोषसमाश्रितः॥१२॥ तेनाहं याचये हे शाप ब्रह्मशापं च दारुणं॥ अनपत्योस्मि देवेश ततस्त्वां प्रार्थ
ये विभो॥१२॥ ईश्वर उ०॥ ब्रह्महत्याप्रणष्टा ते तपसा कृपया च मे॥ मुक्तस्त्वं नृपते दोषात्ब्रह्मशापसमु
द्भवात्॥१३॥ किंतु शापो ब्रह्मकृतो न भवेदन्यथा मया॥ ब्रह्मशापं विना राजन् प्रार्थय स्वाभिलषितं नृप॥१४॥
राजोवाच॥ अपुत्रता महादुःखं गतिः शुश्रूषा च नो भवेत्॥ ऋणत्रयापकरणमपुत्रस्य कथं विभो॥१५॥ न
स्मात्पुत्रान्निह वामितं कथं स्फुरतं विना॥ ईश्वर उ०॥ पुत्रास्तव भविष्यंति देवाल्लोकपूजिताः॥१६॥ पृथि
वीपालकाः सर्वे मंत्रशास्त्र्यानपोत्तम॥ मम प्रसादात्स्तथा समारूढास्तु भार्यया॥१७॥ हत्यादोषाद्विरूप
स्तेदेहो भवतु रूपवान्॥ इत्युक्त्वा देवदेवेशस्तत्रैवांतरधीयत॥१८॥ पांडुश्च परमेशानं प्रतिष्ठाप्य युधिष्ठि
र॥ स्नात्वा संपूज्य च विभुं विधिना नृप सत्तया॥१९॥ प्रयातः स्वपुरं पार्थ परमानंदवृत्तिः॥ ततः प्रभृ
ति विख्यातं पांडुतीर्थमनुत्तमं॥२०॥ सर्वदोषप्रशमनं भ्रूणहत्याप्रणाशनं॥ तत्र स्नात्वा नरो राजन् ब्रू
णहत्यां व्यपोहति॥२१॥ तोषयेच्च पितॄन्भक्त्या तत्र दत्वा तिलोदकं॥ श्राद्धेन पितरस्तस्य भवंति हि युगां दश॥२२॥ २०८
तत्र तीर्थे नरः स्नात्वा पदस्था लोकान्वनं शुचिः॥ अपि सर्वाणि पापानि भ्रूणहत्यां च नश्यति॥२३॥ यस्तत्र

पूजयेद्भक्त्या पांडुसंस्थापितं शिवं॥ वाजपेयस्य यज्ञस्य फलं प्राप्नोति मानवः॥२४॥ पितॄनुद्दिश्य यो भक्त्या ब्रा
ह्मणांस्तत्र भोजयेत्॥ पितरस्तस्य तृप्यंति प्रहृष्टा युगविंशतिः॥२५॥ इति श्रीरेवाखंडे पांडुतीर्थं॥ मार्कं०
ततो गच्छेन्नराजेंद्र पुण्यं तीर्थं त्रिलोचनं॥ को नाम पांडुतीर्थस्य सर्वपापप्रणाशनं॥ २६॥ यत्र सिद्धो महारा
ज पुरा राजा त्रिलोचनः॥ त्रेतायुगस्य पूर्वार्धे सूर्यवंशसमुद्भवः॥२७॥ पुंडरीकस्य नृपतेः पुत्रो नाम्ना त्रिलो
चनः॥ संसारानस्य तीता त्वा त्रिविधात्कर्मबंधनात्॥२८॥ आत्मनो मुक्तिमन्विच्छन् सर्वतीर्थेषु पर्यटन्।
रेवातीर्थमनुप्राप्तो विमलं वांछितार्थदं॥२९॥ तीरं गंभीर नीरं तद्दृष्ट्वा शांतमना भवत्॥ पप्रच्छ स मुनीन्स्था
ने तत्र स्थान्नृपसत्तमः॥३०॥ प्रणम्य विधिना पार्थ मोक्षोपायं सुखावहं॥ त्रिलोचन उ०॥ गर्भवासे रहं खिन्नः
कर्मपाशैः प्रपीडितः॥३१॥ रक्ते मोचदर्तुं तेभ्य आत्मानं मुनिसत्तमाः॥ ब्रूत किंचित्सुखोपायं कर्तव्यं मोक्षदं
मम॥३२॥ भवतां कृपयायेन न भवामि पुनर्भवे॥ ऋषय उ०॥ साधु पृष्टं नृप श्रेष्ठ यदि ते बुद्धिरीदृशी॥ तच्छृणु
ष्व प्रवक्ष्यामो वचनं मोक्षदं तव॥ स्थितामोक्षलता यत्र नर्मदा नृपसत्तम॥३४॥ यत्र कर्मादटवी छेदपरशुर्जं
टिस्थितिः॥ तत्र किं बंधनं जंतोर्यदि जानाति से वितुं॥३५॥ उपलानीलकंठत्वं भजंते यज्जलप्लुताः॥ क्रियते किं
नतद्द्वासे यादि वादि मोक्षदा॥३६॥ भवं भवानी भवजा धुनी च भजत्त मादौ भवभीतचेताः॥ ततः क्रमेण प्र
णामाय चेतो दधन्स संत्यज्य पदूर्मि वेगान्॥३७॥ जप पंचाक्षरीविद्यां तपनीवं तपोव्ययं॥ क्षिप रेवातटे फा
ले जप सर्वीसनातनं॥३८॥ भज त्र्यंबं यजेशानं ब्रजद्दूरं जनौ घतः॥ त्यज कामादिकान् शत्रून् मुक्तिकां
तां परिष्वज॥३९॥ शिवं भज शिवं ध्येहि शिवं यज॥ शिवं स्तुहि शिवं ब्रूहि शिवं प्रयाभिलषितं नृप॥४०॥ निःस्ना
यी तीर्थयायी च शिवध्यायी जितासनः॥ नैकस्थायी तथा मायी ध्रुवं मोक्षमवाप्स्यति॥४१॥ स्वानि स्वानि वृत्ति
कृत्वा कर्म कुर्वन्शिवार्पितं॥ वदन्वाक्यं नमितं हितं जनो नर्ययाकृतः॥४२॥ निस्तरंगी च निःसंगी दत्तरंगीप

419
2008

तात्मनि॥ जपन्नेकाक्षरं ब्रह्म ध्रुवं मोक्षमवाप्स्यति॥ ४३॥ मार्कं॰॥ इत्यादिवाक्यैर्नृपतिर्यदासंप्रतिबोधितः॥ त
रे॰खं॰ दात्मनि॥ जपन्नेकाक्षरं ब्रह्म ध्रुवं मोक्षमवाप्स्यति॥ ४४॥ मुनिनामुपदेशेन क्रमात्सर्वं चकार ह॥ प्राणधारणमाकांक्षन्
तः स्त्रिलोचनः स्थात्वा प्रतिष्ठाप्य महेश्वरं॥ ४४॥ मुनिनामुपदेशेन क्रमात्सर्वं चकार ह॥ एवं वर्षाणि तस्याथ द्वादश क्रांतवेत
पत्रपुष्पफलादिना॥ ४५॥ यथालब्धेन तु यदा कदाप्याहारवर्जितः॥ एवं वर्षाणि तस्याथ षड्भिर्मासैर्व्यतीत
सः॥ ४६॥ निर्ममो निरहंकारो यदा ज्ञातः पिनाकिना॥ प्रदग्धाखिलकर्मा च योगी ज्ञानाग्निना ध्रुवं॥ ४७॥ नद
दिपुरुषः प्राप्तो भर्गः सर्गलयेश्वरः॥ त्रिलोचनस्तमाभाष्य शुभ्र मुर्ध्निस्त्रिलोचनं॥ ४८॥ शूलाग्रेण विबोध्ये
दिपुरुषः प्राप्तो भर्गः सर्गलयेश्वरः॥ त्रिलोचनस्तमाभाष्य शुभ्र मुर्ध्निस्त्रिलोचनं॥ ४९॥ शिवः स्वं भुवनं प्राप्य सारूप्यां भुक्तिमा
नं सारूप्ये संन्ययोजयत्॥ तथा स्वरूपं नीत्वा तं महसाभिपरिप्लुतं॥ ४९॥ शिवः स्वं भुवनं प्राप्य सारूप्यां भुक्तिमा
दिशत्॥ मार्कं॰॥ ततः प्रभृति विख्यातं तीर्थं नाम्ना त्रिलोचनं॥ ५०॥ कर्मबंधक्षयकरं मुनीनां विस्मयावहं॥
यत्र तेनैव देहेन सिद्धो राजा त्रिलोचनः॥ ५१॥ तत्र तीर्थे नरः स्नात्वा मुच्यते पापबंधनात्॥ देवान्पितॄंश्च सं
तर्प्य तत्र पुण्ये तिलोदकैः॥ ५२॥ श्राद्धे च भरतश्रेष्ठ पितॄणामनृणो भवेत्॥ त्रिलोचनेश्वरं भक्त्या पूजये
द्यो युधिष्ठिर॥ ५३॥ गंधमाल्यादिपानवस्त्रादिपुष्पधूपार्घ्यवंदनैः॥ स याति परमं स्थानं यत्र देवो महेश्वरः॥ ५४॥
योगिनस्तापसान्विप्रान्यतीनत्र च भोजनैः॥ पूजनैर्विविधैश्चापि तोषयेद्भक्तिसंयुतः॥ ५५॥ सुतोषं याति
तेनाशु महादेवः सनातनः॥ अक्षय्यं तद्भवेत्सर्वं यत्कृतं तत्र भारत॥ ५६॥ विद्यादानं च यः कुर्यात्तत्र तीर्थे वि
धानतः॥ अध्यात्मशास्त्रमध्वा स गच्छेत्परमं पदं॥ ५७॥ सप्तजन्मानि राजेंद्र शिवभक्तो भवेन्नरः॥ नेतो मो
क्षमवाप्नोति योगशास्त्रप्रदानतः॥ ५८॥ मयैतत्परमं तीर्थं कथितं ते युधिष्ठिर॥ कीर्तनाच्छ्रवणाद्दस्य सर्व
पापैः प्रमुच्यते॥ ५९॥ इति श्रीरेवा॰ त्रिलोचनेश्वरतीर्थं॥ १९८ मार्कं॥ ततः क्रोशांतरे गच्छेत्तीर्थं वै कपिलेश्व
रं॥ हितार्थं सर्वलोकानां ऋषिभिः स्थापितं पुरा॥ १॥ यत्राग्निहोत्रसिद्ध्यर्थं कपिलान्हाननत्पुरा॥ नर्मदातो २०९
रसंस्थास्ते परस्परमतेरता॥ २॥ प्रविश्य नर्मदातीरं गंभीरं दृश्यमाणतः॥ मंत्रैराबाहयामासुर्देवीकामदु

घां द्विजाः॥ ३॥ तयोवत्सा समुद्भूता नर्मदायामहांभसः॥ दोग्ध्री सवत्सा कपिला तरुणी शीलसंयुता॥ ४॥ ततः सं
पूजयामासुः शिवाग्निशिवसंयुतां॥ कपिलेश्वरनामानं स्थापयित्वा शिवं द्विजाः॥ ५॥ ततः प्रभृति राजेंद्र विख्या
तं तीर्थमुत्तमं॥ सर्वकामप्रदं पुण्यं कपिलेश्वरसंज्ञितं॥ ६॥ मार्कं॰॥ तथैव शृणु भूपाल पुरावृत्तं प्रविविच्य ते हितं॥ मुनि
पुत्रस्तु कपिलः पुरा पारायणे रतः॥ ७॥ स्नात्वा रेवाजले नित्यं त्रिः स्थायी रिति जितेंद्रियः॥ स्थित्वा शुचिस्थले
शुभ्रे सर्वविद्यासु पारगः॥ ८॥ दृष्ट्वा तत्र शिवं वर्णं तेषु ध्रुवं बुध्यं सनातनं॥ सर्वज्ञं सर्वभूतेशं सर्वकामफलप्र
दं॥ ९॥ उमासहायं गिरिशं सर्वबाधाहरं हरं॥ रेवातोयेन संस्नाप्य पूजयित्वा विधानतः॥ १०॥ वेदादि सर्वशा
स्त्राणां पारायणमथाकरोत्॥ नवावर्तविधानेन शुद्धपाठेन पेशलं॥ ११॥ यजंजपन्स्मरंने वं सिद्धः संवत्सरत्र
यात्॥ महादेवप्रसादेन शापानुग्रहशक्तिमान्॥ १२॥ इच्छयादृश्यस्वरूपेण सिद्धः सर्वत्रगो मुनिः॥ कालेना
ल्पेन राजेंद्र महादेवगणोऽभवत्॥ १३॥ ततः प्रभृति विख्यातं तीर्थमेतद्द्विजोत्तम॥ कपिलेश्वरसंज्ञं हि सर्वसि
सिप्रदं शुभं॥ १४॥ तत्र तीर्थे नरः स्नात्वा कपिलं यः प्रयच्छति॥ विप्राय वेदविदुषे शृणु यास्तस्य यत्फलं॥ १५॥
सर्वेषामेव देवानां कपिलादानमुत्तमं॥ ब्रह्मणा भाषितं पूर्वं सर्वदेवसमागमे॥ १६॥ सद्यः प्रसूतां तरुणीं क
पिलां यः प्रयच्छति॥ स तो विष्णुपुरं याति गीयमानोऽप्सरोगणैः॥ १७॥ यावंति तस्य रोमाणि सवत्सायास्तु भा
रत॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते॥ १८॥ ततोऽवतीर्णः कालेन इह मानुष्यतां गतः॥ धनधान्यसमायु
क्तो जायते विपुले कुले॥ १९॥ वेदविद्याव्रतस्नातः सर्वशास्त्रविचक्षणः॥ व्याधिशोकविनिर्मुक्तो जायते ना
त्र संशयः॥ २०॥ तत्र तीर्थे च यो विप्रः स्नात्वा पारायणं पठेत्॥ अंतर्जलेवा द्रुपदां जपंछुद्धिमवाप्नुयात्॥ २१॥
गायत्रीमंत्रजाप्येन सर्वपापक्षयो भवेत्॥ पूजयित्वा महाप्यानं कपिलेश्वरमादरात्॥ २२॥ रुद्राध्यायं ज
पेद्यस्तु नियमेन समन्वितः॥ दीपं दत्वा च देवाय स याति शिवमंदिरं॥ २३॥ इति श्रीवायवीये रेवा॰ कपिले

421/2008

श्वरतीर्थं ॥ मार्कं० ॥ ततः कंबुं गच्छेन्नरेशार्थ कंबुकेश्वरमुत्तमं ॥ यस्य दर्शनमात्रेण जायते पापसंक्षयः ॥ १ ॥ हिरण्य
कशिपुर्दैत्यो बभूव बलवान्पुरा ॥ अवध्यः सर्वलोकानां त्रिषु लोकेषु विश्रुतः ॥ २ ॥ तस्य पुत्रो महातेजाः प्रह्लादो
नाम वैष्णवः ॥ विष्णुभक्तिप्रसादेन तस्य राज्यं प्रतिष्ठितः ॥ ३ ॥ विरोचनस्ततस्तस्मात्तस्माज्जातो बलिर्नृपः ॥ ब
लिपुत्रस्तु बाणो वै तस्माज्जातस्तु शंबरः ॥ ४ ॥ शंबरस्यान्वये जातः कंबुर्नाम महासुरः ॥ तेनात्मकेशबाहु
रं महाभयमुपस्थितं ॥ ५ ॥ दानवानां विना त्राणं यत्नान्यो हेतुर्मे नो मम ॥ इति ज्ञात्वा कुटुंबं स्वं त्यक्त्वा बंधुपरि
ग्रहं ॥ ६ ॥ स धूर्जटिपुरीं प्राप्य सन्मतिः संजितेंद्रियः ॥ तत्वा रमौनमास्थाय तपः कंबुर्महामतिः ॥ ७ ॥ अ
क्षसूत्रधरो ध्यानी दंडी मुंडी चर्मखला ॥ सकृद्यावकाहारो वल्कलाजिनसंवृतः ॥ ८ ॥ स्नात्वा धूनिपरो
नित्यं नर्मदातोयमाश्रितः ॥ अपूजयन्महादेवं वर्षाणामर्बुदं नृप ॥ ९ ॥ ततस्तुतोष भगवान्देवदेवो महे
श्वरः ॥ उवाच दानवं साक्षान्मेघगंभीरया गिरा ॥ १० ॥ भो कंबुक महाभाग तुष्टोऽहं तव सुव्रत ॥ इष्टं व्रतानां
परमं मौन्यं सर्वार्थसाधनं ॥ ११ ॥ चरितं तत्वया लोके देवदानवदुश्चरं ॥ वरं वृणीष्व भद्रं ते यत्ते मनसि वर्त
ते ॥ १२ ॥ कंबुरुवाच ॥ यदि प्रसन्नो देवेश यदि देयो वरो मम ॥ अक्षयश्चाव्ययो भूत्वा स्वेच्छया विचराम्यहं ॥
॥ १३ ॥ दैत्यदानवदेवानां संग्रामेष्वपलायिनां ॥ भयं चान्यत्र विद्येत मुक्त्वा देवं गदाधरं ॥ १४ ॥ तस्यैव संयुगे
वध्यो यथाहं नैव धूर्जटे ॥ भवामि नान्यस्य विभो ददस्व मम मंगलं वरं ॥ १५ ॥ महादेव उ० ॥ मम संनिहितो यत्र
त्वं भविष्यसि दानव ॥ तत्र विष्णुभयं नास्ति वसात्र विगतज्वरः ॥ १६ ॥ तस्य देवाधिदेवस्य वेदगर्भस्य संमु
खं ॥ शंखचक्रभृतः श्रेष्ठो नाहं सर्वे न वै सुराः ॥ १७ ॥ किं पुनर्योऽद्विपत्येन लोकलोकप्रभुं हरिं ॥ स सुखी वर्त
ते कालं न निमेषमयी तिवे ॥ १८ ॥ तस्मात्सत्यपरो भूत्वा सर्वलोकहिते रतः ॥ द्रोहद्वेषाजितो दैत्यः सर्वमैत्रो २१०
नुकंपकः ॥ १९ ॥ वसिष्यसि चिरं कालमित्युक्त्वांतरधीयत ॥ गते चादर्शनं देवे तत्र तीर्थे स कंबुकः ॥ २० ॥

स्थापयामास देवेशं शिवं शांतमनामयं ॥ पूजयित्वा तु विधिना शांतः त्रिपुरांतकः ॥ २१ ॥ तदा प्रभृति पार्थेति सत्या
र्थे लोके पापपरिप्लुते ॥ तत्छुंनमक्षवल्लिंगं तत्रैवेश्वरलीलया ॥ २२ ॥ मार्कं० ॥ ततः कालेन बहुना मध्यदेशे
नृपोत्तम ॥ दुर्भिक्षेऽपी उत्तिल्लोके सोम्यकाष्ठानिवासिनी ॥ २३ ॥ धर्मधीधैर्यवंतोऽपि पुरा केचिन्महर्षयः ॥ स
सपुत्रशिष्या भार्याभिः सहिता बहवः किल ॥ २४ ॥ तीर्थात्तीर्थं प्रसर्पंतो दुःकालपरिपीडिताः ॥ श्रुत्वा रेवात
टं पुण्यमदुर्भिक्षमकल्मषं ॥ २५ ॥ आगतास्तत्र राजेंद्र सकुटुंबा सरिद्वयं ॥ स्नानध्यानजपार्चाभिस्तेषां
कालो निवर्तते ॥ २६ ॥ एकदा बालकैस्तेषां क्रीडद्भिश्च कुमारकैः ॥ नर्मदापुलिने पुण्ये कंबुकान् शुक्लय
स्तथा ॥ २७ ॥ इतस्ततोऽपि संजीय द्रोणराशिः कृतस्तटे ॥ सतुं देवालयं कारा पूजितश्चापि पल्लवैः ॥ २८ ॥
केचिद्गायंति नृत्यंति रममाणास्तदाग्रतः ॥ ततो निजाश्रमानेतुं कुमारास्ते प्रचक्रमुः ॥ २९ ॥ विभज्य याव
त्कुर्वंति तावद्दृश्युरद्भुतं ॥ तत्रैवं महल्लिंगमुद्भूतं कंबुराशितः ॥ ३० ॥ ततः स्वस्वपितॄणां ते ऋषीणां ते
न्यवेदयन् ॥ दृष्ट्वा च ऋषयो लिंगं कंबुमध्यगतं तदा ॥ ३१ ॥ परं विस्मयमापन्नाः पूजयामासुरादरात् ॥
स एव भगवान्रुद्रः सर्वव्यापी सनातनः ॥ ३२ ॥ प्रच्छन्नो यः पुरा काले स एवाविर्भूत्तदा ॥ विश्वरूपेण भ
गवान् सवाहनगणायुधः ॥ ३३ ॥ यस्मादिह लयं यातः स्तेन लिंगं निगद्यते ॥ कंबुराशिगते यस्मादेत
द्दे लिंगमुत्थितं ॥ ३४ ॥ कंबुकेश्वरसंज्ञं हि तदा कालेऽपि तैः कृतं ॥ कंबुकेश्वरमामंत्र्य पूजयिष्यंति येऽशि
वे ॥ ३५ ॥ अत्र तीर्थे फलं तेषां कंबुसंख्यं भविष्यति ॥ अथ ते पूजयित्वा तं भक्त्या देवं महर्षयः ॥ ३६ ॥ सु
त्वा सुभिक्षं स्वस्थाने प्रजग्मुर्द्विजमुत्तरां ॥ एवं पार्थ परिख्यातं तीर्थं वै कंबुकेश्वरं ॥ ३७ ॥ रेवाया उत्तरे कू
ले कोकानां वांछितार्थदं ॥ तत्र तीर्थे नरः स्नात्वा पूजयेत्कंबुकेश्वरं ॥ ३८ ॥ सर्वपापक्षयं प्राप्य लभते वांछि
तं फलं ॥ तर्पयित्वा पितॄन्भक्त्या श्राद्धं दत्वा यथाविधि ॥ ३९ ॥ कुरुते स्वक्षयां तृप्तिं पितॄणां युगसंख्यया ॥

423/2008

रे०खं शंखेनस्नापयेद्देवंतत्रभक्त्याविशेषतः॥४०॥शंखेरेवाजलैःपूर्णेहेमदक्षिणयान्विते॥भक्त्यादत्वार्घ्यं
वायत्रीवायद्विजहस्तके॥४१॥द्विजभोजनसंयुक्तंदत्वास्वर्गेमहीयते॥कंबुतीर्थेद्विजःस्नात्वाविधि
नाभ्यर्चयेत्करं॥४२॥ऋग्यजुःसामवेदेषुसांगोपांगेषुयत्फलं॥तत्फलंसमवाप्नोतिगायत्रीमात्रमंत्र
वित्॥४३॥तत्रतीर्थेचयःस्नात्वारुद्राध्यायंपठेद्द्विजः॥पूजयेद्देवमीशानंसोग्निष्टोमफलंलभेत्॥४४॥
अकामोवासकामोवातत्रतीर्थेनिजंवपुः॥यस्त्यजेन्नात्रसंदेहःसरुद्रपदमिच्छति॥४५॥इतिश्रीरेवा०॥
कंबुकेश्वरतीर्थं०॥१६८॥मार्कं०॥ततःकोशांतरेपार्थतीर्थाद्वैकंबुकेश्वरं॥चंद्रभोगेप्रसिद्धंविख्यातंपूजितं
सर्वदेवतैः॥१॥यत्रचंद्रेश्वरोदेवःसर्वदैत्यहरोहरः॥युधिष्ठिर०॥चंद्रेणकिंकृतंतत्रप्रभासंकेनवाभ
वत्॥२॥एतदाख्याहिमेसर्वंतीर्थसंभवकारणं॥मार्कं॥शृणुपार्थपुरावृत्तंकल्पादौवैयथाभवत्॥३॥चं
द्रोत्पत्तिस्त्रिधापार्थतांशृणुष्वाभवद्यथा॥आदौबभूवविततेब्रह्मणोयज्ञसाधने॥४॥उत्पत्तिस्तत्रसो
मस्यसोमाभिषवकर्मणि॥द्वितीयक्षीरजलधेश्चंद्रोभूतमृताग्रतः॥५॥सहिवृक्षौषधीनाथःससौमः
समितांशुमान्॥अस्मिन्कल्पेसमुत्पन्नस्तृतीयेचंद्रमानृप॥६॥अत्रिनेत्रांतरेपार्थस्वयंसाक्षात्पितामह
हः॥अंबौनयौउवश्रेष्ठकल्पेवाराहसंज्ञके॥७॥यथापूर्वस्तथैवासौवपुषामहसाश्रिया॥सोपिचंद्रपदं
प्राप्तस्थानेपूर्वस्यपूज्यते॥८॥आद्यश्चंद्रपदभ्रष्टःपरहीनस्त्रयान्वितः॥ओजस्तेजोद्वितीयेनहृतंचंद्र
णतस्यतु॥९॥परिक्षीणबलःप्रायमहेमानुपवद्भुतिः॥अवंतीपुरमासाद्यतताप्तेपतपोमहत्॥१०॥
कालेनमहतापार्थमहाकालोमहेश्वरः॥प्रसन्नःप्राहराजानंप्रसन्नोस्मिविधोवद॥११॥किमिच्छसिम
हाभागब्रूहितत्तेवदाम्यहं॥चंद्र उ०॥विधुनातेनमेस्थानंसमाक्रांतंमहेश्वर॥१२॥ईश्वर उ०॥यदिच्छ २११
सिपदंप्राप्तंशाश्वतंपूर्वतोधिकं॥ततोनर्मदांमदीयांत्वंवत्सगच्छाशुनर्मदां॥१३॥तत्रकोहनतीर्थस्य

वार्श्वेतपसुधांशुपे॥ध्रुवंयोनात्ममूर्तिस्तेशीघ्रंसिद्धिमवाप्स्यति॥१४॥इत्युक्त्वादेवदेवेशस्तत्रैवांतरधी
यत॥चंद्रोपितद्वचोगत्वाशीघ्रमागान्महानदीं॥१५॥रेवांदेवादिभिर्जुष्टांदैत्यविध्वंसिनींनृप॥कोहने
श्वरपूर्वेतपस्तेपेस्थितोविभुः॥१६॥दिव्यंवर्षंततःपार्थतस्यतुष्टोमहेश्वरः॥प्रत्यक्षःप्राहभगवा
न्प्रेमगर्भंतुपांडव॥१७॥ईश्वर उ०॥परेणस्पर्धमानस्यतत्रयत्पापमाश्रितं॥तस्यपापस्यनाशायसेव्या
सदिदियंवरा॥१८॥नर्मदास्वंउपापानांसुखदासाधुनर्मदा॥विधोशुच्योसिनिधतंत्वमस्याद्दर्शना
द्पि॥१९॥पापनाशायजंतूनांनद्यस्तीर्थानिसर्वतः॥प्राप्नुवंत्युत्तमंस्थानंरेवासेवापरानराः॥२०॥
स्थानमिच्छसिचेद्दिव्यंध्रुवंचोत्तममंजसा॥कलाकलितकायस्त्वंप्रभापूरितसद्वपुः॥२१॥भवमेभू
षणंभव्यंभालेभालेंदुसंस्थितः॥इत्युक्तःशंकरेणाशुचंद्रःस्नात्वाविधानतः॥२२॥स्थापयित्वासगिरिशं
प्रभापूरितमंडलः॥पूजयित्वाततोभक्त्यास्वनाम्नाधूर्जटिंविभुं॥२३॥पिनाकिनंतंप्रत्यक्षंवरदंदे
ववद्भुवि॥चंद्र उ०॥नमस्तेस्तुमहादेवकृपयामेवचःकुरु॥२४॥यथात्रतिष्ठितंलिंगंवीरमत्रस्थिरोभ
व॥लोकानामुपकारायप्रसीदपरमेश्वर॥२५॥मार्कं०॥एवमाशुतथोत्कांतंपरिपूज्यचपीडितं॥ततो
गृहीत्वातंचंद्रंभर्गःस्वर्गसुखप्रदः॥२६॥विशालभालेशिरसिजटामंडलन्यवेशयत्॥विशालमपितंवा
लंविधायाथवपुषाभवः॥२७॥दंतिदंतनिभंपार्थशिवद्वित्रदंविभुं॥एवंस्थानेस्थिरंदत्वास्वशिरःशार्व
रीपते॥२८॥गिरिंकैलासमगमज्जरद्गवतिःशिवः॥इत्यद्भुतंसमभवत्ततःप्रभृतिभारत॥२९॥तीर्थं
तीर्थवरंयत्रप्रभाचंद्रस्यपूरिता॥चंद्रप्रभाससंज्ञंतुचंद्रेश्वरनिरामाश्रितं॥३०॥चंद्रदैन्यापहरणंस्था
नोत्तमविधायकं॥मार्कं॥कालांतरेतथैवायमत्रिनेत्रसमुद्भवः॥३१॥तत्रसिद्धिंपरांप्राप्तस्तच्छृणुष्व
नराधिप॥पुराद्यात्तस्तुदक्षेणयथातेकथितंमया॥३२॥प्रसेवनात्पिदाराणांक्षयरोगीभविष्यसि॥

425/2008

उद्वाहितानां पत्नीनां येन कुर्वंति सेवनं ॥३३॥ या निष्ठा जायते तेषां तां शृणुष्व नराधिप ॥ कृताकृतो हि नारीणां
सेवनाज्जायते सुतः ॥३४॥ सुतात्स्वर्गश्च मोक्षश्च इत्येवं श्रुतिभाषितं ॥ येन सेवंति तां मर्त्यास्तत्कालोत्कलि
धानतः ॥३५॥ तेषां भ्रूणहते पापं जायते पापकर्मणां ॥ तेन पापेन रौद्रेण वेष्टितो नरकं व्रजेत् ॥३६॥
तस्मात्तु रुधिरं पापः पिबेत्येव न संशयः ॥ ततोवतीर्णः कालेन यां यां योनिं प्रयाति सः ॥३७॥ तस्यां त
स्यां सदुष्टात्मा दुर्भगो जायते ध्रुवं ॥ परिभूता हि सा भर्त्रा ध्यायते न्यपतिं यदि ॥३८॥ स्वर्गस्थाने च
पितरः पूर्वजास्तत्पितामहाः ॥ पतंति जातमात्रेण कुलहानेन जायते ॥३९॥ तत्पापेन च घोरेण नक्षय
रोग्यभ्यवछसी ॥ ततस्त्वन्यानेकानि पुण्यान्यापतनानि च ॥४०॥ अत्र मंत्रेण मंत्रोक्ताः सर्वपापक्षयंक
रि ॥ कुमारादिहोत्तरे तीरे श्रुत्वा तीर्थमिदं शुभं ॥४१॥ तत्रोपवासं दानानि व्रतानि नियमा यथा ॥ चका
र द्वादशाब्दानि पूजयन्वै महेश्वरं ॥४२॥ सर्वपापक्षयं प्राप्य प्रभासं सततोयया ॥ यत्रैवार्कस्थलं
नाम्ना प्रोच्यते परमार्थदं ॥४३॥ मार्कं० ॥ एवं विशेषविख्यातं ततः प्रभृति भारत ॥ तीर्थं चंद्रप्रभासाख्यं
चंद्रभागाद्वयं तथा ॥४४॥ तथैव सोमतीर्थाख्यं सर्वसिद्धिप्रदं नृप ॥ चंद्रो लिंगत्रयं पार्थ स्थापयित्वा
दिवं गतः ॥४५॥ जगाम प्रभया पूर्णः पापशापो जितः स्वयं ॥ रेवोरिसंगमे मुख्यं भृगुक्षेत्रे तथापरं ॥४६॥
प्रभासे च तृतीयं वै वांछितार्थप्रदं परं ॥ एवं पार्थ मया ख्यातं तीर्थं पापप्रणाशनं ॥४७॥ सोमतीर्थे
तु यः स्नात्वा पूजयेद्देवमीश्वरं ॥ भ्राजते स नरो लोके सोमवत्प्रियदर्शनः ॥४८॥ चंद्रभागे च यो गत्वा
ग्रहणे चंद्रसूर्ययोः ॥ स्नानं समाचरेद्भक्त्या मुच्यते सर्वकिल्बिषैः ॥४९॥ तत्र स्नात्वा परं तीर्थं त्वन्नृप
तिग्रहणे स्त्रियः ॥ वाचिकं मानसं पापं कर्मजं यत्पुराकृतं ॥५०॥ स्नानमात्रेण राजेंद्र तत्र तीर्थे प्रणश्य २१२
ति ॥ वहवस्तं न जानंति महामोहविमोहिताः ॥५१॥ देहस्थमिव देवेशं परमानंदरूपिणं ॥ पश्चिमे

सागरे स्नात्वा सोमतीर्थे हि यत्फलं ॥५२॥ तत्फलं समवाप्नोति चंद्रभागे न संशयः ॥ संक्रांतौ च व्यतीपाते अयने
विषुवे तथा ॥५३॥ चंद्रप्रभासे स्नात्वा हि सर्वपापैः प्रमुच्यते ॥ ते मूढास्ते दुरात्मानस्तेषां जन्म निरर्थकं ॥५४॥ चं
द्रतीर्थं न जानंति रेवायां ये व्यवस्थितं ॥ चंद्रभागे नरो यस्तु संन्यासं कुरुते नृप ॥५५॥ अनिवर्तगतिस्तस्य सो
मलोकान्न संशयः ॥ श्राद्धं ददाति यस्तत्र स्वपितॄणां च तिलोदकं ॥५६॥ उद्धरेत्स पितॄन्पार्थ आत्मना सैक
विंशकान् ॥ दीपदानं चैव वायसत्राणं तथा द्विजभोजनं ॥५७॥ इति ते कथितं पार्थ मया पापप्रणाशनं ॥ ती
र्थं चंद्रप्रभासाख्यं दैन्यदुर्गतिनाशनं ॥५८॥ इति श्रीरेवा० चंद्रप्रभासतीर्थं ॥१०८॥ मार्कंडेय उ० ॥ ततो गच्छे
त राजेंद्र तीर्थं वैकोहनेश्वरं ॥ चंद्रप्रभासतीर्थात्तु स्थितं क्रोशं नरर्षभं ॥१॥ सर्वपापहरं पुण्यं तीर्थं मृत्यु
विनाशनं ॥ पुरा तत्र द्विजः कश्चिद्वेदवेदांगपारगः ॥२॥ पत्नीपुत्रसुहृद्युक्तः स्वकर्मनिरतोभवत् ॥ युधि
ष्ठिर उ० ॥ वर्णोत्पत्तिं वर्णधर्मांश्च श्रोतुमिच्छाम्यहं मुने ॥३॥ ब्राह्मणस्य तु यत्कर्म उत्पत्तिः क्षत्रियस्य तु ॥ वैश्या
नां चापि शूद्राणां तत्सर्वं कथयस्व मे ॥४॥ निखिलं ज्ञातुमिच्छामि सविप्रो भ्रातृभिः सह ॥ मुखात्तव मुनिश्रे
ष्ठ न्योवित्सा मतिर्मम ॥५॥ मार्कं० ॥ उत्पत्तिकारणं ब्रह्मा देवो देवादिरुच्यते ॥ प्रथमं सर्वभूतानां चराचरजग
द्गुरुः ॥६॥ ब्राह्मणस्तन्मुखाज्जातः क्षत्रियस्तस्य बाहुतः ॥ तस्योरुदेशाद्वैश्यश्च पद्भ्यां शूद्रश्च जज्ञिरे ॥७॥ त
तस्त्वन्ये पृथग्वर्णाः पृथग्धर्माश्च भारत ॥ पर्यायेण समुत्पन्ना अनुलोमविलोमतः ॥८॥ तेषां धर्मं प्रवक्ष्यामि
श्रुतिस्मृत्यर्थनोदितं ॥ येन सम्यक्कृतेनेह सर्वे यांति परां गतिं ॥९॥ ध्यानं विना पितं निर्दिष्टं ब्राह्मणैः प्राप्यते नृप ॥
गतिरध्ययनाद्दानाज्ज्ञानाद्याचारतोन्वहं ॥१०॥ अधीत्य वेदान्विद्वान्वा सांगं प्रोक्तविधानतः ॥ कुलजां रूपसंप
न्नां सर्वलक्षणसंयुतां ॥११॥ उद्वाहयेत्ततः पत्नीं प्राप्यानुज्ञां गुरोर्नृप ॥ ततः स्मार्तं विवाहाग्निं श्रौतं वा पूज
येत्क्रमात् ॥१२॥ प्रतिग्रहधनो भूत्वा दंभलोभविवर्जितः ॥ पंचयज्ञविधानेन कुर्यान्नित्यमतंद्रियः ॥१३॥

3127/2008

२०खं० वनंगच्छेत्ततःपश्चाद्द्वितीयाश्रमसेवनात्॥पुत्रेषुभार्यांनिक्षिप्यसर्वसंगविवर्जितः॥१४॥दृष्टालोकानवाप्नोतिनर्वै
हजायतेपुनः॥क्षत्रियस्तुस्थितोराज्येपालयित्वावसुंधरां॥१५॥साधूंनक्षन्निगृण्हन्वैलुष्टात्मप्रोनिसद्गतिं॥
कृषिगोलक्षणंवैश्यवाणिज्यंधर्मजीवनं॥१६॥सत्यशौचान्वितस्तद्वत्स्वर्गंगच्छत्यसंशयं॥नशूद्रस्यपृथ
ग्धर्मोविहितःपरमेष्ठिना॥१७॥नमंत्रोनचसंस्कारोनसद्विद्यानिषेवनं॥नसद्विद्याश्रयणंनदीक्षादेव
तार्चनं॥१८॥यथाजातेनसततंवर्तितव्यमहर्निशं॥वर्णत्रयस्यशुश्रूषानदादिष्टेनजीवनं॥तथैवमित
रेषांचप्रतिलोमानुलोमतः॥मेवसंस्कारसंपन्नास्त्रयोवर्णाद्विजातयः॥२०॥यःस्वधर्ममनादृत्यवर्तते
कामचारतः॥समृतोजायतेश्वावैगतिमूर्ध्वांनगच्छति॥२१॥स्वधर्मोचिंतयंनित्यंतेषांशास्त्रंविलोक
यन॥यज्ञभागीस्वधर्मस्यस्वर्गभागीचजायते॥२२॥एवंगुणसमायुक्तोवसन्विप्रःसभारत॥सद्वृ
त्तःशास्त्रसंपन्नःश्रोत्रियःसर्वसंमतः॥२३॥जपध्यानपरोनित्यंदेवतातिथिपूजकः॥स्वगृहेवैसुखासी
नःशिशुलालनतत्परः॥२४॥एकदाप्रथमेयामेनिशायांतस्यभारत॥ग्रस्तंशरीरेवैयघ्रंअकस्मादंब
रेततः॥२५॥हनस्वेत्यसकृत्तेनश्रुतावाकशरीरिणी॥ततोनिरीक्ष्यतेयावदधश्चोर्ध्वंद्विजोत्तमः॥२६॥
वेपमानःसभीतात्मातावद्दूराद्ददर्शह॥शूलखड्गपाशहस्तैश्चभल्लहस्तैःसुदारुणैः॥२७॥एकाक्षमा
गावत्भुजंयमलक्षणलक्षितं॥दृष्ट्वातमेवमायांतमालभ्यात्मानमात्मना॥२९॥अजाप्यपरमंजा
प्यंशातरुद्रीयसंभवं॥ततःप्रोवाचपुरतोयमःसंयमनोमहान्॥३०॥शृणुवाक्यमिहब्रह्मन्यमोहं
सर्वजंतुषु॥संहरस्वमहाभागरुद्रजाप्यंसुदुर्विदं॥३१॥वेत्तिनास्यविधानंहिविदुषामपिकश्चन॥
अपिवागीशमुख्यानांत्वद्विधानांतुकिंपुनः॥३२॥अस्मादुपरमक्षिप्रंकालाक्रांतोसिवाडवः॥ २९३
येनाहंकालपाशैस्त्वांसंयमामिगतव्यथः॥३३॥तच्छ्रुत्वानिष्ठुरंवाक्यंयमतःउविनिर्गतं॥महा

भयसमाक्रांतोब्राह्मणःप्रपलायितः॥३४॥मृत्युंजयंजपन्नेवसिद्धमंत्रमुदारधीः॥तेनस्प्रष्टुंनशक्तोसौतंवि
प्रंक्षिप्रगामिनं॥३५॥तस्यमार्गंगताःसर्वेयमेनसहकिंकराः॥तिष्ठतिष्ठेतितंविप्रंब्रुवाणाधावितावरं॥३६॥
एवंसविह्वलोविप्रोददर्शपुरतोमहान्॥उद्धृतंशिवलिंगंतुभुवंभित्वाशुभारत॥३७॥त्वरमाणःपरिश्रां
तोहाहतोहमितिब्रुवन्॥ब्राह्मणउ०॥रक्षरक्षमहादेवशरणागतवत्सल॥३८॥मृत्युंजयस्त्वमेवासि
त्राणंमेचयमात्ततः॥एवमुक्त्वापतद्भूमौलिंगमालिंग्यभारत॥३९॥गतसत्वःसविप्रेंद्रःसंस्मरन्सुरस
त्तमं॥दृष्ट्वालिंगितलिंगंतंभूमौभक्तार्तिनाशनः॥४०॥कोहंतेतिब्रुवन्नाभैर्हुंकारमकरोत्तदा॥तेननेदिं
करःसर्वेयमेनसहभारत॥४१॥हुंकारेणगताःसर्वेमेघावातहतादिव॥ततउत्थाप्यविप्रंतंत्रिदशसा
क्षादुवाचह॥४२॥महेश्वरउ०॥जपतस्तेमहामंत्रंगतंमृत्युकृतंभयं॥स्वधर्मनिरतोदांताकामक्रोधा
धादिवर्जिताः॥४३॥विप्राःस्वदारसंतुष्टास्तेनमृत्युवशाःक्वचित्॥अनभ्यासाच्चवेदानांनिषिद्धस्य
निषेवनात्॥४४॥आलस्यादन्नदोषाच्चमृत्युर्विप्राञ्जिघांसति॥एतान्नियःपरित्यज्यस्वधर्मनिरतो
द्विजः॥४५॥रुद्राध्यायंजपेद्यस्तान्नतंमृत्युर्जिघांसति॥यदात्वांमृत्युरागच्छेत्तदामृत्युंजयंजयेः॥
॥४६॥दूरेमृत्युर्यमोवापिस्मान्मृत्युंजयजापिनः॥ब्राह्मणउ०॥यस्यब्रह्मकपालानिगलेलुठंतियाजि
नः॥४७॥तस्मादिपुरुषंदेवंवंदेमृत्युंजयंशिवं॥अनादिनिधनंशांतमप्रतर्क्यमगोचरं॥४८॥सहस्रशाश्वतं
वेद्यंवंदेमृत्युंजयंशिवं॥चंद्रार्कौयस्यनेत्रेचमृत्युर्भालविलोचनं॥४९॥स्थितायस्जठरेलोकावंदेमृ०॥उमार्धं
गास्थितागंगायस्यजटामौलिमध्यतः॥५०॥अनघंविश्वबीजंतंवंदेमृ०॥गुणातिगंचगुणिनंकर्मलेपवि
वर्जितं॥५१॥सौम्यासौम्यस्वरूपंतंवंदे०॥कालांतकयमादीनांकारणंकांतदर्शनं॥५२॥दशाष्टदोषमु
क्तंवंदे०॥सर्वातिगंसर्वमयंसर्वेशंसर्वनाशनं॥५३॥सर्वाधारंविधातारंवंदेमृ०॥महीजलमरुद्वह्नि
वियत्सोमाग्निदीक्षितैः॥५४॥रूपैरेभिरिहालक्ष्यंवंदे०॥किंचिद्यानेज्जगन्नाथयदिदासायदीयते॥५५॥

429/2008

रे॰खं॰ मत्स्युंजयाष्टकेनेह मया त्वं देव संस्तुतः॥ यस्त्वामनेन संस्तोति भक्त्या मृत्युभयापह॥५८॥ तस्यापमृत्युदुःस्वप्नं
दुर्निमित्तं च नश्यति॥ आकल्पं च त्वया स्थेयं मिह लिंगे महेश्वर॥५७॥ कोहनेश्वर नाम्ना तु कोकानां हित काम
या॥ ईश्वर उ॰॥ एवं भवतु ते विप्र यथाभिलिखितं शुभं॥५८॥ पुत्रपौत्राभिवृत्तिश्च भविष्यति तवानघ॥
अंते शिवपुरं प्राप्य गणस्त्वं मे भविष्यसि॥५९॥ स्तोत्रेणानेन यो भक्त्या स्तोष्यति मां समाहितः॥ तस्यापमृ
त्युदुःस्वप्नं दुरिष्टं नाशमेष्यति॥६०॥ मार्कं॰॥ इत्युक्त्वा देवदेवेशस्तत्रैवांतरधीयत॥ ब्राह्मणश्च यथाकामं
पूजयित्वा तु विस्मितः॥६१॥ चरित्रं कोहनेशस्य च तु यं लोके गरीयसी॥ तदा प्रभृति तत्तीर्थं कोहनेशाभिराजितं॥
॥६२॥ सर्वपापहरं पुण्यं सर्वतीर्थेष्वनुत्तमं॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वर॥६३॥ अग्निष्टोमस्य य
त्तस्य स लभेत्पुण्यमुत्तमं॥ तत्र तीर्थे तु यो राजन्प्राणत्यागं लभेत्क्वचित॥६४॥ न पतत्यतियमं क्रूरमिति निश्चि
तं भाषितं॥ अग्निप्रवेशं यः कुर्याज्जले वा नृपसत्तम॥६५॥ आग्नेयं वारुणं वापि लोकं प्राप्य महीयते॥ इ
ह लोके वतीर्णः स महाधनपतिर्भवेत॥६६॥ तत्र तीर्थे द्विजः स्नात्वा पूजयित्वा महेश्वरं॥ रुद्राध्यायं जपे
द्यस्तु प्राप्त रुद्रियमित्यपि॥६७॥ रुद्रसूक्तमथान्यद्वा मंत्रं वापि त्रियंबकं॥ गायत्रीं वा नृपश्रेष्ठ समाहितम
नाः शुचिः॥६८॥ स चापि मृत्युं जयति अंते रुद्रं च गच्छति॥ तर्पयेद्यः पितॄंस्तत्र तिलमिश्रेण चांभसा॥६९॥
तथा श्राद्धप्रदानेन जनयेत्तृप्तिमक्षयां॥ पंचामृतेन संस्नाप्य गंधतोयैश्च शंकरं॥७०॥ पुण्यैस्तीर्थजलैर्भ
क्त्या विधिपूर्वं युधिष्ठिर॥ तथा संपन्न पुष्पैश्च पवित्रैः पूजयेच्छिवं॥७१॥ घंटावादित्यनैवेद्यनीराजन फ
लादिभिः॥ धूपदीपनमस्कारस्तुतिभि[illegible]गीतनर्तनैः॥७२॥ एवमाराधयेद्यस्तु स भक्त्या कोहलेश्वरं॥ यं २१४
यं काममभिध्यायेत्तत्तं प्राप्नोति निश्चितं॥७३॥ अंते च मरणं प्राप्य शिवस्यानुचरो भवेत्॥७४॥ इति श्री
रेवा॰॥ कोहनेश्वरतीर्थं॥ मार्कं॥१८८ ततः कोत्र्यांतरतीर्थमिंद्रेश्वरं शुभं॥ नर्मदादक्षिणे कूले कपाले

श्वरतीर्थतः॥१॥ युधिष्ठिर उ॰॥ कस्मादिंद्रस्तपस्तेपे नर्मदायां महेश्वर॥ सर्वापराधिपो भूत्वा एतदिच्छामि वेदितुं॥२॥ 431/2008
एतच्छ्रुत्वा तु वचनं धर्मपुत्रस्य धीमतः॥ कथयामास यद्वृत्तं इतिहासं पुरातनं॥ मार्कं॰॥ विश्वासयित्वा सुचिरं धर्मस
कं महाबलं॥ वृत्रं हत्वा यथा यातं गच्छमानं शचीपतिं॥४॥ क्रममाणमार्गेण ब्रह्महत्या दुरासदा॥ अहोरात्रमवि
श्रांतो जगाम सुभवनत्रयं॥५॥ वृत्रहा अथ तो याति दिव्ययानेन भारत॥ दिशाभागे सुरैः सार्धं न तो हत्या न मुंच
ति॥६॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः॥ एतेषां निष्कृतिर्दृष्टा न तु विश्वासघातिनः॥७॥ एवमादीनि वा
क्यानि श्रुत्वा चान्यानि देवराट्॥ अंतर्हितानां भूतानां विषादमगमत्परं॥८॥ त्यक्त्वा राज्यं सुरैः सार्धं निर्जगाम
वनं प्रति॥ पुत्रदारागृहं राज्यं वस्तूनि विधानि च॥९॥ फलान्येतानि धर्मस्य ब्रुवन्ति नरेश्वरं॥ फलं धर्मस्य भुं
जंति सुहृत्स्वजनबांधवाः॥१०॥ पश्यतां सर्वमेतेषां पापमेकेन भुज्यते॥ एवं शक्रः सुरश्रेष्ठस्त्यक्त्वा कर्षमत्स्यं कलेव
रं॥११॥ एकाकी स जगा-- तीर्थान्यायतनानि च॥ गंगातीर्थेषु सर्वेषु समुद्रेषु सरित्सु च॥१२॥ ह्रदेषु देवखातेषु
तडागेषु सरित्सु च॥ पापान्न मुच्यते यस्मात्ततो रेवामुपागतः॥१३॥ रेवाप्रभवतीर्थेषु कूलयोरुभयोरपि॥ न पू
जन्यन्महाघोरं स्कंदतीर्थव्यतिक्रमात॥१४॥ तत्र स्थित्वोपवासैश्च कृच्छ्रचांद्रायणादिभिः॥ कर्षयन्वैस्वकं देहं
न किंचिन्निर्मलं व्यवान॥१५॥ ग्रीष्मे पंचाग्निमध्यस्थो वर्षासु स्थंडिलेशयः॥ आर्द्रवासास्तु हेमंते न्यवसत्तार विपुलं तपः।
॥१६॥ एवं तपस्यतस्तस्य शक्रस्य विदितात्मनः॥ वत्सराणां सहस्राणि गतानि दश भारत॥ ततस्तैकादशो प्राप्ते
वर्षाणां नृपसत्तम॥ सहस्रे भगवान्रुद्रस्तुतोष परमेश्वरः॥१८॥ तथा ब्रह्मर्षयः सिद्धा ब्रह्मा विष्णुपुरोगमाः॥
श्वेतं जग्मुः सुराः सर्वे यत्र देवः शतक्रतुः॥१९॥ दृष्ट्वा समागतान्देवान्नृषींश्चैव महामतिः॥ उवाच प्रणतो भ
त्वा सर्वदेवपुरोहितः॥२०॥ बृहस्पतिरुवाच॥ सर्वेषां विदितं तद्धि यथा वृत्रवधः कृतः॥ युष्माकं चाज्ञया ब्रह्मन्
शिवविष्णोर्यथा पुरा॥२१॥ तथाप्येनं वृत्रहनं मत्वा पापस्य कारणं॥ भ्रमंतं सर्वतीर्थेषु ब्रह्महत्या न मुंचति॥२२॥

रे०खं० ननंदतिविनायेनत्रैलोक्यंसचराचरं॥आचंद्रार्कंयथाविश्वंतथाराज्यमनायकं॥२३॥तस्मात्सर्वेसुरश्रेष्ठा
विज्ञप्तमवधार्यमे॥कुर्वंतुत्र्यक्षंनिर्दोषंतथासर्वेमहर्षयः॥२४॥ब्रह्मोवाच॥एतत्पापंमहाघोरंब्रह्महत्या
समुद्भवं॥संविभज्याथभूतेषुचतुर्धाविक्षिपाम्यहं॥२६॥भवतांवचनाद्दृष्टाःसंप्रेत्यैवसुरर्षयः॥एवमु
क्त्वाक्षिपत्क्षिप्रंभागंब्रह्माजलोपरि॥२७॥अवगाह्यततःपेयाआपोवैनान्यथाक्वचित्॥भागंचापक्षिपद्भू
म्यांद्वितीयंपद्मसंभवः॥२८॥ततोभ्युक्ष्यानुलेप्याचसदापार्थवसुंधरा॥भागंतृतीयंनारीणांरजस्याहित
वान्विभुः॥२९॥अस्पृश्याचाप्यसंभाष्यातेनस्नातारजस्वला॥चतुर्दिनानिसंप्राप्तेःपापस्यमहतोभया
त॥३०॥द्विदिनंचाप्यसंभाष्याअस्पृश्यात्रिदिनंमता॥पितृदेवादिकार्येषुवर्जयेत्ताचतुर्दिनं॥३१॥पंच
मेपितृदेवानांसर्वकार्याणिचार्हति॥चतुर्थंसततोभागंविभज्यपरमेश्वर॥३२॥कृषिवाणिज्यगोरक्षाशू
द्रसेवाकरोद्विजे॥ततोविनापदंश्रास्वेत्कर्मवर्जितोद्विजः॥३३॥एवंविभक्तभागंतंविमुक्तंब्रह्महत्यया॥
ततोभिनंदयामासुःसर्वदेवमहर्षयः॥३४॥देवेंद्रंचाभिषिच्याभिनर्मदातीरमध्यगं॥वरेणछंदयामास
ततस्तुष्टोमहेश्वरः॥३५॥दास्यामितवदेवेंद्र वरंवृणुयथेप्सितं॥शक्रउ०॥यदितुष्टोसिदेवेशयदिदेयो
वरोमम॥३६॥अत्रत्वांस्थापयिष्यामिसदासंनिहितोभव॥मार्कं०॥एवमस्त्वितितेनोक्ताब्रह्मविष्णुम
हेश्वराः॥३७॥सेंद्रास्तेजग्मुराकाशेस्तूयमानामहर्षिभिः॥एवंतत्रतदापार्थदेवराजःशतक्रतुः॥३८॥
स्थापयित्वामहेशानंजगामत्रिदशालयं॥ततःप्रभृतिविख्यातंतीर्थमिंद्रेश्वरंपरं॥३९॥महापातक
युक्तोपिमुच्यतेसर्वकिल्बिषैः॥श्राद्धंकुर्याच्चयस्तत्रपितॄणांभक्तिसंयुतः॥४०॥यावदिंद्रांतरंराजनपि २१९
तॄणांतृप्तिरक्षया॥ब्राह्मणान्भोजयेत्तस्यातेभ्योदद्याच्चदक्षिणां॥४१॥पादुकोपानहोछत्रंवस्त्रंदद्याच्च

कांचनं॥एतत्तेकथितंपार्थयत्पृष्टोहंत्वयापुरा॥४२॥तीर्थमहात्म्यमतुलंश्रुत्वापापैःप्रमुच्यते॥इतिश्रीनर्मदा
महात्म्येइंद्रेश्वरतीर्थं॥मार्कं०॥ततोगच्छेतराजेंद्रवालुकेश्वरमुत्तमं॥तीर्थादिंद्रेश्वरात्तद्धिस्थितंक्रोशत्रयांत
रे॥१॥गत्वागोदावरीयात्रांपुनरागच्छताकिल॥वाल्मीकेनमहाराजलोकानांहितकाम्यया॥२॥द्वितीयंस्था
पितंलिंगंह्येतद्धिवालुकामयं॥द्वित्वामासद्वयेतत्रजिताहारेणभारत॥३॥एकंमयापुराप्रोक्तंयत्तेलिंगंप्र
तिष्ठितं॥द्वितीयमेतत्तेनात्रनिर्मितंवालुकामयं॥४॥विनोदादिवराजेंद्रतपसापापनाशनं॥स्थित्वामा
सद्वयेतत्रप्रतिष्ठाप्यमहेश्वरं॥५॥वालुकेश्वरसंज्ञेतेप्रख्यापयाच्चशंकरं॥ततोजगामसमुनिःस्वकि
यस्वंतपोवनं॥६॥ततःप्रभृतिविख्यातंतीर्थंवैवालुकेश्वरं॥लिंगंप्रतिष्ठितंयस्माद्रजसावालुकामयं॥७॥
वाल्मिकीस्थापितंपुण्यंसर्वपापहरंपरं॥ततस्नात्वाचसंतर्प्यपितृदेवांस्तिलोदकैः॥८॥श्राद्धंकुर्यान्महा
राजपितॄणांतृप्तिकामया॥संपूजयेत्ततोदेवंविधिनावालुकामयं॥९॥रात्रौजागरणंकृत्वाउपवासपरो
नयः॥धूपदीपार्घनैवेद्यैस्तुतिनीराजनादिभिः॥१०॥गीतनृत्यविनोदैश्चतोषयेद्योमहेश्वरं॥सवसेत्छांकर
करपुरेवर्षाणामयुतंनृप॥११॥अष्टम्यांचचतुर्दश्यांभानुवारेथभारत॥तत्रतीर्थेनरोयस्तुब्राह्मणान्भोज
येन्नृप॥१२॥एकेनभोजितेनात्रभोजितंलक्षंभवेत्॥इतिश्रीरेवा०वालुकेश्वरतीर्थं॥मार्कं०॥ततःकोशांत
रेपार्थदेवतीर्थमनुत्तमं॥यत्रकेशवमुख्यैस्तुदेवैःसंस्थापितःशिवः॥१४॥दिक्पालैर्लोकपालैश्चपुरांत
केसकिल्बिषे॥जयार्थमिंद्रस्यतदातत्रसंस्थाप्यशंकरं॥१५॥पूजयामासुरव्यग्राःसर्वेदेवाःसवासवाः॥
ततःशुत्वेतदाचेंद्रःअजिपिस्तेसुरर्षिभिः॥१६॥आजग्मुःशक्रसहिताःशक्रलोकंनुसोत्सवाः॥ततःप्रभृ
तिविख्यातंतीर्थंदेवेश्वरंनृप॥१७॥देवैःप्रतिष्ठितंयस्माद्भुक्तिमुक्तिप्रदंपरं॥तत्रस्नात्वातथादत्वापि
तॄणांतिलोदकं॥१८॥श्राद्धंकृत्वाविधानेनपितॄणांतृप्तिरक्षया॥जायतेयुगमेकंहिपुरांदेवरुद्दीरतं।

433/2008

रे॰ख॰ ॥१९॥ पूजयेद्देवमीशानं भक्त्या शक्त्या च भारत॥ स वसेच्छिवलोके वै दिव्यं वर्षशतं नृप॥२०॥ दीपदानं च देवाय
दद्याद्दुरितनाशनं॥ ब्राह्मणान्भोजयेच्छक्त्या सर्वपापैः प्रमुच्यते॥२१॥ इति श्रीरेवा॰ देवतीर्थं॥ मार्कं॰॥ को
सौ जंभ इति ख्यातो यस्त्वयोक्तो महामुने॥ कस्य वंशे समुत्पन्नो दैत्यो वा दानवोऽसुरः॥२२॥ विस्तराद्ज्ञातुमि
च्छामि तस्य यद्दैत्य विचेष्टितं॥ मार्कं॥ ब्रह्मवंशसमुद्भूतः कश्यपस्य कुले महान्॥२३॥ जंभो नाम महादैत्यस्त
पस्तेपे सुदारुणं॥ षष्टिवर्षसहस्राणि दिव्यानि किल भारत॥२५॥ ततः प्रसन्नो भगवान्ब्रह्मलोकपितामह
हः॥ प्रददौ वांछितं तत्र तच्छृणुष्व नराधिप॥२६॥ विजयं सर्वदेवानां दैत्यदानवरक्षितां॥ बलं तथातुलं शौ
र्यं गतेरस्खलनं तथा॥२७॥ एवमादीन्वरान्प्राप बहून्दत्त्वा ब्रवेधसः॥ ततः सर्वत्र विजयं कृतवानतुल्वणोऽसु
रः॥२८॥ शक्रेण सह संग्रामो बभूव ह॥ दिव्यं नृपतिशार्दूल ततः शक्रः पराजितः॥२९॥ जंभेन त
न शक्रस्य क्रेराज्यं गं सर्वमाहृतं॥ शची करी वरच्छत्रं हयरत्नं तथासनं॥३०॥ एवं तेनासुरेणादौ जितादैत्या
श्च दानवा॥ यक्षरक्षांसि राजेंद्र मर्त्यभूपेषु किं पुनः॥३१॥ ततः शक्रः स्वयं प्राप्य रेवां विदित वैभवां॥ तपश्च
चार विपुलं जंभदैत्यक्षयाय तु॥३२॥ कालेन महता तस्य प्रसन्नः प्राह शंकरः॥ प्रसन्नः स्तपसा शक्र ब्रूहि य
त्ते भिवांछितं॥३३॥ शक्रोवाच॥ नमस्तेस्तु महादेव पराभूतोस्मि वैरिणा॥ जंभदैत्येन मे राज्यं हृतं सर्वांग
गसंयुतं॥३४॥ जगदुद्वेलितं तेन तिसदेवासुरमानुषं॥ यदि तुष्टोसि मे देव यदि देयो वरो मम॥३५॥ जंभासुरवधा
र्थाय वरं देहि महेश्वर॥ ईश्वर उ॰॥ एवमस्तु सुरश्रेष्ठ यथा वै प्रार्थितं त्वया॥३६॥ अचिरेणैव कालेन जंभ
दैत्यं वधिष्यसि॥ इत्युक्त्वा देवदेवेशस्तत्रैवांतरधीयत॥३७॥ ततः शक्रो विसंस्थाप्य महेश्वरमुदारधीः॥
स्वनाम्ना पूजयित्वा च निजं धामाजगाम सः॥३८॥ जंभासुरवधेयत्नं च कारार्थं सुरैर्वृतः॥ एवं तीर्थं परं २९६
ख्यातं तदा प्रभृति भारत॥३९॥ शक्रेश्वराह्वयं तीर्थं पापघ्नं विजयावहं॥ तत्र स्नात्वा नरो भक्त्या शंकरं

विधानतः॥४०॥ पितरस्तत्तिमायांति प्रददंति च समीहितं॥ स्नात्वा यः पूजयेद्देवं विधिना नृपसत्तम॥४१॥ तस्य भर्गपु 435/2008
रे वासः संवत्सरशतानि षट्॥ दीपं दत्त्वा च देवाय दक्षरोगेना भुयात्क्वचित्॥४२ सन्मार्जनी शूपपात्रं ध्वजं घंटं च भा
रत॥ फलदं चापि देवाय दद्याद्द्विजभोजनं॥ इति श्री रेवा॰॥ शक्रेश्वरतीर्थं॥ मार्कं॰॥ ततः क्रोशांतरे पार्थ नो
गतीर्थमनुत्तमं॥ शक्रेश्वराच्च वसिष्ठा नागाः शापानुमात जात॥ युधिष्ठिर उ॰॥ महाभयानां लोकस्य नागानां
मुनिसत्तम॥ किं भयं कथमायातं येन ते तपसि स्थिताः॥२॥ मम संतापजं दुःखं दुर्योधनसमुद्भवं॥ तव वाक्या
मृतैः स्नात पूताविर्त निर्वृतिं गतिं॥३॥ श्रुत्वा तव मुखाद्दीर्णा कथेयं पापनाशिनी॥ भूयो भूयस्स्मृतिर्जाता श्रवणे
तव सुव्रत॥४॥ न तृप्तिरस्तु मुनियुक्तं श्रद्धान्ना तायते फलं॥ विषादानस्य महतः श्राविनस्य श्रुतस्य च॥५॥ फलमी
शो विजानाति भवान्वा मुनिसत्तम॥ एवं ज्ञात्वा यथान्यायं यः प्रश्नः पृच्छितो मया॥६॥ तं मे वद द्विजश्रेष्ठ दयां कृत्वा
प्रमोपरि॥ मार्कं॥ यथा यथा मे नृपराज भाषसे तथा तथा मे सुखमेति भारती॥७॥ वैकल्पभावाज्जरयान्वितस्य
त्व सोहृतं नैश्यति॥ नैव तावत्॥ कथयामि यथावृत्तमितिहासं पुरातनं॥८॥ यथापूर्वं तरं वैरं पारंपर्येण भारत
॥ द्वे भार्ये कश्यपस्यास्तां सर्वलोकेषु नुत्तमे॥९॥ गरुत्ममाता विनता सर्पाणां सद्रुरुत्तमा॥ अश्वस्यैरश्नोनं तासां रूप
निरूपं व्यवस्थितं॥१०॥ प्रभातकाले राजेंद्र भास्कराकारवर्चसं॥ तद्रूपं विनता दृष्ट्वा तुरगं सर्वपांडुरं॥११॥ उवाच
कद्रुं च सपत्न्यात्स्वं स्थिमं पश्यशोभने॥ उच्चैःश्रवसमन्यं वा तुरंगं सर्वपांडुरं॥१२॥ तं दृष्ट्वा श्वेतवर्णं तु सा सपत्न्या क्रोधमूर्छि
ता॥ कृष्णवर्णं जजल्पाशु कद्रुर्विनतया सह॥१३॥ कद्रुरुवाच॥ विनते त्वन्नता लोके नत्वं सा कुलपांसिनि॥ कृष्णम
श्वं सित बूषेभु वंनरकगामिनी॥१४॥ विनता उ॰॥ सत्यानृते तु वचने पणोयं मम भामिनी॥ सहस्रं वत्सरां दासी भ
वेयं तव वेश्मनि॥१५॥ तथेति ते प्रतिज्ञाय गते रात्रौ स्वके गृहे॥ कद्रुर्विनतया सार्धं यद्वृत्तं प्रमदालये॥१६॥ पुं
पुत्रगैस्य गत्वा सा गत यमास त्तं पणं॥ तच्छ्रुत्वा बांधवाः सर्वे कद्रुपुत्रास्तथापरे॥१७॥ न मन्यं ते हितं कार्यं कृतं

रे०खं० मातर्विगर्हितं॥ अकूरुः कूरसत्तां पातिकथं भेतोहयोनमः॥१८॥ सर्वोप्येवंविजानातिकाश्यपं वर्णनः सितं॥ दास
त्वंपाश्यसे त्वंहि पणेनानेन सुव्रते॥१९॥ कद्रूरु०॥ न भवेवंयथा दासीतथानीतिर्विभीयतां॥ विनाप्यवंहूम कूलेपु
तस्याश्वस्येतिमे मतिः॥२०॥ क्षणमाचंकूते कार्येसादासीजायते मम॥ स्वस्त्रास्तयोरगाः सर्वैरमिष्यथयथा
सुखं॥२१॥ सर्णाव०॥ यथात्वंजननीमातः पन्नगानां मता भुवि॥ तथा साप्यविनोपेणवंचितव्यानकर्हिचि
त्॥२२॥ कद्रूरु०॥ ममवाक्यमकुर्वाणा येकेचिद्भुविपन्नगाः॥ हव्यवाहमुखंसर्वेते यास्यंति विचारितं॥२३॥
एतच्छ्रुत्वातुवचनं घोरं मातृमुखोद्भूतं॥ केचिच्च विशारोमेषु तथान्येतपसिस्थिताः॥२४॥ विविशुर्दुर्दुंभुः केचि
त्केज्जलधिमाश्रिताः॥ गिरिकंदरमाकेचित्तरुकोटरमापरे॥२५॥ मातृशापप्रदग्धास्ते हव्यवाहेन वैततः।
नर्मदामसिसंस्नात्वा स्तपस्तेपुश्च तत्रये॥२६॥ तत्रवर्षसहस्रांते तु तोषपरमेश्वरः॥ महादेवोजगत्धाता प्रो
वाचपरयागिरा॥ ईश्वर उ०॥ भोपंनागानिवर्तध्वंतपसोस्यमहाफलं॥ यदिच्छयदराभ्ययनात्र कार्याविचार
णा॥२७॥ पन्नगा ऊ०॥ मातृशापभयाद्भीतादेवदेवमहेश्वरा॥ तवपार्श्वेवसिष्यामो यावच्चानुग्रहस्तवं॥२८॥
महादेवोवाच॥ एकश्चार्यमहाबाहुर्वासुकिर्भुजगोत्तमः॥ ममपार्श्वेवसंनित्यं सर्वेषांभयरक्षकः॥ ३०॥ अं
न्येषामपिसर्पाणां येमदाराधनेरताः॥ तेषामपिसमस्तानां भयंनास्ति ममातया॥३१॥ वासुकिर्वल्लभोमय्यं
गलम्लेकृतोमया॥ वासुकीशरणंगत्वा भयंवोनास्तिपन्नगाः॥३२॥ कल्पांतस्त्वापि नोनागायेकिंचित्काल
मर्धगाः॥ वासुकीः पंटपीठेमे महाकल्पंवसिष्यति॥३३॥ आप्लुतानर्मदातोये भुजगारक्षितोमया॥ वासुदे
वोवाच॥ एवंदत्वावरंतेषां देवदेवो महेश्वरः॥३४॥ जगामाकाशमाविश्य कैलासंधरणीधरं॥ मतेन्यादद्भी
नंदेवेधनंजयमुखान्नृप॥३५॥ स्नापयित्वा तुयः श्रीमद्देवदेवंमहेश्वरं॥ तत्रतीर्थेतुयः कश्चित्संचम्यामर्च २३७
येच्छिवं॥३६॥ तस्यनामकुलान्यष्टौ नयंसंतिकदाचन॥ मृतः कालेनमहता तत्रतीर्थेनराधिप॥३७॥ शिव

स्यानुचरो भूत्वा वसते कालमीप्सितं॥ नागेन्द्रं नर्मदातीरे नित्यंयः स्नापयेच्छुचिः॥३८॥ दधिक्षीरेण मधुनाश्यर्कयासमं॥
येषिद्धा पुरुषोवापि पुत्रपौत्रान्त्सविंदति॥३९॥ तत्रस्नात्वाचयोभक्त्या तर्पयेत्पितृदेवताः॥ पिंडदानेन च तथा पितृ
णांप्रीतिमावहेत्॥ इतिश्रीरेवामा०॥ नागेश्वरतीर्थं॥ मार्कं०॥ ततोगच्छेत्तराजेंद्र गौतमेश्वरमुत्तमं॥ यासां भार्यापुरा
हिल्यांतपः सिध्यांनिरीक्षितुं॥१॥ तत्रायातेनमुनिना गौतमेनप्रतिष्ठितं॥ स्वयंरेवांमसिस्नात्वा स्थापितंलिंगमुत्त
मं॥२॥ स्वनाम्ना पुरुषेशानं पूजयित्वाविधानतः॥ प्राप्तस्तत्रनिजांभार्यांतपः सिध्यांयुधिष्ठिर॥३॥ तत्रतीर्थेनरः
स्नात्वा यंकुर्यात्समाहितः॥ ब्राह्मणान्भोजयेत्तत्र यातिभ्योदद्याच्च दक्षिणां॥४॥ गौतमेशं समभ्यर्च्य सर्वपापैः प्रमुच्य
ते॥ दीपंदद्याच्च देवाय नरोगैः परिभूयते॥५॥ इति गौतमेश्वरी तीर्थं॥ मार्कंडे०॥ ततोगच्छेत्तराजेंद्र अहिल्येश्वरमु
त्तमं॥ यत्रशुश्रूषा मुनेर्भार्या अहल्या तपसा किल॥६॥ कोशांतरेनागतीर्थाद् हल्यातीर्थमुच्यते॥ गौतमस्यतुसा
पत्नी अहल्यानामविश्रुता॥७॥ तस्यामनोहरंरूपंवीक्ष्य देवः शतक्रतुः॥ मोहितो लोभयामास अहल्यां बलसूद
नः॥८॥ इंद्र उ०॥ मांभजस्ववरारोहे देवराजमुनिंदिते॥ किंकरिष्यसिविप्रेण वोन्वाचारकृशेनच॥९॥ तपः स्वाध्या
यशीलेन क्लीश्यंती तापसी यथा॥ एवमुक्तावरारोहा स्त्रीस्वाभावाच्च चंचला॥१०॥ मनसाचिंतयत्शक्रं कामेन कलु
षीकृतं॥ विदित्वा तां चयद्भावां सदेवः पाकशासनः॥११॥ गौतमंवंचयामास विश्वस्तामाश्रमांतिके॥ आजगामाश्र
मद्वारी तावता गौतमस्त्विरन्॥१२॥ दृष्टस्तदेवनिर्गच्छन्भीतभीतः पुरंदरः॥ निर्गच्छंतंतदादृष्ट्वा शक्रंतं काममोहि
तं॥१३॥ ततः शशाप वैदेंद्रं गौतमः कोपमूर्छितः॥ मद्रोजितेद्वियोरस्मात्तस्माद्भूभगोभव॥१४॥ एवंशप्तः सदे
वेंद्रस्तत्क्षणादेवभारत॥ भगानांतुसहस्रेणदेवराजोह्यभीश्रिसः॥१५॥ त्यक्त्वाराज्यंसुरेशश्चाश्वत्यंशप्तः संन्वि
गतप्रभः॥ तपश्चचार विपुलंपदभ्रष्टोतिलज्जितः॥१६॥ अहल्याः पितृतः शशापरेमूढेदुष्टजारिणी॥ मामवंन्याय
रमसे शक्रंमत्वासुरेश्वरं॥१७॥ व्यभिजारमयीयस्मात्तस्मात्पाषाणमयीभव॥ गतेवर्षसहस्रांतेरामंद्रष्टा पशास्वितं॥१८

437/2008

तीर्थयात्राप्रसंगेन पूतपापा भविष्यसि॥ एवं भर्त्रा तदा त्रस्ता गत्वा रेवातटं च सा॥ १९॥ तपश्चचार विपुलं सहस्राब्दं न
पोत्तम॥ एवं गते तत्र काले रामः प्राप्य त्रियं बकं॥ २०॥ गत्वा गोदावरी यात्रां पुनः प्राप्तः स नर्मदां॥ इहागत्य शुलारूपा
दृष्टा रामेण धीमता॥ २१॥ विश्वामित्रसहायेत्यस्का साश्रुमर्यांतनं॥ पूजयित्वा यथान्यायं गतपापा विमत्सरा।
॥२२॥ रामं दाशरथीं भक्त्या मुनिभिः परिवारितं॥ स्नात्वा सा नर्मदातीरे स्थापयामास शंकरं॥ २३॥ अहल्येश्वरसं
ज्ञं तु भक्त्या चैवाभ्यपूजयत्॥ स्मरमाणा पतिं प्रीत्या कृच्छ्रचांद्रायणोरता॥ २४॥ ततस्तुष्टो महादेवो दत्वा वरमनु
त्तमं॥ जगाम काशमाविश्य सोमः सोमार्धशेखरः॥ २५॥ अहिल्या च गते देवे स्वपतिं वीक्ष्य तां गतिं॥ वरदानान्म
हेशस्य भर्तृयोगमहागता॥ २६॥ अहिल्येश्वरमभ्यर्च्य जगमं तु स्त्री गतं पुनः॥ मार्कं०॥ एवं तीर्थं मयाख्यातं अह
ल्येश्वरसंज्ञितं॥ २७॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरं॥ सम्यतः स्वर्गमाप्नोति यत्र देवो महेश्वरः॥ २८॥ दे
वानां च पितॄणां च तथा दद्यात्तिलोदकं॥ श्राद्धं दत्वा विधानेन तथा ब्रह्मद्विजभोजनं॥ दीपं दत्वा महाराज तेजस्वी जा
यते नरः॥ एवं कृत्वा महाराज स्वर्गे स्वस्थचिरं नरः॥ ३०॥ यावन्मन्वंतरं स्थित्वा विहृत्य स यथेप्सितं॥ ततः कालेन म
हता मानुष्यं प्राप्य वै पुनः॥ ३१॥ धनधान्यसमायुक्तः पुत्रपौत्रसमन्वितः॥ शत्रुव्याधिविनिर्मुक्तः सुखसौभाग्यसंयु
तः॥ ३२॥ जीवेद्वर्षशतं पार्थ अहल्यातीर्थसेवनात्॥ ३३॥ इति श्री रेवामा०॥ अहल्येश्वरतीर्थं॥ मार्कं०॥ ततो गच्छेन्नरा
जेंद्र अहल्यातीर्थसंनिधौ॥ रामेण तु कृतं तीर्थं रामेश्वरमिति श्रुतं॥ १॥ गत्वा गोदावरी यात्रां पुनरावजतां तदा॥ तीर्थं
पापहरं पुण्यं सर्वदुःखघ्नमुत्तमं॥ २॥ पुत्रयोरपि तत्रैव त्रिवलिंगद्वयं शुभं॥ प्रतिष्ठाप्य महाराज कुशेश्वरलवेश्वरौ।
॥३॥ अयोध्यां स्वपुरीं रामो जगाम रघुनंदनः॥ तत्र तीर्थे नरः स्नात्वा पूजयेत्परमेश्वरं॥ ४॥ रामेश्वरं महाभक्त्या मुच्य
ते सर्वकिल्बिषैः॥ श्राद्धं कृत्वा नरः पार्थ दत्वा च द्विजभोजनं॥ ५॥ दीपं दत्वा च देवाय स्तुतिजाप्यादिकं चरेत्॥ ६॥ २१८
इति श्री रेवा०॥ रामेश्वरतीर्थं॥ मार्कं०॥ ततो गच्छेत्तु राजेंद्र मोक्षतीर्थमनुत्तमं॥ पुण्यं रामेश्वरात्पार्थ स्थितं कर्मश

तत्र ये॥ ७॥ यत्र मोक्षमनुप्राप्तो मुनिर्वेदशिरा पुरा॥ विश्वामित्रमुनेः शिष्यास्तदा राममनोव्रजन्॥ ८॥ योगयुक्तो महा
भागस्तत्र मुक्तो भवन्मुनेः॥ तदाप्रभृति विख्यातं मोक्षतीर्थाह्वयं शुभं॥ ९॥ तत्र स्नात्वा च संतर्प्य कुर्याच्छ्राद्धं विधान
तः॥ पूजयेच्छंकरं भक्त्या धूपदीपविधानतः॥ १०॥ इति मोक्षतीर्थं॥ मार्कं०॥ ततो गच्छेत राजेंद्र रेवाया उत्तरे तटे॥ न
र्मदेश्वरतीर्थं वै सर्वपापक्षयंकरं॥ ११॥ कोहनेश्वरतीर्थात्तु स्थितं क्रोशत्रां तरे शुभे॥ दृष्ट्वा विहायसा गच्छन्महेशा
स्तत्र रेवया॥ १२॥ उमया सह राजेंद्र वृषारूढः स्वलीलया॥ जलादुत्थाय सा रेवा साक्षान्मूर्तिं महेश्वरं॥ १३॥ दंडप्रमा
णैर्विधिवत् विनया पूज्य शंकरं॥ अर्घ्यपाद्यादिभिर्देवं संतोष्यो वाच भारत॥ १४॥ नर्मदोवाच॥ भक्तलक्षणमपत्यं
येनितयेश्चैव सा विभुः॥ अत्र वत्सं निधौ तीरे स्थिरो भवतु धूर्जटिः॥ १५॥ अनेन्या सह पार्वत्या मे पिता स वृषः सदा॥
यथा लोकावनं त्वेव मनोग्रहमिमं मपि॥ १६॥ लोकानामुपकाराय तीर्थमेतद्विभूतया॥ महेश्वर उ०॥ एवमस्तु धु
निः श्रेष्ठ तिष्ठाम्यत्र मुदा सदा॥ १७॥ लोकानामुपकाराय तवस्मिहं विचिंतयन्॥ इत्युक्त्वा देवदेवेशस्तत्रैवांतरधी
यत॥ १८॥ नर्मदा वा च देवेशं स्थापयित्वा स्वनामतः॥ दिव्यपुष्पैः पूजयित्वा प्रवाहे मविशत्स्वकं॥ १९॥ तदाप्रभृति
विख्यातं तीर्थमेतद्युधिष्ठिर॥ नर्मदेश्वरसंज्ञं तु सर्वपापक्षयंकरं॥ २०॥ तत्र तीर्थे नरः स्नात्वा मुच्यते सर्वकिल्बिषैः।
अग्नावनाशके तोये यदि मृत्युं लभेन्नरः॥ २१॥ महेशावचनात्तस्य गतिः स्यादनिवर्तिका॥ स्नानं श्राद्धं जपं पूजां त्वा
त्वा च द्विजभोजनं॥ २२॥ दत्वा पार्थ नरः पापाद्विमुक्तः स्वर्गमाप्नुयात्॥ इति श्री रेवा०॥ नर्मदेश्वरतीर्थं॥ मार्कं०॥
ततो गच्छेत राजेंद्र कपर्दीश्वरमुत्तमं॥ क्रोशार्धेन नर्मदेशात्तु सर्वविघ्नविनाशकं॥ २३॥ स्थापितं विघ्नराजेन च त्रि
धानुग्रहकांक्षया॥ पुरा पुरत्रयं दग्धुं प्रार्थितेन पुरारिणा॥ २४॥ गणेशस्तत्र चागत्य तपस्तप्त्वा महत्नृप॥ तोषयित्वा
महेशानं सिद्धिः प्राप्ता तथाखिला॥ २५॥ स्थापयित्वा महेशानं कपर्दीश्वरसंज्ञितं॥ पुरविध्वंसने पश्चात्तु
पारेरय तो भवत्॥ २६॥ ततः प्रभृति विख्यातं कपर्दीश्वरसंज्ञितं॥ तत्र तीर्थे तु यः स्नात्वा चतुर्थ्यां समुपोषितः॥ २७॥

439/2008

पूजयेद्देवमीशानं मोदकांश्च निवेदयेत्॥ धूपदीपमीसैर्युक्तान् भक्त्या च द्विजभोजनं॥ २८॥ न विघ्नं जायते तस्य स
प्तजन्मानि भारत॥ तत्र तीर्थे तु यत्किंचिद्दीयते नृपसत्तम॥ २९॥ तदक्षयफलं सर्वं प्रति जन्म भवेन्नृप॥ इति कपर्दीश्व
रतीर्थं॥ मार्कं॰॥ ततो यायान्महाराज तीर्थं वै सागरेश्वरं॥ यत्र तप्तं तपः पूर्वं सागरेण युधिष्ठिर॥ युधिष्ठिर उवाच॥ सा
गरः कथमायातः कस्मात्तप्तं तपो मुने॥ एष मे विस्मयो तीव्र तच्चरित्रं वदाखिलं॥ ३०॥ मार्कं॰॥ द्वापरे कार्यां पुरा राज
न् मुनिसिद्धसमागमे॥ वदंतां तीव्र माहात्म्यं कोहिलापुरसंभवं॥ ३२॥ रेवायाश्चोत्तरे कूले देवसिद्धर्षिसंस्तुतं॥
श्रुतवान् सागरस्तत्र विस्मयं च परं ययौ॥ ३३॥ अगण्यपुण्यदा तत्र नर्मदे वनिरंतरं॥ तीर्थं तस्योत्तरे तीरे को
हिलापुरसंज्ञितं॥ ३४॥ नरः काशीनिवासी हि यथा मोक्षपथानुगः॥ तथेह गुप्तकाश्यां च कोहिलायां विमुक्ति
भाक्॥ ३५॥ पुर्यो यथेह विख्याता अयोध्याद्यास्तु मुक्तिदाः॥ सप्तपीयाष्टमी तद्वन् मुक्तिदा कोहिलापुरी॥ ३६॥
इत्यादि सागरः श्रुत्वा महिमानं युधिष्ठिर॥ विस्मयादुत्सको द्रष्टुं तीर्थं तद्धि श्रुतं भुवि॥ ३७॥ लिंगिवेषं समास्था
य संप्राप्तः कोहिलां पुरीं॥ पुरंदरादिभिर्देवैस्त्रयस्त्रिंशाद्भिराश्रितां॥ ३८॥ सानुगैः सिद्धसंघैश्च ऋषिभिः परिसेवि
तां॥ दिनानि कतिचित्तत्र तीर्थे वै सवतो भवन्॥ ३९॥ एकते प्रत्यहं तीर्थं दृष्ट्वा चापि निनिंदिसः॥ हीयते हि यथा त
स्य माहात्म्यं वै पुरस्य हि॥ ४०॥ तथा न तेन संयुक्तः सागरः पुरमुत्तरं॥ कोहिलाख्यं सुतीर्थं सत्तीर्थाश्रितसुरा
दिकान्॥ ४१॥ मुनिसिद्धांश्च राजेंद्र निनिंदा स्खलितं यदा॥ तदा सिद्धैर्हि भिर्दैवैर्विभक्त्या कूलकारिणं॥ ४२॥
दैत्योयमिति पापोयं विधर्मनिरतस्तदा॥ इत्येवं वादिभिः सर्वैः पुरान्निःकासितो द्रुतं॥ ४३॥ ततः स्वं ज्ञापया
मास सागरस्तेषु भारत॥ तथापि न प्रवेशं स्तैर्दत्तस्तस्यै सुराज्ञया तत्॥ ४४॥ चित्तमंतर्गतं दुष्टं तीर्थस्नाने न शु
ध्यति॥ गंगातोयैर्जलैर्धौतं सुराभांडमिवाशुचि॥ ततः स सागरः स्थित्वा पूर्वे क्रोशांतरे पुरात्॥ तपश्चचा
र विपुलं तोषयन् परमेश्वरं॥ ४६॥ ततस्तुष्टो जगन्नाथे प्राप्य तीर्थफलं महत्॥ स्थापयित्वा महेशानं जगाम स्व

निवेशनं॥ ४६॥ ततः प्रभृति विख्यातं तीर्थमेतद्युधिष्ठिर॥ सागरेश्वरनाम्ना वै सर्वपापक्षयंकरं॥ ४७॥ कपर्दीश्वर
तीर्थात्तु स्थितं क्रोशार्धमात्रतः॥ किंचिन्न प्राप्यधिकं पुण्यं महेशस्थितं नृप॥ ४८॥ तत्र स्नात्वा च संतर्प्य पितॄन् भक्त्या MMI 2008
नृपोत्तम॥ श्राद्धं दत्वा विधानेन पूजयेत्सागरेश्वरं॥ ४९॥ इति कृत्वा नरः पार्थ पापसंघाद्धि मुच्यते॥ पुरंदरं पु
रं यातिस्त्रिदिवलोकं च शाश्वतं॥ ५१॥ इति सागरेश्वरतीर्थं॥ मार्कं॥ ततः क्रोशांतरे पार्थ रवितीर्थमनुत्तमं॥ यत्र
देवः सहस्रांशुस्तपस्तप्त्वा दिवंगतः॥ १॥ युधिष्ठिरोवाच॥ कथं देवो जगद्धाता सर्वदेवनमस्कृतः॥ तपो तपत्र
यी मूर्तिस्तपरो भास्करो मुने॥ २॥ आराध्यः सर्वभूतानां सर्वदेवाभिपूजितः॥ द्रष्टयः प्रत्यक्षदेवो सौ सृष्टि
संहारकारकः॥ ३॥ आदित्यत्वं कथं प्राप्तः कथं भास्कर उच्यते॥ एतत्सर्वं समासेन कथयस्व ममानघ॥ ४॥
मार्कं॰॥ महाप्रश्नो महाभाग यस्त्वया परिपृच्छितः॥ तत्सर्वं संप्रवक्ष्यामि नमस्कृत्य स्वयंभुवे॥ ५॥ आसी
दिदं तमोभूतमप्रज्ञातमलक्षणं॥ अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः॥ ६॥ ततस्तेजः परं दिव्यं सत्सपिं
डितं शुभं॥ आकाशास्य यथैवोल्का सृष्टिहेतोरधोमुखी॥ ७॥ तेजोमध्ये च पुरुषः संज्ञातो विश्वभूषणः॥ स
रःपादश्च तेन सर्वमिदं ततं॥ ८॥ तस्योत्पन्नस्य भूतस्य ते जोत्पन्नस्य भारत॥ पश्चात्प्रजापतिर्भूताः कालका
लांतरेण वै॥ ९॥ अग्रे जातः स भूतानां ससुरासुररक्षसां॥ सर्वदेवादिदेवो य मादित्यस्तेन सोच्यते॥ १०॥ आदौ
तस्य नमस्कुर्यादन्येषां सदनंतरं॥ नमस्कुर्वंति तं देवाः सिद्धविद्याधरोरगाः॥ ११॥ मुनयो योगिनो यथा रक्षो
दानवमानवाः॥ नमस्कृतेन सूर्येण सर्वे देवा नमस्कृताः॥ १२॥ नदिवा न भवेद्रात्रिः षण्मासं दक्षिणायनं॥ अ
यनं चोत्तरं चापि भास्करेण विना नृप॥ १३॥ स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनं॥ न वर्तनाविते सोर्येतेन
तेन पूज्यतमो रविः॥ १४॥ प्रत्यक्षो भगवान् देवो दृश्यते लोकपावनः॥ उत्पत्तिप्रलयस्थानं निधानं बीजमव्ययं॥
॥ १५॥ हतुरे कोजगन्नाथो नान्यस्तिष्ठति भारत॥ एवमात्मभवं कृत्वा जगत्स्थावरजंगमं॥ १६॥ लोकानां तु हि

तार्थीयस्थापयद्धर्मपद्धती॥ धुरमासाद्य विश्वस्य यतः समुदितो रविः॥१७॥ धुरादित्य इति ख्यातो ता धामका
मप्रदं ततः॥ धौरं पदमनुप्राप्तो यतः कालत्रये रविः॥१८॥ धौरादित्यं ततः संतः प्रशंसंति जगत्त्रये॥ आवि
र्भूतस्तदादित्यो वत्से महसापि च॥१९॥ धौरस्य मदमन्विच्छं धुनीप्रायात्सपूर्लटे॥ कृतोद्दैवैर्विसिध्येश्व
स्तूयमानः सयोगिनः॥२०॥ नर्मदातटमासाद्य स्थापयित्वात्मनस्तनुं॥ स्नात्वा सर्वत्रगो भानुः सेंद्रैरपि
सुरासुरैः॥२१॥ ऋषिभिः सिध्यसंघैश्च प्रार्थितोस्य प्रकाशने॥ पालने धर्मसंताने ज्ञाने ध्याने च योगिभिः।
॥२२॥ सहस्रांशुनिधिर्भानुर्गगनाकाशमव्ययं॥ त्रयीधामत्रपत्येत तमहन्मार्तंडमंडलं॥२३॥ धर्म
स्य साधनं मुख्यं कालमानस्य कारणं॥ नहि सूर्यात्परं विश्वे वंद्यो विश्वस्य जीवनं॥२४॥ वेदत्रयीमयं त्वे
तदेतदेव त्रयीमयं॥ वन्हित्रयीमयं ह्येतदेतत्तेजस्त्रयीमयं॥२५॥ लोकत्रयीमयं ह्येतदेतन्मात्रात्रयी
मयं॥ विश्वस्य मेउनं ह्येतदेतन्नक्षरूदाहृतं॥२६॥ नास्तिनास्तीति मन्येहं परं भानोर्युधिष्ठिर॥ स्वम
र्तिस्तेन रेवायास्तटे संस्थापितं तदा॥२७॥ ततः प्रभृति तत्तीर्थं धौरादित्याह्वयं शुभं॥ तत्र तीर्थे तु यः
स्नात्वा पूजयेत्परमेश्वरं॥२८॥ तेन दत्तं कुलं जप्तं तेन सर्वमनुष्ठितं॥ तेन सम्यग्विधानेन संप्राप्तं पर
मंपदं॥२९॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितं॥ ये स्नात्वा नर्मदातोये धुरादित्यार्चने रताः॥
॥३०॥ तस्य देवस्य राजेंद्र ये कुर्वंति प्रदक्षिणं॥ अनन्यभक्ताः सततं ये अक्षरसमन्विताः॥३१॥ ते
नपूतं शरीरास्ते मंत्रेण हतकिल्बिषाः॥३२॥ यत्पुण्यं जायते तेषां तदिहैकमनाः शृणु॥ समुद्रस्य गु
हा तेन सशैलवनकानना॥ प्रदक्षिणीकृता राजन्पृथिवी नात्र संशयः॥३३॥ मंत्रमूलमिदं सर्वं त्रैलो २२०
क्यं सचराचरं॥ तेन मंत्रविहीनं तु कार्यं लोके न सिध्यति॥३४॥ यथा काष्ठमयो हस्ती यथा चर्ममयो
मृगः॥ न कार्यार्थोपयोगाय तथा कार्यममंत्रकं॥ ३५ हुतं वै भस्मनि यथा दानं तोयं विना कृतं॥ निःफलं

जायते सर्वं तथा मंत्रविवर्जितं॥३६॥ काष्ठपाषाणलोष्ठेषु मन्मयेषु विशेषतः॥ मंत्रस्यैव जनः पूजां करोतीति न सं
शयः॥३७॥ संक्रांतौ च व्यतीपाते विषुवत्ययने ह्ये॥ तत्र रेवाजले स्नात्वा धौरादित्यं यजेत्तु यः॥३८॥ वर्षैर्द्वादश
भिः पातमज्ञानाज्ञानतः कृतं॥ तत्क्षणं नाशमायाति वह्निना तूलराशिवत्॥३९॥ चंद्रसूर्यग्रहे स्नात्वा सोपवा
सो जितेंद्रियः॥ धुरादित्यमुखं दृष्ट्वा मुच्यते सर्वकिल्बिषैः॥४०॥ माघमासे तु संप्राप्ते सप्तम्यां नृपसत्तम॥ सो
पवासो जितक्रोधः उषित्वा सूर्यमंदिरे॥४१॥ प्रातः स्नात्वा विधानेन दद्यात्स्वर्घं विवस्वते॥ विधिना मंत्रयुक्तेन
स लभेत्फलमुत्तमं॥४२॥ मंदिरे देवदेवस्य ततः पूजां समाचरेत्॥ गंधपुष्पैर्धूपदीपैरर्पनीराजनैस्तथा॥४३॥
नैवेद्यैश्च प्रणामैश्च स्तुतिजाप्यैर्विशेषतः॥ पूजयित्वा जगन्नाथं ततो मंत्रमुदाहरेत्॥४४॥ विष्णुः शक्रोर्यमा
धाता मित्रोथ वरुणस्तथा॥ विवस्वान्सविता पूषा त्वष्टांशुर्भग एव च॥४५॥ एभिर्द्वादशभिर्मंत्रैः जपं त्वा कृ
प्रदक्षिणं॥ यत्फलं जायते तेषां तदिहैकमनाः शृणु॥४६॥ दरिद्रो व्याधितो मूर्खो बधिरो जड एव च॥ न भवे
त्सप्तजन्मानि द्रूत्येवं शंकरोब्रवीत्॥४७॥ एवं ज्ञात्वा विधानेन जपन्मंत्रं विचक्षणः॥ आराधयेद्रविं भक्त्या द
क्षेत्रे श्रेय आत्मनः॥ मंत्रहीनस्तु यः कुर्यात्प्राणत्यागं नरः क्वचित्॥ स गच्छेद्भास्करं लोकं पूज्यमानः सुरर्षिभिः॥
४८॥ उषित्वा सुचिरं कालं इहागत्य नृपो भवेत्॥ पुत्रपौत्रसमायुक्तो हस्त्यश्वरथसंकुलः॥५०॥ दासीदासान्वि
तः श्रीमाञ्जायते विपुले कुले॥ चिरायुर्विजयी नित्यं धनधान्यसमन्वितः॥५१॥ तत्र तीर्थे तु यः कुर्याच्छ्राद्धं
तु विधिनान्नप॥ पितरस्तस्य तृप्यंति शतवर्षाणि वाष्टव॥५२॥ गत्वा यो विधिवत्स्वार्थं कांचनं द्विजभोजनं॥
स भवेत्पापनिर्मुक्तः स्वर्गलोके महीयते॥५३॥ इदं तीर्थं मया ख्यातं महापुण्यं नृपोत्तम॥ श्रवणात्कीर्तनाद
स्य सर्वपापैः प्रमुच्यते॥५४॥ इति धौरादित्यतीर्थं॥ मार्कं॥ ततो गच्छेत राजेंद्र परं तीर्थमयोनिजं॥ न कस्मा
न कस्माज्जनितं लिंगं प्रादुर्भूतं स्वयं यतः॥१॥ शौनकस्य मुनेस्तत्र संध्यायां स्मरतः शिवं॥ समुत्थितो यदा

443
2008

शंभुलिंगरूपी पुरोन्नृप॥२॥ तदा विचारं वितवान्मुनिः कोयमितिस्मह॥ केन जातः कुतो जातः कोयं किं ज्ञास्यते मया॥
रे॰खं॰ ॥३॥ इति चिंतान्वितं विप्रं वागुवाचाशरीरिणी॥ अंतरिक्षे महाराज गंभीरध्वनिरूपकैः॥४॥ न कोप्यस्ति जने
तास्य माचिंतां कुरु शौनक॥ अयमादिभवो देवस्त्वयोनीसंभवो ह्ययं॥५॥ स्वयंभूरेष विश्वात्मा जायते खलु
योगिभिः॥ इहध्यातस्त्वयैवायमुदतिष्ठन्महेश्वरः॥६॥ इत्युक्तः स तथा देव्या भारत्या किल भारत॥ शौनकः
शुचिरं कालमयोनीसंभवाह्वयं॥७॥ शिवं संपूजयामास तत्र लिंगे मुदान्वितः॥ शिवप्रसादात्परमां सि
द्धिं प्राप्याशु वांछितं॥८॥ ततः प्रभृति विख्यातं तीर्थमेतदनुत्तमं॥ अयोनिसंभवं नाम यदुया चाद्भिभा
रती॥९॥ स्नानमात्रेण नरस्तत्र मुच्यते योनिसंकटात्॥ तस्य देवस्य यो भक्त्या कुरुते लिंगपूरणं॥१०॥ स व
सेद्देवदेवस्य लोके वैसीश्यसंख्यया॥ अयोनिजं महादेवं स्नापयेत्कंधवारिणा॥११॥ मधुक्षीराज्यदधिभिः
सुलभेद्विपुलां श्रियं॥ अष्टम्यां च चतुर्दश्यामुभयोः पक्षयोरपि॥१२॥ पूजयित्वा महादेवं प्रीणयेत्तिलवाद
नैः॥ नृत्यनीराजनैर्दिव्यैस्तुतिजाप्यप्रणामतः॥१३॥ वासस्तस्येश्वरे लोके भवेज्जन्मनि जन्मनि॥ आल
यं तस्य देवस्य ये कुर्वंति मनोहरं॥१४॥ वासस्तेषां सुरपुरे यावदाहूतसंप्लवं॥ किं तस्य वक्तुभिर्मंत्रैः कंठशो
षणकारिभिः॥१५॥ येनोन्नमः शिवायेति प्रोक्तं वै शिवसंनिधौ॥ तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितं॥१६॥
नस्तत्फलमवाप्नोति सर्वदेवेषु वै द्विजः॥ यत्फलं समवाप्नोति षडक्षरउदीरणात्॥१७॥ तत्र तीर्थे तु यः स्ना
त्वा भोजयेच्छिवसंनिधौ॥ द्विजानामयुते सांगे यत्फलं तल्लभेन्नरः॥१८॥ अथ वा भक्तियुक्तस्तु शांते दांते
जितेंद्रिये॥ ददाति सत्कृतं भिक्षां तस्य पुण्यं ततोधिकं॥१९॥ यतिहस्ते जलं दद्याद्भिक्षां दत्वा पुनर्जलं॥ २२१
सा भिक्षा मेरुसंकाशा तज्जलं सागरोपमं॥ श्राद्धं दद्याच्च यस्तत्र विधिवद्वेदपारगे॥ पितॄणामक्षया तृ
प्तिर्जायते युगसंख्यया॥२१॥ इति अयोनीसंभवतीर्थं॥ मार्कं॰॥ ततो गच्छेत राजेंद्र परं तीर्थमयोनिजं॥

नकस्माज्जनितं लिंगं प्रादुर्भूतं स्वयंमतः॥२२॥ शौनकस्य मुनेस्तत्र संध्यायां स्मरतः शिवं॥ समुत्थितो यदा शंभुर्लिं
लिंगरूपी पुरोन्नृप॥२३॥ तदा विचारं कृतवान्मुनिः कोपमितिस्मह॥ केन जातः कुतो जातः कोपं किं ज्ञास्यते यदा॥ मा 445/2008
र्कं॰॥ ततो गच्छेत राजेंद्र तीर्थं वै पिंगलेश्वरं॥ अग्निना स्थापितं पूर्वं शप्तेन मुनिना नृप॥१॥ ऋषी कोनाम विप्रर्षि
र्भृगुवंशसमुद्भवः॥ तत्पत्नी रूपसंपन्ना सुशीलालक्षणान्विता॥२॥ पुलोमा नाम राजेंद्र गुर्विणी गुणसंयुता॥
प्रातः समित्कुशार्थं तु वनं याते मुनौ नृप॥३॥ हर्तुकामोथ तां दैत्यः आजगामाश्रमं महान्॥ फलाद्युता व
ता सा स्त्री तृणयुंजांतरस्थिता॥४॥ शून्यं तमाश्रमं दृष्ट्वा शालां गतो सुरः॥ पप्रच्छाग्निं स कोपाद्वै वन्हिरा
वेदयद्भृतां॥५॥ तृणपत्रचयां तस्थां दैत्योपि च जहार तां॥ क्रोधयत्राशितिमत्रातेत्यार्ता रावविणी॥६॥ त
दानीं सोदरस्थो वै कोपाद्गर्भश्च्युतो भवत्॥ च्यवमानो भयार्तायास्तेजसा स्कंदसंनिभः॥७॥ ज्वलज्ज्वलन
संकाशः कोपाद्दानवमैक्षत॥ दृष्टमात्रः स तेनासौ दैत्यो भस्मीभवत्क्षणात्॥८॥ ऋषिरेतावता प्राप्तः स
रुषी कोयुधिष्ठिर॥ दैत्यस्य च तथा वन्हे ज्ञात्वा वृत्तांतमादितः॥९॥ शशाप वह्निं कोपेन पुलोमापिशुनं
नृप॥ यत आवेदिता वन्हे पुलोमा दारा ये न योने॥ उपासस्तेनापि चिरं विप्राणां गुरुणा सता॥ तस्मात्त्वं सर्व
भक्षो वै भविष्यसि कृतात्मनो॥ भक्षाभक्षविवेकस्ते न भविष्यति पावक॥ यत्तु कर्मसु सर्वत्र नाधिकारी
कदाचन॥१२॥ मार्कं॰॥ इत्येवमृषिणा शप्तः सवह्निस्तत्क्षणान्नृप॥ नर्मदातीरमासाद्य तपस्तेपे सुदुश्च
रं॥१३॥ तत्र तीर्थे शुचिः स्नात्वा ध्यायं देवं महेश्वरं॥ गते वर्षशते पार्थ प्रसन्नो भगवान्हरः॥१४॥ दत्तोय
त्वाधिकारित्वं संस्कृतस्य तु मंत्रितः॥ यदुक्तं सर्वभक्षीति न तद्विप्रवचोन्यथा॥१५॥ अदोषं सर्वभक्षि
त्वं ददावपि महेश्वरः॥ वरं प्राप्य शिवाद्वन्हिः स्थापयित्वा महेश्वरं॥१६॥ पिंगलेश्वरनामानं स्वना
म्ना धर्मनंदन॥ स्वस्थानमगमत्पश्चाद्दृषिसंघनिषेवितः॥१७॥ ततः प्रभृति तत्तीर्थमग्नितीर्थमिति

रे०खं० श्रुतं॥ तत्र तीर्थे नरः स्नात्वा सर्वपापैः प्रमुच्यते॥ १९॥ सत्कर्मसाक्षिकारी स्यादग्निलोकं च गच्छति॥ श्राद्धं दत्वा
विधानेन पितॄणां प्रीणाति भारत॥ २॥ तत्र तीर्थे तु यः कन्यां ददाति स्वामलंकृतां॥ तस्य यत्फलमुद्दिष्टं तच्छृ
णुष्व नृपोत्तम॥ २०॥ अग्निष्टोमातिरात्राणां सम्यगिष्टस्य यत्फलं॥ प्राप्नोति पुरुषो दत्वा यथाशास्त्रास्वलं
कृतां॥ २१॥ तस्याः पुत्रप्रपौत्राणां रोमसंख्या भवेद्दिवि॥ सतस्यास्तेन मात्तेन शिवलोके सुखं वसेत्॥ २२॥
हेमान्नोदकदानेन आयुरारोग्यमश्नुते॥ २३॥ इति श्रीरेवा०॥ कारिलापुले अग्नितीर्थं॥ मार्कं०॥ ततो ग
च्छेत राजेंद्र भृग्वीश्वरमनुत्तमं॥ कारिलायां तु पूर्वेण पुत्रपौत्रप्रदं शुभं॥ यत्र सिद्धो महाभागो भृगुः पर
मकोपनः॥ तेन वर्षशतं साग्रं तपश्चीर्णं पुरानघ॥ २४॥ पुत्रार्थं वरयामास पुत्रं तुष्टो महेश्वरे॥ वरं दत्ते म
हाभागे देवे नांधकघातिना॥ २५॥ प्राप्य पुत्रं कविं पूज्यमसुराणां परं गुरुं॥ स्थापितस्तेन भृगुणा महेशा
नः स्वनामतः॥ २६॥ ततः प्रभृति विख्यातं तीर्थं भृग्वीश्वराह्वयं॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्व
रं॥ २७॥ अग्निष्टोमस्य यज्ञस्य फलं त्वष्टगुणं लभेत्॥ यः कश्चित्पार्थ पुत्रार्थी स्त्री राज्यमधुना समं॥ २८॥
तथा नार्के यदृच्छा भृग्वीशं स्नापयेन्मुदा॥ भक्त्या मंत्रैश्च विधिवत्स लभेत्पुत्रमीप्सितं॥ २९॥ तत्र तीर्थे तु
यः स्नात्वा दद्याद्विप्राय कांचनं॥ धेनुं दद्यान्महीं वापि तस्य पुण्यफलं शृणु॥ ३०॥ ससमुद्रगुहा तेन सशैल
वनकानना॥ दत्ता पृथ्वी न संदेहस्तेन सर्वा नृपोत्तम॥ ३१॥ तेन दानेन स स्वर्गे वसित्वा च यथासुखं॥ मर्त्ये
भवति राजेंद्रो ब्राह्मणो वा सुपूजितः॥ ३२॥ श्राद्धदानेन परमां पितरस्तृप्तिमाप्नुयुः॥ इति श्रीरेवा०॥
कारिलापुले भृग्वीश्वरतीर्थं॥ मार्कं०॥ ततो यायान्महाराज ब्रह्मतीर्थमनुत्तमं॥ अन्येषामपि तीर्थानां
परात्परतरं महत्॥ १॥ पुराणोदिततीर्थानां पृथगासीद्विचारणा॥ सत्यलोकादिहागत्य मेरोः पृष्ठे पुरा २२२
नघ॥ २॥ मुनिसिद्धर्षिदेवानां जाजपरणां समागमे॥ तत्र ब्रह्मादयो देवा वार्तायां विस्मिता भवन्॥ ३॥

स्वर्गापवर्गदा रेवा शिवसिद्धांतसंनिभा॥ भाति भूमितले गर्भे भर्गुरिदुरितापहा॥ ४॥ एतस्मिन्नंतरे तत्र नारदोभ्या
जगाम ह॥ तत्र संवदतां तेषां ब्रह्मादीनां मुनिर्नृप॥ ५॥ पितरं प्रणिपत्याथ ब्रह्माणं निषसाद ह॥ विचारे क्रीय
माणे तु श्रीमद्भिः शास्त्रचक्षुषा॥ ६॥ सारासारविचारैस्तीर्थानां पृथगादृतैः॥ त्रिजगत्स्वप्नमभूपं ब्रह्मा पप्र
च्छ नारदं॥ ७॥ ब्रह्मोवाच॥ त्रियात्रिजगती कांता बहवः करपूजिनः॥ नत्वेनारदनात्तातं तत्र किं चिंतितं भवे
त्॥ ८॥ भवत्क्रमसदृष्टं गम्यागम्यं क्षितौ नरैः॥ ब्रूहि तीर्थविशेषं नः सरितां च स्थितिसाधुतां॥ ९॥ यद्दृष्टमनुभू
तं च पूतं पसर्वतोधिकं॥ तदत्र वद सर्वेषां देवर्षीणां पुरो मुने॥ १०॥ नारदोवाच॥ शृण्वंतु कृपया सिद्धा देवा
ब्रह्मपुरोगमाः॥ यथा दृष्टं श्रुतं नद्यहं दनुभूतं च यन्मया॥ ११॥ भांतर्भूवलयं भानुभानुभिर्भासितं तु यत्॥ जं
बूद्वीपस्य यद्वर्षं भारतं चाप्य भारतं॥ १२॥ भारती भूमिरखिला कर्मभूरिति विश्रुता॥ स्वर्गच्युतानां सर्वेषां
तथान्या भोगभूमयः॥ १३॥ शुभाशुभकृतं कर्म भारते फलमावहेत्॥ तीर्थानि संति बहवः सरितश्चापि
सत्तमाः॥ १४॥ नदीत्रयस्य पुण्यस्य न तुलां कापि गच्छति॥ तत्र गत्वा शुनोदद्यात्स्वभक्त्यैकं जलांजलिं॥ १५॥
सरस्वती स्मृता ब्राह्मी गंगा विष्णुपदी मता॥ रेवा रौद्रीति विख्याता तापत्रयभयापहा॥ १६॥ स्वर्गमोक्षप्रदास्त्वेताः
सर्वदाः सुरलोकदाः॥ पापनाशकराः सर्वाः स्वर्वानिकपुण्यदाः॥ १७॥ इदं हि किं तु विशेषोस्ति नर्मदा तीरसंभवः॥
सर्वस्थानेषु सर्वत्र गीर्वाणाः सर्वमस्तु तु॥ १८॥ चराचरेति नियतं विशेषो नीरतः स्मृतः॥ महान्नेष विशेषायं
दृष्टो मे नर्मदाभव॥ १९॥ यत्कुक्षिसंवासमानो भजंतीश्वरतां परः॥ स किं न सेव्यते रेवा देवादिपदानदाणां॥
॥ २०॥ शिलापि सेवनाद्यस्याः शिवबुध्यार्च्यते जनैः॥ दुर्लभं मानुषं जन्म भारते सुरसत्तमाः॥ २१॥ तत्रापि सत्कु
लवासितः सद्बुद्धिश्चापि नर्मदा॥ भारते भयमनुजो भवजां योनिं गच्छति॥ २२॥ दुःप्राप्तं मानुषं जन्म सुधांते
वृहारितं॥ कल्पवल्ली यमनुत्वानाय निःश्रेणिरुन्नमा॥ २३॥ मोक्षमार्गो महान्नेष प्रवाहः पापनाशनः॥ नर्म

५५७
2008

१०-२६० नामेदं सर्वतीर्थेन सा मलनाशन लेवन ॥ २४ ॥ यथा श्रीभारते पुण्ये भूषणं भव नाशनी ॥ स्वर्गादि विषदा मर्त्यानां सिद्धि
गंधर्वसंकुला ॥ २५ ॥ यदस्ति देव मर्त्ये वा तस्मात्तु यातु न भेदं ॥ कुरंगोवक्षकं पारगो नीरंगीरे वृते पुरवे ॥ २६ ॥ यदस्ति
त्ववनिव्यात्तु सस्मात्तु यातु न भेदं ॥ यथा भव भवोदधि मनः संसारादु खसं कुलान ॥ २७ ॥ यदस्ति दात्मन स्यात्तु सस्मा
त्तु यातु न भेदं ॥ नाकिनाकसु खं भोक्तं भुवि राज्य मकंटकं ॥ २८ ॥ यदस्ति अपरं दातुं सस्मात्तु ॥ पुण्यात्पुण्यतरा
लोके गंगा तीर्थं च पुष्टये ॥ मुक्ते श्वरेश्वर केशव प्रयागं वापि पुष्करं ॥ तथा कनकलेतीर्थं विश्वयं योपनाशि
नी ॥ ३१ ॥ तथा तीर्थत्रये पुण्या पुरश्चेवासरस्वती ॥ विशेषतः कुरुक्षेत्रे श्रीस्थले रुद्रसंनिधौ ॥ ३२ ॥ प्रभास
च विसिद्धोणब्राह्मी सर्वपापनाशिनी ॥ सर्वत्र दुर्लभा रेवा नर्मदा पलविभूषिता ॥ ३३ ॥ विशेषात्सद्गु तीर्थ पुना
नि मे शृणु तानघाः ॥ पुण्या स्युण्यतरा ख्याता तीर्थे रेवा मरंटके ॥ ३४ ॥ हिमालय शूलभेदे च तथा रेवोदधि सं
गमे ॥ ३५ ॥ चतुर्थी कोटिलापुर्यां भृगुस्थाने च पंचमी ॥ ३६ ॥ तीर्थ पुण्यतराद्दृष्ट्वा सागर संगमे ॥ ख्यातो गुप्तप
परागोयं यत्र रेवोदधि संगमः ॥ ३८ ॥ गुप्तकाशीति विख्याता लोके कोटिलापुरी ॥ काशीवासेन किं तेषां कोटिला
यां वसंतिये ॥ ३९ ॥ अस्यां नेपि निर्मी सा गाथा पुण्य विभाविनी ॥ सर्वत्र वापि पुरा दृचारू तीर्थ वत्सा बलं ॥ ३८ ॥
मा वत्स गच्छ गंगां च मा प्रभासं च पुष्करे ॥ रेवायां तत्र गच्छ त्वं यत्र सा कोटिलापुरी ॥ ३९ ॥ तत्र संवासं परं
मन्ये यत्र सा कोटिलापुरी ॥ किं प्रयागं परं गत्वा किं काश्यां गंगयामपि ॥ ४० ॥ सेव्यते यदि सा रेवा कोटि
लाकुलिनाम्निनी ॥ तत्र गत्वा शुभेन दद्यात्स्वमध्येकं जलिं ॥ ४१ ॥ येन मे परमात्मा तिर्भवे दाहूतसं ध्रुवं ॥ २२३
कर्मबंध विमोक्षाय भवाब्धि तरणाय च ॥ ४२ ॥ तत्र पुत्र वसेथा स्त्वं यत्र सा कोटिलापुरी ॥ इत्यादि
पितृभिर्गीतं श्रूयते वै पुरा सुत ॥ ४३ ॥ एतन्म मतं यदि निवासः कोटिलापुरे ॥ मार्कं ॥ इत्याकर्ण्य
शुभं वाक्यं नारदात्से सुरर्षय ॥ ४४ ॥ निवासं रोचयामा सुब्रह्माद्याः कोटिलापुरे ॥ ब्रह्मोवाच ॥ सर्वा

र्थीनमिदं रेवायत्तु क्तं नारदेन हि ॥ ४५ ॥ पुराणे विमयादृष्टं प्रसिद्धं कोटिलापुरं ॥ न त्र वः कोयतामंत्रोस्ति तीर्थं रतु 2419
रसुराः ॥ ४६ ॥ कर्मबंध विनाशाय पुनर्भव समत्यये ॥ देवा ऊचुः ॥ कोटिलाख्यमिदं कस्मात्तीर्थं सिद्धिप्रदं कथं ॥ 2008
॥ ४७ ॥ कदा जातमिदं ब्रह्मन् माहात्म्यं विस्तराद्वद ॥ ब्रह्मोवाच ॥ शृण्वंतु मुनयः सर्वे ऋषिदेव तपोधनाः ॥ ४८ ॥
यथावृत्तं प्रवक्ष्यामि कोटिलातीर्थसंभवं ॥ एकदा आदिपुरुषो जगत्या तात जगन्मयः ॥ ४९ ॥ यन्नाभि पद्मकुहर
दाविर्भावो ममापि हि ॥ शेषशाय्यासनः श्रीमान् जगदादिः सनातनः ॥ ५० ॥ वन्हेर्यथा विस्फुलिंगाः संभवंतिह
यग्निधाः ॥ तथा तन्महसो जाताः स्वाभाव्यादस्मदादयः ॥ ५१ ॥ सएव वेत्ता वेद्यश्च सृष्टिसंहार कारणं ॥ पुरा
कालमहीमग्नां मुद्धर्तुं निर्गुणोपि सः ॥ ५२ ॥ आदिरूपं स वाराहं तच्चरक्षेत्र पाभयं ॥ सर्वयज्ञमयं श्रीपलंक
चक्रगदाधरं ॥ ५३ ॥ तत्र तेन तपस्तप्त्वा मही सा पुनरुद्धृता ॥ तदाप्रभृति तत्स्थानं पुण्यं सिद्धिप्रदं परं ॥ ५४ ॥
सर्वलोकेषु विख्यातं विश्वाश्वतामनं शुचिः ॥ पुरुषोत्तम पादाभ्याम तिक्रांतं सुरोत्तमाः ॥ ५५ ॥ श्रुत्वा वै मुन
यः सिद्धाः सुराश्च ऋषयो सुराः ॥ तच्चेत्स्वर्गमोक्षार्थं समागच्छंति संघशः ॥ ५६ ॥ सकामाः स्वर्गगतयो मोक्षं
मोक्षार्थिनो ययुः ॥ कालेन गच्छता देवास्तीर्थस्यास्य प्रभावतः ॥ ५७ ॥ रिक्तो वैनरकाजाताः पुरं शून्यं यमस्य च ॥
भलेन सर्वतीर्थानां पयक्षं न तोयये ॥ ५८ ॥ एकदा सर्वलोकेषु नष्टे तु निव सकूच ॥ सागरः सर्वतीर्थानां प्रति
तोयमहायनां ॥ ५९ ॥ तीर्थं प्लावयितुं प्राप्तो रोषामर्षसमन्वितः ॥ सार्धं नदीभिः सर्वाभिः गर्जयित्वा तु रंगकैः ॥
॥ ६० ॥ प्लाव्यमाने तक्षेत्रे सागरेण दुरात्मना ॥ शीघ्रमाणे भयोद्विग्नैः पूत्कृतं तैस्तपस्विभिः ॥ ६१ ॥ पाव तात शुभरा
पाहरे ललितास्मेति भाषया ॥ ब्रह्मो ॥ नरोत्कृष्टं तु तैरेवं शूलपाणिः त्रिवस्त्वरन् ॥ ६२ ॥ रोषग्निज्वाल सप्तजाया
जिह्वो ल्लिख स्फुरन् ॥ कोटिलस्य च नमा मेष्ट्या स्वकरोत्र केर्युदन ॥ ६३ ॥ पापायत्सुप्रमुद्धय साक्षाच्छंभुः सना
तनः ॥ ततः पलायनं चक्रे सागरः सह सागरून ॥ ६४ ॥ सार्धं नदीभिः सर्वाभिस्तापसाः स्वस्थतां ययुः ॥ प्रा

थैयामासुरीशानंचिरमत्रवसेश्वर॥६५॥स्थानस्यास्यनुरक्षार्थंकारयांविश्वेश्वरोयथा॥सर्वलोकहितार्थायगणे
रे॰खं॰ स्वैःपरिवारितः॥६६॥यथामुक्तिप्रदाकाशीवाराणसीसमन्विता॥तथारेवाभिजुष्टयमस्तुस्वर्गापवर्गदा॥६७॥
ब्रह्मोवाच॥एवंतैःप्रार्थितोरुद्रःस्तत्रवासमरोचयत्॥कोटिलतीतियच्चोक्तमसकृत्तेनशंभुना॥६८॥तस्य
क्षेत्रस्यतन्नामकोटिलेत्यकरोत्स्वयं॥सहसर्वैश्चतैःसिद्धतापसैश्चसुरर्षिभिः॥६९॥प्रतिदिक्षुगणांश्च
क्षेत्रपालांश्चचंडिका॥रक्षार्थंतस्यतीर्थस्यमुमोचाथमहेश्वरः॥७०॥साकंवाराहरूपेणविष्णुनावीतमत्स
रः॥ततःप्रभृतिविख्यातंतीर्थंवैकोटिलाह्वयं॥७१॥यत्रापितासुरश्रेष्ठानसंचोचेतकृताकृते॥मार्कं॰॥
इत्युवाचतदाब्रह्मादेवर्षीन्प्रतिभारत॥७२॥माहात्म्यंकोटिलापुर्याःसमुत्पत्तिंचविस्तरात्॥सार्धकोटि
द्वयंतीर्थंकोटिलाख्यंयुधिष्ठिर॥७३॥तत्रमध्येमृतोजंतुःस्वर्गमोक्षावकल्पते॥तत्रतीर्थेसुरश्रेष्ठाःसर्व
लोकपितामहः॥७४॥हितार्थंसर्ववर्णानांनर्मदातीरमाश्रितः॥कोटिलातीर्थवासार्थंसर्वकर्मविशुद्धये॥७५॥
वाचिकंमानसंपापंकर्मजंयत्पुराकृतं॥तत्क्षालयतिदेवेशोदर्शनादेवपातकं॥७६॥तत्रतीर्थेतुयःस्नात्वा
तर्पयेत्पितृदेवताः॥अग्निष्टोमस्ययत्तस्यलभेत्पुण्यमनंतकं॥७७॥तत्तीर्थेयत्प्रदानंब्रह्मोद्देशेनदीयते॥
तदक्षयफलंसर्वमित्येवंशंकरोब्रवीत्॥७८॥गायत्रीजाप्यमंत्रेणतुयस्तस्याकुर्वीतद्विजोत्तम॥ऋग्यजुःसामवे
दानांपारायणफलंलभेत्॥७९॥तत्रतीर्थेब्रह्मयज्ञंकृत्वाविप्रःसुयंत्रितः॥ब्रह्मलोकमवाप्नोतिवाजपेय
फलंलभेत्॥८०॥तत्रतीर्थेवयोभस्यात्प्राणत्यागंप्रवाप्नुयात्॥अनिवर्तिकागतिस्तस्यब्रह्मलोकान्नसंशयः
॥८१॥यावदस्थीनितिष्ठंतिब्रह्मतीर्थेतुदेहिनां॥तावद्वर्षसहस्राणिब्रह्मलोकेमहीयते॥८२॥अवतीर्णः २२५
सकालेनविप्रोन्नमकुलेवसेत्॥उत्तमःसर्ववर्णानांदेवादीनांहिवासव॥८३॥विद्यास्थानानिसर्वाणि
वेत्तिवेदविदांवरः॥पूजनेसर्वलोकेश्चसवत्तःसनसंशयः॥८४॥~~सुवर्ण~~पुत्रपौत्रैःपरिवृतःसर्वव्याधि

विवर्जितः॥जीवेद्वर्षशतंसाग्रंब्रह्मतीर्थप्रभावतः॥८५॥श्राद्धंदत्वापितृणांचकृतकृत्योभवेन्नरः॥ब्राह्मणंपूजयि
त्वाचदीपंदद्याच्छक्तितः॥८६॥ब्रह्मतीर्थेसमासाद्ययोदद्याद्द्विजभोजनं॥एकस्मिन्भोजितेविप्रेकोटिर्भवति
भोजिता॥८७॥ब्रह्मसत्रप्रदानेनविद्यादानेनभारत॥ब्राह्मणंप्रीणयेद्यस्तुब्रह्मलोकेवसेच्चिरं॥८८॥एतत्पु
ण्यंपापहरंधन्यंदुःस्वप्ननाशनं॥तीर्थंचिंतेच्चिंतयानाअमृतत्वंप्रयातिवै॥८९॥इतिश्रीरेवा॰॥कोटिलोत्प
त्तिब्रह्मतीर्थं॰॥मार्कं॰॥तत्रैवचमयापार्थतीर्थमत्यंतपाकृतं॥ब्राह्मणंवैनमस्कर्तुंप्रयातेनतदाकृत्या॥१॥
मार्कंडेश्वरसंज्ञंतुसर्वकल्मषनाशनं॥दृष्ट्वातीर्थस्यमाहात्म्यंब्राह्मणैश्चकृतस्थितिं॥तत्रस्नात्वामहाराजस
मभ्यर्च्यमहेश्वरं॥दीपंदद्याद्विरेचायतथैवद्विजभोजनं॥३॥एवंकृत्वानरस्तत्रसर्वपापैःप्रमुच्यते॥अष्टम्यांच
तुर्दश्यांपूजयेच्छंकरंशुचिः॥४॥इतिकोटिलायांमार्कंडेश्वरतीर्थं॥तत्रैवचान्यत्परश्रेष्ठतीर्थंब्रह्मप्रसादजं॥द
शाश्वमेधसंज्ञंतुसर्वपापप्रणाशनं॥समागतानांदेवानांऋषीणांचददानघ॥ब्राह्मणाचप्रसन्नस्यतीर्थमेतं
निवेदितं॥६॥कुर्वंतुस्नानमंत्रेवमस्याश्चैवसुरर्षयः॥दशानामश्वमेधानांफलंप्राप्स्यथनिश्चितं॥७॥अत्रै
वयोनरोभस्यास्नानासम्यग्विधानतः॥तर्पणंपिंडदानंचपितृंस्तुद्वित्रयदास्यति॥८॥तस्यावश्यंहिपितरः॥
गंतृप्तिमुपागताः॥नित्यंप्रमुदिताःपार्थप्रदास्यंतिसमीहितं॥९॥महादेवंसमभ्यर्च्यदद्याद्योद्विजभोजनं॥दश
शाश्वमेधजनितंफलंप्राप्नोत्यसंशयं॥१०॥इतिश्रीरेवा॰॥कोटिलायांदशाश्वमेधतीर्थं॥मार्कं॰॥तथैवतत्र
राजेंद्रकोटितीर्थमनुत्तमं॥श्रुत्वातीर्थस्यमाहात्म्यंनानादेशसमागताः॥११॥ऋषिभिस्तापसैस्तत्रवर्णैश्चब्रा
ह्मणादिभिः॥कोटिशोमीलितैःपार्थस्थापितंतीर्थमुत्तमं॥१२॥कोटिभिर्मनुजैर्यस्मात्स्थापितंतीर्थमुत्तमं॥
कोटितीर्थमितिख्यातंततःप्रभृतिभारत॥तत्रतीर्थेनरःस्नात्वाशिवमभ्यर्च्यभक्तितः॥पीतृन्संतर्पयंश्चा
द्धैःकोटितीर्थफलंलभेत्॥इतिश्रीकोटिलायांकोटितीर्थं॥मार्कं॰॥ततोगच्छेन्महाराजकोटिलायामघा

451/2008

२.रवं पहं॥भुवनत्रयविख्यातं वाराहं नाम नामतः॥१५॥ तत्र देवो जगन्नाथो वाराहरूपमाश्रितः॥ स्थितो लोकहितार्थाय
संसारार्णवकुंभजः॥१६॥ पुरा निमग्ना येनाभुत्थाद्दी धरणी धृता॥ तेन रूपेण तस्मात्स आदिवाराहसंज्ञितः॥
॥१७॥ देवैर्देवर्षिभिः सिद्धैस्तथा ब्रह्मर्षिभिर्विभुः॥ आसंपूजितो विष्णुर्वाराहं रूपमास्थितः॥१८॥ यत्रांगान्ये
वचपुषि दृश्यंते यस्य भारत॥ विश्वमूर्तिः स भगवानिह तीर्थकृतालयः॥१९॥ ततः प्रभृति विख्यातमादि
वाराहसंज्ञितं॥ तीर्थं तीर्थवरं पार्थ नृणां परमदुर्लभं॥२०॥ तत्र ती तीर्थे तु यः स्नात्वा पूजयेद्धरणीधरं॥
गंधमाल्यविलेपैश्च जयशब्दादिमंगलैः॥२१॥ उपवासपरो भूत्वा द्वादश्यां पक्षयोर्द्वयोः॥ न भाषेत पतितैः
सार्धं पापकर्मभिरुच्यते॥२२॥ बधिरांधपिशाचैश्च पंगुभिश्चांत्यजैर्विटैः॥ त्रयायाह्येर्महाराज लुब्धकैः
र्लक्षणोद्धृतैः॥ आलापाद्गात्रसंपर्कान्निःश्वासात्सहभोजनात्॥ पापं संक्रमते यस्मात्तस्मात्तं परिवर्जयेत्॥
२४॥ ब्राह्मणान्पूजयेद्भक्त्या यथाशक्त्या यथाविधि॥ रात्रौ जागरणं कार्यं कथाख्यानविनोदनैः॥२५॥ प्र
भाते विमले चरित्रं वासुदेवस्य वाराहस्य महात्मनः॥ शृणुयात्कीर्तयेत्पार्थ हर्षानंदसमन्वितः॥२६॥
प्रभाते विमले पार्थ स्नात्वा तीर्थे जगद्गुरुं॥ ये पश्यंति जितक्रोधास्ते मुक्ताः सर्वकिल्बिषैः॥२७॥ य
था हि दृष्ट्वा भुजगाः सुपर्णं नश्यंति मुक्त्वा॥ विषमग्रमाशु॥ नश्यंति पापानि तथैव शीघ्रं॥ दृष्ट्वादिवारा
हमुखं नरेंद्र॥२८॥ नभोगणं नश्यति यांधकारं दृष्ट्वा रविं यद्वदनेकरूपं॥ नश्यंति नानाविधपाप
संघास्तद्वदि वाराहमुखं निरीक्ष्य॥२९॥ प्रदह्यते वह्निमवाप्य यद्वच्चिरार्जितो प्याश्रिहृततूलराशीः॥
दहंति पापानि तथा नराणां पार्थादिवाराहमवाप्य तत्र॥३०॥ यज्ञस्वामी तद्रूपो यं वाराहस्त्वादिरूप २२५
धृक्॥ उद्धृत्य परधर्णी येन त्रिलोकी परिरक्षिता॥३१॥ जयत्यतिबलो देवो विष्णुर्विष्णुः सनातनः॥
वाराहरूपिणा येन लिलयैव धृता मही॥३२॥ एकोयोगी महद्रूपं सदसद्गुतिरीश्वरः॥ हिरण्या

क्षामुविच्छेत्ता वाराहो धरणीधरः॥३३॥ वासुदेवो महादंष्ट्री पुराणः पुरुषः परः॥ ध्येयः पूज्यश्च वंद्यश्च नमस्यश्च सदा
वहि॥३४॥ किं तस्य बहुभिर्मंत्रैर्भक्तिर्यस्य जनार्दने॥ किं तस्य बहुभिर्मंत्रैर्वासुदेवेति यन्मुखे॥३५॥ किं तस्य ब 453/2008
हुभिः क्रतुभिर्गोविंदो यस्य मानसे॥ किं करिष्यंति पापानि श्रीकृष्णसमचेतसां॥३६॥ कथं स्याद्दुर्गतिर्नृणां हरिमु
ब्रह्मतां सतां॥ नमो नारायणायेति मंत्रः सर्वार्थसाधकः॥३७॥ एकोपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथे
न तुल्यः॥ दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय॥३८॥ सा जिह्वा या हरिं स्तौति तच्चेतो यत्तदर्पितं॥
तच्छिरो यन्नतं कृष्णे तौ हस्तौ यौ तदर्चकौ॥३९॥ ध्यायमानो महातेजो रूपं नारायणं हरेः॥ ये त्यजंति स्वकं देहं त
त्र तीर्थे जितेंद्रियः॥४०॥ ते गच्छंत्यमलं स्थानं यत्सुरैरपि दुर्लभं॥ भावाभावविनिर्मुक्तं तद्विष्णोः परमं पदं॥४१॥
निर्दोषं निर्गुणं हृद्यं निर्विकारमशुक्लधुतं॥ तत्र तीर्थे च यः स्नात्वा श्राद्धं दद्युर्विधानतः॥४१॥ तेषामप्यक्षया
लोकाः पितॄणां नृपसत्तम॥ ब्राह्मणान्भोजयेच्छक्त्या मिष्टान्नैश्च पृथग्विधैः॥४२॥ एकस्मिन्भोजिते विप्रे
पुण्यसंख्या न विद्यते॥ मही सस्यवती दद्यात्तीर्थे वाराहसंज्ञके॥४३॥ सर्वधान्यानि च तथा दत्वा स्वर्गे महीयते।
विमाने नाकवर्णेन गंधर्वाप्सरसां गणैः॥४४॥ सेव्यमानः सहस्त्राब्दं भाजते वां शुभानि वा॥ चिरकालादिहायातो
राजा भवति धार्मिकः॥४५॥ पुत्रपौत्रैश्च भृत्यैश्च श्रिया चामितया युतः॥ दीर्घायुर्व्याधिरहितो दाता भो
ग्यवान्भवान्॥४६॥ निर्वैरः पुण्यकीर्तिश्च पुनस्तीर्थं च तत्स्मरेत्॥ इति ते कथितं पार्थ तीर्थं वाराहसंज्ञिकं।
॥४७॥ श्रवणात्कीर्तनादस्य सर्वपापैः प्रमुच्यते॥ ४८॥ इति श्रीवायुपुराणे रेवाकोरिखायां आदिवाराहतीर्थ
माहात्म्यं॥ तत्रैव नागपुरी देवी सर्वांगपरिपूरिका॥ नियुक्ता तीर्थरक्षार्थं महादेवेन शंभुना॥१॥ आसीद्या परमा
शक्तिः पूरयंतु पया चितं॥ सौभाग्यं पुत्रपौत्रांश्च गृहं कर्मसितां श्रियं॥ उक्ता पूर्वं महेशेन सा देवी विश्ववंदिता।
वसेह देवतीर्थस्य रक्षार्थं लोकपूजिता॥३॥ पूरयस्व प्रपंनानां प्रीत्ये कोलत्त नोहरेः॥ एवमुक्ता दशा देवी गि

 दिव्येन युधिष्ठिर ॥४॥ तथेत्युक्त्वा स्थिता स्तत्र लोकानां हितकाम्यया ॥ तीर्थस्थास्य च रक्षार्थं वरदा विश्व
वंदिता ॥५॥ ततः प्रभृति पूज्या सा आग्नसंपूर्ककाविका ॥ पूजिता विविधैर्भावैः प्रददाती प्सितं नृणां ॥६॥ सिंदू
रैः कुसुमैर्धूपैर्यैर्वासस्त्रैश्च कज्जलैः ॥ बलिपुष्पैश्च धूपैश्च तोषयेत्तां प्रियां प्रिये ॥७॥ ददाति वांछितं भक्त्या
पूजिता सा युधिष्ठिर ॥८॥ इत्याग्नापुरी महात्म्यं ॥ मार्कं० ॥ ततो गच्छेन्महाराज तत्र तीर्थं चतुर्थकं ॥ यद्दृष्ट्वा नादपितृ
णां ॥ सर्वपापक्षयो भवेत् ॥९॥ कौबेरं वा वरुणं याम्यं वायव्यं च ततः परं ॥ यत्रोषिता लोकपालाः सिद्धिं प्रापुर्महा
बलाः ॥१०॥ युधिष्ठिर उवाच ॥ किमर्थं लोकपालास्ते तपस्तेपुस्तदानघ ॥ नर्मदातीरमासाद्य कारणं वक्तुमर्ह
सि ॥११॥ मार्कं० ॥ ब्रह्मणा समनुज्ञाता मेरुपृष्ठे पुरानघ ॥ श्रुत्वा तीर्थस्य महात्म्यं सिद्धिस्थानमिति स्मरन् ॥१३॥ ब्रह्म
णश्चाप्यधिष्ठानं दृष्ट्वा तत्र शुभं नृप ॥ निवासं रोचयामासुः रचरं हि वसंति ॥१४॥ संसारे सर्वजंतूनां तृणाग्रज
लबिंदुवत् ॥ कदलीस्तंभजंघालं निःसारं मगत्स्रेवर्चलं ॥१५॥ स्थावरं जंगमं चैव भूतग्रामं चतुर्विधं ॥ नास्ति ध
र्मी सखा बंधुर्न प्रभुर्वै हरेः परः ॥१५॥ धर्मो माता पिता बंधुर्धर्मो भ्राता सुहृत्सखा ॥ आधारः सर्वभूतानां त्रैलोक्यस्य स
चराचरं ॥१६॥ एवं ज्ञात्वा तु ते सर्वे लोकपालाः कृतक्षणाः ॥ तत्रागत्य तपस्तेपुर्विपुलं मारुताशनाः ॥१७॥ गते
कृतयुगस्यांते तत स्तुष्टो महेश्वरः ॥ आनुपूर्व्येण राजेंद्र युगस्य परमेश्वरः ॥१८॥ वरेण छंदयामास लोकपाला
न्महाबलान् ॥ भो लोकपाला याचध्वं येन नस्य प्रयोजनं ॥१९॥ कोनालं महाभागाः सिद्धिस्थानमुपागताः ॥
योयमिच्छति कामं वै तस्य तस्य ददाम्यहं ॥२०॥ एतच्छ्रुत्वा तु वचनं लोकपालमुपागताः ॥ देवेशं प्रार्थयामासु
र्वरदं वरमुत्तमं ॥२१॥ कुबेर उवाच ॥ यदि तुष्टो महादेव यदि देयो वरो मम ॥ यक्षाणामीश्वरश्चाहं भवेयं धनद
स्त्विति ॥२२॥ ततः प्रोवाच देवेशं यमः संयमने रतः ॥ अहं हि स्वामी महादेव भवेयं सर्वजंतुषु ॥२३॥ पितृणा
मपि सर्वेषां तथा नाथत्वमुत्सये ॥ वरुणोनंतरं प्राह प्रणम्य परमेश्वरं ॥२४॥ क्रीडेयं वारुणे लोके यादोगणपति

त्वधृक् ॥ अंभोधामिपपात्रेश्च वैरिवर्गोश्च बंधयन् ॥२५॥ जगादाश्रु ततो वायुः प्रणम्य जगदीश्वरं ॥ व्यापकत्वं त्रिलो 455/2008
क्यां तु प्रार्थयामि महेश्वरं ॥२६॥ जीवनः सर्वभूतानां बलो दृप्तः प्रभंजनः ॥ मार्कं० ॥ संतं नदीप्सितं काममुमया सह
शंकरः ॥२७॥ सर्वेभ्यो लोकपालेभ्यो दत्वा चादर्शनं गतः ॥ गते महेश्वरे देवे यथास्थानेषु ते स्थिताः ॥२८॥ स्थाप
यामासुरीशानं स्वस्वनाम्ना पृथक् पृथक् ॥ कुबेरो वै कुबेरेशं यमश्चैव यमेश्वरं ॥२९॥ वरुणो वारुणेशं च वातो वा
तेश्वरं नृप ॥ स्नात्वा पितॄंस्तर्पयित्वा श्राद्धं च विधिवच्छुभे ॥३०॥ सर्वेश्वरं देवदेवं पूजयित्वा यथाविधि ॥ विप्रा
नाहूय मामासु सर्वे सर्वेश्वराद्य वा ॥३१॥ शांतान्दांतान्जितक्रोधान सर्वभूताभयप्रदान् ॥ वेदविद्याव्रतःस्नात
न सर्वशास्त्रविशारदान् ॥ ऋग्यजुः साम संयुक्तानाथर्वण विभूषितान् ॥३२॥ लोकपाला ऊ० ॥ विप्रवर्या महा
त्मानः सुवर्णं रूप्यं च सं त्विह ॥ चातुर्वर्ण्यं तु सर्वेषां दानं स्यामि गृह्यतां ॥३३॥ एवमुक्त्वाथ सर्वेषां विप्राणां दानका
रणात् ॥ पापप्रक्षालनं कृत्वा विधिपूर्वं युधिष्ठिर ॥३४॥ तत्र स्थाने ददुः स्तेषां भूमिदानमनुत्तमं ॥ कृत्वा वि
प्रणम्याथ वाचमुच्चैर्नियामिकां ॥३५॥ यावच्चंद्रश्च सूर्यस्य तावत्तिष्ठति मेदिनी ॥ तावदस्य सुभक्ष्यं परिपंथी
न कश्चन ॥३६॥ राजा वा राजतुल्यो वा लोकपालानुशासनं ॥ दत्तं लोपयते मूढः श्रूयतां तस्य यो विधिः ॥३७॥
शापयेयुश्च न देवितं तस्य पापस्य भारत ॥ शरीरं वरुणो देवः संततिं श्वसनस्तथा ॥३८॥ आयुर्नयति तस्या
शु यमः संयमनो महान् ॥ निःशेषं भस्मसात्कृत्वा कुतान्योयाति वै नृप ॥३९॥ तस्मात्सर्वप्रयत्नेन ब्राह्मणे
भ्यो युधिष्ठिर ॥ भक्तिः कार्या नृपैः श्रेष्ठैरिच्छद्भिः श्रेय आत्मनः ॥४०॥ यदुक्तं धर्मशास्त्रेषु नीतिमद्भिः पुरा
तनैः ॥ तत्सदा मनसा चिंत्यं राज्ञा धर्मं विजानता ॥४१॥ राजा वृक्षो ब्राह्मणस्तस्य मूलं पाणी निभृत्यामं
त्रीणस्तस्य शाखाः ॥ तस्मान्मूलं यत्नतो रक्षणीयं मूले वृक्षे गुप्ते नास्ति वृक्षस्य नाशः ॥४२॥ षष्टिवर्ष
सहस्राणि स्वर्गे तिष्ठति भूमिदः ॥ आच्छेत्ता चानुमंता च तान्येव नरके वसेत् ॥४३॥ स्वदत्तां परदत्तां वा यत्ना

रे०खं० द्रक्षेसु युधिष्ठिर॥ भूमिं भूमिभृतां श्रेष्ठ रामोद्भूयानुपालनं॥४४॥ देवतास्तामनुसृत्य राजानो ये पितॄन्नृप॥ पालयिष्य
ति सततं तेषां लोकाः महोदयाः॥४५॥ आयुर्यशो बलं वित्तं संततिस्तेषु चाक्षया॥ सानुकूला ग्रहास्तेषां ये प्रजापाल
नेरताः॥४६॥ मार्कं०॥ एवमुक्त्वा तु ते सर्वे लोकपाला द्विजोत्तमान्॥ पूजयित्वा विधानेन प्रणिपत्य विसर्जयन्॥
॥४७॥ स्वस्थानमाश्रिते ष्वेवं विप्रमुख्येषु भारत॥ कदाचित्ते लोकपालास्ते स्नाता कूलं कुतान्नान॥४८॥ लिंगिवेषाः
क्षुधाविष्टाः पर्यभिक्षंत वेश्मसु॥ अस्थिचर्मावशेषाश्च कपालधृतपाणयः॥४९॥ अलब्ध्वा ग्रासमात्रार्धं निर्ययु
नगराद्बहिः॥ शापं ददुस्तदा क्रुद्धा ब्राह्मणानां नराधिप॥५०॥ कृपणा न ददंतीमे भिक्षामभ्यागतार्थिषु॥ दरि
द्राः सततं सर्वाः भवंतु हितनाशनाः॥५१॥ दीनाश्च कृपणाः शापाद्दित्युक्त्वांतर्हिताः सुराः॥ तदाप्रभृति ते स
र्वे ब्राह्मणा धनवर्जिताः॥५२॥ शापदोषेन देवानां संजाता दुःखभाजनाः॥ धनं न पैत्रिकं पुत्रो न पिता पुत्रपौत्र
कं॥५३॥ भुंक्ते वै सुचिरं कालं शिवोप्येवं पुराब्रवीत॥ मार्कं०॥ कुबेरेशं नरः स्नात्वा यस्तु पूजयते सदा॥५४॥ गं
धपुष्पार्घधूपैश्च नैवेद्यैः सप्रणामकैः॥ स्तुतिप्रदक्षिणाभिश्च सो श्वमेधफलं लभेत॥५५॥ शास्त्या धनप्रदा
नेन कुबेरस्तुष्टिमाप्नुयात॥ ममतीर्थे वयः स्नात्वा पूजयेद्वैश्यमेश्वरं॥५६॥ नानाविधोपहारैश्च नतिस्तुतिवि
शेषतः॥ सप्तजन्मार्जितैः पार्थ सर्वपापैः प्रमुच्यते॥५७॥ पूर्णमास्याममावास्यादिने स्नात्वा च तर्पणं॥ यः क
रोति तिलैः सार्धं तस्य पुण्यफलं शृणु॥५८॥ सुदृप्तास्तेन तोयेन पितरश्च पितामहाः॥ क्रीडंते द्वादशाब्दानि
स्वर्गस्थाः प्रपितामहाः॥५९॥ प्रीणयित्वा पितॄन्श्राद्धे ब्राह्मणान्भोजयेन्नृप॥ माषान्नं रूप्यवस्त्रं च महिषीं वाद २२७
दाति यः॥६०॥ यमस्तस्य भवेत्तृप्तिः सदा तिसमीहितं॥ वरुणेशं नरः स्नात्वा पूजयित्वा च शंकरं॥६१॥ आय
ते कृतकृत्यो सो पुण्यं प्राप्नोति पुष्कलं॥ मृतः कालेन महता वारुणं लोकमाप्नुयात॥६२॥ ततः प्रयाति यानेन
यत्रे देवो महेश्वरः॥ जलदानं च मत्स्यार्थं वस्त्रमन्नं च यो ददेत॥६३॥ प्रीणाति वरुणं पार्थ वारुणैर्न च बध्यते॥

वातेश्वरं नरः स्नात्वा पूजयित्वा महेश्वरं॥६४॥ पितॄन्प्रीणाति यः श्राद्धे मिष्टान्नैस्तर्पयेद्द्विजान्॥ सकृतार्थी भवेद्राजन्न 4517 / 2008
रोगैः परिपीड्यते॥६५॥ घृतमन्नं तिलांश्चापि दत्वा वायुं संतोषयेत॥ मृतो वायुपुरं याति वर्षाणामयुतं च कं॥६६॥
ततः शिवपुरं याति विमानेनार्कवर्चसा॥ वसित्वा तत्र सुचिरं राजा लोभे यद्भुवि॥६७॥ चिरायुर्विजयी पुत्री धनी दा
नी जनप्रियः॥ इत्येवं ते मयाख्यातं पार्थ तीर्थचतुष्टयं॥६८॥ तत्रैव यो वसेन्नित्यं लोकपालान्प्रपश्यते॥ जायते कृ
तकृत्यो सौ पापतापबहिः कृतः॥६९॥ किं तस्य बहुभिर्दानैर्यज्ञैर्वा बहुदक्षिणैः॥ स्नात्वा तीर्थेषु चैतेषु संप्रा
प्तं जन्मनः फलं॥७०॥ ते धन्यास्ते महात्मानस्तेषां लोकेषु जीवितं॥ उषिताः कारिलायां ये लोकपालान्नमं
ति हि॥७१॥ एतत्पुण्यतमं लोके पार्थ तीर्थचतुष्टयं॥ धनमायुष्यमारोग्यं स्वर्गदं दुःखनाशनं॥७२॥ प
ठतां शृण्वतां वापि सर्वपापक्षयो भवेत॥७३॥ इति श्रीवायुप्रोक्ते शिवसंहितायां कारिलायां रेवामहात्म्ये
कौबेर याम्य वरुण वातेश्वर तीर्थचतुष्टयनिरूपणं पंचकुबेरमाहात्म्यं॥ राम॥ मार्कं०॥ ततो गच्छेत्तु रा
जेंद्र अयोध्यासंज्ञितं पुरं॥ क्रोशांतरे कारिलायाः पापघ्नं पुण्यवर्धनं॥१॥ रामेश्वरं नाम तीर्थं यत्र रामे
ण निर्मितं॥ पूर्वमेव मया प्रोक्तं तत्र रामस्यागमनं नृप॥२॥ तीर्थयात्राप्रसंगेन अहिल्यातीर्थपार्श्वतः॥ नि
र्गतः सरयूतीरं ब्राह्मणैः परिवेष्टितः॥३॥ दृष्ट्वा रेवातटं पुण्यं लीलयैव युधिष्ठिर॥ आनंदं परमं प्राप्तः
प्रवाहं वीक्ष्य पुष्कलं॥४॥ दृष्ट्वा पुलिनं पुण्यं समं सौम्यमकर्दमं॥ सद्वृक्षसेवितं श्रीमान्निषसाद लु
गैः सह॥५॥ इहैव परमायोध्या निवासाय मता मम॥ यथा हि सरयूतीरे तथा रेवातटे स्थिता॥६॥
विप्रा मां पावयिष्यंति पालयिष्यंति ते पिब॥ रेवावगाहनं पुण्यमाकल्पं मम ये च ते॥७॥ इत्युक्त्वा
स्थापनं चक्रे शिवस्य सह बांधवैः॥ रामेश्वरात्कय स्तत्र ब्राह्मणैः सुप्रतिष्ठितः॥८॥ त्रिरात्रमुषितस्त
त्र ब्राह्मणैः सह भारत॥ रामो दाशरथिः श्रीमान ददौ बहुधनं दश॥९॥ निवासो यत्र रामस्य तत्रा

रे॰खं॰ याख्यानसंश्रयः॥इत्युक्तेब्राह्मणैर्लोकैर्निवासंचक्रिरेजनाः॥१०॥अयोध्यास्यभवन्नामतस्यस्थानस्यवैनृप॥तदा
रामेश्वरंतीर्थंतत्ररामेणनिर्मितं॥११॥तत्ररेवाजलेस्नात्वाश्राद्धंकृत्वाविधानतः॥रामेश्वरंपूजयेद्यःसर्वपापैः
प्रमुच्यते॥१२॥पुरंप्रदक्षिणीकृत्यकृतकृत्योभवेन्नरः॥१३॥इतिरामेश्वरतीर्थं॥मार्कं०॥ततःकोट्यंतरे
गच्छेत्कर्कटेश्वरमुत्तमं॥यत्रकर्कटकःसिद्धःशंभुत्वमगमन्नृप॥१४॥पुराकान्यकुब्जेश्वरोराजाजयंतोनामधार्मि
कः॥धनिनोविप्रवर्यस्यबलाद्धनमहारयत्॥१५॥चिरंब्राह्मणविरोधंसचकारखलिवर्धनं॥अचिरेणाथका
लेननृपःपंचत्वमाप्तवान्॥१६॥सचीवंध्याचलतटेकुलीरस्समभूत॥त्रिंशद्वर्षसहस्राणिमहानद्भुतविक्र
मः॥१७॥नानायत्नैःसर्वभूतानिब्राह्मणांश्चजिघांसति॥एकदातस्यनाशायगगनेविचरन्महान्॥१८॥गरुडा
न्वयसंभूतःपक्षिराट्तंददर्शह॥जहारसहसाक्रुद्धःकुलीरंचंचुनाडितं॥१९॥द्वीपांतरनिवासीसनत्रागंतुं
प्रचक्रमे॥रेवातीरमनुप्राप्यनीरमालोक्यनिर्मलं॥२०॥दूराध्वसुपरिश्रांतस्तत्पार्श्वमापतत्तटे॥कर्कटंनस्त
लेमुक्त्वाजलेपातुमुपागतः॥२१॥ममारमुक्तमात्रःसकर्कटःशिवतांययौ॥तत्राकुलमहांतंचदृष्ट्वालोकाःसु
सुविस्मिताः॥२२॥अत्यद्भुतंकर्कटंचवीक्ष्याश्चर्यकरंजनाः॥इतस्ततःसमायातादद्दृशुर्लिंगमुत्तमं॥२३॥निर्गतः
कर्कटेस्थानेसचलिंगेलयंययौ॥शकुनिस्तत्रतंवीक्ष्यशिवलिंगात्मकंनृप॥परंविस्मयमासाद्यस्नात्वागत्वाय
थागतं॥ततःप्रभृतिराजेंद्रजनैस्तीर्थमुदाहृतं॥२५॥कर्कटेश्वरसंज्ञंतुसर्वपापक्षयंकरं॥ततस्नात्वातुयःपा
र्थपूजयेत्परमेश्वरं॥२६॥नत्वास्तुत्वाविधानेनपूजयित्वास्वशक्तितः॥नवैवावर्ततेनूनंशिवलोकात्कदाचि २२८
त॥२७॥तत्रपार्थनरःकर्मकृत्वावैवशुभाशुभं॥अक्षयंफलमाप्नोतियावदाहूतसंप्लवं॥२८॥तत्रास्तित्रैश
कुंतेनहिमाद्रौगतदातदा॥कथितंवालखिल्यानांसकुलीरोयथाभवत्॥२९॥नर्मदायाश्चमाहात्म्यंतेप्या
कर्ण्यसुविस्मिताः॥विनोदाद्दृष्टुमायातास्तीर्थतेनार्मदेतटे॥३०॥मृतंरेवातटेतत्रकर्कटंशिवतांगतं॥दृष्ट्वा

सुविस्मिताःसर्वेप्रत्रागुःमुख्यनर्मदां॥नराणांचतथापर्मकर्मनैपुण्यलक्षणं॥कर्मणाजायतेजंतुःकर्मणैवप्रली H54 / 2008
यते॥३२॥सुखंदुःखंभयंक्षेमकर्मणैवाभिपद्यते॥क्रतुकान्यकुब्जेश्वरोराजाक्रतुनस्यकुलीरता॥३३॥क्वचरेवातटेमृ
त्युःक्वचतस्यशिवात्मता॥जीवःशिवःशिवोजीवःसतत्रकाभेदभावना॥३४॥कर्मणाजायतेजीवःकर्मणैवशि
वोभवेत्॥इत्युक्त्वातेतपस्तेपुर्वालखिल्यामहर्षयः॥३५॥जीवंतएवमुक्तास्तेकर्मबंधविवर्जिताः॥तपसश्चप्रभा
वेनकोटितेष्वपिसर्वतः॥३६॥स्वेच्छयासर्वलोकेषुनर्मदासर्वपूजिता॥तत्रस्थैर्हीनजानंतिनराज्ञानबर्हिःकृताः
॥३७॥नारीरस्थानिवास्नानंमहादेवमजाव्ययं॥पुराप्रभृतितीर्थेस्मिन्देवीनारायणीशुभा॥३८॥अथापितप
तेघोरंतपोयावत्समार्बुदं॥तत्रतीर्थेनरःस्नात्वातर्पयित्वासुरान्पितृन्॥३९॥श्राद्धंकृत्वाविधानेनशक्त्याविभो
जयेद्द्विजान्॥तस्यतेद्वादशाब्दानितृप्ताःस्युःपितृदेवताः॥४०॥अन्नंवस्त्रंजलंछत्रंकमंडलुमुपानहौ॥हिरण्यं
वाधनंदत्वाशिवलोकेमहीयते॥इतिश्रीरेवा०॥कर्कटेश्वरतीर्थं॥मार्कंडे०॥ततःपरंमहाराजकर्कटेश्वरतीर्थ
तः॥गत्वाक्रमशस्तंपुण्यंशक्रतीर्थमितिश्रुतं॥१॥तत्रसिद्धोमहाभागोदेवराजःशतक्रतुः॥गौतमेनपुराशप्तं
स्नात्वादेवंशतक्रतुं॥२॥ब्रह्माद्यादेवताःसर्वाःऋषयश्चतपोधनाः॥गौतमंप्रार्थयामासुर्वाक्यसानुनयैर्नृप॥३॥
श्रीसाउ०॥गतराज्योगतःश्रीकःशक्रोदैन्यमुपाश्रितः॥इंद्रेणरहितंराज्यंनकश्चित्कामयेद्द्विज॥४॥देवावा
मानरोवापितथातेविदितंमुने॥तस्यत्वंभगयुक्तस्यदपिकुरुहितायनः॥५॥निलीनःक्वापिशक्रःसदूषितः
त्वेनकर्मणा॥प्रकीर्तितःसतांकोपःशरदाभ्रवदास्थिरः॥६॥देवानांवचनंश्रुत्वागौतमोवेदवित्तमः॥तथेति
कृत्वाशक्रस्यवरंदातुंसमुद्यतः॥७॥यत्तद्भगास्यसहस्रंतेपुराजातंशतक्रतो॥तल्लोचनसहस्रंहिमत्प्रसा
दात्भविष्यति॥८॥गच्छत्वंनर्मदातीरंतत्रास्तध्ययनंकुरु॥स्नापयित्वामहादेवंपूजयस्वधृतव्रतः॥९॥त
त्प्रसादात्सहस्राक्षपूतगात्रोभविष्यसि॥रेवाजलावगाहाच्चस्थानिसंयस्यसाधुधीः॥१०॥एवमुक्तःस

रे॰खं हस्वाक्षः प्रणम्य सुरसत्तमं॥ ब्रह्माणं ब्राह्मणांस्तांश्च पपयोनर्मदानदे॥११॥ तत्र स्नात्वा तु भो नीय स्थापयित्वा महेश्व
रं॥ मासमेकं समाराध्य जपध्यानपरायणः॥१२॥ जगाम त्रिदिवावासं पूज्यमानोऽप्सरोगणैः॥ तत्र तीर्थं सुविख्या
तं तव प्रभृतिभारत॥१३॥ तत्र स्नात्वा महाराज तर्पयित्वा सुरान्पितॄन्॥ श्राद्धं कृत्वा च विधिवत् ब्राह्मणान्भोज
येत्तु वीन्॥१४॥ तत्र यः पूजयेद्भक्त्या देवं चंद्रेश्वरं नृप॥ नानाविधोपहारैश्च दानैश्च शक्तितः॥१५॥ पारदार्यकृ
तैः पापैर्मुच्यते नात्र संशयः॥ तथान्यपापनिर्मुक्तः स्वर्गलोके महीयते॥१६॥ इति श्री रेवाया॰ चंद्रतीर्थं नाम॥
मार्कं॰॥ ततः परं सोमतीर्थं गच्छेत्क्रमरातद्वये॥ सोमेन स्थापितो यत्र शंकरः पापनाशनः॥१७॥ युधिष्ठिरोवाच॥
सोमेन स्थापितस्तत्र शंकरः केन हेतुना॥ एतन्मे पृच्छतो ब्रूहि कारणं मुनिसत्तम॥१८॥ मार्कं॰॥ बृहस्पतिर्दिवगु
रूपी स्वयं आंगिरसोत्तम॥ तस्य दारा स्मृता तारा सोमो धर्षयते पहलान्॥१९॥ गुरुदाराभिगमनात्ख्यातिस्त्वमुपजग्मि
वान्॥ स द्विजैर्विगर्हितः सोमो जातो यज्ञपथाद्बहिः॥२०॥ ऋक्षाण्योषधयः पार्थ स्वामिनं नोपालेभिरे॥ लुप्त
यज्ञविधानं च कांदिक्रीकास्तथा द्विजाः॥२१॥ न चस्फीतजलनद्यः पर्जन्यो न ववर्ष च॥ नक्षीरिण्यस्तथा गा
वो जातं सोपद्रवं जगत्॥ एवं वर्षेषु ते जाते हाहाभूते जगत्त्रये॥ देवैर्ब्रह्मादिभिः पार्थ तथा ब्रह्मर्षिभिस्ततः॥२३॥
देवर्षिभिर्मुनिगणैर्मिलित्वानुग्रहः कृतः॥ सोमाय जगतः शांत्यै धर्मतत्त्वार्थवेदिभिः॥२४॥ आमंत्र्य सोम
राजं वाचुः सर्वे सुरर्षयः॥ देवा ऊचुः॥ सोमराज महद्देवं कूलं कर्म विगर्हितं॥२५॥ पातित्यजननं सम्यक् गु
रोदारप्रधर्षणं॥ राजा सर्वस्य लोकस्य न्यायमार्गप्रवर्तकः॥२६॥ स चेदुन्मार्गगः स्याच्चेत्किं तत्र कुरुते जनः॥ अग्निसो २२९
ममयं विश्वं विना त्वां नैव सिध्यति॥२७॥ हानिः सत्कर्मजा लोके जगज्ज्ञानं विलक्षणं॥ तस्मादनुग्रहं देवैः परो वि
प्रर्षयस्तव॥२८॥ यदादिष्टं तितत्कार्यं तयास्य स्काविचारणं॥ ब्रह्मा उ॰॥ सोमश्चार्वेशुनी नीरे स्थापयित्वा महेश्वरं॥
॥२९॥ नित्यं त्रिषवणस्थायी पूजयस्व धृतव्रतः॥ षण्मासात्स्व जनस्नानध्यानजप्यादिकर्मदिः॥३०॥ निंदितात्क

र्मणः सोमततः पूतो भविष्यसि॥ मार्कं॰॥ इत्युक्तो विधिमुख्यैः स विधुर्गत्वा च नर्मदां॥३१॥ तत्र स्नात्वा च संस्थाप्य 461/2008
शंकरं लोकशंकरं॥ पूजयामास विधिना जपध्यानपरायणः॥३२॥ सराजा नियताहारः षण्मासाल्लुब्धिमान्नु
यात्॥ ततो जगाम स्वं धाम सर्वदेवर्षिपूजितः॥३३॥ ततः प्रभृति राजेंद्र सोमतीर्थमिदं श्रुतं॥ तत्र तीर्थे तु यो भ
क्त्या ब्राह्मणान्भोजयेच्छुचिः॥३४॥ तेन सम्यग्विधानेन कोटिरेकेन भोजिता॥ पादुकोपानहौ छत्रं वस्त्रं वार्क
वर्जितं॥३५॥ ददाति विप्रमुख्याय तस्य तत्कोटिधा भवेत्॥ सहस्रं तु सहस्राणामन्नं चोयस्तु भोजयेत्॥
३६॥ एकस्य मंत्रयुक्तस्य कलां नार्हति षोडशीं॥ एकं वा बहुचं तत्र भोजयेद्वेदपारगं॥३७॥ एष वागतमथा
ध्वर्युं छंदोवाससमाप्तिकं॥ अग्निहोत्रसहस्रस्य फलं संप्राप्यते बुधैः॥३८॥ समंताद्द्वेषविद्धूपातीर्थे वैभो
जितेन हि॥ संनिरुद्धेंद्रियग्रामो यत्र यत्र वसेन्मुनिः॥३९॥ तत्र तत्र कुरुक्षेत्रं नैमिषं पुष्करं गया॥ तस्मात्स
र्वप्रयत्नेन ग्रहणे चंद्रसूर्ययोः॥४०॥ संक्रांतौ च व्यतीपाते योगिभोज्या विशेषतः॥ सन्यासं कुरुते यस्तु तत्र ती
र्थे युधिष्ठिर॥ हंसयुक्तविमानेन स याति त्रिदिवं नरः॥ सोमस्यानुचरो भूत्वा तेनैव सह मोदते॥ इति श्री रेवा॰
सोमतीर्थं॥ मार्कं॰॥ ततः कोवरं तरे पार्थ नंदातीर्थमनुत्तमं॥ यत्र सिद्धा महाभागा नंदा देवी शुभप्रदा॥१॥ ये
न रुद्रास्तथा साध्या वसवो मरुतां गणाः॥ शक्राग्निवायुना सार्धं चंद्रादित्यौ तथैव च॥२॥ देवास्ते निर्जितास्स
र्वे ब्रह्मविष्णुपुरोगमाः॥ तस्मिन्महिषदैत्यस्तु पुरा देवभयंकरो॥ शूलेनोग्रेण भिन्नांगो वृत्तदानवसत्तमे॥ संग्रा
मेवै महाघोरे सर्वदेवभयंकरे॥४॥ कृत्वा तु कदनं घोरं नंदा देवी सुरेश्वरी॥ शोणिताक्ता तथाग्निज्वालाश्रांता च
जयसुंदरी॥४॥ तत्र सा नर्मदातीरे तु नीलविभेदहृदे॥ स्नाता नंदा विशालाक्षी रेवया चाभिपूजिता॥५॥ ततः
प्रभृति राजेंद्र तेन नंदाह्रदः स्मृतः॥ सख्यं चेरवया सार्धं चक्रे सा पूजिता तया॥६॥ नंदना तत्कर कोकानां नंदा
ख्या मगमर्शिवा॥ ततः प्रभृति पूज्या सा रेवातीरे युधिष्ठिर॥७॥ तत्र तीर्थे नरः स्नात्वा नंदां संपूज्य भारत॥८॥

तिदानंविप्रेभ्यःसोश्वमेधफलंलभेत॥१०॥विजयंसमवाप्नोतिस्वर्गलोकेमहीयते॥श्राध्दंदत्वापितॄणांचाप्यतुलांप्रीति
मावहेत्॥भैरवंचैवकेदारंतथारुद्रमहालयं॥नंदाह्रदश्चतुर्थंस्यात्पंचमंचापिदुर्लभं॥११॥बहवस्तंनजानंतिका
मरागविमोहिताः॥रेवायांसुहृदयंपुण्यंसर्वपापप्रणाशनं॥१२॥तत्रतीर्थेनरःस्नात्वानंदाभागाध्ययेक्षु...चिः॥किं
तस्यहिमरुर्दुर्गमनेनप्रयोजनं॥१३॥परमार्थमविज्ञायपर्यटंतिनमोवृताः॥तेषांमार्गमार्गमापंथाश्रमएवहिकेव
लं॥१४॥पृथिव्यांसागरांतायांस्नानदानेनयत्फलं॥तत्फलंसमवाप्नोतिस्नात्वानंदाह्रदेनरः॥१५॥इतिश्रीनर्मदा
माहात्म्येनंदाह्रदयतीर्थं॥मार्कं॰॥ततःकोशांतरेपार्थचक्रतीर्थमनुत्तमं॥तदेवद्वादशीसंज्ञंसर्वपापप्रणाशनं॥
॥१६॥पुरावाराहरूपेणविष्णुनानिहितोसुरः॥हिरण्याक्षोमहाराजचक्रेणद्वादशीदिने॥१७॥तेनासौनिज
वाराहोद्वादश्यांविजयीयतः॥चक्रंप्रक्षालितंचात्रवाराहेणमहात्मना॥१८॥चक्रतीर्थंततःप्रोक्तंद्वादशीतीर्थ
मित्यपि॥चक्रतीर्थेनरःस्नात्वापापैःपरिभूयते॥१९॥श्राध्देनतत्रदत्तेनपितॄणांतृप्तिरक्षया॥क्षरंतिसर्वदाना
निजपहोमबलिःक्रियाः॥२०॥नक्षीयंतेहिराजेंद्रचक्रतीर्थेकृतंतुयत्॥यद्भूतंयद्भविष्यंचतीर्थमाहात्म्यमुत्तमं॥
॥२१॥कथितंतेमयासर्वंपृथग्भावेनभारत॥इतिनर्मदामाहात्म्ये चक्रतीर्थं॥तत्रैवचमहाभागवाराहंतीर्थमुत्तमं॥
जयंप्राप्तस्तपस्तप्त्वावाराहोयत्रवैहरिः॥२२॥संपूज्यजयवाराहंनत्वात्याजायतेनरः॥जयंप्राप्नोतिसर्वत्ररि
पुभिर्नाभिभूयते॥२३॥नाकालमरणंचैवतथांतेस्वर्गलोकभाक्॥जयवाराहमुद्दिश्यशक्तितोभजयेद्विजान्॥
२४॥तीर्थेवैजयवाराहेस्नात्वासौभाग्यमाप्नुयात्॥संततिंसमवाप्नोतिश्राध्दंदत्वायुधिष्ठिर॥इतिजयवाराह
तीर्थं॥तत्रैवशिवतीर्थंवैवाराहानुज्ञयाद्विजैः॥स्थापितंशिवसांनिध्याद्विजयेविश्वरूपिणे॥२५॥हिरण्याक्ष
वधेजातेनिहतेषुचशत्रुषु॥प्रीत्याप्राप्तःशिवस्तत्रगगनादंघ्रिणोजयेत्॥२७॥जितंभगवतातेनहरिणा
लोकधारिणा॥तदावाराहरूपेणनिहतेष्वसुरेषुच॥२८॥अभ्यागतःशिवस्तत्रप्रशंसाथयोत्रिणं॥दत्वाज

याभिषेकंसतस्यदेवर्षिभिःसह॥२९॥चकारजयतीर्थेनतस्यनाम्नासदाशिवः॥वाराहेणापिभगवान्प्रार्थितस्तीर्थहेत
वे॥३०॥यत्रप्राप्तोमहादेवविश्वयोनिःसदाशिवः॥तत्रतीर्थमतुलंमन्येसंनिधानंततःकुरु॥३१॥शिवतीर्थंस्थापयि 463/2008
त्वाप्रसादंतत्रमेकुरु॥देह्यनुज्ञांमहेशानसर्वलोकहितायवै॥३२॥मार्कं॰॥एवमुक्तोवराहेणतथेत्याहसदाशिवः॥
तदासन्निहितस्तुभ्यमित्युक्त्वांतरधीयत॥३३॥तत्रस्तत्रवराहेणसार्धंविप्रैर्महात्मना॥शिवःप्रतिष्ठितस्तत्रशिव
तीर्थंततोभवत्॥तत्रतीर्थेनरःस्नात्वाशिवंसंपूज्यभक्तितः॥दीपार्घधूपनैवेद्यःशिवलोकेमहीयते॥३५॥योगिन
स्तापसान्विप्रान्भोजयेच्छिवसंनिधौ॥परिवेष्टोकोयोयातिभक्त्यापूजितभारतःपूजितः॥३६॥प्रसन्नेशंकरेदे
वकिमन्यैःस्तोषितैःसुरैः॥अप्रमाणेमहेशानेकिमन्यैर्जायतेसुरैः॥इतिशिवतीर्थं॥३७॥ततस्तत्रैवराजेंद्रवि
ख्यातंयोधनीपुरे॥चक्रतीर्थादिपंचापियत्रसंतिसमीपतः॥३८॥रामकेशवतीर्थंहिप्रथमंयत्रभारत॥द्वितीयंरु
क्मिणीतीर्थंतृतीयंशिवसंज्ञितं॥३९॥चतुर्थंजयवाराहंचक्रतीर्थंचपंचकं॥इत्युत्तमापंचतीर्थीविख्यातायोध
नीपुरे॥४०॥यत्रस्थित्वापुराकल्पेनरनारायणावुभौ॥तत्रतीर्थेतपस्तप्त्वासंग्रामेदेवदानवे॥जयंप्राप्तौमहात्मा
नौनरनारायणावृषी॥तथात्रेतायुगेप्राप्तेतौदेवौरामलक्ष्मणौ॥४१॥तत्रतीर्थेपुनःस्नात्वारावणंजघ्नतुर्मृधे॥
राक्षसानांजयंकृत्वाजयंप्राप्तौयुधिष्ठिर॥४२॥तथैवद्वापरेप्राप्तेसंभूतौरामकेशवौ॥वसुदेवकुलेजातौदुःख
रंकर्मचक्रतुः॥४४॥नरकंकालनेमिंचकंसंचाणूरमुष्टिकौ॥केशिनंशिशुपालंचजरासंधंचजघ्नतुः॥४५॥
तीर्थस्यास्यप्रभावेनतपःकृत्वापुरानघ॥पूजयित्वाद्विजान्भक्त्याजयनोद्धारकाश्रितौ॥४६॥ऋषिभिस्तत्र
लोकैश्चतन्मूर्तिर्भक्तितोर्चिता॥रामकेशवतीर्थंहितततःप्रभृतिविश्रुतं॥४७॥तत्रतीर्थेतुयःस्नात्वापूजयेद्धल
केशवौ॥तेनदेवोजगत्धाताप्रूजितस्त्रिगुणात्मकः॥४८॥उपोष्ययोनरोभक्त्यातत्रकुर्यात्प्रजागरं॥मुच्यतेस
र्वपापेभ्योगायनश्रवणनशुभांकथां॥४९॥यावतस्तत्रतीर्थेतुरक्षाःपश्यतिमानवः॥तावत्पापानिनश्यंतिशरी

रात्तस्यभारत॥५०॥प्रातरुत्थाययेकेचित्स्नं संतिरामकेशवौ॥नमस्यंतिस्तुवंतेदेवास्तुल्यादिवेनचक्रिणा॥५१॥नेपूज्यास्ते
नमस्कार्यास्तेषांजन्मसुजीवितं॥येनमंतिजगन्नाथंबलकेशवरूपिणं॥५२॥तत्रतीर्थेतुयद्दानंस्नानंदेवार्चनंनृप॥क्री
यतेतत्फलंसर्वमक्षयायोपकल्प्यते॥५३॥अग्नेरपत्यंप्रथमंसुवर्णंभूर्वैष्णवीसूर्यसुताश्चगावः॥लोकत्रयास्तेनभवं
तिदत्वायःकांचनंगांचमहींचदद्यात्॥एतत्तेकथितंराजंतीर्थमाहात्म्यमुत्तमं॥अतीतंचभविष्यंचवर्तमानंमह
त्फलं॥५५॥श्रुत्वावापिपठित्वावासर्वपापैःप्रमुच्यते॥५६॥इतिश्रीरेवा॰योधिनीपुरेरामकेशवतीर्थः॥मार्कं॰॥
ततोगच्छेन्महाराजरुक्मीणीतीर्थमुत्तमं॥तत्रैवपंचमंपुण्यंख्यातंलोकत्रयेशुभं॥१॥तत्रतीर्थेनरःस्नात्वारूपवान्
सुभगोभवेत्॥अष्टम्यांचचतुर्दश्यांतृतीयायांविशेषतः॥२॥स्नानंसमाचरेत्तत्रनचेहजायतेपुनः॥रुक्मीणीती
र्थमासाद्यस्नात्वादत्वाचकांचनं॥३॥तत्तीर्थस्यप्रभावेनशोकंनाप्नोतिमानवः॥पुत्रभृत्यसमायुक्तःसुखसौ
भाग्यमाप्नुयात्॥४॥मार्कं॰॥कथयामियथावृत्तमितिहासंपुरातनं॥चित्रंचरित्रंरुक्मिण्याःपवित्रंचमनोह
रं॥५॥कथितंपूर्ववृद्धैस्तैःपारंपर्येणभारत॥तत्तेहंसंप्रवक्ष्यामिशृणुष्वैकाग्रमानसः॥६॥नगरंकुंडिनंनाम
भीष्मकोह्युपभुंजते॥हस्त्यश्वरथसंपन्नोधनधान्यसमन्वितः॥७॥बहुपत्निगणाकीर्णोबहुभृत्यसुहृत्सखः॥
तस्यभार्यामहादेवीप्राणेभ्योपिगरीयसी॥८॥तस्यांसजनयामासपुत्रमेकंतुरुक्मकं॥पुत्रीचरुक्मिणी
नामद्वितीयांपार्थिवर्षभ॥९॥तदान्नारीरिणीवाचाराजानंतमुवाचह॥चतुर्भुजायदातव्याकन्येयंराजस
त्तम॥१०॥एवंतद्वचनंश्रुत्वाहृष्टोराजाप्रियान्वितः॥ब्राह्मणैःसहविद्वद्भिःप्रविष्टःसूतिकागृहं॥ब्राह्मणान्वा
चयित्वासारूतानाम्नातुरुक्मिणी॥यतःसुवर्णतिलकंजन्मनासहभारत॥१२॥ततःसारुक्मिणीनाम्नाब्रा
ह्मणैःकीर्तितामुदा॥ततःसाकालपर्याये अष्टवर्षाव्यजायत॥१३॥पूर्वोक्तमशरीरिण्यातद्वाक्यंभरतर्षभ॥
श्रुत्वास्मृत्वातुतद्राजाचिंतयामाससैवतदा॥१४॥कस्येयंदीयतेकन्याकोभवेच्चचतुर्भुजः॥एतस्मिन्नंतरेतावद् २२९

द्देवतास्पर्वतोनमात्॥१५॥मुखश्चैरिपतिस्तत्रदमघोषःसमागतः॥प्रविष्टःपुरमार्गेणयत्रराजासभीष्मकः॥१६॥ 465
तंदृष्ट्वास्वागतेनाशुपूजयामाससैवतदा॥आसनंविपुलंतस्यसभामध्येनिवेश्यच॥१७॥पप्रच्छकुशलंराजादमघो 2008
षःश्रियान्वितः॥कुशलंतेमहाराजसर्वत्रविजयश्चते॥१८॥त्वद्दर्शनात्सुकश्चासंशोभनंवैत्वयाकृतं॥कन्या
मदीयाराजेंद्रअष्टवर्षाव्यजायत॥१९॥चतुर्भुजस्यदातव्यायतोवागाहदैवकी॥मार्कं॰॥भीष्मकस्यवचःश्रुत्वा
दमघोषोब्रवीदिदं॥२०॥चतुर्भुजोममसुतस्त्रिषुलोकेषुविश्रुतः॥तस्येयंदीयतांकन्याशिशुपालस्यभीष्म
क॥२१॥ततस्तद्वचनंश्रुत्वादमघोषमुवाचतं॥भीष्मकेनततोदत्ताशिशुपालस्यभारत॥२२॥प्रालब्धंशोभ
नंतत्रभीष्मकेनयुधिष्ठिर॥दिग्देशांतरजाश्चैवयेवसंतिस्वगोत्रजाः॥२३॥निमंत्रिताहितेसर्वेआजग्मुश्च
यथाक्रमं॥ततोयादववंशस्यतिलकौबलकेशवौ॥२४॥निमंत्रितौसमायातौकुंडिनंपुरमुत्तमं॥पूजितौ
चयथान्यायंभीष्मकेनयदूत्तमौ॥२५॥ततःप्रदोषसमयेरुक्मिणीकामरूपिणी॥सखिभिःसहितापार्थ
आगतादेवपूजने॥२६॥गीतवादित्रघोषेणनगरोपांतदेवतां॥अंबिकांनामतेषांवैकुलधर्मोयमीदृशः॥
॥२७॥उद्वाहपूर्वदिवसेकन्यांवांपूजयेदिति॥तत्रतौबलदाशार्हौवेत्तप्रावर्तधारिणौ॥२८॥विनोदाद्द्रष्टुमा
यातौतथापूर्वंश्रुतौनृप॥तत्रसावीक्ष्यदेवेशंगोपवेषधरंप्रभुं॥२९॥तंदृष्ट्वामोहमापन्नाकामेनखलुखीकृ
ता॥केशवोपिचतांदृष्ट्वासंकर्षणमुवाचह॥३०॥स्त्रीरत्नमतिकल्याणीहन्म्येतिमतिर्मम॥केशवस्यव
चःश्रुत्वाबलदेवोब्रवीदिदं॥३१॥एवंभवतुवैतुभ्यंरोचतेरत्नसंग्रहः॥कृष्णकृष्णमहाबाहोस्त्रीरत्नंत्वाश्रु
गृह्यतां॥३२॥अहंहितवमार्गेणसमागच्छामिपृष्ठतः॥दानवान्मानवांत्सर्वान्शास्त्रयुद्धेनरोधयन्॥३३॥संक
र्षणमतंज्ञात्वाकेशवःकेशिसूदनः॥ययौकन्यांगृहीत्वातुरथमारोप्यसत्वरः॥३४॥निर्गतःपुरमार्गेणप्रस्य
तामेवधीरधीः॥पक्षिध्वजोरथोयातिवेगेनैवानिलोयथा॥३५॥हाहारावस्ततोजातस्तस्मिन्वैकुंडिनेपुरे॥

रे०खं० निर्गताश्चैव राजानो दानवा ह्याहिये भुवि॥ ३६॥ मिलितास्तत्र ये केपि क्रिथ पालपुरःसराः॥ निर्गताः सर्वतः कुध्या
उद्वेलाइव चार्णवाः॥ ३७॥ गर्जमाना महानादं द्वंद्वीवं तौ रथवर्त्मनि॥ बलभद्रं ततः प्राप्ता रथमार्गानुगामिने॥ ३८॥ ते
षांयुद्धं महाघोरमभूल्लोकक्षयंकरं॥ तारकामयमित्येतत्त्रिषु लोकेषु विश्रुतं॥ ३९॥ गदाहस्तो महाबाहुस्त्रैलो
क्याप्रतिमो बली॥ हलेनाकृष्य समरे गदयाभि जिघांसति॥ ४०॥ नशक्ता दानवा हंतुं बलभद्रं महाबलं॥ व
भंजनान्नृपान्संख्ये तस्थौ गिरिरिवाचलः॥ ४१॥ तं दृष्ट्वातिबलं क्रूरं दुर्धर्षं त्रिदशैरपि॥ भीष्मकस्य सुतः कु
द्धो रुक्मीनाम महायशाः॥ ४२॥ नराणामतिशूराणां मक्षौहिण्या समन्वितः॥ बलभद्रमतिक्रम्य त्यक्त्वा युद्धं नि
रामिषं॥ ४३॥ तं मुद्धं वंचयित्वा तु रथमार्गेण निर्गतः॥ केशवो पि ततो राजन्तां देवीमपहृत्य च॥ ४४॥ विंध्यमुल्लं
घ्य सहसा त्रैलोक्य गुरुरव्ययः॥ नर्मदातटमायातो यत्र सिद्धिः पुरायुगे॥ ४५॥ अजेयो यत्र संजातस्तस्य तीर्थप्र
भावतः॥ जयं च प्राप्तवान्युद्धे हत्वा चैवासुरीं चमूं॥ ४६॥ एतस्मात्कारणात्तात योधिनीपुरमुच्यते॥ रुक्मोपि त
त्पुत्रो वै प्राप्तस्तत्स्थानमुत्तमं॥ ४७॥ अच्युतं प्राह कुद्धस्तु तिष्ठ तिष्ठेति माधव॥ अद्य त्वां निशितैर्बाणैः प्रेषया
मि यमक्षयं॥ ४८॥ एवं परस्परं तौ हि प्रजगर्जतु राहवे॥ चिक्षेप शरजालानि केशवं प्रतिरुक्मकः॥ ४९॥ तानि चिच्छे
द बाणांस्तस्य केशवः केशिसूदनः॥ शरं मुमोच रुक्माय मुकुटं तेन चिच्छिदे॥ ५०॥ तयोर्युद्धमभूत्तत्र तारकामय संनि
भं॥ ततो रुक्मेन कुद्धेन गृहीत्वा धनुरुत्तमं॥ ५१॥ सायकेन सुतीक्ष्णेन भिन्नः कृष्णोपि वक्षसि॥ ततो विष्णुः स्वयं
क्रुद्धः श्चक्रं गृह्य सुदर्शनं॥ ५२॥ प्रहरिष्यत्यमुं यावत्तु रुक्मिण्याभिषूलः करे॥ नहि जानात्ययं देव वत्तु वांछं ज 232
नार्दनं॥ ५३॥ दर्शयस्व स्वकं रूपं दयां कृत्वा ममोपरि॥ एवमुक्तस्तु रुक्मिण्या दर्शयामास भारत॥ ५४॥ देवापि दृ
ष्ट्वा यद्रूपं स्तुवंत्याकाशसंस्थिताः॥ दिव्यचक्षुस्तदा देवो ददौ रुक्मस्य भारत॥ रुक्म उवाच॥ यन्मया मंदभाग्येन
पापयुक्तेन केशव॥ सायकैराहतो त्यर्थं तत्सर्वं क्षंतुमर्हसि॥ ५६॥ पूर्वं दत्ता स्वयं देवै जानकी जनकात्मजा॥ म

यापि दत्ता देवेशानथैयं रुक्मिणी विभो॥ ५७॥ अहो भाग्यं परं मेघ यद्दिष्टुर्दैत्य थं कथः॥ ते धन्याः सुकृतात्मानो ये त्वां ज्ञात्वा
र्चयंति हि॥ ५८॥ शाठ्येनापि सुरश्रेष्ठ दंभलोभादिनापि वा॥ धन्येयं भगिनी मन्ये पुरवंशः कुलं हरे॥ ५९॥ लोकाश्च लोक
पालाश्च पिता माता च पूजिता॥ विचरस्य च तीर्णः स्त्वं वंशो येषां जनार्दनः॥ ६०॥ धन्यं मम पि सकलं मेनस्यूर्वोदितं तथा॥
धन्याहं मे स्वसा धन्या विरोध श्चत्वया सह॥ ६१॥ मत्तसमो नास्ति लोके स्मिन्यतस्त्वं मे स्वसापतिः॥ उद्वाह यथा न्या
यं विधिदृष्टेन कर्मणा॥ ६२॥ इत्युक्त्वा तु रथाद्वीघ्रमवरुह्याथ रुक्मकः॥ दंडवत्प्रणतो भूमौ धन्योहं मिति ब्रुवन्॥
॥ ६३॥ रुक्मस्य वचनं श्रुत्वा नंदनस्तु राजगद्गुरुः॥ अब्रवीद्देवदेवेशो रुक्मं नृपतिपुत्रकं॥ ६४॥ श्रीकृष्ण उ०॥ गच्छ त्वं भीष्म
कपुरं कुरु राज्यमकंटकं॥ सर्वं वद यथा दृष्टं पुरतस्ते पितुर्गतः॥ ६५॥ स्मरेथाः कार्ययोगेमां संकटे न विना शुभं॥ मार्क०॥
केशवस्य वचः श्रुत्वा स रुक्मी राजपुत्रकः॥ ६६ तं प्रणम्य जगन्नाथं तथेत्याह कृतांजलिः॥ पद्मपत्रपलाशेनाभीक्षेन
पितवेनिरं॥ ६७॥ प्रस्थापितः पुरं प्राप्य सजगाम सुरायुतः॥ गते रुक्मे तदा रुक्मेसमामं च्यहि ज्ञानमान॥ ६८॥
मर्षीन्मिमंत्र्यांगिरसं पुलस्त्यं पुलहं क्रतुं॥ वसिष्ठं च महाप्राज्ञमित्येते सप्त मानसाः॥ ६९॥ सप्त ब्रह्मसुताः पार्थ ब्रह्माण
इति निश्चिताः॥ पुराणे ब्रह्मसंभूताः सत्यवंतो महामते॥ ७०॥ नर्मदातीरमायाताः स्मृताः कृष्णेन धीमता॥ तपःस्वा
ध्याय निरता जपहोमपरायणाः॥ ७१॥ निमंत्रितास्तु राजेंद्र केशवेन तदा नघाः॥ आगत्य कृष्णस्तु यथान्यायं ब्रह्मलोक
विधिनानलः॥ ७२॥ स्वयं संपूजयित्वा तान सप्त ब्रह्मर्षिपुंगवान्॥ प्रददौ द्वादश ग्रामा स्तेभ्यस्तत्र जनार्दनः॥ ७३॥
उक्तं देवेन यन्नदाद त्याशानं युधिष्ठिर॥ यावच्चंद्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी॥ ७४॥ तावद्दानमिदं युष्माकं परिपंथीन
कश्चन॥ ममदत्तं पालयंतो राजानो गतकल्मषाः॥ ७५॥ तेषामहं स्वस्तियुक्तो दास्यामि परमां गतिं॥ यावद्धीयंति भ
तानि महांत्यपितृपं च वा॥ ७६॥ तावंति दिवि मोदंते ममदत्तस्य पालकाः॥ यश्च लोपयते मूढो राजा वान्यो महीतले।
॥ ७७॥ स वसेन्नरके घोरे यावदाभूत संप्लवं॥ स्वदत्तां परदत्तां वा यो हरेत वसुंधरां॥ ७८॥ षष्टिवर्षसहस्राणि विष्टा

4567/2008

रे०खं० यांऽकृमिर्भवेत्॥ स्वदत्तां परदत्तां वा पालनीया वसुंधरा॥ ७९॥ यस्य यस्य यदा भूमी तस्य तस्य तदा फलं॥ अन्यायेन हृता भूमी
अन्यायेन च हारिता॥ ८०॥ हरन्वा हारयन्वापि विशीर्यां जायते कृमिः॥ षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः॥ ८१॥
आछेत्ता चानुमंता च तान्येव नरके वसेत्॥ यानीह दत्तानि पुरा नरेंद्रैर्दत्तानि धर्मार्थयशस्कराणि॥ ८२॥ निर्माल्य पु
ष्पप्रतिमानि तानि को नाम साधुः पुनराददीत॥ एवं तान्पूजयित्वा स सम्यग्न्यायेन वाडवान्॥ ८३॥ रुक्मिण्याः केशवः
पाणिं जग्राह विधिवत्प्रभुः॥ रेवातीरे तदा तत्र मुनीनां संनिधौ नृप॥ ८४॥ बलदेवोपि जित्वा तान सुरांश्चानपास्त
दा॥ तत स्थानमासाद्य कृत्वा कार्यं सुशोभनं॥ ८५॥ ततस्तौ द्वारकां यातौ कृष्णसंकर्षणावुभौ॥ गच्छमानं च तं दृष्ट्वा केशवं
क्रुशानानां॥ ८६॥ ते विप्राः सत्यवंतश्च निर्गताः शंसितव्रताः॥ आगच्छमानां तां दृष्ट्वा रथमार्गेण वाडवान्॥ ८७॥ मुहूर्त
मथ विश्रम्य केशवो वाक्यमब्रवीत्॥ किमर्मार्गेण गच्छाम कुमुद्वतेन वा द्विजाः॥ ८८॥ पूजितास्तु यथान्यायं ममदत्ते
षु तिष्ठथ॥ देवस्य वचनं श्रुत्वा ऋषयो वाक्यमब्रुवन्॥ ८९॥ कल्पकोटिसहस्रेषु सप्तशीलादिनार्थिलः॥ दुःप्राप्यो
सि मनुष्याणां प्राप्तनस्त्यजसे हरे॥ ९०॥ कथमद्य महाविष्णो कृप्राप्यस्त्वं पुनर्हिनः॥ ब्राह्मणानां वचः श्रुत्वा विष्णु
र्वचनमब्रवीत्॥ ९१॥ श्रीकृष्ण उ०॥ मथुरायां द्वारवत्यां योधी[illegible]पुनी रेव च॥ त्रिकालमेषु स्थास्यामि सत्यं सत्यं
मयोदितं॥ ९२॥ अत्रैवाहं सदा ध्येयो भवद्भिर्द्विजसंमताः॥ यत्र मे रुक्मिणी भार्या विधिनोद्वाहिता भवत्॥ ९३॥
स्थानमेतत्प्रियं मह्यं प्रिया मास्ति करं द्विजाः॥ वस्या ज्यमेतत्त्वी मया कल्पावपि कदाचन॥ ९४॥ रेवातीरं प्रियाप्राप्ति
भवं तांच समागमं॥ एतदेवातुलं तीर्थं तुला चास्य न विद्यते॥ ९५॥ मार्कं०॥ एवमुक्तास्ततो विप्रा योधिनीपुरमा २३३
गताः॥ स्थितो देवस्त्रिभागेन प्रादुर्भावे तु माथुरे॥ ९६॥ एवं ते कथितं सर्वं तीर्थस्योत्पत्तिकारणं॥ भूतं भव्यं च वि
श्रुदं वमानं तथापरं॥ ९७॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः॥ तत्र तीर्थे तु यः स्नात्वा पूजयेद्बलकेशवौ॥ ९८॥
तेन देवो जगद्धाता पूजितस्त्रिगुणात्मवान्॥ उपोष्य यो नरो भक्त्या स्वयं कुर्यात्प्रदक्षिणं॥ ९९॥ मुच्यते सर्वपापे

भ्यो नात्र कार्या विचारणा॥ यावत्तात्र तीर्थे तु वृक्षान्स्पर्शयंति मानवाः॥ १००॥ तावत्पापैः प्रमुच्यंते भ्रूणहत्यासमैरपि॥ प्रात
रुत्थाय ये केचित्पश्यंति बलकेशवौ॥ १०१॥ ते तेन सदृशाः सर्वे देवदेवेन चक्रिणा॥ ते पूज्यास्ते नमस्कार्यास्तेषां जन्म सु
जीवितं॥ १०२॥ येन मंत्रि जगन्नाथं देवं नारायणं हरिं॥ तत्र तीर्थे तु यद्दानं स्नानं श्राद्धं सुरार्चनं॥ १०३॥ तत्सर्वमक्षयं
तस्य यथा मे शंकरोब्रवीत्॥ प्रविश्याग्नौ मृतानां च जायत्फलं जायते नृप॥ १०४॥ तच्छृणुष्व समासेन प्रोच्यमानं यथा
मया॥ विमाने नार्कवर्णेन किंकिणीजालशोभिना॥ १०५॥ आग्नेयभुवने नूनं मोदते कालमीप्सितं॥ तथा जले मृतानां
च यो धन्यां नृपसत्तमा॥ १०६॥ वासस्याद्वारुणे लोके यावदाभूतसंप्लवं॥ अनाशके मृतानां च तस्मिं तीर्थे युधिष्ठिर॥ १०७॥
सत्यमेतं मया प्रोक्तं गतिः स्यादनिवर्तिका॥ तत्र तीर्थे तु यो दद्यात्कपिलादानमुत्तमं॥ १०८॥ विधानेन तु संयुक्तं
शृणु तस्यापि यत्फलं॥ यावंति तस्या रोमाणि तत्प्रसूतेश्च भारत॥ १०९॥ तावंति दिवि मोदंते सर्वकामैः सुपूजिताः॥
तत्र तीर्थे तु यो दद्यादुपानद्वस्त्रमेव च॥ ११०॥ धान्यानि कंबलं श्वेतं गां च पार्थ पयस्विनीं॥ पूर्वोक्तां गुणसंयुक्तां कपि
लां वान्यवर्णजां॥ १११॥ तस्य तीर्थप्रभावेन लभते स्वर्गमीप्सितं॥ प्रयागे यद्भवेत्पुण्यं गंगायां च त्रिपुष्करे॥ ११२॥ कुरु
क्षेत्रे च राजेंद्र राहुग्रस्ते दिवाकरे॥ प्रभासे चापि यत्पुण्यं सोमपर्वणि भारत॥ तत्पुण्यं स्नानमात्रेण तत्र तीर्थे न संशयः॥
११३॥ द्वादश्यां तु नरः स्नात्वा नमस्कृत्य जनार्दनं॥ शक्त्या विप्रान्भोजयित्वा आवाप्तं जन्मतः फलं॥ ११४॥ संक्रांतो
च व्यतीपाते द्वादश्यामयने द्वये॥ अष्टम्यां च चतुर्दश्यां पूर्णमास्यां च वैधृते॥ ११५॥ ब्राह्मणं भोजयित्वैकं कोटिर्भवति
भोजिता॥ पृथिव्यां यानि तीर्थानि समुद्रांतानि भारत॥ ११६॥ आगच्छंति सहस्राणि द्वादश्यां तानि भारत॥ न क्षीयंते
च दानानि यज्ञहोमबलिक्रियाः॥ यद्भूतं यद्भविष्यं च तीर्थमाहात्म्यमुत्तमं॥ ११७॥ कथितं ते मया सर्वं पृथग्भावे
न भारत॥ ११८॥ इति श्री वायवीये शिवरहस्ये श्रीनर्मदामहात्म्ये रुक्मिणीतीर्थं एवं योधिनीपुरे पंचतीर्थं॥ मार्कं०॥
अमाहकं सतो गच्छेत्पितृतीर्थमनुत्तमं॥ प्रेतत्वान्मुच्यते यत्र पिंडेनैकेन पूर्वजः॥ १॥ युधिष्ठिर उवाच॥ अमाहकस्य

H69
2008

२०खं० माहात्म्यंकथयस्वममानघ॥स्नानदानार्चनेपुण्यंतथापिंडोदकेनयत्॥मार्कं०॥२॥पुराकल्पेनरश्रेष्ठपितृदेवर्षिसंग
मे॥प्रश्नोयंपृछितस्तातयथात्वमनुपृछसि॥३॥तमर्थंतेप्रवक्ष्यामिशृणुष्वैकेनभारत॥सतीर्थाःसागराःसप्तप्रयागंपु
ष्करंगया॥४॥सर्वतीर्थानिसंत्यत्रनात्रकार्याविचारणा॥सोमनाथंतुविख्यातंसोमराज्ञाप्रतिष्ठितं॥५॥सोमग्रहेत्रय
त्पुण्यंतत्पुण्यंलभतेन्नरः॥मासांतेचमहाबाहोध्यायंतिहात्मसंततिं॥६॥कश्चिदस्मत्कुलेपिंडंदास्यतीतिपितामह
हाः॥पितामहानिरीक्ष्यंतेश्रुतिरेवासनातनी॥७॥एवंब्रुवंतितेदेवाऋषयश्चतपोधना॥सकृत्पिंडोदकेनेवश्रृणुपां
डवयत्फलं॥८॥द्वादश्याःस्नानिराजेंद्रायागंकृत्वासुशोभनं॥अग्राहकेमहाराजपूर्वंपूजास्तुयुगेयुगे॥९॥सर्वदाक्षय
लोकंतेआगछंतंस्वगोत्रजं॥भवेद्यदिमहाराजअमावास्याअमाहके॥१०॥कुर्वंतेस्नानदानादिपितृश्राद्धंचतर्पणं॥
तेसर्वेपापनिर्मुक्ताःसर्वान्कामांल्लभंतिहि॥११॥जलमध्येमहाराजवन्हितीर्थंप्रतिष्ठति॥दर्शनात्तस्यतीर्थस्यनश्य
तेपापसंचयः॥१२॥स्नानमात्रेणतत्रैवब्रह्महत्यांव्यपोहति॥शुक्लांबरधरोनित्यंसंयतात्माजितेंद्रियः॥१३॥
एकभुक्निवसेत्तत्रमासंतीर्थस्यसंनिधौ॥सुवर्णालंकृतांदत्वाकन्यांस्नातफलंलभेत्॥१४॥पृथिव्यामासमुद्रायांम
हाभोगपतिर्भवेत्॥धनधान्यसमायुक्तोदातायज्वाचधार्मिकः॥१५॥उपास्यचशुचिःसंध्यांब्रह्मलोकमवाप्नुयात्॥
अमाहकेमहाराजयस्तुप्राणान्परित्यजेत्॥१६॥षष्टिवर्षसहस्राणिरुद्रलोकेमहीयते॥ततःस्वर्गात्परिभ्रष्टःक्षीणे
पुण्येनृपोभवेत्॥१७॥सुवर्णमणिमुक्ताढ्येकुलेमहतिरूपवान्॥गजाश्वरथसंपन्नश्चिरमायुरवाप्नुयात्॥१८॥
स्नानंकृत्वाचयस्तत्ररुद्राध्यायंपठेद्द्विजः॥सस्कंदोवारूपंपार्थशिवसंकल्पसंयुतं॥१९॥गायत्रीजाप्यमंतवायदि
वापितृसंहितां॥अंतर्जलेवादुपदांसोश्वमेधफलंलभेत्॥२०॥धनाढ्योरूपवांदक्षोदाताभवतिधार्मिकः॥चतु २३४
र्वेदेषुयत्पुण्यंसत्यवादिषुयत्फलं॥२१॥तत्फलंलभतेराजन्तस्मिंतीर्थेनसंशयः॥तीर्थानांपरमंतीर्थंनिर्मि
तंशंभुनापुरा॥२२॥जपेत्तत्रैववरंविष्णुमेकचितेनयोनृप॥विश्वेदेवाश्चपितरःसचंद्रामदिवाकराः॥२३॥म

रीचिर्यांगिरसौपुलस्त्यःपुलहःक्रतुः॥प्रचेताश्चवसिष्ठश्चभृगुर्गौतमनारदौ॥२४॥च्यवनोगालवश्चैववामदेवोमहा 471 / 2008
नृषिः॥वालखिल्याःसर्गपर्वीतृणबिंदुश्चजाजलिः॥२५॥उद्दालकःसुनंदश्चऋष्यशृंगोथदेवलः॥शुक्रश्चैवभरद्वा
जोवात्स्योवात्स्यायनस्तथा॥२६॥मित्रावरुणजोगस्त्योविश्वामित्रोमहानृषिः॥सनातनश्चकपिलोवोढुपंचशि
खस्तथा॥२७॥अन्येचबहवस्तत्रऋषयःशंसितव्रताः॥क्रीडंतिदेवताःसिद्धामुनयश्चतपोधनाः॥२८॥मनुष्या
योगिनस्तद्वत्पितरश्चपितामहाः॥अमाहकेनरश्रेष्ठसर्वेतिष्ठंतिसुव्रताः॥२९॥पितरःपितामहाश्चैवतथैवप्र
पितामहाः॥येषांकृतमुपस्थायिसुकृतंवापिदुःकृतं॥३०॥अक्षयंतत्रतत्सर्वंयत्वामाहकेकृतं॥मातरंपित
रंत्यक्त्वासुहृद्बंधुजनंतथा॥३१॥धनधान्यंप्रियंपुत्रान्तथादेहंनृपोत्तम॥प्रयातिवात्नुभूतस्तुशुभाशुभस
मन्विताः॥३२॥अदृश्यःसर्वभूतानांजीवःकर्माभिकर्षितः॥शुभाशुभगतिंप्राप्तःकर्मणास्वेनपार्थिव॥३३॥
शुभाशुभेवंभुजनोजायतेनैवभाग्यभाक्॥एकःप्रसूयतेजंतुःएकएवप्रलीयते॥३४॥एकोनुभुंक्तेसुकृतमे
कएवचदुःकृतं॥एषत्वयोक्तेनृपतेमहाप्रश्नःश्रुतोमया॥३५॥पितामहमुखाद्गीतंश्रुतंतेकथयाम्यहं॥यन्मां
पितामहःपूर्वमुवाचऋषिसंनिधौ॥३६॥नचात्मनःपिताकश्चिन्नबंधुर्नसुहृत्क्वचित्॥कोजंतुःकोभवस्त्राणीको
जीवःपंचभौतिकः॥३७॥कोप्यत्रजायतेवायुःपंचभूताभिवेष्टितः॥यद्येवंहेतुवादस्याल्लोकस्यास्यनरेश्वर॥३८॥
अमर्यादाभवेन्नूनंविनश्यतिचराचरं॥एवंज्ञात्वामहीपालसमस्तेर्लोकपूर्वजैः॥मर्यादास्थापितालोकेयथा
धर्मोननश्यति॥धर्मेनष्टेमनुष्याणामधर्माभिभवेत्पुनः॥४०॥ततःस्वधर्मचलनान्नरकेपतनंध्रुवं॥लोकोनि
रंकुशःसर्वोमर्यादालंघनेरतः॥४१॥मर्यादास्थापितातस्माच्छास्त्रंवीक्ष्यमहर्षिभिः॥स्नानंदानंजपोहोमःस्वा
ध्यायोदेवतार्चनं॥४२॥पिंडोदकप्रदानंचतथैवतिथिपूजनं॥पितरःपितामहायस्यतथैवप्रपितामहाः॥४३॥
त्रयोदेवाःस्मृतातातब्रह्मविष्णुमहेश्वराः॥पूजितैःपूजिताःसर्वेतथामातामहास्त्रयः॥४४॥तस्मात्सर्वप्रय

२०२वं

ज्ञेन श्रुतिस्मृतिपुराणजं॥ धर्मं समाचरेन्नित्यमेवं पापैर्न लिप्यते॥ ७५॥ श्रुतिस्मृत्युदितं धर्मं मनसापि न लंघयेत्॥
इह लोके परे चैव यदि छेद्धु यआत्मनः॥ ७६॥ पितापित्रोर्यथाप्येको विबाद्धिं बपिबोत्पलौ॥ विभक्ताय विभक्तो वा श्रु
तिस्मृत्यर्थतत्स्तथा॥ ७७॥ उद्धरेदात्मनात्मानं नात्मानमवसादयेत्॥ पिंडोदकप्रदानाद्धि कृते पार्थ न संशयः॥ ७८॥
एवं ज्ञात्वा प्रयत्नेन पिंडोदकप्रदो भव॥ आयुः कीर्तिर्यशस्तेजः संततिश्चैव जायते॥ ७९॥ पृथिव्यां सागरांता
यां पितृक्षेत्राणि यानि च॥ तानि ते संप्रवक्ष्यामि येषु दत्तं महाफलं॥ ८०॥ गयायां पुष्करे चैव नैमिषे चक्रसंभवे॥
संनिहत्यां कुरुक्षेत्रे प्रभासे च युधिष्ठिर॥ ८१॥ पिंडोदकप्रदानेन यत्फलं कथितं बुधैः॥ अमाहके तदाप्नोति नर्म
दायां न संशयः॥ ८२॥ तत्र ब्रह्मा च विष्णुश्च रुद्रश्चैवोमया सह॥ इंद्राद्या देवताः सर्वा ऋषयः पितरस्तथा॥ ८३॥ सा
गराः सरिताश्चैव पर्वताश्च बलाहकाः॥ तिष्ठंति पितृभिः सार्धमधिकं तेन तं नृप॥ ८४॥ स्थिता ब्रह्मशिला तत्र
गजकुंभनिभा शुभा॥ कल्लोलतृप्यते तात्र प्रधानं यद्ध्याशिरः॥ ८५॥ वैशाखमासि संप्राप्ते अमावास्या नृपो
त्तम॥ व्याप्य सा तिष्ठते तीर्थं गजकुंभनिभा शिला॥ ८६॥ तत्र गव्यूतिमात्रं हि तीर्थं तात प्रचक्ष्यते॥ तस्मिं दिने
तत्र गत्वा यस्तु श्राद्धप्रदो भवेत्॥ ८७॥ पितॄणां जायते तृप्तिरक्षया शारवार्षिकी॥ एतस्यामप्य मायां वा नत्रस्ना
त्वा जितेंद्रियः॥ ८८॥ यः कुर्याद्विधिना श्राद्धं तस्य पुण्यफलं शृणु॥ अग्निष्टोमाश्वमेधाभ्यां वाजपेयस्य यत्फ
लं॥ ८९॥ तत्फलं समवाप्नोति नात्र कार्या विचारणा॥ रौरवादिषु सर्वेषु नरकेषु च ये स्थिताः॥ ९०॥ पितरः पिता
महा गोत्रे मातृके पितृके तथा॥ पिंडदानेन चैकेन तर्पणेन विशेषतः॥ ९१॥ क्रीडंति पितृलोकस्था यावदाभू
तसंप्लवं॥ सुकर्मस्था विकर्मस्था ये जाताः प्रेतयोनयः॥ ९२॥ पिंडेनैकेन मुच्यंते ते पितत्र न संशयः॥ अमाना
मकला भानोपदा चरतिलां विधुः॥ ९३॥ तदा श्रद्धान्वितैः पार्थ पितॄणां दत्तमक्षयं॥ अमानि वेशिला यस्माद
त्र तीर्थे पुरातनैः॥ ९४॥ पितृभिः कव्यवालाद्यैस्तेन प्रोक्तममाहकं॥ अमागतिरितिख्याता शुद्धलोकप्र

दायिका॥ ९५॥ आहकं प्रोच्यते स्थानं गतेरमरदर्शिनि॥ गतेस्थानं विनिर्दिष्टममाहकमतो नृप॥ ९६॥ अमाहके
शिला दिव्या तिष्ठते गयसंनिभा॥ ब्रह्मणा निर्मिता पार्थ सर्वपापक्षयंकरी॥ ९७॥ तस्योपरि यथान्यायं पितॄनु
द्दिश्य भारत॥ दक्षिणाग्रेषु दर्भेषु पिंडं दद्याद्विचक्षणैः॥ ९८॥ भूमौ यत्नेन विधिना भास्वरः शुचिरादृतः॥ ब्रा
ह्मणेभ्यो वस्त्रयुग्मानि छत्रोपानद्युगानि च॥ ९९॥ दक्षिणाविधिवद्देवा पितॄन्नुद्दिश्य भक्तितः॥ यो ददाति द्वि
जः श्रेष्ठ दातुः पुण्यफलं शृणु॥ १००॥ तस्य ते शतमब्दानि तृप्तिं यांति न संशयः॥ अमाहके सदा राजन् पितरश्च
पितामहाः॥ १०१॥ वायुभूता निरीक्ष्यंते आगच्छंतं स्वगोत्रजं॥ अस्मिं तीर्थे सुतोऽस्माकं स्नात्वा तोयं प्रदास्यति॥ १०२॥
श्राद्धं वा पिंडमेकं वा तेन यास्याम सद्गतिं॥ स्नाने कृते तु ये केचित् जायते वस्त्रबिंदवः॥ १०३॥ प्रीणयेन्नरकस्थांस्तु
तैः पितॄन्नात्र संशयः॥ केशोदकेन स्नातस्य ये त्वन्ये लोपभाजिनः॥ १०४॥ तृप्यंत्यकृतसंस्कारा ये मृता गोत्रिणः कु
ले॥ तस्मिं तीर्थे तु ये केचिच्छ्राद्धं कुरु युर्विधानतः॥ १०५॥ नरकादुद्धरंत्याशु जपन्वै पितृसंहितां॥ वनस्पतिगते
सोमे यथा सोमदिनं भवेत्॥ १०६॥ अक्षयां लभते लोकान्पिंडेनैकेन वै तदा॥ अक्षयं तत्र वै सर्वं जायते भरतर्षभ॥
॥ १०७॥ नीलं सर्वांगसंपूर्णं यो भिषिच्य समुत्सृजेत्॥ तस्य पुण्यफलं वक्तुं यदि वाचस्पतिः क्षमः॥ १०८॥ अमाहके वृ
षोत्सर्गो यस्तु पुण्यं समवाप्यते॥ तवशुश्रूषतः सर्वं कथयिष्यामि भारत॥ रौरवादिषु ये केचित्पच्यंते तस्य पूर्वजाः॥
वृषोत्सर्गेण तांस्तत्सर्वांस्तारयेदेकविंशतिः॥ ११०॥ लोहितो यस्तु वर्णेन मुखे पुच्छे च पांडुरः॥ पिंगः खुरविषाणाभ्यां
स नीलो वृष उच्यते॥ १११॥ यस्तु सर्वांगपिंगस्तु श्वेतः पुच्छखुरेषु च॥ स पिंगो वृषरस्त्याद्भूः पितॄणां प्रीतिवर्धनः॥
११२॥ पारावतः सुवर्णश्च ललाटे तिलकान्वितं॥ तं वृषं वभ्रुमित्याद्भुः पूर्णं सर्वांगशोभनं॥ ११३॥ सर्वांगैकवर्ण
कः पिंगः पुच्छः खुरेषु च॥ खुरपिंगं तमित्याद्भुः पितॄणां प्रीतिवर्धनं॥ ११४॥ नीलं सर्वशरीरेण आरक्तं नयने
द्वयं॥ तमेव नीलमित्याद्भुः नीरः पंचविधः स्मृतः॥ ११५॥ यस्तु वै स्वगृहे जातः स वै नीलो विशिष्यते॥ न वाहये द्गृहे

473
2008

रे॰खं॰ आतंचकं तु कदाचन॥९६॥तेनैव चब्रह्मा सर्गात्पितॄणामनृणो भवेत॥आतंतु स्वगृहे वत्सं द्विजन्मा यस्तु वाहयेत॥९७॥
पतंति पितरस्तस्य यदि चेद्ब्रह्मणि स्थिताः॥यथा यथा हि पिबति पीत्वा धुवति मस्तकं॥९८॥पिबन्ति पितॄन्प्रीणयति न
रकादुद्धरेत्पुनः॥यथा पुच्छाभिघातेन ऊर्ध्वं गच्छंति बिंदवः॥९९॥नरकादुत्थरं त्याशु पतितान्गोत्रिणस्तथा॥गर्ज
न्प्रावृषिकाले तु विषाणाभ्यां लिखन्भुवं॥९०॥खुरेभ्यो याम्रदुद्भूतान यासंप्रीणयेद्वृषीन॥विवन्पितॄन्प्रीणयति खा
दन्नोल्लेखने सुरान॥९१॥गर्जन्नृषीन्मनुष्यांश्च धर्मरूपो हि धर्मजः॥भूलेवा पिपिशाचैर्वा वातुर्थादि ज्वरेणवा॥
॥९२॥गृहीतो माहकं गच्छे सर्वेषां आतिनीश्चनं॥स्नातोत्र विमले तोये दर्भकंठी निवंधयेत॥९३॥मस्तके प्यथ बाहु
भ्यां नाभ्यां वाथ गले पिवा॥गत्वारे वा समीपे तु प्रादक्षिण्यजनार्दनं॥९४॥ततो मंत्रं समुच्चार्य गायत्रीमथ वेल्लवीं॥
नारायणमरण्यं सर्वदेवनमस्कृतं॥९५॥नमो यज्ञांग संभूत सर्वव्यापिं नमोस्तु ते॥विष्णुमंत्रः॥नमो नमस्ते
देवेशाप पद्मगर्भ सनातन॥९६॥दामोदर जयानंद रक्ष मां शरणागतं॥त्वं कर्ता त्वं तथा हर्ता गत्यस्मिं श्च राचरे॥९७॥त्वं
पालयसि भूतानि भुवनं त्वं बिभर्षि च॥प्रसीद देव देवेश व्याधिग्रस्तं विमोचय॥९८॥त्वध्याननिरतं मां हि त्वद्भक्ति
निरतं हरे॥स्तुतिप्रार्थनामंत्रः॥इति स्तुतो मया देव प्रसादं कुरु मेच्युत॥९९॥रक्ष रक्ष च भूतानि त्राहि मां शरणागतं॥
एवं स्तुत्वा तु देवेशं दानवांतकरं हरिं॥१००॥पुनरुक्तेन वैस्नात्वा ततो विप्रांश्च भोजयेत॥वेदोक्तेन विधानेन श्राद्धं
कृत्वा यथाविधि॥पिंडनिर्वपणं कृत्वा वाचयेत्स्वस्तिवाचकान॥संतोषयित्वा तान्प्रार्थ्य ततो विप्रान्विसर्जयेत॥१०२॥
तथैवोद्धरितं चान्नं द्विश्वेभ्यो विनिवेदयेत॥तत्र तीर्थे तु यः स्नात्वा पुमांश्चैवांगनाथवा॥१०३॥भक्तितो दक्षिणां २३६
दत्वा श्राद्धं कृत्वा यथाविधि॥ददाति तत्र यो भक्त्या पितॄणां तु तिलोदकं॥१०४॥तावत्पुष्कर पात्रेषु पिबंति पित
रोंजलिं॥तत्र तीर्थे नरो यस्तु स्नापयेन्मधुसूदनं॥१०५॥घृतमध्वाज्यक्षीरेण दध्ना वा तीर्थवारिणा॥युगादौ
विषुवे चैव अयने सूर्य संक्रमे॥१०६॥पूर्ण्यैः संपूज्य येद्देवं नैवेद्यं च निवेदयेत॥सोश्वमेधस्य यज्ञस्य फलं प्रा

प्नोति पुष्कलं॥१०७॥तत्र तीर्थे नरः स्नात्वा सूर्य पर्वणि तिष्ठति॥सूर्य तेजोनिभैर्यानैर्विष्णुलोके महीयते॥१०८॥तत्र तीर्थे न
रः श्राद्धं यो ददाति स बुद्धिमान॥स तु त्रेणातु तेनैव संप्राप्तं जन्मतः फलं॥१०९॥मार्कं॰॥एवं श्रुत्वा तु ते देवा ब्रह्मविष्णुमु
खास्ततः॥चंद्रेंद्ररुद्र प्रमुखैः स्थापितो जगदीश्वरः॥११०॥सर्वरोगप्रशमनो महापातकनाशनः॥यस्तु संवत्सरं पूर्णं
अमावास्या सु भाविनः॥१११॥पितृभ्यः पिंडदानं च कुर्याद् माहके नृप॥त्रिपुष्करे गयायां च प्रभोसनैमिषवरे॥११२॥य
त्पुण्यं श्राद्धकर्तॄणां तदिहैव लभेध्रुवं॥तिलोदकं कुशैर्मिश्रं पितृभ्यो दक्षिणामुखः॥११३॥मन्वादौ च युगादौ च व्यती
पाते दिनक्षये॥यो दद्याद श्वमेधस्य फलं प्राप्नोति स ध्रुवं॥११४॥अमाहके नरो यस्तु स्नात्वा संपूजयेत्स्थरिं॥ब्रह्माण्
शंकरं सूर्यं यश्च आगगार्ति विनिशां॥११५॥स सर्वपापनिर्मुक्तः शक्रातिथ्यमवाप्नुयात॥एका मूर्तिस्त्रयो देवा ब्र
ह्मविष्णुमहेश्वराः॥११६॥सत्कार्य करणोपेताः सुसूक्ष्माः सुमहाबलाः॥पूजिते स्मिं स्तु पितरो जगद्वै पूजितं भवेत॥
११७॥एतत्ते कथितं पार्थ किमन्यत्परिपृच्छसि॥११८॥इति श्रीवायुसूक्तसंहितायां श्रीरेवामा॰॥अमाहकतीर्थं॥ मा
र्कं॰॥ततो गच्छेन्महाराज तीर्थं सिद्धेश्वरं परं॥कोशांतरे स्थितं पुण्यं ब्रह्मणा स्थापितं पुरा॥१॥यत्र सिध्येत पस्तप्त्वा
स्थापितः सिद्धिदः शिव॥नर्मदा दक्षिणे कूले सिद्धिः प्राप्ता ततः शुभा॥२॥तत्र तीर्थे तु यः स्नात्वा पूजयेद्वृषभध्वजं॥
सर्वपापविनिर्मुक्तो गतिं यात्यश्वमेधिकां॥३॥तत्र तीर्थे तु यः स्नात्वा श्राद्धं कृत्वा विधानतः॥पितॄन्संप्रीणयेन्नूनं सर्व
तेन कृतं भवेत॥४॥तत्र तीर्थे मृतानां च जंतूनां नृपसत्तम॥गर्भवासस्थितिस्तेषां न भवेत्स्वेकदाचन॥५॥गर्भवासो
हि दुःखाय न सुखाय कदाचन॥तस्मात्सदा चरेद्धर्मं येन नेह संसारिको भवेत॥६॥तस्मिंस्तीर्थे नरः स्नात्वा भोजये
द्यो द्विजोत्तम॥प्रीणितास्तु पितरस्तेन देवाश्च सम महर्षिभिः॥७॥इति सिद्धेश्वरतीर्थं॥मार्कं॰॥कोशांतरे ततो ग
च्छेत्तीर्थं तापेश्वरं नृप॥पुरा देवद्विजा विप्रा यत्राल्प्यन्तपो महत॥शाकं पर्णमनुप्राश्य स्थिरवीरासन स्थितः॥स
हस्रवत्सरं कालं दीप्तमूर्तिः प्रतापयत॥८॥ध्यायन्महेश्वरं देवं सर्वं वत्परितापयन॥ततस्तुष्टो महादेवः प्रत्यक्षः

475/2008

प्राहतं द्विजं॥१०॥ किमिच्छसि महाभाग ब्रूहि यत्तेहृदि स्थितं॥ वेदशिरा॥ शाक्रं पदमनुप्राप्तुं रुद्रत्वमहेश्वर॥११॥ देवरा
ज्यमभीप्सामि यदि देयो वरो मम॥ ईश्वरोवाच॥ नह्येतदुचितं विप्र राज्यं संप्रार्थितुं द्विज॥१२॥ चलमिंद्रत्वमासाद्य
को लाभः स्वस्तिरेवका॥ दुर्लभं किल विप्र त्वं तत्रचाप्युचितं त्वता॥१३॥ तत्रयस्याद्यमाबुद्धिः समरट् इति मे मतिः
॥ तपस्तापितदेवं घेनवरत्नवतो द्विज॥१४॥ चतुर्विधानां मुक्तीनां एकाकाप्यर्थिता वरा॥ मार्कं॰॥ इत्याकर्ण्य त्रि
नाद्विप्रः क्षणं संचिंत्य चेतसि॥१५॥ अयाचत ब्रह्मसामीप्यं यावद्ब्रह्मस्थितिः स्थिरा॥ ईश्वरो॰॥ एवमस्तु द्विजश्रे
ष्ठ प्रार्थितं यत्त्वयाधुना॥१६॥ तपसा तव संतुष्टो ददाम्यन्यदभीप्सितं॥ वेदाश्चैवोपवेदाश्च शास्त्राण्यन्यान्य
पि द्विज॥१७॥ तववक्त्रे हि सर्वाणि भविष्यंत्यक्षयानि वै॥ यतस्तेतपसा तापितं भुवनत्रयं॥१८॥ अतस्ता
पेश्वरो नाम स्थास्येहमिह वै मुने॥ स्थापयस्वामलेपक्षे मामष्टम्यां रवेर्दिने॥१९॥ अष्टाष्टम्यादिने पर्यंते पाते
र्कवासरे॥ संक्रांतौ ग्रहणे भान्वोः पूजयिष्यंति ये नराः॥२०॥ स्नात्वा श्राद्धैः पितॄन्पूज्य भक्तियुक्तेन चेतसा॥ ते
षां वर्षकृतं पापं सकृदभ्यर्च्यनाशयेत॥२१॥ द्वादशाहस्य यत्तस्य फलं प्राप्नोति मानवः॥ अंतेत्रिदिवपुरं याति स
हस्रं परिवत्सरान्॥२२॥ ब्रह्मलोकं ततो गच्छेत्तावद्विष्णुपुरं ततः॥ तर्पयित्वा पितॄन्श्राद्धे कुरुते क्षितिमक्षयां॥
॥२३॥ इत्युक्त्वा भगवानीशस्तत्रैवांतरधीयत॥ सोपि विप्रस्ततः स्नात्वा प्रतिष्ठाप्य महेश्वरं॥२४॥ भक्त्या तापे
श्वरं नाम पूजयित्वा विधानतः॥ जगाम सत्यलोकं स सर्वदेवाभिपूजितः॥२५॥ इति ते कथितं पार्थ तीर्थं तापेश्व
रं परं॥ श्रवणात्कीर्तनादस्य लभेद्यत्तफलं नरः॥२६॥ इति श्रीरेवा॰॥ तापेश्वरतीर्थं मार्कं॰॥ तथा सिद्धेश्वरं ती
र्थं ततः कोशद्वयांतरे॥ यत्र सिद्धिः पुराजाता नाचिकेतस्य भूपतेः॥२७॥ सर्वांगानि तु पुण्यस्य प्राप्तुमिच्छन्
पः पुरा॥ तस्मिन्नेव नर्मदातीरे सिद्धिदं शर्वमीश्वरं॥२८॥ आराध्य तत्प्रसादेन सिद्धिं प्राप्य सुदुर्लभां॥ जपस्तप
स्तीर्थदानव्रतमंत्रादिसाधने॥२९॥ न विघ्नं लब्धवान् राजा पुण्यराशी न वर्धयत॥ सिकताशास्त्यते पार्थ सं

२०२

ख्यातुं नाचिकेतन॥३०॥ तारागणांश्च भैनेसः समुद्राम्भश्च विंदुभिः॥ नशक्यते तु संख्यातुं नाचिकेतकृतं शुभं॥३१॥ एवं सं
प्राप्य सिद्धिं संस्थापयामास शंकरं॥ तस्या सिद्धेश्वरं नाम सर्वेषामेव सिद्धिदं॥३२॥ ततः प्रभृति विख्यातं तीर्थं सि
द्धेश्वरं नृप॥ यत्र सिद्धिमनुप्राप्तो नाचिकेतो नृपोत्तमः॥३३॥ तत्र तीर्थे नरः स्नात्वा श्राद्धं कृत्वा यथाविधि॥ विप्रा
णां भोजनं दत्वा पितॄणां तृप्तिमावहेत॥३४॥ संपूजयित्वा सिद्धेशं पुण्यसिद्धिं लभेन्नरः॥ यथा यथा हि कुरुते
नरः पुण्यमनः सदा॥३५॥ तथा तथा हि देवाश्च पितरो वर्धयंति तं॥३६॥ इति श्रीरेवा॰ मार्कं॰॥ ततो गच्छेत
राजेंद्र वारुणं तीर्थमुत्तमं॥ स्थितं सिद्धेश्वरात्तीर्थात्पार्थ क्रमशतांतरे॥१॥ वरुणो वै तपस्तप्त्वा यत्र पा
शानवाप्नुयात्॥ दुर्निवारानमोघांश्चाप्यभेद्यान्देवदानवैः॥२॥ प्रसंनेशंकरे तद्वत्पुष्करं पुत्रमाप्तवान्॥
स्थापयित्वा महेशानं स्वनाम्ना चाभिपूज्य च॥३॥ शक्तिं चाप्यतुलां प्राप्य स जगाम यथागतं॥ तत्र तीर्थे
नरः स्नात्वा पूजयित्वा महेश्वरं॥४॥ सर्वान्कामानवाप्नोति सर्वपापैर्विमुच्यते॥ भोजयित्वा द्विजान्श
क्त्या दीपं दत्वा च शंकरे॥५॥ सशक्तिमतुलां लब्ध्वा स्वर्गलोके महीयते॥ इति श्री॰ वारुणेश्वरतीर्थं॰॥ मार्कं॰
ततो गच्छेत राजेंद्र तीर्थं चांगारकं परं॥ उत्तरे नर्मदाकूले सर्वपापक्षयंकरं॥१॥ अमारकास्थितं तीर्थं तत्र
शमाचेनराधिप॥ चतुर्थ्यंगारकदिने संकल्प्य कृतनिश्चयः॥२॥ स्नात्वा चास्तं गते सूर्ये संध्योपासनतत्परः॥ यजे
दंगारकं भक्त्या गंधमाल्यानुलेपनैः॥३॥ संस्थाप्य स्थंडिले देवं रक्तचंदनकुंकुमैः॥ अंगारकाय ते तिनमः कर्णिका
यां प्रपूजयेत॥४॥ कुजभूमिसुताय ते तिरक्तांगरक्तवाससे॥ हरकोपोद्भवायेति स्वदयेदीर्घया हवे॥५॥ सर्व
कामप्रदायेति पूर्वादिषु दलेषु च॥ एभिः संपूज्य विधिवद्द्याद्दर्धं समाहितः॥६॥ भूमिपुत्र महातेजः स्वेदो
द्भव पिनाकिनः॥ महाबलग्रहाणार्घ्यं लोहितांग नमोस्तु ते॥७॥ करकं वारिसंपूर्णं शालितंडुलसंयुतं॥ सहि
रण्यं सदानं च मोदकैरुपरिस्थितं॥८॥ निवेदये ब्राह्मणाय कुजो मे प्रीयतामिति॥ अर्घीदस्य स्तपहारैः रक्त

2117
2008

रे॰ खं चंदनचारिणा॥१५॥रक्तपुष्पसमाकीर्णोस्तैलतंदुलमिश्रितः॥कृत्वाताम्रमयेपात्रेमंडुलेवर्तुलेशुभे॥१६॥कृत्वाशिरसि
तत्पात्रंजानुभ्यामवनिंगतः॥मंत्रपूतोमहाराजदेयस्त्वर्घोविचक्षणे॥१७॥ततोभुंजीतमौनेनअतिक्तमाम्लवर्जि
तं॥स्निग्धंसमधुरंचैवभोजनंब्राह्मणैःसह॥१८॥एवंचतुर्थीसंप्राप्तेतथैवांगारकेनृप॥सौवर्णंकारयेद्देवंयथा
शक्त्यास्वरूपिणं॥१९॥स्थापयेत्ताम्रपात्रेषुगुडपीठसमन्विते॥गंधपुष्पादिभिर्देवंपूजयेत्कुडुसंस्थितं॥२०॥इं
द्राण्यांस्थापयेद्देवंगुडतोयसमन्वितं॥कांस्यस्थेनतथाग्नेय्यांस्थापयेत्करकंनवं॥२१॥रक्ततंदुलसंमिश्रंनैर्ऋ
त्यांवायुगोचरे॥स्थापयेन्मोदकैःसार्धंचतुर्थ्यंगारकंबुधः॥२२॥सूत्रेणवेष्टितंग्रीवंगंधमाल्यैरलंकृतं॥शंखतू
र्यनिनादेनजयशब्दादिमंगलैः॥२३॥रक्तांबरधरंविप्रंरक्तगंधानुलेपनं॥विदिमध्यगतंवापिमहदासनसं
स्थितं॥२४॥सुरूपंसुभगंशांतंसर्वभूतहितेरतं॥वेदविद्याव्रतस्नातंसर्वशास्त्रसमन्वितं॥२५॥पूजयित्वाय
थान्यायंवाचयेत्पांडुनंदन॥रक्तांगांचततोदद्याद्वक्रेणानडुहासह॥२६॥अंगारकःप्रीयतांमेसर्वदैवतपूजितः॥
प्रादक्षिण्यंततोविप्रपत्नीपुत्रसमन्वितं॥२७॥मातापितृसुहृत्सार्धंक्षामयित्वाविवर्जयेत्॥पुरातत्रतपस्तेपेम
हदंगारकोनृप॥२८॥दिव्यंपदमनुप्राप्तुंतथातोषयितुंशिवं॥प्रसन्नेनतत्रदेवेनस्थापयामासधूर्जटिं॥२९॥स्व
नाम्नाभरतश्रेष्ठततोदिव्यंपदंगतः॥तत्रतीर्थेनरःस्नात्वापूजयेत्पार्वतीपतिं॥३०॥श्राद्धंकृत्वाविधानेनरवौभौ
मदिनेपिवा॥एवंकृतस्यतस्याथतत्रतीर्थेविशेषतः॥३१॥यत्पुण्यंफलमुद्दिष्टंतन्मेसर्वंवदाम्यहं॥बहुसंवत्सरं
कालंशिवलोकेमहीयते॥३२॥ततोवतीर्णोभूमौसनृपतिर्धार्मिकोधनी॥सप्तजन्मानिराजेंद्रसुरूपःसुभगोभ
वेत्॥३३॥तत्तीर्थस्यप्रभावेननात्रकार्याविचारणा॥अकामोवासकामोवातत्रतीर्थेमृतोनरः॥३४॥अंगारक २३८
पुरंयातिदेवगंधर्वसेवितं॥तत्रावाप्ययथान्यायंदिव्यभोगाननुत्तमान्॥३५॥इहमानुष्यमासाद्यपूर्ववन्नृ
पतिर्भवेत्॥वीर्यवान्रूपसंपन्नःसर्वव्याधिविवर्जितः॥३६॥जीवेद्वर्षशतंसाग्रंसर्वलोकनमस्कृतः॥३७॥

॥इतिश्रीरेवा॰॥अंगारकेश्वरतीर्थं॥मार्कं॰॥ततःक्रोशांतरेपार्थलिंगंवाराहसंज्ञितं॥तीर्थंपरंपार्थहरंवैष्णवंभुवि
विश्रुतं॥१॥दर्शनात्तस्यदेवस्यपापसंघःप्रणश्यति॥वाराहंरूपमास्थायपुराविष्णुःसनातनः॥२॥कृतवान्क
दनंघोरंदानवानांयुधिष्ठिर॥हिरण्याक्षमुखानांतुनर्मदायांव्यवस्थितः॥३॥लिंगगत्यर्थधातोर्वैयोगात्काल
वपुर्हरिः॥तरंगान्विजयंप्रार्थ्यशीघ्रंरेवामुपागतः॥४॥देवर्षिभिःस्तुतःसर्वैर्लिंगवाराहसंज्ञया॥भाषितःपूजि
तोभक्त्याभक्तस्यनामभयप्रदः॥५॥स्नात्वासतपसाशुद्धोवसात्सम्यक्समर्चितः॥सेवितोमुनिसिद्धैश्चचिरंत
त्रैवतस्थिवान्॥६॥तत्रतीर्थेनरःस्नात्वायःपश्येद्देवमच्युतं॥समुच्यतेनरश्रेष्ठमहापापैःपुराकृतैः॥७॥द्वा
दश्यांशुक्लपक्षस्यकृत्वावासमुपोषितः॥गंधमाल्यैर्जगन्नाथंपूजयेद्धर्मनंदन॥८॥ब्राह्मणांश्चमहाभागान्दा
नसन्मानभोजनैः॥पूजयेत्परयाभक्त्यातस्यपुण्यफलंशृणु॥९॥सत्रयाजीफलंयत्तुलभतेद्वादशाब्दकैः॥
ब्राह्मणान्भोजयन्नत्रतद्देवफलमश्नुते॥१०॥तर्पयित्वापितॄन्देवांस्नात्वातत्परमानसः॥जपेद्द्वादशनामानि
देवस्यपुरतस्थितः॥११॥मासिमासिनिराहारोद्वादश्यांकुरुनंदन॥केशवंपूजयेन्नित्यंमासिमार्गशिरे
बुधः॥१२॥पौषेनारायणंदेवंमाघेचमधुसूदनं॥गोविंदंफाल्गुनेमासिविष्णुंचैत्रेकुरूद्वह॥१३॥वैशाखे
मधुहंतारंज्येष्ठमासित्रिविक्रमं॥वामनंचतथाषाढेश्रावणेश्रीधरंविभुं॥१४॥हृषीकेशंभाद्रपदेपद्मनाभं
तथाश्विने॥दामोदरंकार्तिकेचकीर्तयेन्नावसीदति॥१५॥वाचिकंमानसंवापिकर्मजंयत्पुराकृतं॥नश्यते
तेनसंदेहोमासाधिपतिकीर्तनात्॥१६॥स्वपन्विबुध्यन्सततंतउन्मिषन्निमिषन्नपि॥जिघ्रन्पश्यंश्चभुंजा
नएतन्नामंचमयोभवेत्॥१७॥तेनिसास्तेचदिवसास्तेमासास्तेचवत्सराः॥नराणांसफलायेषुचिंतितोभग
वान्हरिः॥१८॥परमापद्गतःस्थापियस्येदेवोजनार्दनः॥नापसर्पतिहृत्पद्मात्सयोगीनात्रसंशयः॥१९॥एतत्ती
र्थंपरंपुण्यंलिंगोयत्रजनार्दनः॥विजिगायरिपुंसंख्येक्रोडरूपःसनातनः॥२०॥उपप्लवेचंद्रमसोरवेश्चय

4079
2008

द्राष्ट्रकायामयनद्वयेच॥पानीयमप्यत्रतिलैर्विमिश्रंदद्यात्पितृभ्यःप्रयतोमनुष्यः॥२१॥इतिश्रीरेवा०लिलवाराहती
रे०खं० र्थं॥मार्कं०॥अंकोल्लंचततोगच्छेत्सर्वपापप्रणाशनं॥यस्मात्कोल्लतरोर्मूलेवराहःप्रीतिकाम्यया॥१॥चिरंतत्रारि
र्थं॥मार्कं०॥अंकोल्लंचततोगच्छेत्सर्वपापप्रणाशनं॥यस्मात्कोल्लतरोर्मूलेवराहःप्रीतिकाम्यया॥१॥चिरंतत्रारि
तंदुष्टंसर्वजंतुविमोहनं॥निषसादपुरासोमःसवृषोवृषभध्वजः॥२॥तत्रादौपूजितःशार्वैःसर्वैर्देवर्षिभिर्नृ
पैः॥अंकोलस्यवरंदत्वातत्रैवांतर्दधेहरः॥३॥तत्रस्नानंजपोदानमर्चनंद्विजभोजनं॥पिंडप्रदानंचकृतं
नंतफलंप्रदं॥४॥त्रेयंबकेनतोयेनयश्चरुंश्रपयेन्नरः॥अंकोल्लमूलेदद्याच्चपिंडांस्तार्थयथाविधि॥५॥तारि
ताःपितरस्तेनतृप्यंत्याचंद्रतारकं॥स्वर्णसपायसंसद्यःप्रीणयेत्तुकरंनरः॥६॥शिवलोकेचिरंस्थित्वाद्वर
कामांश्चविंदति॥चिरमायुःसुतान्सौख्यंधनंबलमतेबहु॥७॥इतिकोअंलतीर्थं॥मार्कं०॥ततोगच्छेन्नरा
ऐंद्रनर्मदादक्षिणेतटे॥परांशरेश्वरंतीर्थंकोशार्धेबारुणेस्थितः॥८॥सर्वपापप्रशमनंसर्वोपद्रवनाश
नं॥पराशरस्तपस्तेपेयत्रपुत्रार्थमादरात्॥९॥प्राप्यरेवातटंपुण्यंवसिष्ठतनयात्मजः॥परितोष्यमहादे
वंपुत्रंप्रापगुणान्वितं॥१०॥योगिनांप्रवरंविष्णुंसर्वैश्चैवगुणैर्युतं॥स्थापयामासदेवेशंस्वनाम्नातत्रवै
करं॥११॥ततःप्रभृतिविख्यातंतीर्थंपाराशरंनृप॥तत्रतीर्थेनरःस्नात्वास्नापयेत्परमंशिवं॥१२॥इप्सितार्थ
रा ज्यमधुनामंत्रपूर्वंविधानतः॥शिवसूक्तैःपूजयित्वापुत्रंप्राप्नोतिशोभनं॥१३॥श्राद्धदानेनपितरस्तस्य
युगचतुष्टयं॥विविधान्नैस्तथाविप्रान्भोजयित्वास्वशक्तितः॥१४॥सवान्कामानवाप्नोतिशिवलोकेमहीय
ते॥१५॥इतिपाराशरतीर्थं॥ततःक्रोशांतरेपार्थतीर्थंवैकुसुमेश्वरं॥नर्मदादक्षिणेकूलेमहापातकना
शनं॥१६॥कामेनस्थापितोयत्रकुसुमेश्वरनामतः॥स्थितःसर्वयुगेषुदेवदेवःसनातनः॥१७॥कामे २२९
मनोद्भवंचक्रेकुसुमायुधधारिणं॥सकामांददतेसर्वान्पूजितोवृषकेतनः॥१८॥तेननिर्दग्धकायेनस
माराध्यमहेश्वरं॥अनंगेनतदाप्राप्तंअंगित्वंनर्मदातटे॥१९॥युधिष्ठिर०॥अंगिभूतस्यनाथःकिम

नंगस्यविचेष्टितं॥नश्रुतंनचमेदृष्टंभूतपूर्वंकदाचन॥२०॥एतत्सर्वंयथावृत्तमाचक्ष्वद्विजसत्तम॥श्रोतुमिच्छामिवि 481/2008
प्रेंद्रभीमार्जुनयमैःसह॥२१॥मार्कं०॥आदौकृतयुगेतातदेवदेवोमहेश्वरः॥तपश्चचारविपुलंगंगासागरसंस्थितः॥२२॥
तेनसंतापितालोकास्तपसासमुरासुराः॥जग्मुस्तेशरणंसर्वेदेवदेवंशचीपतिं॥२३॥व्यापकःसर्वभूतानांत्रिपुरारि
र्महेश्वरः॥संतापयतिलोकांस्त्रीन्तंनिवारयगोपते॥२४॥श्रुत्वाचवचनंतेषांदेवानांबलवृत्रहा॥चिंतयामासतप
सोविघ्नोपायंतदाहरिः॥२५॥उवाचमेनकांरंभामुर्वशींचतिलोत्तमां॥वसंतंकोकिलंकामंदक्षिणानिलमंजसा॥
२६॥गत्वातूर्णंमहादेवंतपश्चरणतत्परं॥क्षोभयध्वंयथान्यायंगंगासागरवासिनं॥२७॥एवमुक्तास्तुतेसर्वेदेव
राजेनभारत॥देवाप्सरःसमोपेताजग्मुस्तेहरसंनिधौ॥२८॥तेनसंमूर्छिताःसर्वेसंसर्गात्पन्नगोत्तमाः॥मधुमाधवगंध
र्वसकिंनरमहोरगाः॥२९॥यावद्दालोकतेदेवस्तद्वनंव्याकुलीकृतं॥अपश्यन्मदनाविष्टंदशावस्थगतंजनं॥३०॥देव
देवोपिदेवानामवस्थात्रितयंगतः॥सात्विकीराजसीराजन्तामसींतांशृणुष्वमे॥३१॥एवंमुकुलितंचक्षुर्योगयुक्त
स्यधूर्जटेः॥द्वितीयंचैवपार्वत्याःपार्श्वतःप्रेमलालितं॥३२॥तदेवरममाणायाःस्तनयुग्मेनवेशितं॥जंघानाभि
निवेशाच्चश्रृंगारभरघूर्णितं॥३३॥तृतीयंमदनाकृष्टचापसंदृष्टिनांनृप॥क्रोधकालानलोद्दीप्तंविश्वत्रासकरंपरं॥
॥३४॥अवस्थात्रितयंशंभुरभजद्भरतर्षभ॥दृष्टोमारःसदेवेनसशरःसशरासनः॥३५॥भस्मीभवत्तदेवाशुय
दृष्टःसर्वदेहिनः॥क्षामंदृष्ट्वाक्षयंप्राप्तंयत्रेदेवाप्सरोगणाः॥३६॥यथागताःतथासर्वेजग्मुश्चैवदिशोदश॥का
मेनरहितालोकाःससुरासुरमानवाः॥३७॥त्रैलोक्यवासिनोमूढाःसृष्टिसंहारकारिणं॥ब्रह्माणंशरणंजग्मु
र्देवाःशक्रपुरोगमाः॥३८॥सीदमानंजगद्दृष्ट्वास्वयंभूःपरमेष्ठिनं॥आनासितंजगद्दृष्ट्वाप्रजामैथुनसंभवाः॥३९॥
प्रजाःक्षयंगमिष्यंतिकामेनरहिताःप्रभो॥क्षयंनीतःसरुद्रेणतस्मान्नःपाहिपद्मज॥४०॥एवंश्रुत्वावचस्तेषां
देवानांप्रपितामहः॥जगामतैःसमंतत्रयत्रदेवोमहेश्वरः॥४१॥नमश्चक्रेजगन्नाथंसर्वभूतमहेश्वरं॥ततस्तु

रे.खं. श्चोमहादेवोदेवानांपरमेश्वरः॥४२॥इत्याचमधुरंवाक्यंदेवान्ब्रह्मपुरोगमान्॥किंकार्यंकथ्यसंतापःकिंवागमन
कारणं॥४३॥देवतानामृषीणांचकथ्यतांममचाचिरं॥ब्रह्मो॥कामनाशोजगन्नाशोभवतीतिचराचरे॥४४॥त्रै
लोक्यंतंपुनःशंभोउत्पादयितुमर्हसि॥तच्छ्रुत्वावचनंतेषांविमृश्यपरमेश्वरः॥४५॥चिंतयामासकामस्यपुन
र्देहंसुदुर्लभं॥आगतःस्मरणात्तस्यअनंगोहृदिगोचरंगतः॥४६॥प्राणदःसर्वभूतानांपश्यतांनृपसत्तम॥ततः
शंखनिनादेनभेरीणांशब्दितेनच॥४७॥अभिनंदंतिदेवेशंसुरासुरमहोरगाः॥ततस्तेदेवदेवेनकृतार्थाःसु
रसत्तम॥४८॥विसर्जिताःप्रयातास्तेयथागतमरिंदम॥गतेषुसर्वदेवेषुकामदेवोपिभारत॥४९॥तपश्च
चारविपुलंनर्मदातीरमागतः॥जपहोमैःकृशीभूतोदिव्यंवर्षशतंकिल॥५०॥महाभूतैर्विघ्नकरैःपीड्यमा
नःसमंततः॥ततस्तेनामरक्षार्थंसंस्मृतःकुंडलीश्वरः॥५१॥चकाररक्षांसर्वत्रशरपातेनपाहनम्॥ततस्तुष्टो
महादेवोदृष्टभक्त्यान्तपोत्तमम्॥५२॥वरेणछंदयामासकामंकामविनाशनः॥ज्ञात्वातुष्टंमहादेवंउवाचझषकेत
नः॥५३॥प्रणतःप्रांजलिर्भूत्वादेवदेवंत्रिलोचनं॥यदितुष्टोसिदेवेशयदिदेयोवरोमम॥५४॥कौसुमान्मेवरां
देहिकल्याणकुसुमप्रियः॥कुसुमायुधेश्वरोनामअत्रसंनिहितोभव॥५५॥इहतीर्थेजगन्नाथकृपांकृत्वास्थि
रोभव॥कुंडलेश्वरनाम्नाचभक्त्याभुवनपालकः॥धनुर्धराणांप्रवरोविभ्रजेतामहतास्यदः॥नमेसमस्यास्तत
तंतथाकुरुमहेश्वर॥५७॥तथेतिचोक्त्वावचनंदेवदेवोमहेश्वरः॥जगामाकाशमाविश्यस्तूयमानःसुरर्षिभिः॥
॥५८॥गतेचादर्शनंदेवेकामदेवोजगद्गुरुः॥स्थापयामासदेवेशंकुसुमेश्वरसंज्ञितं॥५९॥तथैवकुंडलीशोपि २४०
स्थापयित्वासनातनं॥यातोयथागतंदेवोपार्थसार्थकृतामितो॥६०॥तत्रतीर्थेतुयःस्नात्वाचपवासपराय
णः॥चैत्रमासेचतुर्दश्यांमदनस्यदिनेपिवा॥६१॥प्रभातेविमलेप्राप्तेस्नात्वापूज्यदिवाकरं॥तिलसंमि
श्रितोयेनतर्पयेत्पितृदेवताः॥६२॥पंचामृतेनसंस्नात्वादेवंपुष्पायुधेश्वरं॥अभ्यर्चयेत्विधानेनपुष्पधूप

नुलेपनैः॥६३॥पिंडनिर्वपणंकृत्वातस्यतीर्थफलंशृणु॥सत्रयाजीफलंयच्चलभतेद्वादशाब्दकं॥६४॥पिंडदानात्फलंत
द्वैनरःप्राप्नोत्यसंशयं॥अंकोल्लमूलेयःपिंडंपितृनुद्दिश्यदापयेत्॥६५॥तस्यतेद्वादशाब्दानितृप्तिंयांतिपिता 483/2008
महाः॥कृमीकीटपतंगाश्चतत्रतीर्थेयुधिष्ठिर॥६६॥मृताःस्वर्गंप्रयांत्येवकिंपुनर्येमृतानराः॥संन्यासंकुरुतेयस्तु
जितःक्रोधोजितेंद्रियः॥६७॥कुसुमायुधतीर्थेवैसगच्छेच्छिवमंदिरं॥यदिदिव्याप्सरोभिश्चदेवगंधर्वगायनैः॥६८॥
क्रीडतेसेव्यमानस्तुकल्पमेकंयुधिष्ठिर॥पूर्वैचापिततःकालेभुविमानुष्यतांगतः॥६९॥जायतेराजराजेश्च
पूज्यमानोनृपोमहान्॥सुरूपःसुभगोवाग्मीविक्रांतोमतिमान्शुचिः॥७०॥जीवेद्वर्षशतंसाग्रंसर्वव्याधिविव-
र्जितः॥एतत्पुण्यंपापहरंतीर्थंतीर्थादनुत्तमं॥७१॥इतिकुसुमायुधेश्वरतीर्थं॥मार्कं॥ततःक्रोशांतरेपार्थ
तीर्थंपापक्षयंकरं॥रेवादक्षिणतीरस्थंनाम्नाकलकलेश्वरं॥१॥विख्यातंसर्वलोकेषुस्वयंदेवेननिर्मितं॥अंधकंस
मरेत्वोक्तहेदेवदेवोमहेश्वरः॥२॥सहितोदेवगंधर्वैःकिंनरैश्चमहोरगैः॥शंखतूर्यनिनादैश्चमृदंगपणवस्वनैः
॥३॥वेणुवीणानिनादैश्चस्तुतिभिर्जयमंगलैः॥गायंतिसामानियजूंषिचान्येतथैवचान्येगिरमुद्गिरंति॥४॥
स्तोत्रैरनेकैरपरेगृणंतिमहेश्वरंतत्रमहानुभावाः॥एवंरेवातटेप्राप्तःपुरारिःपार्वतीपतिः॥५॥तत्रपुण्यजना
नांचप्रमथानांतुयोगिनां॥सिद्धविद्याधराणांचसत्तमावंदिनां॥६॥देवतानामृषीणांचगंधर्वाप्सरसांनृप
जातेकलकलाशब्देरेवातीरेसदाशुभे॥७॥परमानंदसंपूर्णःस्वयंलिंगत्वमाप्तवान्॥अंतरिक्षात्तदातेषांवागु
वाचाशरीरिणी॥८॥यतःकलकलाशब्दादानंदितनारदः॥लिंगरूपस्थितस्तस्मान्नाम्नाकलकलेश्वरः॥९॥
इत्याकर्ण्यततःसर्वेदेवेशाप्रमुदितास्ततः॥सर्वैःप्रतिष्ठितोयस्मात्तस्माज्जातःसएवतु॥१०॥तत्रतीर्थेतुयःस्नात्वा
यजेत्कलकलेश्वरं॥वाजपेयाधिकंपुण्यंसलभेन्नात्रसंशयः॥११॥तेनपुण्येनपूतात्माप्राणत्यागीदिवंव्रजे
त्॥आरूढःपरमंयानंगीयमानोप्सरोगणैः॥१२॥तत्रस्थित्वामहाभोगीकालेनमहताततः॥मर्त्यलोके

महात्मा सोजायते विपुले कुले ॥२३॥ ब्राह्मणः सुभगो वाग्मी वेदवेदांगपारगः ॥ आधिव्याधिविनिर्मुक्तो धनी जीवेच्छरच्छ
तं ॥२४॥ तत्र तीर्थे च यच्छ्राद्धं पितॄनुद्दिश्य वेदवित् ॥ नंदंति पितरस्तस्य परं तृप्ताः शतं समाः ॥२५॥ ब्राह्मणान्भोज
येद्भक्त्या शक्त्याय स्तत्र पार्थिव ॥ एकेन भोजितेनात्र कोटिर्भवति भोजिता ॥२६॥ इति कलकलेश्वरतीर्थं ॥ मार्कं॰॥
ततः परं महाराज तीर्थं परमशोभनं ॥ उत्तरे नर्मदाकूले श्वेतवाराहसंज्ञितं ॥२७॥ पृथिव्युद्धरणार्थाय पुरा वारा
हरूपधृक् ॥ रसातलगतां देवीं विष्णो धारितवान्महीं ॥ ॥२८॥ यथा निवेशं स पुनः स्थापयामास तां भुवि ॥ वि
लोक्य रुद्रो देवीं विष्णोर्धाम विनाशिनीं ॥२९॥ आत्वा तत्र परं तीर्थं कलिकालुष्यनाशनं ॥ विष्णुस्थिकरणं स
र्वलोकानां शांतिदं शिवं ॥३०॥ पंचाशनायतीर्थस्य स्नात्वा श्वेतत्वमादधे ॥ लोकानुग्रहबुद्ध्या स तत्रैव चालेरस्थि
तः ॥२१॥ श्वेतं कुवाराहतीर्थस्य क्रोशांते विश्ववंदितः ॥ तत्र तीर्थेतु यः स्नात्वा पश्येच्च मधुसूदनं ॥२२॥ मुच्यते स
र्वपापेभ्यो दशजन्मानुकीर्तनात ॥ मत्स्यः कूर्मो वराहश्च नारसिंहोथ वामनः ॥२३॥ रामो रामश्च कृष्णश्च बौद्धः
कल्की च ते दश ॥ युधिष्ठिर ॥ मत्स्येन किं कृतं तात कूर्मेण द्विजसत्तम ॥२४॥ वाराहेण नृसिंहेन वामनेन च किं
कृतं ॥ रामेण रामचंद्रेण तथान्यैर पियत्कृतं ॥२५॥ तद्वदस्व मुनिश्रेष्ठ विचित्रं विष्णुकेलितं ॥ सूत उ॰॥ एवमुक्तः
स विप्रेंद्रो धर्मपुत्रेण धीमता ॥२६॥ उवाच मधुरां वाणीं तदा धर्मसुतं नृप ॥ हर्षयन्मुनिसंघांश्च पांडवानपि तु
ष्टतः ॥२७॥ शृण्वतामपि संघानां विष्णोर्विक्रमणं महत् ॥ मार्कं॰॥ शृणु राजन्प्रवक्ष्यामि विष्णोश्चरितमुत्त
मं ॥२८॥ दशास्वप्यवतारेषु शुद्धं देजन्माघनाशनं ॥ प्राप्य पूर्वं भगोः शापं संसारे जन्मकारकं ॥२९॥ दशावतार २४९
णं नेत्तुं न सुरकार्यपरो भवेत ॥ विश्वपालन शक्तिः स संचिंत्य सुरपूजिता ॥३०॥ वपुषा येन यत्कार्यं सिद्ध्येत्सम
तिपपूजितं ॥ तेन तेनात्र वपुषा तत्तत्संचिंत्य चक्रिवान ॥३१॥ मत्स्यो भूत्वा पुरा कल्पे प्रीत्यर्थं ब्रह्मणो नृप ॥
ददौ वेदांस्समुद्धृत्य दैत्यनीतान्महार्णवे ॥३२॥ अमृतोत्पादने पूर्वं कूर्मो भूत्वा जगद्गुरुः ॥ दधार मंदरं उर्ध्वंत

थापृष्ठे च सुंदरं ॥३३॥ वाराहं रूपमास्थाय देवदेवो जनार्दनः ॥ उज्जहार धरां मग्नां पातालतलवासिनीं ॥३४॥ 485
नरस्यार्धतनुं कृत्वा सिंहस्यार्धतनुं तथा ॥ हिरण्यकशिपोर्वक्षो दारयामास भारत ॥३५॥ जटी वामनरूपश्च 2008
स्तूयमानः सुरर्षिभिः ॥ तद्दिव्यं रूपमास्थाय मेदिनी परिचक्रमे ॥३६॥ कृतवांश्च बलिं पश्चात्पातालतलवासि
नं ॥ स्थापयित्वा सुरांस्तर्वान्गत्वा विष्णुपुरं स्वकं ॥३७॥ जमदग्निगृहे रामो भूत्वा शस्त्रभृतां वरः ॥ क्षत्रियान्
असुरान्भूपान्निजघान पृथक्पृथक ॥३८॥ तपस्तप्यति देवेशो महेंद्रे चापि भारत ॥ द्विजेभ्यः पृथिवीं द
त्वा स पर्वं नवनांतरं ॥३९॥ तथा दाशरथी रामो रावणं देवकंटकं ॥ सगणं समरे हत्वा दत्वा राज्यं विभीषणं ॥
४०॥ पालयित्वा चिरं भूमिं सर्वैः पूज्य पितामहं ॥ स्वर्गं गतो महातेजा रामो राजीवलोचनः ॥४१॥ वसुदेवकु
ले भूयः संकर्षणसहायवान ॥ अवतीर्णो जगन्नाथो वासुदेवो युधिष्ठिर ॥४२॥ संबंधी तव सामर्थ्याद्दृष्टार्थदु
ष्टचारिणां ॥ कंसकेशिजरासंधचाणूरादिसुरद्विषां ॥४३॥ शिशुपालस्य दुष्टस्य मथुरायेन निर्जिता ॥ कर्णदु
र्योधनादीनां च पार्थद्रोणभीष्मयोः ॥४४॥ सखा तव नरश्रेष्ठ भविष्यति रणाजिरे ॥ तेन त्वं सुसहायेन हत्वा श
त्रूं नरेश्वर ॥४५॥ भोक्ष्यसे वसुधां सर्वां भ्रातृभिः सहितो नृप ॥ ततो बुद्धत्वमपरं नवमं पुरुषोत्तमः ॥४६॥ य
स्य नेदं वदे वेदांम धुहंता मधुप्रियः ॥ तेन बुद्धत्वभूतेन देवेन परमेष्ठिना ॥४७॥ भविष्यति जगत्सर्वं मोहि
तं सचराचरं ॥ नश्यंति पितुः पुत्रास्तदा प्रभृति भारत ॥ न गुरुर्बांधवाः शिष्या भविष्यत्यपरोत्तरं ॥ जिता
धर्मो ह्यधर्मेण सत्यं चैवानृतेरहि ॥४८॥ जिताश्चौरैश्वरा जानः स्त्रीभिश्च पुरुषा जिताः ॥ सीदंति चाग्निहो
त्राणि गुरुपूजा नशिष्यति ॥५०॥ कार्मिकाश्चावसीदंति मानवा नसुपापिनः ॥ दशद्वादशमे वर्षे नारी गर्भ
मवाप्स्यति ॥५१॥ प्रचुराः पुत्रिकास्तत्र दता कलियुगे नृप ॥ धर्मपुष्टी यमाणेतु ब्राह्मणे विष्णुयशास्तथा ॥
तत्रावतीर्णो भगवान् ब्रह्मणा हरिपिंगलः ॥ भविष्यति गृहे तस्य जननेशोदेमहरिः ॥५२॥ एतत्ते कथितं

रे॰खं॰ राजन्देवस्यपरमेष्ठिनः॥ कारणंदर्शनंमोक्षसर्वपापक्षयंकरं॥ श्वेतवाराहतीर्थेयःस्नात्वासंपूजयेद्धरिं॥३॥
दशजन्मानिराजेंद्रराजराजोभवेद्ध्रुवं॥ तत्रश्राद्धेनदत्तेनपितॄणांतृप्तिरक्षया॥४॥ भूमिदानेनवैपार्थ
भूपतिर्जन्मनाप्नुतं॥ धेनुदानेनभगवान्द्विजभोज्येनशक्तितः॥५॥ आजन्मसंचितंपापंनाशमाप्नोति
भारत॥ परांप्रीतिमवाप्नोतिवराहवपुरीश्वरः॥ ५६॥ इतिश्री रे॰ श्वेतवाराहतीर्थं॥ मार्कं॰॥ ततः क्रोशांत
रेपार्थभार्गलेश्वरमुत्तमं॥ पापांधंभुंजगत्प्राणंस्मृतिमात्राघहारिणं॥१॥ ब्राह्मणोभार्गलोनामकश्यप
स्यपुत्रोद्भवः॥ सपूर्वंतपसासिद्धःससस्तिरुचिरंवभो॥२॥ पूर्णेवर्षसहस्रेसरुद्रस्यगणतांगतः॥ आरा
धयन्महादेवंकपर्दिनमुमापतिं॥३॥ तेनात्रस्थापितंशंभुभार्गलेश्वरसंज्ञया॥ तत्रतीर्थेचयःस्नात्वापूजयेद्वृ
षपाणिनं॥४॥ नानोपचारपूजाभिःसोश्वमेधफलंलभेत्॥ दीपदानेननराजेंद्रसर्वकर्मपवर्जितः॥५॥ दीप्ति
मांत्सर्वलोकेषुविमानेनार्कवर्चसा॥ पयातिलिलयास्वर्गेदेवगंधर्वपूजितः॥६॥ आश्विनस्यचतुर्दश्यांअ
मावास्यायुधिष्ठिर॥ स्नात्वाश्राद्धंतथादत्वापितॄणांतृप्तिमावहेत॥७॥ एकेनद्विजभोज्येनभोजितंस्याद्वि
जायुतं॥ तत्रतीर्थेनृपश्रेष्ठप्राणत्यागंकरोतिपः॥८॥ अनिवर्तिकागतिस्तस्यरुद्रलोकात्कदाचन॥९॥
इतिश्रीरेवा॰ भार्गलेश्वरतीर्थं॥ मार्कं॰॥ ततः क्रोशांतरेपार्थरवितीर्थमनुत्तमं॥ यस्यसंदर्शनादेवमुच्य
तेपातकैर्नराः॥१०॥ रवितीर्थेनरःस्नात्वाभास्करंयदिपश्यति॥ तस्ययत्फलमुद्दिष्टंस्वयंदेवेनतच्छृणु॥११॥ २४२
नांधोनमूकोबधिरःकुलेभवतिकश्चन॥ कुरूपःकुनखीवापीतस्यजन्मानिषोडश॥१२॥ दद्रुश्चित्रक
कुष्ठानिमंडलानिविचर्चिका॥ नत्र्यंतेदेवभक्तस्यस्यषण्मासांनात्रसंशयः॥१३॥ चरितंतस्यदोषस्यदे
वस्यपुराणेयच्छ्रुतंमया॥ नतद्वर्णयितुंशक्यंसंक्षेपेणनिबोधतं॥१४॥ तत्रतीर्थेतुयद्दानंरविमुद्दिश्यदी
यते॥ विधिनाचात्रभक्तायनस्यांतोनैवविद्यते॥१५॥ अयनेविषुवेचैवचंद्रसूर्यग्रहेतथा॥ रवितीर्थे

तुदत्तानांदानानांफलमुत्तमं॥१६॥ संक्रांतौहव्यकव्यादिदानानिनृपसत्तम॥ सप्तजन्मानितान्येवदहात्यर्घ्यंपुनःपुनः
॥१७॥ शतमिंदुक्षयेदानंसहस्रंतुदिनक्षये॥ तद्दिनेशतसाहस्रंव्यतीपातेसहस्रकं॥१८॥ युधिष्ठिरोवा॰॥ रवितीर्थंक
थंविप्रपुण्यात्पुण्यतरंस्मृतं॥ विस्तरेणसमाख्याहिश्रवणेलंपटोमम॥१९॥ पुण्यतीर्थमिमंभोतुंविशेषाद्दैमसाध
ने॥ मार्कं॰॥ शृणुष्वावहितोभूत्वाआदित्येश्वरमुत्तमं॥२०॥ उत्तरेनर्मदाकूलेसर्वव्याधिविनाशनं॥ पुराकृतयुग
स्यादौजाबालिर्ब्राह्मणोभवत्॥२१॥ वसिष्ठान्वयसंभूतोवेदशास्त्रार्थपारगः॥ पतिव्रताधर्मशीलातस्यभार्या
मनस्विनी॥२२॥ ऋतुकालंस्वस्यमत्वाभर्तारंविदमब्रवीत्॥ वर्ततेऋतुकालोमेपतेदारानुपस्थितान्॥२३॥
भजमांप्रीतिसंयुक्तःपुत्रकामांनुकामिनीं॥ एवमुक्तोद्विजःप्राहव्रतवानस्मिभामिनी॥२४॥ गच्छेदानींवरारोहे
दास्याम्यंनर्तौपुनः॥ पुनर्द्वितीयेसंप्राप्तेऋतौसापत्युपस्थिता॥२५॥ पुनःसाछंदितातेनव्रतस्थोहमितिप्रि
ये॥ इत्थंसाबहुशस्तेनछंदितानुपुनःपुनः॥२६॥ निराशासाभवत्संतुभर्तारंप्रतिभामिनी॥ दुःखेनमहताविष्टाकृ
त्वाशनशनंमृता॥२७॥ तेनभ्रूणहनेनैनपापेनससाद्विजः॥ शीर्णप्राणांत्हिरभवत्तपःसर्वव्यनश्यत॥२८॥ दृ
ष्ट्वात्मानंसकुष्ठेनव्याप्तंतुद्विजसत्तमः॥ विषादंपरमंगत्वानर्मदातटमाश्रितः॥२९॥ अपृच्छद्ब्राह्मणांश्चैवास
र्वांथकुशलांनृप॥ व्रतभंग्याधिनाग्रस्तश्चैवापायंद्विजोत्तमः॥३०॥ ब्राह्मणोवाच॥ आरोग्यंभास्करादिच्छेदितिसं
चिंत्यतंभज॥ विप्रउ॰॥ तस्यस्थानंतुवातीर्थंकथ्यतांमेद्विजोत्तमः॥३१॥ तपस्तस्याम्यहंतत्रभास्करराधनेरतः॥
द्विजाउ॰॥ रेवायाउत्तरेकूलेशूलभेदसमीपतः॥३२॥ आदित्येश्वरतीर्थंवैसर्वव्याधिहरंपरं॥ तत्रगच्छाविरेणाण
गंतुंतुयदिशक्यते॥३३॥ एवमुक्तोद्विजैर्विप्रोगंतुंतत्रप्रचक्रमे॥ व्याधिनापरिभूतस्तुघोरेणप्राहणारिणा॥३४॥
यदागंतुंनशक्नोतितदातेनविचिंत्यतं॥ नासाध्यंब्राह्मणानांहिविद्यतेभुवनत्रये॥३५॥ लिंगपातःकृतेविप्रैर्दे
वदेवस्यशूलिनः॥ समुद्रःशोषितःस्तेस्तुविंध्यस्त्थिर्निवारितः॥३६॥ अहमप्यत्रसंस्तभ्यस्थापयिष्यामिभो

487/2008

स्करं॥ तपोबलेनमहता आदित्येश्वरसंज्ञितं॥३७॥ इतिनिश्चित्यमनसा उग्रेतपसिसंस्थितः॥ वायुभक्षोनिराहारोग्री
ष्मेपंचाग्निमध्यगः॥३८॥ शिशिरे स्थलसंशायी वर्षास्वभ्रावकाशिकः॥ साग्रेवर्षशतेतस्य ततस्तुष्टो दिवाकरः॥
३९॥ साक्षाद्रूपःस्थितंध्यायंल्लोकानांपर्युपस्थितः॥ आदित्यउ०॥ वरंवरयभद्रं तेयत्तेमनसिवांछितं॥ ४०॥ अदेयम
पिदास्यामिब्रूहिमात्रचिरंकृथाः॥ किमसाध्यंहितेविप्रयदिदानींतपोबलात्॥ ४१॥ सामाकृष्टस्त्वयाविप्रसाक्षा
दहमुपागतः॥ जाबालिरुवा०॥ यदितुष्टोसिमेदेवयदिदेयोवरोमम॥ ४२॥ ममप्रतिष्ठांदेवेशआदित्येश्वरदर्श
ने॥ तांतुपालयितुंदेवनशक्तोव्याधिपीडितः॥ ४३॥ शुक्लतीर्थांतिकेभानोआदित्येश्वरमंतिमान॥ तस्माद्व
तरष्टीत्याद्यदितुष्टोसिसांप्रतं॥ ४४॥ एवमुक्तःसदेवेशोबकुरूपीदिवाकरः॥ उत्तरेनर्मदाकूलेतत्क्षणाद्दृश्यतांग
तः॥ ४५॥ लोकानांहितमन्विछन्जाबालिप्रियकाम्यया॥ ततःप्रभृतितत्तीर्थंआदित्येश्वरसंज्ञितं॥ ४६॥ सर्व
पापहरंपार्थव्याधिदुःखविनाशनं॥ यस्तुसंवत्सरंपूर्णंनित्यमादित्यवासरे॥ ४७॥ स्नात्वाप्रदक्षिणासप्तदत्वा
पश्यतिभास्करं॥ यत्फलंलभतेतेननतच्छृणुष्वमयोदितं॥ ४८॥ प्रसुप्तोमंडलानीदद्रुकुष्टविचर्चिकाः॥ तत्क्षा
णांनश्यतेसर्वंतूलराशिरिवानलः॥ ४९॥ धनमित्रकुरुक्षांपूजयेज्जननत्रयं॥ मार्तंडंभानुमादित्यंभास्क
रंतपनंरविं॥ ५०॥ हंसंदिवाकरंचैवजपन्रोगैःप्रमुच्यते॥ यस्तुश्राद्धदस्तत्रपितॄंनुद्दिश्यसंक्रमे॥ ५१॥ त
र्पयंतिपितरस्तस्यपितृदेवश्चभास्करः॥ गांचदद्याद्द्विजेभ्यस्तारविमुद्दिश्यभारत॥ ५२॥ कपिलांवान्यवर्णांवा
सुवर्णांवास्वशक्तितः॥ स्नात्वासंपूज्यतपनंसर्वपापैःप्रमुच्यते॥ ५३॥ इतितेकथितंसम्यगादित्येश्वरमुत्तमं॥
सर्वपापहरंदिव्यंसर्वरोगविनाशनं॥ ५४॥ इतिआदित्येश्वरतीर्थं॥ मार्कं॥ ततोगच्छेतराजेंद्रक्रमपंचशा
नांतरे॥ हुंकारतीर्थंविख्यातंशुक्लतीर्थसमीपतः॥ १॥ शुक्लहृत्तिकरेविप्रैर्यत्रवासःकृतोमहान्॥ वासुदेव २५२
स्यतीर्थंतत्र्वलोकेषुपूजितं॥ २॥ तद्धिपुण्यंसुविख्यातंनर्मदायांपुरातनं॥ शुक्लतीर्थपरंपुण्यमघौघानांस्वि

कारकं॥ ३॥ स्नानेदानार्चनेश्राद्धेनिवासेचनराधिप॥ परंयातीवसावार्थंस्नानतर्पणपूजने॥ ४॥ सर्वान्सत्कर्मसंभा
रांदर्भपुष्पाक्षतादिकान॥ मुक्तान्रेवातरंगैःस्वैःप्रतिगृह्णातिपुरस्थितान॥ ६॥ कोपंजनयितुंतेषांतीर्थविद्भाव
भासिनी॥ दैत्येणनिरवकाशश्चरेवातीरस्यतीर्थगः॥ ७॥ एकदाऋषिभिःसर्वैःसमेत्यस्वांस्यगोचरे॥ वासुदेवोज
गंनाथःस्मृतःसर्वार्थदोविभुः॥ ८॥ शोकदुःखापहःश्रीशोभक्तानांवांछितार्थदः॥ स्थानदोयोभुवासीनांभग्वा
दीनांचमानदः॥ ९॥ स्मृतमात्रःसभगवांज्ञात्वातेषांविचिंतितं॥ हुंकारमसृजत्तदाजन्मेवाप्रोत्सारणायतु॥ १०॥
यत्रहुंकारमात्रेणरेवाकोशंजगामह॥ तावकाशमथोतीर्थंतीरंचकृतवान्विभुः॥ ११॥ यदाप्रभृतिराजेंद्रहुंकारे
णगतासरित्॥ तदाप्रभृतितैर्देवैःकृतोहुंकारसंज्ञितः॥ १२॥ ब्राह्मणैर्विस्मितैःपार्थस्नात्वासंस्थापितोहरिः॥
तदाप्रभृतिसःस्वामीहुंकारःसंज्ञितोबुधैः॥ १३॥ हुंकारतीर्थेयःस्नात्वापश्यत्यव्ययमच्युतं॥ समुच्यतेनरःपापै
सप्तजन्मकृतैरपि॥ १४॥ संसारार्णवमग्नानांनराणांपापकर्मणां॥ नान्यस्त्रीताजगंनाथंविनानारायणंविभुं॥
॥ १५॥ साजिह्वायाहरिंस्तौतियच्चित्तंयत्तदार्पितं॥ तावेवकेवलौश्लाघ्यौयौतौपूजाःकरौकरौ॥ १६॥ सर्वदासर्व
कार्येषुयेषांनास्तिव्यथाहरिः॥ तेषाममंगलंनास्तिनभयंनपराजयः॥ १७॥ यदन्यसर्वदेवानांनत्यानुत्यार्चनात्फ
लं॥ साष्टांगप्रणिपातेनतत्फलंलभतेहरिः॥ १८॥ यावंतिपत्रपुष्पाणिकृत्स्नपूजाकृतानिच॥ तावद्वर्षसहस्राणि
विष्णुलोकेमहीयते॥ १९॥ येनार्चितोसोभगवाननंतःस्नानानुलेपाशनपुष्पगंधैः॥ नीराजनैर्वस्त्रफलप्रदीपैः
स्तुतिप्रणामैरखिलोपचारैः॥ २०॥ संमार्जनाभ्युक्षणलेपनेश्चजन्मार्जितंनश्यति॥ तस्यपापं॥ स्वयातिलोकं
गरुडध्वजस्यविधूतपापःसुरसंघपूज्यं॥ २१॥ शाठ्येनापिनमस्कारंयःप्रयुंजीतचक्रिणे॥ जन्मप्रभृतितत्पापं
गच्छत्याशुनसंशयः॥ २२॥ पूजयातुष्यतेरुद्रोजपहोमैर्दिवाकरः॥ शंखचक्रगदापाणिःप्रणिपातेनतुष्यति॥
॥ २३॥ एवंविधःसभगवांहुंकारःस्वामिसंज्ञितः॥ तत्रसंस्थापितस्तीर्थेमुनिभिर्वेदपारगैः॥ २४॥ हुंकारती

489
2008

र्थैयः स्नात्वा श्राद्धैसंप्रीणयेत्पितॄन्॥ तुष्यंति पितरस्तस्य यावद्वर्षशतं नृप॥२५॥ ॐकारे के शवं भक्त्या पूजयेद्य
स्तु भक्तितः॥ तस्यांतकाले भगवान् न जहाति नृपोत्तम॥२६॥ ॐकारतीर्थमासाद्य भोजयेद्ब्राह्मणान् हि यः॥ एकस्मिन् भो
जिते विप्रे प्रयुतं भोजितं भवेत्॥२७॥ ॐकारतीर्थे राजेंद्र शुभं वा यदि वाशुभं॥ यत्कृतं पुरुषव्याघ्र सनदक्षयम
श्नुते॥२८॥ आयते जलधारं तस्तस्यां तो नैव विद्यते॥२९॥ इति श्रीरेवा० ॐकारस्वामितीर्थं॥ मार्कं०॥ अतः परं
प्रवक्ष्यामि सर्वतीर्थेष्वनुत्तमं॥ रेवाया उत्तरे तीरे शुक्लतीर्थं युधिष्ठिर॥३०॥ तस्य तीर्थस्य चान्यानि पुण्यत्वाद्द
र्शनादपि॥ पृथिव्यां सर्वतीर्थानि कलां नार्हंति षोडशीं॥३१॥ युधिष्ठिर उवाच॥ तस्य तीर्थस्य माहात्म्यं श्रोतुमिच्छा
मि तत्त्वतः॥ भ्रातृभिः सहितः सर्वैस्तथान्यैर्विप्रसत्तमैः॥३२॥ मार्कं० संभवं शुक्लतीर्थस्य शृणुत्वं पांडुनंदन॥ यस्य
संदर्शनादेव ब्रह्महत्या प्रणश्यति॥३३॥ नर्मदा सरितां श्रेष्ठा सर्वपापप्रणाशिनी॥ बाल्यत्वे च कृतं पापं हरते न
र्मदाजलं॥३४॥ त्रिषु लोकेषु विख्यातं मया भरतसत्तम॥ धुनी न नर्मदातुल्या दृष्टा वापि श्रुतापि वा॥३५॥ दृष्टा
नि सर्वतीर्थानि कृतं तत्परिशीलनं॥ मोक्षदं न तु सर्वत्र शुक्लतीर्थमृते नृप॥३६॥ शुक्लतीर्थस्य माहात्म्यं पुराणे
यच्छ्रुतं मया॥ देवर्षिपितृसिद्धानां सरित्तीर्थसमागमे॥३७॥ समीपे देवदेवस्य शितिकंठस्य भारत॥ कैलासे प
र्वतश्रेष्ठे तन्मे निगदतः शृणु॥३८॥ गंगा कनखले पुण्या कुरुक्षेत्रे सरस्वती॥ ग्रामे वा यदि वारण्ये पुण्या सर्वत्र नर्मदा॥
॥३९॥ गात्रमध्ये यथा पुण्यं ललाटं नृपसत्तम॥ शुक्लतीर्थं तथा श्रेष्ठं सर्वतीर्थेषु नर्मदे॥४०॥ चतुष्पथेषु सुरभी व
र्णानां ब्राह्मणो यथा॥ प्रधानं सर्वतीर्थानां शुक्लतीर्थं तथा नृप॥४१॥ ग्रहेष्वपि यथादित्यो नक्षत्रेषु यथा शशी॥ २४४
उमा देवी यथा स्त्रीणां आदित्यस्तेजसां यथा॥४२॥ साध्वी ष्वरुंधती यद्वत्सत्यं धर्मेषु पार्थिव॥ मंत्राणां प्रणवो यद्व
त्सावित्री जपवस्तुषु॥४३॥ एवं हि सर्वतीर्थेषु शुक्लतीर्थमनुत्तमं॥ दुर्विज्ञेयो यथा लोके परमात्मा सनातनः॥४४॥
सुसूक्ष्मत्वादनिर्देश्यः शुक्लतीर्थं तथा नृप॥ मंदभाग्यत्वमापन्ना दंभज्ञानस्य समन्विताः॥४५॥ शुक्लतीर्थं न जानं

ति नर्मदातटसंस्थितं॥ एकः पुरा धरापृष्ठे पितॄन्मातिनाशनः॥४६॥ चाणाख्यो नाम राजर्षिः शुक्लतीर्थे विदुत्तमः॥ 491/2008
युधिष्ठिर उ०॥ कोसौ द्विजवरः श्रेष्ठः चाणाख्यो राजसत्तम॥४७॥ शुक्लतीर्थस्य यो वेत्ता नान्यो वेत्ता कथं भवेत्॥ केनो
पायेन तत्तीर्थं तेन ज्ञातं धरातले॥४८॥ तदहं श्रोतुमिच्छामि परं कौतूहलं हि मे॥ मार्कं०॥ इक्ष्वाकुसंभवो राजा नत्वा शु
द्रो दनस्य तु॥४९॥ चाणाख्यो नाम राजर्षिर्भुनक्ति पृथिवीमिमां॥ विक्रांतो मतिमान् शूरः सर्वभूतहिते रतः॥५०॥
वंचितः सह साधूर्तैर्दानवैः काकतां गतैः॥ युधिष्ठिर उवाच॥ कथं स वंचितो राजा वायसैः केन हेतुना॥५१॥ पुरा येन प्र
तिज्ञातं धीगर्वेण महात्मना॥ न जीवे वंचितोन्येन प्राणांस्त्यक्षे न संशयः॥५२॥ एतदाख्याहि विप्रेंद्र परं कौतूहलं
हि मे॥ मार्कं०॥ मुदोप सुदभोपुत्रा सप्तास न्वायु विक्रमः॥५३॥ ब्रह्मणो वितते यज्ञे पुरा विघ्नार्थमागताः॥ दानवा क्रू
रकर्माणः पूर्ववैरस्मदासुरैः॥५४॥ ब्रह्मणा च तदा शप्ताः स्माप्ताः काकतां गताः॥ इंद्रस्यानुचरा आता ब्रह्मानुग्रह
नोदिताः॥५५॥ धीगर्वं लोकविख्यातं विज्ञा चाणाख्यभूपतिं॥ शक्रेण ते समादिष्टा वंचनाय युधिष्ठिर॥५६॥ स्व
आतिमध्यगास्तेन प्राप्य चाणाख्यमादरात्॥ छलं विकाकयं स्यच विचरं तद्वत्सतः॥५७॥ एकदा नु स्वबुध्यास्त
राजा तान्वीक्ष्य वायसान्॥६०॥ ताउधा मासतीव्रेण दंडेनानयुल्लदानवान्॥ वायसा ऊ॥ माधवस्व महाराज कस्मिं
श्चित्काणनांतरे॥६१॥ आगताश्च पृताश्चैव त्वया कोपेन वीक्षिताः॥ निस्तावानिरस्ता वा यास्यामः पन्ययां परमां
गतिं॥६२॥ ब्रह्मचापाधिमुक्तिर्नः तद्वाक्यकरणाद्भवेत्॥ तदादि शत्र महाराज यथा तव मतं प्रियं॥६३॥ कृत्वा मु
क्ता भविष्यामो ब्रह्मणो वचनं यथा॥ तच्छ्रुत्वा वचनं तेषां चाणाख्यो नृपसत्तमः॥६४॥ प्रोवाच यं चित दृष्ट्वा वचनं
सूर्यवं तदा॥ चाणाख्य उ०॥ मयि सत्यं प्रतिज्ञाय वचनं चेत्करिष्यथ॥६५॥ मोचयिष्ये न संतो युष्मान् सत्यं सत्यं म
योच्यते॥ छद्मना विकृते भो वैलों कोयं वंचितो मया॥६६॥ देवाश्च ब्राह्मणाश्चापि निर्दिष्या श्चकृता मया॥ न वंचि
तोहं केनापि किं तु युष्म द्विना द्विजः॥६७॥ तथापि लेशमात्रं हि किंमुक्ताव कृपा पुनः॥ नायं जीवेद्दंत्यवं वंचितः

केनचित्क्वचित्॥६९॥तस्मात्तीर्थे विनानं तु गत्वाद्य यमसंसदि॥श्रुत्वा च पुनरागत्य तन्मया ख्यानुमर्हथ॥६०॥स
त्यवाक्यं गृहीत्वा वः प्रेषयामि यमांतिकं॥ गोप्यं निवेद्य तां मह्यं श्रुत्वा वितभाषितं॥७०॥ तेनैव मुक्ताले का कागृही
त्वा सत्यमुत्तमं॥ प्रेषिता यमलोकाय स्रक्चंदनविभूषिताः॥७१॥ चाणाख्य उ०॥ तत्र धर्मपुरं गत्वा विरं चे व्य मितस्त
तः॥ यदिदृष्ट्वसि धर्मात्मा यमः संयमनो महान्॥७२॥ केयूयं कुत आयाता ब्रूतकेन विभूषिताः॥ मर्त्यैर्भारतीव
स्य कथनीत्याहाश्रंकितैः॥७३॥इक्ष्वाकुवंशजो राजा चाणाख्यो नाम धार्मिकः॥ द्वादशाहे मृतस्यास्य तर्पिता भो
जनार्चनैः॥७४॥मार्कं०॥ तच्छ्रुत्वा वचनं तस्य गतास्ते यममंदिरं॥ श्री द्वारं तः प्रांगणे तस्य स्रक्चंदनविभूषिताः॥७५॥
ते दृष्टा धर्मराजेन पृष्टाश्चैव पुनः पुनः॥ यम उ०॥ कुतः समागता यूयं वायसाः केन भूषिताः॥७६॥ ब्रूत तन्मे प्रय
त्नेन वायसा स्त्व विशंकिता॥ काका उ०॥ इक्ष्वाकुसंभवो राजा चाणाख्यो नाम धार्मिकः॥७७॥ मृतस्य द्वादशा
हे तस्य तस्य संतर्पिता वयं॥ तच्छ्रुत्वा वचनं तेषां तदा वैवस्वतो यमः॥७८॥ चित्रगुप्तं कलिं कालं वीक्ष्य तानि
दमब्रवीत्॥ अंडजस्वेदजादीनां तृणस्यापि सदा किल॥७९॥ विहितास्ब्रह्मणा नूनं गतिर्मत्संनिधौ स्वयं॥ ब्रह्म
 णा लोककर्तॄणां मथितं निखिलं तथा॥८०॥ अतस्त्वयं दुराचारो चाणाख्यो नाम तस्विह॥ अन्विष्य तां दुराणेषु
लोतिहा तेषु यागतिः॥८१॥ कथं कर्मणा केन मृतो श्रोचामतः परं॥ ततस्तेर्धर्मपालैस्तु धर्मराज प्रणोदितैः
॥८२॥ निरीक्षिता पुराणेषु श्रुतौ वा कर्म आपतिः॥ प्रोवाचैवं मतिव बोधधर्मो धर्मभृतामरः॥८३॥ शृण्वतां
नर्मपालानांमेघगंतीरया गिराः॥ न्यातो मया विशेषोत्र विचिंत्य च पुनः पुनः॥८४॥ तं मे शृणुत काकाद्या
स्तथैव च महर्षयः॥ जीवितं मरणं चैव द्वयं निःक्ष्येत पांडुतः॥८५॥ जीवितं दर्शनाभोकाभ्यां मरणं रणतीर्थयोः॥
अतः सुतीर्थमरणं वांछंति हि समानराः॥८६॥ शुक्लतीर्थे मृतानां तु नर्मदातटतीरजे॥ अंडज स्वेदजादीनां न गति
ममसंनिधौ॥८७॥ तत्तीर्थं कामिकं लोकेष्व विष्णुमहेश्वरैः॥ हिताय सर्वलोकानां शुक्लाख्यो रेविनिर्मि

तं॥८८॥ सत्यतानतपोनिष्ठैर्मरीच्याद्यैर्महर्षिभिः॥ समाधिसारमखिलं निन्यस्तमिह भारत॥८९॥ वापीपपात 493 / 2008
केयुस्काये नरा नर्मदाजले॥ शुक्लतीर्थे मृतान्स्तेन तेषां नियमालयं॥९०॥ मार्कं०॥ एतच्छ्रुत्वा च वचनं ते काका
यमभाषितं॥ आगताः शीघ्रगाः पार्थ दृष्ट्वा यमपुरं यथा॥९१॥ प्रणतास्तूर्णमागत्य यथावृत्तं यथा श्रुतं॥ वाय
साः कथयामासुः पूर्वदेवान्प्रति॥९२॥ तवादेशाद्गतास्तत्र यमस्य सदनं वयं॥ पृथिव्या दक्षिणे भागे त्वतीत्य
वक्रयोजनं॥९३॥ तत्पुरं कामदं दिव्यं स्वर्णप्राकारतोरणं॥ अनेकप्रहर्म्यबाधं मणिरत्नविभूषितं॥९४॥ चतुष्पथै
श्चत्वरैश्च घंटाकिंकिणिनादितं॥ उद्यानवनसंछिन्नं पद्मिनीखंडमंडितं॥९५॥ हंससारससंघुष्टं कोकिलाकुल
नादितं॥ न च नायोपविहितं स्वर्गलोकमिवापरं॥९६॥ गतास्तत्र ततश्चान्यैर्यमदूतैर्यमाज्ञया॥ विदितापेषिता
स्तत्र यत्रासौ रिरिपासनः॥९७॥ प्रणम्य भीतैर्दृष्टो सौ सिंहासनगतः प्रभुः॥ महाकायो महास्कंधो महाजंघो महो
दरः॥९८॥ महामहिषमारूढो महामुकुटो भूषितः॥ तत्रस्थस्तु कलिः कालश्चित्रगुप्तांतकस्तथा॥९९॥ सभा
गतास्तथा दृष्टा ज्वलिताः पावकाइव॥ पुण्यपापानि जंतूनां श्रुतिस्मृत्यर्थशंसनैः॥१००॥ विचारयंतः सत
तं तस्य राजे दिवानिशं॥ ततो स्माभिः प्रणमितो यमः संयमनो महान्॥१०१॥ पप्रच्छागमने हेतुं तथास्माभिर्नि
वेदितं॥ तस्मै यत्तच्छृणुष्वात्र नृपते भूतचेष्टितं॥१०२॥ उज्जयिन्यां महीपालश्चाणाख्यो भूत्यतापवान्॥ द्वा
दशाहे मृतस्यास्य भुक्ताः प्राप्तास्तवांतिकं॥१०३॥ ततो स्मद्वचनं श्रुत्वा कंपयित्वा शिरो यमः॥ प्रोवाच वच
ने सा सभुसभामध्ये हसंनिव॥१०४॥ अस्ति तत्कारणं येन चाणाक्यः पापपूरकः॥ न प्राप्नोयमलोकं हि सर्वलो
कभयावहं॥१०५॥ विचिंतयद्भिः सर्वैस्तैस्तु पुनः प्रोवाचैव यमः॥ शुक्लतीर्थे मृतानां तु नर्मदायां परं परं॥१०६॥
नायत्ते सर्वजंतूनां नात्र कार्या विचारणा॥ अवशः स्ववशो वापि जंतुस्तत्तीर्थमंडले॥१०७॥ मृतो नूनं शिवं
गच्छेच्छिवस्यानुचरो भवेत्॥ संति तीर्थान्यनेकानि गत्वा बुध्वा च वाक्रिय॥१०८॥ न शुक्लतीर्थतुल्यानां प्राप्नुवंतीति

निश्चयः॥ प्रभासे च प्रयागे च कुरुक्षेत्रे मरं करे॥२०॥ द्वारवत्यां तथा काश्यां शुक्लतीर्थे च हंसके॥ त्रिविधा जायंते मु
क्तिश्चित्रगुप्त शृणुष्व तां॥२१॥ सालोक्यां वे च सारूप्या सां निध्यात्री भ्रतः क्रमात॥ क्रमात्कालाच्च तुर्थिस्यात्सायोज्या
तत्रैव मृते॥२२॥ न मत्समीप मायाति जंतुस्तत्र मृतः क्वचित॥ तस्य तद्वचनं श्रुत्वा निर्वे निर्गत्य वे पुरात॥२३॥
आगच्छं तस्त्वपश्यामो विविधाः प्राणयातनाः॥ नरका घोररूपाश्च तान् शृणुष्व नराधिप॥२३॥ शतकोटयो हि
घोराणां नरकाणां निरीक्षिताः॥ दृष्ट्वा भीताः परामार्तिं गतास्तत्र महापतिः॥२४॥ नरकौ रौरवस्तत्र महारौर
वएव च॥ पीषणः शोषश्चैव कालसूत्रं च स्त्रिभंजनः॥२५॥ तामिस्रश्चांधतामिश्रः कृमिपूतिवहस्तथा॥ नदी
वैतरणी दृष्ट्वा सर्वपापप्रणाशिनी॥१६॥ शीतलं स्वच्छसलिलं पीयते ह्यमृतोपमं॥ तदेव तत्र पापानां शोणि
तं परिवर्त्तते॥१७॥ पूतिगंधं कृमिमयं फेनबुद्बुनसंकुलं॥ अगाधं ग्राहसंयुक्तं पापिनामतिपीडनं॥१९॥
असिपत्रवनं चात्र दृष्ट्वान्या महती शिला॥ अग्निपुंजनिभा सान्या चाल्मली च मितानथा॥१९॥ कृकचं कतली
धूली कुंभीपाको निकृंतनः॥ कुलालतैलयंत्रश्च भ्राष्ट्रीयंत्रश्च धातुकः॥२०॥ खदिरांगारकश्चैव कृतघ्नो यत्र धश्च
ते॥ नीलश्चैवोल्कश्चैव काकगृध्रश्च जीवनः॥२१॥ वाचिके मानसे पापे कर्मजे च पृथग्विधे॥ अहंकारकृते स्प
ष्टे मायाश्रितकूपरूपेः॥२२॥ पिता माता गुरुर्भ्राता अनाथा विकलेंद्रियः॥ धर्मत्यनादृतायैस्तेषां पातस्तु रौर
वे॥२३॥ तत्र ते ह्यादशाब्दानि क्षिपित्वा रौरवे धमाः॥ इह मानुष्यके लोके दिनं धास्तिभवं तिवै॥ देवं ब्रह्मस्वहर्तृणां
१२४॥
अन्येषां पापकर्मणां॥ महारौरवरमाश्रित्य तेषां वासोयमालये॥१२५॥ ततः कालेन महता पापाः पापेन वेष्टि
ताः॥ जायंते कंटके भिन्नाः कौशो वा कोश कारकाः॥१२६॥ मृगपक्षिपतंगानां घातका मांसकादकाः॥ पीषणं न
रकं यांति पोषणं जीवबंधनात॥१२७॥ इह मानुषतां प्राप्ताः पंगवः बधिरा नराः॥ गुरूणां ब्राह्मणानां च प्यलीकं कु
र्वतां सतां॥ पतनं जायते राजन् नलके कालसूत्रके॥ तत्र यातना घोरा विहिता शास्त्रदर्शिभिः॥१२९॥

भुंक्त्वा ता मा गता ह्यंते लभंते चांत्यजां गतिं॥ कुब्जा वामनकाः काणा जायंते दुःखभागिनः॥१३०॥ ये त्यजंति स्वकां भार्यां मूढाः 405/2008
पंडितमानिनः॥ हितामनागसां साध्वीं सुशीलां कुलवंशजां॥१३१॥ ते यांति नरकं घोरं तामिस्रं नात्र संशयः॥ ततो व
र्षशतं स्थित्वा इह मानुष्यतां गताः॥१३२॥ दुश्चर्मीणो दुर्भगाश्च जायंते दद्रुकंडुकाः॥ मानकूटं तुलाकूटं वंचद्रोहानृतं च
रन्॥१३३॥ नरके चांधतामिस्रे पच्यंते वै नराधिप॥ शतसाहस्रिकाब्दं सउषित्वा तत्र संकटे॥१३४॥ इहावतीर्णः शू
द्राणां मध्ये पगवं घंटैस्त्ववान्॥ जायंते सुचिरं कालं शत्रुभिः परिभूयते॥१३५॥ पितृदेवद्विजातिभ्यो ह्यदत्वा यस्तु भुंज
ति॥ कृमिपक्षे स नरके नियते दात्मपोषकः॥१३६॥ तत्र संवत्सरशतं कृमयो दंति निर्घृणाः॥ इह वा जायते कालाद
शुचिः कृपणात्मकः॥१३७॥ दुर्गंधः क्रूरदंष्ट्रोग्धापर भाग्योपजीविकः॥ अग्निदो गरदश्चैव लोभमोहरतो नरः॥१३८॥
नरके विषसंपूर्णे प्रपंते तत्सदुरात्मवान्॥ तत्र वर्षशतं पूर्णं भज्जत्युन्मज्जति स्थिति॥१३९॥ भुवि मा विष्यतां प्राप्य
स्याद्दीनः कृपणोपि सः॥ पादुका पानहौ छत्रं शय्या प्रावरणानि च॥१४०॥ अदत्वा दत्तामनो केर्भक्ष्यते जन्मसप्ततिः॥
या सा वैतरणी घोरा नदी रक्तप्रवाहिनी॥१४१॥ पिबंति रुधिरं तत्र ये तु यांति रजस्वलां॥ असीपत्रवने घोरे क्षिप्यंते
पापकारिणः॥१४२॥ परपीडारतो नित्यं महापातकिनो नराः॥ गुरुदाररता नित्यं महापातकिनो नराः॥१४३॥ शा
ल्मलीमन्व गृहंति वन्हितसां पुनः पुनः॥१४३॥ आयसीं कंटकेर्व्याप्तां अगम्यागामिनश्च ये॥ क्रूरा यायातना तेषां जाय
ते जन्मसप्ततिः॥१४४॥ ज्वलल्लोहशिलायां तु घोरायां बहुविस्तरं॥ सुप्तालुर्दंति सततं परदाररता नराः॥१४५॥ प
रस्य योषितं हृत्वा ब्रह्मस्वमपहृत्य च॥ अरण्ये निर्जले देशे भवंति ब्रह्मराक्षसः॥१४६॥ देवस्वं ब्राह्मणस्वं च लोभतो वा
हरेत्स्वयं॥ स पापी नरकान् भुक्त्वा गृहश्वा जायते भुवि॥१४७॥ एवमादीनि पापानि भुंजंति यमशासनात्॥ येषां वि
श्रवणादेव दर्शनात् जायते भयं॥१४८॥ तथा दानफलं चान्ये भुंजमाना यमालये॥ दृष्टास्तत्र महाभागतपः संच
यसंभृताः॥१४९॥ रथैरन्ये गजैरन्ये के चिद्वाजिभिरावृताः॥ दृष्टा श्रुता कथयतो हतानां यमशासनात्॥१५०॥

रे॰ खं॰ गोदानुः स्वर्णदानुश्च भूमिरत्नप्रदस्य च॥ शय्यासनगृहादीनां लोकास्तु कामदान्नृप॥१५१॥ अन्नपानीयसंयुक्तं
यद्ददाति नृपोत्तमाः॥ ते स्वर्गे द्रुष्टपुष्टाश्च तत्साः क्रीडंति सर्वतः॥१५२॥ अत्र यद्दीयते दानमपि बालाग्रमात्रकं॥ देशे
काले च पात्रे च विधिनान्नृपसत्तम॥१५३॥ तदक्षयफलं सर्वं जायते प्रति जन्मनि॥ एतत्ते कथितं सर्वं यद्दृष्टं च
श्रुतं नृप॥१५४॥ यदत्रानंतरं कार्यमभिप्रेतं कुरुष्व तत्॥ तच्छ्रुत्वा वचनं तेषां बाणाख्यो दुष्टमानसः॥१५५॥ विस
र्जयामास खगान् अभिनंद्य पुनः पुनः॥ गतेषु तेषु सर्वेषु संदत्वा विप्रेभ्य एव च॥१५६॥ कामक्रोधौ वशे कृत्वा
अगामामरपर्वतं॥ तत्र बध्वा कुटुंगाढं कृत्वा रज्वा विलंबितं॥१५७॥ नीलं रक्तं च शुभ्र यतो रज्जुद्वयमुपाक्षिपत्
॥ चिंतयन्के स्मरामीति मूर्तिषु त्रिषु मुक्तिदं॥१५८॥ द्विजवाक्यमिदं प्राप्य मोक्षदो धौक्षजस्त्विति॥ पूजमानो
जगामाशु ध्यायमानो जनार्दनं॥१५९॥ आरोग्यं भास्करो दद्यात् धनं दद्यात् हुताशनः॥ ज्ञानं हि सर्वं शंकरो दद्यात् मोक्ष
मधोक्षजः॥१६०॥ निश्चित्यैवं नरपतिः प्लुवनाशु महानदीं॥ तत्तारतीर्थमाकाक्षन् शुक्लाख्यां भवजाह्नवी॥
॥१६१॥ नि निरक्तं ज्यदभवन् मेचं कसूत्र रज्जुकं॥ शुक्लं स्फटिकसंकाशं जातं तत्राश्चवैक्षत॥१६२॥ दृष्ट्वा
चमत्कृतो राजा चिरं संचिंत्य चाच्युतं॥ प्रविश्य विमलेनाथे भक्तो सौ वैष्णवं परं॥१६३॥ ध्यायंति यं योगविदः पु
राणा नारायणं त्वच्युत॥ मप्रमेयं॥ तं प्राप्तवान् राजसुतो महात्मा क्षिप्त्वा तनुं नार्मदशुक्लतीर्थे॥१६४॥ एत
त्ते कथितं राजन् बाणकाख्यानमुत्तमं॥ तेधान्यत्संप्रवक्ष्यामि माहात्म्यं तच्छृणुष्व मे॥१६५॥ इति श्रीनर्म
दामा॰॥ शुक्लतीर्थे बाणाख्यनृपतिसिद्धिर्नाम॥ मार्कं॰॥ नास्ति लोकेषु तत्तीर्थं पृथिव्यां यन्नरेश्वर॥ शुक्ल
तीर्थसमासाद्य उपमानेन दीयते॥१॥ शुक्लतीर्थं सदैवेह नर्मदायां व्यवस्थितं॥ प्रागुदक्प्रमाणत्वं देवो हु २४७
रसिद्धर्षिसेवितं॥२॥ सर्वधर्ममयं बीजमिह मुक्तं स्वयंभुवा॥ सर्वज्ञानमयं बीजमृषिभिः स्तत्वदर्शिभिः॥
॥३॥ आदित्यकल्पसमारंभे तथा सिद्धैरिहाग्रतः॥ समाधाना समारोमं मुक्तिबीजं निवेशितं॥४॥ अथ शुक्लं

शुक्लतां याति शुक्लं च परमार्थतां॥ तीर्थस्मिन्नपशार्दूल शुक्लतीर्थमतो विदुः॥५॥ वैशाखे च तथा मासि शुक्ले कृष्णे दि
वा हनि॥ कैलासाद् उमया सार्धं स्वपमायाति शंकरः॥६॥ मध्याह्नसमये स्नात्वा पश्यत्यात्मानमात्मनि॥ ब्रह्मवि
ष्णिंद्रसहितः क्षेत्रे स्नातुं समागतः॥७॥ कार्तिका षाढ वैशाख माघ पूर्णदिने स्वयं॥ ब्रह्मा च्युतो रविः स्नात्वा महा
देवं प्रपश्यति॥८॥ देवराजः सुरैः सार्धं वायुमार्गे व्यवस्थितः॥ भूत्वा दृष्ट्वा महादेवं स्नात्वा पश्यति भक्तितः॥९॥
गंधर्वाप्सरसो यक्षा सिद्धविद्याधरोरगाः॥ तस्मिन्ने तेपि देवेशं दृष्ट्वा मुंचंति किल्बिषं॥१०॥ अर्धयोजनविस्ता
रं तद्दर्शनात्तदायकं॥ शुक्लतीर्थं महापुण्यं महापातकनाशनं॥११॥ यत्र स्थिते प्रदृश्यंते रक्षांसि प्राणिनरोत्तमः
॥ तत्रस्था अपि ते सर्वे मुच्यंते पातकैर्नराः॥१२॥ पापोपपातकैर्युक्तो नरः स्नात्वा विमुच्यते॥ भीतभीता नरः श्रे
ष्ठ भ्रूणहत्या विनश्यति॥१३॥ तत्र तिष्ठति देवेश उमया सह शंकरं॥ वैशाख्यां तु विशेषेण कैलासादेत्य भारत॥
१४॥ सरिद्भिः सह सर्वाभिः सत्तीर्थैः केतुभिर्वृतैः॥ शुक्लत्वमृषयः सर्वे याति सिध्यामरैः सह॥ निशांते प्राप्य पुरतुलां
पुरा पार्थिवसुत्तमा॥ तेन तीर्थं महापुण्यं शुक्लाख्यं पापनाशनं॥१६॥ कथितं ब्रह्मणा पूर्वं मायाते समुदाहृतं॥
रजकेन यथा धौतं वस्त्रं भवति निर्मलं॥१७॥ तथा कलेवरं स्नातं शुचिः स्याद्दाशु भूपते॥ पूर्वे वयसि पापानि
कृत्वा पुष्टानि मानवः॥१८॥ अहोरात्रोषितो भूत्वा शुक्लतीर्थे व्यपोहति॥ शुक्लतीर्थे महाराज दत्तो रेवां जलांजलिः
॥१९॥ कल्पकोटिसहस्राणि पितरस्तेन तर्पिताः॥ न माता न पिता बंधुः पतंतं नरकार्णवे॥२०॥ उद्धरंति यथा पु
ण्यं शुक्लतीर्थं नरेश्वर॥ तपसा ब्रह्मचर्येण नतां गच्छति सद्गतिं॥२१॥ शुक्लतीर्थे मृतो जंतुर्देहत्यागेन यान् कृमे
त॥ कार्तिकस्य तु मासस्य शुक्लतीर्थे दिनेन्नृप॥२२॥ घृतेन स्नापयेद्देवमुपोष्य प्रयतो भवेत्॥ स्नात्वा प्रभाते
रे वायां योदद्यात् घृतकंबलं॥२३॥ सहिरण्यं यथाशक्त्या समुद्दिश्य महेश्वरं॥ स गच्छति महातेजाः शिवलो
कं मृतो नरः॥२४॥ सविंशतिकुलोपेतो यावदाहूतसंप्लवं॥ शुक्लतीर्थे नरः स्नात्वा उमां रुद्रं च यो र्चयेत्॥२५॥

497/2008

रे०खं० गंधपुष्पाक्षतैर्धूपैतोश्वमेधफलं लभेत्॥मासोपवासं यः कुर्यात्तस्मिंस्तीर्थे युधिष्ठिर॥२६॥समुच्यते महापापैः स
जन्मार्जितैरपि॥उष्ट्रीक्षीरमजाक्षीरं माघश्राद्धेषु भोजनं॥२७॥वृषलीगमनं चैव तथाभक्ष्यभक्षणं॥अवि
क्रेयान्नतेपापं माहिष्येयाज्ययाजके॥२८॥बाधुष्यपंक्तिगरदे देवब्राह्मणनिंदके॥एवमादीनि सर्वाणि यानि वा
न्यानि भारत॥२९॥शुक्लतीर्थे विनश्यंति कृत्वा चांद्रायणं व्रतं॥शुक्लतीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः॥३०॥
तस्य ते द्वसहस्राणि तृप्तिं यांति सुतर्पिताः॥पादुकोपानहौ छत्रं शय्यामासनभोजने॥३१॥स्वर्णं रूप्यं च कुप्यं
च धान्यमन्यरसान्नप॥वाससी जलमन्नं च शुक्लतीर्थे ददंति ये॥३२॥ते सर्वकामसंपूर्णाः शिवलोकफलं लभे
तत्र तीर्थे तु यो भक्त्या शिवमुद्दिश्य भारत॥यतीनां व्रतिनां चैव शुक्लतीर्थनिवासिनां॥३३॥अपि वालाग्रमा
त्रं तु दत्तं भवति चाक्षयं॥अग्निप्रवेशं यः कुर्यात्तस्मिंस्तीर्थे युधिष्ठिर॥३४॥अग्निलोकनिवासी स्यात्स शिवलोके
युगायुतं॥जलप्रवेशं यः कुर्याच्छुक्लतीर्थे समाहितः॥३५॥रागद्वेषविनिर्मुक्तो हृदि ध्यात्वा जनार्दनं॥सर्वकामसु
संपूर्णः स गच्छेद्वारुणं पुरं॥३६॥शुक्लतीर्थं परं पार्थ सर्वव्याधिविनाशनं॥नास्ति तेन समं तीर्थं द्रष्टा हा देवो महेश्व
रः॥३७॥दर्शनात्स्पर्शनात्तस्य स्नानाद्दानात्तपोजपात्॥होमाच्चैवोपवासाच्च शुक्लतीर्थे महत्फलं॥३८॥योजनं त
त्स्मृतं क्षेत्रं समंताद्देवसेवितं॥शुक्लतीर्थं त्रिलोकेषु विख्यातं पापनाशनं॥३९॥पादपाग्रेण दृष्टेन ब्रह्महत्यां विनश्य
ति॥देव्या सह सदा भर्गस्तत्र तिष्ठति शंकरः॥४०॥कृष्णपक्षे चतुर्दश्यां वैशाखे च विशेषतः॥स्वकालोकाद्विनि
र्गत्य तत्र संनिहितो भवेत्॥४१॥क्षीरदाहाल्पिलोसाघेमलं मुंचे तु धातव॥आजन्मजनितं पापं त्यजती तिन
रो ध्रुवं॥४२॥स्नानं दानं तपः श्राद्धमनंतं तत्र दृश्यते॥शुक्लतीर्थात्परं तीर्थं न भूतं न भविष्यति॥४३॥तपसा २४८
ब्रह्मचर्येण यज्ञैर्दानैर्न वा पुनः॥न तां गतिमवाप्नोति शुक्लतीर्थे तु यां लभेत्॥४४॥शुक्लतीर्थं महातीर्थं ऋषि
सिद्धनिषेवितं॥तत्र स्नात्वा नरो राजन्पुनर्जन्म न विंदति॥४५॥अयने वा चतुर्दश्यां संक्रांतौ विषुवे तथा॥

स्नात्वा तु पोषितः शुद्धो विजितात्मा समाहितः॥४६॥दानं दत्वा यथाशक्ति नच्यवेदेश्वरात्सदा॥त्यापाचाय बुधंने वं ४९९/2008
वयेतां हरिशंकरौ॥४७॥तीर्थस्यास्य प्रभावेन सर्वं भवति चाक्षयं॥अनाथं दुर्गतं विप्रं नाथवंतमथापि वा॥४८॥उ
द्वाहयति यस्तत्र तस्य पुण्यफलं शृणु॥यावत्तद्रोमसंख्यानं तत्प्रसूतिकुलेषु च॥४९॥तावद्वर्षसहस्राणि रुद्र
लोके महीयते॥नरोगो न जरा तत्र यत्र देव उमापतिः॥५०॥अनाशकं तु यः कुर्यात्तस्मिंस्तीर्थे युधिष्ठिर॥अनिव
र्तिगतिस्तस्य रुद्रलोकान्न संशयः॥५१॥अयने स्व वर्णे वापि जंतुस्तत्क्षेत्रमंडले॥मृतः स तु न संदेहो रुद्रस्यानुच
रो भवेत्॥५२॥शुक्लतीर्थे तु यः कन्यां शक्त्या दद्यादलंकृतां॥विधिवद्धा नरः श्रेष्ठ कुरुते वृषमोक्षणं॥५३॥तस्य य
त्फलमुद्दिष्टं पुराणे रुद्रभाषितं॥तदहं ते प्रवक्ष्यामि शृणुष्वैकमनान्नप॥५४॥यावंति तस्य रोमाणि सर्वांगेषु पृ
थक् पृथक्॥तावद्वर्षसहस्राणि स्वर्गलोके सुखं वसेत्॥५५॥शुक्लतीर्थे तु यद्दत्तं ग्रहणे चंद्रसूर्ययोः॥वर्धते तद्धु
णं तावद्यावद्वर्षाणि पंच च॥५६॥शुक्लतीर्थे शुचिर्भूत्वा यः करोति प्रदक्षिणं॥प्रदक्षिणीकृता तेन मही नास्त्यत्र
संशयः॥५७॥शोभनं मिथुनं यस्तु रुद्रमुद्दिश्य पूजयेत्॥सप्त जन्मानि वै तस्य न वियोगो भवेत्क्वचित्॥५८॥
तावद्रूर्जं ति तीर्थानि क्षेत्राणि भरतर्षभ॥यावन्न शुक्लतीर्थं हि सेव्यते वांछितार्थदं॥५९॥एतत्ते कथितं राजन्
शुक्लतीर्थे हि यत्फलं॥यद्दृष्टं शृणुयाद्भक्त्या पुराणविहितं फलं॥६०॥स लभेन्नात्र संदेहः सत्यमेतन्मयोदितं॥
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनं॥६१॥मोक्षार्थी लभते मोक्षं स्नानदानात्परं पदं॥रहस्यमेतत्परमं शु
क्लतीर्थं युधिष्ठिर॥६२॥पठनाच्छ्रवणादस्य सर्वक्रतुफलं लभेत्॥६३॥इति श्रीवायुप्रोक्ते रेवासंहितायां नर्म
दामा० शुक्लतीर्थे॥मार्कं०॥ततो गच्छेन्महाराज स्नायाद्दक्षिणतटे कोनदृष्यांतरे पुण्यं तीर्थं कलकलेश्वरा
त॥१॥संगमेश्वरसंज्ञं तु तीर्थं पापक्षयंकरं॥धनदस्तत्र विश्रांतो मुहूर्तं नृपसत्तम॥२॥एवं णाभिद्रुतः पू
र्वं कायाशंकरं च जन॥स्वयं पीत्वा समादिष्टः कैलासे धरणीधरे॥३॥तस्य पादेन नमितं मधुपूर्णं कमंडलुं॥

रेवाखं० कमंडलुकृतातत्र च्युतामधु लतातदा॥४॥ प्रत्ययार्थं नृपश्रेष्ठ अध्यापि धरणीतले॥ रत्नवर्णा हिपाषाणा दृश्यं
ते विविधप्रभाः॥५॥ विंध्याद्रेरीश्वरधाता पुण्यतोया सरिद्वरा॥ तदा निर्भेदरूपेण नाम्ना मधुमती शुभा॥६॥
कमंडलुजलोद्भूताय क्षराजस्यादिकल्पतः॥ प्रविष्टा नर्मदा तोये सर्वपापप्रमोचने॥७॥ संगमे तत्र यः स्नात्वा पू
जयेत्संगमेश्वरं॥ कुबेरस्तापिते लिंगे विनोदात्तत्सरिद्वरा तु॥८॥ अश्वमेधस्य यत्तस्य फलं प्राप्नोत्यसंशयं॥
घंटाध्वजवितानेन यो दद्यात्संगमेश्वरे॥९॥ हंसयुक्तविमानस्थो दिव्यस्त्रीशतसंवृतः॥ सरुद्रपदमासा
द्य रुद्रस्यानुचरो भवेत्॥१०॥ दधिभक्तेन देवस्य यः कुर्याल्लिंगपूरणं॥ सिक्थसंख्यावत्मानं स वसेच्छिवपु
रे मुदा॥११॥ त्रिफलैः पूरयेल्लिंगं नित्यं स्वोभूत्वा शिवस्य तु॥ सोपि तत्फलमाप्नोति गतः सर्वं नरेश्वर॥१२॥ अ
क्षया संततिस्तस्य जायते जन्मसप्तकं॥ स्नपनं देवदेवस्य दध्ना मधुघृतेन च॥१३॥ पयसा तीर्थतोयेन सित
याचावगुंठनं॥ यः करोति विधानेन तस्य पुण्यफलं शृणु॥१४॥ घृतक्षीरवहा नद्यो दधिपायसकर्दमाः॥ श
र्करावालुका यत्र यत्र वृक्षा मधुश्रवाः॥१५॥ तत्र ते मानवा यांति ये चर्चयंति महेश्वरं॥ पत्रं पुष्पं फलं तोयं यस्तु
दद्यान्महेश्वरे॥१६॥ स तस्य सप्तजन्मानि फलमक्षयमश्नुते॥ सर्वेषामेव पात्राणां महापात्रं महेश्वरः॥१७॥
तस्मात्सर्वप्रयत्नेन नर्मै सदाभ्यर्च सदाशिवः॥ ब्रह्मचर्यधरो नित्यं यस्तः पूजयते शिवं॥१८॥ इहं जीवं स्व
देवस्यान्मृतो गच्छेदनामयं॥ शिवे हि पूजिते पार्थ यत्फलं प्राप्यते बुधैः॥१९॥ योगिनश्चापि तत्सार्थं पूजना
ल्लभते फलं॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितं॥२०॥ येषां गृहे तु भुंजंति शिवभक्तिपरायणाः॥ सं
निरुध्येंद्रियग्रामो यत्र यत्र वसेन्मुनिः॥२१॥ तत्र तत्र कुरुक्षेत्रं नैमिषं पुष्करं गया॥ यत्फलं वेदविद्भिर्भो २४९
जितैः शतसंख्यया॥२२॥ भिक्षामात्रप्रदानेन तत्फलं शिवयोगिनां॥ यत्र भुंजति भस्मांगी पूर्वो वा पं
डितोपि वा॥२३॥ तत्र भुंजति देवेशः सपत्नीको वृषध्वजः॥ द्विजानां वेदविदुषां कोटिभोज्येषु यत्फलं॥२४॥

जायते पार्थ एकेन तत्फलं शिवयोगिनां॥ संगमेश्वरमासाद्य प्राणत्यागं करोति यः॥२५॥ न तस्य पुनरावृत्तिः शिव 501
लोकात्कदाचन॥ शुक्लपक्षे त्रयोदश्यां फाल्गुने मासि भारत॥२६॥ मधुमाधवयोर्वापि स्नात्वा संपूजयेच्छिवं॥ सो
पवासः शुभैर्गंधैर्धनवान्पुत्रवान्भवेत्॥२७॥ सर्वान्कामानवाप्नोति जागरे दीपदो हि यः॥२८॥ इति श्री रेवा० मधुम
ती संगमेश्वरमहात्म्यं॥ मार्कं०॥ ततो गच्छेत्तु राजेंद्र संगमेश्वरमुत्तमं॥ अदूरे संगमेशस्य नर्मदा यत्र शंकरं॥१॥ स्था
पयामास वै रूपी प्राप्तं साक्षान्महेश्वरं॥ यत्र निंबुमती नाम तथा धर्ममती नदी॥२॥ रेवया संगमे पुण्ये तत्र पापो
हरेश्वरः॥ सखा वै किंनरेशस्य स्त्रीहाद्दृष्टुं पुरा किल॥३॥ निंबको नाम यक्षाग्र्यः महाघोधनदस्य तु॥ तेनापि नि
र्जितस्तस्य स्वनाम्ना वै प्रसाहितः॥४॥ दृष्ट्वा मधुमती तोये तथा निंबकृतं जलं॥ रेवायासंगतं पार्थ तत्र देवो महे
श्वरः॥ धनिना निंबुना यक्षैर्मणिभद्रादिभिः सह॥ स्वगणैर्गंजा सार्धमेखलज्जलखेलनं॥६॥ नर्मदा तत्र वी
थातादृष्ट्वा केलिपरं हरं॥ प्रणम्य प्रार्थयामास स्थीयमत्र महेश्वर॥७॥ सदा मपि नयौ कृत्वा मं नाम्ना स्थापितो भवे॥
नथेत्युक्त्वा महेशानं किंचित्कालं विहृत्य च॥८॥ अपि निधागतो रेवां तत्रैवादर्शनं ययौ॥ नर्मदा स्थापयामास शि
वमत्र स्वसंज्ञया॥ ततः प्रभृति राजेंद्र विख्यातो नर्मदेश्वरः॥ निंबुनाचात्मतुष्ट्येनं बलभद्रं निवेशितं॥१०॥ पुरं
परमयोगिंद्र पुष्टौ ददौ सः प्रसादतः॥ तत्रोष्यहर्निशं भक्त्या ब्रह्मचर्यसमन्वितः॥११॥ मौनी शिवध्यानपरोभ्य
र्चयंपरमेश्वरं॥ निंबपत्रं मुखे दत्वा बिल्वपत्रमथापि वा॥१२॥ योगिनः पूजयंभक्त्या गां च दद्यात्सुशोभनां॥
एवं कुर्वन्महाराज नरोकैः परिभूयते॥१३॥ नरोगदुःखदौर्भाग्यं लभते स्यान्न निर्धनः॥ नर्मदेश्वरमासाद्य
तथा विप्रांश्च भोजयेत्॥१४॥ श्राद्धं कृत्वा विधानेन नदैन्यं लभते नरः॥ दशवर्षसहस्राणि पितॄणां तृप्तिर
क्षया॥१५॥ गणमुख्यो भवेत्पार्थ नरो देवस्य भक्तिमान्॥ नमः शिवाय मंत्रेण सप्ताहं शीकरेयजन्॥१६॥
बिल्वमंदारधत्तूरकुशाकाशपलाशजैः॥ पुष्पैरभ्यर्चनं पतेनरैषोहि भवेदिह॥१७॥ इति श्री रेवा० न

रे॰खं॰ र्मदेश्वरतीर्थं॥ मार्कं॰॥ ततः पुण्यं महाराज तीर्थं ह्यनरकेश्वरं॥ नर्मदेश्वरतीर्थाद्धि स्थितं क्रोशाद्वयान्तरे॥ १८॥ त
त्र तीर्थे नरः स्नात्वा पापकर्मापि भारत॥ न पश्यति महाघोरं नरकद्वारसंस्थितं॥ १९॥ युधिष्ठिर उ॰॥ शुभाशुभैः
फलस्नात भुक्तभोगान रास्त्विह॥ त्वायं तेलक्षणैरस्ते स्तुतानि मे वद भार्गव॥ २०॥ यथा निर्गच्छते जीवस्त्यक्त्वा
देहं न दृश्यते॥ तथा गच्छेत्पुनर्देहं पंचभूतात्मकं कृतं॥ २१॥ त्वगसृङ्मांसमेदोस्थिकेशस्नायुशतैः सितं॥ वि
ण्मूत्ररेतःसंघातिकासंज्ञा जायते नृणां॥ २२॥ कथं तीर्थमिदं जातं नाम्ना चानरकेश्वरं॥ एतत्सर्वं ममाचक्ष्व
कृपया मुनिसत्तम॥ २३॥ सूत उ॰॥ एवमुक्तः समार्कंडुः कथयामास तत्त्ववित्॥ ध्यात्वा सनातनं शर्वं देव
देवं महेश्वरं॥ २४॥ मार्कं॰॥ शृणु पार्थ महाप्रश्नं कथयामि यथाश्रुतं॥ सकाशाद्ब्रह्मणः पूर्वं देवविप्रसमाग
ते॥ २५॥ येनेमे ह तपस्तप्तं पुरा वर्षत्रयं महत्॥ महेशं द्रष्टुकामेन नानोपायव्रतैरपि॥ २६॥ सुतश्च भगवा
नीशः सर्वस्यार्तिहरो हरः॥ यम उ॰॥ नमो देवाय शर्वाय सर्वाधाराय शंभवे॥ २७॥ वरदाय वरेण्याय स्वर्गस्थि
त्यंतहेतवे॥ नमो गिर्वाणपतये गिरिशगिरिजापतये नमः॥ २८॥ नमोस्तु पंचवक्त्राय जगद्भर्त्रे नमो नमः॥
यो देवः सर्वदेवात्मा पठ्यते वेदवादिभिः॥ ३०॥ तं नमाम्यखिलाधारं विश्वरूपं महेश्वरं॥ यो देवः सार्ववि
सर्वज्ञः सर्वदर्शनः॥ ३१॥ वेदांतवेद्यो वरदः स्तं नमामि जगन्मयं॥ निर्दोषो निर्गुणः शांतो निराबाधो निरी
हकः॥ ३२॥ सर्वज्ञः सर्ववेद्योयः स्तं नमामि चराचरं॥ यो ब्रह्मसंज्ञया देवः सृज्यते लक्ष्मराचरं॥ रजोगुणमयो
भूत्वा तं नमाम्यादिवेधसं॥ ३३॥ यो विष्णुसंज्ञया विश्वं पाति सत्वात्मकः शिवः॥ विविधोपद्रवेभ्यश्च विश्वरू
पेण नमामि तं॥ ३४॥ निःप्रपंचो निरीहश्च प्रपंचार्तिहरो हरः॥ यस्मादुत्पद्यते विश्वं प्रपंचं यस्तं नमाम्यहं॥ २५०
३५॥ यस्माद्दिंद्राद्यो देवा यस्मात्सर्वादयो ग्रहाः॥ प्रदानि प्राप्य मर्यादां पालयंति नमामि तं॥ ३६॥ अ
स्ति नास्तीति सदसत्प्रोच्यते वै महात्मभिः॥ यश्चाष्टमूर्तिः सततं नमस्तस्मै नमो नमः॥ ३७॥ मार्कं॰॥ एवंतु

स्तुवतस्तस्य तेजोमयवपुर्धरः॥ प्रत्यक्षः प्राह भगवान् यमलोकपतिं पुरा॥ ३८॥ ईश्वर उ॰॥ प्रसन्नोस्मि महाभाग ब्रू
हि यत्तेभिवांछितं॥ स्तोत्रेणानेन तुष्टोहं दास्यामि वरमुत्तमं॥ ३९॥ यम उ॰॥ यदि तुष्टोसि देवेश यदि दास्यसि मे व 503/2008
रं॥ खिन्नोस्मि सततं देव कृत्वा वै प्राणिमारणाः॥ ४०॥ बीभत्सं कर्म एतादृक् नारकं नेवरोचते अन्येषां लोकपाला
नां व्यावृत्तिर्वै पृथग्विधाः॥ ४१॥ रौद्रभीभत्सकरुणानयकृत्वा हि मे स्थितिः॥ व्यापारेणानेनैतेन तस्मान्मां पा
हि पार्श्वगं॥ ४२॥ ईश्वर उ॰॥ नैव वाच्यं त्वया भद्र व्यापारस्थितिरीदृशी॥ यथातथं कर्म कुर्वन्नरो दोषैर्न लिप्यते॥
॥ ४३॥ तवैव विहितं धर्मकर्म चेदं करेष्वपि॥ नत्वां कोन्यो मतो मह्यं प्राणिनां कर्मसाधने॥ ४४॥ शुभाशुभानि
कर्माणि विविधानि बहूनि च॥ कृत्वा लब्ध्वा यामायांति प्राणिनस्त्विति निश्चयः॥ ४५॥ तस्मात्त्वया विषादोत्र न क
र्तव्यः कदाचन॥ मच्छस्त्राविष्टितो नूनं करोषि न यदृच्छया॥ ४६॥ न ते दोषोणुमात्रोपि चरतो वै यथातथं॥ प्रार्थय
स्व यथाकामं तुष्टोस्मि तव सुव्रत॥ ४७॥ धर्म उ॰॥ एवं भवतु देवेश प्रमाणं वचनं तव॥ तदत्र तीर्थे सततं त्वं
या स्थेयं सदैव हि॥ ४८॥ दयां कृत्वा मयि परां नरकांतकसंज्ञया॥ अत्र तीर्थे च दिवसे मासि चाश्वयुजे विभा॥
॥ ४९॥ कृष्णपक्षे चतुर्दश्यां द्रष्टव्यः प्रत्यक्षगो भवान्॥ अत्र तीर्थे तथा स्नात्वा यस्त्वां पश्येच्च पूजयेत्॥ ५०॥ नरकं स न प
श्येद्धि तथा त्वं देहि मे वरं॥ मां च संतर्पयेद्भक्त्या रेवाजलतिलैस्तु यः॥ ५१॥ सं तु तस्याक्षया लोकाः सुखप्राप्या
स्त्वनारकाः स्तोत्रेणानेन च नरो यस्त्वां स्तौति महेश्वर॥ ५२॥ स प्राप्नोतु महाभोगान्सौभाग्यं संततिं सुखं॥ मार्कं॰॥
तेनैवमुक्तो देवेशस्तथेत्युक्त्वा सनातनः॥ ५३॥ सर्वं भविष्यतीत्युक्त्वा तत्रैवांतरधीयत॥ यमोपि तत्र संस्थाप्य
देवं त्वं नरकेश्वरं॥ ५४॥ स्नात्वा संपूज्य विधिवज्जगाम शुभकं पुरं॥ ततः प्रभृति विख्यातं तीर्थं त्वनरकेश्व
रं॥ ५५॥ सर्वपापक्षयकरं दुःखदुर्गतिनाशनं॥ अतः परं महाराज कर्मचिन्हानि मे शृणु॥ ५६॥ आयांते लक्ष
णैर्ये स्तु लक्षिताः सर्वयोनिषु॥ गुरुरात्मवतां शास्ता शास्ता राजा दुरात्मनां॥ ५७॥ इह प्रच्छन्नपापानां शास्ता वै

रे॰खं॰ बस्तलोयमः॥ अजीर्णप्रायश्चित्तानां यमलोके घनेकधा॥५८॥ यातनाभिर्विमुक्तानां जनेकांजीवसंततिं॥ गत्वामा
नुषभावेषु पापचिह्नाभवंतिते॥५९॥ तान्यहं संप्रवक्ष्यामि शृणुष्वैकमनान्नृप॥ वैवस्वतक्षयं प्राप्य सहित्वा सर्वया
तनाः॥६०॥ निस्तीर्य तास्ततस्तिस्तु लोकमायांति चिह्निताः॥ गद्गदोनृतवादी स्यान्मूकश्चैव गवानृते॥६१॥
ब्रह्महा जायते कुष्ठी श्यावदंतस्तु मद्यपः॥ कुनखी स्वर्णहारी स्याद्दुश्चर्मा गुरुतल्पगः॥६२॥ संयोगी हीनयोनिः
स्यात् दरिद्रो दत्तदानतः॥ ग्रामशूकरतां याति अयाज्ययाजको द्विजः॥६३॥ खरो वै बहुयाजी स्यात् काकोनि
मंत्रभोजनः॥ अपरिक्षितभोजी स्याद्व्याघ्रो निर्जने वने॥६४॥ बहुलजी को मार्जारः खद्योतः कक्षदाहकः॥ त्र
विद्यां यः प्रयच्छेत बली वर्दो भवेत्तु सः॥६५॥ अन्नं पर्युषितं विप्रे प्रदद्यात् कुब्जतां व्रजेत॥ मात्सर्यादपि रात्र्य
धो जन्मांधः पुस्तकं हरन्॥६६॥ फलान्याहरतो पत्यं म्रियेतात्र संशयः॥ मृतो वानरतां याति तन्मुक्तो ग
लगंडवान्॥ कथाभंगकरो यस्तु कर्णरोगी प्रजायते॥६७॥ अदत्वा भक्ष्यमश्नाति सोनपत्यो भवेन्नरः॥ हरंश्च
क्रौंचो भवेद्रोगी गदरः पवनाशनः॥६८॥ प्रव्रज्यागमनाद्राजन् भवेन्मरुपिशाचकः॥ चालको जलहर्ता स्याद्धा
न्यहर्ता च मूषकः॥६९॥ अप्राप्तयौवनां सेवन् भवेत्सर्पः इति श्रुतिः॥ गुरुदाराभिगामी च कृकलासो भवेद्ध्रुवं॥
॥७०॥ जलप्रवहणं यस्तु भिंद्यान्मत्स्यो भवेन्नरः॥ अविक्रेयान्विक्रयन्वै विकटाक्षो भवेन्नरः॥७१॥ अयोनिगो वृ नि
को हि स्यात् उलूकः क्रयवंचनात्॥ मृतस्यैकादशाहे तु भुंजानः श्वाभिजायते॥७२॥ प्रतिश्रुत्य द्विजायार्थानद
दं जंबुको भवेत्॥ रात्रीगामी भवेद्दुष्टस्तस्करोतिविदुराहकः॥ परिवादा द्विजातीनां लभते कच्छपीतनुं॥
ज मेद्रवलूकोराजन्योनिं चांडालसंस्थितो॥७४॥ दुर्भगः फलविक्रेता रक्तस्यात् कपिलिः॥ मार्जारा २५९
ग्निपदा स्पृष्ट्वा रोगवान् परमांसभुक्॥७५॥ सोदर्यागमनात् षंढो दुर्गंधश्च सुगंधहृत्॥ यद्गुलदा विषार
क्तं स्वल्पं यायेद्विवाबहु॥७६॥ हृत्वा वै योनिमाप्नोति तैर्यंची नात्र संशयः॥ एवमादीनि चिह्नानि तथा

न्यानि नृपोत्तम॥७७॥ स्वकर्मविहितान्येव दृश्यंते ये तु मानवाः॥ ततो जन्मशतं मर्त्यैः संवर्जेत्तु भारत॥७८॥ जा 505
यते नात्र संदेहः सर्वभूतेषु भाशुभे॥ तत्र गर्भस्थितिं राजन् शृणुष्व विधिनिर्मितां॥७९॥ स्त्रीपुंसोस्तु प्रसंगेन नि 2008
रुद्धे शुक्रशोणिते॥ पंचभूतसमायुक्तः सपत्नः परमेश्वरः॥८०॥ इंद्रियाणि मनः प्राणा ज्ञानमायुः सुखं धृतिः॥
धारणा प्रेरणं दुःखमिच्छाहंकार एव॥८१॥ प्रयत्नाकृतिवर्णास्य रागद्वेषौ भवाभवौ॥ तस्येदमात्मनः सर्वमना
देरादिमिच्छतः॥८२॥ संपद्येमहाराज कललकर्मानुसारतः॥ प्रथमे मासि संक्लेदो रेतो धातुविमूर्छितः॥८३॥
धनं मासि द्वितीये स्यात्तृतीये चेंद्रियैर्युतः॥ आकाशाल्लाघवं सूक्ष्मं शब्दं श्रोत्रं प्रतां तथा॥ वायोस्तु स्पर्शनं चे
ष्टा गुहनं रूक्षमेव च॥ तेजसो दर्शनं व्यक्तिरोमरूपं प्रकाशनं॥८५॥ रसोऽभ्योरसनं शैत्यं स्नेहः क्लेदः समार्दवः॥ भूमे
र्गंधस्तथा घ्राणं गौरवं मूर्तिरेव च॥८६॥ आत्मा गृह्णात्यजः सर्वं तृतीये स्पंदते जसः॥ दौर्हृदस्याप्रदानेन गर्भो
दोषमवाप्नुयात्॥८७॥ वैरूप्यं मरणं वापि तस्मात्कार्यं प्रियं स्त्रियः॥ स्थैर्यं चतुर्थे त्वंगानां पंचमे शोणितोद्भवः॥
॥८८॥ षष्ठे बलस्य वर्णस्य नखलोम्नां च संभवः॥ मनसा चेतसा युक्तो नरः स्नायुशिरायतः॥८९॥ सप्तमे चा
ष्टमे चैव त्वग्मांसस्मृतिमानपि॥ पुनर्गर्भे पुनर्धात्री मोजस्तस्य प्रधावति॥९०॥ अष्टमे मास्यतो गर्भो जातः
प्राणैर्वियुज्यते॥ नवमे दशमे वापि प्रबलैः सूतिमारुतैः॥९१॥ निःसार्यते बाण इव यंत्रच्छिद्रेण सज्वरः॥ शरीरा
वयवैर्युक्तो ह्यंगप्रत्यंगसंयुतः॥९२॥ अष्टोत्तरं मर्मशतं तत्र स्नायुशतत्रयं॥ सप्तशिराः कपालानि विहितानि
स्वयंभुवा॥९३॥ लिख्यः कोट्योर्धकोटी च रोम्णामंगेषु भारत॥ द्वासप्ततिः सहस्राणि हृदयादभिनिःसृताः॥९४॥
हितानाम हिताना उपस्तासां मध्ये त्रिप्रभं॥ मंडलं तस्य मध्यस्य आत्मा दीप इवाचलः॥९५॥ मध्येयस्तं
विदित्वेत्पुनरा जायते न तु॥ एवं प्रवर्तते चक्रं भूतग्रामे चतुर्विधे॥९६॥ समुत्पत्तिर्विनाशश्च जायते पा
र्थदेहिनां॥ ऊर्ध्वं गतिर्हि धर्मेण ह्यधर्मेण ह्यधोगतिः॥९७॥ जायते सर्ववर्णानां स्वधर्मचलनान्नृप॥ दे

देवत्वे मानुषत्वे च दानभोगादिकाः क्रियाः ॥९८॥ यादृक्ष्यत्र महाराज तत्तत्स्वं कर्मजं फलं ॥ कुकर्मविहितैर्घोरैः का
मक्रोधार्जितैः शुभे ॥९९॥ नरके पतते घोरे यस्योत्तारो न विद्यते ॥ उत्तारणाय जंतूनां नर्मदातटमाश्रितं ॥१००॥ श्रेष्ठं
त्वनरकं तीर्थं तदेतं नृपसत्तम ॥ नरकापहं महापुण्यं सर्वपापप्रणाशनं ॥१०१॥ तत्तीर्थं सर्वतीर्थानां श्रेष्ठं भुवि
सुदुर्लभं ॥ तत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवता ॥ ॥१०२॥ तस्याशु नरकाद्घोरा मुच्यंते पितरो नृप ॥ तीर्थेह
नरके स्नात्वा संपूज्य नरकेश्वरं ॥१०३॥ महापातकयुक्तोपि नरकं नैव पश्यति ॥ तस्मिंतीर्थे च यो राजन दद्या
द्वैतरणीं शुभां ॥१०४॥ ततो रुद्रैः सुखेनैव नंदी वैतरणीं नरः ॥ युधिष्ठिर उ॰ ॥ यमद्वारे महाघोरे या सा वैतरणी न
दी ॥१०५॥ किंरूपा किंप्रमाणा सा कथं सा वहति द्विज ॥ कथं तस्याः प्रमुच्यंते केषां वासस्तु संततिं ॥१०६॥ केषां
च सानुकूला सा वद विस्तरतोखिलं ॥ मार्कं॰ ॥ धर्मपुत्र महाबाहो शृणु सर्वं महोदितं ॥१०७॥ यासौ वैतरणी
नाम यमद्वारे महासरित् ॥ पस्यमाणा च सा देवी शृण्वतां हे [illegible]सा ॥१०८॥ शतयोजनविस्तीर्णा पृथुत्वे
महासरित् ॥ अगाधा दुस्तरा पापैर्दृष्टमात्रा भयावहा ॥१०९॥ पूयशोणिततोयाढ्या मांसदुःकर्दमान्विता ॥ त
तोयं कथ्यते नृणां तापमध्ये घृतं यथा ॥११०॥ कृमिभिः संकुलं पूयं वज्रतुंडैः समं ततः ॥ शिशुमारैश्च मकरैर्व
ज्रकर्तरिसंयुतैः ॥१११॥ अन्यैश्च जलजीवैश्च हिंसकैर्मांसभेदिभिः ॥ तप्यंते द्वादशादित्याः प्रलयांते यथा हि
ते ॥११२॥ पतंति तत्र जीवौघाः क्रंदमानाः सुदारुणं ॥ हा भ्रातः पुत्र हा मातरिति क्रंदंति वै पृथक् ॥११३॥ वि
नरंति निमज्जंति ग्लानिं गच्छंति या सकृत् ॥ चतुर्विधैः प्राणिगणैर्दृष्टव्या सा महानदी ॥११४॥ तरंति तत्स्या
दानेन त्वन्यथा च पतंति ते ॥ मातरं ये न मन्यंते त्वाचार्यं गुरुमेव च ॥११५॥ अवमन्यंति ये मूढास्तेषां वासस्तु सं २५२
तत ॥ विश्वासप्रतिपन्नानां स्वामिमित्रतपस्विनां ॥११६॥ स्त्रीबालविकलादीनां छिद्रमन्वेषयंति ये ॥
पच्यंते तत्र मध्ये क्रंदमानाः सुपापिनः ॥११७॥ श्रांतं बुभुक्षितं विप्रं यो विघ्नायोपसर्पति ॥ कृमिभिर्भक्ष

ते तत्र यावत्कल्पशतत्रयं ॥११८॥ ब्राह्मणाय प्रतिश्रुत्य यथार्थं न ददाति तत् ॥ आहूय नास्ति यो ब्रूयात्तस्य वा 507/2008
संस्तु संततः ॥११९॥ अग्निदो गरदश्चैव कूटसाक्षी च मद्यपः ॥१२०॥ कथाभंगकरश्चैव स्वयं रत्नापहारकः ॥ क्षेत्रसे
तुविभेदी च परदाराप्रधर्षकः ॥१२१॥ ब्राह्मणो मरविक्रेता वृषलीपतिरेव च ॥ कौतुलस्यत पार्तस्य पालीभेदं
करोति यः ॥१२२॥ कन्याभिदूषकश्चैव दानं दत्त्वानुतापकः ॥ शूद्रश्च कपिलापानी ब्राह्मणो मांसभुक्तथा ॥१२३॥
एते वसंति सततं मा विचारं कृथा नृप ॥ सदा मया सदाक्रोधी निजवाक्यप्रमाणकृत् ॥१२४॥ परोत्स्वच्छेदको
नित्यं वैतरण्यां वसेच्चिरं ॥ सानुकूला भवेद्येन तच्छृणुष्व नराधिप ॥ अयने विषुवे पुण्ये व्यतीपाते दिनक्षये ॥ अ
न्येषु पुण्यकालेषु दीयते दानमुत्तमं ॥१२६॥ कृष्णां वा पाटलां वापि कुर्याद्वैतरणीं शुभां ॥ स्वर्णशृंगीं रूप्यखु
रां कांस्यपात्रसुदोहनां ॥१२७॥ कृष्णवस्त्रयुगच्छन्नां सप्तधान्यसमावृतां ॥ रुक्षपृष्ठोपरिस्थां च घंटातिलकभू
षितां ॥१२८॥ कार्पासद्रोणशिखरे आसीनां ताम्रभाजने ॥ यमं हैमं प्रकुर्वीत लोहदंडसमन्वितं ॥१२९॥ उडुपो
५ परि तां धेनुं सर्वदेहसमुद्भवां ॥ कृत्वा विकल्पयेद्विद्वांश्छत्रोपानहसंयुतां ॥१३०॥ अंगुलीयकवासांसि ब्राह्मणा
य निवेदयेत् ॥ इममुच्चारयेन्मंत्रं संगृह्य मधुभिक्षयं ॥१३१॥ यमद्वारे महाघोरे दृष्ट्वा वैतरणीं नदीं ॥ तर्तुकामो द
दाम्येनां तुभ्यं वैतरणीमिमां ॥१३२॥ मंत्रः ॥ गावो ममाग्रतः संतु गावो मे संतु पृष्ठतः ॥ गावो मे हृदये संतु गवां मध्ये
वसाम्यहं ॥१३३॥ विष्णुरूप द्विजश्रेष्ठ भूदेव पंक्तिपावन ॥ सदक्षिणा मया तुभ्यं दत्ता वैतरणी नमः ॥१३४॥ धर्म
राजं च सर्वं नत्वा वैतरण्याख्यधेनुकां ॥ सर्वं प्रदक्षिणीकृत्य ब्राह्मणाय निवेदयेत् ॥१३५॥ पुच्छं संगृह्य धेन्वाश्च
कृत्वाग्रे च द्विजोत्तमं ॥ समुच्चरेदिदं वाक्यमनुगच्छन्पदाष्टकं ॥१३६॥ धेनुके त्वं प्रतीक्षस्व यमद्वारे महाभये ॥
उत्तारणार्थं मे देवि वैतरण्यै नमो नमः ॥१३७॥ अनुव्रजेत गच्छंतं सर्वं तत्स्वगृहं नयेत् ॥ एवं कृते महीपाल
सा सरित्सुखगा भवेत् ॥१३८॥ सर्वान्कामानवाप्नोति ये दिव्या ये तु मानुषाः ॥ स स्त्रीसहस्रगुणितं आतुरे

रे॰वा॰खं॰ न्नातसंमितं॥१३९॥मृतस्यैवतुयद्दानंपारोक्षात्तत्समंस्मृतं॥स्वहस्तेनततोदेयंमृतेकःकस्यदास्यति॥१४०॥इतीद
मुक्तंतवधर्मस्नेहोदानंमयावैतरणीसमुद्भवं॥शृणोतिभक्त्यापठतीहसम्यक्सयातिविष्णोःपरमंप्रमेयं॥१४१॥
मार्कं॰॥मासंचाश्वयुजंकृष्णात्तस्मिन्कृत्वाचतुर्दशी॥तस्यांस्नातःकृतश्राद्धःसंपूज्यपरमेश्वरं॥१४२॥पितृभ्यो
दीपदानंचदद्यात्कृत्वाघृतेनतु॥पश्चाज्जागरणंकुर्याद्गीतनृत्यकथानकैः॥१४३॥ततःप्रभातसमयेस्नात्वा
वैनर्मदाजले॥तर्पणंविधिवत्कुर्यात्पितॄणांदेवपूर्वकं॥१४४॥सौवर्णंघृतसंयुक्तंदीपंदत्वाद्विजातये॥पश्चा
द्भोजयेद्विप्रान्स्वयंचैवविमत्सरः॥१४५॥एवंकृतेनरश्रेष्ठनजंतुर्नरकंव्रजेत्॥अवश्यमेवजीवोपेद्रष्ट
व्यानरकस्थितिः॥१४६॥अनेनविधिनाकृत्वानपश्येन्नरकान्नरः॥तत्रतीर्थेमृतानांतुनराणांविधिनान्नृप॥
१४७॥मन्वंतरंदिवेलोकेवासोभवतिदुर्लभे॥विमानेनार्कवर्णेनकिंकिणीजालशोभिना॥१४८॥सगच्छ
तिमहाभागसव्यंमानोप्सरोगणैः॥भुनक्तिविविधान्भोगानुक्तकालंमहातपः॥१४९॥पूर्णेचैवततःकालेपु
नर्मानुष्यतांगतः॥सर्वव्याधिविनिर्मुक्तोजीवेच्चशरदांशतं१५०॥अतश्चाश्वयुजेमासिकृष्णपक्षेत्रिवाह
नि॥अहोरात्रोषितःस्नात्वामर्चयित्वामहेश्वरं॥१५१॥महापातकयुक्तोपिमुच्यतेनात्रसंशयः॥अष्टाविंश
तिकोट्योवैनरकाणांनरेश्वर॥१५२॥विमुक्तानारकैर्दुःखैःशिवलोकंव्रजंतिते॥तत्रभुक्त्वामहाभोगान्दिव्यै
श्वर्यसमन्विताः॥१५३॥लभंतेमानुषंजन्मसर्वेसमगुणान्विताः॥१५४॥इतिश्रीवायुप्रो॰शिवसंहितायांरे
वामा॰॥अनरकेश्वरतीर्थं॥मार्कं॰॥ततोयायांमहाराजसर्पतीर्थमनुत्तमं॥अदूरेतत्स्थितंतीर्थंतीर्थादन
रकेश्वरात्॥१॥यत्रसिद्धोमहासर्पःतपःकृत्वायुधिष्ठिर॥धनंजयोनामपुरादृष्ट्वाकुलमुपद्रुतं॥२॥
ताक्ष्येणत्रिजगन्मध्येचारिणाविष्णुधारिणा॥अत्रतीर्थेतपःकृत्वातोषयित्वामहेश्वरं॥३॥प्रसादात्त २५३
स्यदेवस्यत्रातोस्मस्वकुलंततः॥तथान्येपिचयेसर्पाःस्वकुलंपातुमिच्छवः॥४॥तत्रतीर्थेमहापुण्येतपःकृ

त्वासुदुष्करं॥सपुत्रपौत्राःक्रीडंतित्रैलोक्येतेयथासुखं॥५॥तत्रतीर्थेतुयःस्नात्वातर्पयेत्पितृदेवताः॥वाजपे
यफलंसम्यक्सप्राप्नोतिनसंशयः॥६॥सर्पतीर्थेमनुष्याणांस्नातानांभुविभारत॥सर्पवृश्चिकजातिभ्योनभ 509
यंविद्यतेक्वचित्॥७॥ततोभोगवतींप्राप्यपूज्यंतेसिद्धपन्नगैः॥नागकन्यापरिवृतोमहाभोगपतिर्भवेत्॥८॥ 2008
मार्गशीर्षस्यमासस्यकृष्णपक्षेतुयाष्टमी॥सोपवासःशुचिस्तस्यांस्नात्वासंस्नापयेच्छिवं॥९॥दधिदुग्धमधुस
कृतैस्तीर्थांबुनासह॥ततःशुद्धतिलैःशुभ्रैःशिवलिंगंप्रपूजयेत्॥१०॥तथाविभवसारेणगंधपुष्पैःसमर्च
येत्॥रात्रौमहोत्सवंकृत्वाप्रणिपत्यक्षमापयेत्॥११॥तस्ययत्फलमुद्दिष्टंतच्छृणुष्वनृपोत्तम॥यावंतःपार्थ
संख्याताःस्तिलाःपुष्पतिलैःसह॥१२॥तावद्वर्षाणिराजेंद्रशिवस्यपुरतोवसेत्॥ततःस्वर्गात्परिभ्रष्टोजा
यतेविपुलेकुले॥सुरूपसुभगश्चैवधनीदातासुधीरधीः॥पुत्रीपौत्रीचदीर्घायुरारोग्यंचतथालभेत्॥१४
इतिश्रीरेवा॰सर्पेश्वरतीर्थं॥मार्कं॰॥ततोगच्छेन्नराजेंद्रमोक्षतीर्थमनुत्तमं॥सेवितंदेवगंधर्वैरृषिभिश्चत
पोधनैः॥१५॥बहवस्तंनजानंतिविष्णुमायाविमोहिताः॥यत्रसिद्धिमनुप्राप्ताःपुरारेश्चगणाअपि॥१६॥पुल
स्त्यःपुलहश्चैवक्रतुरात्रिःसएवच॥प्रचेताःसोमतिष्ठश्चदक्षोनामप्रजापतिः॥१७॥एतैर्वाँमहाभागास्तंसाह
स्तंपिता॥तीर्थंसंस्थापयामासुर्मुमुक्षारव्यंदेहिनांसदा॥१८॥संगतायत्रकावेरीनदीश्रेष्ठानुरेवया॥प्रवाह न्ये
मध्यमापन्नांसंगमस्तत्रमोक्षदः॥१९॥कावेरीसंगमेतीर्थेसर्वपापविमोक्षदे॥तिलपिंडेनचैकेनमुच्यंतेप्रेत
तांगताः॥२०॥ऋग्यजुःसामसंज्ञानामभ्यस्तानांहियत्फलं॥सम्यग्जप्त्वाविधिनागायत्रीतत्रतल्लभेत्॥
२१॥तत्रजप्तंहुतंदत्तंस्नातंतत्समथार्चितं॥सर्वमक्षयतांयातिनात्रकार्याविचारणा॥२२॥तत्रान्यतोवा
राजेंद्रविक्षेपःपरमोमतः॥तत्रतीर्थेमृतानांतुसंन्यासेनद्विजन्मनां॥२३॥अनिवर्तागतिस्तेषांमोक्षती
र्थप्रभावतः॥प्रेतत्वान्मुच्यतेप्रेतस्त्वन्यैर्वैजन्मबंधनात्॥२४॥सदापर्वसुतत्रैवस्नात्वाशर्वंप्रपूजयेत्॥

रे०वा०खं० जपहोमार्चनैर्ध्यानैश्च द्विजभोजनैः ॥२५॥ मुच्यते सर्वपापेभ्यः स्थापितं च समुद्धरेत ॥ एषते विधिरुद्दिष्टः संक्षे
पेण मयानघ ॥२६॥ मोक्षतीर्थस्य तु महात्पुराणे योभिधीयते ॥ ऋषितीर्थं परं पुण्यं मोक्षाख्यं पुण्यसाधनं ॥
॥२७॥ इति श्रीरेवा० ॥ मोक्षतीर्थ कावेरीसंगम ॥ मार्कं० ॥ ततः क्रोशांतरे पार्थ तीर्थं गोपेश्वरं व्रजेत ॥ विख्यातं
सर्वलोकेषु शिवक्षेत्रमनुत्तमं ॥१॥ पुराकृतयुगे पार्थ पुंडरीकाह्वयो भवत ॥ गोपः सद्गालक्षणां गवां पालन
कृत्किल ॥२॥ धार्मिकः सत्यवादी च गवां शुश्रूषणे रतः ॥ तस्य भावं परिज्ञातुं संगतः किल धूर्जटिः ॥३॥ द्विपरू
पेण राजेंद्र तत्र कामदुघासह ॥ न पारं न च वा तस्य गोपचित्तस्य वेत्ति चित ॥४॥ आदिमध्यावसाने तं सत्यव्रत
परं दृढं ॥ मत्वा कामदुघायुक्तः प्रसन्नो भवदीश्वरः ॥५॥ मत्वा कर्मक्षयं तस्य दद्दौ निजपदं विभुः ॥ तेनापि प्रार्थि
तः शर्वस्तीर्थसंस्थापनानिव ॥६॥ गोप उ० ॥ यत्र त्वं मे प्रसन्नो सि रेवातीरे सुरेश्वर ॥ कृपया परया द्यत्र तीर्थे त्वां स्था
पयाम्यहं ॥७॥ अत्र तिष्ठ महादेव लोकानां हितकाम्यया ॥ गोपस्य चेत्प्रसन्नो सि ममत्वं त्रिपुरांतक ॥८॥ एव
मस्त्विति चोक्त्वा स तत्रैवांतरधीयत ॥ स च गोपः शिवं देवं सुभयासह भारत ॥९॥ स्थापयित्वाथ कालेन शै
वं पदमवाप्नुयात ॥ ततः प्रभृति विख्यातं तीर्थं गोपेश्वरं परं ॥१०॥ यत्र स्थाने न चैकेन मुच्यते पातकैर्नरैः ॥
तत्र तीर्थे तु यः स्नात्वा श्राद्धे संतर्पयेत पितृन ॥११॥ भोजयित्वा द्विजान्शक्त्या सर्ववांछितवाग्भवेत ॥
शिवमभ्यर्च्य यो राजन्कुरुते प्राणसंक्षयं ॥१२॥ स गच्छेद्धंसयुक्तेन विमानेन शिवालयं ॥ क्रीडित्वा सुचि
रं कालं शिवलोके महामनाः ॥१३॥ इह मानुष्यतां प्राप्य राजा भवति वीर्यवान ॥ हस्त्यश्वरथसंयुक्तो दासी
दाससमन्वितः ॥१४॥ पूज्यमानो नरेंद्रैश्च शिवे दूषणतं सुखी ॥१५॥ गोपेश्वरतीर्थं ॥ ततः क्रोशांतरे ग २५४
च्छेन्मार्कंडेश्वरमुत्तमं ॥ प्रयासं स्थापितं तीर्थं स्वर्गमोक्षफलप्रदं ॥१६॥ अहं च नर्मदां चैव सततं सहचा
रिणौ ॥ श्नतीर्थं नर्मदा तुल्यं मया दृष्टं युधिष्ठिर ॥१७॥ कल्यानुकल्पं भ्रमता नदीतीर्थवनालयात ॥ एको

देवो महादेव रुद्रोनघेकातत्तन्दृष्ट्वा ॥१८॥ धर्मो माहेश्वरो धन्यो भक्तिर्माहेश्वरी मता ॥ परितुष्टे यथा शर्वे गोपः शिव
पुरं ययौ ॥१९॥ चिरं चरित्रं गोपस्य पवित्रं नर्मदातटे ॥ श्रुतं तीर्थकरं पार्थ कर्णाकर्णि कथा मया ॥२०॥ ततो विनोदा 511/2008
दगमं तीर्थयात्राप्रसंगतः ॥ भक्त्या संतोषिते देवः किं न दद्यान्महेश्वरः ॥२१॥ विशेषान्नर्मदातीरे यथा गोपस्य त
स्यैव ॥ तत्राप नृप महातीर्थं गोपेन स्थापितं नृप ॥२२॥ आते साक्षाच्छिवस्तत्र स्थितो गौर्यागणान्वितः ॥ स्नातोहं
तत्र कृतवान्महेशमर्चनं शुभं ॥२३॥ अर्कमंदारधत्तूरबिल्वपत्रकुशांबुभिः ॥ ब्रह्मयज्ञं जपाद्यर्हं कृत्वा तत्र मया
नृप ॥२४॥ गत्वा चादूरतः सम्यक्तीर्थं चापि मया कृतं ॥ स्नात्वा भक्त्या महेशानं स्थापयित्वा प्रयुज्य च ॥२५॥
ममनाम्ना महीलोकानां हितकाम्यया ॥ त्रिरात्रमुषितस्तत्र ततः स्वाश्रममागतः ॥२६॥ तत्र स्नात्वा मार्कंडेश तीर्थेन
श्वर पूजयन ॥ त्रिवर्षजनितं पापं तत्क्षणादेव नाशयेत ॥२७॥ ध्यानाच्च मानसं पापं स्तुत्या वाचाकृतं व्रजेत ॥
पूजनात्कर्मजनितं पापं नश्येद्युधिष्ठिर ॥२८॥ श्राद्धपिंडप्रदानेन पितृतृप्तिस्त्रिहायनी ॥ विप्रभोजनदानेन शि
वलोकमवाप्नुयात ॥२९॥ इति श्रीरेवा० मार्कंडेश्वरतीर्थं ॥ मार्कंडेय उ० ॥ ततो यायान्नृपश्रेष्ठ नागतीर्थमनुत्तमं ॥
क्रोशांतरे महापुण्यं काम्यं किल महाप्रदं ॥१॥ विंध्यपादाद्विनिःसृत्य नागेनोदुंबरेण तु ॥ याचितं ध्यात्वा नाराध्य शिव
स्याराधनाय तु ॥२॥ पारासरिद्वरातीरमभिसत्य सत्राक्षितः ॥ निराहारेण वर्षाणि द्वादशाराध्य शंकरं ॥३॥
कृत्वा प्रसन्नं पुत्रार्थं ध्यानिना पार्थमादरात ॥ प्रत्यक्षे पार्थ पित्वा च प्राप्य नीरोगतां तथा ॥४॥ वरदानान्महेशस्य स
नाम्ना स्थाप्य शंकरं ॥ औदुंबरेश्वरं नाम विशेषाद्विष्टप्रदं ॥५॥ तीर्थं संस्थापितं पुण्यं नदी तन्मार्गसंभवा ॥ औदुं
बरी सुविख्याता संगमस्तस्य शोभनः ॥६॥ तत्र तीर्थे महाराज स्नात्वा भक्त्या विधानतः ॥ आश्विनस्य सिते पक्षे
पंचम्यां नियतः शुचिः ॥७॥ आदित्यदिवसे वापि स्नापयेच्छिवमव्ययं ॥ मध्वाज्यपयदधिदुग्धैस्तु विधिना भक्ति
तत्परः ॥८॥ संतानं शुभमाप्नोति रोगनाशं च भारत ॥ योयमिच्छति तं कामं प्राप्नोत्यभ्यर्च्य शिवं ॥९॥ संपूज्य

रे॰खं॰ विधेः पुष्पैः रूपहारैरनुत्तमैः॥ रात्रौ जागरणं कृत्वा गंधधूपनिवेदनैः॥१०॥ प्रभाते विमले स्नात्वा श्राद्धं कृत्वा यथा
विधि॥ शक्त्या च भोजयेद्विप्रान्मिष्टान्नैर्मधुपायसैः॥११॥ मुच्यते तत्र पापेभ्यो नात्र कार्या विचारणा॥ नागलो
के चिरं स्थित्वा शिवलोके चिरं वसेत॥१२॥ स्नापितो संगमे पार्थ दंपती पुत्रवांछया॥ वंध्यत्वस्य विनाशः स्यात्प्र
सूतः पुत्रमुत्तमं॥१३॥ तिलपिंडेन चैकेन प्रेता यांति परां गतिं॥१४॥ इति दंबरीसंगमे नागतीर्थं॥ मार्कं॥ ततः को
ग्रांतरे पार्थ सौरं तीर्थमनुत्तमं॥ सांबादित्यमिति ख्यातं॥ नर्मदादक्षिणे तटे॥१५॥ यत्र संनिहितो भानुः पूज्य
ते वै सुरासुरैः॥ युधिष्ठिरो॥ सांबादित्य इति ख्यातः कथं वै मुनिसत्तम॥१६॥ कः सांबः केन तत्तीर्थं कृतं कस्माद्
दृश्यमे॥ मार्कं॥ श्रीकृष्णो यादवाधीशः शंखचक्रगदाधरः॥१७॥ साक्षाद्विष्णुरिति ख्यातो भूभारहरणाय च॥ प
हीदुमवती वद्धौ गिरिर्गांगते निम्नगाः॥१८॥ येनावतीर्य चरता नीताः सार्थकृतां परे॥ यस्ते वंधुसखान्तोशीयप्रा
नामियुधिष्ठिर॥१९॥ यदुद्दिश्यासियं नेत्रस्तवीरं विप्रपार्थिव॥ तस्य सांब इति ख्यातः सुतस्तु गुणिनां वरः॥२०॥
सुरूपस्त्वा॥ कृतिः श्रीमान्मान्सर्वस्त्रीणां मनोहरः॥ कामी कामगुणैर्युक्तः कामकेलीविशारदः॥२१॥ एकदा कृ
स्वदेवस्य पत्नीं त्वपरमातरं॥ निजां निरीक्ष्य सहसा देवात्कामोपरुद्धधीः॥२२॥ रंतुं या चिंतयत्पार्थ पतितः स्म
रणाद्वि॥ क्षणात्कुष्ठार्दिततनुर्वेणो नोदुंबरी यथा॥२३॥ ततः स चिंतयामास मया पापं तु चिंतितं॥ मात्रा मदन
केलिहिंसा कं स्मरेण चिंतिता॥२४॥ तत्पापफलमेतन्मे यज्जातं विकलं वपुः॥ तातोलज्जान्वितः सांबः शीघ्रं प्राप्य
सनर्मदां॥२५॥ भास्करारांधनं चक्रे सुचिरं यतेंद्रियः॥ कृच्छ्रातिकृच्छ्रपाराकचांद्रायणविधानतः॥२६॥ स्नात्वा
संपूजयन्देवं सर्वरोगार्तिनाशनं॥ ततश्च सप्तमे मासि प्रसन्नस्तस्य भास्करः॥२७॥ पुनः प्रत्यक्षमात्मानं च २५५
क्रे कांतजगत्त्रयं॥ तेजःपुंजमयः सूर्यस्तन्मध्ये पुरुषाकृतिः॥२८॥ पद्मासनः पद्महस्तः किरीटी द्विभुजो नृप॥
तं दृष्ट्वा सहसा सांब उत्थाय प्रणिपत्य च॥२९॥ स्तुतिं चक्रे गद्गदस्य बध्वा शिरसि चांजलिं॥ सांब उ०॥ ॐ न

मो निखिलेशाय नीरजाक्षाय ते नमः॥३०॥ नमो नीरजवर्णाय नीरजाय किरीटिने॥ नमः शांताय सौम्याय स्वर्ग
द्वाराय ते नमः॥३१॥ निर्गुणाय निरीहाय मोक्षद्वाराय ते नमः॥ प्रकाशकाय पुण्याय धर्मकर्मसृजे नमः॥३२॥
नमोऽनंताय कालाय कालचक्राय नमो नमः॥ नमो विश्वस्य बीजाय विश्वभर्त्रे नमो नमः॥३३॥ नमस्तेऽनंतमहसे
तमोहर्त्रे नमो नमः॥ येन विश्वमिदं व्याप्तं तीव्रतेजोभास्वता॥३४॥ तं सर्वदृग्गोचरं बीजमादित्यं नमाम्यहं॥
येन विश्वमिदं व्याप्तं स्वशक्त्या प्रणवात्मना॥३५॥ प्रणवादित्यरूपाय नमस्ते निखिलात्मने॥ आविर्भा
वतिरोभावैर्जगद्येनावगाह्यते॥३६॥ यस्त्वहं परमं धाम तमादित्यं नमाम्यहं॥ कर्मकांडमिदं येन शश्वदत्त
मनोदये॥३७॥ वेदात्मना विभाव्येत वेदादित्यं नमाम्यहं॥ नाना कर्माणि लोकानां विहिताविहितानि च॥३८॥
अधिष्ठाय स्वयं पश्यत्कर्मादित्यं नमाम्यहं॥ यस्मिन्नभ्युदिते धर्मो गाहते जगदंजसा॥३९॥ शक्तः पृथिव्यधः
प्रीत्या धर्मादित्यं नमामि तं॥ यत्करेण धितं सोमममृतं जीवंति देवताः॥४०॥ मुहुर्मुहुः सुधारूपं सोमादि
त्यं नमामि तं॥ परं धर्म परं धर्मं निर्गुणं निरवग्रहं॥४१॥ योगिहृत्पद्मनानंदं योगादित्यं नमामि तं॥ नित्यं ब्र
ह्मायमाश्रित्य सर्गकर्मकरः प्रभो॥४२॥ प्रवर्तनविधानस्थं धर्मादित्यं नमामि तं॥ शश्वद्विष्णुर्यमाश्रित्य प
रिपात्यंजसा जगत्॥४३॥ श्रुतिसन्मार्गशक्तिस्थं विष्ण्वादित्यं नमामि तं॥ रुद्रोपि संहरेद्विश्वं यमाश्रित्या
त्रिदुःसहः॥४४॥ निवर्तनविधानस्थं रुद्रादित्यं नमामि तं॥ एक एव सुरं मन्ये समक्षं भानुमव्ययं॥४५॥ वि
श्वाधारं विश्ववंद्यं जीवनं मोक्षकारणं॥ स्वर्गापवर्गशक्तीनां दाता कः शक्तिमान्सुरः॥४६॥ अस्ति चेदूतयः
स्यात्स्वयं पश्येदाते समक्षगं॥ असमक्षाश्च शक्तिस्ताहेवाः संति सहस्रशः॥४७॥ तेषामसौ नातो धत्तेऽप्रत्य
क्षः शक्तिमानरविः॥ ददाति सेवितो मोक्षं विष्णुरन्यो धनं श्रियं॥४८॥ ज्ञानं स वीर्यदः साक्षात्सभानुः किं
न सेव्यते॥ व्याधयो राजयक्ष्माद्याः स्नात्वा द्रुं जीति दहिषु॥४९॥ यावन्न सेव्यते सूर्यः स्मरणं परमौषधं॥ कुष्ट

513/2008

रेवाखंड॰ नकलितात्रोषकाममौदंबरेणमां॥५०॥पाहि पाहि जगन्नाथ शरणं सूर्य मे भवान्॥इत्युक्त्वा दंडवद्भूमौ पपात
पुरतो रवेः॥५१॥जल्पन् मां पाहि पाहीति दुःकर्माणं दुराशयं॥तत्पदांभोजभृंगाणां शुनो भंवि सुधृतेप्रभो॥५२॥
दीनोस्मि पुण्यहीनोस्मि विमूढं रक्ष मां हरे॥मार्कं॰॥लुंठमानं पुरः सांबमेवं वीक्ष्य दयानिधिः॥५३॥प्रोवाचोत्तिष्ठ
सांबेति वरयेति वरं रविः॥अदेयमपि ते दास्ये स्तुत्याभक्त्या च तोषितः॥५४॥सांब उ॰॥यदाश्रये भुक्तिमुपग्नो
त्तानतौ षधिः॥जरामरणरोगार्तिरदयोवसुधारसः॥किं वादि पौरुषं याम श्रुतिश्रुनरसोनुवा॥अपो घले
दनाथालंमेचक्षु कं नुवाविभो॥५६॥किं वा महामोहतमसत्करणदीपकः॥सेव्यतामेष मेवा त्वानित्यंमि
दूरसोरविः॥५७॥त्वत्तुं वक्तुं किमु स्तोतुं न शक्तोनित्वाल्पशक्तिवान्॥प्रसीद त्वामहं याचे दुष्टं कष्टं हर प्रभो॥५८॥
वर्णरूपबलघ्नं मे पापलज्जाकरं गदं॥हर भानो हरा काशुहर भास्कर सत्वरं॥५९॥मार्कं॰॥ततस्तत्तीर्थे वच
ने विह्वलः प्रणमद्रविं॥नष्टकुष्टोभवत्सांबः रवरवौ त्कस्य प्रदास्ततः॥६०॥ततो हृष्टमनाः सांबस्तथा हृष्टत
नूरुहः॥पुनस्तं प्रार्थयामास तत् शृणुष्व नराधिप॥६१॥सांब उ॰॥अत्र तीर्थे त्वया भानो चिरं स्थेयमहर्नि
शं॥लोकानामुपकाराय दयां कृत्वा परामपि॥६२॥इहत्वां स्थापयिष्यामि भक्तार्तिहरणप्रभो॥स्तोत्रे
णानेन च नरो य स्त्वां स्तोति समाहितः॥६३॥तस्य रोगाः प्रणश्यंतु क्षयकुष्ठमुखा रवे॥सुखसौभाग्यपुत्रां
श्च धनधान्यादि साधनं॥६४॥सप्राप्नोतु सुधाधार संसाराब्धौ तनाशान॥मार्कं॰॥एवं संप्रार्थितो भानुः
प्रत्युवाच पदुत्तमं॥६५॥एवमस्तु तथान्यच्च यत्ते मनसि संस्थितं॥इत्युक्त्वा स जगामाशु ग्रहाधीशः
सकां स्थितिं॥६६॥सांबोपि यादवश्रेष्ठस्तत्र संस्थाप्य भास्करं॥स्वनाम्ना पूजयित्वा च स जगाम यथा २५६
गतं॥६७॥ततः प्रभृति तत्तीर्थं नदी सांबेन निर्मिता॥तस्यां तु दिव्या रेवायां स्नातं तेनास कुनृप॥६८॥
कुष्ठमौदंबरं नष्टमुदंवालेन चोच्यते॥तत्रतीर्थे नरः स्नात्वा न रोगैः परिभूयते॥६९॥नानाविधानि कुष्ठा

निक्षयदद्रुविचर्चिकाः॥श्वयथ्वपचिका घाश्च नाशमायांति सत्वरं॥७०॥स्नात्वा संपूजयेद्भानुं यस्तत्र नि 515/2008
यतः शुचिः॥स याति भास्करं लोकं पूज्यमानः सुरर्षिभिः॥७१॥तत्र ये पंगुताः प्राप्ताः शीर्णघ्राण नखा
नराः॥दद्रुश्चित्रकसंकीर्णाः कृमिराशिसमाकुराः॥७२॥मातापितृभ्यां रहिता भ्रातृभार्यासुतोज्झिताः॥
अनाथा विकलादीना निमग्नाः शोकसागरे॥७३॥तेषां नाथो जगद्योनिर्नर्मदातीरगो रविः॥सांबादि
त्योहि लोकानां आर्तिहा दुःखनाशनः॥७४॥तत्रतीर्थे तु यः स्नात्वा मासमेकं निरंतरं॥पूजयेद्भास्क
रं भक्त्या तस्य पुण्यफलं शृणु॥७५॥चतुर्दिक्जलधिस्नानाद्यत्पर्वसु फलं लभेत्॥आदित्यदिवसे
स्नात्वा तत्र तीर्थे हि तत्फलं॥७६॥कौमारयौवने पापं जनितं यच्च वार्धुके॥तत्प्रणश्यति तत्तीर्थे स्नान
मात्रान संशयः॥७७॥नरोगो न च दारिद्र्यं न च बंधुवियोजनं॥सप्तजन्मानि मर्त्यानां सांबार्कपरि
सेवनात्॥७८॥सप्त्योसे मुपवासेन व्रतैश्चांद्रायणादिभिः॥स यत्फलमवाप्नोति तत्र स्नात्वा च तल्ल
भेत्॥सकृत्पिंडप्रदानेन श्राद्धे तत्र युधिष्ठिर॥नरो न लिप्यते पापैः स्वपितॄन्प्रीणयेच्चिरं॥८०॥तत्र यः
कपिलां दद्याद्भानुमुद्दिश्य तद्दिने॥कोलाः कामधुघास्तस्य जयं राज्यं च विंदति॥८१॥हेमान्नदानाद्
नवानद्दैन्यं दुःखं च मुंचति॥स्वर्गसौख्यं चिरं भुक्त्वा जायते विपुले कुले॥८२॥ते धन्यास्ते महात्मानस्ते
षां जन्म सुजीवितं॥स्नात्वा पश्यंति ये नित्यं सांबार्कं सुसमाहिताः॥८३॥इति श्रीनर्मदामा॰ सांबादि
त्यतीर्थं॥मार्कं॥ततः कोशांतरे राजन्नृषिश्वेद्वैरमनुत्तमं॥परं पापपरं तीर्थं सिद्धैः कृतमितिप्रभो॥
॥१॥कपिलाद्यास्तु ऋषयो दक्षपुत्र्याश्च भारत॥तत्र ते पुस्तपः पूर्वं सिध्यर्थं संयतेंद्रियः॥२॥महेन्द्रा
मुमया सार्धं पूजयंतो विधानतः॥जपंतस्ते यजंतश्च ध्यायंतश्चाप्यस्तुवन्विभुं॥३॥षण्मासांते श्च त
त्रस्थैः सिद्धिरात्ता युधिष्ठिर॥प्रसंनश्चाभवन् शंभुर्ददौ सिद्धिं हितेष्वपि॥४॥तैश्च साक्षात्परात्परात्

गौरीदृष्टावरप्रदा॥वरंददानानासिद्धिंसासाक्षात्सिद्धिहरप्रिया॥५॥शिवाशाकंभरीदेवीदुर्गादुर्गार्तिनाशिनी॥मुक्तामुक्तस्वरूपायाभक्तानांचिंतितप्रदा॥६॥विद्यालक्ष्मीरतिःशांतिःसिद्धिःश्रीरखिलांबिका॥प्रकृतिर्मूलभूतायामायापुरजिदर्चिता॥७॥तेचसर्वेचमुनयःसिद्धाःसिद्धेश्वराह्वये॥शिवंशिवांच सहिताःस्नात्वासिद्धेश्वरीमुमां॥८॥तत्रसंस्थापयामासुःपूजयंतस्तथांजसा॥एवंसिद्धामहाभागाः कपिलाद्यामहर्षयः॥९॥नर्मदायांमहाभागदक्षिणेकूलमाश्रिताः॥जपंतस्तेपरंब्रह्मयोगसिद्धा महाव्रताः॥१०॥सिद्धिंहिपरमांप्राप्ताःस्तेचदक्षसुतान्वप॥तस्मिंतीर्थेमहापुण्येसर्वतीर्थेष्वनुत्तमे॥ ॥११॥श्राद्धंचयस्तत्रयोदद्यात्पितॄंनुद्दिश्यभारत॥तृप्यंतिपितरस्तस्यद्वादशाब्दान्यसंशयं॥१३॥तत्र तीर्थेचयोभक्त्यास्नात्वासंपूजयेच्छिवं॥रात्रौजागरणंकृत्वापठेत्पौराणिकींकथां॥१४॥ततःप्रभातेविमलेस्नानंकृत्वायथाविधि॥योवीक्षतेमहादेवंसगच्छेत्परमंपदं॥१५॥भोजयेद्योद्विजान्भक्त्यातेभ्योदद्याच्चदक्षिणां॥एकेनद्विजभोज्येनकोटिर्भवतिभोजिता॥ १६॥इतिश्रीवायुप्रोक्तशिवसंहितायांरेवामहात्म्येसिद्धेश्वरतीर्थं॥मार्कं॥तत्रसिद्धेश्वरीदेवीवैष्णवीपापनाशिनी॥सानंदंपरमंप्राप्तास्थानंयाप्यतिशोभनं॥ १७॥सातत्रैकामहासिद्धिर्वरमंगलदायिनी॥ऋषिभिःस्थापितातत्रसिद्धिर्लोकहितायवै॥१८॥तत्रस्नात्वाचसंतर्प्यदेवांश्चपितृभिःसह॥देवींपश्यति योभक्त्यामुच्यतेसर्वपातकैः॥मृतवत्सातुयानारीवंध्यास्त्रीजननीतथा॥तत्रतीर्थेहिसास्नात्वाशोभनंपुत्रमाप्नुयात्॥२०॥अष्टम्यांचचतुर्दश्यांदेवीयस्तुप्रपश्यति॥तत्रवैसंगमेस्नात्वायोषित्वापुरुषोपिवा॥२१॥धनेपुत्रान्सुखंदेवीददातिपरमार्चिता॥गोत्ररक्षांचकुरुते

२५७

दृष्टादेवीप्रतोषिता॥२२॥पतिप्रजांचवर्षंचपूजितानात्रसंशयः॥नवम्यांचमहासिद्धिंस्तुतांदेवीमुपोषितः॥२३॥प्रयत्नतःप्रयत्नःसम्यक्गौरिणीभोजयेत्शुभाः॥कुमारिकाश्चराजेंद्रभोजयेत्पूजयेदपि॥२४॥ पुष्पकुंकुमतांबूलफलजलैःकंचुकीरपि॥श्रीवासस्त्रसिंदूरैःशक्त्यापार्थविभूषयेत्॥२५॥गौरीसिद्धेश्वरीदेवीप्रीयतामितिकीर्तयेत्॥तस्यदोषाःप्रणश्यंतिप्रजायंतेसुताःशुभाः॥इतिश्रीसिद्धेश्वरतीर्थं॥मार्कं॥तथाचपरमंविद्धितीर्थंतत्रैवशोभनं॥ममनाम्नासुविख्यातंमार्कंडाह्वयमुत्तमं॥ ॥२७॥युधिष्ठिरो॥कथंतत्रमुनिश्रेष्ठतवचिह्नोपलक्षितं॥तीर्थंतन्मेसमाचक्ष्वतनुजातंकथंकदा॥२८॥मार्कं॥पुराकृतयुगेराजन्यातोहंदक्षिणंगिरिं॥विंध्यंसर्वगुणोपेतंनियतोनियताशनः॥२९॥ ऋषिसंघैःकृतातिथ्योदंडुकेन्यवसंतदा॥उषित्वासुचिरंतत्रवर्षाणामयुतंसुखं३०॥तीर्थयात्राकृतरुचिश्चाद्गुर्मास्यानिसर्वतः॥वसमानपरिभ्रम्यरेवातीरंधृतादरः॥३१॥तान्सर्वान्समनुज्ञाप्यशिष्यैश्चानुगतस्तदा॥निवृत्तोहंमहाभागनर्मदाकूलमाश्रितः॥३२॥पुण्यंचरमणीयंचपापविद्रावणंपरं॥कृतोमयाश्रमस्तत्रयत्रसिद्धामहर्षयः॥३३॥यत्रसिद्धेश्वरीदेवीसर्वदेवैरुपासिता॥देवैस्तत्रकृतंकुंडंसरोदूरमितिश्रुतं॥३४॥तत्रदेवैश्चमुनिभिःसर्वतीर्थाद्दूरतःकृतं॥कमंडलुकरैःसर्वैःसर्वतत्पूरितंसरः॥३५॥स्थितस्तत्राश्रमेवाहंद्विजसंघसमावृतः॥ब्रह्मचारीभिराकीर्णंगृहस्थैरुपशोभितं॥३६॥वानप्रस्थैश्चयतिभिर्जितहारैर्जितेंद्रियैः॥तपस्विभिर्महाभागैःकामक्रोधविवर्जितैः॥ ३७॥ एतंवर्षाणितत्राहंतपःकृत्वासुदारुणं॥आधरायन्महा

517
2008

रे०खं० देवंविश्वकर्त्तारमव्ययं॥ ३८॥ अपध्यानस्तुतितपोनियमैर्नर्मदातटे॥ ततस्तुवरदोदेवोमम
आतौयुधिष्ठिर॥ ३९॥ प्रत्यक्षौत्रिविक्रमौहाबुमाश्रीसंविभूषितौ॥ प्रणम्याहंततोदेवौभ
क्तियुक्तःपुनःपुनः॥ ४०॥ भवंतौप्रार्थयामिस्मवरदौवरमुत्तमं॥ धर्मस्थितिःसदामेस्तुभक्ति
श्चयुवयोःस्थिरा॥ ४१॥ अजरोव्याधिरहितःपंचविंशाब्दकोयथा॥ भवेयंतपसासिद्धःका
मादिभिरथोज्झितः॥ ४२॥ तथालोकहितार्थायभवद्भ्यांलोकपूजितौ॥ अस्मिन्स्थानेसदास्थे
यंसहदेवैःप्रसादतः॥ ४३॥ एवमुक्तौमयापार्थतौदेवौकृष्णशंकरौ॥ मामूचतुःप्रहर्षाद्यो
निवासार्थंयुधिष्ठिर॥ ४५॥ देवाऊचतुः॥ अस्मिन्स्थानेस्थितौविद्धिदेवैःसहसवासवैः॥ आवां
लोकोपकारायप्रीत्यातेमुनिसत्तम॥ ४६॥ त्वयाचप्रार्थितंसर्वंभविष्यतिनसंशयः॥ एवमुक्त्वात
तौदेवौतत्रैवांतरधीयतां॥ ४६॥ अहंचस्थापयित्वातौकृष्णशंभुंतथाव्ययं॥ कृतकृत्योत
तोराजन्संजातःसुसमाहितः॥ ४७॥ तस्मिन्तीर्थेनरःस्नात्वापूजयेत्परमेश्वरं॥ घृते
नपयसादध्नामधुशर्करयातथा॥ ४८॥ तीर्थाम्भसाचपुण्येनगंधपुष्पैस्तथा
यत॥ पुष्पधूपार्चिरर्घैश्चनैवेद्यैर्नियतात्मवान्॥ ४९॥ एवंविष्णोःकुर्वीतजागरं
भक्तिसंयुतः॥ आषाढस्यसितपक्षेएकादश्यामुपोषितः॥ ५०॥ वैष्णवंलोकमा २५८
प्नोतिविष्णुतुल्योभवेन्नरः॥ माहेश्वरंतथालोकेगणवन्मोदतेसदा॥ ५१॥ श्राद्धंत

त्रप्रकुर्वीतपितॄनुद्दिश्यभक्तितः॥ तस्यतेतृप्तिमायांतिकल्पेकल्पेयुधिष्ठिर॥ ५२॥ त
त्रतीर्थेनरःस्नात्वामौनीनिनियमानसः॥ उपास्यसंध्यांतत्रस्थोजपंकृत्वाविधानतः॥ ५३॥ 519/2008
तर्पयित्वासुरपितॄन्मनुष्यांश्चनृपोत्तम॥ कृत्स्नस्यपुरतस्थित्वामार्कंडेश्वरसंनिधौ॥ ५४॥ अ
नेकविप्रभोज्येनकोटिर्भवतिभोजिता॥ मृतप्रजाचयानारीवंध्यास्त्रीजननीतथा॥ ५५॥
स्नाप्यतेसाविधानेनपुत्रान्प्राप्नोतिशोभनान्॥ रुद्रांविधिवज्जप्त्वाब्राह्मणोवेदतत्ववित्॥ ५६
लिंगस्यदक्षिणपार्श्वेस्थापयित्वाघटंशुभं॥ रुद्रैकादशकंजप्त्वास्नापयेत्कुंभवारिणा॥ ५७
पुत्रमाप्नोतिसानारीगुणिनंदीर्घनंदनं॥ मार्कंडेश्वरवृक्षौश्चदूरस्थोयोपिपश्यति॥ ५८॥ ब्र
ह्महापिविमुच्येतइत्येवंशंकरोब्रवीत्॥ यइदंशृणुयाद्भक्त्यापठेद्वान्नृपसत्तम॥ ५९॥ सर्व
पापविनिर्मुक्तःसोपिरुद्रपुरंव्रजेत्॥ ६०॥ ॥ इतिश्रीरेवायां०॥ मार्कंडेश्वर
तीर्थं॥ मार्कंडेश्वरउवाच॥ ततोगच्छेन्महाराजरेवायास्तुरेतटे॥ क्रोशांतरेशुक्रतीर्था
त्गोपेश्वरमितिश्रुतं॥ १॥ नंदगोपःपुरायत्रसंदेहःसिद्धिमाप्तवान्॥ मथुरायाःसमाग
त्यशुक्रतीर्थाभिवांछितं॥ २॥ कृच्छ्रादिभिर्निजंदेहंशोषयित्वाशिवंस्मरन्॥ स्नात्वासंपू
जयन्रुद्रंत्रिकालंसंयतेंद्रियः॥ ३॥ त्रिभिर्वर्षैर्महाराजस्थापयित्वामहेश्वरं॥ दशाको
ट्यर्कपुष्पैश्चपूजयंपूजितःस्वयं॥ ४॥ ततःप्रसन्नेसशिवेसदेहोगणतांगतः॥ ततःप्र
भृतिविख्याततीर्थंगोपेश्वराह्वयं॥ ५॥ यत्रस्नानेनचैकेनमुच्यतेपातकैर्नरः॥ तत्रती
र्थेतुयःस्नात्वाकुरुतेप्राणसंक्षयं॥ ६॥ सगच्छेद्धर्षयुक्तेनयानेनशिवमंदिरं॥ क्रीडित्वा
सुचिरंकालंशिवलोकेमहामनाः॥ ७॥ इहमानुषतांप्राप्यराजाभवतिवीर्यवान्॥ ह

स्यश्वरथसंपूर्णदासीसेदोसमन्वितः॥ ८ ॥ पूज्यमानोबहून्नपैर्जीवेद्वर्षशतं सुखी॥ पुत्रपौत्रैः परिवृतो
दाता भोगी गुणी धनी॥ ९ ॥ शुचिर्विनयसंपन्नो ब्राह्मण्यः शुचिरात्मवान्॥ संप्राप्ते कार्तिके मासि नवम्यां
शुक्लपक्षतः॥ १० ॥ सोपवासः शुचिर्भूत्वा दीपकांस्तत्र दापयेत्॥ गंधपुष्पैः समभ्यर्च्य रात्रौ कुर्वीत जागरं॥ ११॥
तस्य यत्फलमुद्दिष्टं तच्छृणुष्व नराधिप॥ यावत्संख्या दीपकानां वर्तितं मुक्तानां तथा॥ १२ ॥ तावद्युगसहस्रं
स शिवलोके महीयते॥ तस्मिंस्तीर्थे च राजेंद्र यः कुर्याल्लिंगपूरणं॥ १३ ॥ सितैः सितैर्वासितयापद्मैर्दध्योदनैस्त
था॥ एतैः पलैश्च वा सोभिस्तस्य पुण्यफलं शृणु॥ १४॥ यावत्तिलादिके संख्या भक्तं तं तु फलादिके॥ तावद्युग
सहस्राणि शिवलोके महीयते॥ १५ ॥ पद्मसंख्या शिवे लोके मोदं ते कालमक्षयं॥ तस्मिंस्तीर्थे वराजेंद्र यत्तु
किंचित्प्रदीयते॥ १६ ॥ सर्वं कोटिगुणं लोके लभते नात्र संशयः॥ इति रे० गोपेश्व० मा०॥ ततः कोत्राद्धये पार्थ सा
धिके तीर्थमुत्तमं॥ उत्तरे नर्मदाकूले भृगुक्षेत्रस्य मध्यतः॥ १७ ॥ कपिलेश्वरसंज्ञं तु विशेषात्पापनाशनं॥ यो सौ स्ना
तनो देवः पुराणैः परिपठ्यते॥ १८ ॥ वासुदेवः स विश्वात्मा कपिलत्वमुपागतः॥ पातालं सुतलं नाम तस्यैवातितलं ह्य
धः॥ १९ ॥ गभस्तिमच्च तस्याधो ह्यतलं वितलं तथा॥ सारतलं तथा षष्ठं पातालं नाम सप्तमं॥ २१ ॥ तत्रासौ वसते देव पुरा
णपुरुषोत्तमः॥ सब्रह्मा समहादेवः सदेवो गरुडध्वजः॥ २० ॥ पूज्यमानः सुरैः सिद्धैस्तिष्ठते वल्लवादिभिः॥ वसतस्त
स्य राजेंद्र कपिलस्य जगद्गुरोः॥ २२ ॥ विनाशं वाप्नतः प्राप्ताः क्षणेन सगरात्मजाः॥ भस्मीभूतांस्तु तान्दृष्ट्वा कपिलो मुनिस
त्तमः॥ २३ ॥ जगाम परमं शोकं चिंतयानो थ किल्बिषं॥ सर्वसंगपरित्यागे चित्ते निर्विषये सते॥ २४ ॥ अयुक्तं जीवसंघानां २५९
कर्तुं मम विनाशनं॥ तस्य करणं नास्ति तस्मात्पापविनाशनं॥ २५ ॥ प्रायश्चित्तं करिष्यामि येन सिद्धिर्निगद्यते॥ ग
त्वा शिवधुनीं पुण्यां सर्वपापविमोचनीं॥ गंगायत्र तपस्तेपे कपिलारूपधारिणी॥ संप्राप्य तत्तरं तीरं पापौघाकुलतापुरा॥ २७॥
पातालं सत्ततो मुक्त्वा कपिलो मुनिसत्तमः॥ तपश्चचार सुमहेंद्र रेवाया उत्तरे तटे॥ २८ ॥ कृतोपवासनियमैः स्नान —

दानजपादिभिः॥ परं निर्वाणमापन्नः पूजयन्शिवमव्ययं॥ २९ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरं॥ क
पिलेश्वरसंज्ञं तु स्थापितं मुनिना पुरा॥ ३० ॥ गोसहस्रप्रदानस्य लभते सफलं महत्॥ ज्येष्ठमासस्य राजेंद्र 521/2008
प्राप्य शुक्ले चतुर्दशी॥ ३१॥ तत्र स्नात्वा विधानेन भक्त्या दानं प्रयच्छति॥ पात्रभूतेन पश्रेष्ठ स्वल्पं वा य
दि वा बहु॥ ३२ ॥ अक्षयं तत्फलं तस्य शिवेनोक्तं पुरारिणा॥ अंगारकदिने प्राप्ते चतुर्थ्यां नवमीषु वा॥
॥ ३३ ॥ स्नानं करोति पुरुषो नारी वा भक्तितत्परा॥ रूपमैश्वर्यमतुलं सौभाग्यं संततिं सुखं॥ ३४ ॥ लभते स
प्त जन्मानि सत्यमेतन्मयोच्यते॥ पौर्णमास्याममावास्यां स्नात्वा पिंडं प्रयच्छति॥ ३५ ॥ तस्य ते द्वादशाब्दानि तृ
प्तायांतु सुरालयं॥ तत्र तीर्थे तु यो भक्त्या ददेद्दीपं सुशोभनं॥ ३६ ॥ जायते तस्य राजेंद्र दीप्तिश्चक्षुः शरीर
जा॥ तत्र तीर्थे महाराज यो दद्याद्द्विजभोजनं॥ ३७॥ तृप्तिः सुरपितॄणां हि जायते द्वादशाब्दिका॥ तत्र तीर्थे
मृतानां तु जंतूनां सर्वदा नृप॥ ३८ ॥ ॥ इति श्रीरेवामा०॥ कपिलेश्वरतीर्थं॥ मार्कं०॥ ततः कोत्रांतरे
पार्थ तीर्थं घोडेश्वरं परं॥ अश्विनौ देवभिषजौ यत्राश्वरूपमास्थितौ॥ १॥ भिषग्विधानसिध्यर्थं तेपतु
स्तप उत्तमं॥ रेवाया उत्तरे कूले भृगुतीर्थसमीपतः॥ २ ॥ तत्र प्रसन्नो भगवान्तयोर्वर्षशते गते॥ आयुर्वेद
करीं सिद्धिं सर्वरोगनिबर्हिणीं॥ ३॥ ददौ ताभ्यां महादेवः स्तवस्तोत्रैः सुपरिष्कृतः॥ तत स्तौ वैद्यनाथं हि घो
डेश्वर पराह्वयं॥ ४॥ शंभुं स्नात्वा प्रतिष्ठाप्य यातौ स्वदेसनं नृप॥ तत्र तीर्थे तु यः स्नात्वा वैद्यनाथं प्रपूज
येत्॥ ५ ॥ यथा प्राप्तैपराहैश्च भक्त्या भानुदिने स्वयं॥ सर्वाघौघविनिर्मुक्तो नरोगैः परिभूयते॥ ६ ॥
तत्र स्नात्वा च यः पार्थ श्राद्धे पिंडप्रदो भवेत्॥ सकृत्पिंडप्रदानेन दीपदानेन भारत॥ ७ ॥ पितरः शाश्वतीं
तृप्तिं प्राप्य स्वर्गे वसंति हि॥ आयुर्वेदप्रदानेन न रोगैः पीड्यते क्वचित्॥ ८ ॥ विप्रेभ्यो भोजनं दत्वा तोष
येत्पितृदेवताः॥ ९ ॥ ॥ इति श्रीरेवामा० घाटेश्वरतीर्थं वैद्यनाथतीर्थं॥ मार्कं०॥ ततः कोशाद

यं गत्वाप्य गुहस्त्रांतिकेन्नृप॥ पिंगलेश्वरतीर्थं तु सर्वपापक्षयंकरं॥१०॥ तीर्थं सर्वगुणोपेतं कामिकं भु
विदुर्ल्लभं॥ वाचिकं मानसं पापं कर्मजं च सुराकृतं॥११॥ पिंगलेश्वरमासाद्य तत्सर्वं विलयं व्रजेत्॥

तत्र स्नानं च दानं च देवखाते कृतं न्नृप॥१२॥ अक्षयं तद्भवेत्सर्वं दृत्याह दौ महेश्वरः॥ पृथिव्यां सर्व
तीर्थेभ्यो समुद्धृत्य जलं शुभं॥१३॥ मुक्तं तत्र सुरैः खात्वा देवखातं ततोभवत्॥ युधिष्ठिर उवाच॥
कथं तु देवखातं तत्संज्ञातं मुनिसत्तम॥१४॥ सुराः सर्वे कथं तत्र मुमुचुर्वारि तीर्थजं॥ पिंगलेश्वरती
र्थस्य विस्तरं च वदस्व मे॥१५॥ संभवं चाथ तीर्थस्य श्रोतुं मे लंपलटा श्रुतिः॥ मार्कं०॥ यदा शूलस्य मु
ध्यर्थं रुद्रो देवगणैः सह॥१६॥ बभ्राम पृथिवीं सर्वां अंधके निहते सति॥ मुनिसिद्धसुरैः सार्द्धं तैः कम
ण्डलुधारिभिः॥१७॥ प्रभासाद्येषु तीर्थेषु स्नानं चक्रे च तैर्वृतः॥ सर्वतीर्थभवं तोयं पात्रेषु विहितं च तैः
॥१८॥ शूलभेदमनु प्राप्य शुद्धं शूलं तु शूलिनः॥ तत्रोत्थमुदकं गृह्य फल्गु कच्छमुपागताः॥१९॥ दद
शुस्तत्र ते वह्निं पिंगाक्षं रोगपीडितं॥ तपस्युग्रे व्यवसितं ध्यायमानं महेश्वरं॥२०॥ हविर्भागे तु विप्रा
णां राज्ञां चक्रे तु याजिनां॥ दूरोस्थितं परिम्लानं दृष्ट्वा देवमुखं सुराः॥२१॥ प्रोचुस्ते देवदेवेशं शंकरं लो
कशंकरं॥ देवा ऊचुः॥ एवं तु देवास्तस्याहं॥ प्रसादः क्रियतां शंभो वह्नेः पिंगस्य याचतः॥२२॥ यथा
निरुगयं काये हविषां यहण क्षमः॥ पुनर्भवति भागार्हस्तथा कुरु महेश्वर॥२३॥ महेश्वर उवा०॥ एवं
तु देवास्तस्याहं तु ष्टोस्मि तपसा च वः॥ वचनाच्च विशेषेण दास्ये त्वभिमतं वरं॥२४॥ वह्निरु०॥ यदि
तुष्टोसि देवेश वरं देहि ममेप्सितं॥ चंद्रार्कनयन श्रीद रूपाकर सुरेश्वर॥२५॥ यथा पुनर्भवः कायो
जायते मम शंकर॥ तथा कुरु विरूपाक्ष साधनीशं नमोस्तु ते॥२६॥ मार्कं०॥ ततः स भगवान् शंभु
र्मूर्त्तिमादित्यरूपिणीं॥ कृत्वा चितस्य तद्रोगमुपानुदत नैहरः॥२७॥ ततः पुनर्नवीभूत प्रोवाचेदं महे

२६०

श्वरं॥ वह्निरु०॥ मयि प्रसन्नोसि यदि महादेवाष्टमूर्त्तिमान्॥२८॥ भवता भास्करेणापि स्थेयमत्र स्वयं
शिव॥ लोकानामुपकाराय रोगनाशाय मुक्तये॥२९॥ पिंगलेश्वर नामा वै कृत्वा मयि कृपां परं॥ पापनां
ध्वंसनार्थाय श्रेयसां च विवृद्धये॥३०॥ सुरैः सर्वैः सम शर्व पार्वतीप्राणवल्लभ॥ एवमुक्तः स भगवान्
पिंगलेन महात्मना॥३१॥ स्थितिं चकार न चापि गीर्वाणाश्चेदमब्रुवन्॥ महेश्वर०॥ मुंचध्वमुदकं
देवास्तीर्थेभ्योयत्समाहृतं॥३२॥ स्थानात्तदुत्तरे खातं कृत्वा देवकृतं शुभं॥ तत्र निक्षिप्यतां वारि सर्व
रोगविनाशनं॥३३॥ सर्वपापहरं दिव्यं तीर्थेभ्यस्तु मयाहृतं॥ एवमुक्ता सुराः सर्वे खातं कृत्वा तथोत्तरे
॥३४॥ त्रयस्त्रिंशत्कोटि सुरैर्मुनिसिद्धैश्च भारत॥ कमंडलुकृतं वारि मुक्तं ह्यखिलतीर्थजं॥३५॥ प्रो
चुस्ते च सुराः सिद्धा विरूपाक्षमुखात्ततः॥ अश्विदेवखाते स्मिन् सदालंभन पूर्वकं॥३६॥ स्नानं कृत्वा
रविदिने संस्नात्वा नर्मदाजले॥ श्राद्धं कृत्वा पितृभ्यो वै दानं दत्वा स्वशक्तितः॥३७॥ पूजयिष्यति मामत्र
पिंगलेश्वर संज्ञितं॥ भक्त्या प्राप्तोपहारैस्तु स मे लोकमवाप्स्यति॥३८॥ भविष्यति सुरैरुक्तं प्रणोतु स
कलं जगत्॥ आमयाश्च विमर्त्यानां क्षय कुष्ठ विचर्चिकाः॥३९॥ व्याधयस्ते न पश्यंति कास श्वास जरा
दयः॥ एकद्वि त्रिचतुर्थाहा ये ज्वराः प्रेतसंभवाः॥४०॥ ये चान्ये विकृता दोषा दद्रुकामल संभवाः॥ दिनै
स्ते स नभियांति संस्नातानां रवेर्दिने॥४१॥ शतभेद प्रपूर्णाये कुष्ठा वकुव धाश्च ये॥ शतभादित्यधारा
स्नायाद् ष्टोत्तरं जपः॥४२॥ संपूज्य शंकरं दद्यात्तिलपात्रं पृथक् पृथक्॥ द्विजायोत्तमशीलाय सद्वृता
य धृतात्मने॥४३॥ त्रस्यंते तत्र कुष्ठानि गरुडेनेव पन्नगाः॥ एवमुक्ता गताः सर्वे त्रिदशास्त्रिदशाल
यं॥४४॥ मार्कं०॥ नदीषु देवखातेषु तडागेषु सरःसु च॥ स्नानं समाचरं नित्यं नरः पापैः प्रमुच्यते॥
॥४५॥ षष्टितीर्थसहस्रेषु षष्टितीर्थशतेषु च॥ यत्फलं स्नानदानाद्यैर्देवखाते ततोधिकं॥४६॥ देवखा

523/2008

रे० खं० तेनुयः स्नात्वातर्पयित्वापितॄन् सुरान् ॥ हिरण्यं शक्तितो दत्वा विश्णुर्तुलकुतारकं ॥ ४७ ॥ मिष्टान्नभोजनं भक्त्या
विप्रेभ्यः शक्तितो नृप ॥ पूजयेद्देवमीशानं पिंगलेश्वरसंज्ञितं ॥ ४८ ॥ सोऽश्वमेधस्य यज्ञस्य वाजपेयस्य भारत
२६१ क्रतोः पुण्यमवाप्नोति नात्र कार्या विचारणा ॥ ४९ ॥ पिंगलेश्वरमासाद्य दीपं दद्याच्च यो नरः ॥ सप्तजन्मानि
सोमुत्र चक्षुरोगैर्न पीड्यते ॥ ५० ॥ ॥ इति श्रीनर्मदामा० पिंगलेश्वरतीर्थं ॥ मार्कं० ॥ पिंगलेश्वरमारभ्य
यावत्तीर्थं पितामहं ॥ भृगोः क्षेत्रं विनिर्दिष्टं तत्र तीर्थानि मे शृणु ॥ १ ॥ भृगोरुस्थानमिदं ख्यातं तस्य चैतत्तपोव
नं ॥ चत्वारिंशच्च षाड्ढ्च तत्र तीर्थानि भारत ॥ २ ॥ तत्राद्यं पिंगलेशस्य तीर्थमुक्तं मया तव ॥ तस्माद्भूतीश्वरं ना
म क्रमपंचाशतांतरे ॥ ३ ॥ तीर्थानामुत्तमं तीर्थं गच्छेत् गिर्वाणसेवितं ॥ दर्शनाद्देवतीर्थस्य तस्य पापं विनश्य
ति ॥ ४ ॥ तत्र स्थाने पुरा पार्थ देवदेवेन शंभुना ॥ उद्धूलनं कृतं गात्रे तेन भूतीश्वरं विदुः ॥ ५ ॥ स्नानानामुत्त
मं स्नानं यद्भूतं भरतर्षभ ॥ भवस्य वृद्धुमाभूतीरभव तत्र भारत ॥ ६ ॥ स्वयंभूरथसंजातस्तेन तीर्थे महे
श्वरः ॥ भूतीश्वरेति विख्यातं स्वस्य नाम च कार ह ॥ ७ ॥ ततः प्रभृति विख्यातं तीर्थं पापप्रणाशनं ॥ पुष्ये
वा जन्मनक्षत्रे यदि वेंदुक्षये नृप ॥ ८ ॥ भूतेश्वरे नरः स्नात्वा कुलकोटिं समुद्धरेत् ॥ तत्र भस्म्यानुयोपस्ते
त्वा कुरुते गात्रमर्दनं ॥ ९ ॥ तस्य यत्फलमुद्दिष्टं तच्छृणुष्व नृपोत्तम ॥ यावल्लोमगणीका गात्रलग्ना भवं
ति हि ॥ १० ॥ तावद्वर्षसहस्राणि शिवलोके महीयते ॥ स्नानानामिह सर्वेषां भस्मस्नानं परं स्मृतं ॥ ११ ॥
पुराणे ऋषिभिः प्रोक्तं सर्वशास्त्रेषु शस्यते ॥ एककालं द्विकालं त्रिकालं वापि यः सदा ॥ १२ ॥ करोति स्नान
माग्नेयं तस्य पापं प्रणश्यति ॥ दिव्यस्नानाद्वरं तात वायव्यं परिकीर्तितं ॥ १३ ॥ वायव्यादुत्तरं ब्राह्म्यं परं ब्रा
ह्म्यात्तु वारुणं ॥ आग्नेयं वरुणाच्छ्रेष्ठं स्यादुक्तं शंभुना ॥ १४ ॥ तस्मात्सर्वप्रयत्नेन स्नानमाग्नेयमाचरेत् ॥
युधिष्ठिर उ० ॥ आग्नेयं वारुणं ब्राह्म्यं वायव्यं दिव्यमेव च ॥ १५ ॥ किमुक्तं श्रोतुमिच्छामि परं कौतूहलं मे हि ॥

मार्कं० ॥ आग्नेयं भस्मना स्नानमवगाह्यं तु वारुणं ॥ १६ ॥ आपो हिष्ठेति च ब्राह्म्यं वायव्यं गोरजः स्मृतं ॥ दृष्ट्वा
सूर्यं च यद्वर्षं गंगातोयसमं हि तत् ॥ १७ ॥ तत्स्नानं पंचमं प्रोक्तं दिव्यं पांडवसत्तम ॥ तस्मात्सर्वप्रयत्नेन स्ना
त्वा भूतीश्वरं नरः ॥ १८ ॥ पूजयेद्देवमीशानं सबाह्याभ्यंतरः शुचिः ॥ तत्र स्थानेषु ये नित्यं ध्यायंति परमेश्व
रं ॥ १९ ॥ सूक्ष्मं चातींद्रियं नित्यं ते धन्या नात्र संशयः ॥ मुक्तिक्षेत्रं हि तत्तीर्थं सर्वतीर्थेष्वनुत्तमं ॥ २० ॥ दर्शना
द्देवयस्याशुपापं याति सहस्रधा ॥ पूजयित्वा लभेद्राज्यं स्तुत्वा वागीशतां लभेत् ॥ २१ ॥ जाप्येन पापसंशुद्धि
र्ध्यानेनानंत्यमश्नुते ॥ दानेन च धनी दाता ज्ञानी विद्याप्रदानतः ॥ २२ ॥ ज्योतिरूपमनंतं तं लभादिमध्यांत
वर्जितं ॥ अनुद्यात्यमतीर्यं च दोषाष्टादशकोर्जितं ॥ २३ ॥ सर्वभूतस्थितं शांतं सर्वयोगीश्वरं विभुं ॥ सर्व
लोकेश्वरं शंभुं ज्ञानगम्यं स्मराम्यहं ॥ २४ ॥ तत्र तीर्थे तथा पार्थ पंचभूतैर्हि योजयेत् ॥ आत्मानं यः परे लोके
शिवस्थानचरो भवेत् ॥ २५ ॥ ॥ इति रेवामा० भूतीश्वरं तीर्थं ॥ तत्र क्षेत्रे महाराज सैंधवायतनं म
हत् ॥ तत्तीर्थादुत्तरे देशे क्रोशार्द्धे च सरिज्जलात् ॥ २७ ॥ सैंधवा परमा शक्तिर्निविष्टा तत्र शांकरी ॥ यो
गिनीभिः परिवृता सर्वसिद्धिकरं नृप ॥ २८ ॥ कूपः शक्तिश्च तत्रैव पुरतः पुण्यलक्षणः ॥ दृष्ट्वा स्पृष्ट्वा
जलं तस्य न दोषैः परिभूयते ॥ २९ ॥ फलपुष्पाक्षतैस्तत्र मध्ये चंदनकुंकुमैः ॥ अर्घदानान्महादेव्या लभ
ते वांछितं फलं ॥ ३० ॥ योगिनीविवरं तत्र नर्मदाजलसंश्रितं ॥ स्वल्पं तिरश्चक्रस्तत्र पार्थ भूताष्टमी शुच ॥ ३१ ॥
साकष्टहारिणी देवी सैंधवा संस्मृतापि वा ॥ दृष्टा च पूजिता नॄणां स्त्रीणां च नृप किं पुनः ॥ ३१ ॥ सा चैव बाप
राशक्तिः सैव ब्राह्मी च शांकरी ॥ तस्याः पूजनमात्रेण लभते वांछितं फलं ॥ ३२ ॥ नानोपचारैः परमां दीप
धूपार्घसंस्तवैः ॥ तां स्वल पशुवासोभिः पूजयेत्परमेश्वरीं ॥ ३३ ॥ तां चोपयाचितो लोका यं भजंति शिवां
सदा ॥ नत्तत्संपादयेत्तेभ्यो भक्त्यातत्सा रितोषिता ॥ ३४ ॥ सैंधवायाः परं स्थानं तव चोक्तं मे समासतः ॥

525
2008

एषा वै परमा शान्तिः किमुक्त्वा बहुविस्तरं ॥ २५ ॥ ॥ इति सैंधवामाहात्म्यं ॥ ॥ मार्कं॰ ॥ अतः परं प्रवक्ष्यामि तीर्थं
त्वार्थी शीतिक्रमांतरे ॥ गंगावाहेति विख्यातं शंखोद्धारापराह्वयं ॥ १ ॥ नर्मदायां महापुण्यं स्मृतीर्थांतिके
नृप ॥ उद्देजितापापिपापैः समागम्यात्र जाह्नवी ॥ २ ॥ पुरा वर्षशतं साग्रं परमव्रतसंस्थिता ॥ ध्यायमाना जगद्योनिं ना
रायणमकल्मषं ॥ ३ ॥ आत्मानं परमं धाम सरिता जगतीपतिं ॥ अभजद्युगवंतं सा भगवत्प्रसादसंभवा ॥ ४ ॥ त
तो जनार्दनो देव आगत्येदमुवाच ह ॥ श्रीभगवानुवाच ॥ तपसा तव तुष्टोस्मि गंगे मत्प्रसादसंभवे ॥ ५ ॥ मत्तः कि
मिच्छसि शुभे ब्रूहि किं करवाणि ते ॥ गंगोवाच ॥ त्वदंघ्रिकमला द्रष्टा जाताहं गगनेचरा ॥ ६ ॥ यदृच्छया त्रिलोकेशं त्वं
युमानादिदेवो केशवः ॥ नृपो भागीरथस्तस्मात्तपः कृत्वा सुदुःकरं ॥ ७ ॥ त्वां चाराध्य जगन्नाथं शंकरं लोकशंकरं ॥
अवतार्य मां स नृपः पृथिव्यां धरणीधरे ॥ ८ ॥ मायावेयु वयो वा कापाद्य तारः कृतो भुवि ॥ यो वै ब्रह्महणो लोके
ये चात्र गुरुतल्पगाः ॥ ९ ॥ त्यागिनः पितृमातॄणां ये च स्वर्णहरा नराः ॥ गोघ्ना ये मानुषा लोके तथा ये प्राणिहिंस
काः ॥ १० ॥ देवब्राह्मणवित्तानां ये हर्तारो नराधमाः ॥ देववेदद्विजस्त्रीणां गुरूणां ये च निंदकाः ॥ १२ ॥ अगम्यागा
मिनो ये च ये चाभक्ष्यस्य भक्षकाः ॥ ये चानृतप्रवक्तारो ये च विश्वासघातकाः ॥ ११ ॥ ब्रह्मशापेन ये दग्धा ये
चैवात्महनो द्विजाः ॥ स्नानध्यानशान्तसंन्यासा नियमव्रतवर्जिताः ॥ १३ ॥ तथैवापथ्यमानाश्च स्वगुरोश्चातिवर्ति
नः ॥ संतुष्टा ये स्वपत्नीनां पत्युः प्रियहिते सति ॥ वाक्यं चाकुर्वतां पित्रोः प्रतिश्रुत्याप्रयच्छतां ॥ बांधवेषु च
दीनेषु करुणा यस्य नास्ति वै ॥ १५ ॥ क्षेत्रांबुसेतुभेत्तारो ये पूर्वपथलोपकाः ॥ नास्तिकाः शास्त्रहंतारश्च विप्रा
संध्याविवर्जिताः ॥ १६ ॥ पर्वमैथुनिनो ये च तथा ये चाकृताशनाः ॥ सर्वाशानो ह्यसंतुष्टाः पर्वविक्रयिणस्तथा
॥ १७ ॥ कृतघ्ना नानकाः क्रूराः कदर्या ये द्विजालयाः ॥ रसविक्रयिणो विप्राः पिशुना पर्ववर्जिताः ॥ १८ ॥ स्वगो
त्रागामिनो ये च तापसीगामिनोधमाः ॥ ते पि मां प्राप्य मुच्यंते पापसंघैः समारताः ॥ १९ ॥ तस्यापतापतप्ताया म

म शर्म नु विद्यते ॥ तस्मादहं शर्वधन्नीतीरे त्वां प्रार्थये विभो ॥ २० ॥ तथा कुरु यथा शर्म लभेयं विमला सती ॥ तथैवं
प्रार्थितो देवस्तुष्टः प्रोवाच जाह्नवीं ॥ २१ ॥ श्रीभगवानुवाच ॥ एवं भवतु भद्रं ते यथा त्वया च संभृषे ॥ नैर्मल्यं
परमं गत्वा सुखिनी त्वं भविष्यसि ॥ २२ ॥ अहमप्यत्र वत्स्यामि गंगाधर सहायवान् ॥ निवासं भजरे वायामि हे गंगे म
या सह ॥ २३ ॥ मम पादयुगं प्राप्ता वहस्त्रिपथगामिनी ॥ यदा बिंदूदके काले नर्मदाजलसंप्लुता ॥ २४ ॥ त्वं च सा
माद्यपि यदा भविष्यसि जलाकुला ॥ प्लाव्योभयतटं देवी प्लाव्य मातिरसंस्थितं ॥ २५ ॥ प्लावयिष्यति मत्पादे शं
खं चक्रसंस्थितं ॥ तदा पर्वशतोद्रिक्तं पर्व वेश्मच संज्ञितं ॥ २६ ॥ नैतेन सदृशं किंचिद्व्यतीपातादिसंक्रमं ॥
अयने ह्न च तथा तद्धि पुण्यतरं यथा ॥ २७ ॥ तस्मिन्पर्वणि कल्याणी शंखं स्पृश्य मानवः ॥ स्नानं समाचरे
तो येमिश्रगा गंगया नर्मदे ॥ २८ ॥ शंखं च प्रार्थयेत्तत्र मंत्रेणानेन जाह्नवी ॥ पुण्यस्त्वं शंखपुण्यानां मंगलानां च मंग
लं ॥ २९ ॥ विष्णुना विधृतो यस्मात्तस्माच्छांतिं प्रयच्छ मे ॥ शंखप्रार्थनामंत्रः ॥ य एवं प्रार्थयेच्छंखं नरः संस्पर्शपा
णिगं ॥ ३० ॥ संछेदं पापसंघस्य ध्रुवं प्राप्नोति मानवः ॥ शंखोद्धारे नरः स्नात्वा तर्पयेत्पितृदेवताः ॥ ३० ॥ तस्यास्ते
तस्य यच्छतिशतान्यासि ऊर्ध्व तमा ॥ गंगावाहे तु यः श्राद्धं शंखोद्धारे प्रदास्यति ॥ ३१ ॥ तेन पिंडप्रदानेन पितरः
स्त्वसिमा भुयुः ॥ शंखोद्धारे नरः स्नात्वा संपूज्य हरकेशवौ ॥ ३२ ॥ दत्वा सुवर्णं विप्राय पापसंघैः प्रमुच्यते ॥ तस्मा
त्वं सर्वयत्नेन शंखोद्धारे यदा भवेत् ॥ ३३ ॥ तदृश्य नर्मदा तोय नियमव्रतधारिणी ॥ उपोष्य तद्दिनं तत्र संपूज्य
हरकेशवौ ॥ ३४ ॥ रात्रौ जागरणेनाशु विशुद्धा भव जाह्नवी ॥ यत्त्वं लोककृतां भारं न्यसे भुवि दुर्धरं ॥ ३५ ॥ तस्मि
न्पर्वणि तत्सर्वं भागत्वेह व्यपोहय ॥ एवमुक्त्वा नृप श्रेष्ठ तत्रैवांतर्दधे हरिः ॥ ३६ ॥ मार्कं॰ ॥ तदाप्रभृति राजेंद्र
तद्धि तीर्थं प्रचक्षते ॥ ब्रह्माद्यैर्ऋषिः स्नातं पारंपर्यागतैः क्रमात् ॥ ३७ ॥ तत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदे
वताः ॥ अग्निष्टोमफलं तस्य जायते नात्र संशयः ॥ ३८ ॥ तत्र तीर्थे तु यः स्नाति भक्तिभावेन भारत ॥ गंगारेवा

527/2008

प्रयतः सुस्नातो नात्र संशयः ॥ ३९ ॥ तत्र तीर्थे मृतानां तु नराणां भविता सदा ॥ गंगारेवाप्रभावेन पुनर्जन्म न
विद्यते ॥ ४० ॥ ॥ इति श्रीरेवा० गंगावाहकसंखोद्धारतीर्थं ॥ मार्कं० ॥ तस्मात्क्रमशतेपार्थ तीर्थं पुण्यं महाप्रभं ॥ गो
तमेश्वरसंज्ञं तु पापघ्नं पापहं परं ॥ १ ॥ महर्षिणा स्थापितं तत् त्रिषु लोकेषु विश्रुतं ॥ गौतमेन तपस्तप्त्वा तत्र तीर्थे
युधिष्ठिर ॥ २ ॥ दिव्यं वर्षसहस्रं तु तत स्तुष्टो महेश्वरः ॥ पुत्रार्थं च वरं लेभे मम हेतुं गौतमो मुनिः ॥ ३ ॥ स्थापया
मास देवेशं गौतमेश्वरसंज्ञितं ॥ तत्र देवैः सगंधर्वैः र्ऋषिभिश्च तपोधनैः ॥ ४ ॥ प्राप्ता ह्यनुत्तमा सिद्धिराराध्य पर
मेश्वरं ॥ तुष्टिदं सर्वदेवानां सार्वकामिकमुत्तमं ॥ ५ ॥ तीर्थं तीर्थवरं प्राह पुरा वै कश्यपो मुनिः ॥ तत्र तीर्थे तु यः स्ना
त्वा तर्पयेत् पितृदेवताः ॥ ६ ॥ पूजयेच्च महादेवं सर्वपापक्षयं लभेत् ॥ बहवस्तत्र जातिविभ्रमा याविमोहिताः ॥
॥ ७ ॥ तत्र संनिहितं देवं शूलपाणिं सनातनं ॥ ब्रह्मचारी तु यो भूत्वा तत्र तीर्थे नरेश्वर ॥ ८ ॥ स्नात्वार्चयेन्महे
शानं सोऽश्वमेधफलं लभेत् ॥ तत्र तीर्थे च यद्दानं भक्त्या विप्राय दीयते ॥ ९ ॥ तदक्षयफलं प्राह स्वयमेव प्र
जापतिः ॥ मासि चाश्वयुजे कृष्णपक्षे भूतादिने नृप ॥ १० ॥ स्नात्वा तत्र विधानेन दीपकानां शतं दहेत् ॥ पूज
यित्वा महादेवं गंधधूपनिवेदनैः ॥ ११ ॥ मुच्यते पापसंघातान्मृतः शिवपुरं व्रजेत् ॥ अष्टम्यां च चतुर्दश्यां कार्ति
के मासि यत्नतः ॥ १२ ॥ उपोष्य प्रयतो भूत्वा घृतेन स्नापयेच्छिवं ॥ पंचगव्येन दध्ना वा शीतवारिणा ॥ १३ ॥ सर्व
मेधस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ भक्त्या यः पूजयेद्देवं उपहारैः पृथग्विधैः ॥ १४ ॥ स लभेत् पुण्यमतुलं भु
क्तिं मुक्तिं च भारत ॥ बिल्वपत्रैरखंडैश्च पुष्पैरुन्मत्तकोद्भवैः ॥ १५ ॥ कुशापामार्गनिर्गुंडीकदंबद्रोणजैरपि ॥
मल्लिकाकरवीरैश्च रक्तपीतैः सितासितैः ॥ १६ ॥ पुष्पैरन्यैर्यथालाभं यो नरः पूजयेच्छिवं ॥ निरंतरेण षण्मा
सं गौतमेश्वरसंज्ञितं ॥ १७ ॥ स सर्वकाममाप्नोति मृतः शिवपुरं व्रजेत् ॥ पितृदेवसमुद्देशो ब्राह्मणान्भोजये
द्वयः ॥ १८ ॥ ते सर्वे तस्य तृप्यंति न संशोचेत्कृताकृतं ॥ छत्रोपानत्प्रदानेन दिव्यलोके महीयते ॥ १९ ॥ ॥ ॥

॥ ॥ इति श्रीरेवा० गौतमेश्वरतीर्थं ॥ मार्कं० ॥ क्रमशः द्वादशांके तस्मात्कच्छे तीर्थमनुत्तमं ॥ दशाश्वमेधसंज्ञं तु त्रिषु लो 529/2008
केषु विश्रुतं ॥ २० ॥ तत्र गत्वा महाराज स्नात्वा संपूज्य शंकरं ॥ दशानामश्वमेधानां फलं प्राप्नोति मानवः ॥ २१ ॥
॥ युधिष्ठिर उवाच ॥ अश्वमेधो महायज्ञो बहुसंभारदक्षिणः ॥ अशक्यः प्राकृतैः कर्तुं कथं तद्दशपुण्यभाक् ॥ २२ ॥
अत्याश्चर्यमिदं तात त्वयोक्तं तीर्थजं फलं ॥ यथा मे जायते श्रद्धा दीर्घायुस्त्वं तथा वद ॥ २३ ॥ मार्कं० ॥ इदमाश्चर्य
भूतं हि गौर्या पृष्टः पुराहरः ॥ तत्तुभ्यं संप्रवक्ष्यामि शृणुष्वैकमना नृप ॥ २४ ॥ पुरा वृषारूढो देवेशा उमया सह
शंकरः ॥ कदाचित् पर्यटन् पृथिवीं नर्मदातटमागतः ॥ २५ ॥ दशाश्वमेधिकं तीर्थं दृष्ट्वा देवो महेश्वरः ॥ तीर्थस्या
भ्यंजलिं बध्वा नमश्चक्रे त्रिशूलधृक् ॥ २६ ॥ कृतांजलिपुटं देवं देवी दृष्ट्वेदमब्रवीत् ॥ श्रीदेव्यु० ॥ किमिदं देवदेवे
श चराचरनमस्कृत ॥ २७ ॥ प्रफुल्लवांजलिं बद्ध्वा भक्तिं नारयता त्वया ॥ एतदाश्चर्यमतुलं सर्वं कथय मे
प्रभो ॥ २८ ॥ महेश्वर० ॥ प्रत्यक्षं पश्य तीर्थस्य पुण्यं मा विस्मिता भव ॥ वियत्स्था मे पुविस्तस्य क्षणं देवि स्थिरा
भव ॥ २९ ॥ एवमुक्त्वा स देवेशो गौरवर्णो द्विजोऽभवत् ॥ कृत्वा कमंडलुं जटिलं मुष्टिं धमनिसंततः ॥ ३० ॥ उप
विश्य भुवः पृष्ठे सुस्वरं च समुच्चरन् ॥ क्रमप्रियो महादेवो माधुर्येण प्रमोहयन् ॥ ३१ ॥ श्रुत्वा तां मधुरां वाणीं
स्वयं शर्वेण निर्मितां ॥ संभ्राताः ब्राह्मणाः सर्वे स्नातुं तत्रागता ह्ये ॥ ३२ ॥ नित्यक्रिया च सर्वेषां विस्मृताश्च तिवि
भ्रमात् ॥ तं दृष्ट्वा पठमानं च क्षुत्पिपासाभिपीडितं ॥ ३३ ॥ न्यमंत्रयद्द्विजः कश्चिद्युत्तमातं भोजनाय वै ॥ प्रसादं कु
रु विप्रेंद्र भोजनाय गृहे मम ॥ ३४ ॥ अद्य मे सफलं जन्म अद्य मे सफलाः क्रियाः ॥ सर्वान्कामान्प्रदास्यंति प्रीता मे प्र
पितामहः ॥ ३५ ॥ त्वयि भुक्ते द्विजश्रेष्ठ प्रसीदति कृपानिधे ॥ एवमुक्तो महादेवो द्विजरूपधरस्तदा ॥ ३६ ॥
प्रहसन्प्रत्युवाचेदं ब्राह्मणं श्लक्ष्णया गिरा ॥ महादेव उ० ॥ मया वर्षसहस्रं तु निराहारं तपः कृतं ॥ ३७ ॥ इदानीं पार
णं तस्य करिष्ये वेश्मनि द्विज ॥ अश्वमेधैस्तु दशभिर्येन इष्टं तु भविष्यति ॥ ३८ ॥ इत्युक्तो द्विजरूपेण ब्राह्मणो

रे०खं० विस्मयान्वितः॥ उत्तमांगं विधुन्वानो जगाम स्वगृहं प्रति॥ ३९ ॥ तेनैवं बहवो विप्राः प्रत्याख्याता निमंत्रणे॥ पुरा
णार्थं न जानंति मूढाः संदेहमाश्रिताः॥ ४०॥ अथ कश्चिद्द्विजो विद्वान् पुराणार्थहितत्ववित्॥ देवं निमंत्रयामास
२६४ द्विजरूपधरं हरं॥ ४१॥ तथैव सोपि देवेन प्रोक्तः प्राहेति तं पुनः॥ विचिंत्य मनसा सत्यं पुराणोक्तं द्विजोत्तमः॥ ४२ ॥
वेदस्मृतिपुराणेषु यथोक्तं तत्तथा ध्रुवं॥ इति निश्चित्य तं विप्रं उवाच प्रहसन्निव॥ ४३॥ भो भो विप्र प्रतीक्षस्व यावदा
गमनं मम॥ इत्युक्त्वा स ततो गत्वा दशाश्वमेधिकं परं॥ ४४॥ स्नानं मध्याह्नकालस्य कृत्वा तं तीर्थे द्विजन्मना॥ जप
श्राद्धार्चनं दानं कृत्वा वित्तानुसारतः॥ ४५॥ संकल्प्य कपिला तत्र पुराणोक्तविधानतः॥ समियात्त्वरितस्तत्र य
त्रासौ तिष्ठते द्विजः॥ ४६ ॥ अथागत्य द्विजं प्राह वाजिमेधे मयोजितं॥ उत्तिष्ठोत्तिष्ठ गृहं मह्यं भोजनार्थं द्विजोत्तम
॥ ४७॥ इत्युक्तः शंकरस्तेन ब्राह्मणेनाति नाविस्मितः॥ उवाच ब्राह्मणं देवो ब्रूहि दानीं गतो भवान्॥ ४८॥ कथमिष्टा
द्विजश्रेष्ठ वाजिमेधमखा दश॥ विधिश्रेष्ठ्यसमायुक्ता महासंभारसंभृताः॥ ४९ ॥ धनान्नदानबहुला बहुदक्षि
णयान्विताः॥ ब्राह्मण उवाच॥ न विचारस्त्वया कार्यः कृतायज्ञमयानघ॥ ५०॥ यदि वेदाः प्रमाणं वा धर्मादेवा
द्विजास्तथा॥ दशाश्वमेधिकं तीर्थं ततः सत्यं द्विजोत्तम॥ ५१ ॥ यदि वेदपुराणोक्तं वाक्यं निःसंशयं भवेत्॥ कृत
वस्तत्र दृष्टा मे नात्र कार्या विचारणा॥ ५२॥ एवमुक्तः स देवेशा आस्तिक्यं तस्य चेतसः॥ विमृश्य बहुधा किंचि
दुत्तरं न प्रपद्यते॥ ५३॥ जगाम तद्गृहं साक्षात् पठन् ब्रह्म सनातनं॥ संप्राप्तं तद्द्विजो भक्त्या पाद्यार्घेण समर्चयेत्
॥ ५४॥ षड्रसं भोजनं तेन तस्मै दत्तं यथाविधि॥ तथा भुक्ते महादेवे सर्वलोकमये शिवे॥ ५५॥ पुष्पवृष्टिः प
पातास्य गगनात्तस्य मूर्धनि॥ तस्यास्तिक्यं तु संलक्ष्य तुष्टः प्रोवाच शंकरः॥ ५६॥ महेश्वर उ०॥ किं तेद्य क्रीय
तां ब्रूहि वरदोहं द्विजोत्तम॥ अदेयमपि दास्यामि लोके चित्तस्य ते भवं॥ ५७॥ ब्राह्मण उ०॥ यदि प्रीतोसि मे देव
यदि देयो वरो मम॥ अत्र तीर्थे महादेव स्थातव्यं सर्वदैव हि॥ ५८॥ उपकाराय लोकानां मेषमेव वर उत्तमः॥ एव

२६४

मुक्तः स देवेशस्तथेत्युक्त्वा द्विजं प्रति॥ ५९॥ दशाश्वमेधिके ह्यंशं मुक्त्वा प्रोवाच तं पुनः॥ आत्मानं प्रकटीकुर्वन् सा
क्षाद्रुद्रः सनातनः॥ ६०॥ महादेव उ०॥ गच्छ पुण्यकृतं लोकान् दशाश्वमेधयाजिनां॥ दिव्यं विमानमारुह्य वीज्य
मानोप्सरोगणैः॥ ६१॥ एवमुक्तोथ देवेन स माराहद्द्विजोत्तमः॥ गंधर्वाप्सरसां संघैः संबाधं सर्वकामिकं॥ ६२॥
पूज्यमानो गतस्तत्र यत्र देवः सनातनः॥ एवमाश्चर्यभूतं हि दृष्ट्वा देवी शुचिस्मिता॥ ६३॥ विस्मयोत्फुल्लनयना
पुनः प्रोवाच शंकरं॥ देव्युवाच॥ कथमेतत्सर्वे त्वत्त्यं मत्वेदमसमंजसं॥ ६४॥ स्नानं कुर्वंति बहवो लोका यत्र महे
श्वर॥ तेषां नः स्वर्गगमनं यथैष स्वर्गतिं गतः॥ ६५॥ कथमेतत्समाचक्ष्व विस्मयः परमो मम॥ एतच्छ्रुत्वा स देवे
शः प्रहसन्नित्युवाच ह॥ ६६॥ ईश्वर उवा०॥ वेदवाक्ये पुराणार्थे स्मृत्यर्थे द्विज भाषते॥ विस्मयो नैव कर्तव्यो ह्यनुमा
न्यं हितस्तथा॥ ६७॥ असंभाव्यं हि लोकानां पुराणे यत्तु गीयते॥ तत्र संशेरते मूढा हेतुका धर्मनिंदकाः॥ ६८ ॥
यद्यपि स्वं पुरस्कृत्य लोकाः कुर्वंति पार्वति॥ तस्मान्न सिद्धिरेतेषां भवत्यत्र न संशयः॥ ६९॥ नास्तिका भिन्नमर्या
दा येनिश्चयबाह्यकृताः॥ तेषां न विद्यते सिद्धिः शास्तिके सिद्धिरुत्तमा॥ ७०॥ पुराणं पंचमो वेद आज्ञेयं परमेश्वरी
॥ प्रमाणं भवतत्कार्यं न विचारोस्ति कश्चन॥ ७१॥ श्रुत्वाख्यानमिदं देवी पवित्रं चित्रमुत्तमं॥ शिवस्य वक्त्रकमला
द्वंदे तीर्थमुत्तमं॥ ७२॥ सर्वपापहरं दिव्यं नर्मदोत्तरतीरगं॥ मार्कं०॥ दशाश्वमेधिमेतद्दै सर्वतीर्थमयं शुभं॥
॥ ७३॥ तीर्थं सर्वगुणोपेतं महापातकनाशनं॥ प्रियव्रतस्य राजो हि प्रीत्यै पूर्वं तु वेधसा॥ ७४॥ सर्वदेवर्षिसहि
तेनात्र संस्थापितं पुरा॥ देवतैर्मुनिभिश्चास्य वरो दत्तो त्र वेधसा॥ ७५॥ दशानामश्वमेधानां स्नानादेवास्य य
त्फलं॥ तत्रागता महाभागा स्नातुकामा सरस्वती॥ ७६॥ पुण्यानां परमा पुण्या नदीनां परमा नदी॥ नाममात्रेण
यस्यास्तु सर्वपापैः प्रमुच्यते॥ ७७॥ पित्रा हिरण्यगर्भेण तत्र सा स्थापिता सुता॥ स्वांशेन सा स्थिता तीर्थे विधि
वाक्यात्तपोनम॥ ७८॥ स्नातास्तत्र दिवं यांति येमनास्ते पुनर्भवाः॥ दशाश्वमेधतीर्थे सा नियता ब्रह्मचारिणी॥

531/2008

५७९॥आराधयित्वा देवेशं पवित्राणां पुरो भवत॥कालुष्यं ब्रह्मसंभूतासंव सरसमुद्भवं॥८०॥प्रक्षाल्य पितुमायाति
दशाम्यामश्विने सिते॥उपोष्य रजनीं तां तु संपूज्य त्रिपुरांतकं॥८१॥प्रातर्निःकल्मिषायाति राजन्स्वपदमुत्त
मं॥युधिष्ठिर०॥सरस्वती महापुण्या नदीनामुत्तमा नदी॥८२॥दशाश्वमेधिके कस्मात्स्नानं यातिसरित्सदा॥
किमाधिक्यं भवत्तीर्थं दशम्यां तत्र संगमे॥८३॥मार्कं०॥राजन्नश्वयुजे मासि दशम्यां लहि शिष्यते॥पार्थिवे
षु च तीर्थेषु सर्वेषेच न संशयः॥८४॥दशाश्वमेधिके राजन्नित्यं सा दशमीशुभा॥विशेषादश्विने मासि सु
ल्का पापौघ नाशिनी॥८५॥तस्यां यस्तर्पयेद्देवान् उपवासपरायणः॥श्राद्धं कृत्वा विधानेन पश्चात्तं पूजयेध्रुव
॥८६॥तत्रस्थां पूजयेद्देवीं स्नात्वा कामां सरस्वती॥नमो नमस्ते देवेशि ब्रह्मपुत्रि जगद्धिते॥८७॥कुरु पापक्ष
यं मेघ संसारान्मां समुद्धर॥गंधपुष्पार्घनैवेद्यैः पूजयित्वा पुनः पुनः॥८८॥दशप्रदक्षिणाः कृत्वा सूत्रेण प
रिवेष्टयेत॥कपिलां तत्र विप्राय दद्याद्विगतमत्सरः॥८९॥सर्वलक्षणसंपूर्णां सर्वोपस्करसंयुतां॥दत्वा
वै कपिलां विप्र नश्योच्यति कृताकृते॥९०॥पश्चाज्जागरं कुर्याद्धृते नो ज्वाल्य दीपकं॥गीतनृत्यविनोदैश्च
पुराणाख्यानकैस्तदा॥९१॥प्रभाते विमले पश्चात्स्नात्वा हैन र्मदाजले॥ब्राह्मणान्भोजयेद्भक्त्या शिवभक्तां
श्च योगिनः॥९२॥एवं कृते ततो राजन्सर्वतीर्थफलं लभेत॥तत्र तीर्थे च यः स्नात्वा पूजयेच्छंकर नरः॥९३॥
दशाश्वमेधावभृथं लभते पुण्यमुत्तमं॥पूतात्मा तेन पुण्येन शक्रलोकं स गच्छति॥९४॥आरूढः परमं या
नं कामगं शुभलक्षणं॥तत्र दिव्याप्सरोभिश्च वीज्यमानोथ माचरेः॥९५॥क्रीडते सुचिरं कालं जयशब्दादि
मंगलैः॥ततो वतीर्णः कालेन राजाराड्डिह जायते॥९६॥रत्नस्वर्णरथसंपन्नो भोगवांश्चिरजीविनः॥दशाश्व
श्वमेधे य दानं दीयते शिवयोगिनां॥९७॥दशाश्वमेधफलदं जायते नात्र संशयः॥सर्वेषामेव यज्ञानां अश्व
मेधो विशिष्यते॥९८॥दुर्लभस्त्वस्य वित्तानां भूरीणां पापकर्मणां॥अकामो वा सकामो वा मृतस्तत्र नरेश्वर॥९९॥

देवत्वं प्राप्नुयात्सोपि नात्र कार्या विचारणा॥अग्निप्रवेशं यः कुर्यात्तत्र तीर्थे नराधिप॥१००॥अग्निलोके वसेत्सो
पि यावदाहूतसंप्लवं॥जलप्रवेशं यः कुर्यात्तत्र तीर्थे युधिष्ठिर॥१०१॥ध्यायमानो महादेवं वारुणं लोकमाप्नुया
त॥दशाश्वमेधे यः कश्चित्तत्र स्वस्थात्तनुं त्यजेत॥१०२॥अक्षय्या तु गतिस्तस्य शैवं श्रुतिनिदर्शनं॥न तां गतिं या
ति भृगुप्रपाते न दंडिनश्चैव न सांख्ययोगिनः॥१०३॥तस्मिन्कृते दुंदुभिशंखनादिताः क्षणेन ते यांति हवे
महाहताः॥यत्र यत्र हतः शूरः शत्रुभिः परिवेष्टितः॥१०४॥अक्षय्यां लभते लोकान्यदि क्लीवं न भाषते॥दशाश्वमे
धे संन्यासं यः करोति विधानतः॥१०५॥अनिवर्त्तिगतिस्तस्य रुद्रलोकात्कदाचन॥दशाश्वमेधमाहात्म्यं संक्षेपेण
युधिष्ठिर॥१०६॥कथितं ते सुभक्ताय सर्वपापप्रणाशनं॥मर्त्तोस्य विस्तरं वक्तुं मन्ये ब्रह्मापि न क्षमः॥१०७॥ ॥ ॥
॥ ॥इति श्रीवायुप्रोक्ते शिवसंहितायां रे वा० दशाश्वमेधतीर्थं॥ मार्कं०॥अतः परं प्रवक्ष्यामि भृगुतीर्थमनुत्तमं॥स्थि
तं दशाश्वमेधाद्धै तद्दशीति क्रमांतरे॥१॥विस्तरं तस्य भूपाल शृणुष्व त्वं समाहितः॥यं श्रुत्वा ब्रह्महा गोघ्नो मुच्यते
पापकर्मभिः॥२॥तत्र तीर्थं सुविख्यातं वृषख्यातमिति श्रुतं॥भृगुणा तत्र राजेंद्र तपस्तप्तं पुरा किल॥३॥युधि
ष्ठिर उ०॥भृगुः कल्पविप्रेंद्र कस्य पुत्रः स कि स्थितः॥तपस्तप्त्वा स विपुलं परां सिद्धिमुपागतः॥४॥को वा वृष
स्त्वया प्रोक्तः स्तत्वा तं येन निर्मितं॥एतत्सर्वं यथान्यायं कथयस्व ममानघ॥५॥मार्कं०॥एष प्रश्नो महाराज य
स्त्वया परिपृच्छितः॥तत्सर्वं ते प्रवक्ष्यामि शृणुष्वैकमना नृप॥६॥षष्ठस्तु मानसः पुत्रो ब्रह्मणो द्विजसत्तमः॥तप
श्चचार विपुलं श्रीमति क्षेत्र उत्तमे॥७॥दिव्यं वर्षसहस्रं तु शुष्को धमनिसंततः॥निराहारो निरानंदः काष्ठपा
षाणवस्थितः॥८॥ततः कदाचिद्देवेशो विमानवरमास्थितः॥उमया सहितः श्रीमानाययौ तेन वर्त्मना॥
॥९॥दृष्ट्वा तत्र महात्मानं भृगुं वल्मीकवत्स्थितं॥उवाच देवी देवेशं किमेतद्दृश्यते प्रभो॥१०॥ईश्वर उवाच॥
भृगुर्नाम महादेवी ब्रह्मणो मानसः सुतः॥किंचिन्मनसि संचिंत्य तपस्तप्यति दारुणं॥११॥दिव्यं वर्षसहस्रं तु भम

533/2008

रे० खं० ध्यानपरायणं॥ तच्छ्रुत्वावचनं देवी क्रोधसंवर्त्तितेक्षणा॥१२॥ उवाच तत्र देवेशं शूलपाणिं महेश्वरं॥ श्रीदेव्युवाच
॥ सत्यमुग्रोसि देवत्वं लोकेस्मिन्वृषभध्वज॥१३॥ निर्दयोसि दुराराध्यः सर्वभूतभयंकरः॥ दिव्यं वर्षसहस्रं य
२६६ ध्यायमानाय शंकरं॥१४॥ ब्राह्मणायमहादेव न प्रयच्छसि धूर्जटे॥१५॥ देवाधीशं जगत्सर्वं मंत्राधीनासुरास्त
था॥ मंत्रास्ते वाडवाधीनास्तस्माद्देवाहि वाडवाः॥ पूज्याश्च भवतो पीह महादेव द्विजोत्तमाः॥१६॥ नेघवताज्ञ
साध्वीस्था दितिश्रुते सदा भवान्॥ एवमुक्तो महादेव प्रहस्य गिरिनंदिनी॥१७॥ उवाच नृपशार्दूल मेघगं
भीरया गिया॥ महेश्वर उवाच॥ श्रीविनश्यति गर्वेण तपः क्रोधेन पश्यति॥१८॥ गावो दूरप्रचारेण शूद्रान्ने
न द्विजातयः॥ क्रोधाधिको द्विजो गौरी तेन सिद्धिर्न विद्यते॥१९॥ पापाय भरिषड्वर्गस्तत्र क्रोधोतिरिच्य
ते॥ नासिद्धिः क्रोधलोभाद्भ्यां वेद वाक्यमवेहितत्॥२०॥ वर्षायुतैर्बालसेवी प्रियेनान्यद्धि कारणं॥ एवंभूत
स्य विप्रस्य क्रोधोत्थं चरितं महत्॥२१॥ प्रमाणं पश्य तस्य त्वं देवी क्रोधस्य सांप्रतं॥ एवमुक्त्वा महादेवो वृ
षसस्मार भारत॥२२॥ वृषो हि भगवान् धर्मो वृषरूपो महेश्वरः॥ ध्यातः प्राप्तः क्षणेनैव जगर्ज च मुहुर्मु
हुः॥२३॥ प्रणम्य पुरतो देवमुवाच विनयान्वितः॥ किं करोमि सुरश्रेष्ठ ध्यातः केनात्र हेतुना॥२४॥ करोमि कस्य
निधनं प्रसादं वा महेश्वर॥ शीघ्रं संभ्रांतिः प्राप्तस्य किं करस्याद्य मे विभो॥२५॥ महेश्वर उवाच॥ कोपयस्व द्विज
श्रेष्ठं गत्वा सं तापसं भृगुं॥ येनेह श्रद्दधात्येषा गौरी लोकान्वीवावृषा॥२६॥ एतच्छ्रुत्वा वृषप्राप्तो यत्र पर्णास्ते भृगो
स्तदा॥ नर्मदाया स्तटे रम्ये भृगोस्तत्राश्रमांतिके॥२७॥ मुमोच च महानादं खुरैः क्षोणीं च पनिवलः॥ श्रृंगा
ग्रेण ततः क्षिप्तो विप्रो वै नर्मदाजले॥२८॥ एवं क्रुद्धो द्विजस्तत्र दंडहस्तोभ्यधावत॥ पशोरस्याद्य दास्यामि घातं
दंडेन मस्तके॥२९॥ ततः शिखोपवीतादि परिधानं च पार्थिव॥ तदा श्रुभंव ततेन धृष्टो तो धावता जवात॥
॥३०॥ भृगुरु०॥ पापकर्मन्दुराचार कथं यास्यसि मे वृष॥ अपमानं मो धत्त्वा रू चाग र्त्तेर्खुरैः पुरः॥३१॥ गर्जि २६६

त्वैरमहानादं क्षिप्तो हं नर्मदाजले॥ तिष्ठतिष्ठ दुराचार न मे जीवन् विमोक्ष्यसे॥३२॥ मार्कंडेय०॥ स एवमुक्त्वा प्र
क्षिप्यमाल्मान वृषेना थभृगुस्तथा॥ क्रोधेना तीवजज्वाल कुताकृतिरिवानलः॥३३॥ करेगृह्य महादंडं ब्रह्मदं
डमिवापरं॥ हंतुकामो वृषं विप्रः प्रधावन्नृपसत्तम॥३४॥ धावमानं ततो दृष्ट्वार्त वृषः पूर्वसागरं॥ जंबुद्वीपं
कुशः क्रोशांशाल्मलं शाकमेव च॥३५॥ गोमेदं पुष्करं प्राप्तः पूर्वतो दक्षिणापथां॥ उत्तरं पश्चिमं चैव ब्रह्मीपाद्वि
पं नरेश्वर॥३६॥ पातालं सुतलं पश्चान्नितलं च महातलं॥ गभस्तिमच्चतामिश्रं पातालं सप्तमं ययौ॥३७॥
अतिक्रम्य च भूर्लोकं भुवर्लोकं च भारत॥ महर्जनः स्तपन्नित्यं प्राणार्थी सत्य सोत्तमः॥३८॥ अन्वियमा
नो विप्रेण न शर्म लभते क्वचित्॥ पापं कृत्वेव पुरुषः कामक्रोधबलार्दितः॥३९॥ ततो जगाम शरणं ब्रह्मा
णं विष्णुमेव च॥ शक्रं सोमं तथादित्यं यमं वरुणमारुतौ॥४०॥ सर्वैरोवतदास्यर्के लोकालोकेः सुरासुरैः॥
ततः शिवं समासाद्य नमस्कृत्य च विह्वलः॥४१॥ अब्रवीद्रक्ष रक्षेति ब्राह्मणान्मां महेश्वर॥ लिंगिनं च गुरुं
गां च ब्राह्मणं न पतिं स्त्रियं॥४२॥ मूर्खं बालं च सर्पं च कोपयंति न पंडिताः॥ मन्युप्रहरणा विप्राश्चक्रप्रहर
णो हरिः॥ चक्रात्तीव्रतरो मन्युस्तस्माद्धि प्रान्न कोपयेत्॥ बध्यमानं महादेव भृगुणा परमेष्ठिना॥४४॥ सर्वे
लोकैः परित्यक्त मनाथ भिवमां प्रभो॥ मार्कं०॥ दृष्ट्वाश्रांतं वृषं देवो लुठंतं चरणाग्रत॥४५॥ ततो देवीमुवा
चेत्राः स्मित्वा विप्रस्य चेष्टितं॥ पश्य पश्य विशालाक्षी शमं विप्रस्य याद्दृशं॥४६॥ अतस्तवोक्तं हि मया वि
प्रः कोपकदर्थितः॥ श्रीदेव्युवाच॥ विप्रासौ नाव योर्याव त्कुप्यते परमेश्वर॥४७॥ तावद्दूरं प्रपद्यस्व मम
चारित्तसिप्रियं॥ मार्कं०॥ पार्वत्या वचनाद्रुद्रः प्रतिश्रुत्य तथास्त्विति॥४८॥ ततो भस्मी जटी भूत्वा चन्द्रा
र्धकृतशेखरः॥ उमार्धदेहो भगवानुवाच भृगुमंजसा॥४९॥ ईश्वर उ०॥ भोभो भृगो द्विजश्रेष्ठ क्रोधस्ते
न शमं गतः॥ यस्मात्तस्मादिदं वत्स क्रोधस्थानं भविष्यति॥५०॥ ततो दृष्ट्वाय तः शंभुं देवदेवं त्रिलोचनं॥

535/2008

रे॰ ख॰ जातुम्भामवनीं गत्वाभ्रगुस्तत्रमिदं जगौ॥५१॥भ्रगुरुवाच॥ प्रणिपत्य कृतनाथंभवोद्भवंभूमिदं भव्यं॥ भवतो
२६७ तोभुवनपतेस्त्वांस्तोतुंकिंचिदिच्छामि॥५२॥त्वद्गुणनिरान्वक्तुंनहिशक्तोमादृशोभवति॥ त्रोपादिपरिवदतिन
यान्वदनसहस्त्रंभवेद्यस्य॥५३॥भक्तिस्तथापिशंकरभुरवरयतित्वत्कृतौमहेशान॥ स्तौतिभुरवरस्यममाद्य
प्रसीदतवचरणपतितस्य॥५४॥सत्वंरजस्तमस्त्वंस्थित्युत्पत्तौलयेचदेवेश॥ त्वांमुक्त्वाभुवनपतयेभुवनेस्मिं
नेवदेवतंकिंचित॥५५॥यमनियमयतवितरणवेदाभ्यासाश्च धारणायोगाः॥ त्वद्भक्तेः सर्वमिदंनार्हतिनृनंसा
हस्त्रांशं॥५६॥उत्कृष्टरससायनखड्गांगनविवरपादुकासिद्धौ॥चिन्हंहितवनतानांप्रदृश्यतेजन्मनिप्रक
टं॥५७॥यदिशाठ्येनप्रमणतिभेवितरसितस्यापिवांछितंत्वमितं॥ भवतिभवछेदकरीभक्तिर्मोक्षायनिर्मितास
त्या॥५८॥परदारपरस्वहृतंपरपरिभवदुःखशोकसंतप्तं॥ परवदनवीक्षणापरंपरमेश्वरमामविनयाद्रक्ष॥५९॥
मिथ्याभिमानदग्धंक्षणभंगुरतनुविलाससंतप्तं॥क्रूरंकुपथाभिमुखंपदतलपतितंतुपाहिमांशंभो॥६०॥ही
नद्विजनसार्थेबंधुजनेबहुदुःखाशं॥तच्छांकुरंविनाशयकिंमूढंमांबिडंबसेनाथ॥६१॥हरतद्भ्यमांहरशीघ्रंल
क्ष्मींप्रददस्वसुस्थिरांमत्यं॥छिंधिमदमोहपाशानभवमेशरणंसदेवदुर्वारं॥६२॥एकस्त्वमेवदेवोभुक्तेर्मु
क्तेश्वदानवानजगति॥नान्यंमान्यंमन्येसहसहर्तुमस्ययःशक्तः॥६३॥मूढास्तएवलोकास्तएवनिरयाय
नाथसुचिराय॥येषांनभवतिचित्तंभवतिसपयोथभीशवाध्यातुं॥६४॥मन्यंतुमामन्यतुलोकोमूढस्तथा
पहंवच्मि॥उद्धत्यबाहूमद्दन्त्वांभोराजावन्तोहिखलुविश्वं॥६५॥कारुण्यंकरणालयकुरुमयिलालप्यमाने
त्वं॥क्रियतेनकिंचिद्दार्त्तेप्रभुणालालयतिभृत्यवर्गस्वे॥६७॥करुणाभ्युदयंनाम्नीस्तोत्रमिदंसिद्धिदा
सनंदिव्यं॥यःपठतिभक्तियुक्तःसतस्यतुष्येद्गौरिवेशानः॥६८॥मार्कं॰॥एतच्छ्रुत्वामहादेवस्तोत्रंहिभ्र
गुभाषितं॥उवाचवरदोस्मीतिसहदेव्यासुरोत्तमः॥६९॥भ्रगुंप्रतिप्रसंनात्मायाचस्वेतितमब्रवीत॥भ्रगुः २६७

प्रसन्नंतंदृष्ट्वामहादेवमयाचत॥६९॥भ्रगुरुवाच॥प्रसंनोयदिदेवेशायदिदेयोवरोमम॥सिद्धिक्षेत्रमिदं
पुण्यंभवतामनामतः॥७०॥त्वयाचसंनिधौस्थेयंद्रहव्यैवाभयासह॥देवक्षेत्रमिदंपुण्यंयेनसर्वंहिसि
ध्यति॥७१॥रेवातीरस्थकच्छेयंममनाम्नातुविश्रुतः॥अत्रकच्छेमहास्थानंकरोमिजगदीश्वर॥७२॥मनोरथो
यमेदेवपूर्यतांत्वत्प्रसादतः॥महेश्वरउ॰॥श्रियावृत्तमिदंपूर्वंकिंनज्ञानंत्वयाद्विज॥७३॥अनुमान्यश्रियंदे
वींयथावन्मन्यतेभवान॥करोतुयदभिप्रेतंत्वत्कृतंनतदन्यथा॥७४॥एवमुक्त्वागतेदेवीस्वालयंगतेभ्रगुः
श्रियं॥कृत्वाचपारणंतत्रवसनविप्रस्तयासह॥७५॥सश्रियासहितोकाले विप्रःप्राहेदमादरात॥भ्रगुरु॰॥
यदितेरोचतेभद्रेसुरवासीनंचतेयदि॥७६॥त्वयावत्तेमहाक्षेत्रेस्वस्थानंचकरोम्यहं॥श्रीरु॰॥ममनाम्नाचता
नेदंतवनाम्नाचशोभनं॥७७॥स्वस्थानंकुरुविप्रर्षेअविरोधेनमेयदि॥भ्रगुरु॰॥कच्छपाधिष्ठितंह्येतत्तस्य
पृष्ठिगतंशुभं॥७८॥समंत्र्यसहतेनात्रशोभनंजायतेकृतं॥चलनंदृश्यतेक्ष्मेसंप्राप्तेवैयुगक्षये॥७९॥वा
सुदेवांशाक्षतेतुकच्छपाद्यचलंभवेत॥मार्कं॰॥ततोभ्रगुःश्रियंपार्थसहितोकच्छपंगतो॥८०॥अभिनंद्यय
थावर्त्तमूचतुःकच्छपंवचः॥त्वयाधृताधरासर्वातथालोकाश्चराचराः॥८१॥सदात्वंपुण्यभावत्वात्स्थितस्ति
रस्थातले॥उदंक्षेत्रमिदंस्थानंतवपृष्ठगतंयतः॥८२॥अतस्त्वांप्रार्थयावोघतदृीकुरुसत्तम॥भ्रगुरु॰॥
चातुर्विद्यद्विजस्थानंकरिष्यामिश्रियासह॥८३॥यदित्वंमन्यसेदेवतदादिशममोचधीः॥कूर्मउवाच॥एव
मस्तुद्विजश्रेष्ठममनामांकितंपुरं॥८४॥भविष्यतिचिरंकालंमत्पृष्ठस्थायिसुस्थिरं॥स्वाचारसुस्थिरंपुण्य
विप्र नधीःकार्याविडंबिने॥८५॥एवंचेक्रियतांतत्कार्यमविशंकितं॥मार्कं॰॥एतच्छ्रुत्वाशुभंवाक्यंकच्छपस्यमुरवा
च्युतं॥८६॥हृष्टःस्तुष्टःश्रियासार्धंपद्मयोनिसुतोभ्रगुः॥अनीचेउदयेप्राप्तेकृतकौतुकमंगलः॥८७॥नंद
नेवत्सरेमाघेपंचम्यांशुक्लपक्षतः॥शस्तेतथोत्तरायोगेकुंभस्तेनोन्नपोत्तम॥८८॥रेवायाउत्तरेतीरेगंभीरेवा

534/2008

तिचारिणी॥ प्रागुदक्प्रवणेदेशेतीर्थकोटिविभूषितं॥८९॥ क्रोशप्रमाणंतत्क्षेत्रंप्रसादशतसंकुलं॥ अचि
रेणैवकालेनतपोबलसमन्वितः॥९०॥ विचिंत्यविश्वकर्माणंचकारमुदितोभृगुः॥ ब्राह्मणावेदविदुषःक्षत्रि
याःक्षात्रसंयुताः॥९१॥ वैश्यवृत्तिरताविश्याःशूद्राःशुश्रूषकास्त्रिषु॥ एवंश्रियावृतंक्षेत्रंपरमानंदनंदितं॥९२॥
निर्मितंभृगुणातातसर्वपातकनाशनं॥९३॥ ॥इतिश्रीभृगुकच्छोत्पत्तिः॥ मार्कं०॥ ततःकालेनमहताक
स्मिंश्चित्कारणांतरे॥ देवलोकंजगामाशुलक्ष्मीसर्षिसमागमे॥१॥ समर्प्यकुंचिकांतालंभृगवेब्रह्मवादिने
॥स्थानंमेपालयस्वेतिब्रह्मन्नुक्त्वाजगामसा॥२॥ देवकार्याण्यशेषाणिकृत्वाश्रीःपुरोनगता॥ भृगुकच्छंमहा
पुण्यंकोटितीर्थसमन्वितं॥३॥ मयार्चिकुंचिताकालंस्वगृहंसपरिच्छदं॥ यदात्तदाभृगुःपार्थतामभ्येत्य
वदन्मुनिः॥४॥ एवंविवादःसंजातोगरीयास्तुगरीयसोः॥ ममेतिवैममैवेतिनतेस्थानंनतेत्विच॥५॥ ए
वंकालेनमहताभृगुःपरममन्युमान्॥ चातुर्विद्याश्चद्विजाःसर्वेयथाज्ञानंतिष्टंछतोने॥६॥ माणांश्चिचकारम
हतींगिरं॥६॥ भृगुरुवाच॥ अस्मदीयंयथासर्वंनगरंपुत्रिसुव्रते॥ चातुर्विद्याःद्विजाःसर्वेयथाजानंतिष्टछ
तान्॥७॥ श्रीरुवाच॥ धर्मंसत्यंचशास्त्राणिसर्वविप्रेषुवैस्थितं॥ विश्वेतद्द्विजाधीनंसत्याधाराहिसाधवः
॥८॥ नब्राह्मणात्परोदेवोनधर्मोवाथबांधवः॥ पततंनरकेघोरेवचनाद्योभिरक्षति॥९॥ ब्रह्मविष्णुशिवा
दीनांप्रमाणंयेद्विजोत्तमः॥ नकस्यचंद्यामान्याश्चपूजनीयाश्चतेभृगो॥१०॥ प्रमाणंममतेतातचातुर्वि
द्यानसंशयः॥ मदीयंवात्वदीयंवाकथयंतुद्विजोत्तमाः॥११॥ सत्यंहितपसोमूलंसत्यंसाध्वीषुसंस्थितं॥ ब्र
ह्मवादिषुविप्रेषुसत्यंसर्वंप्रतिष्ठितं॥१२॥ वदंत्विहद्विजश्रेष्ठश्चातुर्विद्यायथास्थितं॥ मार्कं०॥ ततःसर्वे
पितेतत्रसंप्रधार्यपरस्परं॥१३॥ द्विधाचापिकलिंदृष्ट्वाब्राह्मणाद्यन्नतंवचः॥ अष्टादशसहस्राणिनावोच
न्किंचिदुत्तरं॥१४॥ अष्टादशसहस्रैस्तुभृगुकोपभयान्नृप॥ उक्तंतालकहस्तोयस्तस्येदंस्थानमुत्तमं॥१५॥

एतच्छ्रुत्वारमादेवीनगरंनैगमैःसह॥ क्रोधेनमहताक्रांताशशापद्विजपुंगवान्॥१६॥ श्रीरुवाच॥ यस्मात्स
त्यंसमुत्सृज्यलोभोपहतमानसैः॥ लुप्तंमेस्थानमन्नतैस्तस्मात्शृण्वंतुमेगिरं॥१७॥ नभविष्यतिवोविद्याध 539/2008
नंचपुरुषत्रयं॥ नद्वितीयंतथावेदंपठिष्यंतिद्विजाहिवः॥१८॥ गृहाणिनद्विभौमानिनचप्रतिस्थिराद्विजः
॥पक्षपातकृतोधर्मोनचवैःश्रेयसाकृतः॥१९॥ दृष्ट्वागोत्रजनेकिंचिद्लोभेनाचत्तमानसः॥ नचद्वैधंपरित्य
ज्यस्वैकमत्यंभविष्यति॥२०॥ अद्यप्रभृतिसर्वेषामहंकारद्विजन्मनां॥ नपितापुत्रवाक्यार्थीपुत्रोवापितृ
वाक्यकृत॥२१॥ अहंकारताःसर्वेप्येवमुक्त्वादिवंययौ॥ ततोगतायांलक्ष्म्यांवैदेवाब्रह्मर्षयोमलाः॥२२॥ क्रो
धलोभहृतंस्थानंतेपिमुक्त्वादिवंययुः॥ गतांदृष्ट्वाततोदेवान्सर्षीश्चापितपोधनात्॥२३॥ परमेष्ठीभृगुःसो
पिविषादमगमत्स्वयं॥ प्रसादयामासपुनःशंकरंत्रिपुरांतकं॥२४॥ तपसामहतापार्थततस्तुष्टोमहेश्वरः॥ उ
वाचवचनंकालेहर्षयन्भृगुसत्तमं॥२५॥ ईश्वरउवाच॥ किंविषण्णोसिविप्रेंद्रकिंवासंतापकारणं॥ मयिप्रसन्नेपि
तवब्रूह्येतत्सर्वमंजसा॥२६॥ भृगुरु०॥ शाश्वास्थानंद्विजाहंसिलक्ष्मीःकोपादिवांगना॥ प्रसादितोस्यतःशर्ववर
मेतंददस्वमे॥२७॥ अयोग्यतामितिमन्वाताःस्थानंदेवर्षयोगताः॥ किंकरोमिक्वगच्छामिकथंमेस्थानयोग्य
ता॥२८॥ प्रसादितोस्यतःशर्ववरमेकंददस्वमे॥२८॥ महेश्वरउवाच॥ पुरामयायथाप्रोक्तंतत्तथानतदन्य
था॥ क्रोधस्थानंनसंदेहस्तथान्यदपिमेशृणु॥२९॥ अत्रस्थानसमुद्भूतामहद्भयविवर्जिताः॥ ब्राह्मणामत्प्र
सादेनभविष्यतिनसंशयः॥३०॥ वेदविद्याव्रतस्नाताःसर्वशास्त्रविशारदाः॥ येपितेशतसाहस्राअन्यतोप्यागता
स्त्विह॥३१॥ अपहस्यापिभूर्वस्यसर्वावस्थागतस्यच॥ उत्तरादुत्तरंदातुंशक्तःकोपिनवैभृगो॥३२॥ पुण्या
त्पुण्यमिदंस्थानंतीर्थकोटिनिषेवितं॥ अद्यप्रभृतिविप्रेंद्रभविष्यतिनसंशयः॥३३॥ मत्प्रसादाद्देवगणैःसे
वितंचभविष्यति॥ भृगुक्षेत्रमतानांतुकृमिकीटादिपक्षिणां॥३४॥ वासःश्रेष्ठःशिवलोकेयुगमेकंभविष्य

ति॥ वृषखातेनरः स्नात्वापूजयेन्मांहियोभृगौ॥३५॥सर्वमेधस्ययज्ञस्यफलंप्राप्नोत्यसंशयं॥भृगुतीर्थेनरस्ना
त्वातर्पयेद्यः सुरान्पितॄन्॥३६॥तस्यतेद्वादशाब्दानितृप्तिंगच्छंतितर्पिताः॥दधिक्षीरसीताज्यैश्चमधुनासहस
र्पिषा॥३७॥स्नापयेतिविरूपाक्षं तेलभंतेभिवांछितं॥मत्प्रसादाद्विजश्रेष्ठदेवसिद्धर्षिसेवितं॥३८॥भविष्य
तिभृगोस्थानंकुरुक्षेत्रादिभिःसमं॥मार्त्तंडग्रहणेप्राप्तेयवंकृत्वाहिरण्मयं॥३९॥दत्वाशिरसियःस्नात्वाभृ
गुक्षेत्रेद्विजोत्तम॥अवश्यमेवतंविद्धिसंस्नातंकुरुजांगले॥४०॥अहमत्रवसिष्यामिसदैवांबिकयासह॥म
मप्रियांबिकादेवीगिरिजादैन्यनाशिनी॥४१॥दुःखदौर्भाग्यहरिणीनाम्नासौभाग्यसुंदरी॥यस्यतुष्टामहादे
वीतस्यतुष्टोहमप्यलं॥४२॥वसिष्यामित्वयासार्धंदेवश्चभृगुकच्छके॥मार्कं०॥एवमुक्त्वास्थितोदेव्यासमंदेवो
भृगोस्थले॥४३॥भृगुश्चस्वपुरंप्रायाद्ब्रह्मघोषनिनादितं॥तत्रतीर्थेतुयःस्नात्वावृषमुत्सृजतेनरः॥४४॥
सयातिशिवसायोज्यंएवंशिवभाषितं॥तत्रतीर्थेचयःस्नानंचैत्रेमासिसमाचरेत्॥४५॥दद्देच्चलवणंश्र
ध्यांपूज्यसौभाग्यसुंदरी॥गोहिरण्यंबुन्नेवंप्रीयेतांललताशिवौ॥४६॥नदुःखंदुर्भगत्वंचवियोगंपतिनास
ह॥प्राप्नोतिनारीराजेंद्रभृगुतीर्थप्लवेनतु॥४७॥यश्चभृग्वीश्वरंनित्यंपश्यतेपांडुनंदन॥आब्रह्मसदनं
नूनंभसोपशेतसमंततः॥४८॥यत्फलंसमवाप्नोतितच्छृणुष्वनृपोत्तम॥सुवर्णशृंगींकपिलांत्वधेनूंपयस्विनी
साधुसुशीलवत्सां॥४९॥दत्वाद्विजायश्रुतिसंयुतायफलंहियस्यात्तदिहैवनूनं॥सभाःसहस्राणिचवसत्य
वैजलेदत्तेवमग्नोपतनेचषोडश॥५०॥तन्नूत्यजनस्वरवत्यानरेंद्रशक्रातिथ्यंयातिहीमर्त्यधर्मा॥आख्या
नमेतद्विसदायशस्यंस्वर्ग्यंधन्यंपुत्र्यमायुष्यकारी॥५१॥शृण्वंलभेत्सर्वमेतद्विभक्त्यापठन्यवैन्याजमीढ
न्वहंच॥एतत्क्षेत्रंसुविपुलंसर्वपापप्रणाशनं॥५२॥तत्रस्नात्वादिवंयांतियेमृतास्तेपुनर्भवाः॥उपानहौत
थायुग्मंदेयमन्नंचकांचनं॥५३॥भोजनंचद्विजेंद्राणांतदस्याक्षयतांव्रजेत्॥क्षरंतिसर्वदानानियज्ञजाप्यत

541
2008

पःक्रियाः॥५४॥नक्षरेच्चतपस्तप्तंभृगोस्तीर्थेनराधिप॥भृगुक्षेत्रेमहाराजयत्किंचित्क्रीयतेनरैः॥५५॥त्रयोदशा
दिनान्येवत्रयोदशागुणंभवेत्॥अतऊर्ध्वंतदर्धार्धंतदर्धार्धदिनानिवै॥५६॥वृद्धिमायातिभूपालततऊर्ध्वंततक्ष
यं॥संन्यासंकुरुतेयस्तुभृगुक्षेत्रेविधानतः॥५७॥सम्यतःपरमंस्थानंयातीतिशिवभाषितं॥एतच्चभृगुःक्षे
त्रंस्वयंरुद्रेणभाषितं॥५८॥प्रहृष्टवदनोभूत्वातत्रैवावस्थितोद्विजः॥तत्रैवांतर्हितःशर्वोब्रह्मपुत्रोभृगुर्मुनिः॥५९
॥स्वमूर्त्तिंतत्रमुक्त्वाचब्रह्मलोकंजगामह॥गुणवान्निर्गुणोवापिपापैर्वापरिवेष्टितः॥६०॥भृगुंभृग्वीश्वरंभक्त्या
भवानीयःप्रपश्यति॥भवभीतिविनिर्मुक्तोभवेद्ब्रह्मवतांवरः॥६१॥नबिभेतियमस्यापिनियमेनवसन्यमी॥
एषतेभृगुकच्छस्यसंभवःकथितोमया॥६२॥संक्षेपेणमहाराजसर्वपापप्रणाशनः॥एतत्पुण्यंपापहरंक्षेत्रंदे
वेनकीर्त्तितं॥६३॥भृगुणानिर्मितंपार्थसर्वभूतार्त्तिनाशनं॥चतुर्युगसहस्रेणब्रह्मणोदिनमुच्यते॥६४॥
विप्राब्रह्मदिनांतेचजायतेभूतसंप्लवः॥तथापिनत्यजामीदंक्षेत्रमेदंवदेच्छिवः॥६५॥आश्विनस्यतुमास
स्यप्राप्तेदर्शदिवासरे॥रुद्रलोकेव्रजेत्क्षेत्रमिदमाहेतिशंकरः॥६६॥विप्रादिवर्णैःसहितंप्राणिभिःसचरा
चरैः॥तत्रयास्यतिराजेंद्रकस्मिंश्चित्कालपर्यये॥६७॥यद्दंश्रणयाभक्त्यापुरुषोवनितापिवा॥सयातिपा
पनिर्मुक्तःस्वर्गमित्याहशंकरः॥६८॥वृषखातेनरःस्नात्वापिंडदानादिसत्क्रियां॥यःकरोतिनृपश्रेष्ठतामक्ष
यफलांविदुः॥६९॥यश्चेदंशृणुयाद्भक्त्याभृगुकच्छस्यविस्तरं॥कोटितीर्थावगाहस्यफलमाप्नोतिमानवः॥७०
॥ ॥इतिश्रीरेवा०भृगुकच्छतीर्थं॥ ॥मार्कं०॥सौभाग्यसुंदरीदेवीमर्त्यानामघनाशिनी॥दृष्टाचपूजितापा
र्थस्तुताचप्रणतापिवा॥१॥नाशयेत्सर्वदुरितंसुखसौभाग्यमावहेत्॥अतस्त्वांपूजयिष्यामिलोकवांछि
तसिद्धये॥२॥भृगोःक्षेत्रेमहाराजप्रियांभृग्वीश्वरस्यहि॥स्तुतासंपूजिताध्यातानानाभेदेनरूपाभिह॥३॥
ददातिवित्तंपुत्रांश्चभुक्तिंमुक्तिंचशाश्वतीं॥एवंक्षेत्रमिदंपुण्यंत्रिषुलोकेषुविश्रुतं॥४॥समंताक्रोशमात्रे

ह्निरक्षकैरप्यधिष्ठितं॥ महादेवनियुक्तांस्तत्थैतान्शृणुनराधिप॥५॥ यत्रक्षेत्रेरुद्राश्चैवदुर्गास्तादिक्स्ववस्थि
ताः॥ पालयंतिसदाक्षेत्रं क्षेत्रपालाश्चषोडश॥६॥ स्वयंभुवस्थितास्तत्ररुद्राश्चैकादशान्नृप॥ तथैवद्वादशा
स्तावंतश्चगणेश्वराः॥७॥ नागाश्चैवदेवविद्याहिसाध्याश्चवसवस्तथा॥ एतैः पवित्रंतत्क्षेत्रं तीर्थानामिवचोत्त
मं॥८॥ किंतेनसरद्रंपार्थवर्ण्यतेवेतरन्मुरु॥ इतितेकथितंपार्थविधानंतीर्थरक्षणे॥९॥ सर्वोपद्रवनाश
युविधानंशंभुनायथा॥ क्षेत्राणांपरमंक्षेत्रंतीर्थानामिवचोत्तमं॥१०॥ स्थानानांप्रवरंचैतभृगुणानिर्मितपु
रं॥ किमन्यैर्बहुभिर्जुष्टैवासश्चेद्भृगुकच्छके॥११॥ किमन्यैर्बहुभिर्दृष्टैर्नदृष्टंचेद्भृगोस्थलं॥१२॥ ॥इति
श्रीभृगुकच्छरक्षाविधानकथनंनाम॥ ॥मार्कं०॥ ततोगच्छेतराजेंद्रकेदारंतीर्थमुत्तमं॥ वृषखातात्
स्थितंतद्वैचत्वारिंशत्क्रमांतरे॥१३॥ यत्रस्नात्वापितृश्राद्धंकृत्वापश्चात्पिबेज्जलं॥ संपूज्यदेवदेवेशंके
दारोत्थंफलंलभेत्॥१४॥ युधिष्ठिरउ०॥ कथमत्रद्विजश्रेष्ठकेदारेणस्थितिःकृता॥ उत्तरेनर्मदाकूलेवदेत
द्विस्तरान्मम॥१५॥ मार्कं०॥ पुराकृतयुगस्यादौशंकरस्तुनरेश्वर॥ भृगुणाराहितःप्राहकल्पेनसमंभव॥
॥१६॥ प्रियाचस्थानमार्गेस्मिन्ततःसिद्धिर्भविष्यति॥ नविस्मृतंचतत्तेनप्रियात्रार्थंचतत्पुरं॥१७॥ अपवि
त्रमिदंस्थानंसर्वदेवविवर्जितं॥ भविष्यतिनपश्चेष्ठगतेसुरलोकंहरिप्रिया॥१८॥ तपश्चचारविपुलंभृगुर्व
र्षसहस्रकं॥ वायुभक्षोनिराहारःशिराधमनिसंततः॥१९॥ ततःप्रत्यक्षतामागाल्लिंगरूपोमहेश्वरः॥ प्रा
दुर्भूतस्तुसहसाभित्वापातालसप्तकं॥२०॥ ददर्शाथभृगुर्देवंमोन्यलंकारकंयथा॥ स्तुतिंचक्रेचदेवा
यस्थाणवेत्र्यंबकायच॥२१॥ नमोस्तुविश्वरूपायविरूपाक्षायशूलिने॥ पुरविध्वंसिनेशाश्वतकामांध
कविनाशिने॥२२॥ व्यक्ताव्यक्तस्वरूपायकालात्रयमयायच॥ वरदायवरेण्यायनिर्गुणायगुणात्मने॥२३॥
सदोदितायशांतायजन्ममृत्युहरायच॥ नमःशुद्धस्वरूपायस्वर्गस्थित्यंतहेतवे॥२४॥ गौरीप्रियायगौरा

यमृकांकालांकृतायच॥ रजोगुणमयेनादौयेनसृष्टमिदंजगत्॥२६॥ विश्वंविधिनिषेधाभ्यांतंनमामिस
दाशिवं॥ गुणंसत्त्वमथाश्रित्ययेनेदंपाल्यतेशिवं॥२७॥ धर्मसंस्थापनायादौतंनमामिसदाशिवं॥ गुणंसं
स्यमथाश्रित्यं॥ तमोगुणमयायश्चसंहृत्यनिखिलंजगत्॥२८॥ शेतेतुप्रकृतौशांतःस्तं०॥ हिमाद्रिनिल
योदेवोजटामुकुटमंडितः॥२९॥ केदारःपरमोदारःस्तं०॥ दिनानाथसमुद्भूतोगौरीभर्त्तागणप्रियः॥३०॥
सृष्टिसंलयबीजाढ्यःसशिवोप्रसीदतु॥ मार्कं०॥ एवंस्तुतःसभगवान्साक्षाद्रूपोहसंनिव॥३१॥ पुनःप्राहभृ
गोमत्तःकिंपुनःप्रार्थ्यतेवद॥ भृगुरु०॥ अपवित्रमिदंक्षेत्रंसर्वदेवर्षिवर्जितं॥३२॥ भविष्यतीतिप्रोत्कासा
गतादेवीत्रिविष्टपं॥ तस्मात्पवित्रयातोतिमथाक्षेत्रमिदंपुनः॥३३॥ तथाकुरुशान्प्रसंनोमममचेत्प्रभो॥ म
हेश्वरउवाच॥ त्वयानुस्तुवताभक्त्यायत्केदारत्वमीरितं॥३४॥ शापमोक्षकरंब्रह्मन्महापापहरंततः॥ केदा
रस्यमिदंश्रेष्ठंलिंगमाद्यंभविष्यति॥३५॥ यथाहिमाद्रिनिलयोग्रहंसर्वौघनाशनः॥ तथेहापिस्थितोपलिं
गेभक्तानांवांछितार्थदः॥३६॥ कृत्वेदृमादिलिंगानिभविष्यंतिदशैवहि॥ एकादशमध्यंचक्षेत्रमध्येभ
विष्यति॥३७॥ पावयिष्यंतितत्क्षेत्रमेकादशस्वयंभुवः॥ तथैवद्वादशादित्यामत्प्रसादात्स्वमूर्त्तितः॥३८॥
भविष्यंतिभृगुक्षेत्रेरोगदुरवनिबर्हणाः॥ दुर्गाष्टादशापूर्वोक्ताक्षेत्रपालाश्चषोडश॥३९॥ पवित्रीकृतमेतै
र्हिनित्यंक्षेत्रंभविष्यति॥ माघमासेकृष्णपक्षेकालरात्रौमासंजितेंद्रियाः॥४०॥ येपूजयंतिकेदारंगच्छंतिपरमां
गतिं॥ तस्मिंस्तीर्थेनरस्नात्वापितृन्तर्प्ययभारत॥४१॥ श्राद्धंददातिविधिवत्तस्यप्रीताःपितामहाः॥ का
र्त्तिकेमाघमासेवातत्रदीपप्रदोहियः॥४२॥ नचक्षुर्हीयतेतस्यदीप्तिरायुश्चवर्द्धते॥ शैवान्पाशुपतान्विप्रा
तथाकार्पटिकान्द्विजान्॥४३॥ भोजयेद्योनरोभक्त्यासगच्छेकृतिमक्षयं॥ मार्कं०॥ एवमुक्त्वाययौशंभुस्तत्रैवा
दर्शनंनृप॥४४॥ भृगुश्चपरमंस्थानंपुनराश्वासयत्स्वयं॥ गत्वेहिमाचलंगत्वाकेदारस्यार्चनात्फलं॥४५॥

545
2008

नरस्तत्समवाप्नोतिभृगोकेदारदर्शनात् ॥ एतत्तेकथितंराजन्केदारंतीर्थमुत्तमं ॥ ४६ ॥ सर्वपापहरंपुण्यंदुःख
दुःखप्रनाशनं ॥ ४७ ॥ ॥ इतिश्रीरेवा० केदारेश्वरतीर्थं ॥ मार्कं० ॥ ततः क्रमेणगच्छेतधूतपापंव्रजेन्नरः ॥ भृ
गुतीर्थसमीपेतुपापतापहरंपरं ॥ १ ॥ वृषेणतुभृगुस्तत्रभूयोभूयोधुतोहतात् ॥ धूतपापंतुतेनास्यख्यातंना
म्नाहितेनतत् ॥ २ ॥ तत्रोतस्थोमहादेवस्तुष्टोवैभृगुसत्तमे ॥ प्रहर्षमतुलंगत्वामहाकोपस्यदर्शनात् ॥ ३ ॥
प्रशंसन्भृगुंपार्थदत्तोतस्यवरंपरं ॥ तत्रतीर्थेनरःस्नायात्स्पृष्ट्वानाथंमहेश्वरं ॥ ४ ॥ मुच्यतेसर्वपापेभ्योना
त्रकार्याविचारणा ॥ यश्चसम्यग्विधानेनतत्रस्नात्वार्चयेच्छिवं ॥ ५ ॥ देवान्पितॄंश्चसंतर्प्यमुच्यतेसर्वपातकैः
॥ ब्रह्मस्त्रीबालगोहत्यातत्रतीर्थेयुधिष्ठिर ॥ ६ ॥ भीतानप्रविशेत्पार्थप्रविष्टापिक्षयंव्रजेत् ॥ युधिष्ठिर० ॥
आश्चर्यमेतद्धिकेस्मिन्कथयस्वद्विजोत्तम ॥ ७ ॥ ब्रह्महत्यापिनश्येद्धूतपापेयथाविधि ॥ ब्रह्महत्यास
मंपापंभवितानेहकिंचन ॥ ८ ॥ कथंचधूतपापेसाप्रविष्टानश्यतिद्विज ॥ एतद्विस्तरतः सर्वंश्रोतुमिच्छामिवद
कौतुकान् ॥ ९ ॥ मार्कं० ॥ आदिसर्गेपुराशंभुर्ब्रह्मणः परमेष्ठिनः ॥ विकारिपंचमंदृष्ट्वाशिरोश्वतरसंनिभं ॥ १० ॥
अंगुष्ठांगुलियोगेनकृतंतेनाभूतच्छिरः ॥ कृतमात्रेतुशिरसिब्रह्महत्यासमुद्भृता ॥ ११ ॥ तयासमन्वितोयात
उत्तरंनर्मदातटं ॥ वृषेणधूनितोयत्रभृगुर्वैधर्ममूर्त्तिना ॥ १२ ॥ भृगुणाद्रावितेनात्रप्रासादेवीहरप्रिया ॥
वृषेणस्थापितादेवीनाम्नाधूतेश्वरीततः ॥ १३ ॥ आश्वासितभृगोपार्थतथाशर्वस्यसंनिधौ ॥ ददर्शभगवान्
शंभुः सर्वदेवनमस्कृता ॥ १४ ॥ दृष्ट्वाधूतेश्वरीदेवीब्रह्महत्याविनाशिनीं ॥ तत्रविश्रामम्करोच्छंकरस्त्रि
पुरांतकः ॥ १५ ॥ सशंकरोब्रह्महत्याविहीनंमेनेत्मानंतत्रतीर्थप्रभावात् ॥ सुविस्मितोदेवदेवोवरेण्योदृष्ट्वाद्
रेब्रह्मह्त्यांचतीर्थात् ॥ १६ ॥ विधूतपापंरक्षितधर्मशात्वाविशान्नहत्यातत्रदेव्याः प्रभीता ॥ रक्ताम्बरारक्तमा
ल्योपयुक्ताकृष्णानारीरक्तदामान्तहस्ता ॥ १७ ॥ सावांछितीस्कंधदेशांहरस्यहरेस्थितातत्रतीर्थप्रभावात् ॥
संचिंत्यदेवोमनसास्मरारिर्वामायबुद्धितत्रतीर्थंचकार ॥ विम्रश्यदेवोबहुशःस्थितस्वयंविधूतपा

प्यितः पृथिव्यां ॥ १८ ॥ संपूज्यमाससुरेश्वरीतांधूतेश्वरीनाममहाघहंत्रीं ॥ तदाप्रभृतिराजेंद्रब्रह्महत्यावि
नाशनं ॥ १९ ॥ धूतपापंपरंतीर्थंनर्मदायांव्यवस्थितं ॥ अश्वयुक्शुक्लनवमीतत्रतीर्थेविशिष्यते ॥ २० ॥ दिन
त्रयेपिराजेंद्रसप्तम्यादिविशेषतः ॥ समुपोष्याष्टमीभक्त्यासांगवेदंपठेत्तु यः ॥ २१ ॥ अहोरात्रेणचैकेनसं
श्रग्युयजुः सामसंज्ञकं ॥ अभ्यसन्ब्रह्महत्यायामुच्यतेनात्रसंशयः ॥ २२ ॥ वृषलीगमनंयच्चयच्चगुर्वंगना
गमः ॥ स्नात्वाब्रह्मसरस्यामिष्टकुंभैनैवविमुच्यते ॥ २३ ॥ वंध्यास्त्रीजननीयाचकाकवंध्यामृतप्रजा ॥ तत्र
कुंभोदकैःस्नाताजीवपुत्रीप्रजावती ॥ २४ ॥ शारीरदोषैर्मुक्तास्यात्पुत्रंश्रेष्ठंगुणैर्लभेत् ॥ उपोष्यचापठन्वि
प्रोसग्युजुःसामसंभवां ॥ २५ ॥ सचमेकांजपन्नस्तुतथाथर्वणतापिवा ॥ नहचोपिजपेत्रगायत्रीवेदमातरं
॥ २६ ॥ जपन्नवश्यंविप्रेंद्रोमुच्यतेपापसंचयात् ॥ एवंतेकथितंतातपुराणोक्तंमहर्षिभिः ॥ २७ ॥ धूतपापं
महापुण्यंशिवेनकथितंमम ॥ यत्रैस्तेसंजेयत्प्राणान्जलेवाग्नौस्थलेपिवा ॥ २८ ॥ सगच्छतिविमानेन
ज्वलनार्कसमप्रभः ॥ हंसबर्हिप्रयुक्तेनसेव्यमानोप्सरोगणैः ॥ २९ ॥ शिवस्यपरमंस्थानंयत्सुरैरपिदुर्लभं
क्रीडतेस्वेच्छयातत्रयावच्चंद्रार्कतारकाः ॥ ३० ॥ धूतपापेतुयानारीकुरुतेप्राणसंक्षयं ॥ तत्क्षणादेवसापा
र्थपुरुषत्वमवाप्नुयायात् ॥ ३१ ॥ तर्पयेत्तुपितॄंन्श्राद्धेपूजयेच्चमहेश्वरं ॥ ब्राह्मणान्भोजयेच्छक्त्यादीपंदेवा
यदापयेत् ॥ ३२ ॥ ब्राह्मणानन्नवस्त्रैश्चदक्षिणाभिश्चतोषयेत् ॥ यएवंकुरुतेपार्थसर्वपापैः प्रमुच्यते ॥ ३३ ॥
अथकिंबहुनोक्तेनशुभंवायदिवाशुभं ॥ तदक्षयफलंसर्वंधूतपापेकृतंस्थितं ॥ ३४ ॥ ॥ इतिभृगुकच्छे
धूतपापतीर्थंनाम ॥ ॥ मार्कं० ॥ ततः परंमहाराजएरंडीतीर्थमुत्तमं ॥ धूतपापात्क्रमाणांतच्चतुर्विंशात
रेस्थितां ॥ १ ॥ मुनिरेरंडनामावैतपोतप्यसुराभहत् ॥ अनसूयाश्रमेपुण्येसंतानार्थंयुधिष्ठिर ॥ २ ॥ कालेन
बहुनातस्यपुत्रीपरमलक्षणा ॥ जाताजगद्धितासौम्यापरमार्थविदांवरा ॥ ३ ॥ पितरंसापरिचरत्तमस्यहंसा

545
2008

तुकन्यका॥ स्वर्यातेदेवयोगेन तातेसातीवदुःखिता॥४॥ एरंडीनामराजेंद्र तीर्थातीर्थं तु निर्गता॥ कुमारीयो
गनिरता परा शक्तिरिवोत्तमा॥५॥ भृगुक्षेत्रमनुप्राप्ता तपस्तेपुं धृतव्रता॥ धूतपापे ततः स्नात्वा विविक्तं
स्थानमाश्रिता॥६॥ ततो देवैर्वरो दत्तो मुनिभिश्च तपोधनैः॥ लप्स्यसे सिद्धिमचिराद् पुण्यानेन कन्यके॥७॥
दृश्या दृश्यस्वरूपात्वं भविष्यसि जगत्त्रये॥ पूजयिष्यंति ये लोकास्तीर्थेस्मिन् प्रतिमां तव॥८॥ तेषामवि
भवित्री च सिद्धिः पुत्रादिवंछिता॥ एवं दत्वा वरं ह्यस्यै गता देवा यथागतं॥९॥ कालिनकिंषताप्याप सिद्धिं
सापि युधिष्ठिर॥ दृश्यादृश्येन रूपेण सा स्व तीर्थं न मुंचति॥१०॥ साधूनामुपकाराय दुष्टानामपकारिणी॥ एवं
ते कथितं पार्थ एरंडीतीर्थमुत्तमं॥११॥ मासि चाश्वयुजे तत्र शुक्ले पक्षे चतुर्दशी॥ उपोष्य प्रयतः स्नात्वा तर्पयेत
पितृदेवताः॥१२॥ स्नानमात्रेण राजेंद्र तथैरंड्याश्च पूजनात्॥ ब्रह्महत्यादिपापानि क्षीयंते पांडुनंदन॥१३॥
पुत्रर्द्धि धर्मरूपाढ्यो जीवेच्च शरदां शतं॥ अंततः शिवपुरं याति नात्र कार्या विचारणा॥१४॥ शाकं च लोकमा
प्नोति संपूज्यैरंडिकां नरः॥ यद्यदिच्छसि तीर्थेस्मिन् कामं स्तुत्वा परं हृदि॥१५॥ सत मामोति नियतं सिध्येरं
डाप्रभावतः॥१६॥ ॥ इति श्रीरे० एरंडीसंभवतीर्थं॥ मार्कं० ॥ ततस्तीर्थान्महाराज गत्वा षष्टिक्रमां
तरे॥ सिद्धिदं भक्तलोकानां तीर्थं कनकलेपितं॥१७॥ प्रसन्ना गरुडस्यादैत्यत्रां बाकनकेश्वरी॥ गरुडेन त
पस्तप्त्वं पूजयित्वा महेश्वरं॥१८॥ दिव्यं वर्षशतं यावज्जातमात्रेण भारत॥ तपसा सुकृशीभूतो दृष्टो देवेन
शंभुना॥ ततस्तुष्टो महादेवो वैनतेयं महाबलं॥ उवाच परमं वाक्यं विनतानंदवर्धनं॥२०॥ प्रसन्नस्ते म
हाभाग वरं वरं य सुव्रत॥ दुर्लभं त्रिषु लोकेषु ददामि तव खेचर॥२१॥ गरुड उ०॥ आतस्य मम मातावै प्रो
क्त मे वं महेश्वर॥ वाहनं त्वं महाविष्णोर्भव शत्रुभयंकरः॥२२॥ ब्रह्मविष्णुशिवाल्लुल्का शत्रुभिश्चापराजि
तः॥ तस्मादेनं महेशानं त्वां याचे मातृकावचः॥२३॥ भवामि वाहनं विष्णोस्तथेंद्रत्वं शिवार्थये॥ प्रसन्नश्चेन

महादेव तथा कुरु मम प्रभो॥२४॥ ईश्वर उ०॥ दुर्लभः प्राणिनां वत्स वरः प्रार्थितस्त्वया॥ वाहनं देवदेवस्य क
थं भवितुमर्हसि॥२५॥ नारायणोदरे सर्वं त्रैलोक्यं सचराचरं॥ त्वया स कथमुत्थेत तव स्थाने कथमिंद्रता॥२६॥
तेनैव स्थापितश्चेंद्रस्त्रैलोक्ये सचराचरे॥ इंद्रत्वं कथमन्यस्य भवतीति सुदुर्लभं॥२७॥ तथापि मम वाक्येन
वाहनं भविता हरेः॥ शंखचक्रगदापाणिर्न हतोपि जगत्त्रयं॥२८॥ इंद्रश्च पक्षिनं मध्ये भविष्यति न संशयः॥ इति
दत्वा वरं तस्मै तत्रैवांतर्दधे शिवः॥२९॥ गते चादर्शनं देवो पुनस्तत्र खगोत्तमः॥ स्वल्पस्येन शक्तिमतुलां श
क्तिं स कनकेश्वरी॥३०॥ आराधयामास तदा चामुंडां शंकरप्रियां॥ श्मशानवासिनीं देवीं नानाभूतगणावृतां॥
॥३१॥ योगिनी योगसंसिद्धां वसामांसासवप्रियां॥ चंडाट्टहासिनीं चंडां चंडमुंडविनाशिनीं॥३२॥ चामुंडा
मुंडमालभ्यां नाम्ना तु कनकेश्वरी॥ ध्यातमात्रा तु सा तेन प्रत्यक्षाह्यभवत्क्षणात्॥३३॥ जालंधरे तु या सि
द्धिलक्ष्मीः कोल्लापुरे च या॥ मायापुरे च माया उड्डियाने च योगिनी॥३४॥ समग्रा साभृगुक्षेत्रे सिद्धिदा सम
वस्थिता॥ स्तुयाता सर्षिभिर्देवैः पुरा सर्वार्थसिद्धये॥३५॥ वैनतेयः सदा तस्याः स्तुतिं चक्रे महामतिः॥ ग
रुड उवाच॥ या साक्षात्क्षामकंठा नवरुधिरगलत्प्रेतपद्मासनस्था भूतप्रेतादिवृंदैः पितृवननिलया त
त्रीडंतशूलहस्ता॥३६॥ शस्त्रध्वस्तप्रवीराव्रजरुरगलन्मुंडमालोत्तरीया सा देवी विश्वमाता विमलशशि
निभा पातु वश्चर्ममुंडा॥ या सा निश्चोदरांगी विकृततरवाराबरंगप्रसक्ता प्रोद्यच्छूलाप्रहस्ता प्रबलभय
हया भास्करं हुग्निनेत्रा॥३७॥ या सा सिंहासनस्था भुवनभयकरी आसिनी दुःकृतानां मुंडं ज्वाला कलापे दं
ष्ट्रानक समसैः खादती प्रेतमांसं॥३७॥ पिंगाधर्वीबद्धजूटा श्रवदसृगरुणव्याघ्रचर्मोत्तरीया दैत्येंद्रैर्यक्षर
क्षो सुरसुरनमिता पातु वश्चर्ममुंडा॥ त्रैलोक्यत्रासयंतो डहडहतकडडहाराव घोरैरनेकैर्नृत्यंती मातृमध्ये श
।वगिरिनिलया पातु वश्चर्ममुंडा॥ या सा दोर्दंडचंडडमरुरणरणद्घोरघंटाट्टहासा त्वं ज्वाला सात वाता

5417/2008

रे०खं० हतपटुपटहैर्बालतीभूतमाता॥३९॥भक्तानांपूरयंतीविविधमनसिजान्पूजितासेविताचैसाद्याशक्तिर्मे
२७२ हेन्द्रांभमुखसुररनतापातुवश्चर्मपुंडा॥दयाधत्तेविश्वमखिलंनिजांशेनमहोज्वला॥४०॥कनकप्रसवेली
नापातुमांकनकेश्वरी॥हिमाद्रिसंभवादेवीदयादर्शितविग्रहा॥४१॥शिवप्रियाशिवेसक्तापातु०॥अना
दिर्जगदादिर्यारत्नगर्भावसुप्रिया॥४२॥रथांगपाणिकापत्नीपातुर्मा०॥सावित्रीयाचगायत्रीमृडानीवा
गथेंदिरा॥४३॥स्मर्त्तॄणांयासुरवंदत्तेपातुमां०॥सौम्यासौम्यैःसदारूपैस्सजत्यवतियावत॥४४॥प
राशक्तिःपराबुद्धिःपातुमां०॥ब्रह्मणःसर्गसमयेसज्यशक्तिःपरातुया॥४५॥जगन्मायाजगद्धात्रीपातु
मांक०॥विश्वस्यपालनेविष्णोर्याशक्तिःपरिपालिका॥४६॥मदनोन्मादिनीमुख्यापातुमांक०॥विश्वसंल
यनेयुक्तायारुद्रेणसमाश्रिता॥४७॥रौद्रीशक्तिःशिवानंतापातुर्मा०॥कैलाससानुसंरूढकनकप्रसवे
शया॥४८॥भस्मकाभिहतापूर्वंपातुमां०॥यतिप्रभावभिच्छंतीत्रस्यंतीयाविनापतिं॥४९॥अबलात्वेक
भावान्वपातुमांकनकेश्वरी॥विश्वसंरक्षणेसक्तारक्षिनाकनकेनया॥५०॥आब्रह्मस्तंभजननीपातु०॥
ब्रह्मविष्णीश्वरीशक्त्याशरीरग्रहणंयया॥५१॥प्रापिताःप्रथमाशक्तिःपातुमांकनकेश्वरी॥एवंश्लोक
१६ एवंस्तुतापराशक्तिगरुडेनसुरेश्वरी॥५२॥प्रसादसुमुखीभूत्वावाक्यमेतदुवाचह॥देव्युवाच॥
तुष्टाहंतेद्विजश्रेष्ठवरंवरंयवांछितं॥५३॥स्तोत्रेणानेनमेतुष्टिःपराजातारवगोत्तम॥स्तुत्यानयामायो
नित्यंस्तोष्यतःप्रयतःसुधीः॥५४॥तस्यदास्याम्यहंभोगान्वांछितंचापिदुर्लभं॥गरुड उ०॥अजेयश्चा
मरश्चैवत्वत्प्रसादाद्भवाम्यहं॥५५॥शर्वेणापिविदत्तेत्वत्तोमेदृढिमाभवेत्॥त्वयाचात्रसदादेवीस्थातव्यं
तीर्थउत्तमे॥५६॥श्रीदेव्यु०॥एवंभवतुतेभद्रयन्मनोवांछितंत्वया॥अजरश्चामरश्चैवभवितारिवाह
नं॥५७॥यन्मेकनकेश्वरीनामत्वयाग्रहंप्रकाशितं॥स्थास्यामिनाम्नानेनैवलोकप्रियाचिकीर्षया॥५८॥

२७२

यो मांकनकेश्वरीनाम्नापूजयिष्यंतिभक्तितः॥दास्येतस्यातुलांशक्तिंसर्वकार्येषुवीश्वरी॥५९॥संतानंसुख
सौभाग्यधनानिचसलप्स्यते॥पत्रपुष्पार्घधूपैर्मांयःस्नात्वाभ्यर्चयिष्यति॥६०॥गरुडप्रार्थितादेवीतत्रांशेना
त्मनस्थिता॥तदाप्रभृतिराजेंद्रनाम्नातुकनकेश्वरी॥६१॥गरुडोपिततःस्नातःसंपूज्यकनकेश्वरी॥
तीर्थंतत्रैवसंस्थाप्यजगामस्थानमात्मनः॥६२॥युधिष्ठिर०॥ब्रह्मन्कनकेश्वरीनाम्नात्वयाप्रोक्तातुयाम
म॥नैवसाश्रुतपूर्वामेविस्मयोयंमहान्हृदि॥६३॥बहूनिसंतिनामानिपुराणेषुश्रुतानिमे॥कथमेतत्क
दातंचवदमेनामनिर्णयं॥६४॥मार्कं०॥कैलासशैलेपुरापार्थपार्वतीपरमेश्वरौ॥रमतौविविधैर्भावैर्भक्ता
नांभयनाशनौ॥६५॥कदाचित्कालयोगेनशिवःस्वर्णगिरिंययौ॥सुरकार्येसमुत्पन्नेत्वत्वाब्रह्मकृतांस
भां॥६६॥दिक्पालालोकपालाश्चसिद्धविद्याधरोरगाः॥मेरुपृष्ठेतथाराजन्गंधर्वाप्सरसोगमन्॥६७॥ए
एतस्मिंनंतरेदेवीमेकांमत्वाशिवालये॥भस्मकोनामदैत्येंद्रस्तत्रायातजिघृक्षया॥६८॥शूरःसर्वेश्वरीं
दुर्बलशक्तिसमन्वितः॥ज्ञात्वादैत्यपतिंप्राप्तंदुष्टदैत्यविमर्दिनी॥६९॥सूक्ष्मरूपधरादेवीपलाय्याश्रुत
दयतः॥शतकृत्वास्तत्रभ्रामस्वधामपरीतोन्टप॥७०॥पृष्ठलग्नश्चदैत्योपिनतांत्यजतिलंपटः॥यदात
दाभगवतीकैलासाद्रिमशेषतः॥७१॥परिभ्राम्भवेगेनवक्षाद्दृष्टंवनाढ्यं॥तथाप्यनुगतंदृष्ट्वादेवीश्रमस
माकुला॥७२॥किंकृत्वारुचिरंमस्यादितिभर्त्तृहितैषिणी॥चिंतयंतीपुरोपश्यन्कनकंचातिशोभनं
॥७३॥सन्मीलप्रसवंप्राप्यवेगेनमहतान्टप॥वंचयित्वानुगंदैत्यंप्रसूतन्यलीयत॥७४॥तद्दिनंसकलंसो
पिपरिभ्रामतगिरीं॥नापश्यत्तामुमांदेवींकनकप्रसवस्थितां॥७५॥एतस्मिंनंतरेप्राप्तोमहादेवोसु
रांतकृत॥शूलीपिनाकपाणिश्चकंपयन्सकलंजगत॥७६॥नापश्यद्भवनेदेवीमुमांदेहार्धधारिणी॥
उन्मत्तस्थितिरीशानोभ्रमंदैत्यंददर्शह॥७७॥प्रयुक्तस्तेनवैशर्वादिनान्यष्टोन्टपोत्तम॥ततोबिभेदनवंमे

549
2008

दिनेशूलेनवक्षसि॥सभिंनसंघयस्तूर्णंपपातचममारच॥ततस्तांवीक्ष्यमाणोपिनापश्यगिरिजांयदा॥७९॥त
दोन्मत्तोवरारुह्यदेवीमाकारयत्प्रियां॥श्रुत्वाशब्दंशिवस्याथशिवाप्रसवसंस्थिता॥८०॥जगाददेवदेवेश
लीनास्म्यत्रप्रसूनके॥एह्येहिजगतांनाथभ्रमभोन्मत्तवच्चिरं॥८१॥देव्येनाभिहुतेत्येवंतद्वृत्तांतमशेषतः
॥आचक्षणामहेशानंपापप्रेम्णातुपार्वती॥८२॥पार्वत्युवाच॥दैत्याक्रांतापरिभ्रांताश्रांतातीवाहमीश्वर॥
नाधिगच्छामिशरणंशरण्याशरणप्रद॥८३॥चिंतयंतीतदामूढाकंगच्छामीतिविह्वला॥दृष्ट्वाहंपुष्पनुगंदे
स्यसंलीनास्मिप्रसूनके॥८४॥पिनाकिन्कनकस्यास्यपालितानेनधूर्जटे॥सुखंस्थितास्वविज्ञातातस्यदैत्य
स्यपापिनः॥८५॥वरंदेहिमहादेवकनकायहितार्थिने॥येनाहंरक्षितादेवतरुणात्वद्धितैषिणा॥८६॥
ईश्वरउ०॥यस्मादुन्मत्तभावोमामागात्संलीनयात्वया॥तस्मादुन्मत्तनामायंभविताभुवनत्रये॥८७॥कनकःस्व
र्णवर्णत्वापालनात्तेशिवप्रियः॥नानाविधानिपुष्पाणिपवित्राण्यपिपार्वती॥८८॥तथानमेप्रियाणिस्युर्यथा
मेकनकप्रियः॥अभुक्तभूमावपिजातमेनंपवित्र्यलक्ष्मीर्नविहास्यतिक्वचित्॥८९॥रुष्टोपितुष्टोपिचस
र्वदाहंविशेषतुष्टिंकनकेनयास्ये॥इत्यादिसुबहून्दत्त्वाकनकस्यवरान्शिवः॥९०॥दर्शयामासदेव्यास्तंप
तितंदैत्यसत्तमं॥संलीनाकनकेयस्माच्चिरंदेवीहरप्रिया॥९१॥कनकेश्वरीतिनाम्नासास्तुतादेवर्षिभिः
सदा॥सुप्रीतातेननाम्नासाददौतेभ्योपिवांछितं॥९२॥गोप्यमेतत्त्रिलोकेपिनामनिर्णयकारणं॥इतिते
कथितंराजन्संक्षेपान्नामकारणं॥९३॥सर्वासांपुष्पजातीनांवेत्तिसर्वोपिलद्गुणान्॥धत्तूरकगुणान्वेत्ति
शर्वएवयुधिष्ठिर॥९४॥इतिदेवीसमाख्यातामयातेकनकेश्वरी॥वरदाकनकस्येवसर्वाशुभविनाशिनी॥
॥९५॥तत्रतीर्थेतुयःस्नात्वापूजयेत्कनकेश्वरीं॥विद्याधकतमोनित्यंसलभेच्चाभिवांछितं॥९६॥ ॥
॥ ॥इतिश्रीरेवा०भृगुकच्छेकनकेश्वरतीर्थं॥ ॥मार्कं०॥धनुःषष्ठ्यांतरेपार्थतीर्थंपरमशोभ २७४

नं॥ज्वालेश्वरंततोगच्छेल्लिंगमाद्येस्वयंभुवः॥१॥कालाग्निरुद्रंविख्यातंभृगुकच्छेव्यवस्थितं॥पुराकल्पेसु
रगणैराक्रांतेभुवनत्रये॥२॥वेदोक्तकर्मनाशेचधर्मेचविलयंगते॥देवर्षिमुनिसिद्धेषुनिःश्वासपरमेषु
च॥३॥कालाग्निरुद्रउत्पन्नोधूमःकोपानलोद्भवः॥धूमात्समुत्थितंलिंगंभित्वापातालसप्तकं॥४॥अवटं
दक्षिणेकृत्वालिंगंतत्रैवतिष्ठति॥तत्रपुण्यंनृपश्रेष्ठकुंडंज्वालासमुद्भवं॥५॥यत्रसापतिताज्वालदुष्टं
निर्दहतोविभोः॥तत्रगर्त्तःसमुद्भूतोधूमावर्त्तकृतोमहान्॥६॥तस्मिन्कुंडेतुयःस्नानंकृत्वावैनर्मदाज
ले॥कुर्याच्छ्राद्धंपितृभ्योवैपूजयेच्चापिशंकरं॥७॥कालाग्निरुद्रनामानंसगच्छेत्परमांगतिं॥यत्किंचित्
काम्यहंकर्मअभिचारिकमेववा॥८॥रिपुसंक्षयवद्धापिसांतानिकथमापरं॥तत्रतीर्थेकृतंसर्वंनचि
रात्सिध्यतेनृप॥९॥ ॥इतिश्रिवामौरे०ज्वालेश्वरतीर्थं॥ ॥मार्कं०॥ततःपरंमहाराजचत्वा
रिंशत्क्रमांतरे॥शालग्रामंपुरोगच्छेत्सर्वदेवतपूजितं॥१०॥यत्रादिदेवोभगवान्वासुदेवस्त्रिवि
क्रमः॥स्वयंतिष्ठतिलोकात्मानारदप्रियकाम्यया॥११॥नारदेनतपस्तप्त्वाकृताशालाद्विजन्मनां॥
सिद्धिक्षेत्रंभृगुक्षेत्रंज्ञात्वारेवातटेस्वयं॥१२॥शालग्रामइवाश्वैवविप्राणांत्वधिवासितः॥साधूनांचो
पकारायवासुदेवप्रतिष्ठितः॥१३॥शालग्रामकृयस्तेननर्मदातटमाश्रितः॥योगिनामुपकाराययोग
गम्योजनार्दनः॥१४॥मासिमार्गशिरेशुक्लभवत्येकादशीयदा॥तत्रतीर्थेतथापार्थशालग्रामेवसेद्बुधः
॥१५॥स्नात्वारेवाजलेपुण्येतद्दिनंसमुपोषयेत्॥रात्रौजागरणंकृत्वासंपूज्यचजनार्दनं॥१६॥विधियुक्तो
पचारैश्चउपहारैरनुत्तमैः॥पुनःप्रभातसमयेद्वादश्यांनर्मदाजले॥१७॥स्नात्वासंतर्पयेद्देवान्पितॄन्म
र्त्यान्यथाविधि॥श्राद्धंकृत्वाततःपार्थपितृभ्योविधिपूर्वकं॥१८॥भोजयेत्पूजयेद्विप्रान्स्वर्णवस्त्रादिदा
नतः॥क्षमापयेच्चतान्विप्रान्तथादेवंखगध्वजं॥१९॥एवंकृतेमहाराजयत्पुण्यंजायतेनृणां॥शृणु

SSI
2008

ष्ठावहितो भूत्वा तत्पुण्यं न प्रसत्तम॥ २०॥ न शोकदुःखे प्रतिपश्यतीह जीवन्मृतो याति मुरारिसाम्यं॥ म
हांतिपापान्यपि विहाय दुग्धं पुनर्मानवस्तुः पिबति स्तनोत्थं॥ २१॥ शालग्रामं पश्यते यो हि मर्त्यो रेवाजलेनर्मदृष्टो
घपारि॥ समुच्यते ब्रह्महत्यादिपापैर्नारायणानुस्मरणात्तत्र॥ २२॥ मन्यस्य सर्वे निवसंति तत्र मर्त्या हि
यदेहसहास्त्वसंगाः॥ ध्यायंतो वै सांख्ययुक्तास्तुरीयां पदं मुरारेस्तहितत्रैव यांति॥ २३॥ ॥ इति श्रीरे
वाम॰ शामग्रामतीर्थं॰॥ ॥ मार्कं॰॥ ततः परं महाराज गत्वा क्रमशलद्वये॥ सोमेन स्थापितं यायात्सो
मतीर्थमनुत्तमं॥ २४॥ चंद्रहासेति विख्यातं सर्वदैवतपूजितं॥ यत्र सिद्धिं परां प्राप्तः सोमो राजासुरर्षभः
॥ २५॥ युधिष्ठिर॰॥ कथं सिद्धिमनु प्राप्तः सोमस्तत्र द्विजोत्तम॥ तत्सर्वं श्रोतुमिच्छामि कथयस्व ममानघ॥ २६
॥ मार्कं॰॥ पुरा शप्तो मुनींद्रेण दक्षेण किल भारत॥ यथा पूर्वं मया प्रोक्तं दारार्थकारणं तव॥ २७॥ असेवदा
द्धिदाराणां क्षयरोगी भविष्यसि॥ उद्वाहिताः सपत्नीनां येन कुर्वंति सेवनं॥ २८॥ यानि ष्टा जायते तेषां त
च्छृणुष्व नराधिप॥ सतावतो हि नारीणां सेवना जायते स्फुतः॥ २९॥ सुतात्स्वर्गश्च मोक्षश्च क्षतिरेषा सना
तनी॥ तत्कालोचितधर्मेण से वंते ये न तां नराः॥ ३०॥ तेषां ब्रह्महत्यापापं जायते पापकर्मणां॥ तेन पापे
न घोरेण वेष्टिता रौरवं पतेत्॥ ३१॥ तस्या स्तद्रुधिरं पापः पिबते कलमीप्सितं॥ ततो वतीर्णः कालेन याया
योनिं प्रपद्यते॥ ३२॥ तस्यां तस्यां स दुष्टात्मा दुर्भगो जायते ध्रुवं॥ नारी यातु सदा कामोद्यधिकस्यात्यु
धिष्ठिर॥ ३३॥ सतु काले विशेषेण भिद्यंते कामसायकैः॥ परिभूता हि सा भर्त्रा ध्यायंते न्यपतिं यदि॥ ३४
तत्र पुत्रः समुत्पन्नो ह्यते रे कुलमुत्तमं॥ स्वर्गस्थास्ते न पितरः पूर्वजाता महीपते॥ ३५॥ पतितं जातमा
त्रेणा कुलदस्ते न सोच्यते॥ शप्तश्च कर्मणा तेन क्षयरोग्यभवच्छसी॥ ३६॥ नाकलोकं तत स्त्यक्त्वा मर्त्य
लोकमुपागमत्॥ संप्राप्य भारतं वर्षं कर्मभूमिस संस्तरान्॥ ३७॥ ततस्तीर्थान्यनेकानि पुण्यान्यायत

नानि च॥ भ्रामित्वा नर्मदां प्राप्तः सर्वपापप्रणाशिनीं॥ ३८॥ उपवासांश्च दानानि व्रतानि नियमाश्च यः॥ चत्वारद्वाद
शाब्दानि रेवातीरे युधिष्ठिर॥ ३९॥ स्थापयित्वा महादेवं पूर्वे रेवारिसंगमे॥ द्वितीयं च भृगोः स्थाने सर्वपातक
नाशनं॥ ४०॥ जगाम प्रभया पूर्णः सोमलोकमनुत्तमं॥ येन ह स्थापितो देवः पूज्यते वर्षसंख्यया॥ ४१॥ ता
वद्युगसहस्राणि तस्य लोके स पूज्यते॥ तेन देवान् विधानोक्तान् स्थापयंति नराभुवि॥ ४२॥ अक्षयं चाप्ययं
यस्मात् फलं भवति नान्यथा॥ सोमतीर्थे तु यः स्नात्वा पूजयेद्देवमीश्वरं॥ ४३॥ जायते स नृपो भूम्यां सोमवत्प्रि
यदर्शनः॥ तस्मिन् चंद्रप्रभासे योग त्वा स्नाना द्विधानतः॥ ४४॥ व्याधिनाप्यभिभूतो वा क्षयकुष्ठादिनापि वा॥
चंद्रहासे नरः स्नात्वा द्वादश्यां स्नाप्य शंकरं॥ ४५॥ चतुर्दश्यां तु वोपोष्य क्षीरस्य जुहुयाच्चीरं॥ विधिवत्स्यं च भिर्मंत्रै
रीशानं त्र्यंबकं यजेत्॥ ४६॥ हविशेषं स्वयं प्राश्य सोमतीर्थे निरुभवेत्॥ अनेन विधिना राजन्नतुष्येद्देवो महे
श्वरः॥ ४७॥ विधितीर्थो नियोगात्स सर्वरोगैर्विमुच्यते॥ यः सप्त सोमवारान्वै स्नानं तत्र समाचरेत्॥ ४८॥ स कर्म
कृताद्रोगान्मुच्यते पूजन्शिवं॥ कर्णाक्षीरसनारोगा नश्यंतीह शिवार्चनात्॥ ४९॥ चंद्रप्रभासे योगस्त्वग्र
हणे चंद्रसूर्ययोः॥ कृत्वा स्नानार्चने दानं मुच्यते सर्वकिल्बिषैः॥ ५०॥ स्नानं देवनादिकं वापी चंद्रहासे शुभाशु
भं॥ कृतं नृपवरश्रेष्ठ सर्वं भवति चाक्षयं॥ ५१॥ ते धन्यास्ते महात्मानस्ते षां जन्म सुजीवितं॥ ये भोजयंति विप्रा
ग्प्रान् चंद्रतीर्थे सुभक्तितः॥ ५२॥ चंद्रहासे तु ये स्नात्वा पश्यंति ग्रहणं नराः॥ वाचिकं मानसं पापं कर्मजं यत्पुरा
कृतं॥ ५३॥ स्नानार्चनेन राजेंद्र स्तत्र तीर्थे प्रणश्यति॥ संक्रांतौ च व्यतीपाते अयने विषुवे तथा॥ ५४॥ चंद्र
हासे नरः स्नात्वा सर्वपापैः प्रमुच्यते॥ बहवस्तं न जानंति महामोहसमन्विताः॥ ५५॥ देहस्थमिव सर्वेषां परमा
त्मानमव्ययं॥ पश्चिमे सागरे गत्वा सोमतीर्थे तु यत्फलं॥ ५६॥ तत्समग्रमवाप्नोति सोमतीर्थे नरो नृप॥ ते मूढा
स्ते दुरात्मानस्तेषां जन्म निरर्थकं॥ ५७॥ सोमेश्वरं नार्चयंती तमादीप प्रदानयः॥ रेवायां भृगुकच्छे रुद्र ह्रासो

553
2008

मेश्वरंशिवं॥५८॥अपिपापैर्दृशविधैःस्नात्वामुक्ताभवंतिहि॥ चंद्रहासेचयःकश्चित्संन्यासंकुरुतेनृप॥५९
॥अनिवर्त्तिकागतिस्तस्यसोमलोकात्कदाचन॥६०॥ ॥इतिश्रीरेवा० भृगुकच्छेसोमतीर्थं॥ मार्कं०॥
धनुःशतद्वयेतस्माद्वाराहंतीर्थमुत्तमं॥उदीर्णोयत्रवाराहोह्यभवद्धरणीधरः॥१॥धृत्वासटाग्रदंष्ट्राग्रेबि
भ्राणःपृथिवीमिमां॥सचात्रपंचमःप्रोक्तोवाराहोमुक्तिदःसतां॥२॥युधिष्ठिरउ०॥कथमुद्दीर्णरूपोभू
द्वाराहोधरणीधरः॥वाराहत्वंगतःकेनपंचमःकेनशाश्वतः॥३॥मार्कं०॥आदिकल्पेमहाराजक्षीरोदेभ
गवान्हरिः॥शिष्येसभोगिशयनेविनानिद्रांसुखाश्रितः॥४॥लक्ष्मीकरांबुजस्पर्शाम्रदुधेमानपदद्व
यः॥तस्मिन्स्वपितिदेवेशेभाराक्रांतावसुंधरा॥५॥गत्वोवाचसुरान्पार्थगमिष्यामिरसातलं॥तयासह
समुद्विग्नादेवागत्वाजनार्दनं॥६॥तुष्टुवुर्वाग्भिरिष्टाभिःक्लेशघ्नंजगतःपतिं॥देवाऊचुः॥नमोनमस्ते
देवेशासुरार्त्तिहरसर्वग॥७॥विश्वमूर्त्तेनमस्तुभ्यंत्राहिविश्वंभयात्ततः॥८॥नमोगिरिशवंद्याये॥
नमस्तेस्तुध्रुवाधाराभास्कराच्युबलप्रद॥८॥नमोबुद्जगत्प्राणत्राहिविश्वंभरांभयात्॥नमोगिरिश
वंद्यायगजेंद्रार्त्तिहरायते॥९॥कामपित्रेनमस्तुभ्यंत्राहि०॥नमोनंतस्वरूपायजद्वंद्यायतेहरे॥१०॥व्यक्ता
व्यक्तस्वरूपायत्रा०॥पालनैकव्रतंदेवत्वयैवोरीकृतंयतः॥११॥अतस्त्वांप्रार्थयतेदेवस्त्राहि०॥त्वयैव
दंजगद्व्याप्तंव्यापितंस्वस्वकर्मसु॥१२॥दिक्पालालोकपालाश्चत्राहि०॥सर्वेषामपिलोकानामाधारः
कारणंमही॥१३॥स्वर्मोक्षानरकाभूमेस्त्राहितामहतोभयात्॥प्रवृत्तंचनिवृत्तंचकर्मभूमेर्यतोविभो॥१४
त्वंनाथायाचतेसेयंससुरात्राहितांभयात्॥मार्कं०॥एवंस्तुतःसुरैर्विष्णुरुवाचकिमुपस्थितं॥१५॥ब्रूत
कार्यंसुराशीघ्रंयत्कृतेमामुपागताः॥देवाऊचुः॥धात्रीधराहिभूतानांभारखिन्नानिमज्जति॥१६॥तामु
द्धरहृषीकेशलोकान्स्थापयसुव्रत॥एवमुक्तःसुरैःसर्वैःकेशवःपरमेश्वरः॥१७॥वाराहरूपमास्थाय

सर्वेयत्तमयंविभुः॥दंष्ट्राकरालंपिंगाक्षंसटाकुंचितमूर्धजं॥१८॥कृत्वानंतंपादपीठंदंष्ट्राग्रेणोज्जहारगां॥सप
र्वतवनामाशुसमुद्रकृतमेखलां॥उद्धृतकृतवान्विष्णुरुदीर्णःसमजायत॥दृष्ट्वायन्यंचधात्मानभुक्तरेनर्म
दातटे॥२०॥तत्राद्यंकोटिलापीठेद्वितीयंयोनिधीपुरे॥जयवृत्तेत्राभिधानेयायोजयेसाख्ययास्मृतः॥२१॥
असुरान्मोहयलिंगस्ततीयःपरिकीर्त्तितः॥पालनापालनाद्विश्वेस्थितोयस्माच्छिवप्रियः॥२२॥अतस्तु
नृपशार्दूलश्वेतइत्यभिधीयते॥उद्धृत्यजगतींदेवीमुदीर्णोभृगुकच्छके॥२३॥उदीर्णपंचमस्तस्माद्वारा
हइतिसंज्ञितः॥इतिपंचवराहास्तेकथिताःपांडुनंदन॥२४॥युगपद्दर्शनास्तेषांब्रह्महत्याप्रणश्यति॥
ज्येष्ठेमासितेपक्षेएकादश्यांविशेषतः॥२५॥गत्वाद्यादिवराहंतुपूर्वतोदशमीदिने॥हविष्यमन्नभुंजी
यात्लघुसायंगतेरवौ॥२६॥रात्रौजागरणंकुर्यादादिवाराहपार्श्वतः॥ततःप्रभातेद्युषसिसंस्नात्वानर्म
दाजले॥२७॥देवान्पितृंश्चसंतर्प्यतिलैर्यवविमिश्रितैः॥धेनुंदत्वाद्विजेयोग्येसर्वोपस्करसंयुतां॥२८॥
निर्ममोनिरहंकारोदानंदद्याद्धितातये॥गत्वासंपूजयेदेवमादिवाराहसंज्ञितं॥२९॥उपवासादिनियमा
गृहीत्वावाग्यतस्त्वरान्॥निर्जलायांजलंत्यक्त्वाशक्त्याचोपानहौनृप॥३०॥स्मरन्विष्णुंस्तुवन्विष्णुंज
पन्विष्णुंत्वरन्व्रजेत्॥अनेनविधिनाभ्यर्च्यपश्चाद्गच्छेज्जयाकृयं॥३१॥त्वरितस्तुजयंगत्वापौर्विकंविधि
माचरेत्॥अश्वंदद्याद्द्विजेयोग्येशक्त्यावाहेमदानकृत्॥३२॥तिलांश्चैवादिकंलिंगेश्वेतेचैवंहिरण्यदः
॥तथोदीर्णेध्रुवंदद्यात्पौर्विकंविधिमाचरन्॥३३॥अनस्तमितआदित्येवाराहान्पंचपश्यतः॥आयतेयत
फलंपार्थतदिहैकमनाःशृणु॥३४॥ब्रह्महत्यासुरापानंस्तेयंगुर्वंगनागमः॥एभिर्वासहसंसर्गोविश्वस्ता
नांचवंचनं॥३५॥स्वसृदुहितृस्नुषेयीपितृभार्योपसेवनं॥आजन्ममरणाद्यात्पापंभरतसत्तम॥३६॥
तीर्थपंचकमेतस्यवैष्णवस्यविशेषतः॥विनश्यत्येवयुगपत्स्थूलसूक्ष्मलघूत्कटं॥३७॥आद्यंपुष्कंच

555
2008

रे०खं० नश्येद्धेतूलराशिरिवानलात्॥ नारायणानुस्मरणाज्जपध्यानाद्विशेषतः॥ ३८॥ प्रणाश्यत्येव पापानि गिरिकूटसमान्यपि॥ दृष्ट्वापं च वराहान्वै पौरुषेमहितिस्थितः॥ ३९॥ आप्लुत्य नर्मदातोये श्राद्धं कुर्वन्यथाविधि॥ उदयास्तम
२७१ नादर्वाकू यः पश्येच्छुद्धनेश्वरः॥ ४०॥ मुक्तिं प्रयाति सहसा दुःप्राप्यं परमेश्वरी॥ कलेवरं विनिर्मुक्त्वा पीत्वे बोमा
महेश्वरः॥ ४१॥ पौरुषे क्रीयमाणे पि न सिद्धिर्जायते यदि॥ वदंति सुचिरं स्वर्गं भपि पापानि तस्य च॥ ४२॥
यत्र तत्र गतस्येकं भवेसं च वराहिकी॥ ज्येष्ठेशुक्लहरिदिने ध्रुवं तत्र वसेन्नरः॥ ४३॥ आदिजयंतथालिंगं
श्वेतमुद्दीर्णमेव च॥ आश्रित्य तस्यां वस्तव्यं वराहं वैयतस्तत॥ ४४॥ ज्येष्ठेशुक्लेहरिदिने विष्णुना प्रभविष्णुना॥ वाराहं रूपमारुह्य यत्नधृत्त्यधरणींन्नृप॥ ४५॥ तत्र पुण्यतमा तेन सा शेषाद्दोघनाशिनी॥ दृष्ट्वापं
च वराहान्वैके कोउमुद्दीर्णसंज्ञकं॥ ४६॥ पूजयित्वाविधानेन पश्चाज्जागरणं निशि॥ पंचभिर्वर्त्तिभिर्दीपान्दद्यते
नोज्वाल्य शक्तितः॥ ४७॥ पुराणश्रवणेनैव योगीतिवाद्यैः सुमंगलैः॥ वेदैः सूक्तैश्च जाप्यैश्च क्षपयित्वा तु शर्वरीं॥ ४८॥ यत्पुण्यं लभते मर्त्यो ह्यजमीढस्य शृणुष्व तत॥ जरेवाजलं पुण्यतमं पृथिव्यां तथा चर्देवो जगतांपतिर्हरिः॥ ४९॥ एकादशी पापहरा पृथिव्यां बद्धायासो यश्च नित्यस्तथैव॥ एकैकैकशो ब्रह्महत्यादिकान्वै
शक्तानि हंतुं पापसंघान्नरेंद्र॥ ५०॥ न ते सर्वे युगपद्धे समेता हंतुं शक्ताः किंनु तद्ब्रूहि राजन्॥ इतीदमुक्तं तव
धर्मसूनो यद्वै श्रुतं शंकराच्चंद्रमौलेः॥ ५१॥ श्रुत्वेदमित्थं मुच्यते पापसंघैः पठन्पदं याति हि वत्र शार्ङ्गः॥
॥ ५२॥ ॥ इति श्रीरे० भयुक्छेउदीर्णवाराहतीर्थं॥ मार्कं०॥ परं तीर्थं ततो गच्छे पार्थ कामश्रातांतरे॥ चंद्रप्रभासमिति यद्विश्रुतं भुवनत्रये॥ १॥ निःपापस्य प्रभा पूर्णा यत्र चंद्रस्य भारत॥ सोमतीर्थे तु संस्थाप्य
सोमनाथं सित द्युतिः॥ २॥ आत्मानं यत्र मंगल्यं योजयामास सुव्रतः॥ किंचित्यक्तोभ्युवादेवांगुरुं संस्मार
सहसराट्॥ ३॥ तथैव देवगंधर्वान् सर्षिसिद्धगणांस्तथा॥ विधाय मंगलस्नानं मंत्रैश्चापि पृथग्विधैः॥ ४॥ २७१

मंगलालंभनं कृत्वा गुरुणा संप्रयोजितं॥ वेदोक्ताश्चाशिषः प्राप्य विप्रर्षीणां तपस्विनां॥ ५॥ प्रभया सेवितश्चंद्रो ज्योत्स्नापापविशेषतः॥ ददौ दानानि बहुशो ब्राह्मणेभ्यो विधुर्नृप॥ ६॥ स्थापयामास तत्रेशं प्रभासेश्वरसंज्ञितं॥ सा 557/2008
चैणांकभूरख्येस्तं देवं ब्राह्मणसत्तमा॥ ७॥ पूजयामास सुरीशानं प्रभासेश्वरमादरात्॥ दत्वा देवर्षय तस्मै चंद्राय
विविधान वरान्॥ ८॥ चंद्रप्रभासतीर्थं वितेतो जग्मुर्यथागतं॥ ततः प्रभृति विख्यातं तत्तीर्थं पांडुनंदन॥ ९॥ तत्र
तीर्थे च यः स्नात्वा विधिवद्भरतर्षभ॥ देवान्पितॄंश्च संतर्प्येति लाक्षतजले क्रमात्॥ १०॥ श्राद्धं कुर्यात्पितॄणां यो यथालब्धोपहारतः॥ तर्पिताः पितरस्तेन युगमेकं युधिष्ठिर॥ ११॥ अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः॥ सक्रांतौ च व्यतीपाते तत्र तीर्थे विधानतः॥ १२॥ स्नाने दाने जपे होमे पितृश्राद्धकृते तथा॥ पश्चिमामध्येः प्रभासेष्ठं
फलं प्राप्नोति मानवः॥ १३॥ ॥ इति श्रीरे० भयुक्छे चंद्रप्रभासतीर्थं॥ ॥ मार्कं०॥ दशार्दु अंतरे पार्थ तत्तीर्थं त्रजेच्छुभं॥ सिद्धेश्वरं नाम पुरा द्वादशादित्यसंज्ञकं॥ १४॥ अम्ल तस्याहुर्यत लिंगमाद्यं स्वायंभुवं तथा॥ दृष्टमात्रेण येन हस्णमुक्तो भवेन्नरः॥ १५॥ पुरा वर्षशतं साग्रमाराध्य परमेश्वरं॥ यत्र प्रापुः परां सिद्धिमादित्या
द्वादशैव तु॥ १६॥ अतः सिद्धेश्वरः प्रोक्तः सिद्धः सिद्धिकांक्षिणां॥ युधिष्ठिर०॥ कथं सिद्धेश्वरे प्राप्ता सिद्धिर्देवर्षिसत्तम॥ १७॥ आदित्य इति यत्प्रोक्तं तन्मे विस्मापनं हृदि॥ तपस्यग्रे व्यवसिता आदित्याः केन हेतुना॥ १८॥
मार्कं०॥ पुरा ब्रह्मसुतो राजन् मरीचिर्नाम मानसः॥ मरीचेः कश्यपो जातस्तस्य पुत्रास्तु द्वादश॥ १९॥ आदित्या
द्वादशादित्या जाताः शक्रपुरोगमाः॥ इंद्रो धाता भगस्त्वष्टा मित्रोथ वरुणोर्यमा॥ २०॥ विवस्वान्सविता पूषा
अंशुमान्विष्णुरेव च॥ तदमे द्वादशादित्या दृष्ट्वंतो भास्करं परं॥ २१॥ नर्मदातटमाश्रित्य तपस्युग्रे व्यवस्थितः॥
सिद्धेश्वरे महाराज काश्यपेयैर्महात्मभिः॥ २२॥ परा सिद्धिरनुप्राप्ता द्वादशादित्यसंज्ञितैः॥ अत्र पूर्वं तपस्तप्तं सनकाद्यैर्नृपोत्तम॥ २३॥ योगसिद्धिः परा प्राप्ता प्रसादात्पार्वतीपतेः॥ साक्षात्समुत्थितस्तेषां लिंगरूपो

महेश्वरः॥२४॥ तुलः संपूजितश्चैव तत्र लिंगेन मः स्तुतः॥ सिद्धेश्वर इति ख्यात प्राप्तः सिध्याय तोर्चितः॥२५॥ त
प्रभृति विख्यातः ख्यातो सिद्धेश्वरो विभुः॥ तत्सार्श्वे च तदादित्यैस्तैश्च तस्मात पो महत॥२६॥ सिद्धिः प्राप्ता महारा
जसमभ्यर्च्य सनातनं॥ शिवं शान्तं जगन्नाथं सिद्धिदं सिद्धजीवनं॥२७॥ सिद्धिं प्राप्य ततश्चैव मुदितैर्मनुजर्षभ
॥स्थापितश्च जगद्गुरुस्तीर्थे तस्मिन्दिवाकरः॥२८॥ स्वकीयांशविभागेन पृथग्द्वादशभिः सुरैः॥ तदा प्रभृति त
त्तीर्थं द्वादशादित्यसंज्ञितं॥२९॥ सिद्धेश्वरसमीपे तु सर्वकामप्रदं परं॥ प्रलये समनुप्राप्ते आदित्या द्वादशैव ते
॥३०॥ द्वादशादित्यतो राजन् संभवंति युगक्षये॥ इंद्रस्तपति पूर्वेण धाता चैवाग्निगोचरे॥३१॥ भगस्तपति वै
याम्ये त्वष्टा नैर्ऋतिदिङ्मुखे॥ वरुणः पश्चिमे भागे मित्रो वै वायुगोचरे॥३२॥ अर्यमा सौम्यदिग्भागे विवस्वा
नीशगोचरे॥ ऊर्ध्वं च सविता देवः अधः पूषा तपत्यलं॥३३॥ अंशुमांश्च तथा विष्णुर्मुखतोस्य विनिर्गतो॥ प्रद
हंतो जगत्सार्थं भ्रमंति यतस्ततः॥३४॥ यथैव ते महाराज दहंति सकलं जगत॥ तथैव द्वादशादित्या भक्ता
नां भयशोधनाः॥३५॥ प्रातरुत्थाय यः स्नात्वा द्वादशादित्यसंज्ञितं॥ पश्यते भास्करं भक्त्या शृणु तस्यापि य
त्फलं॥३६॥ वाचिकं मानसं पापं कर्मजं यत्पुराकृतं॥ नश्यते तत्क्षणादेव द्वादशादित्यदर्शनात॥३७॥ प्रदक्षि
णं यतः कुर्यात्तस्य देवस्य भारत॥ प्रदक्षिणीकृता तेन सप्तद्वीपा वसुंधरा॥३८॥ कुरुक्षेत्रे च यः सप्त सप्तमी
समुपोषयेत॥ तत्र यत्फलमाप्नोति लभते तदिहैकया॥३९॥ षष्ठ्यां रविदिने राजन् द्वादशादित्यदर्शनात॥ मा
घे मासि विशेषेण शुक्लपक्षे तु सप्तमी॥४०॥ तस्यां स्नात्वा च संपूज्य भास्करं यत्फलं शृणु॥ अरोगः सप्त जन्मा
निधनमाप्नोति पुष्कलं॥४१॥ पापैर्न लिप्यते सोपि पद्मपत्रमिवांभसा॥ यश्च प्रदक्षिणशतं दद्यात्तस्यादिने दि
ने॥४२॥ दद्रुकुष्ठविकुष्ठानि मंडलानि विचर्चिका॥ नश्यंति व्याधयः सर्वे गरुडादिव पन्नगाः॥४३॥ पुत्रप्राप्ति
श्च सौभाग्यं लभेत षष्ठ्यां रविं जयन॥ विप्रांश्च भोजयन् शक्त्या तोषं कुर्याद्द्वेवं नरः॥४४॥ ॥इति श्रीरेवा

554
2008

या द्वादशादित्यं॥ ॥मार्कं०॥ दशार्दं तात्तरे तस्मात्प्रोक्तं सिद्धेश्वरं यदि॥ तल्लिंगं नृप श्रेष्ठ संपूजितं सिद्धन
णां॥१॥ स्वायंभुवं परं लिंगं आदिकल्पसमुद्भवं॥ तत्र स्नात्वा विधानेन श्राद्धैः संतोषयेत्पितॄन॥२॥ पूजयेत
परमेशानं लिंगान्येकोनविंशतिः॥ तोषयन्पद माप्नोति शांकरं सर्वदुर्लभं॥३॥ तत्र सिद्धेश्वरी देवी द्वादशा
दित्यसिद्धये॥ प्रादुर्भूता तदा पार्थ प्रिया सिद्धेश्वरस्य तु॥४॥ पार्वं जगतां माता जगत्सिद्धिप्रदा शिवा॥ वि
विधै रूपहारैस्तु पूजिता सा सुरैः॥५॥ तत्र सा दीपदानेन शक्त्या बलिनिवेदनैः॥ ददाति वांछितं नृणां सर्व
कर्मसु सिद्धिदा॥६॥ ॥इति श्रीरेवाखंडे भृगुकच्छे सिद्धेश्वरतीर्थं॥ ॥मार्कं०॥ दशार्दं तात्तरे गच्छेत्स
र्वतीर्थं तु कापिलं॥ सिद्धेश्वरांतिके गच्छेद्भुक्तिमुक्तिफलप्रदं॥७॥ तीर्थानां परमं तीर्थं कामधेन्वा विनिर्मि
तं॥ रेवाया उत्तरे कूले भृगुक्षेत्रस्य मध्यतः॥८॥ सर्वपापहरं राजन् विख्यातं कपिलेश्वरं॥ योसौ सनातनो
देवः पुराणे परिपठ्यते॥९॥ वासुदेवो जगन्नाथः कपिलात्वमुपागतः॥ अतलं सुतलं नाम तस्यैवावि
धलंयतः॥१०॥ गभस्तिमच्च तस्याधस्तान्मिश्रं ह्यंधमेव च॥ पातालं सप्तमं यच्च अधस्तश्चासितं महत॥११॥
श्रूयतामभिधास्यामि क्रमतस्तद्यथास्थितं॥ अधस्तात्सप्तलोकानां॥ नरकाः क्रमशः स्थिताः॥१२॥ पाता
लानि यथा सप्त तलानां वैत्र यं तथा॥ यावत्प्रमाणं स्याद्दूर्ध्वं परच्छिन्नं महीपते॥१३॥ तावत्प्रमाणमेवाधः कू
पाकारं सहि स्थितं॥ तेषां प्रत्येकशो मानप्रमाणं परिकीर्तितं॥१४॥ योजनानां सहस्राणि दशत सार्धदर्शिभिः
सहस्रं योजनान्येषां दलान्यंतरनेभयः॥१५॥ सुषिराणां प्रमाणं तु सहस्राणि नवैकशः॥ तेनैव सुरमध्य
स्थं नाम तस्तन्महातलं॥१६॥ दिव्यरत्नोपसंपन्नं श्रीमच्चामीकरान्वितं॥ नागराजः सदैवास्ते तस्मिन्नृपक्षि
तिनिकेतनः॥१७॥ अनंतोनंतधामा च मुचुकुंदो नृपो बलिः॥ ततो रसातलं नाम शिलासंघातभूमिकं॥
॥१८॥ नागानां तक्षकादीनां निवासस्तत्र कीर्तितः॥ दानवाधिपतीनां च तत्रैव निलयो महान॥१९॥ विरो

चनहिरण्याक्षप्रभृतीनां महात्मनां ॥ ततः सुतलमित्युक्तं पातालं पीतभूमिकं ॥ २० ॥ तस्य चोर्ध्वं हि सर्वेषां कीर्त्ति
ताम्नमयी मही ॥ असुराधिपतस्तत्र कालनेमेर्महत्पुरं ॥ २१ ॥ चारुचामीकरप्रख्यं वैनतेयस्य चापरं ॥ ततश्चानित
लं नाम पातालं रक्तभूमिकं ॥ २२ ॥ तस्मिन्महांतको नाम दानवस्य कृतालयः ॥ तारकोग्निमुखश्चैव प्रल्हादश्च
कृतस्कृतिः ॥ २३ ॥ निवसंति कृतवासास्तथा प्रल्हाद दानवाः ॥ पातालं वितलं नाम शुक्लक्षितितलं तल ॥ २४ ॥
कंबलश्चतरो नागौ सहितौ तत्र तिष्ठतः ॥ महाजंतोर्हयग्रीवा प्रभृतीनां महात्मनां ॥ २५ ॥ वराणामसुरेंद्राणां नि
वासस्तत्र कल्पितः ॥ कृष्णक्षितितलं तस्मात्पातालं तलसंज्ञितं ॥ २६ ॥ शंकुकर्णमहानादप्रभृतीनां निकेतनं ॥
गभस्तिमच्चतश्चाधश्चामिश्रं तमेव च ॥ २७ ॥ पातालं सप्तमं यच्च अधस्तं संस्थितं महत् ॥ तत्रैव सवसत्य
क्षपुराणपुरुषोत्तमः ॥ २८ ॥ सत्रस्तासमहादेवः सचैव गरुडध्वजः ॥ पूज्यमानः सुरैः सिद्धैस्तिष्ठते ब्रह्मवादि
स्त भिः ॥ २९ ॥ वसतं स्य राजेंद्र कपिलस्य जंद्धुरोः ॥ लीलया नारदस्तत्र भ्रममाण उपागतः ॥ ३० ॥ मुनिर्ब्रह्मसुतः श्री
मान् विष्णोः प्राणाः प्रियः शिवा ॥ नारद उ० ॥ महर्षेर्मे परिभ्रांतं जंबूद्वीपमशेषतः ॥ ३१ ॥ बहून्यपि च तीर्थानि भा
रतेवर्षउत्तमे ॥ नरेवासरशेक्वापि सरित्स्तीतिमे मतिः ॥ ३२ ॥ भुवने भारतं पुण्यं तत्रापि च सरिद्वरा ॥ विंध्यवास
प्रसूतासारे वा देवादिदुर्लभा ॥ ३३ ॥ सर्वत्र दुर्लभा रेवा विशेषस्थानसप्तके ॥ शृणुतानि मुनिश्रेष्ठ समासात्क
थयामि ते ॥ ३४ ॥ ओंकारप्रथमस्तत्र शूलभेदस्तथापरः ॥ रेवोरिसंगमस्तद्वच्चतुर्थं कोटिलापुरं ॥ ३५ ॥ पंचमं शु
क्लतीर्थं वै षष्ठं च भृगुकच्छकं ॥ महर्षे सप्तमः पुण्यो रेवासागरसंगमः ॥ ३६ ॥ एषु ओं हि तं भवता तीर्थं संस्थाप
नाकृता ॥ भृगुकच्छमते मन्ये तत्र योग्यान्तु विस्थितिः ॥ ३७ ॥ पुण्यात्पुण्यतमं विद्धि सिद्धिक्षेत्रं भृगोस्स्थलं ॥ सर्वे
सुरर्षयः सिद्धाः शक्रयक्षगणेश्वराः ॥ ३८ ॥ ज्ञात्वा तीर्थविशेषं हि सर्वेनत्र कृतालयाः ॥ तस्मात्तेयुज्यते गंतुं म
हानसि महच्चतत् ॥ ३९ ॥ मार्कं० ॥ इत्युक्त्वा नारदः पार्थ कथाः कृत्वा पृथग्विधाः ॥ आपृच्छ्य तं मुनिश्रेष्ठं जगामाथ

यथागतं ॥ ४० ॥ ततः स कपिलो ध्यात्वा भृगत्वा तस्माद्भृगोस्स्थलं ॥ तपश्चचार सुमहन्नर्मदातीरमाश्रितः ॥ ४१ ॥ यत्र सा
तीर्थ कपिला देवी कामधेनुः पुरातनी ॥ तपस्तप्त्वा परं स्थापयामास वै पुरा ॥ ४२ ॥ सर्वकामदुघा जाता लोकानां भरतर्ष
भ ॥ महेश्वरप्रसादात्तु तीर्थं चक्रे स्वसंज्ञया ॥ ४३ ॥ कपिलो ध्यादिदेवाय: पुराणे परिपठ्यते ॥ सोपि तत्र तपोत
प्यद्भृगुक्षेत्रे समाहितः ॥ ४४ ॥ दिव्यं वर्षसहस्रं तु ध्यायमानो महेश्वरं ॥ ततः साक्षान्महादेवः प्रोवाचेदं मुनि
प्रति ॥ ४५ ॥ महेश्वर उ० ॥ वरं वरय भद्रं ते यद्यपि स्यात्सुदुर्लभं ॥ नूनं तव प्रदास्यामि किं हि देवेन महामुने ॥ ४६ ॥
कपिल उवाच ॥ स्वस्वनाम्ना तीर्थं तत्रैव कर्तुमिच्छामि कामदं ॥ ४७ ॥ भृगुकच्छे महादेव त्रिकालं कलिनाशनं
॥ निवस त्वं महादेव प्रसन्नो ह्यसि चेन्मम ॥ ४८ ॥ प्रसादात्तव देवेश त्रिदशैरपि पूज्यते ॥ अत्र स्थानं प्रकुर्वंति
मानवा पि स्वभक्तितः ॥ ते यांतु परमं स्थानं त्वत्प्रसादात्सुदुर्लभं ॥ ४९ ॥ एककालं द्विकालं वा त्रिकालं नित्यमे
व च ॥ ये त्वां प्रपूजयंतीह भक्त्या नानोपचारतः ॥ ५० ॥ न तेषां पुनरावृत्तिर्घोरे स्याद्भवसागरे ॥ प्रार्थितः कपिलेन दे
वं मुनिना स महेश्वरः ॥ ५१ ॥ एवमस्त्विति चोक्त्वा तत्रैवांतरधीयत ॥ तदा प्रभृति तत्तीर्थं विख्यातं भृगुमंडले ॥
॥ ५२ ॥ हृष्टतुष्टो महात्मासौ कपिलो मुनिसत्तमः ॥ स्थापयामास देवेशं लिंगरूपं महेश्वरं ॥ ५३ ॥ तत्र तीर्थे तु यः
स्नात्वा पूजयेत्परमेश्वरं ॥ गोसहस्रफलं तस्य जायते नात्र संशयः ॥ ५४ ॥ ज्येष्ठे शुक्ले महाराज चतुर्दश्यां समा
हितः ॥ तत्र स्नात्वा विधानेन भक्त्या दानं प्रयच्छति ॥ ५५ ॥ पात्रभूतेन्द्रपश्रेष्ठ स्वल्पं वा यदि वा बहु ॥ अक्षयं तत्फ
लं प्रोक्तं शिवेन परमेष्ठिना ॥ ५६ ॥ अंगारके दिने प्राप्ते चतुर्थ्यां नवमीषु वा ॥ स्नानं करोति पुरुषो नारी वा भ
क्तिसंयुता ॥ ५७ ॥ परमैश्वर्यमतुलं सौभाग्यं संततिं परां ॥ लभते सप्तजन्मानि गत्वा पुनः पुनः ॥ ५८ ॥
पूर्णमास्याममायां वा स्नायिनां पिंडदायिनां ॥ पितरस्तृप्तिमायांति द्वादशाब्दानि भारत ॥ ५९ ॥ तत्र तीर्थे तु यो
गत्वा ददेद्दीपं सुशोभनं ॥ जायते तस्य राजेंद्र महादीप्तिः शरीरजा ॥ ६० ॥ तत्र तीर्थे मृतानां तु जंतूनां किल भार

561/2008

न॥ अनिवर्त्तिगतिः प्रोक्ता शिवलोकात्कदाचन॥ ६१॥ कपिलंतीर्थमासाद्य भोजयेच्छक्तितो द्विजान्॥ एकस्मि
न्भोजिते विप्रे कोटिर्भवति भोजिता॥ ६२॥ ॥ इतिश्रीरेवा० कपिलेश्वरतीर्थं॥ ॥ मार्कं०॥ ततस्त्रि
विक्रमंतीर्थं दंड द्वादश्या कांतरे॥ यज्ञविध्वंसनात्सूर्यं दानवेंद्रस्य वै बलेः॥ १॥ कृते त्रिविक्रमे रूपे पाताले तं नि
वाय च॥ सोला त्र पाकरं कर्म स्वभक्तस्य विडंबनात्॥ २॥ भृगुणाभ्यर्चितो देवस्तपस्तमुपि हागतः॥ देवश्चिरं
तपस्तप्त्वा स्थापयित्वा च धूर्जटिं॥ ३॥ भृगुणा पूजितो विष्णुर्जगाम स्वपुरं पुरा॥ ततः प्रभृति राजेंद्र तीर्थं ख्यातं
त्रिविक्रमं॥ ४॥ तत्र तीर्थे तु यः स्नात्वा पूजयित्वा पिनाकिनं॥ दीपं दद्यात्सुरेशाय शक्तितो भोजयेद्द्विजान्॥ ५॥
वर्षाणामयुतं पार्थ स वै शिवपुरं वसेत्॥ ततो विष्णुपुरं याति देवगंधर्वपूजितः॥ ६॥ तिलोदकैस्तथा श्राद्धै
स्तर्पयेद्यश्च पूर्वजान्॥ तृप्यंति पितरस्य द्वादशाब्दानि भारत॥ ७॥ ॥ इतिश्रीत्रिविक्रमतीर्थं॥ ॥
मार्कं०॥ विश्वरूपं ततो गच्छेत्क्रम द्वादश्या कांतरे॥ भृगोर्मायाम पाहर्त्तुं रूपं यत्र हरिर्दधौ॥ ८॥ स्वरूपं दर्शय
त्वेकं भृगुणा प्रार्थितो विभुः॥ रूपं तद्दर्शयामास यथ सुरासुरसंयदि॥ ९॥ सुराणां दर्शितं पार्थ लोकानाभ भयं
करं॥ महीपादश्च वो जानुः स्वः कटिर्नाभियन्महः॥ १०॥ जनहृच्च तपः कंठे सत्यलोकः शिरो महत्॥ चंद्रादित्यो
रु नेत्रं च दिशः श्रोत्रं सहस्रपात्॥ ११॥ वातः स्कंध कृतः प्राणं सहस्राक्षं जगन्मयं॥ अहश्च क्रं शिवक्रोधं
जेताग्निर्जठरानलं॥ १२॥ विमुक्तो पश्च राजेंद्र वक्तुं तन्नैव पार्यते॥ पुरा सिद्ध सुरर्षीणां यद्वै विस्मयकारकं॥
॥ १३॥ ततस्तुष्टाव सभृगुर्भक्त्या भागवतां वर॥ तद्रूपं परमं रूपं चराचरमयं तदा॥ १४॥ भृगुरुवाच॥ नमो दे
वाय महते नमो देवाय भास्वते॥ नमश्चराचरतनो व्यक्ताव्यक्तायते नमः॥ १५॥ स्त्रीपुंनपुंसकत्वेन त्रिधाये
नाखिलं जगत्॥ व्याप्तमेतन्नमस्तस्मै सदेकाय त्रिधात्मने॥ १६॥ अणिमाद्यष्टसिद्धीनां पतये चिंत्यवा
रिणे॥ प्रवृत्ताय निवृत्ताय सिद्धरूपाय ते नमः॥ १७॥ मीलनोन्मीलनो प्रायो यदीक्षणः सर्गसंहृती॥ नमो नम

२८०

स्तु देवाय विश्वरूपाय वेधसे॥ १८॥ रोमरोमांत्तरे लीना यस्य ब्रह्मांडकोटयः॥ को वराकः कथं स्तोतीति तमी
शानं सनातनं॥ १९॥ विस्फुलिंगा यथा वह्नेः स्थेयं यत्समुद्भवं॥ कस्य न स्यान्नमस्यो सौ निरीहो विश्वतोमु
खः॥ २०॥ यन्मायामोहितं विश्वं नैकमत्यमुपाश्रितं॥ तन्नमाम्यादिपुरुषं सर्वकारकणकारणं॥ २१॥ गुणाति
गं गुणमयं भावाभावविवर्जितं॥ तमरूपं सरूपं वा विश्वरूपं नमाम्यहं॥ २२॥ त्वत्तोहं त्वद्गतः प्राणस्त्वद्बुद्धि
स्त्वयि संश्रितः॥ किं स्तोमि पार्थिवः प्राज्ञः स्वातीतं त्वामगोचरं॥ २३॥ भक्तिमेव परां मत्वा भजे त्वां जगतां गु
रो॥ पाहि कृष्ण हृषीकेशः त्वद्गतं मां त्वदाश्रयं॥ २४॥ मार्कं०॥ भृगुणैवं स्तुतो विष्णुः प्रसन्नात्मा तमब्रवीत्॥
तुष्टोहं भनया स्तुत्या तव विप्रेंद्र सत्तम॥ २५॥ वरदोस्मि वरं ब्रूहि यद्यपि स्यात्सुदुर्लभं॥ भृगुरुवाच॥ उपसं
हर विश्वेश रूपमेतदलौकिकं॥ २६॥ विरूपाक्षस्य यं तीर्थं मद्धारण्यमभवत्विह॥ त्वया चाधिष्ठितं नाथ वरमे
तं ददस्व मे॥ २७॥ अत्र तीर्थे च यः कुर्याच्छ्राद्धं विधिवदीश्वर॥ पितॄनुद्दिश्य तत्तेषां गयाश्राद्धवदस्तु वै॥ २८
॥ श्रीभगवानुवाच॥ एवं भवतु विप्रेंद्र त्वया यत्प्रार्थितं भृगो॥ तत्र तीर्थे द्विजः कोपि पूजयित्वा तु भार्गवो॥
॥ २९॥ श्राद्धं या कुरुते श्राद्धं गयाश्राद्धसमं भवेत्॥ एवमुक्ता सा विश्वात्मा तत्रैवांतरधीयत॥ ३०॥ मार्कं०॥ तत्र
तीर्थे नृपश्रेष्ठ स्नात्वा यः पूजयेद्विभुं॥ पूजितास्तेन सर्वेपि देवाश्च पितरस्तथा॥ ३१॥ श्राद्धं या च कृतं श्राद्धं पि
तॄणां स्यात्तदक्षयं॥ दीपं दत्वा च देवाय स नशोच्यः कंचिद्भवेत्॥ ३२॥ ॥ इतिश्रीरेवा० भृगुकच्छे विश्व
रूपतीर्थं॥ ॥ मार्कं०॥ ततो गच्छेत राजेंद्र क्रमद्वादश्या कांतरे॥ तीर्थं नारायणाख्यं वै सर्वकल्मषनाश
नं॥ १॥ नारायणगिरिर्नाम्ना यत्र तिष्ठति केशवः॥ युधिष्ठिर उ०॥ नारायणगिरिर्नाम विख्यातः कस्मान्महा
मुने॥ २॥ श्रुतपूर्वं न मे विप्र परं कौतूहलं हि मे॥ मार्कं०॥ संक्षेपात्कथयिष्यामि माध्यस्य चरितं महत्॥
॥ ३॥ नहि शक्यस्त्वरतो वक्तुं शाक्ताः सर्वमहर्षयः॥ आपो नारा इति प्रोक्ता यतः सद्धनरेणताः॥ ४॥ कृतायनस्ता

563
2008

सुविष्णुतेन नारायणोमतः ॥ एकार्णवे प्रसुप्तस्य कल्पादौन पसत्तम ॥ ५॥ नारायणस्य नाभ्य ब्जात जातो देवश्च
तुर्मुखः॥ तस्माद्दक्षोंगजो राजन्दक्षिणांगुष्ठसंभवः॥ ६॥ धर्मस्तु नांतराज्जातस्तस्य पुत्रो न रोभवत ॥ नारा
यणसहायोसौ अजोपि भरतर्षभ ॥७॥ अरुंधतीवसुर्जामी लंबाभानुर्मरुत्वती॥ संकल्पा च मुहूर्ता च सा
ध्या विश्वा च ता दश ॥ ८ ॥ दक्षाध्धर्मस्य पत्न्यस्ता दाक्षायिण्यो महाप्रभाः॥ तासां साध्या महाभागा पुत्रानज
नयन्नृप ॥ ९॥ नरो नारायणश्चैव हरिः कृष्णस्तथैव च॥ विष्णोरंशांत्रकैद्यते चत्वारो धर्मसूनवः ॥ १०॥
तेषांनारायणनरौ गंधमादनपर्वते ॥ आत्मन्यात्मानमाधाय तेपतुः परमंतप ॥ ११॥ ध्यानामानावनौपम्यं
स्वंकारणमकारणं॥ वासुदेवमनिर्देश्यमप्रतर्क्यंत्वनंतरं ॥ १२ ॥ योगयुक्तौ महात्मानौ आस्थितावुरु
तापसौ ॥ तयोस्तपः प्रभावेन ततापदिवाकरः ॥ १३॥ ववावाशंकितो वायुः सुखस्पर्शो ह्यशर्करः॥ शिशि
रोभवदत्यर्थं ज्वलन्नपि विभावसुः ॥ १४॥ सिंहव्याघ्रादयः सौम्याश्चेरुः सह मृगैर्गुरौ॥ तयोर्गौरवभारा
र्ताष्पृथिवी पृथिवीपते ॥ १५॥ चचार भूधराश्चेलुश्चुक्षुभेच महोदधिः॥ देवाश्च स्वेषु धीष्ण्येषु निःप्रभेषु ह
तःप्रभाः॥ १६॥ बभूवरवनीपाल परमक्षोभमागताः॥ देवराजः परं शक्रः संत्रस्तस्तपसा तयोः॥ १७॥ युयोजा
प्सरसः श्रेष्ठायोर्विघ्नचिकीर्षया ॥ इंद्र उवाच ॥ रंभे तिलोत्तमे कुब्जे घृताचि ललिते शुभे ॥ १८॥ अम्लोचे म्लु
प्रम्लोचे सौरभेयि मदोद्धते ॥ अलंबुसे मिश्रकेशी पुंडरीके वरूथिनी ॥ १९॥ दर्शनीयं हि बिभ्राणं वपुर्म
न्मथबोधनं ॥ गंधमादनमासाद्य कुरुध्वं वचनं मम ॥ २०॥ नरनारायणौ तत्र तपोदीप्तान्वितौ द्विजौ ॥ त
प्येते धर्मतनयौ तपः परमदुश्चरं ॥ २१॥ तावस्माकं वरारोहाः कुर्वाणौ परमं तपः॥ कर्माणि शश्वद्दुःखानि प्र
दावायति नाशनौ ॥ २२॥ तदूक्तं न भीकार्या भवतीभिरयं वचः॥ स्मरः सहायो भविता वसंतो दक्षिणा
निलः॥ २३॥ रूपं च वः समालोक्य मदनोद्दीपनं परं॥ कंदर्पवशमभ्येति विवशः को न मानवः॥ २४॥ मार्कं०

रत्युक्ता देवराजेन मदनेन समं तदा ॥ जग्मुरप्सरसः सर्वा वसंतश्च महीपते ॥ २५॥ गंधमादनमासाद्य पुष्पोच्च
स्कोकिलं कुलं ॥ चचार माधवो रम्यं प्रोत्फुल्ल वनपादपं ॥ २६॥ प्रववौ दक्षिणाशोयो मलयानुगतोनिलः॥ भृंगमा
लाततरवैरमणीयमभूद्वनं ॥ २७॥ गंधश्च सुरभिः सद्यो वनराजिसमुद्भवः॥ किंनरोरगयक्षाणां बभूव घ्राण
सौख्यदः॥ २८॥ वरांगनाः श्रुताः सर्वा नरनारायणाश्रमी॥ विलोभयंतु भारब्धा गायंतो ललितस्मितैः॥ २९॥
जगुर्मनोहरं काश्चिन्ननृतुस्तस्य चापराः॥ अवादयंस्तथैवान्यां मनोहरतरं नृप ॥ ३०॥ हावैर्भावैः स्मितैर्लास्यै
स्तथान्या वल्गुभाषितैः॥ तयोः क्षोभायतन्वंग्यश्चक्रुरुद्यममंजसा ॥ ३१॥ तथापि न तयोः कश्चिन्मनसः पृथिवी
पते ॥ विकारोभवदध्यात्मापारसंप्राप्यचेतसोः॥ ३२॥ निर्वातस्थो यथा दीपो अकंप्यो न पतिष्ठतः॥ वासुदेवार्पि
तेतस्थेतथैव मनसी तयोः॥ ३३॥ पूर्यमाणोपि चांभोभिर्भुवमन्यां महोदधिः॥ यथा न याति संक्षोभं तथा तन्मान
संकचित ॥ ३४॥ सर्वभूतहितं ब्रह्म वासुदेवमयं परं॥ मन्यमानौ न रागस्य द्वेषस्य च वशं गतौ ॥ ३५॥ स्मरोपि
नशक्तो काथ प्रवेष्टुं हृदयं तयोः॥ विद्यमाने यथा दीपे ह्यंधकारमिवालयं ॥ ३६॥ पुष्पोज्वरां तरुवरां वसंतं
दक्षिणानिलं ॥ ताश्चैवाप्सरसः सः सर्वाः कंदर्पं च महावने ॥ प्रारब्धतपसो योगादध्यात्म ज्ञानसिद्धिदः॥ दृष्ट्वा
तौ रविलं रूपं ब्रह्मणः पुरुषर्षभ ॥ ३८ ॥ दाह्यमानानलो वह्नेर्नापक्लेदाय चांभसः॥ तद्वद्यमेवतद्रूव्य विकाराय
नवैयतः॥ ३९॥ ततो विज्ञातविज्ञेयपरब्रह्मस्वरूपयोः॥ मधुकंदर्पयोषित्सु विकारो नाभवत्तयोः॥ ४०॥ ततो
गुरुतरं यत्नं वसंतमदनौ नृप ॥ चक्रातेश्च तन्व्यश्च तत्क्षोभाय पुनः पुनः॥ ४१॥ अथ नारायणो धैर्यं संधार्य
दारभानसः॥ ऊरोरुत्पादयामास कराभ्यां मबलं परां ॥ ४२॥ त्रैलोक्यसुंदरीरत्नमशेषमवनीपते ॥ गुणाल
धुत्वमाप्तातियस्याः संदर्शनादनु ॥ ४३॥ तां विलोक्य महीपाल चकंपे मनसा निलः॥ वसंतोपि स्मयं प्रा
तः स्मरः स्मरातिकिंचन ॥ ४४॥ रंभातिलोत्तमाद्याश्च विलक्षा योषितः॥ नरेंद्र रवनीपाल लज्जाक्रांतह
दीक्षणाः॥ ४५॥ ततकामोवसंतश्च पार्थिवाप्सरसश्चताः॥ प्रणम्य भगवंतौ तौ तुष्टुवुर्मुनिसत्तमौ ॥ ४६॥

565
2008

अप्सर उवाच ॥ प्रसीदतु जगद्धात्री यस्य देवस्य मायया ॥ विजामोनंतरं हित्वा मोहिता वंदनीययोः ॥ ४७ ॥ प्रसी
 जगद्धाता यस्य देवस्य मायया ॥ ४७ ॥ प्रसीदतु स नो देवो यस्य रूपमिदं द्विधा ॥ धामभूतस्य लोकानां मनोदर
त्रतिष्ठतः ॥ ४८ ॥ नरनारायणौ देवौ शंखचक्रगदाधरौ ॥ आस्तां प्रसादसुमुखौ वस्माकमपराधिनां ॥ ४९ ॥ वि
धानं सर्वविद्यानां सर्वपापेंधनानलः ॥ नारायणो नो भगवान् सर्वपापं व्यपोहतु ॥ ५० ॥ शार्ङ्गशङ्खायुधः श्रीमाना
त्मज्ञानमयोनघः ॥ नरः समस्तपापानि हंतु जन्मार्जितानि नः ॥ ५१ ॥ अनात्मविद्यादोषेण योपराधः कृतो म
हान् ॥ अस्माभिर्जगतामीश क्षम्यतां भवता हि सः ॥ ५२ ॥ शरणं हि प्रपन्नानां तवास्मदिति वादिनां ॥ प्रसादं पित
हंतॄणां अपि कुर्वंति साधवः ॥ ५३ ॥ एवं वधोस्माकमविवेकाहितो भवान् ॥ त्रैलोक्यबंधो यं नाथो विलोभयि
द तुमागताः ॥ ५४ ॥ प्रसीद देहि विज्ञानं येन मूढा दिशामि वः ॥ भवंति संतः सततं स्वधर्मस्योपदेशिकाः ॥ दृष्टे
वनः समुत्पन्नं यथा स्त्रीरत्नमीदृशं ॥ त्वयि नारायणोत्पन्ना तथापारवती मतिः ॥ ५६ ॥ तेन सत्येन सत्यात्मन्
परमात्मन् सनातनः ॥ नारायण प्रसीदेश सर्वलोकपरायणः ॥ ५७ ॥ प्रसन्नबुद्धे शांतात्मन् परमात्मन् सनात
न ॥ प्रसीद योगिनामीश नरः सर्वगताच्युत ॥ ५८ ॥ नमस्यामो नरं देवं तथा नारायणं हरिं ॥ नमो नराय र
म्याय नमो नारायणाय च ॥ ५९ ॥ प्रपन्ना नाम नाथानां त्वां नाथ भभिकाङ्क्षता ॥ शं कुरुध्वं नरास्माकं शं ना
रायण देहिनः ॥ ६० ॥ मार्कं० ॥ एवमभ्यर्थितस्तत्र रागद्वेषादिवर्जितः ॥ महेशः सर्वभूतानां मध्ये नारायणो
नृप ॥ ६१ ॥ प्रसन्नवदनो वीक्ष्य प्रोवाच कलया गिरा ॥ स्वागतं माधवे कामे भवत्व भ्रर सामपि ॥ ६२ ॥ ॥
यत्कार्यं भाग ॥ तानां वद्र हास्माभिस्तदुच्यतां ॥ यूयं संसिद्धये नूनमस्माकं बलशत्रुणा ॥ ६३ ॥ संप्रेषिता
स्ततोस्माकं नृत्यगीतादि दर्शितं ॥ नावां हि नृत्यगीतेन नांगचेष्टा सुभाषितैः ॥ ६४ ॥ शक्यौ लोभयितुं ना
यो विषया दारुणात्मकाः ॥ विषस्य विषयाणां च दूरमत्यंतमंतरं ॥ ६५ ॥ उपभुक्तं विषं हंति विषयास्स्मर

णादपि ॥ शब्दादिसंगदुष्टानि यदा न क्षोणि नः शुभाः ॥ ६६ ॥ तदा नृत्यादयो भावाः कथं लोभप्रदायिनः ॥
नोसिद्धा स्वेनैव साध्येभ्य वंतीनां स्मरस्य च ॥ ६७ ॥ माधवस्य च शक्रस्य स्वाख्यं यातु स देवराट् ॥ योसौ परस्त
थानंतपुरुषः परमेश्वरः ॥ ६८ ॥ परमात्मासमस्तस्य स्थावरस्य चरस्य च ॥ उत्पत्तिहेतुरं ते च यस्मिन् सर्वं प्रली
यते ॥ ६९ ॥ स सर्ववासी देवत्वाद्वासुदेवेत्युदाहृतः ॥ भवयं मंशांशकास्तस्य चतुर्व्यूहस्य मानिनः ॥ ७० ॥ य
दादेशेन वर्त्तामो जद्धाथायचासकृत ॥ तं सर्वं सर्वभूतेशं सर्वसंज्ञमदर्शितं ॥ ७१ ॥ पश्यंतः कुत्र रागादीन् क
रिष्यामो विभेदिनः ॥ वसंते मयि चंद्रे च भवतीषु तथा स्मरे ॥ ७२ ॥ यदा सर्वं भूतात्मा तदा द्वेषादयः कुतः ॥
तन्मयान्यविभक्तानि यदा सर्वेषु जंतुषु ॥ ७३ ॥ पृथिव्यापस्तथा तेजो वायुराकाशमेव च ॥ तथेंद्रियाण्यहंका
रो बुद्धिश्च न पृथग्यतः ॥ ७४ ॥ समदृष्टेः कुतस्तस्य रागद्वेषाः स्त्रयः शुभाः ॥ आत्मा चायमभेदेन यतः सर्वे
षु जंतुषु ॥ ७५ ॥ स चेश्वरोश्वरे विष्णु कुतो रागादयः स्ततः ॥ ब्रह्माणमींद्रमीशानमादित्यमरुतोखिलान् ॥
॥ ७६ ॥ विश्वेदेवानृषीन्साध्यान्च सूनपितृन्गणास्तथा ॥ यक्षराक्षसभूतादीन् नागसर्पसरीसृपान् ॥ ७७ ॥
मनुष्यपक्षिगोरक्षागजसिंहजलेचरान् ॥ भक्षिकादंशमशकान् शलभानलसान्कृमीन् ॥ ७८ ॥ वृ
क्षगुल्मलतावल्लीत्वक्सारतृणजातिषु ॥ यच्च किंचिद्दृश्यं वादृश्यं वा त्रिदशांगनाः ॥ ७९ ॥ मन्यध्वं ज्ञात
मेकस्य तत्सर्वं परमात्मनः ॥ जानानः स्वं महाविष्णुमात्मानं परमेश्वरं ॥ ८० ॥ रागद्वेषादिरिपुभिः प्रीतिंब
धातिको बलाः ॥ सर्वभूतस्थिते विष्णौ सर्वगे सर्वधातरि ॥ ८१ ॥ ज्ञाने दृष्टे पृथग्भूते कुतो रागादिको गुणः
॥ एवमस्मासु युष्मासु सर्वभूतेषु चाबलाः ॥ ८२ ॥ तन्मयेकत्वभूतेषु रागाधवः सरः कुतः ॥ सम्यक् दृष्टिरि
यं प्रोक्ता समस्तैक्यावलोकिनी ॥ ८३ ॥ पृथग्विज्ञानमत्रैव लोके संव्यवहं वरात ॥ भूतेंद्रियांतः करणप्रधा

564/2008

रे० खं०
२८२

नपुरुषात्मकं॥८४॥जगद्धदेतदखिलंतदाभेकः किमात्मकः॥भवंतिलयमायांतिसमुद्रसलिलोर्मयः॥
॥८५॥नवारिभेदितोभिन्नास्तथैवैक्यादिदंजगत॥भवतीभिश्चयत्प्रोक्तमस्माकंसपुद्दरः॥८६॥यथा
ग्नेरार्चिषःपीतापिंगलारुणधूम्रसाः॥तथापिनाग्नितोभिन्नास्तथैवैक्यादिदंजगत॥८७॥कारयत्यस
देतच्चविवेकाकारचेतसां॥भवत्यःसचदेवेंद्रोलोकश्चसचराचरः॥८८॥यच्चेदंचारुसर्वांगीभवतीनाम
यायतः॥दर्शितादर्शयिष्यामितथाचैवाखिलंजगत॥८९॥प्रयातुशक्रोमागर्वंभिंद्रत्वंकस्यसुस्थिरं॥
यूयंमाविस्मयंयातसंतिरूपान्वितास्त्रियाः॥९०॥किंसुरूपंकुरूपंवायद्विभेदोनदृश्यते॥तारतम्यंसुरू
पत्वेतसलतंभिन्नदर्शनात॥९१॥भवतीनांस्मयंभत्वारूपौदार्यगुणाद्भवं॥मयेयंदर्शितातन्वीतत्सर्वैका
मकेलित॥९२॥यस्मान्मदूरोर्निष्पन्नाद्दयमिंदीवरेक्षणा॥उर्वशीनामकल्याणीभविष्यतिवराप्सरा॥९३॥
तदियंदेवराजस्यनीयतांवरवर्णिनी॥भवत्यस्तेनचास्माकंप्रेषिताःप्रीतिकाम्यया॥९४॥वक्तव्यश्चस
हस्राक्षोनास्माकंभोगकारणात॥तपश्चर्यानचाप्राप्यंफलंप्राप्तुमसांप्रतं॥९५॥संमार्गमस्यजगतोदर्शयि
ष्यंकरोम्यहं॥तपोंतरणसहितोजगतःपालनोद्यतः॥९६॥यदिकश्चित्त्वंबाधांकरोतित्रिदशेश्वर॥
तमहंकारयिष्यामिनिर्वृत्तोभववासव॥९७॥कर्तासिचेत्त्वमाबाधामदुष्टस्येहकस्यचित॥तवापिशास्ता
तदहमितिज्ञेयामसंशयं॥९८॥इतिज्ञात्वानसंतापस्त्वयाकार्योहिमांप्रति॥परित्राणायजगतामुपका
रायमेस्थितः॥९९॥याचेयमुर्वशीमत्तःसमुद्भूतापुरंदर॥त्रेताग्निहेतुभूतेयमेलंप्राप्यभविष्यति॥१००॥
अप्सरउ०॥भगवन्भवतायोयमुपदेशोहितार्थिता॥प्रोक्तःससर्वोविज्ञातोमाहात्म्यंविदितंचते॥१०१॥
यत्वेतद्भवताप्रोक्तंप्रसन्नेयात्मयात्मना॥दक्षिणेयंविशालाक्षीदर्शयिष्येचवोजगत॥१०२॥यदिदे २८२
वापराधोपिनास्मासुकुपितस्ततः॥तंनाथसर्वभावेनप्रपन्नानाजगत्पते॥१०३॥कृपयाजगतामीश

दर्शयात्मानमात्मना॥मार्कं०॥इत्युक्तोभगवान्देवस्तदानारायणोनृप॥१०४॥उच्चैर्जहासस्वनवत्तत्राभूद 569/2008
खिलंजगत॥ब्रह्माप्रजापतिःशक्रस्तत्ररुद्राश्चसेश्वराः॥१०५॥आदित्यावसवःसाध्याविश्वेदेवामहर्षयः॥
नासत्यदस्रौमरुतःसर्वेशाश्वतदग्नयः॥१०६॥यक्षगंधर्वरक्षांसिपिशाचाःकिंनरोरगाः॥समस्ताप्सर
सोविद्याःसांगावेदास्तदुक्तयः॥१०७॥मनुष्याःपशवःकीटाःपक्षिणःपादपास्तथा॥सरीसृपाश्चयेसू
क्ष्मायश्चान्यज्जीवसंज्ञितं॥१०८॥समुद्राःसरितःशैलाःकाननानिवनानिच॥द्वीपाण्यशेषाणितथा
सरांस्यपिजगत्त्रयं॥१०९॥नगरग्रामसंपूर्णामेदिनीमेदिनीपते॥तथांगनामभिर्देवदेहेदृष्टंजगद्वि
भो॥११०॥नक्षत्रग्रहताराभिःसुसंपूर्णंनभस्तलं॥ददृशुःसात्मनातास्ततस्यांतर्विश्वरूपिणः॥१११॥
ऊर्ध्वंयतिनद्भाधश्चपदांतस्तस्यदृश्यते॥तमनंतमनादिंचततस्ताःस्तुष्टुवुःप्रभुं॥११२॥मधुनासस
मीरेणमदनेनसमंशुभाः॥ससाध्वसाभक्तिपराःपरंविस्मयमागताः॥११३॥अप्सरउ०॥पश्यामनादिंत
वदेवनांतंनमध्यमव्याकृतरूपपारं॥पारायणंतंजगतामनांतंनतास्मनारायणमात्मभूतं॥११४॥म
हीदिवंवायुजलाग्नयश्चशब्दादिरूपादिपरावरात्मन॥त्वत्तोभवत्यच्युतसर्वमेतद्भेदादिरूपोपिनभेदवां
स्त्वं॥११५॥दृष्टासिरूपस्यरसस्यवेत्ताश्रोतासिशब्दस्यहरेत्वमेकः॥स्प्रष्टाप्रभवान्सर्वगतोखिलस्यज्ञाता
सिगंधस्यपृथक्शरीरात॥११६॥सुरेषुसर्वेषुनसोस्तिकश्चिन्मनुष्यलोकेषुनसोस्तिकश्चित॥पश्वा
दिवर्गेषुनसोस्तिनूनंयोनांशभूतस्तवदेवदेव॥११७॥ब्रह्मेंद्ररुद्रप्रमुखादिविष्टभादिग्लोकपालादितवो
त्तमानि॥समुद्ररूपंतवधैर्यवत्सुतेजस्वरूपेषुरविस्तथाग्निः॥११८॥क्षमाधरेषुस्थितिरूपमुच्चैःशीघ्रेषु
शीघ्रोबलवत्सुवायुः॥मनुष्यरूपंतवराजवर्योजटेषुभूदेवुचपादपोसि॥११९॥दर्पान्वितेषुच्युतदा
नवस्त्वंतथाभिजातश्चविवेकवत्सु॥रसस्वरूपेणजलस्थितोसिगंधस्वरूपश्चतथाधरित्र्यां॥१२०॥

रे० खं० रूपात्मकश्चाभिद्रुताग्राने त्वंस्पर्शाः स्वरूपंभवतः समीरे ॥ शब्दात्मकं त्तेन भसि स्वरूपं भंतव्य रूपोमनसि
प्रभोत्वं ॥१२१॥ बोद्धाचबुद्धोप्रथितस्त्वनेकः सर्वत्रसर्वेश्वरसर्वभूतः ॥ इमाः सकामासमरुद्गसंताः सु
२८४ विस्मीतास्त्वक्षरसः सुरेशा ॥१२२॥ पश्यंतितेनाभिसरोजमध्ये ब्रह्माणमीशंचहरं स्वगुह्यां ॥ तथाश्विनौ
कर्णगतौसमस्तान्स्त्वस्थितान्बाहुषुलोकपालान् ॥१२३॥ घ्राणोनिलनेत्रगतौरविंदूजिह्वाश्रितांनाथ
तथासरस्वती ॥ पादौधरत्रींजठरासमस्तान्लोकान्हृषीकेशविलोकयामः ॥१२४॥ जंघेवयंपाद्तलं
गुलीषुपिशाययक्षोरगसिद्धसंघान् ॥ पुंस्त्वेप्रजानांपतिरोष्ठयुग्मेमतिश्रीतास्तेकतवः समस्ताः ॥१२५॥
सर्वेब्धयस्तेदशनेषुदेवदंष्ट्रासुदेवाभवतश्चसंज्ञाः ॥ रोमाण्यण्यशेषास्त्वदेवसंघाविद्याधरानाथ
तवांघ्रिरेखाः ॥१२६॥ सांगाः समस्तास्तवदेववेदासमास्थिताः संधिषुबाहुभूताः ॥ वराहरूपंधरणी
धरंतेनसिंहरूपंचतथाकरालं ॥१२७॥ पश्यामितेवाजिशिरस्तथैवत्रिविक्रमेयच्चतदाप्रमेयं ॥ अ
मीसमुद्रास्तवदेवदेहेसर्वेब्धयः शैलवरास्तथामी ॥१२८॥ इमाश्चगंगाप्रमुखास्त्वंत्योद्वीपाण्यशेषा
णिवनानिदेव ॥ स्तुवंतिचेमेमुनयस्तवैवदेहेस्थितास्त्वंमहिमानमुग्र्यं ॥१२९॥ त्वामीशितारंगेजता
मनंतंयज्ञैः समभ्यर्च्यनयंननामी ॥ त्वत्तोनसौम्यंजगतीहकिंचित्त्वत्तोनरौद्रंचसमस्तमूर्त्या ॥१३०॥
त्वत्तोनशीतंनचकेशवोष्णंसर्वस्वरूपातिशयीत्वमेव ॥ प्रसीदसर्वेश्वरसर्वभूतसनातनात्मन्परमेश्व
र ह ॥१३१॥ त्वन्माययामोहितमानसार्यत्तेपराधंतदिदंक्षमस्व ॥ किंवापराधंतवदेवदेवयन्मायया
नोहृदयंतवैव ॥१३२॥ पापाविशंकिंप्रणतादिहत्वन्मनोहिनोविह्वलतामुपैति ॥ नतेपराधंयदितो
पराधंमस्माभिमार्गंचाविवर्तिनीभिः ॥१३३॥ तत्क्षम्यतांस्रष्टिकृतस्त्वैवदेवापराधः स्रजतेविवि
कान् ॥ नमोनमस्तेगोविंदनारायणजनार्दन ॥१३४॥ त्वंनामस्मरणात्पापमशेषंनः प्रणश्यतु ॥ न २८४

मोच्युतनमोनंतविश्वात्मन्विश्वभावन ॥१३५॥ त्वंनामस्मरणात्पापमशेषंनः प्रणश्यतु ॥ नमस्तेयज्ञपुरुषवि
श्वपावकवामन ॥१३६॥ त्वंनामस्म० ॥ नमोनमस्तेवैकुंठश्रीवत्साकाकुलेक्षण ॥१३७॥ त्वंनाम० ॥ संसारार्ण
वपोताय नमस्तुभ्यमधोक्षज ॥१३८॥ त्वंनाम० ॥ नमः परस्मैशांताय वासुदेवायवेधसे ॥ १३९॥ स्वेच्छयागु
णयुक्तायस्वर्गस्थित्यंतहेतवे ॥ परमोनुग्रहोस्मासुविश्वरूपप्रदर्शनात् ॥१४०॥ यत्त्वयामेरुपृष्ठेदर्शितंसुर
संसदि ॥ पुरायच्चभृगोः प्रीत्या प्रार्थयान्यस्यदर्शितं ॥१४१॥ तंनः प्रदर्शितंरूपंसांप्रतंकृपयाविभो ॥ उपसंह
रविश्वात्मन्रूपमेतदकृत्रिमं ॥१४२॥ वर्धमानंनमोदृष्टुंसमर्थंचहृषीश्वर ॥ प्रलयाग्न्यर्ककोटीनांसमा
दीप्तिस्तवाच्युत ॥१४३॥ प्रमाणेनदिशोभूमिगगनंचैरभावृतं ॥ नविघ्नः कुत्रवर्त्तोभोभवांनाथोहिलक्ष्यते ॥
॥१४४॥ सर्वंजगदिहैकस्थंपीडितंलक्ष्ययामहे ॥ किंवर्णयामतेरूपंकिंप्रमाणमिदंहरे ॥१४५॥ महात्म्यंकिं
नुतेदेवजिह्वायायन्नगोचरे ॥ वक्तारोवास्यलक्षेणबुद्धीनामयुतायुतैः ॥१४६॥ गुणनिर्वर्णनंनामतवकर्तुं
भवत्फलं ॥ तदेतद्दर्शितंरूपंप्रसादः परमः कृतः ॥१४७॥ छंदतोजगतामीशत्वमेतदुपसंहर ॥ मार्कं० ॥
इत्येवंसंस्तुतस्ताभिरप्सरोभिजनार्दनः ॥१४८॥ दिव्यज्ञानोपपंनानांतासांप्रत्यक्षतांगतः ॥ विवेशासर्वभू
तानिस्वेरश्मीर्भूतभावनः ॥१४९॥ तंदृष्ट्वासर्वभूतेषुलयमानमधोक्षजं ॥ विस्मयंपरमंचक्रुः समस्तादेव
योषितः ॥१५०॥ सचसर्वेश्वरः शैलान्पादपान्सागरान्भुवं ॥ जलमग्निंतथावायुमाकाशंचविवेशह ॥१५१॥
देवदानवरक्षांसियक्षविद्याधरोरगान् ॥ मनुष्यान्पशुकीटादीन्मृगपक्षीसरीसृपान् ॥१५२॥ येंतरिक्षे
तथाभूमौदिवियेचजलाश्रयाः ॥ तान्विवेशासविश्वात्मापुनस्तद्रूपमाश्रिताः ॥१५३॥ नरेणसार्धंयत्ताभिर्दृ
ष्टपूर्वमरिंदम ॥ ताः परंविस्मयंगत्वासर्वास्त्रिदशयोषितः ॥१५४॥ प्रणेमुः साध्वसासांदुवदनान्दपसन्त
म ॥ नारायणोपिभगवानाहतास्त्रिदशांगनाः ॥१५५॥ नीयतामुर्वशीभद्राप्य त्रासौत्रिदशेश्वरः ॥ भवती

571/2008

रे०खं० नाहितार्थायुसर्वभूतेष्वसाविति॥१५६॥ ज्ञानमुद्राादितंभूयोलयंभूतेषुकुर्वता॥ तदुक्तंतसमस्तोयंभूतग्रामोमदंश
२८९ कः॥१५७॥ अहमध्यात्मभूतस्यावासुदेवस्ययोगिनः॥ अस्मात्परतरंनास्तियोनंतःपरिपठ्यते॥१५८॥ तमजंसर्वभू
तेशंजानीतपरमंपदं॥ अहंभवत्योदेवाश्चमनुष्याःपशवश्चये॥१५९॥ एतत्सर्वमनंतस्यवासुदेवस्यवैकृतं॥ एतज्ज्ञ
त्वासमंसर्वंसदेवासुरमानुषं॥१६०॥ सपश्चादिग्गणंचैवद्रष्टव्यंजितशंगनाः॥ मार्कं०॥ इत्युक्तास्तेनदेवेशस
मस्तादिव्ययोषितः॥१६१॥ प्रणम्यताःसमदनाःसवसंतादिकान्नप॥ आदायचोर्वशींभूयोदेवराजमुपागतः॥
॥१६२॥ आचक्षुश्चयथावृत्तंदेवराजायतत्तथा॥ तथात्वमपिराजेंद्रसर्वभूतेषुकेशवं॥१६३॥ चिंतयन्समतांग
च्छसमतैवहिमुक्तये॥ जानंनेवमशेषेषुभूतेषुपरमेश्वरं॥१६४॥ वासुदेवंकथंदोषांलोभादीनप्रहास्यति॥
सर्वभूतानिगोविंदोयदानान्यानिभूपते॥१६५॥ तदावैरादयोभावाःक्रियतांकस्यकेनहि॥ इतिपश्यंजग
त्सर्वंवासुदेवात्मकंनृप॥१६६॥ यमंतःपुरुषंकृत्वापरंनिर्वाणमृच्छति॥ जन्मादिभावरहितंतद्विष्णोःपरमं
पदं॥१६७॥ मार्कं०॥ तच्छ्रुत्वानंदनवनेविश्वरूपमुदाहृतं॥ सहदेवैर्देवराजःपरंविस्मयमागतः॥१६८॥
दृष्ट्वाचाप्सरसंपुण्यामुर्वशींकमलेक्षणां॥ संतस्तोविस्मितश्चाभूत्क्षीराज्यश्रियावृतः॥१६९॥ नकिंचिदु
त्तरंवाक्यमुक्तवांजोषमास्थितः॥ पुनःपुनःस्मरन्भक्त्यानारायणविचेष्टितं॥१७०॥ प्रणामार्थंततःश
क्रस्तंविभुंसमुपागतः॥ तावतातावनुप्राप्तौरेवातीरेभृगोःस्थले॥१७१॥ सहस्रंसमर्दसंवादात्ताभिरुद्विजि
तोयतः॥ तद्दोषक्षालनेसक्तौध्यातौशक्रेनिर्ममौ॥१७२॥ तत्रैवदंडवद्भूमौलुंठितस्तौप्रणम्यच॥ नरना
रायणौदेवावधीतुष्टावभक्तितः॥१७३॥ जानुभ्यामवनौस्थित्वाबद्धांजलिरुदारधीः॥ इंद्रउवाच॥
स्तोमिदिव्यगिरादेवंनारायणमकल्मषं॥१७४॥ वराच्वरगुरुंसौम्यंभक्तानामभयप्रदं॥ सर्वभूतान्त्रयोयद्व
द्भिरिर्भवतिनिर्भयः॥१७५॥ तथानारायणगिरिविश्वाधारस्थितोमहान्॥ गिरिंगिरीणामाधारंनगि २८८

रामपिचेगोरं॥१७६॥ निर्गुणंगुणिनामग्र्यंनौमिनारायणंविभुं॥ नारायणनमस्तेस्तुनारायणनमो
स्तुते॥१७७॥ गतिरस्मद्विधानांत्वंसर्वलोकपरायणं॥ अहमग्निर्यमोराक्षोयादोपतिमरुत्पतिः॥१७८
ईशानप्रमुखादेवत्वयैवरुक्मापितामहः॥ स्तोतास्तुविदिंधिषणायतस्त्वत्तोखिलंविभो॥१७९॥ तदात्वं
स्तूयसेकेनकथंकिंनुहिकेशव॥१७॥ तस्मान्नमोनमस्तेस्तुनारायणगिरास्थितः॥१८०॥ गिरागिरिर्य
तःप्रोक्तोनारायणजगन्मय॥ तस्मान्नारायणगिरिर्नाम्नाख्यातोभवत्विह॥१८१॥ पंचविंशतितत्वेभ्यः
परमात्मापरोह्यसि॥ तेनसत्येनमांपाहिपुरःपततिमंजसा॥ १८२॥ वसन्विश्वेषुभूतेषुवासुदेवात्क्वयो
सियत॥ तेनसत्येनमांपाहिपद्मनाभकृतागसं॥१८३॥ एकमेवपरंब्रह्मत्वमेवासिचराचरे॥ मूर्तामू
र्तस्वरूपेणनकिंचिद्रहितंत्वया॥१८४॥ विस्फुलिंगायथावह्नेर्वारिधेर्विप्रुषोयथा॥ तथात्वत्तोजगत्स्न
के तेनमांपाहिकेशव॥१८५॥ मार्कं०॥ एवंतुस्तुवतस्तस्यस्तोत्राक्रस्यपरमेश्वरः॥ नरेणसहसंतुष्टोदेवोनारा
यणोब्रवीत्॥१८६॥ स्वागतंतेसुरेशानब्रूहियत्तेभिवांछितं॥ तुष्टोस्मिहानयास्तुत्यावरंवरयसुव्रत॥
॥१८७॥ वश्योस्मितवभक्त्योस्मिनिदेशेतवसंस्थितः॥ क्षम्यतांयदिमेकिंचिदपराधंविभोतव॥१८८॥ लो
कानामुपकारायतीर्थेस्मिन्संनिधोभव॥ भमोद्वेषंयदाकुर्युर्दैत्यदानवराक्षसाः॥१८९॥ तदातदापरित्राणं
त्वयाकार्यंजगत्पते॥ नारायणउवाच॥ एवमस्तुसुरश्रेष्ठत्वयायदिहभाषितं॥१९०॥ सर्वंतद्भवितान्नूनंपरि
त्राणपरोस्मिते॥ नारायणगिराशक्रयदुक्तोस्मित्वयासकृत्॥१९१॥ नारायणगिरिर्नाम्नायत्रोक्तोगि
रिवद्गिरा॥ तस्मान्नारायणगिरिर्नामिमोस्त्विहवासव॥१९२॥ यस्मांद्गिरिरिति सर्वज्ञांतस्माद्गिरिरितीर्यते
॥ यथासर्वश्रियःशक्रगिरिःपर्वतराट्भवेत॥१९३॥ सुरसुरमनुष्याणांतथाहमपिचाश्रयः॥ यएतत्स्

573
2008

रे०खं० जयिष्यंति मंडुलं परमं मम॥१९४॥नारायणगिरिर्नाम्नादिव्यरूपं सुरेश्वर॥दिव्यज्ञानसमायुक्तादिव्यंदेह
२८६ विचेष्टिता:॥१९५॥ दिव्यलोकनवाप्स्यंतिदिव्यभोगसमन्विता:॥इत्युक्त्वादेवदेवोपितत्रैवस्वय
मास्थितः॥१९६॥साकंनरेणवीभुनातपस्तेपेस्वसिद्धये॥इंद्रोपिदेवमाप्टच्छस्वपुरंप्रतिजग्मिवा
न्॥१९७॥इतितेकथितंपार्थतीर्थंनारायणाह्वयं॥तत्रतीर्थेतुयःस्नात्वाश्राद्धंसंप्रीणयेत्पितॄन्॥
॥१९८॥यजेन्नारायणंभक्त्यासंकल्पंविष्णुलोकभाक्॥दत्वाचकपिलांतत्रकामधेनुपुरेवसेत्॥१९९॥
कृष्णाजिनंचकौपीनंछत्रंदंडंकमंडलुं॥यतीनांचैवविप्राणांत्रयात्दत्वाचभोजनं॥२००॥ऊर्ध्व
लोकेषुसर्वेषुसवसेत्कालमीप्सितं॥२०१॥ ॥इतिश्रीवायुपुराणेरेवामा० भृगुकच्छेनारायण
तीर्थं०॥ ॥मार्कं०॥ततोगच्छेन्महाराजधनुर्द्धादन्राकांतरे॥मूलश्रीपतिसंज्ञंवैतीर्थंपापप्रणाश
नं॥१॥यत्रनारायणोदेवोमूलश्रीपतिसंज्ञितः॥पूजितःपापसंघातःघातकस्तीर्थमाश्रितः॥२॥
॥युधिष्ठिरउवाच॥कथंनारायणोदेवोमूलश्रीपतिसंज्ञितः॥तत्रतीर्थेमुनिश्रेष्ठवदेतद्विस्तरान
मम॥३॥ ॥मार्कं०॥वर्तांतोयंतवाख्यातोमयानारायणस्ययः॥सवैनारायणःश्रीमान्श्रियःप
तिरजायत॥४॥भृगोरव्यायांसमुपन्नापुराश्रीस्त्रीशिरोमणिः॥बभूवाथविवाहस्ययोग्यासावर
मिच्छती॥५॥शुश्रावकेशवंविष्णुंहरिंनारायणंजनात्॥विश्वरूपंपरंश्रुत्वाविस्मितार्चितयत्तदा
॥६॥अत्यद्भुतचरित्रोसौविश्ववंद्योजगत्पतिः॥केनोपायेनमेभर्त्तासस्यान्नारायणःप्रभुः॥७॥
व्रतेनतपसावापिदानेनानियमेनवा॥वृद्धानांसेवयावाथदेवताराधनेनवा॥८॥इतिचिंताप
रांकन्यांसतीज्ञात्वायुधिष्ठिर॥प्राहधात्रीभयाभर्त्ताशंकरस्तपसाकिल॥९॥प्रजापतिश्चगायत्र्या २८७

गन्नाप्रासोरविःपतिः॥शच्यासुरेन्द्रश्चान्याभिःसर्वाभिरभिवांछितः॥१०॥तपसैवकिंप्राप्तातस्मात्त्वंश्च
सुतव्रते॥११॥सुदुश्चरंमहाच्चोग्रंसर्ववांछितदायकं॥११॥सर्वंहितपसाध्यायंपरःकल्पतरुस्तपः॥
॥मार्कंडेयउवाच॥सत्याप्रोक्तमिदंवाक्यंलब्धाःश्रीसर्वसाधनं॥१२॥सागरंतंसमासाद्यसर्वलक्षण
लक्षिता॥चचारविपुलंकालंतपःपरमदुश्चरं॥१३॥स्थाणुवत्संस्थितासाभूद्दिव्यंवर्षशतंतप॥ततइं
द्राद्यादेवाशंखचक्रगदाधरः॥१४॥मूलाजग्मुस्तदृष्टंतेसातुष्टश्चवतीसुरान्॥वैष्णवंविष्णुरूपंयत्त
दर्शयतमाचिरं॥१५॥ततोलक्ष्म्याव्रीडितास्तेगत्वानारायणंसुराः॥अब्रुवन्विश्वरूपंभोत्वंतस्यादर्शयि
तुंप्रभो॥१६॥त्वयासंप्रेषिताःसंतस्त्वंकुरुष्वयथोचितं॥ततोयथैवंतोजग्मुःसचविष्णुरचिंतयत्॥१७॥
उग्रंतपःश्रितादेवीदेहंदहतिभार्गव॥तत्रगत्वाद्यतांप्राप्यवरंदत्वाचवांछितं॥१८॥पुनस्तपःकरिष्यामि
दर्शयिष्यामिवापुनः॥वैष्णवंविष्णुरूपंयद्वदर्शदेवदानवैः॥१९॥ततोगत्वाहृषीकेशःसागरांतस्थि
तांप्रियां॥प्राहतुष्टोस्मितेदेविवरंवरयसुव्रते॥२०॥अदेयमपिदास्यामियत्तेमनसिवांछितं॥श्रीरुवा
च॥यदितुष्टोसिमेदेवप्रपन्नार्त्तिहरप्रभो॥२१॥रूपंदर्शययद्दृष्टंसस्मरेरप्सरोगणैः॥तथातातेनभृगु
णापुराब्रह्मादिकैःसुरैः॥२२॥विश्वरूपमनंततद्भूतभावनकेशव॥गंधमादनमासाद्यकृतंयत्तत्तपस्त्व
या॥२३॥तद्वदस्वप्रभोमह्यंनिर्मायंयदिमाप्यदः॥श्रद्दधामिनचैवाहंरूपस्यास्यकथंचन॥२४॥बद्धापि
यक्षरक्षोभिर्मायाचारित्रचारिभिः॥छंदिताममजानद्भिर्भावमंतर्गतंहरे॥२५॥श्रुत्वाविष्णुस्वरूपास्ते
चक्रिणश्चचतुर्भुजः॥व्रीडितास्तुगताःसर्वेविश्वरूपस्यदर्शनात्॥२६॥मार्कं०॥नारायणोथभगवा
शंखचक्रगदाधरः॥श्रियातथोक्तस्तद्रूपंमुक्त्वावैसुरपूजितं॥२७॥पूर्ववत्सुयथोक्तंवैविश्वरूपमदर्श
यत्॥दर्शयित्वाचतांप्राहसदागमविधानतः॥२८॥योर्चयिष्यतिमांसुभ्रुःसंपूज्यःसचपूजितः॥ध

575/2008

नधान्यसमायुक्तः सर्वभोगसमन्वितः ॥ २९ ॥ मूलंहिसर्वधर्माणांब्रह्मचर्यंपरंतपः ॥ गंधमादनगेनेह
मलयाद्यच्छमादरात् ॥ ३० ॥ धर्ममूलेनतेनाहमत्रस्थास्यामिभार्गवी ॥ त्वयासहजनैःपूज्योमूलश्रीपति
संज्ञितः ॥ ३१ ॥ मूलश्रीप्रोच्यतेब्रह्मन्ब्रह्मचर्यस्वरूपिणी ॥ पतिस्तस्याःप्रभुरहंवरदःप्राणिनांप्रिये ॥
॥ ३२ ॥ धर्माणांकर्मणांमूलंचतुर्वर्गलताःशुभा ॥ सर्वयोगमयापुण्यासर्वपातकहारिणी ॥ ३३ ॥ भृगूणा
प्रार्थितंपूर्वमर्चितस्थानमाश्रितः ॥ विश्वरूपंहितत्रास्यतद्दर्शितंतस्सवापिच ॥ ३४ ॥ अहंनारायणेतीर्थे
देवीपूर्वंकृतास्पदः ॥ मूलश्रीपतिनाम्नाचस्थास्येतत्सार्म्यतोर्चितः ॥ ३५ ॥ मूलश्रीर्यापराशक्तिर्ब्रह्मचर्य
तपोमया ॥ तथामूलात्वयाचापिमूलश्रीपतितांगतः ॥ ३६ ॥ भुक्तिमुक्तिप्रदोनित्यंसुहृदांभक्तितोषितः
॥ रेवाजलेनरस्नात्वायोर्चयेन्मांयतव्रतः ॥ ३७ ॥ मूलश्रीपतिनामानंसलभेद्वांछितंफलं ॥ दानानित
त्रयोदद्यान्महांत्यपिममप्रिये ॥ ३८ ॥ सलक्षगुणितंपुण्यंअन्यस्थानादवाप्स्यति ॥ विश्वरूपतिसंज्ञंमां
पूजयित्वासनातनं ॥ ३९ ॥ सर्वकल्याणभाग्मर्त्योभविताचचिरादपि ॥ द्रष्टुंनशक्तायद्रूपंसुरासुरम
होरगाः ॥ ४० ॥ सिद्धकिंनरयक्षाश्चराक्षसाश्चकुतःपरे ॥ दृष्टंचतांतदेवीत्रीसम्यक्चित्तेप्रधारितं ॥
॥ ४१ ॥ तदर्चितंस्त्वावरान्कामान्प्राप्स्यसित्वंनसंशयः ॥ वरंवृणीष्वदेवेशीवांछितंदुर्लभंसुरैः ॥ ४२ ॥
दुर्गसंसारकांतारपतितैश्चापिभार्गवी ॥ अदेयमपिदास्यामिमाविलंबंकुरुप्रिये ॥ ४३ ॥ श्रीरुवाच ॥
नारायणजगन्नाथनारायणजगन्मय ॥ प्रसीदपाहिमांभक्तांधर्मेसम्यङ्नियोजय ॥ ४४ ॥ ॥
प्रियोसिमेप्रियाहंतेयथास्यांतथाकुरु ॥ त्रिवर्गसाधनंपुण्यंगार्हस्थ्यंदेवसाधय ॥ ४५ ॥ तमास्था
याश्रमेपुण्यंमायासहजगत्पते ॥ पंचयज्ञक्रियायुक्तोभवभाग्यविभावन ॥ ४६ ॥ मार्कंडेयउवाच ॥ २८७

तयोःसंवदतोर्देवदेवाइंद्रपुरोगमाः ॥ समागतास्तभृगुदेशंसागरांतमहर्षयः ॥ ४७ ॥ ततोभृगुर्देवराजोनारा
यणविचिंत्यतं ॥ तात्वावत्रेतुतत्कन्यांधर्मायासौददौचतां ॥ ४८ ॥ धर्मोपिविधिवद्धसाविवाहंसमकारयत्
॥ देवदेवस्यराजेंद्रदेवतार्थंसमाहितः ॥ ४९ ॥ युधिष्ठिरउवाच ॥ धर्मोविवाहमकरोत्कथंत्वयोदितं ॥ कोवि
धस्तत्रकादत्तादक्षिणाभृगुणापिच ॥ ५० ॥ स्रवस्रुचग्रहणेतत्रविवाहेत्वभवच्चकः ॥ सलिजःकेसद
स्याश्चतत्रासन्मुनिसत्तम ॥ ५१ ॥ किंतस्यावभृथंचासीत्तत्सर्वंविस्तराद्वद ॥ त्वद्वाम्रतपानेनतृप्तिर्मेमन
विद्यते ॥ ५२ ॥ मार्कंडेयउवाच ॥ नारायणविवाहस्ययज्ञेयद्विधिलक्षणं ॥ तपसस्तस्यदेवस्यसम्यगाच्चिर
पास्य ॥ ५३ ॥ वक्तुंसमर्थोनगुणाच्चतुर्वक्त्रोपिचेश्वरः ॥ तथाप्युद्देशतोवक्ष्येशृणुभूपसमाहितः ॥ ५४ ॥
ब्रह्मासप्तर्षयःसप्तस्रक्स्रुवग्रहणेरताः ॥ अग्नीजुहुविरेतत्रवेदिर्धात्रीससागरा ॥ ५५ ॥ ददुःसमुद्रा
रत्नानिब्रह्मर्षिभ्योथदक्षिणां ॥ धनदोपिददौवित्तंसर्वब्राह्मणवांछितं ॥ ५६ ॥ विश्वकर्मापिदेवानांभर
श्रेणांपरंतप ॥ वेश्मानिसुविचित्राणिसर्वरत्नमयानिच ॥ ५७ ॥ कृत्वाप्रदर्शयामासदेवेंद्राययाज्ञ्विने ॥ श
तक्रतुस्ततोविप्रान्कपिष्ठिलपुरःसरान् ॥ ५८ ॥ शौनकादींश्चपप्रच्छवाष्कलांश्चगालवानपि ॥ आत्रेयानपिराजेंद्र
वणश्चमपिवांछितं ॥ ५९ ॥ मार्कं० ॥ दृष्ट्वातेरत्नचित्राणिगृहाणिशयनानिच ॥ आसनानिविचित्राणिसर्वान्न्यानुप
स्करान् ॥ ६० ॥ दृष्ट्वैतदद्भुतंसर्वंप्राहुःशक्रंमहर्षयः ॥ देवानांचऋषीणांचसंगमोयंसुपुण्यकृत् ॥ ६१ ॥ अस्मिन्पुण्ये
सुरश्रेष्ठवस्तुंवाछामहेसदा ॥ शतक्रतुरपीत्याहवासवोत्रभविष्यति ॥ ६२ ॥ सत्यधर्मरतायावत्काल्यंभवि
ष्यथ ॥ तावत्कालंनिवासोवोभविष्यत्यत्रनिश्चितं ॥ ६३ ॥ मार्कंडेयउवाच ॥ एवंविवाहविवाहयज्ञेवैप्रवृत्तेन्रप
सत्तम ॥ धर्मस्यभृगोर्जातिवरवध्वोःसमागमे ॥ ६४ ॥ सनत्कुमारसुमुखवासदस्यास्तत्रचाभवन् ॥ उद्गात्राभव
गिरसोमरीचिश्चचकारह ॥ ६५ ॥ होत्रंधर्मवसिष्ठश्चब्रह्मत्वंशौनकोन्रप ॥ षट्त्रिंशद्भिःसहस्रंप्रादात्ते

577
2008

रे० खं०
२८८

ष्यः स्नातक्रतुः ॥ ६६ ॥ लक्ष्मीसत्कारसंयुक्तां दत्वैवं भृगुणा सह ॥ ब्रह्मणो जुहुतो वह्निं यावदेशस्थितैः सुरैः
॥ ६७ ॥ दृष्टं ललाटदेशोसौ ललार इति संज्ञितः ॥ स देशः श्रीपतेः क्षेत्रं पुण्यं देवर्षिसेवितं ॥ ६८ ॥ सर्वाश्चर्य
मयं दिव्यं दिव्यसिद्धिसमन्वितं ॥ ब्राह्मणांस्तत्र वैराजं निवेशयितुमुद्यत ॥ ६९ ॥ लक्ष्मीः श्रीपतिना मा
नमाह चेदं वचस्तदा ॥ य एते ब्राह्मणाः शिष्याः स्मृग्वादीनां यतव्रताः ॥ ७० ॥ निवेशयितुमिच्छामि त्व
त्प्रसादादिहो द्यतान् ॥ मरीच्याद्याः सुरेंद्रेण स्थापिताः किल सुव्रताः ॥ ७१ ॥ नैष्ठिका व्रतिनो विप्रा बहवो
त्रयतव्रताः ॥ प्रापें जोत्येपदे ब्राह्म्ये किंचिल्लुब्धपदा द्विजाः ॥ ७२ ॥ तानहं स्थापयिष्यामि त्वत्प्रसादाज्ज
नार्दन ॥ ततः कौतूहलपरो भगवान्वृषभध्वजः ॥ ७३ ॥ पप्रच्छ व्रतिनः सर्वान् वृत्तिभेदव्यवस्थितां
न् ॥ नारदोपि महादेवमुपेत्य सतिवत्तुभं ॥ ७४ ॥ देवं कृष्णाजिनधरा नैष्ठिका ब्राह्मणा ह्यमी ॥ अमाक
र्मासवस्त्रेण छन्नगुह्या द्विजोत्तमाः ॥ ७५ ॥ प्राजापत्याश्चतुर्विंशसहस्राणि सुरेश्वर ॥ ब्रह्मचर्यव्रतस्था
नां पदं ब्राह्म्यं जयैषिणां ॥ ७६ ॥ द्वादशैव सहस्राणि संति वै वृषभध्वजः ॥ नारदस्य वचः श्रुत्वा देवा देवर्ष
योपि च ॥ ७७ ॥ साधु साध्वीति मन्वाना नोचुः केचन किंचन ॥ श्रीस्ततस्तान्समाकार्य ब्राह्मणान्भक्तिसंयु
ता ॥ ७८ ॥ पुनः प्रणम्य प्रोवाच प्रसादः क्रीयतामिति ॥ षट्त्रिंशद्वै सहस्राणां वेश्मनामत्र संस्थितिः ॥ ७९ ॥ वि
श्वकर्माकृतानां तु तेषु तिष्ठंतु वै द्विजाः ॥ मार्कं० ॥ ते तथेति च विज्ञाय स्थिताः संप्रीतमानसाः ॥ ८० ॥ सर्ववेदादिच
तुर्वेदाध्यायिनः परमोज्ज्वलाः ॥ धनधान्यसमृद्धाश्च वांछितप्राप्तिलक्षणाः ॥ ८१ ॥ सर्वकामोपसंपन्ना गृहक्लेश
विवर्जिताः ॥ इति संस्थाप्य तान्विप्रान् श्रीः सदा प्रत्यपालयत् ॥ ८२ ॥ एवं वैवाहिके मखे विनिवृत्ते सषयस्तुतं ॥ प २८८
प्रच्छुः श्रीपतिः स्नानं कुत्र कूर्म जनार्दन ॥ ८३ ॥ इत्याकर्ण्य वचस्तेषां श्रीपतिः पादपंकजात् ॥ सुमोच जाह्नवं तोयं

देवा मध्यगतं शुचिः ॥ ८४ ॥ तस्य पादोदकं दृष्ट्वा निर्गतं सषयश्च ते ॥ विस्मिताः समपद्यंत नाजानंत स्य गौरवं ॥ ८५ ॥ रुद्र
स्य च पुरो देवा सषयश्च तपोधनाः ॥ विस्मिताः संकथाश्च कुर्वन्वेत स्वशिरं सिच ॥ ८६ ॥ शंभो किमेतं नो ब्रूहि सहसा
वारिसंभवः ॥ पादाग्राधर्मपुत्रस्य पश्यं नारायणस्य यत् ॥ ८७ ॥ श्रीशपादोत्थितं वारि जगत्संमोहकारणं ॥ महेश्वर उ
वाच ॥ पादोदकमिदं विष्णोरहं जानामि वै सुराः ॥ ८८ ॥ मयेदं सेवितं नूनं बहुकल्पमनेहसं ॥ सिद्धर्षिमुनिसिद्धैश्च
ब्रह्मणा परमेष्ठिना ॥ ८९ ॥ ब्रह्महत्यादिपापानां नाशायालमिदं सुराः ॥ तदत्र विष्णुनास्पृष्टं दक्षिणांघ्रिमुखादिदं
॥ ९० ॥ महत्तीर्थमिदं जातं स्नानादिकविधायिनां ॥ दशाश्वमेधावभृथैः स्नानमात्राति च्यते ॥ ९१ ॥ युष्माभिः श्रीपतिः
पृष्टः क्व कूर्मः स्नानमच्युत ॥ ततस्तेनात्मपादाब्जात्कल्पयां बुप्रकाशितं ॥ ९२ ॥ स्नात्वेह त्रिदशोशान यत्फलं प्राप्यते
नरैः ॥ प्रवक्तुं केन तत्कर्थवि बुधाः किं वदाभिवः ॥ ९३ ॥ एवमुक्तास्तमर्दे स्नानं कृत्वा मुदान्विताः ॥ स्थित्वा रौसस्तत्र
ते तीर्थे जग्मुः शिवमुखाः सुराः ॥ ब्राह्मणाश्च ततः सर्वे स्ववेश्मान्येव भेजिरे ॥ एवं बभूव तत्तीर्थं मूलश्रीपतिसंज्ञि
तं ॥ ९५ ॥ स्नाने श्राद्धे तथा दाने पूजने द्विजभोजने ॥ जपहोमे च राजेंद्र शतसाहस्त्रिकं फलं ॥ ९६ ॥ तत्र तीर्थे न
णां नूनं नात्र कार्या विचारणा ॥ तथैव देवतीर्थेपि सर्वपापप्रणाशने ॥ ९७ ॥ ॥ इति श्री० मूलश्रीपतितीर्थ० मार्कं०
तत्र वच महाराज दंडहादशाकांतरे ॥ चौलश्रीपतिसंज्ञं तु तीर्थं मंगलदायकं ॥ १ ॥ वित्ते श्रियो हि विधिना पाणिग्र
हणकर्मणि ॥ विसर्जिते सुरगणे सर्षिसिद्धगणे तथा ॥ २ ॥ जलकेलिप्रसक्ताया रमायाः पतिना मुदा ॥ प्रेमपूरि
तचित्तेन गृहीत्वांके चतां मुदा ॥ ३ ॥ रहस्तम न्यमानेन कृतं वक्त्रस्य चुंबनं ॥ दृढं विधृत चूलायास्तेन प्रीतात्म
रः ॥ ४ ॥ कृत्वोत्संगे च तन्मूर्धा चूलाबंधं चकार सः ॥ तदाविय दृतैर्देवैर्दृष्टो नारायणः स्वयं ॥ ५ ॥ प्रेम चूली
बंधाय प्रियायाः स्मरनिर्जितः ॥ ततो देवैश्च सिद्धर्षिगंधर्वैः समुपागतैः ॥ ६ ॥ सेवितः प्रार्थितश्चैव विष्णुरद्धा
प्रणम्य तु ॥ देवा ऊचुः ॥ कामकेलिप्रसक्तेन देव वक्तुं न शक्यते ॥ ७ ॥ अस्माद्दृष्टोस्तथान्यैश्च देवैरुच्चाबचैर्वि

5719
2008

भो॥तथापि जगतामीशं किमपि प्रार्थयामहे॥८॥विश्वस्यपितरं विष्णुं श्रीसमेतं मुदान्वितं॥यत्र चोलानिबद्धास्तेक
तःपत्न्याः परार्तिहन्॥९॥प्रेमपूरितचित्तेन श्रीपतेर्निर्मिताः तटे॥चोलश्रीपति संज्ञं वै तीर्थमेतद्धुवल्लिह॥१०॥
दंपत्योः प्रीतिजनकं स्नानार्चन विधानतः॥सौभाग्यपुत्र संतान दायकं रूपथाविभोः॥११॥नारायणउवाच॥
एवं भविष्यतीत्युक्त्वा लज्जाक्रांत मुखो हरिः॥श्रीसमेतो महाराज तत्रैवांतरधीयत॥१२॥मार्कंडे०॥तत्र तीर्थेस
दापार्थ स्नात्वा संपूज्य श्रीपतिं॥पितॄनां दीभुखान्श्राद्धेन स्नान्कृत्वा विधानतः॥१३॥अमंगलफलं त्यक्त्वा मंगलं चि
रमाप्नुयात्॥श्रीपतेर्लोकमाप्नोति यत्र गत्वा न शोचति॥१४॥ ॥इती श्री चोलपतितीर्थं॥ ॥मार्कं०॥युधिष्ठिर
महाराज देवतीर्थमतः शृणु॥सर्वतीर्थमयं पुण्यं देवर्षिगणसेवितं॥१५॥युधिष्ठिरउ०॥देवतीर्थमिदं कस्मात्
स्थितं चक्रियदंतरे॥को देवस्तत्र महात्म्यं तीर्थे वै किमुदाहृतं॥१६॥फलं किं स्नानदानादि कारिणां जायते मु
ने॥मार्कं०॥देवतीर्थं नृपश्रेष्ठ चोलश्रीपतितीर्थतः॥१७॥शृणु पार्थ परं पुण्यं धनुर्द्वादशकांतरे॥पृथिव्यां यानि
तीर्थानि देवैः सर्षिगणैरपि॥१८॥सेवितानि महाबाहो तानि ख्यातानि विष्णुना॥समागतान्यनेकानि तत्र तीर्थे यु
धिष्ठिर॥१९॥तत्रैकत्र स्थितान्येवं सर्वैर्देवैः सहैव तु॥सर्वतीर्थनिवासाच्च अधिष्ठानाद्धुरेर्नृप॥२०॥तत्तीर्थं वै
भावं पुण्यं देवतीर्थमिति श्रुतं॥यत्र देवर्षयः सिद्धाः परमानंदमाप्नुयुः॥२१॥कुरुक्षेत्रं भुवि परं नभस्येकं त्रि
पुष्करं॥पुरुषोत्तमतीर्थं वै दिवि ख्यातं परात्परं॥२२॥देवतीर्थसमं नास्ति त्रिषु लोकेषु भारत॥यत्रेच्छया मुनी
नां हि सर्वतीर्थागमः कृतः॥२३॥हरिणा लोकपालेन विष्णुना प्रभविष्णुना॥दिक्पालैर्लोकपालैश्च वसुविश्व
मरुद्गणैः॥२४॥देवैरधिष्ठितं तीर्थं आदित्यैश्च युधिष्ठिर॥यत्रादिस्थानमापन्नः सर्वदेवमयो हरिः॥२५॥
न प्राप्य मनुजस्तत्र न्नकदाचिद्युधिष्ठिर॥पृथिव्यां सर्वतीर्थेष्योयः स्नानमहर्निशं चरेत्॥२६॥देवतीर्थे
स सर्वत्र स्नातो भवति मानवः॥सर्षिसंघैः प्रार्थितेन तत्र नारायणेन तु॥२७॥आज्ञ्ना सर्वतीर्थानां कृतं ती

र्थमिदं शुभं॥देवैर्दत्तवरं सर्वैः सेवितं च सुरर्षिभिः॥२८॥स्नात्वा श्रीसंगममभ्यर्च्य उपोष्यैकादशीं सितां॥यो ददा
ति हिरण्यादि दानानि मनुजोत्तम॥२९॥तदनंतफलं सर्वं सूर्यस्य ग्रहणे यथा॥भूमिधेनुहिरण्यानि मणिमौक्ति
कदानतः॥३०॥वज्रप्रवालरत्नानां पुण्यसंख्या न विद्यते॥देवतीर्थे तु यद्दानं श्रद्धायुक्तेन दीयते॥३१॥तदनंत
फलं माह बृहस्पतिरुदारधीः॥देवतीर्थे भृगुक्षेत्रे सर्वतीर्थाधिकं स्मृतं॥३२॥देवतीर्थे नरः स्नात्वा यः पश्यति श्री
पतिं॥सोमग्रहे कुलशतं स समुद्धृत्य नाकभाक्॥३३॥दानानि द्विजमुख्येभ्यो ये दत्तानि नराधिप॥देवतीर्थे नरे
र्भोगिभोगिनः प्रेत्य चेह ते॥३४॥देवतीर्थे नरो नरी स्नात्वा नियतमानसो॥उपोष्यैकादशीं शुक्लां संपूज्य च उमा
पतिं॥३५॥रात्रौ जागरणं कृत्वा घृतेनोद्बोध्य दीपकं॥द्वादश्यां प्रातरुत्थाय स्नात्वा वैनर्मदाजले॥३६॥द्विजदंपत्य
मभ्यर्च्य विधिना शक्तितो नृप॥वस्त्राभरण तांबूल पुष्पदीप विलेपनैः॥३७॥श्रीवासस्त्रक सिंदूरैर्भोजनैश्च पृथ
ग्विधैः॥अक्षये विष्णुलोके तौ मोदते चरितव्रतौ॥३८॥यः सदैकादशीं तीर्थे स्नात्वोपोष्यार्चयेच्छिवं॥हरिं च भर
तश्रेष्ठ रात्रौ जागरणान्वितः॥३९॥वेदशास्त्रकथाभिश्च नृत्यगीतविनोदतः॥धर्मराजकृतां पापां न स पश्य
ति यातनां॥४०॥पंचरात्रविधानेन श्रीपतिं योर्चयेदिह॥दीक्षामवाप्य हंती वै वैष्णवीं पापनाशिनीं॥४१॥स्वर्ग
मोक्षप्रदां पुण्यां भोगप्रदां तथा॥राज्यपुत्रप्रदां पार्थ सुखसौभाग्यकारिणीं॥४२॥तरेभुवं भवां भोधिं स नरः कु
रुनंदन॥योर्चयेदपि तत्रैव देवतीर्थे श्रियं पतिं॥४३॥विश्वरूपमथो सम्यक् भक्त्या चोलाद्धृयो हरी॥नारायणगिरिं
वापि ग्रहणे वाहरेर्दिने॥४४॥स्नाप्यपंचामृतैर्वापि पुण्यैस्तीर्थोदकैरपि॥सुसूक्ष्मैरहतैर्वस्त्रैः पट्टकौशेयकैर
पि॥४५॥विचित्रैः पंकजैर्वापि पुष्पधूपविलेपनैः॥गुग्गुलैर्घृतमिश्रैश्च नैवेद्यैर्विविधैरपि॥४६॥पायसा
द्यैर्नृपश्रेष्ठ पयसा वा फलैरपि॥घृतदीपैः सुविमलैर्वर्धमानैर्मनोहरैः॥४७॥समाराध्य नरो याति यथा तद्धु
णु भारत॥शंखवीणा क्रीड दीपश्री भक्त्वा सोगरुडासनः॥४८॥देवलोकानतिक्रम्य विष्णुलोकं स गच्छति॥

581
2008

रे॰खं॰ यश्चापि परया भक्त्या श्रीपतेः पादपंकजं ॥४९॥ चतुर्धाधिष्ठितं पश्येल्क्ष्मीयं त्रैलोक्यमातरं ॥ नृत्यगीतविनोदेन नति
स्तुतिजयादिभिः ॥५०॥ नीराजनं च देवस्य प्रातर्मध्ये दिने तथा ॥ सायं च नियतो नित्यं यः पश्यन्पूजयेद्धरिं ॥५१॥ सती
२९० र्थानि प्यापरं दुर्गां नैवार्त्तिं संप्रपद्यते ॥ आयुः श्रीवर्द्धनं पुंसां च स्त्रीणामपि पूरकं ॥५२॥ पापोपपापतापघ्नमलं नीराज
नं हरेः ॥ सदा नीराजने काले स्तुतिं यः पठति प्रियां ॥५३॥ सधन्यो यश्च सततं प्रसन्नेनांतरात्मना ॥ हरे नीराज
नं प्रोषं पाणिभ्यां च परामृशेत् ॥५४॥ संगृह्य चक्षुषी तेन अंजयेन्मार्जयेन्मुखं ॥ तिमिरादीश्च चक्षुरोगान्नाशये
न्मुखदीप्तिकृत् ॥५५॥ भवत्यशेषदुःखानां नाशायालनं पोत्तम ॥ दीपप्रज्वालयंयस्य नित्यमग्रे श्रियः पतेः ॥
॥५६॥ सलभेच्चक्रवर्त्तित्वं मनसा यद्यदिच्छति ॥ यथा दीपप्रदानेन तुष्यते मधुहा हरिः ॥५७॥ न तथा विद्धवित्ते
न सुवर्णाद्येन भूमिप ॥ यस्तु प्रदक्षिणशतं हरेर्दद्याद्धरेर्दिने ॥५८॥ स्नात्वा रेवाजले पुण्ये साधिकं वा व्रती नरः ॥
सप्तद्वीपवती तेन साब्धिद्वीपवनाद्रिका ॥५९॥ प्रदक्षिणीकृता नूनमिति मे शंकरोऽब्रवीत् ॥ इदं यः पठ्यमानं
वै शृणुयाद्वा पठेत वा ॥६०॥ स्मरणं सोंतकाले वै विपाप्माप्नुयाद्धरेः ॥ इदं यशस्यमायुष्यं स्वर्ग्यं च पितृवल्लभं ॥
॥६१॥ माहात्म्यं श्रीपतेर्विप्रा श्राव येच्छाद्धकर्मणि ॥ मध्वाज्यपायसैस्तेन तर्पिताः स्युः पितामहाः ॥६२॥ त्रिवि
क्रमादितीर्थानि देवतीर्थांतिकानि च ॥ वैस्नवानि भृगोः कच्छे मयोक्तानि तवाधुना ॥६३॥ यत्र स्नात्वापि न
पते वैकुंठपदमाप्नुयात् ॥६४॥ ॥ इति श्री वायुप्रोक्तसंहितायां रेवा॰ भृगुकच्छे देवतीर्थं ॥ मार्कंडे॰ ॥ ॥
हंसतीर्थं ततो गच्छेद्राजेन्द्रं तु तांतरे ॥ यत्र हंसस्तु तत्र स्नात्वा वाहनं ब्रह्मणो भवेत् ॥१॥ कश्यपस्य सुतः पूर्वं द
क्षायण्यां तु सोभवत् ॥ सुमतिर्नाम यो हंसः सर्वदेवेषु पठ्यते ॥२॥ द्विव्यादिकूदिव्यगमनो रेवातीरमुपेत्य च ॥
जगत्कर्त्तुर्वपुर्वोढुं तपस्तेपे चिरं महत् ॥३॥ तपसस्तु प्रभावेन विधोश्च परितोषितेः ॥ बाहुनत्वं विधेः प्राप्य
ब्रह्मलोकं जगाम ह ॥४॥ तदा प्रभृति राजेन्द्र हंसतीर्थमिति श्रुतं ॥ हंसतीर्थे नरः स्नात्वा दानं दत्त्वा च कांचनं ॥५॥ २९०

सर्वपापविनिर्मुक्तो ब्रह्मलोकमवाप्नुयात् ॥ हंसयुक्तेन यायेन तरुणादित्यवर्चसा ॥६॥ सर्वकामसमृद्धेन सेव्य
मानोप्सरोगणैः ॥ तत्र भुक्त्वा यथाकामं सर्वभोगान्यथेप्सितान् ॥७॥ इहमानुष्यतां प्राप्य नरो जातिस्मरो भवेत् ॥
संन्यासेन तस्य जंदेहं स धीमो ह्यमवाप्नुयात् ॥८॥ एतत्ते कथितं पार्थ हंसतीर्थस्य यत्फलं ॥ सर्वपापहरं धन्यं दुः
स्वप्नारिष्टनाशनं ॥९॥ ॥ इति श्री रेवाम॰ भृगुकच्छे हंसतीर्थं ॥ मार्कं॰ ॥ ततो धनुःशतं गत्वा प्रभातीर्थमनुत्त
मं ॥ हितार्थं सर्वभूतानां प्रभया स्थापितं पुरा ॥१॥ भृगुणा प्रार्थितो पूर्वं प्रभासूर्ययुधिष्ठिर ॥ रेवातीर्थे भृगोः
क्षेत्रे चक्रे तु स्थानमादरात् ॥२॥ ऋषीणां सुरसिद्धानां दृष्ट्वा स्थानान्यनेकशः ॥ भास्करश्च भो प्रचैव तत्र संनिहितो
स्थितो ॥३॥ महेशानाराधनेयुक्तौ तपसा तीर्थकारणात् ॥ तव प्रभात पस्तप्त्वा स्थापयामास वै शिवं ॥४॥ स्वना
म्ना स्थापनं चक्रे तीर्थस्य च विधानतः ॥ प्रसन्ने शंकरे पार्थ सार्थक्यं जन्म नो ययौ ॥५॥ स्नात्वा तत्र नरो भक्त्या स
र्वपापैः प्रमुच्यते ॥ मृतः शिवपुरं याति तीर्थस्यास्य प्रभावतः ॥१६॥ सर्वैर्युगसहस्राणि रुद्रलोके महीयते ॥ त
त्र तीर्थे च यो भक्त्या ददेद्दीपं सुशोभनं ॥१६॥ जायते तस्य राजेंद्र तेजश्च स्फुः शरीरजं ॥ तत्र तीर्थे मृतानां च जंतू
नां किल भारत ॥१७॥ निवर्तिका गतिः प्रोक्ता यावदाभूतसंप्लवं ॥ अमातीर्थे च यद्दानं श्रद्धायुक्ते न दीयते ॥१८॥
तदक्षयं फलं प्राहुर्ब्रह्मविष्णुमहेश्वराः ॥ तत्र स्नात्वा तिलजलैः स्तर्पयित्वा पितामहान् ॥१९॥ इष्ट्वा शिवं च निः
पापः पितृभिः सह नाकभाक् ॥ प्रभातीर्थे नरो नारी स्नात्वा नियतमानसो ॥२०॥ उपोष्य च चतुर्दश्यां माघेमासि
विशेषतः ॥ स्नात्वा पितृंश्च संतर्प्य संपूज्य वृषभध्वजं ॥२१॥ रात्रौ जागरणं कृत्वा घृतेनोज्वाल्य दीपकं ॥ अष्टम्यां
वा चतुर्दश्यां मासि मार्गशिरे शुभे ॥२२॥ निराजागराणादानात् सर्वपापैः प्रमुच्यते ॥ ततश्च प्रातरुत्थाय स्ना
त्वा संपूज्य धूर्जटिं ॥२३॥ पंचामृतेन गव्येन गंधतोयैश्च पार्थिव ॥ दिव्यगंधैश्च पुष्पैश्च पद्मनीलोत्पला
दिभिः ॥२४॥ वस्त्राभरणताम्बूलधूपनीराजनैरपि ॥ नैवेद्यैर्विविधैः पार्थ प्रतिपत्त्या क्षमापयेत् ॥२५॥
मंत्रेणानेन देवेशमुमया सह शंकरं ॥ नमस्तुभ्यं महेशान प्रभो श्वर जगत्पते ॥२६॥ प्रसादसुमुखो भ
583
2008

त्वादेहिमे वांछितं फलं ॥ प्रभेशे प्रार्थयित्वैवं ततो विप्रांश्च भोजयेत् ॥ २७ ॥ एवं कृत्वा महीराज सर्वतीर्थफलं लभे
त् ॥ वाचिकं मानसं पापं कर्मजं यत्पुरा कृतं ॥ २८ ॥ स्नानमात्रेण राजेंद्र प्रभातीर्थे विनश्यति ॥ २९ ॥ ॥ इति श्रीरे
वाखं० भृगुकच्छे प्रभातीर्थं ॥ मार्कंडेय० ॥ ततो धनुःशतं गत्वा भास्करं तीर्थमुत्तमं ॥ मूलस्थानमिति ख्यातं यत्र सि
द्धो दिवाकरः ॥ १ ॥ भृगुणा प्रार्थितं पूर्वं ब्रह्मचर्यव्रतान्वितः ॥ चतुर्वर्गस्य यन्मूलं ब्रह्मचर्यं परं तपः ॥ २ ॥ यन्मूलव्र
तमास्थाय भानुस्तपति वै यदा ॥ मूलश्रीपतिना देवी तदा प्रोक्ता युधिष्ठिर ॥ ३ ॥ मूलस्थानमिदं देवी कारणं सर्वक
र्मणां ॥ शुभानां मंगलानां च ब्रह्मचर्यं चयेत्शुभे ॥ ४ ॥ तदाश्रित्य व्रतं भानुस्तपस्तपति दुःकरं ॥ त्रयीमूर्त्तिर्यं सूर्यो
भमांशो विश्वजीवनः ॥ ५ ॥ प्रभाया सहितस्तीरे रेवायाः समुपागतः ॥ त्वयि त्रार्थार्थितः पूर्वं स्थानमात्राश्रयेति मे ॥ ६ ॥
त्वमप्येनं सभयच्चैत्रिये स्थापय भास्करं ॥ मूलव्रतमिदं श्रेष्ठं मूलस्थानाख्य भास्करं ॥ ७ ॥ मूलव्रतं ब्रह्मचर्यं य
स्तदाश्रित्य तिष्ठति ॥ परः सभे प्रियो देवी सुरासुरनरेष्वपि ॥ ८ ॥ तस्याः शर्वस्तुतं मीश्वामी प्रयच्छामि च वांछितं ॥ ९ ॥
मार्कं० ॥ ततो भर्त्तुर्वचः श्रुत्वा स्थापितो रमया रविः ॥ तत्र तत्संनिधौ गत्वा त्वां तो पूर्वं पितुर्वचः ॥ १० ॥ भर्त्तुर्वचो त्वापथि
त्वा पूजयित्वा प्रभापतिं ॥ संप्रार्थितवती भानुं चिरमत्र स्थिरो भव ॥ ११ ॥ प्रियोसि मम भर्त्तुस्त्वं भर्त्तुर्वाक्याद्दिदं व
दे ॥ स्वमूर्त्यंशं समाधाय रवखोल्कप्रभया सह ॥ १२ ॥ मत्पित्रा प्रार्थितः पूर्वं मूलश्रीपतिना तथा ॥ त्वात्वा मूलं व्रतं
स्थानं मया च प्रार्थितोस्य तत ॥ १३ ॥ इति संप्रार्थितो भानुर्जगच्चक्षुः प्रियान्नृप ॥ एवं भविष्यतीत्युक्त्वा विनयावन
तो रविः ॥ १४ ॥ स्थितः स्वांशेन तत्रैव मूलस्थानाभिदानतः ॥ तदाप्रभृति राजेंद्र मूलस्थानमिति श्रुतं ॥ १५ ॥ ती
र्थं तु भास्करं पार्थ सर्वकामप्रदं शुभं ॥ तत्र तीर्थे नरो यस्तु स्नात्वा भक्त्या युधिष्ठिर ॥ १६ ॥ संतर्पयेत्पितॄन् देवां
स्तोयैर्भक्त्या समुद्भवैः ॥ तिलमिश्रैस्तु सप्तम्यां षष्ठ्यां वापि रवेर्दिने ॥ १७ ॥ सप्तम्यां भानुयोगे वा श्राद्धं कृत्वा विधा
नतः ॥ मूलस्थानं रविं पश्येत्स गच्छेत्परमां गतिं ॥ १८ ॥ गुह्याद्गुह्यतरस्तत्र विशेषस्तु श्रुतो मया ॥ सभाग मेसु २९१

र्षीणां शंकरं शशिशेखरात् ॥ १९ ॥ यदा वै शुक्लसप्तम्यां मूलमादित्यवासरे ॥ तदा रेवाजले गत्वा स्नात्वा संतर्पयेद्दे
वताः ॥ २० ॥ पितॄंश्च भरतश्रेष्ठ दत्वा गां कांचनं नृप ॥ स्वशक्त्या करवीरैश्च गंधचंदनवारिणा ॥ २१ ॥ संस्नाप्य भा
स्करं भक्त्या संपूज्य च यथाविधि ॥ ततः सागरुधूपैश्च कंटकैर्विनिपातयेत् ॥ २२ ॥ धूपयेद्देवमादित्यं दीपान्प्र
ज्वाल्य सर्वतः ॥ उपोष्य जागरं कुर्याद्गीतवाद्यविनोदतः ॥ २३ ॥ एवं तत्ते महीपाल नभवेद्दुःख भाक्कचित् ॥ सूर्यलो
के वसेत्तावद्यावद्युगशतत्रयं ॥ २४ ॥ गंधर्वैरप्सरोभिश्च सेव्यमानो नरोत्तम ॥ स्नात्वा यः पूजयेत्सूर्यमुपोष्य
तु यथाविधि ॥ २५ ॥ यो ददाति हिरण्यादिदानानि मनुजो नृप ॥ तदनंतफलं तस्य यथैव कुरुजांगले ॥ २६ ॥
सोमसूर्यग्रहे पार्थ कुलानां शतमुद्धरेत् ॥ दानानि पात्रमुद्दिश्य येर्दत्तानि पुरा नृप ॥ २७ ॥ रवितीर्थे नरैर्भक्त्या ता
नि वांछयतां ययुः ॥ रवितीर्थे च दंपत्यं स्नापयित्वा विधानतः ॥ २८ ॥ समुपोष्य तु सप्तम्यां मूलस्थानं प्रपूज्य च ॥ रा
त्रौ जागरणं कृत्वा घृतेनो ज्वाल्य दीपकान् ॥ २९ ॥ अष्टम्यां प्रातरुत्थाय स्नानादि विधिमाचरेत् ॥ विप्रदंपत्यमभ्य
र्च्य विधिना कुरुनंदन ॥ ३० ॥ वस्त्राभरणतांबूलपुष्पगंधविलेपनैः ॥ अक्षये सूर्यलोके तौ मोदते चरितव्रतौ ॥
॥ ३१ ॥ यो भक्त्या शुक्लसप्तम्यां स्नात्वोपोष्यार्चयेद्रविं ॥ वेदशास्त्रविधानेन यः शक्त्या भोजनान् ॥ ३२ ॥ धर्मरजल्ल
तां पापानां स पश्यति यातनां ॥ सूर्यः संतुष्टिमाप्नोति सदेवाभ्यर्चितो यथा ॥ ३३ ॥ एतत्ते कथितं पार्थ मूलस्थाना
द्भुतं यथा ॥ तीर्थं तीर्थवरं नृणां श्रावणात्पठनादपि ॥ ३४ ॥ सर्वपापहरं नद्यं सर्वरोगहरं परं ॥ ३५ ॥ ॥ ॥
॥ इति श्रीरेवा० भृगुकच्छे मूलस्थानतीर्थं ॥ मार्कं० ॥ कठेश्वरं ततो गच्छेत्तीर्थं परमशोभनं ॥ चत्वारिंशत्तथा
क्षेत्र दंडानामंतरे स्थितं ॥ १ ॥ मूलस्थानान्महाराज भृगुक्षेत्रस्य मध्यतः ॥ यं नकस्यचिदाख्यानं तच्छृणुष्व
नृपोत्तम ॥ २ ॥ ब्रह्मपुत्रो महाप्राज्ञः कठो नाम महातपाः ॥ पुरातेन तपस्तप्तं सर्वतीर्थान्यनेकशः ॥ ३ ॥ भृगुक
च्छेपि च यथा तपस्तप्तं समागतः ॥ कठशाखाप्रवक्ता च वेदवेदांगपारगः ॥ ४ ॥ तस्मिंस्तीर्थे तपस्तप्त्वा दिव्यं

585
2008

रे० खं० दिव्यंवर्षशतंनृप॥ चेतः संयोज्य चशिवे शिवसायुज्यतां गतः॥५॥ ततः प्रभृति तत्तीर्थं कठेश्वरमितिश्रुतं॥ कठे
नः स्थापितः सर्वः सर्वपापप्रणाशनः॥६॥ तमाराध्य महाराज लभेच्छैवीं गतिं परां॥ तत्राष्टम्यां चतुर्दश्यां उपोष्य
२९२ प्रयतो वसेत्॥७॥ प्रभाते भोजयेद्विप्रान् पायसेर्मधुसर्पिषा॥ यतीन्पाशुपतान्भक्त्या भोजयेत्तु तमसरः॥८॥
तर्पयिच्चापि तं श्राद्धे भोजयित्वा द्विजोत्तमान्॥ तोषयेद्दक्षिणाभिश्च यथाशक्त्या द्विजोत्तमान्॥९॥ एवं कृते
महाराज पितॄणामनृणी भवेत्॥ सुवर्णं रजतं वापि वस्त्रधान्यकमंडलु॥१०॥ पादत्राणयुगं वापि दत्तं भव
ति चाक्षयं॥११॥ ॥इति श्रीभृगुकच्छे कठेश्वरतीर्थं०॥ ॥मार्कंडेय उवा०॥ ततो दंडशताधैर्वै न्यूनेन त्वायु
धिष्ठिर॥ अट्टहासेश्वरं नाम तीर्थं सर्वार्तिनाशनं॥१२॥ जमदग्नेः प्रपौत्रस्तु आजलिर्वेदपारगः॥ जडरू
पमुपाश्रित्य सर्वमंतीर्थांतराणि च॥१३॥ भृगूणां संगतं प्राप्य नर्मदातीरमागतः॥ तपश्चचार विपुलं नियतः
सुसमाहितः॥१४॥ एतस्मिन्नंतरे गौरी शिवं प्राह नभोगता॥ विप्रं दृष्ट्वा क्लिश्यमानं शिराधमनिसंततं॥१५॥
गौर्युवाच॥ देवदेव महेशान क्लिश्यते यद्द्विजोत्तमः॥ वरमस्मै प्रयच्छाशु कृपां कृत्वा ममोपरि॥१६॥ सत्यमुक्तं
महादेवि क्लिश्यतेतीव वाडवः॥ स्मयो महानस्य हृदि सिद्धिस्तेन न विद्यते॥१७॥ देव्युवाच॥ तथापि प्रार्थये दे
वप्रणम्य पदपंकजं॥ क्लेशं दैन्यं मनुप्राप्तं द्विजं दृष्ट्वा सुरेश्वर॥१८॥ विप्रं समुद्धरेद्दीनं वसनांतस्तु यो नरः
॥उद्धृताः पितरस्तेन कुलान्येकोनविंशतिः॥१९॥ ईश्वर उवाच॥ एवं भवतु देवेशि दास्येवं वचनात्तव॥ य
द्यप्यदेयमधुना चिरं विप्रस्य पार्वती॥२०॥ इत्युक्त्वो तीर्थं वृषभात् शंकरो विप्रमागतः॥ त्रिशूलखट्वांग
धरो जटाभारविभूषितः॥२१॥ गजचर्मपरीधानो मुंडमालाविभूषितः॥ शर्व उवा०॥ साधुभो ब्राह्मणश्रेष्ठ
तपस्ते दुश्चरं महत्॥२२॥ अलं क्लेशेन बहुना वरं वरय वांछितं॥ मार्कं०॥ इत्याकर्ण्य विभोर्वाक्यं जडतां
दर्शयन्द्विजः॥२३॥ मौनितां कृशतां बुद्धिं प्रथयन्नुसंत्यैव तं॥ हस्तनेत्रानुकंपयानवाचामाह किंचन॥२४॥ २९२

भ्रूहीब्रूहीति विधिना द्विजः प्रोक्तो मुहुर्मुहुः॥ मदानो वा च यद्वचसा संज्ञयैवाह पार्थिव॥२५॥ तदाट्टहासं परमं मुमो 587/2008
चभगवान् शिवः॥ पार्थ यस्याट्टहासेन त्रैलोक्यमपिपूरितं॥२६॥ दिवौदेवाः समाजग्मुस्तीर्थेभ्यो मुनयस्तदा
॥ग्रामेभ्यो नगरेभ्यश्च तूर्णं दुद्रुविरेजनाः॥२७॥ ततो विप्रः ससहसा चकितो धूर्जटेर्भयात्॥ विहाय गर्वं परमं
पुरश्चाप्य लुठद्द्विभोः॥२८॥ विप्र उ०॥ वंदे जगद्गुरुं सर्वं गर्वग्रंथिविनाशनं॥ अणीयसामणीयांसं महांतं मह
तामपि॥२९॥ चराचरस्य विश्वस्य हेतुभूतं नमाम्यहं॥ गुणातिगं गुणमयं निर्विशेषं सदव्ययं॥३०॥ मूढोहं
गर्वकलुषः शिवमाद्यं भजे महः॥ एकः शिवं परं धाम नान्यस्त्राता स्य विद्यते॥३१॥ सर्वदोषातिगः पातु पापान्मा
मयथा तथा॥ देवत्वयैव सृष्टोहमीदृक्शीलो महेश्वरः॥३२॥ दुःशीलं वा सुशीलं वा यथा सृष्टमवात्र मां॥ ईश्वर उ
वा०॥ मुने त्वं योगसिद्धोसि सिद्धिस्त्वत्समीपगा॥३३॥ किंतु गर्वार्गलारूढा न त्वामाप्नोति तां भवान्॥ अतो मया
ट्टहासेन भग्ना गर्वार्गला तव॥३४॥ वरं वरय विप्रेंद्र त्यक्तगर्वोसि हो सि मे॥ तुष्टोस्मि चान यास्त्वादास्याम्यपि
सुदुर्लभं॥३५॥ विप्र उवा०॥ प्राप्ता मयापरासिद्धिरट्टहासप्रसादतः॥ अट्टहासेश्वरो नाम्ना तस्मादत्र स्थिरो भव॥
॥३६॥ तीर्थेस्मिन्धूर्जटे देव कृपया पापनाशन॥ परमानंदसंपूर्णं त्वामिह स्थापयाम्यहं॥३७॥ वरदोसि महेशा
यदि मे त्वं दयानिधे॥ त्वयि भक्तिं परां देहि चिरं च प्रथमं कुरु॥३८॥ ततस्तन्महसा सार्धं त्वयं देहि त्रिलोचन॥ प्र
वेनभेदस्तु यथा तथापि च भमापि च॥३९॥ मार्कं०॥ तथेत्युक्त्वा महादेवस्तत्रैवांतरधीयत॥ ततः स जाजलि
र्विप्रः स्थापयित्वा महेश्वरं॥४०॥ अट्टहासेश्वरं नाम्ना सिद्धिं प्राप्तो गणोभवान्॥ शिवस्य परमानंदस्वरूपस्या
व्ययस्य तु॥४१॥ ततः प्रभृति तत्तीर्थमट्टहासेश्वरं स्मृतं॥ देवैश्च ऋषिभिः सिद्धैर्मनुजैश्चापि दुर्लभं॥४२॥
सर्वपापप्रशमनं सर्वोपद्रवनाशनं॥ तत्र तीर्थे नरः स्नात्वा तर्पयेत्पितृदेवताः॥४३॥ महेश्वरं समभ्यर्च्य सर्वपापैः
प्रमुच्यते॥ मृतवत्सा च या नारी वंध्या स्त्री जननी तथा॥४४॥ तत्र तीर्थे च सा स्नात्वा पुत्रमाप्नोति शोभनं॥ अष्ट

रे०खं० म्यां वा चतुर्दश्यां यः पश्येत्तत्र शंकरं ॥४५॥ स्नात्वा कुंभे मंत्रपूते नारी वा पुरुषोपि वा ॥ विधिप्रोक्तैः शुभैर्मंत्रैः शुचिर्भू
त्वा समाहितः ॥४६॥ स्नानं करोति यो भक्त्या स पुत्रान् लभते शुभान् ॥ श्राद्धे संतर्प्य च पितॄन् शक्त्या विप्रांश्च भोज
२९३ येत् ॥४७॥ सप्तधान्यानि च घृतं फलानि विविधानि च ॥ तिलपात्राणि शक्त्या दद्याच्छ्राद्धसमन्वितः ॥४८॥ एवं कृ
ते महातीर्थे सर्वकामान् अवाप्नुयात् ॥४९॥ ॥ इति श्रीरेवा० भृगुकच्छे अट्टहासेश्वरतीर्थं ॥ मार्कं० ॥ ॥ ततो गच्छे
न्नृपश्रेष्ठ ततो यात्वा युधिष्ठिर ॥ भूर्भुवेश्वरनामानं तीर्थं परमशोभनं ॥१॥ पुरा वर्षशतं साग्रं भृगुस्तत्र
समाहितः ॥ ध्यायन्देवं जगन्नाथं शिवं परमकारणं ॥२॥ आत्मनः परमं धाम रुद्रैकादशसंज्ञितं ॥ व्याहृतीः प्रण
वाद्याश्च ध्यायं धैर्यान्वितो भृगुः ॥३॥ ततो वर्षशतांते वै माघे कृष्णशिवाहनि ॥ स्नात्वा मंत्रपरो ध्यानं चकार
स यदा मुनिः ॥४॥ मध्यरात्रे महाराज मानसं प्रणवोद्भवं ॥ निर्घोषेणानि पूर्णानि पातालानि युधिष्ठिर ॥५॥
भूरिति ध्यानमात्रेण प्रचकंपे वसुंधरा ॥ भुवरित्यक्षरे ध्याते भुवं भित्त्वा रसातलः ॥६॥ उत्थितं परमं लिंगं स
निर्घोषं नृपांडव ॥ स्वरित्युच्चारणात्तद्वन्मानसाद्ध्वनिसंस्थितः ॥७॥ लिंगं गतो येन वै व्याप्ता लोकास्त्रयो वै च येन
ताः ॥ सहसा वीक्षितं लिंगं भृगुः परमशोभनं ॥८॥ स निर्घोषं परं व्याप्ताये न लोकाश्चतुर्दश ॥ तत उत्थाय स
मुनिः साष्टांगं प्रणतोभवत् ॥९॥ तस्मिन्प्रणमिति प्रीत्या तुतोष भगवान् शिवः ॥ साक्षान्मूर्तिस्ततो लिंगाद्
वाचोत्तमया गिरा ॥१०॥ महेश्वर उ० ॥ उत्तिष्ठोत्तिष्ठ विप्रेंद्र क्लेशेनालं मयि स्थिते ॥ वरं वरय शीघ्रं त्वं यत्ते मनसि
संस्थितं ॥११॥ भृगुरुवा० ॥ यदि तुष्टोसि देवेश यदि देयो वरो मम ॥ रुद्रतीर्थे सदा स्थेयं त्वयैकादशमूर्तिना
॥१२॥ व्याहृतिप्रणवोच्चाराद्यत्तेलिंगं समुत्थितं ॥ भूर्भुवेश्वरनाम्ना वै ख्यातं भवतु शंकर ॥१३॥ ब्रह्महा गुरुगो
हा गोघ्नस्तथैव गुरुतल्पगः ॥ पित्रोस्त्यागी स्वर्णहारस्तथैवागम्यागमनश्च यः ॥१४॥ अभक्ष्यभक्षको यश्च वृ
त्तियश्चात्मघातकः ॥ देवद्विजगुरुस्त्रीणां यश्च निंदाकरो नरः ॥१५॥ इत्यादिपापिनां पापं ज्ञाताज्ञातकृतं २९३

च यत् ॥ कौमारे यौवने मध्ये वार्धिके वापि संज्ञितं ॥१६॥ तत्क्षणं क्षयतु वै क्षिप्रं सम स्तंभ भूर्भुवेश्वरे ॥ न व्याधि
र्न च दारिद्र्यं न चैवेष्टवियोजनं ॥१७॥ जायते सप्तजन्मानि तीर्थेस्मिन्सत्तमाकुरु ॥ अष्टम्यां वा चतुर्द
श्यां ज्येष्ठे मासि विशेषतः ॥१८॥ उपोषितः शिवं पूज्य अश्वमेधफलं लभेत् ॥ तत्र तीर्थे नरः स्नात्वा शिवं
पंचामृतैः शुभैः ॥१९॥ स्नापयित्वा शुभैर्गंधैश्चंदनेनानुलेपयेत् ॥ पुष्पैः फलैश्च तांबूलैर्नीराजननिवेद
नैः ॥२०॥ प्रदक्षिणान्नमस्कारैर्ध्रुवं फलमवाप्नुयात् ॥ नर्मदासलिलं पुण्यं सर्वपातकनाशनं ॥२१॥
निरीक्षितं विशेषेण भृगुणा भूर्भुवेश्वरं ॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितं ॥२२॥ स्नात्वापि
श्यंति ये देवं रेवायां भूर्भुवेश्वरं ॥२३॥ ॥ इति श्री रे० भृगुकच्छे भूर्भुवेश्वरतीर्थं ॥ मार्कं० ॥ शूलेश्व
रं ततो गच्छेच्चत्वारिंशत्क्रमांतरे ॥ अष्टाधिकेन श्रेष्ठं तीर्थं सर्वोत्तमं महत् ॥२४॥ पंचायतनमध्ये तु तिष्ठते
परमेश्वरः ॥ शूलपाणिर्महादेवः सर्वदेवैर्न पूजितः ॥२५॥ स संगमे भद्रकाल्या निसंगोर्या निषेवितः ॥ द
र्शनात्तस्य देवस्य स्नानदानाद्विशेषतः ॥२६॥ दौर्भाग्यं दुर्निमित्तं च अभिशापापरोग्रहः ॥ यदन्यद्दुष्कृतं क
र्म नश्येत्तच्छंकरोब्रवीत् ॥२७॥ युधिष्ठिर उ० ॥ कथं शूलेश्वरी देवी कथं शूलेश्वरः शिवः ॥ एवं नामा स्थितः
स्तीर्थे विस्तरादिह मे वद ॥२८॥ मार्कं० ॥ बभूव ब्राह्मणः कश्चिन्मांडव्य इति विश्रुतः ॥ धृतिमान् सर्वधर्मज्ञः
सत्ये तपसि चोत्थितः ॥२९॥ अथाश्रमपदद्वारि वृक्षमूले महातपाः ॥ ऊर्ध्वबाहुर्महातेजास्तस्थौ मौनव्रतान्
न्विताः ॥३०॥ तस्य काले न महता तस्मिंस्तपसि च स्थिते ॥ तमाश्रममनुप्राप्ता दस्यवो गुप्तहारिणः ॥३१॥
अनुसर्पमाणा बहुभिर्ग्रामरक्षिभिरादरात् ॥ ते च तस्याश्रमे नेष्टं निदधुः कुरुनंदन ॥३२॥ निदधाय भ
याल्लीनास्तत्रैवाश्रममंडले ॥ तावत्तायुगपच्छीघ्रं प्राप्ता ग्रामस्य रक्षिणः ॥३३॥ आगतास्तत्र चापश्यं स्तमृषिं
तस्करान्वितं ॥ तमपृच्छंस्तथा वृत्तं रक्षिणस्ते तपोधनं ॥३४॥ किमन्येन यथा याता दस्यवो द्विजसत्त

584/2008

म॥ तेन गच्छामहे ब्रह्मन् यथा शीघ्रं वदस्व नः॥ ३५॥ मार्कं०॥ तथातु रक्षिणां तेषां पृच्छतां वै तपोधन॥ न
किंचिद्वचनं राजन् नवा दीत्सा ध्यसाधुवा॥ ३६॥ ततस्ते राजपुरुषा विविश्वस्तं तमाश्रमं॥ ददृशुस्तत्र तद्द्रव्यं
 चौराहृतं नास्तदंतिके॥ ३७॥ ततः शंकासमापन्ना रक्षिणां तमृषिं प्रति॥ समभ्येनं च तान् दस्यून् नीत्वा राज्ञे न्यवेद
यन्॥ ३८॥ नृपस्तेरुक्तमाकर्ण्य रक्षिभिः कुपितोऽब्रवीत्॥ मुख्योयः सर्वचौराणां शूलमारोप्य तां श्वसन्॥ ३९॥
चौराः सर्वेपि बध्यंतां रतिमत्यां स्तस्मादिक्रमान्॥ यतिभ्यः कांचनं दत्वा तांबूलं ब्रह्मचारिणां॥ ४०॥ चौराणाम
भयं दत्वा दातापितरं कं व्रजेत्॥ मार्कं०॥ राजादिष्टास्ततस्तेनं नीत्वा दस्यून् निर्गतः॥ ४१॥ ततस्ते शूलमारो
प्य तं मुनिं रक्षिणस्तदा॥ प्रतिजग्मुर्महीपालं द्रव्यं तस्मै न्यवेदयन्॥ ४२॥ शूलस्थः सत्वधर्मात्मा कालेन म
हतातत॥ ध्यायं देवं त्रिलोकेशं शंकरं सोभमादरात्॥ ४३॥ पुरापि च विशेषेण शूलारोपक्षणादितः॥ अ
हर्निशं चिरं कालं मृत्युंजयमनेश्वरं॥ ४४॥ आहारनिद्रारहितो मरणं नाभ्युपागमात्॥ ध्रीयमाणं च तं विप्रम
षयः समुपागमन्॥ ४५॥ शूलाग्रे तप्यमानं तं माहात्मानं भवेक्ष्य च॥ संतापं परमं जग्मुर्मुनय स्ते परंतप॥
॥ ४६॥ सर्वतः पक्षिणो भूत्वा सम वर्त्तंत भारत॥ स्वशक्तिं दर्शयंतश्च तच्छीलं दृष्टुमीश्वरः॥ ४७॥ सपयः पक्षि
भूत्वास्ते तमपृच्छन् द्विजोत्तमं॥ विप्रा ऊचुः॥ श्रोतुमिच्छामहे ब्रह्मन् किं पापं कृतवानसि॥ ४८॥ येन राजानवद्ध
त्वा मिहेवं कृतागमं॥ ततः समुनिशार्दूलस्तानुवाच तपोधनात्॥ ४९॥ दोषतः किं गमिष्यामि यन्मां एकृतस
मा:॥ विषमे कर्मगहने नहि मेन्यः पराध्यति॥ ५०॥ एवमुक्तास्तत स्तेन तदा गत्वानि जाश्रमात्॥ द्वितीयोद्भूत
तोगत्वा मुनयोन्नपमब्रुवन्॥ ५१॥ राजा च तमृषिं श्रुत्वा निःक्रांत सहबंधुभिः॥ प्रसादयामास तदा शूलस्थ
मृषिसत्तमं॥ ५२॥ राजोवा०॥ यन्मयोपार्जितं पापमज्ञाना सषिसत्तम॥ प्रसादये त्वां तत्राहं नमे त्वं क्रोद्धु
मर्हसि॥ ५३॥ मार्कं०॥ एवमुक्तस्ततो राज्ञा प्रसादमकरोन्मुनिः॥ मांडव्यस्तपतां श्रेष्ठः सदा दष्टपरावरः॥ २९४

॥ ५४॥ कृतप्रसादं राजानमवतारपि भुध्रुतः॥ अवतार्य मानस्तु मुनी शूले सत्वमां गते॥ ५५॥ अतीव पीडित स्तद्ध 591/2008
छंकरं मनसागतः॥ सध्यातः शंकरस्तेन बटुकाकाधिवासितः॥ ५६॥ प्रादुर्भूतो महादेवः शूलभूलव्यथापहः॥
शूलमूल स्थितः शर्वो लिंगरूपो गिरा वदत्॥ ५७॥ ब्रूहि किं क्रीयतां विप्र शूलस्थेन स्मृतोस्मि यत्॥ सत्वरस्थाम
त्सरोयस्मात्तस्माद्वरय वांछितं॥ ५८॥ अदेयमपि दास्यामि तुष्टस्तेद्यो मयासह॥ कथं सत्ववतां लोके सिद्धिर्यस्मा
द्वरीयसि॥ ५९॥ स्वस्वकर्मानुरूपं हि फलं भुंजंति जंतवः॥ शुभेन कर्मणा प्राप्तिमशुभे नाशुभं नृप॥ ६०॥ बहुभे
द प्रभिन्नं तु मानुषेषु विपच्यते॥ केचिद्दारिद्र्यभावेन केचिद्धनविपत्तितः॥ ६१॥ संतत्यभावतः केचित्केचिच्चि
त्तविपर्ययात्॥ अविधेयप्रवृत्त्या च असत्संगः पतस्परे॥ ६२॥ प्रियापुत्रसुहृन्मित्रवियोगेन तरेतथा॥ राजचौ
राग्नितः केचिल्लभंते दुःखमंजसा॥ ६३॥ केचिल्लभंते शारीरं ज्वरादि व्याधिजं महत्॥ लभंते मानके केचित्पूर्वो
त्कृष्टविपत्तिजं॥ ६४॥ केचित्तथानिशापाश्च पूर्वकर्मा नियोजितं॥ कष्टात्कष्टतरावस्थां दृश्यंते चाप्यनागसः॥ ६५॥
सुखसंश्लेषबहुलाः केचिच्चाप्यपराधिनः॥ पूर्वकर्माविपाकेन स्वधर्मे तपसि स्थिताः॥ ६६॥ दांताः स्वधर्मनिरताः
भूरिदाः सुरपूजकाः॥ श्रीमंतो नयसंयुक्ता विविधैः सद्गुणैर्युताः॥ ६७॥ दुःखमाप्याप्यदं प्राप्य निजकर्मविपाकजां
॥ न चिंतयत्याहं नयंतीह धर्मनिंदां न कुर्वते॥ ६८॥ दृढमेव तपोमत्वा क्षिपंति शुचिचेतसः॥ हा भ्रातः पुत्र तातेति क
ष्टपुनर्वदंति ये॥ ६९॥ स्मरंति मां महेशान मुमां वा पुष्करेक्षणां॥ दुःकृतं पूर्वजन्मोत्थं मोक्ष्यमिति निश्चिताः॥ ७०॥
दिनानि यावंति च सेन्दुकष्टव्यथां विनाचिंतयदेवमीशं॥ तावंति सौम्याकृतानि तेन न मे वांति विप्रश्रुतिनोदनेषा॥
॥ ७१॥ यस्मात्त्वया काष्टगतेन नित्यं स्मृतः स्मृतः पूजितश्चेतसा च॥ गौरीसहायोहमिहस्मितस्ते ब्रूह्यद्य यत्किंस्व
वरदोस्मि विप्र॥ ७२॥ मांडव्य उ०॥ तुष्टोयदि मया सार्द्धं वरदोमे सि शंकर॥ तन्मे शूलाग्रसंस्थाप्य संशयं परमं
वद॥ ७३॥ पी उ॥ कांचिन्नजाते हमूलरुहमयिमत्तनौ॥ अमृतस्रावबद्धूलं प्रभावात्कस्य शंसमे॥ ७४॥ शूल

रे०खं० पाणिरुवाच ॥ शूलस्थानं यदा विप्र मनसा चिंतितो मया ॥ आभयार्त्तिनिहंता च कलापीडानिबर्हणं ॥ ७५ ॥ ध्यातमात्रो
ह्यहं विप्र पातालं व्याप्य संस्थितः ॥ शूलमूले तदा रम्ये देवी शूलाग्र संस्थिता ॥ ७६ ॥ सर्वकष्टहरा दुर्गा जगन्माता विवि
२९५ कात् द्विज ॥ कृपया मयि संतुष्टे शूलं चक्रं सुधामयं ॥ ७७ ॥ मार्कंडेय उ० ॥ पूर्वमेव स्थितो यस्माच्छूलं व्याप्योमया सह ॥ प्रसा
दप्रवणो भेद्यद्रदानीं शिवया सह ॥ ७८ ॥ स्वयंभूर्पुर्व शूले त्र्यागौर्या सौभाग्यया सह ॥ सौभाग्य सुंदरी नाम्ना तथा शू
लेश्वरीति च ॥ ७९ ॥ यस्याः संस्मरणादेव दौर्भाग्यं प्रलयं व्रजेत ॥ न दौर्भाग्यात्परं लोके दुःखं दुःखांतकप्रभो ॥
॥ ८० ॥ किलैवं श्रूयते गाथा पुराणेषु जगत्पते ॥ त्रैलोक्यं दहतस्तस्य सौभाग्यं त्वेकतां गतं ॥ ८१ ॥ विष्णोर्वक्षःस्थ
लं प्राप्य तत्स्थितं चेति नः श्रुतं ॥ पीतं तद्दक्षसस्तद्वै दक्षेण परमेष्ठिना ॥ ८२ ॥ तस्मात्सतीति संजाता येयमीं
दिवरेक्षणा ॥ ८३ ॥ दक्षस्य यजतो देव तवमानविखंडनात ॥ ८३ ॥ जुहाव ग्नौ च सा देवी आत्मानं प्रणसंज्ञकं ॥
सात्मानं भस्मसात्कृत्वा प्रालेयाद्रेः स्ततः सुता ॥ मेनकायां प्रभो जाता सांप्रतं या उमा स्मृता ॥ योगिन्यां योगिनी
देवी अप्रतर्क्या सुरेश्वरी ॥ ८५ ॥ अनादिनिधना शक्तिरिति मे श्रुतमादितः ॥ यदि तुष्टोसि देवेश देवी मे वर
दायदा ॥ ८६ ॥ उमा वय्यत्र संस्थो चेद धश्शूलाग्रभूलयोः ॥ अवतारो यथात्र स्यात स्थितिरेकत्र तत्कुरु ॥ ८७ ॥
मार्कं० ॥ तेनैवमुक्तः सहसा कृत्वा भूमंडलं द्विधा ॥ निःसृतो शूलमूलातो लिंगार्चा प्रतिरूपिणो ॥ ८८ ॥ प्रद्यो
तयन्दिशः सर्वा मूले शूलस्य दृश्यते ॥ वामतः प्रतिमा देव्या साक्षाच्छूलेश्वरीति या ॥ ८९ ॥ लोभयंति जगद्भाभिः
पूरयंती दिशस्तथा ॥ सतीवीक्ष्या जलिं बध्वा स्तौति देव्यास्तदा करोत ॥ ९० ॥ मार्कंडेय उ० ॥ त्वमस्य जगतो मा
ता जगत्सौभाग्य देवता ॥ न त्वया रहितं किंचिद्ब्रह्मांडे स्ति चराचरे ॥ ९१ ॥ प्रसादं कुरु मे मातर्मे भक्तं त्रातुमिच्छतः
॥ ईदृशेनैव रूपेण केषु केषु वतिष्ठति ॥ ९२ ॥ स्थानेषु वरदा भूत्वा वदतानि महेश्वरी ॥ श्रीदेव्युवा० ॥ सर्वदा स
र्वभूतेषु द्रष्टव्या सर्वतो द्विज ॥ ९३ ॥ सर्वकालेषु यत्किंचिद्रहितं न मया द्विज ॥ तथापि येषु स्थानेषु द्रष्टव्यासि २९५

४ द्विमी मुमिः ॥ ९४ ॥ स्मार्त्तव्या भूतिकालेस्मत्तानि वक्षामि तत्वतः ॥ वाराणस्यां विशालाक्षी नैमिषे रूपधारि
णी ॥ ९५ ॥ प्रयागे ललितादेवी कामुका गंधमादने ॥ मानसे कुमुदा नाम विश्वकाया तथांबरे ॥ ९६ ॥ गोमंते गो
मती नाम मंदरे कामचारिणी ॥ मदोत्कटा चैत्ररथे जयंती हस्तिनापुरे ॥ ९७ ॥ कान्यकुब्जे तथा गौरी रंभा मलयप
र्वते ॥ एकाम्रके कीर्त्तिमती विश्वा विश्वे रतथा ॥ ९८ ॥ पुष्करे पुरुहूता च केदारे मार्गदायिनी ॥ नंदा हिमवतः पृष्ठे
गोकर्णे भद्रकर्णिका ॥ ९९ ॥ स्थानेश्वरे भवानी च बिल्वके बिल्वपत्रिका ॥ श्रीशैले माधवी नाम भद्रे भद्रेश्वरी त
था ॥ १०० ॥ जयावराहशैले च कमला कमलालये ॥ रुद्रकोट्यां तु रुद्राणी काली कालंजरे तथा ॥ १०१ ॥ महालिंगे
च कपिला मुकुटे मुकुटेश्वरी ॥ शालग्रामे महादेवी शिवलिंगे जलप्रिया ॥ १०२ ॥ मायापुर्यां कुमारी च संताने ल
लिता तथा ॥ उत्पलाक्षे सहस्राक्षी हिरण्याक्षे महोत्पला ॥ १०३ ॥ गंगायां मंगला नाम विपुला पुरुषोत्तमे ॥ विपा
सायाममोघाक्षी पाटला पुंड्रवर्द्धने ॥ १०४ ॥ नारायणी सुपार्श्वे च त्रिकुटे भद्रसुंदरी ॥ विपुले विपुला नाम कल्याणी
कमलाचले ॥ १०५ ॥ कोटवी कोटतीर्थे च सुगंधा मगधाचले ॥ गोदाश्रमे त्रिसंधा च गंगाद्वारे हरिप्रिया ॥ १०६ ॥
शिवचंडे सभा चंद्रा नंदिनी देविकातटे ॥ रुक्मिणी द्वारवत्यां च राधा वृंदावने मता ॥ १०७ ॥ देवकी मथुरायां च पा
ताले परमेश्वरी ॥ चित्रकूटे तथा सीता विंध्ये विंध्यवासिनी ॥ १०८ ॥ सह्याद्रावेकवीरा च हरिश्चंद्रे तु चंडिका
॥ रमणा रामतीर्थे च यमुनायां मृगावती ॥ १०९ ॥ करवीरे महालक्ष्मी रुमा देवी विनायके ॥ आरोग्या वैद्यनाथे च
महाकाले महेश्वरी ॥ ११० ॥ अभया पुण्यतीर्थे च अमृता नर्मदातटे ॥ मांडव्ये मंडुका नाम स्वाहा माहेश्वरेश्वरे
॥ १११ ॥ छागलिंगे प्रचंडा च चंडिकामरकंटके ॥ सोमे सोमेश्वरा रोहा प्रभासे पुष्करावती ॥ वेदनामा सरस्वत्यां
पाशपरतटे मता ॥ महालये महाभागा पयोष्ण्यां पिंगलेश्वरी ॥ ११३ ॥ सिंहिका स्कतशौचे च कार्त्तिके चैव शंक
री ॥ उत्पलावर्त्तके लोका सुभद्रा सेनसंगमे ॥ ११४ ॥ माता सिद्धवने लक्ष्मीस्तरंगा भरताश्रमे ॥ जालंधरे

593/2008

विश्वमुखी तारा किष्किंधापर्वते ॥ ११५ ॥ देवदारुवने पुष्टिर्मेधा काश्मीरमंडले ॥ भीमादेवी हिमाद्रौ च तुष्टिर्वस्त्रेश्व
रीतथा ॥ ११६ ॥ कपालमोचने सिद्धिर्मायाकायावरोहणे ॥ शंखोद्धारे धृतिर्नाम धृतिः पिंडारके तथा ॥ ११७ ॥ कला चंद्र
भागायां अच्छोदे सिंधुचारिणी ॥ वेण्यां चाप्यमृता नाम बदर्यामुर्वशी तथा ॥ ११८ ॥ ओषधी चोत्तरकुरौ कुशद्वीपे
किशोरिका ॥ मन्मथा हेमकूटे च कुमुदे सत्यवादिनी ॥ ११९ ॥ अश्वत्थे वंदिनी नाम निधिर्वैश्रवणालये ॥ गाय
त्री ब्रह्मसदने पार्वती त्विशसंनिधौ ॥ १२० ॥ देवलोके तथेंद्राणी ब्रह्मास्येषु सरस्वती ॥ सूर्यबिंबे प्रभा नाम मा
तॄणां वैष्णवी मता ॥ १२१ ॥ अरुंधती सतीनां तु रंभा सु चाप्सरोत्तमा ॥ चित्ते ब्रह्मकला नाम शक्तिः सर्वशरीरिषु ॥
॥ १२२ ॥ शूलेश्वरी भृगुक्षेत्रे फल्गौ सौभाग्यसुंदरी ॥ एतदुद्देशतः पूर्वं नामाष्टशतमुत्तमं ॥ १२३ ॥ अष्टोत्तरं च
तीर्थानां शतमेतदुदाहृतं ॥ इमम् अष्टोत्तरशतं यो नाम्नां मम संस्मरेत् ॥ १२४ ॥ मुच्यते स नरः पापैः प्राप्नोति च म
शोभितान् ॥ स्नात्वा नारी तृतीयायां मम पश्यंश्च भक्तितः ॥ दुःखदौर्भाग्यमुक्ता सा मत्प्रसादाद्भवेद्द्विजा ॥ नित्यं
मद्दर्शने नारी नियता या भविष्यति ॥ १२६ ॥ पतिपुत्रभवं दुःखं न सा प्राप्स्यति कर्हिचित् ॥ ममालये च या नारी तुला
पुरुषसंज्ञकं ॥ १२७ ॥ दद्यात्संपूज्य देवांश्च लोकपालान्सवह्निकान् ॥ सपत्नीकान्द्विजान्वस्त्रवासोभिर्भूष
णैस्तथा ॥ १२८ ॥ भूतेभ्यश्च बलिं दत्वा ऋत्विग्भ्यो धूपश्च तोषयेत् ॥ ततः प्रदक्षिणां कृत्वा तुलामित्यभिमंत्रयेत्
॥ १२९ ॥ सुचिरं रुचिरं धराग्रहीत्वा कुसुमांजलिं ॥ नमस्ते सर्वभूतानां शक्तिस्त्वं परमास्थिता ॥ १३० ॥ साक्षि
भूता जगद्धात्री निर्मिता विश्वयोनिना ॥ त्वं तुले सर्वभूतानां प्रमाणमिह कीर्तिता ॥ १३१ ॥ मां तोलयंती संसा
राद्दुःखनमोस्तुते ॥ एवं पुष्पांजलिं क्षिप्त्वा ततः पुण्याहवाचनैः ॥ १३२ ॥ पुनः प्रदक्षिणीकृत्य तां तुलामा
रुहेद्दथा ॥ उत्संगे प्रतिमां कृत्वा शांकरीं हेमनिर्मितां ॥ १३३ ॥ करांभ्यां बद्धमुष्टिभ्यां आस्ते पश्यने मां मुखं ॥ तत
स्तुलापरे भागे न्यसेयुर्द्विजपुंगवाः ॥ १३४ ॥ द्रव्यमष्टविधं आत्मवित्तानुसारतः ॥ भद्रंशभूतं विप्रेंद्र यस्याधि २९६

यामधिष्ठितं ॥ १३५ ॥ स्वर्णं सितं निष्पावा तथा जातिकुसुंभकं ॥ तिललाजेक्षुलवणं कुंकुमं च तथाष्टमं ॥ १३६ ॥
एषामेकतमं कृत्वा यथावित्तानुसारतः ॥ साम्याद्यधिकं यावत्कांचनादि भवेद्द्विज ॥ १३७ ॥ तावत्तिष्ठेन्नरो नारी
पश्चादिदमुदीरयेत् ॥ नमो नमस्ते ललिते तुलापुरुषसंज्ञिते ॥ १३८ ॥ त्वमुमे तारयस्वास्मान्संसाराब्धेः सुदु
स्तरात् ॥ ततोवतीर्य गुरवे पूर्वमर्धं न्यवेदयेत् ॥ १३९ ॥ ऋत्विग्भ्योपरमर्धं च दद्यादुदकपूर्वकं ॥ तेभ्योदत्वा ततो
न्येभ्यो दद्याद्दानं द्विजोत्तम ॥ १४० ॥ सपत्नीकं गुरुं रक्तवाससी परिधापयेत् ॥ अन्यांश्च ऋत्विजो राजन् रत्नमुद्रिके
पूरमंडकैः ॥ शुक्लां क्षीरिणीं दद्याद्दुलिता प्रीयतामिति ॥ एवं विधानं या नारी कुर्याद्द्विज ममालये ॥ १४२ ॥ मत्तु
ल्या सा भवेल्लोके लक्ष्मीवद्बहुचर्चिता भवेत् ॥ सावित्रीव सदाचारे जन्मानि दशपंच च ॥ १४३ ॥ मार्कं० ॥ एवं निश
म्य वचनं गौर्या द्विजवरस्तदा ॥ नमस्कृत्य जगामाशु धर्मराजनिवेशनं ॥ १४४ ॥ तदा प्रभृति तत्तीर्थं ख्यातं शू
लेश्वरीति च ॥ तस्मिंस्तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ १४५ ॥ ब्राह्मणांश्चान्नवासोभिः पिंडैः पितृपिताम
हान् ॥ भक्ष्यैपहारैर्दैनैः शंभुमथा सहस्रांकरं ॥ १४६ ॥ धूपगुग्गुलगंधैश्च दीपनीराजनादिभिः ॥ सर्वपापविनिर्मु
क्तः स गच्छेच्छिवसाम्यतां ॥ १४७ ॥ तस्मिंस्तीर्थे तु यः कश्चिदभियुक्तो नरेश्वर ॥ कृष्णपक्षे चतुर्दश्यां रात्रिं जा
गर्तिं पूरयन् ॥ १४८ ॥ उपवासपरः शुद्धः शिवप्रयतमानसः ॥ सर्वपापविनिर्मुक्तो रुद्रलोकं स गच्छति ॥ १४९ ॥
॥ इति श्रीरे०खं० भृगुकच्छे शूलेश्वरतीर्थं ॥ मार्कं० ॥ ॥ ततः सरस्वतीतीर्थं च त्वारिंशत्क्रमांतरे ॥ विख्यातं त्रि
षु लोकेषु तीर्थं पुण्यं युधिष्ठिर ॥ १ ॥ युधिष्ठिर उवा० ॥ तस्य तीर्थस्य माहात्म्यं श्रोतुमिच्छामि तत्वतः ॥ कारणं
च मुनिश्रेष्ठ कृपया वद मेखिलं ॥ २ ॥ कथं जातं कदा विप्र तीर्थं सारस्वतं महत् ॥ मार्कं० ॥ सरस्वतीपुराणार्थ
स्य ताविद्यार्थिभूसुरैः ॥ ३ ॥ स्तोतुं महेश्वरं देवं वाचस्पतिसमन्वितैः ॥ तपश्च चार विपुलं नर्मदातटमाश्रि
तः ॥ ४ ॥ विद्यार्थिनो हितार्थाय सस्मार यमुनां तदा ॥ दातुं दिव्यां पृथग्वाचं शिष्याक्षरसमन्वितं ॥ ५ ॥ छंदोनि

595
2008

रे० खं० रुक्मयुक्तांश्च सर्वज्ञे भप्रतोषिणी ॥ कालिंदीसंगमस्तत्र नर्मदायास्तटे शुभे ॥ ६ ॥ रेवाया उत्तरे कूले कालिंदी यत्र
तिष्ठति ॥ सरस्वतीं विजानीहि तत्र पार्थ वरप्रदां ॥ ७ ॥ तत्र स्नात्वा नरो भक्त्या ब्रह्महत्यां व्यपोहति ॥ अष्टम्यां वा चतु
२९७ र्दश्यां शुक्लपक्षस्य पंचम्यां ॥ ८ ॥ उपोष्याहर्निशं पार्थ पिंडं दद्याद्विधानतः ॥ ब्राह्मणान्भोजयेत्तत्र यथावित्तानु
सारतः ॥ ९ ॥ तत्सर्वमक्षयं प्रोक्तं तत्र तीर्थे युधिष्ठिर ॥ तृतीया पंचमी चैव दशमी च त्रयोदशी ॥ १० ॥ अमावा
स्या च ता स्तत्र पिंडं दद्याद्युधिष्ठिर ॥ अनिंद्यान्पूजयेद्विप्रान्यथावित्तानुसारतः ॥ ११ ॥ तत्र तीर्थे च यः स्नात्वा पू
जयेद्वै सरस्वतीं ॥ अर्घ्यं दत्त्वा विधानेन स याति परमां गतिं ॥ १२ ॥ प्रातः स्नात्वा च यस्तत्र संध्योपासनमाचरेत् ॥
अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति वै द्विजः ॥ १३ ॥ पिंडान्दद्यात्सयत्नाद्यः सदा पर्वणि पर्वणि ॥ तावद्युगसह
स्राणि पितृणामन्नदो भवेत् ॥ १४ ॥ स्वर्गार्थी लभते स्वर्गं धनार्थी लभते धनं ॥ पुत्रार्थी लभते पुत्रान् मोक्षा
र्थी मोक्षमाप्नुयात् ॥ १५ ॥ सुखार्थी लभते सौख्यं ऐश्वर्यं च तदीप्सितं ॥ सर्वपापहरं तीर्थं नात्र कार्या विचारणा
॥ १६ ॥ न शोको विद्यते तस्य यः पश्यति सरस्वतीं ॥ देवानामपि शोकघ्नीं विद्यादां तां युधिष्ठिर ॥ १७ ॥ विद्यादा
नं प्रयच्छंति तत्र ये नृपसत्तम ॥ तेषामनंतविद्याप्तिः सत्यलोकश्च शाश्वतः ॥ १८ ॥ यद्दत्तं तद्दत्तं वापि स्वल्पं
वा यदि वा बहु ॥ असंख्यं जायते पार्थ दत्तं विप्राय शक्तितः ॥ १९ ॥ देवानां वरदानानि तीर्थस्यास्य युधिष्ठिर ॥ व
रो वाग्देवताया अस्तीर्थं तेन महात्मना ॥ २० ॥ नारी वा पुरुषो वापि मूको वा बधिरस्तथा ॥ सर्वान्कामानवाप्नोति
त्येवाभहपुराविधिः ॥ २१ ॥ इत्येतत्कथितं पार्थ यत्त्वया परिपृच्छितं ॥ २२ ॥ ॥ इति श्रीरेवामा० भगोसरस्व
तितीर्थं ॥ मार्कं० ॥ ततो गच्छेन्महाराज दारुकेश्वरसंज्ञितं ॥ पूर्वोक्तेन प्रमाणेन तीर्थं परमशोभनं ॥ २३ ॥
हिताय सर्वजंतूनां मुनिभिः सेवितं यथा ॥ अमृतं परमं लिंगं सर्वपापप्रणाशनं ॥ २४ ॥ यन्नेकस्य चिदाख्या
तं तदाकर्णय भारत ॥ यो वै श्रीकृष्णदेवस्य सारथिः सचिवो महान् ॥ २५ ॥ स तत्सारथ्यलाभाय चचार वि २९७

पुलं तपः ॥ पुरा वर्षाण्यनेकानि जीर्णपर्णजलाशनः ॥ योगमष्टांगमासाद्य शिवं ध्यायन् शिवं जपन् ॥ रेवाया उत्तरे कूले 597 / 2008
प्रभोः प्रीत्यै युधिष्ठिर ॥ २७ ॥ स्थानवीरासनाभ्यां च काष्ठवन्निर्विचेष्टितः ॥ ततश्च बहुवर्षांते निर्विकल्पात्मचेत
सः ॥ २८ ॥ प्रादुर्भूतं महल्लिंगं पुरस्तस्याति दीप्तिमत् ॥ तस्मिंस्साक्षात्स्वयं शंभुरुवाच वरदोऽस्मि ते ॥ २९ ॥ विचिंतितं
ते मनसः सर्वं दास्ये वद द्रुतं ॥ दारुक उवा० ॥ यदि प्रसन्नो देवेश वरं दास्यसि चेन्मम ॥ ३० ॥ सारथ्यं देहि मे विष्णोर
वतीर्णस्य भूतले ॥ इहाष्टमावतारस्य धर्मसंस्थितिहेतवे ॥ ३१ ॥ याद्यादिपुरुषो नाम अच्युतो विश्वपावकः ॥ गु
णाश्च शक्तयस्तस्मिं सिद्धयश्च तथोदयाः ॥ ३२ ॥ निर्गुणो गुणितां प्राप्तस्त्वव्यक्तो व्यक्ततां गतः ॥ सेवितुं तज्जग
द्योनिं सारथ्येनैव सेवितुं ॥ ३३ ॥ वांछामि गिरिजाकांत तथा शर्व प्रसीद मे ॥ स्मरणात्कृष्णदेवस्य पूजनं तत्त्व
धूर्जटे ॥ ३४ ॥ स्तुतिं देव्यानतिं मानोः कृत्वा कामानवाप्नुयात् ॥ मार्कं० ॥ एवं तदुक्तवचना तथेत्युक्त्वा महेश्वरः
॥ ३५ ॥ पुनर्लिंगे नलीनोऽभूत्तत्रैव भरतर्षभः ॥ शिवस्य वरदानेन दारुकः सर्वमाप्तवान् ॥ ३६ ॥ सारथ्यं सं
गतं विष्णोस्तज्ज्ञानं च गणाग्रतां ॥ तस्य नाम्ना च तल्लिंगं तीर्थं चाभवदुत्तमं ॥ ३७ ॥ तत्र तीर्थे नरः स्नात्वा तर्पये
त्पितृदेवताः ॥ पूजयेदीश्वरं भक्त्या कपिलां यः प्रयच्छति ॥ ३८ ॥ सर्वेषामेव दानानां कपिलादानमुत्तमं ॥ शिवेन
कथितं पूर्वं स पिदे वसभागमे ॥ ३९ ॥ सद्यः प्रसूतां कपिलां सोपहारां च शोभनां ॥ सोपवासो जितक्रोधो यो
ददाति विधानतः ॥ ४० ॥ ससमुद्रगुहांतेन सशैलवनकानना ॥ तत्र दत्ता सुतीर्थे स्यात्पृथिवी नात्र संशयः ॥
॥ ४१ ॥ वाचिकं मानसं पापं कर्मजं यत्पुराकृतं ॥ नश्यते हैक कपिलां दत्त्वा सप्तजन्मार्जितं नृप ॥ ४२ ॥ भूमिधान्या
दिहस्त्यश्वकनकाद्रिभुखानि च ॥ कपिलाधेनुदानस्य कलां नार्हंति षोडशीं ॥ ४३ ॥ चं दारुतीर्थे च यः स्ना
त्वा पूजयेत्परमेश्वरं ॥ पंचामृतेन संस्नाप्य सुगंधैश्च विलेपयेत् ॥ ४४ ॥ अष्टम्यां च चतुर्दश्यां नारी वा पुरुषो
पि वा ॥ अहोरात्रोषितो भूत्वा पूजयेद्दारुकेश्वरं ॥ ४५ ॥ ततः प्रदक्षिणीकृत्य प्रणिपत्य क्षमापयेत् ॥ अनेन वि

रे०खं० अनेन विधिना पार्थ तुष्यते परमेश्वरः ॥ ४६ ॥ रात्रौ जागरणं कृत्वा सर्वपापैः प्रमुच्यते ॥ प्रभाते विमले स्ना
त्वा तर्पयेत्पितृदेवताः ॥ ४७ ॥ दानं दद्याद्यथाशक्ति विप्रेभ्यः पांडुनंदन ॥ आगत्य च पुनर्भक्त्या पूजयेद्दारुके
२९८ श्वरं ॥ ४८ ॥ मृतः शिवपुरं याति गीयमानोप्सरोगणैः ॥ एकविंशकुलोपेतः शिवलोके महीयते ॥ ४९ ॥ दानाच्छि
वपुरं गच्छेद्धोत्रे सत्रेश्वरसंस्थया ॥ तावत्कल्पसहस्राणि कामधेनुपुरं वसेत् ॥ ५० ॥ यावद्रोमाणि तु रोमाणि स
वत्सायास्तु भारत ॥ तावद्वर्षसहस्राणि शिवलोके महीयते ॥ ५१ ॥ ततोवतीर्णः कालेन इह मानुष्यलोगताः ॥
धनधान्यसमायुक्तो विप्रोत्तमकुले भवेत् ॥ ५२ ॥ वेदविद्याव्रतस्नातः सर्वशास्त्रविशारदः ॥ व्याधिशोक
विनिर्मुक्तो जीवेच्च शरदः शतं ॥ ५३ ॥ एतत्ते कथितं राजन्दारुतीर्थस्य यत्फलं ॥ संक्षेपेणैव परमं दारुके
श्वर दारुणं ॥ ५४ ॥ महापापहरं पुण्यं लिंगं महाक्रतुफलं ॥ यस्य दर्शनमात्रेण वाजिमेधफलं लभेत् ॥ ५५ ॥
वैशाखे शुक्लपक्षे च भूताष्टम्योर्दिने नृप ॥ तत्र तीर्थे नरः स्नात्वा ततो दद्यात्तिलोदकं ॥ ५६ ॥ ब्राह्मणैर्वेदविद्भिश्च
श्राद्धं कुर्यात्प्रयत्नतः ॥ भोजयेद्ब्राह्मणान्भक्त्या शक्त्या दद्याच्च दक्षिणां ॥ ५७ ॥ एवं कृत्वा नरो राजंस्तत्र ती
र्थे न मुह्यति ॥ ५८ ॥ ॥ इति श्रीरेवा० भृगुकच्छे दारुकेश्वरतीर्थं ॥ मार्कं० ॥ ततो गच्छेत राजेंद्र अश्विनो
स्तीर्थमुत्तमं ॥ गत्वा पूर्वोक्तमार्गेण भक्त्या नो कामिकं महत् ॥ १ ॥ तत्र तीर्थेश्विनौ देवौ रूपावयवसंस्थि
तौ ॥ दिव्यशीलसमायुक्तौ संजातौ तपसा खिल ॥ २ ॥ समाकर्ष्य भृगोः क्षेत्रं महद्देवर्षिसेवितं ॥ यज्जांशभागि
नौ जातौ तपसा देवचारिणौ ॥ ३ ॥ संमतौ सर्वदेवानां मादित्यं तनयावुभौ ॥ नासत्यौ सत्यसंपन्नौ सर्वदुः
खनिबर्हणौ ॥ ४ ॥ युधिष्ठिर उ० ॥ आदित्यस्य सुतौ जातौ नासत्यौ केन हेतुना ॥ एतत्तोहं श्रोतुमिच्छामि नि
र्णयं परमं द्विज ॥ ५ ॥ मार्कं० ॥ पुराणे भास्करो भूप भये तद्धि स्तराछ्रुतं ॥ चरितं देव देवस्य मार्तंडस्य
महात्मनः ॥ ६ ॥ वदतः शृणु संक्षेपात्समाहितमनानघ ॥ कथयामि न संदेहो वक्तुं नापि कर्षितः ॥ ७ ॥ २९८

संज्ञा देवी पुरा पार्थ रविं मत्वातितेजसं ॥ तेजः सोढुमशक्ता त्वा दुह्निग्ना कार्यगौरवात् ॥ ८ ॥ चचार मरुकां
तारे तपस्तेजोपशांतये ॥ छायारूपं तत्र मुक्त्वा यथा वेत्ति न भास्करः ॥ ९ ॥ ततः कतिपयाहोभिः सस्मार भग
वान्हरिः ॥ ज्ञात्वा छायां परां भार्यां त्यक्त्वा तां त्वरितोपयौ ॥ १० ॥ यत्र तिष्ठंति सा न्वंगी वडवारूपमाश्रिता ॥ चिंतय
ती पतिं प्रेम्णा स्तुवंती रवीमिव च ॥ ११ ॥ नमस्यंती पतिं हंसं रवं रवेल्कं जपमाश्रिता ॥ भर्तुः स्तेजः परं सोढुं चर
ती दुश्चरं तपः ॥ १२ ॥ तां दृष्ट्वा वडवां रूपां समाच्छाद्य स्वकं वपुः ॥ मनोभववशीभूतो हयो भूत्वा लक्षुक्रमः ॥
॥ १३ ॥ चकार नासिकाघ्राणं तस्यास्नेहेन भास्करः ॥ यथा तथा नासिकायां प्रविष्टं बीजमुत्तमं ॥ १४ ॥ ततो ना
नासागते बीजे संजातौ गर्भ उत्तमः ॥ जातौ तत्र सुतौ पार्थ नासत्यौ ते न विश्रुतौ ॥ १५ ॥ सुसमौ सुविभक्तांगौ
बिंबाद्विंबमिवोद्धृतौ ॥ अधिकौ सर्वदेवानां रूपैश्वर्यसमन्वितौ ॥ १६ ॥ नर्मदातटमाश्रित्य भृगुकच्छे
श्विनावुभौ ॥ परां सिद्धिमनुप्राप्तौ तपः कृत्वा सुदारुणं ॥ १७ ॥ तत्र तीर्थे नृपः स्नात्वा तर्पयेत्पितृदेवताः ॥
सुरूपः सुभगः पार्थ जायते सनरोत्तमः ॥ १८ ॥ गोनागोनीति संज्ञं वै तीर्थं तत्रैव भारत ॥ माहेश्वरं लोका
नांसि द्धिदं मंगलप्रदं ॥ १९ ॥ युधिष्ठिर उ० ॥ गोनागोमीति किं नाम कथं जातं तु किं फलं ॥ अश्विनौ यत्र
संसिद्धौ तन्मे वद महामुने ॥ २० ॥ मार्कं० ॥ महद्गुरुवनं यत्र यत्र तीर्थान्यनेकशः ॥ ततः प्राप्तः पुरा पार्थ
क्रीडितुं लीलया शिवो ॥ २१ ॥ क्वचिच्छोच्चकचिद्दृश्यौ विचेरतुरथा वने ॥ अज्ञातौ सर्वलोकानां स्वर्गस्य
त्कौतुहरतः ॥ २२ ॥ एवं सति महीपाल लता गहनसंकुले ॥ विनोदेनैव गिरिजा निलिल्येऽहर गाशिवा
त् ॥ २३ ॥ न ददर्श यदा गौरीं गिरिजां गह्वरे स्थितां ॥ तदा शर्वः स सर्वात्मा विह्वलत्वमुपागतः ॥ २४ ॥
क्व गता क्व स्थिता गौरी कथं द्रक्ष्ये विचिंतयत् ॥ दृश्यादृश्योयथा देवश्वरं न पिनपश्यति ॥ २५ ॥ तदा वत्स
तरो भूत्वा जनमध्ये व्यलोकयत् ॥ दृष्ट्वाद्भुतं क्रमं नैव तीर्थातीर्थं गृहाद्भुतं ॥ २६ ॥ गोनानाभास्थते

599/2008

लोकैः संबोधनपदे कृतं ॥ संभाराविभिषेनैव मुमा ह्वानपरोहरः ॥ २७ ॥ त्र्यंमंन स्यार्थमायातश्चाश्विनौयत्रते
पतुः ॥ नीलरूपौ महादेव स्तावता वस्सिकावपुः ॥ २८ ॥ उमाहं भारवकरी शर्वं प्राप जगत्पतिं ॥ दृष्टौ तौ मुनि
भिर्लोकैः संगतौ प्रेमसंयुतौ ॥ २९ ॥ गोनागोनीतिनाम्नातौ लोकै रुक्तौ युधिष्ठिर ॥ शुक्ले भाद्रपदे मासि दश
म्यां संगमस्तयोः ॥ ३० ॥ उद्वाहितौ च तीर्थेस्मिन् लोके स्तु पांडुनंदन ॥ एतस्मिन्नंतरे पार्थ भृगुस्तत्र समाग
तः ॥ ३१ ॥ प्रदक्षिणीकृत्य तयोः प्रणाममकरोद्विभोः ॥ मत्वा तावीश्वरौ साक्षाद्धरदोस्मीति भारत ॥ ३२ ॥ तद्र
विहाय तद्रूपं शंकरश्चोमया सह ॥ प्रोवाच तं भृगुः साक्षाद्भृगुस्स्मार शंकरं ॥ ३३ ॥ भृगुरुवाच ॥ अद्य मे स
फलं जन्म जीवितं मे सुजीवितं ॥ अद्य स्थानं महास्थानमिदं देवादिपूजितं ॥ ३४ ॥ अद्य लोकविशोकाश्च संग
त्यारिहता भव ॥ अद्य सत्यं भृगोः स्थानं वरदो यत्र मे शिवो ॥ ३५ ॥ एतच्छ्रुत्वा शुभं वाक्यं देवदेवो महेश्वरः ॥
हृष्टः स्तुष्टश्च सा देवी सुमुखा सौम्यलोचना ॥ ३६ ॥ श्रोत्वापि तत्र पप्रच्छ से त्र महात्म्यकारणं ॥ ईश्वर उ० ॥
शृणु देवि महाभागे विप्रर्षीणां च शृण्वतां ॥ ३७ ॥ भृगोः प्रीत्या प्रवक्ष्यामि क्षेत्रस्यास्य तु संभवं ॥ यस्य श्रो
तृत्वया देवी पुण्यं क्षेत्रसमुद्भवं ॥ ३८ ॥ काष्टास्त्रिंशत कलास्त्रिंशत्कला भोद्भूर्त्तिको विधिः ॥ त्रिंशद्भिस्ते
रहोरात्रं पित्र्यमाहुर्मनीषिणः ॥ ३९ ॥ मानुषाब्देन देवानां अहोरात्रं वरानने ॥ चतुर्युगेन देवानां युगमाहुः
पुरातनाः ॥ ४० ॥ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगं ॥ सप्तादशैव लक्षाणि प्रमाणेन कृतयुगे ॥ ४१ ॥
अष्टाविंशत्सहस्राणि यत्र शुक्लोभवेद्धरिः ॥ चतुःपादोभवद्धर्मो निस्पृहा यत्र जंतवः ॥ ४२ ॥ चिरायुषो
निरोगाश्च सर्वोपद्रववर्जिताः ॥ ततस्त्रेतायुगं देवी यत्र रक्तोभवद्विभुः ॥ ४३ ॥ प्रमाणं यस्य वर्षाणां लक्षा
णि द्वादशैव तु ॥ षण्णवत्याधिकैर्देवी सहस्रैः परिकीर्त्यते ॥ ४४ ॥ तत्र धर्मस्त्रिपादश्च लोकाः किंचिज्ज्वरो
गिणः ॥ पूर्वादल्पायुषश्चैव किंचिद्दुःखसमन्विताः ॥ ४५ ॥ ततश्च द्वापरं नाम तृतीयं युगमुच्यते ॥ द्वी २९९

पादुर्मभवद्यत्र कपिलश्च जनार्दनः ॥ ४६ ॥ चतुःषष्टिसहस्राणि लक्षाण्यष्टौ प्रमाणतः ॥ अल्पायुषो नरा
स्तत्र स्पर्धिनश्च परस्परं ॥ ४७ ॥ विज्ञेया रोगबहुला निर्द्रव्याः किंचिदेव तु ॥ ततः कलियुगं घोरं संभष्यति
दारुणं ॥ ४८ ॥ द्वात्रिंशद्भिः सहस्रैश्च सहलक्षचतुष्टयं ॥ वर्षाणि तत्प्रमाणेन विज्ञेयं हि युगप्रिये ॥ ४९ ॥ यत्र
कृष्णोभवद्विष्णुः प्रपंनार्त्तिहरः परः ॥ एकपादास्थितो धर्मो लोकः सत्यविवर्जितः ॥ ५० ॥ जयेद्धर्ममधर्मो वै
सत्यस्याप्यनृतं तथा ॥ जीर्यंते च न पार्श्वेरैर्नरास्त्रिभिर्वरानने ॥ ५१ ॥ सीदंति चाग्निहोत्रेण गुरुपूजा प्रण
श्यति ॥ अल्पक्षीराः स्तथा गावः कुत्सीताहारतोषिताः ॥ ५२ ॥ तथैवाल्पोदका नद्यो मही चाल्पफलप्रदा ॥
क्लिष्टवृत्तिरलोकाश्च स्तथाल्पाल्पायुषः शुभे ॥ ५३ ॥ न सतीत्वं च नारीषु न धर्मश्च घवर्जितः ॥ इत्यादि ल
क्षं देवीति ध्ययुगमुदाहृतं ॥ ५४ ॥ एवं चतुर्युगं देवी देवानां युगमुच्यते ॥ चतुर्युगसहस्रं वै ब्रह्मणो दिवसं
जगुः ॥ ५५ ॥ सहस्रं हितथा रात्रिः कल्पाख्यं तदहर्निशं ॥ त्रिंशत्कल्पो विधर्मासो वर्षं द्वादशभिश्च तैः ॥
॥ ५६ ॥ ब्राह्मणोह्यायुराख्यातं तच्छतं गिरिनंदिनी ॥ एवं कल्पव्यवस्थानं मयोक्तं तव भानसः ॥ ५७ ॥ प्रारंभो
ह्यादिकल्पस्य नभूर्बुर्ब्रह्मणः सुताः ॥ मनसा न वविख्यातास्ते प्रजापतयो भवन् ॥ ५८ ॥ मरीचिरत्र्यांगिर
सो पुलस्त्यः पुलहक्रतुः ॥ दक्षो भृगुर्वसिष्ठश्च यथा ब्रह्मा तथैव ते ॥ ५९ ॥ नव ब्रह्मण इत्येते पुराणे निश्च
यं गताः ॥ तेषां भृगुर्महातेजास्तपसा सिद्धिमागतः ॥ ६० ॥ दक्षिणे वामहापुण्यां विशिष्टं सर्वसंभवं ॥ एतस्या
स्तीरमाद्य तपः कृत्वा सुदुश्चरं ॥ ६१ ॥ प्रसाद्य भामुमेक्षेत्रं मत्प्रसादादनुत्तमं ॥ स्थापयामास देवैश्च सर्वै
र्दत्तवरो द्विजः ॥ ६२ ॥ प्राप्य पुत्रां परां देवी श्रियं विष्णोर्हि वल्लभं ॥ सुरर्षिभिरनुज्ञातः प्रार्थयित्वा च कश्यप
॥ ६३ ॥ मुनिसिद्धिसमायुक्तः कृतकौतुकमंगलः ॥ नंदने वत्सरे माघे पंचम्यां शुक्लपक्षतः ॥ ६४ ॥ प्रशस्ते तु
नरार्के तु कुंभराशिस्थिते रवौ ॥ समुद्रोपांतभूभागे पश्चिमे सुरसेविते ॥ ६५ ॥ प्रशस्ते नर्मदातीरे तूत्त

601/2008

रे० खं०

३००

रेवाजलस्नानात्॥ भागुदग्प्रणवे देवे कोटितीर्थे समन्विते॥६६॥ पंचक्रोशप्रमाणं तु त्रैलोक्यव्यापकं महत्॥
विश्वकर्मविधानाढ्यं प्रसादशतसंकुलं॥६७॥ हर्म्यकुट्टिमसंबाधमट्टालकमंडितं॥ सिद्धिक्षेत्रं भृगुक्षे
त्रं तीर्थं देवर्षिसेवितं॥६८॥ अचिरेणैव कालेन स्थापयामास पार्वती॥ पूर्वं चैव मयास्तं वरदानेन भार्ग
वे॥६९॥ तत्र देवी निलीनात्वं प्रसाना सत्य संनिधौ॥ तीर्थे मया सुरेशानि ततस्तीर्थमिदं शुभं॥७०॥
आवयोरिव संयोगो यत्र जातो मनोहरः॥ गोनागोनीति संज्ञापि यदुक्तं चावयोर्जनैः॥७१॥ विवास्ते
हानलोकानां भविष्यंती ह शोभने॥ एतत्ते कथितं देवी किमन्यत्परिपृच्छसि॥७२॥ श्रीदेव्यु०॥ गोनागोनीति
विख्यातं स्थानं चाश्वसमीपगं॥ भृगोः क्षेत्रं सुरश्रेष्ठ ह्यावयोर्यत्र संगमः॥७३॥ देशकालौ कथं तत्र सुक्षेत्रे देव ज
नार्दने॥ दक्षिणायनगे भागौ कथं प्रोक्तं त्वयाविभो॥७४॥ व्रतबंधस्तथा दीक्षा प्रतिष्ठा वास्तुपूजनं॥ चू
ली कर्म विवाहौ वा विधानं यज्ञकर्मणां॥७५॥ नभवेद्यत्र कालत्र वार्त्ता नर विवाहजा॥ शृण्वतां भृगुमुख्या
नां यथार्थं वद मे विभो॥७६॥ ईश्वर उ०॥ शृणु देवि महाभागे मदुक्तेवाविचारणा॥ आवयोर्यत्र संयोगो
यत्र देवः श्रियः पतिः॥७७॥ यत्राश्विनोः स्थाने विवाहस्तत्र शोभनाः॥ अस्मिन्मासेन भस्येतु शुक्ले तु दश
मीदिने॥७८॥ लग्ने गोलिके कुर्याद्विवाहं मनुजः शुभे॥ विकल्पभ्रांतिरहितं संशयद्वैधवर्जितं॥७९॥
अवश्यं क्रायमाणे तु विवाहे सुभगा भवेत्॥ इममर्थमहं देवी प्रार्थितो भृगुणा पुरा॥८०॥ अनेन विप्रव
र्येण तथा येकथयाम्यहं॥ तपस्तप्त्वा भृगुः पूर्वं प्रत्यक्षं मां प्रणम्य च॥८१॥ भृगुरुवा०॥ शादवाबद्धि जान्स
र्वान्न पुरा लक्ष्मीर्विनिर्गता॥ अपवित्रमिदं स्थानं मम जातां महेश्वर॥८२॥ पुरा यथा मया प्रोक्तं कल्पग्रा
मनिवासिनां॥ कथं तद्भविता देव शरणं त्वां समागतः॥८३॥ इत्युक्तो भृगुणा देवी मया चोक्तो भृगुस्ततः॥
माविषीद द्विजश्रेष्ठ किं शोचसे रमवद्विजैः॥८४॥ क्रोधस्थानं न संदेहस्तथापितमदक्षण॥ अत्र स्था ३००

नसमुद्भूता महद्भवविवर्जिताः॥८५॥ ब्राह्मणा मत्प्रसादेन भविष्यंति न संशयः॥ वेदविद्याव्रतस्नाताः स
र्वशास्त्रविशारदः॥८६॥ येपि ते शतसाहस्रा अन्यतो ह्यागतास्त्विह॥ अपठस्यापि भूरर्वस्य सर्वे विरुद्धां गत
स्य च॥८७॥ उत्तरादुत्तरं ज्ञातुं न शक्नोन्यो भृगूत्तम॥ कोटितीर्थाश्रितस्थानं सर्वपापप्रणाशनं॥८८॥
अद्य प्रभृति विप्रेंद्र भविष्यति च सिद्धिदं॥ तथैतदपि ते वच्मि प्रियेहं भृगुसंनिधौ॥८९॥ नदृष्टं न श्रु
तं तद्धि सांप्रतीन समागमान्॥ मत्प्रसादादिदं विप्र गोनागोनीति विश्रुतं॥९०॥ स्थानमेतत्सुराणां
मर्त्यानां च हितायवै॥ भृगुक्षेत्रे स्थिता येवै भार्गवास्ते च संज्ञया॥९१॥ विवाहस्त्विह तैः कार्यो ह्यस्मिन्
काले ममाज्ञया॥ अस्मिंस्तीर्थे नरः स्नात्वा नभस्ये दशमीदिने॥९२॥ प्राप्ते वै लग्नसमये विवाहं कारयेत्ततः॥
शोभनं मंगलं विधात्तत्रैवं शास्त्रनिश्चयः॥९३॥ कुब्जकुष्टांधमूकाश्च खल्वाटः पंगुरेव च॥ वधिरोत्थं
गहीनश्च दशम्यां दिवसक्षये॥९४॥ लग्नकाले नरः स्नात्वा सुखसौभाग्यभाग्भवेत्॥ तस्मिंस्तीर्थे नरः स्ना
त्वा तर्पयेत्पितृदेवताः॥९५॥ तस्य ते द्वादशाब्दानि तृप्तायच्छंति चाशिषः॥ दधिक्षीरेण चाज्येन मधुनासि
तयासह॥९६॥ तीर्थतोयैर्विरूपाक्षं गोनागोनीश्वराकृयं॥ स्नापयंति द्विजश्रेष्ठ तेषांवासस्त्रिणयये॥९७॥
मत्प्रसादाद्विजश्रेष्ठ सर्वदेवानुसेवितं॥ सर्वतीर्थमयं स्थानं सर्षिसिद्धसमाश्रितं॥९८॥ भविष्यति भृगुक्षे
त्रं यावदाभूतसंप्लवं॥ गोनागोनीति विख्यातं तीर्थं यत्राश्विनो स्थितौ॥९९॥ अहमत्र वसिष्यामि प्रियया वि
कयासह॥ गोनीयं पार्वती देवी गोनाग्राह्यादहं शिवः॥१००॥ तावुभौ मेलापके तत्र विवाहस्तत्र शोभनः॥ पूज
नीयो त्विहाविप्रसततं प्रीतिकाम्यया॥१०१॥ मार्कं०॥ इत्युक्त्वा वृषभो पार्थ तत्रैवांतर्हितौ तनः॥ इति ते कथितं
पार्थ तीर्थमश्विसुखप्रदं॥१०२॥ अश्विनौ च यथोत्पन्नौ यथा सिद्धिमुपागतौ॥ तत्रैव च परं तीर्थं गोनागोनी
श्वरं शुभं॥१०३॥ महात्म्यं तस्य ते प्रोक्तं पापघ्नं मंगलप्रदं॥१०४॥ इति पठति नरो यो यः शृणोतीह भक्त्या वि

603
2008

रे०खं० पुलमतिरसौम्यात्सर्वसौभाग्यसुत्तः॥ बहुदुरितगिरीणांदारणंत्वश्वतीर्थंस्कंदत बकुलगोना गोनिकाया
३०१ श्वरित्रं॥१०५॥ ॥इति श्रीवायूक्त शिवसंहितायांरेवामा० भृगुकच्छे अश्वितीर्थंम मार्कं०॥ ततोधनुःश
तार्द्धंचगत्वा न्यूनंयुधिष्ठिर॥ पुरः प्राप्तव्यमतुलं सावित्रीतीर्थमादरात्॥१॥ पुण्यंपवित्रं विख्यातंपापता
पोपशांतिदं॥ यत्र सिद्धाविद माता सावित्रीब्रह्मणःप्रिया॥२॥ युधिष्ठिरउवा०॥ सावित्रीकाद्विजश्रेष्ठक
थमाराध्यते द्विजैः॥ प्रसंनाध्यंवरं चाथद्यादेतद्वृस्वमे॥३॥ मार्कं०॥ आदिकल्पेयदाब्रह्मा विष्णोर्नाभि
सरोरुहे॥ प्रादुर्भूतस्तदासाकं वागुवाचाशरीरिणी॥४॥ विश्वंसृजमहाभागेत्वसकृतं विधिंप्रति॥ श्रु
त्वातांब्रह्मणाश्चिंताबभूवाशुसृजेतिकं॥५॥ सृजेति प्रोक्तमनया किं विश्वंसृज्यतेकथं॥ इत्थंचिंतयत
स्तस्यविविधैर्मात्रयान्वितः॥६॥ सानुःस्वारःसमुद्भूतो नाभिहृत्कंठगोध्वनिः॥ तालुस्पर्शेण गंभीरः
प्रणवाख्योयुधिष्ठिर॥७॥ ज्ञेयःसएववेदादिविश्वादिर्निर्गुणोगुणी॥ सएवपरमंधाम ब्रह्मसत्यदम
व्ययं॥८॥ दर्शकःसृष्टिमार्गस्यमोक्षमार्गप्रदर्शकः॥ युगपत्तेनसंतत्रत्रैलोक्यंभरतर्षभ॥९॥ अव
र्णाच्चारितोजाता भूर्धोलोकसंयुता॥१०॥ तमोगुणेनसाबद्धारौद्रीशक्तिर्नृपोत्तम॥ उवर्णोच्चारमात्रेण
भुवःसृष्टिरजायत॥ रजोगुणेनतद्व्याप्तंब्राह्मीशक्त्याभिवेष्टितं॥११॥ एकलोकत्रयोवर्णोस्वस्तस्यानु
रजायत॥ गुणस्तस्यानुसत्वंचविष्णुशक्त्याभिवेष्टितं॥१२॥ एतल्लोकत्रयंनाम महाव्याहृतिसंज्ञितं॥ एत
द्वेदत्रयीरूपमेनदेवत्रयीन्नृप॥१३॥ ध्वनिस्तस्यार्धमात्रोयस्तद्ब्रह्मपरमंविदुः॥ मोक्षद्वारंचतत्साक्षाद्योगि
नामप्यगोचरं॥१४॥ प्रणवाख्यंतदुत्पन्नंपुरःपूर्वायदामहः॥ तस्यानुवेदःसंजातःसचतुर्धाभवत्किल॥
॥१५॥ गुणत्रयमयःसोपिकर्मकांडमयःशुभः॥ ऋग्यजुःसामसंज्ञेयःस्त्रयीप्रोक्तामनीषिभिः॥१६॥ ३०१
चतुर्धाव्यभजद्वेदंतेमंगिलाःकिलपूर्वतः॥ तत्तत्स्वभावविभवान्नृत स्मिंस्तस्मिंस्तस्मिन्प्रयोजयत्॥

॥१७॥ कर्माभिरामोबहुलंभाग्यंचैकंकरात्तप्रथक्॥ तदेतन्मंडलंपूर्णमाहयब्रह्मणवाभिधं॥१८॥ गुणशक्त्या 605/2008
सत्यशक्त्याश्रुतित्रयाद्यवेष्टितं॥ सेतिहासपुराणाद्याविद्याःसर्वास्तमाश्रिताः॥१९॥ अव्यक्ताभारतीप्राहपुनः
सा भारतर्षभ॥ जगदादिरयंजातोवेदादिःप्रणवात्मकः॥२०॥ सूतेविश्वमिदंयस्मात्सूर्भुवस्वरितिप्रभुः॥
तथाप्रसविता चान्यःसवितायमतःस्मृतः॥२१॥ इत्याकर्ण्यगिरंदिव्यां विधिर्विस्मयमागतः॥ दिव्यांदृष्ट्वा
महत्तेजो दिवगम्भोमितीरितं॥२२॥ सवितारंगिराप्रोक्तंसश्रीकंसर्वजीवनं॥ यंविनानैवकालस्तुर्नभंत्राकर्मसं
स्थितिः॥२३॥ ततःपद्मासनस्थेनाचिंतितापद्मयोनिना॥ सवितुस्तेजसोलक्ष्मीरद्भुतापरमान्नृप॥२४॥ तस्याचिं
तयतोधातुःसवितुस्तेजसःश्रियं॥ अत्यद्भुतासमुत्पन्नानारीसवितृमंडलात्॥२५॥ सवितुस्तेजसोजातासा
वित्रीतेनसास्मृता॥ सर्वलक्षणसंपन्नारूपावयवसंयुता॥२६॥ सौभाग्यायतनंपार्थसाब्रह्माणमुपाश्रिता
॥ततःपुनरुवाचेनंदिव्यवागशरीरिणी॥२७॥ सवितुर्मंडलाज्जाता सावित्रीयमिहोज्वला॥ भजभानांभज
स्वैनांसावित्रींवेदमातरां॥२८॥ मार्कं०॥ ततस्तंनोदनेद्वेधात्वभजत्तांमुदान्वितः॥ ध्यातमात्रातुयादेवीस
र्वान्कामान्प्रयच्छति॥२९॥ सौभाग्यमतुलंदत्तेसर्वपापंव्यपोहति॥ पद्मानमापद्मवर्णापद्मपत्रनिभेक्षणा॥
ध्यातव्याब्राह्मणैर्नित्यंक्षत्रवैश्यैर्यथाविधि॥३०॥ ब्रह्महत्याभयाच्चापिनतुशूद्रैःकथंचन॥३१॥ उच्चारणा
द्वारणात्सरौरवंनरकंव्रजेत्॥ वेदाक्षरोच्चारणात्तुक्षत्रियैर्भूमिपालकैः॥३२॥ जिह्वाच्छेदोस्यकर्तव्यःशूद्र
स्येतिविनिश्चयः॥ नमंत्रंवैदिकंब्रूयाच्छूद्रायब्राह्मणःक्वचित्॥३३॥ लोभाद्वापिभयाद्वापिनतंशूद्रोपिपारये
त्॥ पठकःपाठकश्चापिद्वौद्वौभ्रष्टौनृप॥३४॥ स्वस्तिवाप्रणवंवापिवेदमंत्रमयापिवा॥ यःपठेद्ब्राह्मणः
शूद्रेराष्ट्रान्निर्वासयेद्धितं॥३५॥ निमज्जेत्यात्मनासार्धंदशपूर्वैर्दशापरैः॥ बालाबालेंदुसदृशांरक्तवस्त्रा
नुलेपना॥३६॥ उषाकालेद्विजैर्ध्येयासंध्यासंतानमुत्तमं॥ उच्चैःआपीवरकुचासंमुखीप्रवदर्शीना॥ ३७॥ ॥

सर्वाभरणसंपंनाश्वेतमाल्यानुलेपना॥श्वेतवस्त्रपरिछिन्नाश्वेतयज्ञोपवीतिनी॥३८॥ध्यातासायोगिनांपार्थ
भुक्तिमुक्तिफलप्रदा॥प्रदोषेचपुनःपार्थवृद्धारूपांगमूर्धजा॥३९॥स्मृतासादुर्गकांतारेमातेवपरिरक्ष
ति॥विशेषेणचराजेंद्रसावित्रीतीर्थउत्तमे॥४०॥स्नात्वाचैवविधानेनप्राणायामंविधारयेत्॥सव्याहृतीं
सप्रणवांगायत्रींशिरसासह॥४१॥अनुच्चैस्त्रिरुच्चार्यःप्राणायामःसउच्यते॥४२॥प्राणायामैर्दहेद्दो
षान्सप्तदोजन्मार्जितंनृप॥किल्बिषंधारणाभिश्चध्यानेनानंत्यमश्नुते॥आपोहिष्ठेतिमंत्रैश्चप्रोक्षयेदा
त्मनस्तनुं॥४३॥नवषट्चतथातिस्रस्तत्रतीर्थेनृपोत्तम॥आपोहिष्ठेतिचावत्याप्रतिग्राहीनलिप्यते॥
॥४४॥अघमर्षणसूक्तंचतोयेयत्किंचिद्भथापिवा॥जपन्वाप्रोक्षयेन्चापिप्रयतःसततंद्विजः॥४५॥उप
पापैर्नलिप्येतपद्मपत्रमिवांभसा॥आपोहिकुरुतेविप्रउद्धेरवान्स्त्रिंहिकारयेत्॥४६॥चतुर्थंकुरुतेय
स्तुब्रह्महत्यांव्यपोहति॥द्रुपदादिवयोहियोमंत्रोवेदेवाजिसनेयके॥४७॥अंतर्जलेसकृज्जप्त्वःपापहृस्य
करोभवेत्॥उसत्यमितिमंत्रेणपूजयित्वादिवाकरं॥४८॥गायत्रींचजपेद्देवींपवित्रांवेदमातरं॥दशभि
र्जन्मजनितंत्रातेनचपुराकृतं॥४९॥त्रिजन्मजसहस्रेणगायत्रींहंतिपातकं॥गायत्रीसारमात्रोपिवरं
विप्रःसुयंत्रितः॥५०॥नायंत्रितश्चतुर्वेदीसर्वाशीसर्वविक्रयी॥संध्याहीनोशुचिर्नित्यमनर्हःसर्वकर्मसु॥
॥५१॥यद्यत्सकुरुतेकिंचिन्नतस्यफलभाग्भवेत्॥संध्याहीनोवसेद्यस्तुब्राह्मणोवैविशेषतः॥५२॥स
जीवन्नेवशूद्रस्यान्मृतःश्वाश्चैवजायते॥सावित्रीतीर्थमासाद्यसंध्योपास्तिंकरोतियः॥५३॥द्विकालंवा
त्रिकालंवामासार्धंमासमेववा॥संध्यालोपकृतंपापंनाप्नोतिद्विजसत्तमः॥५४॥षडब्दंवैकृतासंध्यातेन
तत्फलमाप्नुयात्॥सावित्रीतीर्थमासाद्यगायत्रीजाप्यकृद्द्विजः॥५५॥वेदत्रयाध्ययनजंफलंप्राप्नोत्यसं
शयं॥पितृन्नुद्दिश्ययःस्नात्वापिंडनिर्वपणंनृप॥५६॥यःकुर्याद्द्वादशाब्दानितृप्तिंयातिपितामहः॥सावित्री ३०२

तीर्थमासाद्ययःकुर्यात्प्राणसंक्षयं॥५७॥ब्रह्मलोकेवसेत्तावद्यावदाभूतसंप्लवं॥पूर्णेचैवततःकालेमा 604/2008
नुष्यमिहचागतः॥५८॥चतुर्वेदीद्विजकुलेविपुलेजायतेधनी॥विद्याव्रतसमायुक्तःपशुपुत्रसमन्वि
तः॥५९॥व्याधिशोकविनिर्मुक्तोजीवेच्चशरदःशतं॥६०॥ ॥इतिश्रीरे०खं०मृगुकच्छेसावित्रीतीर्थ
॥ ॥मार्कं०॥ततोगच्छेन्महाराजधनुर्द्वादशकांतरे॥वालखिल्येश्वरंतीर्थंसर्वपापप्रणाशनं॥१॥
सेवितंदेवगंधर्वैःसर्षिभिश्चतपोधनैः॥बहवस्तंनजानंतिविष्णुमायाविमोहिताः॥२॥यत्रसिद्धामहा
भागावालखिल्यास्तपोधनाः॥ब्रह्मतेजसमुद्भूतावालुकासुयुधिष्ठिर॥३॥पुराशंभोर्विवाहेतुगौर्या
रूपंनिरीक्ष्ययत्॥अंगुष्ठमात्राःपुरुषामहातेजसमन्विताः॥४॥जटाजिनधराःसर्वेअक्षसूत्रकरास्त
था॥वीर्यंतदपतद्भूमौभेदितंवालुकासुच॥५॥वालुकाकणसंख्याकाःसूर्यरश्मिसमप्रभाः॥पादस्यद
क्षिणांगुष्ठभेदितास्तेसमुत्थिताः॥६॥बद्धांजलिपुटाःसर्वेकिंकुर्मइतिचाब्रुवन्॥ब्रह्मोवाच॥तपश्चर
ध्वंलोकानांहितायसततंशुभं॥७॥वालखिल्याख्यमुनयोवालुकासुसमुत्थिताः॥मार्कं०॥इत्युक्ताब्र
ह्मणातेवैसर्षयःसंशितव्रताः॥८॥तीर्थात्तीर्थंपरिभ्रम्यकमाद्रेवामुपागताः॥सिद्धिस्थानंभृगोःस्थानं
श्रुत्वाचभृगुणार्चिताः॥९॥तत्रागत्यतपस्तेपुःपूजयंतःपरंशिवं॥स्थापयित्वासरित्तीरेजपध्यानपरा
यणाः॥१०॥कालेनाल्पेनराजेंद्रसिद्धिंप्रापुःपरांद्विजाः॥परितुष्टेमहादेवेकिंकिंनप्राप्यतेनरैः॥११॥
देवैश्चसहगच्छंतिदिव्यलोकेषुसर्वशः॥वायुनासहगच्छंतिसूर्यगोभिःसमंतथा॥१२॥दिव्यादिव्यांश्च
भूभागान्सरिद्द्वीपवनानिच॥मेरुमंदरमुख्यांश्चगिरीनभिचरंतिच॥१३॥ईदृशादृश्यैश्वर्यरूपैःसि
द्धिंप्राप्ययुधिष्ठिर॥ततःप्रभृतितत्तीर्थंवालखिल्येश्वरंविदुः॥१४॥सर्वप्रदंनृणांसर्वपापोपशां
तिदं॥तत्रागतामहाभागापुराद्दक्षंतुसत्तप॥१५॥पुलस्त्यःपुलहोदक्षःक्रतुरांगिरसोसिजो॥प्रचे

रे०खं० तस्योव सिद्धश्चयमोनारदपर्वतौ ॥१६॥ एते चान्ये महाभागाः शतशः शंसितव्रताः ॥ तत्र सिद्धिं परां प्राप्य वा
लखिल्येश्वरे नृप ॥१७॥ तस्य लिंगस्य मध्ये वै लिंगं परमशोभनं ॥ तत्परं शिवसंस्थानं सर्वपापक्षयंकरं
३०२ ॥१८॥ ऋग्वेदं सामवेदं च यजुर्वाथर्वमेव च ॥ पठेत्सम्यग्विधानेन गायत्र्यास्तत्फलं लभेत् ॥१९॥ तत्र
शक्त्या तु तं जप्तं दत्तं विधिवदर्चितं ॥ तस्य चान्यानि दानानि कलां नार्हंति षोडशीं ॥२०॥ यमैर्वा नियमै
र्वापि योगेन तपसापि वा ॥ तत्र तीर्थे मृतानां तु गतिस्याद निवर्तिका ॥२१॥ एष ते विधिरुद्दिष्टः संक्षेपेण
मयानघ ॥ वालखिल्येशतीर्थस्य पुराणे वै यथा श्रुतः ॥२२॥ ॥ इति श्री रेवा० भृगुमाहात्म्ये वाल
खिल्येश्वर तीर्थं ॥ मार्कं० ॥ तथा हृदत्रादंडानामंतरे भरतर्षभ ॥ नर्मदेश्वरसंज्ञं तु गच्छेत्तीर्थमनुत्त
मं ॥२३॥ यन्न कस्यचिदाख्यातं रहस्यं भुक्तिमुक्तिदं ॥ पुण्यं पवित्रमतुलं त्रिषु लोकेषु विश्रुतं ॥२४॥
भृगूणाराधिता देवी नर्मदा सरितां वरा ॥ स्थापयित्वा निजं स्थानं तीर्थं देवर्षिसेवितं ॥२५॥ स्नात्वा तीरे
स्थितः सम्यक्पादाग्रेण तु पांडव ॥ दक्षिणेन चिरं ध्यायन् निराहारो जितेंद्रियः ॥२६॥ त्रिःस्नायी नर्मदा
ध्यायी लेकपादाग्र संस्थितिः ॥ शांतो दांतो जितक्रोधस्ततस्तुष्टा सरिद्वरा ॥२७॥ कालेन बहुना पार्थ सा
क्षाद्रूपा शिवा गता ॥ दिव्याभरणवस्त्राढ्या दिव्यस्रग्गंधलेपना ॥२८॥ नर्मदा स्वप्रवाहात्सा विनिर्गत्य पु
रः सरा ॥ नर्मदा उ० ॥ तुष्टास्मि ते महाभाग वरं वरय वांछितं ॥२९॥ ध्यानादिभक्तियोगेन प्रसन्नास्मि त
वानघ ॥ भृगुरु० ॥ देवि सर्वांगसंभूते विश्वपाविनि नर्मदे ॥३०॥ तुष्टासि यदि विप्रस्य कार्यार्त्तेस्य म
मानघे ॥ सर्वतीर्थाधिवासेस्मिन्स्थाने संनिहिता भव ॥३१॥ तीर्थमेकं स्वनाम्ना त्वं कृपां कृत्वा ममो
परि ॥ हिताय सर्वलोकानां स्थापय स्वधनाशनं ॥३२॥ यथा मयि कृपा लोकास्त्वदीयां वै विदंति च ॥ वि
श्वेशाविग्रहं भवेत्त्वमेकैव त्वं सरिद्वरा ॥३३॥ प्रपन्नार्तिहरा मेवं नान्या मन्ये सरिद्वरा ॥ नमस्तेस्तु नमस्ते ३०२

609/2008

स्तु याचे त्वां प्रणतः पुरः ॥३४॥ इत्युक्तः सा भृगुर्मुनिसो दंडवत्प्रणतोभवत् ॥ मार्कं० ॥ ततस्तु श्वाप्य तं देवीत थे
त्याह भृगुः स्वयं ॥३५॥ स सूक्ष्मं शोभनं लिंगं स्थापयामास शंकरं ॥ स्वनाम्ना च समभ्यर्च्य दत्त्वा चापि भृगोर्वरं
॥३६॥ स्वयमंतर्दधे पार्थ स्वतोये सा सरिद्वरा ॥ ततः प्रभृति विख्यातं तीर्थं वै नर्मदेश्वरं ॥३७॥ तत्रैव स्नान
मात्रेण नरस्य मनुजर्षभ ॥ इह जन्मकृतं पापं नश्यते नात्र संशयः ॥३८॥ तत्तीर्थमुद्दिश्य तु यः स्नानार्थं
याति भारत ॥ पितरस्तस्य तुष्यंति गायंति च हसंति च ॥३९॥ सप्तजन्मकृतं पापं शिवं संपूज्य नश्यति ॥ अष्ट
म्यां वा चतुर्दश्यां अश्वमेधफलं लभेत् ॥४०॥ उपोष्य पौषकृष्णायां अष्टम्यां नर्मदेश्वरं ॥ पूजयित्वा पठेद्रौ
श्वदीपं दद्यात् शोभनं ॥४१॥ पंचामृतेन संस्नाप्य सुगंधैश्चविलेपयेत् ॥ पूजयेद्विविधैः पुष्पैः पद्मनीलोत्प
लादिभिः ॥४२॥ नीराजनार्थं नैवेद्यैः स्तुतिध्यानजपस्तवैः ॥ सकृत्संपूज्य तं शर्वं महापातकवान्यदि ॥४३॥
ततः प्रभाते समये श्राद्धं कृत्वा यथाविधि ॥ शैवान् पाशुपतान् विप्रान् शक्त्या तान् भोजयेन्नृप ॥४४॥ तस्यापि भैकं
विंशश्च पितरस्तृप्तिमाप्नुयुः ॥४५॥ दक्षिणां दापयेत्तेषां यथाशक्त्या युधिष्ठिर ॥४६॥ शिवलोके सहस्राब्दं
पितृभिः सह मोदते ॥ सर्वपर्वसु राजेंद्र भक्त्याशक्त्या विधानतः ॥४६॥ नर्मदेश्वरतीर्थं वै दत्तं भवति चाक्षय
॥४७॥ ॥ इति श्री रेवा० भृगुकच्छे नर्मदेश्वर तीर्थं ॥ मार्कं० ॥ पूर्वोक्तं मंतरे भूमे विनायक भरतर्षभ ॥ मातृ
तीर्थं गतो गच्छेत्सर्वकामप्रदं शिवं ॥१॥ पुरा विष्णोः शिवा सार्द्धं विवाहे वै यदाभवत् ॥ यदेवा मंत्रिता देव्या
देवैः सह समागताः ॥२॥ निर्वर्तिते तद्विवाहे तु भृगुणा प्रार्थिताः ॥ चक्रुर्निवासं तत्रैव शर्वाणी प्रमुखा नृप ॥३॥
स्थानं रं ॥ ततः प्रभृति तत्तीर्थं मातृणां विश्रुतं शुभं ॥ स्थिता स्त्रा विवलंदेव्युक्ता आनंदं परमं ययुः ॥४॥
तत्र तीर्थे नरः स्नात्वा तर्पयेत्पितृदेवताः ॥ मातृणां पूजनं कुर्यादुपहारैरनुत्तमैः ॥५॥ नारी वा पुरुषो वापि
वंध्यत्वं तु चतुर्विधं ॥ विधिना तत्र वै स्नात्वा शोभनं पुत्रमाप्नुयात् ॥६॥ गौरिणी भोजयेद्भक्त्या पूजयेत्त

स्वशक्तितः ॥ रविवारे चतुर्दश्यां अष्टम्यां वा युधिष्ठिर ॥ ७ ॥ मातृकूपोदके स्नात्वा दत्वार्घबलिसत्क्रियां ॥ न
श्यंति देहजा दोषा वंध्यत्वादि पृथक्विधा ॥ ८ ॥ जायंते नात्र संदेहस्तस्य वंशकराः सुताः ॥ ९ ॥ ॥ ॥
॥ इतिश्री भृगुकच्छे मातृतीर्थं ॥ मार्कं० ॥ तत्रैव तु स्थितं पश्येन्मत्स्येश्वरमनुत्तमं ॥ सुरसैन्यं जगत्पूज्यं सर्व
पापप्रणाशनं ॥ १० ॥ यत्रागत्य तपस्तेपे मत्स्यरूपी हरिः पुरा ॥ मत्स्यकल्पे तु यद्रूपं दधार असुरनाशनं ॥ ११ ॥
वेदोद्धारकरं विष्णुं रणे वीक्ष्य न चागतः ॥ तपश्चचार विपुलं दिव्यं वर्षायुतं नृप ॥ १२ ॥ स्थानं संस्थापितं श्री
मत् भृगुणा तदनंतरं ॥ स मत्स्यो भगवानंतः स्थापयामास शंकरं ॥ १३ ॥ देवेशं निखिलाधारं सर्वकारणका
रणं ॥ प्रीत्या परमया तस्य तपस्तप्त्वा पुरा महत् ॥ १४ ॥ मत्स्येश्वराख्यं पार्थ पुराणैर्वेदि दुर्बुधाः ॥ स्थापितं म
त्स्यकल्पादौ कृतांतभयनाशनं ॥ १५ ॥ रेवाया उत्तरे कूले कलिकल्मषनाशनं ॥ स्थापना भृगुतीर्थस्य श्वे
तकल्पादिसंभवा ॥ १६ ॥ पुराकल्पेषु वं चैव मत्स्येश्वरमनुत्तमं ॥ स्थापितं परया भक्त्या मत्स्यरूपेण वि
ष्णुना ॥ १७ ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेन्मत्स्यकेश्वरं ॥ अश्वमेधस्य यज्ञस्य प्राप्नोति फलमद्भुत ॥ १८ ॥
स्नापनं देवदेवस्य दध्ना मधुघृतेन वा ॥ यः करोति विधानेन तस्य पुण्यफलं शृणु ॥ १९ ॥ घृतक्षीरवहा
नद्यो यत्र वृक्षा मधुस्रवाः ॥ तत्र ते मानवा यांति प्रसन्ने मत्स्यकेश्वरे ॥ २० ॥ दधिभक्तेन देवस्य यः कुर्यात्
लिंगपूरणं ॥ सिक्थसंख्या शिवलोके सर्वसेत्सुरपूजितः ॥ २१ ॥ श्रीफलैः पूरयेल्लिंगं गणो भूत्वा शिवस्य तु
॥ सोऽपि तत्फलमाप्नोति तीर्थस्यास्य प्रसादतः ॥ २२ ॥ पत्रं पुष्पं फलं तोयं योऽदद्यान्मत्स्यकेश्वरे ॥ तत्सर्वं म
क्षयं पार्थ सप्तजन्मनि जायते ॥ २३ ॥ मत्स्यकेश्वरमत्स्योऽवतरीतस्य भारत ॥ सर्वेषामेव पात्राणां महा
पात्रं महेश्वरः ॥ २४ ॥ तस्मात्सर्वप्रयत्नेन तोषयेत्तं नृपोत्तम ॥ शांतो दांतो ब्रह्मचारी यो नित्यं पूजयेच्छि
वं ॥ २५ ॥ इह जन्मनि देवेशो मतो गच्छेदनामयं ॥ मत्स्यमत्स्येश्वरे वापि पूजिते यत्फलं लभेत ॥ २६ ॥ ॥ ३०४

611
2008

योगिनां पूजये इत्तथा तत्फलं लभते नरः ॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितं ॥ २७ ॥ येषां गृहेषु भुंजंति
शैवा वा वैष्णवा वा नृप ॥ संनिरुद्धेंद्रियग्रामो यत्र यत्र वसेन्मुनिः ॥ २८ ॥ तत्र तत्र कुरुक्षेत्रं नैमिषं पुष्करं गया ॥ य
त्फलं वेदविदुषि भोजिते कोटिसंख्यया ॥ २९ ॥ तत्फलं जायते राजन्नेकेन शिवयोगिना ॥ मत्स्यकेश्वरमासा
द्य प्राणत्यागं करोति यः ॥ ३० ॥ न तस्य पुनरावृत्तिः शिवलोकात्कदाचन ॥ अष्टम्यां वा चतुर्दश्यां मासि मा
र्गशिरे शुभे ॥ ३१ ॥ मत्स्येशं पूजयेद्भक्त्या सर्वतीर्थफलं लभेत् ॥ ३२ ॥ ॥ इतिश्री रेवाखंडे वायुप्रोक्तसंहि
तायां भृगुकच्छमा० मत्स्येश्वरतीर्थं ॥ ॥ मार्कं० ॥ देवतीर्थं ततो गच्छेच्चत्वारिंशत्क्रमांतरे ॥ यत्र सिद्धा लोक
पालादेवाः सेंद्रा दिगीश्वराः ॥ ३३ ॥ भृगोः पुत्र्या यदुद्वाहे देवाः सर्वे निमंत्रिताः ॥ समागतास्ततो जाते विवाहे
विष्णुना सह ॥ ३४ ॥ भृगुः स्वस्थानसिद्ध्यर्थं प्रार्थयामास तान्सुरान् ॥ यूयं सर्वे लोकपालादिक्पाला समुपस
मागताः ॥ ३५ ॥ मम पुत्र्या विवाहे वै कृपां कृत्वा परां मयि ॥ स्थानं भवेत्तत्सकलं दृश्यते सार्थकं सुराः ॥ ३६ ॥
स्थिते इति वदिरत्रैव तस्मात्तिष्ठत सुव्रताः ॥ अंशेर्वा प्रीतिमिच्छंतो विष्णुना प्रभविष्णुना ॥ ३७ ॥ अहं विष्णुर्ब्र
ह्मणो मान्यपात्रं भवद्भिस्तद्भद्रं चं कार्यमेव ॥ पाल्यं ते वै सर्वलोका यथैव स्थानं चैतेत तत्पालनीयं तथैव
॥ ३८ ॥ मार्कं० ॥ भृगुणा प्रार्थितास्त्वेवं सर्वे तत्रैव चास्थिताः ॥ रेवातीरे सुगंभीरे पुण्यतीरे मनोहरे ॥ ३९ ॥
देवैश्च ऋषिभिः सिद्धैः स्थानं यत्सेवितं पुरा ॥ तत्र तीर्थे तपस्तप्त्वा स्थापयित्वा परं शिवं ॥ ४० ॥ स्थित्वाश्वि
श्वनिर्जैर्देवास्तमाद्युक्त्वयस्ततः ॥ तदा प्रभृति राजेंद्र देवतीर्थमिति श्रुतं ॥ ४१ ॥ स्नानं दानं जपो होमः
स्वाध्यायो देवतार्चनं ॥ तत्र तीर्थे कृतं पार्थ भवेत्सर्वं तदक्षयं ॥ ४२ ॥ कृष्णपक्षे त्रयोदश्यां स्नात्वा श्राद्धं स
माचरेत ॥ मध्वाज्यपायसैर्विप्रान्भोजयेच्छक्तितो नृप ॥ ४३ ॥ देवैः संस्थापितं देवं संपूज्यं वृषभध्वजं
॥ सर्वपापविनिर्मुक्तो देवलोके प्रमोदते ॥ ४४ ॥ ॥ इतिश्रीरेवा० भृगुकच्छे देवतीर्थं ॥ ॥ मार्कं० ॥ ततः

रे॰खं॰ शतं ततो गच्छेधनुषां तीर्थमुत्तमं॥ शिखीतीर्थं नृपश्रेष्ठ सर्वदुःखविनाशनं॥ शतसंवत्सरे यज्ञे नृपस्य तु व
सोः पुरा॥ बभूव पूर्णयज्ञे वै द्वादशाब्दधृताहुतीः॥२॥ गजांशुप्रमाणेन पूर्णाहुतिरविश्रमा॥ परितप्ताः प्र
३०५ मुंसंनाश्च तत्र देवास्तु कोटिशः॥३॥ ब्रह्मविष्णुशिवमुख्यास्ते स्वस्वप्रीत्यावशान्नदुः॥ किंतु ग्लानिमगा
द्वह्निः मंदतेजाश्च तमुवः॥४॥ मलीमसनस्त्वग्निमाघं लज्जमानो विनिर्ययौ॥ पितरं सभृगुं प्राप्य प्रणम्या
ख्यातुमुद्यतः॥५॥ बलहीनो यदा वक्तुं न शक्नोति विभावसुः॥ तदा ज्ञानबलात्सर्वं ज्ञातवान्भृगुर
यतः॥६॥ भृगुरुवाच॥ ॥वह्ने त्वमत्र रेवायास्तीरे तीव्रं तपश्चर॥ तोषयन्तपसा शर्वं ततः सिद्धिम
वाप्स्यसि॥७॥ ततः सभृगुणा प्रोक्तस्तपस्तत्रैव तप्तवान्॥ त्रिसन्ध्यायी धूर्जटीध्यायी जलाशी मारुताशनः
॥८॥ एवं दिव्यं द्वादशाब्दं तपस्तेपे हुताशनः॥ स्थापयित्वा शिवं शांतं पुरस्तं प्रत्यपूजयत्॥९॥ ततः प्र
सन्नो भगवान् प्रददौ तस्य वांछितं॥ शिखादीप्तिर्बलं तेजः पूर्वस्मादपि चोत्तमं॥१०॥ अदोषं चैव सर्व
त्र ज्वलमानस्य धूर्जटिः॥ मार्कं॰॥ ततः प्राप्य वरान्पार्थ प्रणम्य परमेश्वरं॥११॥ प्रीतश्च प्रययौ दिव्यं
स्वस्थानं सुरपूजितः॥ ततः प्रभृति विख्यातं शिखितीर्थं युधिष्ठिर॥१२॥ तपस्तेपे परं यत्र शिखार्थं हव्य
वाहनः॥ शिखां प्राप्य शिखी भूयो देवं स्थाप्य शिखीश्वरं॥१३॥ प्रतिपच्छुक्लपक्षे या भवेदश्वयुजे नृप॥
शिखीतीर्थे तदा स्नात्वा तर्पयेत्पितृदेवताः॥१४॥ हिरण्यं ब्राह्मणे दद्यात्संतर्प्य च हुताशनं॥ नानावि
धोपचारैश्च पूजयित्वा शिखीश्वरं॥१५॥ अनेन विधिना तीर्थे समाराध्य महेश्वरं॥ विमानेनार्कवर्णे
न अप्सरोगणसेवितः॥१६॥ गीयमानस्तु गंधर्वैर्देवलोकं स गच्छति॥ शत्रुक्षयमवाप्नोति तेजस्वी पु
त्रवान्भवेत्॥१७॥ ॥इति श्रीरेवामहात्म्ये भृगुक्षेत्रे शिखीतीर्थं॥ ॥मार्कं॰॥ चतुःशतांतरे ग
त्वा दंडानां भरतर्षभ॥ गंतव्यं कोटितीर्थं तु सर्वपापप्रणाशनं॥१८॥ बदर्याः समनुप्राप्तो नरनाराय ३०५

णावृषी॥ रेवाया उत्तरे कूले भृगुक्षेत्रे यदा नृप॥ सर्षेर्नारायणस्याभूद्विवाहश्च श्रिया सह॥ तदा तु ऋषयः प्राप्ता 613/2008
स्तत्र वै कोटिसंख्यया॥ श्रुत्वा भृगोश्चरित्रं वाप्यतुलं ते तपोधनाः॥२०॥ कश्यपोत्रिर्भरद्वाजो विश्वामित्रोथ गौत
मः॥ जमदग्निर्वसिष्ठश्च साच्यवनः पैंग्य एव च॥२१॥ असितो देवलश्चैव तथा नारदपर्वतौ॥ मातंगश्चा
पहारीतो जातकर्ण्योथ बाष्कलः॥ शाकल्यः शौनको मंगुर्मंडूकः सौभरीर्यमः॥ ऋतुर्वेदःशिराः सोम्यश्च
खोथ लिखितस्तथा॥२३॥ इत्येते माघस्त्रषयस्तथान्येपि च कोटिशः॥ श्रियो विवाहे निवृत्ते दक्षाद्वानं सरिद्वरां
॥ स्थाने स्थितास माधिःस्थाः शंभोराराधनेच्छया॥ तपश्चक्रुश्च विपुलं वर्षाण्ययुतसंख्यया॥२५॥ स्थापयि
त्वा परं शंभुं लिंगरूपं सनातनं॥ मंत्रैर्नानाविधैस्तत्र पूजयंतः पृथक् पृथक्॥२६॥ ततस्तुष्टो महादेव उम
या सह शंकरः॥ प्रत्यक्षस्तानृषीन्प्राह वरयध्वं वरं द्विजाः॥२७॥ ऋषय ऊचुः॥ यदि तुष्टोसि देवेश यदि देयो
वरो हि नः॥ अत्र स्थाने महादेव सान्निध्यं कर्तुमर्हसि॥२८॥ ऋषिकोटिकृतं तीर्थं तत्कोटितीर्थं हि नामतः
॥ ख्यातं सदा महादेव लोकानां भुक्तिमुक्तिदं॥२९॥ आयतां भवता पश्चात्तथा देहि सुरेश्वर॥ तथा तस्तप
सा सिद्धिः सदैवास्त्वखिलतास्तु च॥३०॥ ॥महादेव उवाच॥ ॥कोटितीर्थमिदं विप्रा मत्प्रसादाद्भविष्यति
ति॥ नाम्ना कोटीश्वरश्चाहं लोकानां वांछितप्रदः॥३१॥ भविष्यामि न संदेहस्तपःसिद्धिस्तथास्तु वः॥ इत्युक्त्वा
स महादेवस्तत्र लिंगे लयं ययौ॥३२॥ एवं संस्थाप्य तीर्थं तं मुनयः शंसितव्रताः॥ गतागताभवंतीह भृगोः प्री
त्या भृगुस्थले॥३३॥ तीर्थे कोटीश्वरं नाम ये पश्यंति महेश्वरं॥ तस्य दर्शनमात्रेण कोटितीर्थफलं लभेत्॥
तथा कोटीश्वरीं देवीं मुनिभिः स्थापितामुमां॥ त्रिशूलासिचक्रिकाहस्तां चामुंडां महिषार्दिनीं॥ कृष्णपक्षे चतु
र्दश्यां मासि भाद्रपदे नृप॥ कोटिशस्तत्र तीर्थानि समायांति ततस्ततः॥३६॥ ऋषिस्थापितः शंभुः शा
म्भवी शक्तिसंयुतः॥ तस्यां तिथावुपोष्येह सर्वपातकसंक्षयः॥३७॥ तत्रतीर्थे समागत्य स्नात्वा वि

रे०खं० ध्यानतः॥ माघफाल्गुनयोर्मध्ये प्रभूतायां वा युधिष्ठिर ॥३८॥ नरकादुद्धरस्याशु पुरुषानेकविंशतीं॥ तिलो
३०६ दकप्रदानेन किं पुनः श्राद्धदो नरः॥३९॥ स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनं॥ तत्तीर्थस्य प्रभावे
नसर्वं कोटिगुणं भवेत्॥४०॥ अष्टम्यां चतुर्दश्यां पक्षयोरुभयोरपि॥ कृत्वा स्नानं सदा पार्थ भक्तिभावेन
संयुतः॥४१॥ तिलोदकं तथा श्राद्धं पितॄणां चिरतृप्तिदं॥ हृष्टपुष्टाश्च पितरस्तस्मायांति शिवालयं॥४२॥
एवंविधं कोटितीर्थं रेवायां भृगुतीर्थगं॥ सर्वपापहरं पार्थ सर्वदुःखविनाशनं॥४३॥ उपपापानि नश्यंति स्ना
नमात्रेण भारत॥ अष्टम्यां वा चतुर्दश्यां अमुपवासपरो नृप॥४४॥ चतुर्थां पूजयेल्लिंगं तस्य पुण्यफलं शृणु॥
ब्रह्महत्यादि पापानि नश्यंते च न संशयः॥४५॥ सोश्वमेधस्य यज्ञस्य लभते फलमुत्तमं॥ स्वर्णान्नजल
वस्त्राणां दानैः संतोषयेद्द्विजान्॥४६॥ पादुकोपानहौ छत्रदानैस्तुष्येन्महेश्वरः॥ कमंडलुप्रदानं च तत्रती
र्थे प्रशस्यते॥४७॥ भोजनाच्छादनैः पार्थ यतींश्च परितोषयेत्॥ सयाति परमं स्थानं यत्र देवो महेश्वरः॥
॥४८॥ पिंडादिकं तत्र कृत्वा पितॄणां परिकल्पयेत्॥ तत्र यद्दीयते दानमपि वालाग्रमात्रकं॥४९॥ तदक्ष
यफलं सर्वमित्येवं शंकरोब्रवीत्॥ कोटीश्वरे मृतानां च नराणां भावितात्मनां॥५०॥ अनिवर्तागतिस्ते
षां शिवलोकात्कदाचन॥ अथ चेत्स्वर्लोकवत्यर्थं मर्त्यलोकं जिगीषति॥५१॥ वेदवेदांगतत्त्वज्ञो जायते वि
पुले कुले॥ धनधान्यसमायुक्तो विद्यावित्तसमन्वितः॥५२॥ सर्वव्याधिविनिर्मुक्तो जीवेच्च शरदः श
तं॥ एतत्पुण्यं पापहरं कथितं नृपसत्तम॥५३॥ कोटितीर्थस्य माहात्म्यं यः शृणोति युधिष्ठिर॥ तीर्थको
टिषु यात्रा च स्नात्वा तत्फलमश्नुते॥५४॥ ॥ इति श्रीनर्मदामाहात्म्ये भृगुक्षेत्रे कोटितीर्थं॥ ॥
मार्कंडेय उ०॥ ततो दंडसहस्रांते गच्छेत्तीर्थं पितामहं॥ विख्यातं भृगुकच्छांतः सर्वपापप्रणाशनं॥१॥
तत्र तीर्थे महापुण्यं पुरा वर्षशतत्रयं॥ आराधनं कृतं शंभोर्ब्रह्मणा परमेष्ठिना॥२॥ युधिष्ठिर उ०॥ किमर्थं न ३०६

रत्नाढ्य क ब्रह्मा लोकपितामहः॥ आराधयति देवेशमेतत्कथय मे प्रभो॥१॥ मार्कंडेय उवाच॥ शृणु राजन्पुरा दृ
ष्टं मेरुपृष्ठे महात्मना॥ सष्टा तिलोत्तमां नारीं ब्रह्मा विस्मयमागतः॥२॥ यदुत्तमं यत्परमं यच्च योयच्च रूपवत्
॥ ततस्तां शोभादायिकं लक्षणासा विनिर्मिता॥३॥ उपमानात्तु सर्वस्मात्तिले नाप्युत्तमा यतः॥ तिलोत्तमेति नाम
स्याद्दैवं ब्रह्मा स्वयं नृप॥४॥ तां दृष्ट्वा च वरांगी रूपलावण्यसंयुतां॥ सद्यः स स्मरशरैर्विद्धो वैयग्र्यं परमं गतः॥
॥५॥ देवर्षीर मुख्येषु स्थितेष्वपि नृपोत्तम॥ सर्षि सिद्धेषु निर्लज्जः सर्वं विस्मृतवान्विभुः॥६॥ स्वपुत्रि
काभिगमनं तदा वांछन्पितामहः॥ तं च देवं हि तत्र ज्ञो नवांवि स्मृतवानसि॥७॥ वेदास्त्वतो न स्थास्यंति त्ता
नं च कमलासन॥ अपूज्यः सर्वलोकानां भविता त्वं न संशयः॥ दुर्लया देव सावित्री तव शापं प्रदास्यति॥
मार्कंडेय उ०॥ एवं शापांकुशाक्रांतो विरंचिः कृत्तिवाससः॥८॥ विकाद्गीर्य्य चित्ते स्वे ततः खेदाच्च तां बहु॥
रेवाया उत्तरे कूले लज्जितस्त्वमुमागतः॥१०॥ पश्चिमादुदधेः पार्श्वे चत्वारविपुलं तपः॥ आराधयामास
विभुं सर्वलोकैकमहेश्वरं॥११॥ शापानुग्रहशक्तं च सर्वज्ञं सर्वकारणं॥ ब्रह्मा उवाच॥ नमामि ते पादयुगं
जपत्यते पुरांधकारे पुरुषोत्तमप्रिय॥१२॥ त्वत्तो हि नान्या गतिरस्ति मे प्रभो प्रसीद पाहीश्वर मामिहा
नतं॥ त्वत्प्रसादं जानितं हि कर्म मे सर्गलक्षणमिदं महेश्वर॥ तत्र मोहरचनाभवत्कृतया मया पिप
रिमोहिनी विभो॥१३॥ कोहं कस्त्वं कस्य कः शापलंभः कोहं मोहं प्राप्तवान्कः सदोषः॥ योषा भर्गत्वत्कृ
कृता कापि लीला त्वयि प्रकुपिते नाथ मे वशरणं भम॥१४॥ भूमेः स्खलितपादानां भूमिरेवावलंबनं॥
तं दर्शयमहेशानः यस्त्वत्तोधिकतां वहेत्॥१५॥ सर्गपालनसंहारास्त्वत्तएवोद्भवंति हि॥ नत्वा स्तोतुं वि
जानाति यद्गुणांशान् शराजोद्यहं॥१६॥ चतुर्विधा च या वाणी त्वत्तोल संभवायत॥ मूढोहमविनीतोहं मदां
धोनिश्चयः प्रभो॥१७॥ तथापि त्वां प्रयत्नोहं पाहि मे परमेश्वर॥ मार्कंडेय उ०॥ एवं स्तुतवतस्तस्य

615
2008

नेभसस्थापितासुरः॥ लिंगाद्दूर्गः समुत्थाय वरं ब्रूहीत्युवाचतं॥१८॥ ब्रह्मोवाच॥ यदि प्रसन्नोसि ममा
द्य भूर्त्ते वरंददासि प्रिय मेजसाचेत्॥ वेदांश्च विज्ञानमनुत्तमं मे भवेद्यथापूर्वमतो विशिष्टं॥१९॥ तथाकुरुष्व
प्रभुतां च सर्वे हरस्व दोषानखिलान्ममेत्र॥ याचेक पदिं न किमपीह नान्यत् प्रभुस्त्वमेवासि चराचरस्य॥
॥२०॥ अद्यप्रभृति तीर्थेस्मिन्मम नाम्नातु धूर्जटे॥ सहो मया त्वयास्थेयं लोकानां हितकाम्यया॥२१॥
महेश्वर उवाच॥ एवं सर्वं तवाविधे भविष्यति न संशयनः॥ तथाहमत्र स्थास्यामि तव प्रीत्या सहो मया॥
॥२१॥ एवमुक्त्वा महादेवस्तत्रैवांतरधीयत॥ ब्रह्मापि स्थापितं त्वार्वीं पूजयित्वा विधानतः॥२२॥ गतागत
स्तत्र तिष्ठेन्नित्यं शांशेन युधिष्ठिर॥ मार्कंडेय०॥ पितामहेश्वरं तीर्थं तदाप्रभृति विश्रुतं॥२३॥ सर्वपापह
रं पुण्यं सर्वतीर्थेष्वनुत्तमं॥ तत्र भाद्रपदे मासि वैशाखे वा युधिष्ठिर॥ अमावास्या दिने पुण्ये स्नात्वा सं
तर्पयेत्पितॄन्॥२५॥ पिंडदानेन विधिना तिलतोयेन वा पुनः॥ तृप्यंति पितरस्तस्य यावदाभूतसंप्ल
वं॥२६॥ पितामहेन नरः स्नात्वा पूजयेद्यो महेश्वरं॥ देवं पितामहं चापि धूपहारैरनुत्तमैः॥२७॥ स मुच्य
ते न संदेह पातकैश्चोपपातकैः॥ वस्त्रं प्रावरणं धोत्रं छत्रोपानह चंदनं॥ तीर्थे पितामहे दत्तं सर्वं भव
ति चाक्षयं॥ वेदपारायणं तत्र कुर्याद्यः कारयेत वा॥२९॥ पुराणपठनं वापि तस्य तुष्येत्पितामहः॥ गा
यत्रीजाप्यमथवाथः कुर्यात्तत्रैव द्विजः॥३०॥ स याति परमं स्थानं यत्र गत्वा न शोचति॥ इति ते कथितं
पार्थ तीर्थं पैतामहं मया॥३१॥ श्रुतेपि यस्य महात्म्ये पूतो भवति मानवः॥ अग्निष्टोमातिरात्राभ्यां फलं
यत्सम्मुदाहृतं॥३२॥ संध्ययोरुभयोः श्रुत्वा महात्म्यं तदवाप्नुयात्॥ एवं तव मयोक्तानि भृगुक्षेत्रे च
मध्यतः॥३३॥ तीर्थान्युच्चावचानीह शृणु तान्यपि नामतः॥ पिंगलेश्वरमारभ्य यावत्पैतामहं नृप॥
॥३४॥ चत्वारिंशत्तथा षट् च तानि वक्ष्याम्यशेषतः॥ कल्पे ख्यातानि मान्यस्मिन्नेतेषां सिद्धिरुत्तम ३०७

617/2008

कल्पे कल्पे महातीर्थं नष्टक्षेत्रे स्थायुधिष्ठिर॥ प्रभूतानि तराणि स्युर्विशेषाणां च संभवः॥ श्रुत्वै तेषां हि नामा
नि प्रत्यहं संध्ययोरपि॥३६॥ वाङ्मनः कायशुध्यस्तत् पठन्वापि समाहितः॥ नानाविधैर्नरः पापैः संतापै
श्च विमुच्यते॥३७॥ वाजपेयस्य यज्ञस्य सम्यगिष्टस्य यत्फलं॥ तत्फलं समवाप्नोति नात्र कार्या विचारणा
॥३८॥ तीर्थानां परमं तीर्थं प्रथमं पिंगलेश्वरं॥ ततो भूतीश्वरं नाम सैंधवायतनं महत्॥३९॥ शंखोद्धारं परं
तीर्थं गौतमेश्वरमुत्तमं॥ दशाश्वमेधतीर्थं च भृगुतीर्थमतः परं॥४०॥ सौभाग्यसुंदरी तीर्थं केदारं च त
ततो नृप॥ धूतपापं च दशामं एरंडीतीर्थमेव च॥४१॥ कनकेश्वरी सुतीर्थं च ज्वालेश्वरमतः परं॥ शाल
ग्रामं सोमनाथं वाराहं षोडशं नृप॥४२॥ चंद्रप्रभासतीर्थं च द्वादशादित्यमेव च॥ सिद्धेश्वरं कापिलं च त्रि
विक्रममतः परं॥४३॥ विश्वरूपं तथा तीर्थं तीर्थं नारायणस्य च॥ मूलश्रीपति संज्ञं च चौल श्रीपतिसंज्ञकं
॥४४॥ देवतीर्थं हंसतीर्थं प्रभातीर्थमतः परं॥ मूलस्थानं कटेशाश्च अट्टहासं च भूर्भुवं॥ त्रयस्त्रिंशत्तमं
पार्थ तीर्थं शूलेश्वरं विदुः॥ सारस्वतं दारुकेशं षट्त्रिंशं चाश्विसंज्ञकं॥४६॥ गोनागोनीति विख्यातं
सावित्रीतीर्थमेव च॥ बालरिवल्मीनमदिशं मालतीर्थं च भारत॥४७॥ मत्स्यकेश्वरसंज्ञं च देवतीर्थमतः
परं॥ शिखीतीर्थं कोटितीर्थं तीर्थं पैतामहं ततः॥४८॥ एतन्मात्रं भृगुक्षेत्रे विद्धि पांडवसत्तम॥ यत्र स्ना
त्वा च पित्वा च नरः शंकरलोकभाक्॥४९॥ एतत्ते कथितं स्थानं शृणु तीर्थान्यतः परं॥ पश्चिमध्यावधं
यावद्दक्षिणोत्तरतीरयोः॥५०॥ ॥ इति श्रीवायुपुराणे रेवाखंडे पितामहं तीर्थं॥ ॥मार्कंडेय०॥
ततो गच्छेन्महाभराज नर्मदा दक्षिणे तटे॥ कोशद्वयांतरे प्राप्ते मार्कंडेश्वर तीर्थं ततः॥१॥ अंकुरेश्वरपा
र्श्वे तु मांडव्येश्वरसंततिं॥ त्रिषु लोकेषु विख्यातं पवित्रं पापनाशनं॥२॥ संसिद्धो यत्र मांडव्यो मुनिर्नारा
यणस्तथा॥ नारायणेन शुश्रूषा ज्येष्ठे भूत्वा भृतः कृता॥३॥ देवख्यातं सरस्तत्र स्नानात्पापप्रणाशनं॥

रे०खं० तत्रस्नात्वामहाजेरो मुच्यते पापसंकटात्॥४॥ युधिष्ठिर उवा०॥ आश्चर्यभूतं लोकस्य यत्त्वया कथितं द्विज॥
नदृष्टं नश्रुतं तात भूलस्मिन्पृते कृतं॥५॥ मुनिनातेन विप्रर्षेतत्र मे कारणं महत्॥ तन्मे कथय सर्वत्वं मुनिभिः
३०८ सहितं मुने॥६॥ मार्कंडेय उ०॥ शृणु राजन् पुरावृत्तं तत्र त्रेतायुगे स्थितो॥ लोकपालोपमो ह्यासीद्देवरासीन्नृपो
त्तम॥७॥ सगांरस्तृतिय ज्ञेन पुत्रवत्पालयन्नृद्विजाः॥ दाक्षायिनी प्रियातस्य भर्तुश्चित्तवशानुगा॥८॥ पर
स्परं सदा प्रीतिर्वर्द्धते मुदातयोः॥ वंशस्तंबेस्थितो राजा शास्त्रास पृथिवीमिमां॥९॥ हस्त्यश्वरथसंपूर्णो
धनवाहनसंयुतः॥ परिपूर्णो गुणैः सर्वैर्नपत्यस्य भूपतिः॥ दुःखेन महताविष्टः संतप्तः संततिं विना॥ स्ना
नहोमजपध्यानपूजनैः परमेश्वरीं॥११॥ व्रतोपवासनियमैः सपत्नीको नराधिपः॥ दुर्गामाराधयामास
देवीं दुःखार्त्तिहार्त्तिहारिणीं॥१२॥ शिवं शिवं प्रदां चंडीं चंडमुंडविनाशनीं॥ स्तोत्रैर्नानाविधैर्भक्त्या पूजा
विधिसमाधिना॥१३॥ राजोवाच॥ मयाराधितया लोका प्राप्नुवंतीप्सितं फलं॥ तां नमामि विधेः शक्तिं ना
नासर्गविचक्षणां॥१४॥ यां प्रपद्यैव लोकास्य राधिव्याधिविनाकृता॥ तां वंदे वैष्णवीं शक्तिं संसारभय
नाशनं॥१५॥ ऐश्वर्यसुखसंतानसंपन्नं स्यादिदं जगत्॥ यद्भक्त्या शांकरी शक्तिं तां नमामि वरप्रदां॥
॥१६॥ स्वपदानि सुराः सर्वे याम वाप्यापुरं जसा॥ यः सपत्नकरी शक्तिं कौमारीं नौमितांपरां॥१७॥ दुः
खार्त्तिदैन्यदैत्यघ्नीं हिरण्याक्षविनाशिनीं॥ शक्तिं वंदे तु वाराहीं धरोद्धुरकर्मणां॥१८॥ हिरण्यकशि
पोः पूर्वं वक्षस्थलविदारिणीं॥ नतोस्मि नारसिंहं तां शक्तिं सर्वाभयप्रदां॥१९॥ यामवाप्य पुराः सर्वे वित
न्वंति सनाथतां॥ तां वंदे परमां शक्तिं शक्तिं कुलिशपाणिनीं॥२०॥ जय देवि प्रपन्नार्त्तिहारिणि त्राण
कारिणि॥ जय वाराहि चामुंडे चंडमुंडविनाशिनि॥२१॥ त्रियंबिके शिवे ब्राह्मी कौमारी कुलिशायुधे॥
कात्यायनी माहामाये नारायणी नमोस्तु ते॥२२॥ नास्ति किंचित्वया हीनं त्रैलोक्ये सचराचरे॥ अत ३०८

स्त्वां नौमि नौम्यार्त्तस्त्वां नौमि परमेश्वरी॥२३॥ मार्कं०॥ एवं राजा स्तुता देवी तुष्टा वचनमब्रवीत्॥ मध्यरात्रे
विविक्ते तु पूजया च प्रतोषिता॥२४॥ श्रीदेव्युवाच॥ प्रसन्नास्मि नृपश्रेष्ठ वरं वरय वांछितं॥ आराधि
तास्त्वया भक्त्यास्तुत्या च परितोषिता॥२५॥ याचतो नृप दास्यामि तवाद्य यदभीप्सितं॥ देवरात उवाच॥
यदि तुष्टासि मे देवी वराहो यदि वाप्यहं॥२६॥ पुत्रसंतानरहितं संतप्तं मां स भुङ्कुर॥ देहि संतानवृद्धिं मे गो
त्ररक्षां तथा कुरु॥२७॥ अपुत्रीणां गृहाणीह स्मशानैः सदृशानि वै॥ पितरस्तत्र नाश्नंति देवाश्च सह
मानुषैः॥२८॥ क्रियमाणेप्यहरहः श्राद्धे भक्तपितरः सदा॥ दृश्यंते बहुशः स्वप्ने निश्वासस्तु सुपीडिताः॥
॥२९॥ मार्कंडेय०॥ तस्य राज्ञो वचः श्रुत्वा देवी ध्यानमुपागता॥ दिव्येन चक्षुषा दृष्ट्वं त्रैलोक्यं सचराचरं॥
॥३०॥ अप्रस्फुटमुखापश्चाद्धारा जानमिदमब्रवीत्॥ देव्युवाच॥ संतानं नास्ति ते राजन् न मया दृष्टमने
कधा॥३१॥ यज स्वयज्ञपुरुषं प्रजापतिपतिप्रभुं॥ भविता तव पुत्री तितथापि न तु पुत्रकः॥३२॥ मया दृ
ष्टो महीपाल तत्तो षा दुहिता गभः॥ एवमुक्त्वा तर्हि ता देवी राजाप्यगान्गृहान्स्वकान्॥३३॥ इयाज यज्ञ
पुरुषं संजाता तेन कन्यका॥ तेजोगुणवती तन्वी सर्वलोकमनोहरा॥३४॥ दिव्यगंधर्वनागानां लोके च
स्ति न तत्समा॥ तस्य नाम कृतं पित्रा हर्षात्कामोदिनीतीयत॥३५॥ हंसलीलागतिः सुभ्रुः पीनोन्नतपयो
धरा॥ शुक्लमाल्यांबरधरा कुंडलाभरणोज्वला॥३६॥ कुचमध्यगतो हारो विद्युत्सौदामिनी यथा॥ भ्र
मरांचित्तकेशासा बिंबोष्ठी चारुहासिनी॥३७॥ लोचनैर्नीत्तहर्षाभ्यां माकर्षति वादिगाजान्॥ पुष्पतांबूल
कर्पूरे कामशक्तिरिवापरा॥३८॥ पित्रोः प्रीतिः सखीनां च क्रीडं त्या नंदवर्द्धिनी॥ येकदा नृपसा बाला सखी
जनसमावृता॥३९॥ चंदनागरुतांबूलपुष्पाक्षतफलानि च॥ गृहीत्वा निर्गता बाया पूजनार्थे सरस्तटे॥
मुक्ताभूषणवासांसि जलोपांते शुभेक्षणे॥ स्नातुं जलविहारार्थं तडागांतर्विवेशसा॥ क्रीडमाना सखी

619
2008

रे० खं० स्नुकातिष्ठते यावत्ताजले ॥ तद्रूपेयाधिपुरुषेर्वै ऊस्त्रीभिश्च रक्षिता ॥ ४२ ॥ तावता शंबरो दैत्यः श्येनरूपेण
चागतः ॥ गृहीत्वा जलमध्यस्थां भाययां तद्दंधेरिपुः ॥ ४३ ॥ वस्त्राभरणजातं च पश्यतस्तद्धारचं ॥ नीत्वा का
३०९ मोदिनी दैत्यः खमुत्पत्य जगाम ह ॥ ४४ ॥ वायुमार्गे गतस्यास्य कामोदिन्या समंततः ॥ अपतत्कुंडलादीनि क
राद्याभरणानि च ॥ ४५ ॥ गच्छंत्या स्खलितिवेगेन स्थितो यत्र महामुनिः ॥ मांडव्यो नर्मदातीरे योगध्यानरतो मुनिः
॥ लीनो महेश्वरपदे द्विविनारायणात्मके ॥ यवीयान्तस्य च भ्राता भ्रातुः शुश्रूषणे रतः ॥ ४७ ॥ तपसा चक्रशी
भूतो ध्यायमानो जनार्दनं ॥ ४८ ॥ ॥ इतिश्रीरेवामहात्म्ये कामोदिनीहरणं नाम ॥ ॥ अथ कामोदि
नीसख्यो नीयमानां खवेगेन तु ॥ दृष्ट्वा क्रोशंतिसर्वास्तानिः सत्य च जलाद्बहिः ॥ गत्वा राजकुलं सर्वा कथयंति
स्व दुःखिताः ॥ स्त्रिय ऊचुः ॥ हृता कामोदिनी राजन्केन चित्तश्येनरूपक्षीणा ॥ २ ॥ क्रीडंति सा जले पाते तडा
गे देवसंनिधौ ॥ अन्वेष्टव्या महाराज लसंथायदि दृश्यते ॥ ३ ॥ मार्कंडेय० ॥ ततस्तद्वचनाद्राजा हाहेत्युक्त्वा
समुत्थितः ॥ दुःखितो व्याकुलो दीनो हाहेत्युक्त्वा वरासनात् ॥ ४ ॥ वज्रपातसमं वाक्यं श्रुत्वा च पतितो भुवि ॥
मंत्रिभिश्च समाश्वस्तः पुनरुत्थाय भूपतिः ॥ ५ ॥ मार्कं० विलोकयामास जनांश्च प्रेषयद्दिशः ॥ न चिह्नं न च
तन्मार्गे पदं वा प्राप्य दुःखितः ॥ ६ ॥ तस्य राज्ञः सुदुःखेन दुःखितो नागरोजनः ॥ क्षणादाश्वासितो राजा
मंत्रिभिः सपुरोहितैः ॥ ७ ॥ किं कार्यमित्युवाचेदं सांप्रतं किं कृतं भवेत् ॥ स सर्वैः संविदं कृत्वा वाहिनीं चतु
रंगिणीं ॥ ८ ॥ प्रेषयामास सर्वासु दिक्षु हास्त्यश्वसंकुलं ॥ संनद्धश्चाभवद्राजा गगनं गांग्रसंनिव ॥ ९ ॥
नैवं देवो न गंधर्वो न दैत्यो वा न राक्षसः ॥ किं करिष्यत्यसौ राजा न विघ्नो रोषनिश्चितं ॥ १० ॥ इति चिंतय
न्लोकान्दमानेमुहुर्मुहुः ॥ एतस्मिन्नंतरे तावद्दंड वासिसमागतः ॥ ११ ॥ गृहीत्वाभरणं तस्य स्वर्णगप्रत्यं
गदेहजं ॥ निवेद्या कथयद्राज्ञे मया दृष्टेत्व वेक्षणात् ॥ १२ ॥ तपोवनाश्रमे राजन्ब्राह्मणो यत्र तिष्ठति ॥ ता ३०९

पस्वैश्चितो मौनी दृष्टं स्तस्याश्रमे मया ॥ दंडवासी वचः श्रुत्वा दृष्ट्वा तस्या विभूषणं ॥ क्रोधरक्तास्य नय
नो वीक्ष्य मंत्रैन् स नैगमान् ॥ सभ्रूदंकं प्रोवाच कोपस्खलितवाक्नृपः ॥ ईदृग्विधसमाचारा ब्राह्मणान्
विषये मम ॥ १५ ॥ चौर्यव्रताः व्रतछन्नापरद्रव्यापहारिणः ॥ तेनाद्यलिंगिना पुत्री न हृता मम तपस्विना ॥
॥ १६ ॥ श्येनरूपं समाश्रित्य मम घातः कृतो महान् ॥ पाखंडिनो विकर्मीस्थान् बैडालव्रतिकान् शठान् ॥
॥ १७ ॥ आत्मतः स्कर दुर्वृतान् हत्वैतान् नास्ति पातकं ॥ न दृष्टो ह्यधमः पापः स्तेपीकस्याप हारकः ॥ १८ ॥
शूलमारोप्यतां क्षिप्रं कोविचारोत्र सत्तमः ॥ स वध्यो मम दुष्टात्मा वेषछन्नो हि राक्षसः ॥ १९ ॥ एवमुक्त्वा ज्व
लन्क्रोधाद्दादिशद्दंडनायकं ॥ कार्याकार्यमविज्ञाय सहसा रोषनोदितः ॥ २० ॥ मार्कंडेय० ॥ ततः सानूपवच
नात्कृत्वा तं ब्राह्मणं त्वरन् ॥ धृत्वा बध्वा समानीय शूलप्रोतमथाकरोत् ॥ २१ ॥ ततः पौरजनाः सर्वे साश्रु
कंठेक्षणाभवन् ॥ हाहेत्युत्वा रुदंश्चान्ये वदंत्यन्ये पृथक्पृथक् ॥ २२ ॥ कृतं महत्तेकुत्सितं वै राज्ञा चांडाल
कर्मणा ॥ ब्राह्मणो नैव हंतव्यो विशेषेण च तापसः ॥ सापराधो यदि स्तत्तो निर्वास्यो नगराद्बहिः ॥ न राजा
ब्राह्मणं हन्यात्महापापेष्ववस्थितं ॥ २४ ॥ राष्ट्रादेनं बहिः कुर्यात्समग्रधनमक्षतं ॥ अवध्यो ब्राह्मणो बाल
स्त्री तपस्वी च रोगभाक् ॥ २५ ॥ विहितव्यंगतातेषामपराधे महत्यपि ॥ इतिशास्त्रमतं त्यक्त्वा राजा दुर्नय
वान्यदि ॥ २६ ॥ किं कुर्मः कस्य वा ब्रूम इति जल्पंति वै जनाः ॥ नाश्नंति च गृहे रक्ता नाग्नीन् शुश्रूषयंति च ॥
॥ २७ ॥ उद्विग्नमनसः सर्वे गृहव्यापारवर्जिताः ॥ २८ ॥ ॥ इतिश्रीनर्मदामहात्म्ये मांडव्यशूलारोप
णं नाम ॥ ॥ मार्कंडेय उवाच ॥ अथ तं ब्राह्मणं शूले प्रोतं दृष्ट्वा तपोधनाः ॥ नारायणस्य समीपे च गतास्स
र्वे महर्षयः ॥ १ ॥ नारदो देवलो रैभ्यो यमः शातातपोंगिराः ॥ वसिष्ठो जमदग्निश्च याज्ञवल्क्यो बृहस्प
तिः ॥ २ ॥ कश्यपोत्रिर्भरद्वाजो विश्वामित्रो ध्रुवः ॥ कुत्सशौनकपैंग्याश्च सुमंतुर्मुद्गलारुणिः ॥ वाल

621
2008

रे० खं० खिल्मारयो देवाः सर्वे संभूय सान्वयाः ॥ शूलप्रोतं हितं दृष्ट्वा मांडव्यं मुनिसत्तमाः ॥ इत्युक्त्वा ते न साकं ते मांडव्यां
तिकमागताः ॥ सभ्रातः मनसः प्रोचुः किं मृतः किं नु जीवति ॥ ५ ॥ अवस्थां तस्य ते दृष्ट्वा विषादमगमन्परं ॥
३१० तस्य दुःखमशक्ता के सोढुं सर्वे द्विजोत्तमाः ॥ ६ ॥ ऊचुर्नारायणं सर्वे मांडव्यः पृष्टतां त्वया ॥ सांप्रतं यदि मन्य
तराजानं भस्म कुर्महे ॥ ७ ॥ मार्कंडेय० ॥ तेषां तद्वचनं श्रुत्वा तं वै नारायणो ब्रवीत् ॥ मयि जीवति यद्भ्रातर व
स्थामीदृशीं गतः ॥ ८ ॥ धिक् जातजीवितं मेघ महतातपसा च किं ॥ दृष्ट्वा शूलस्थितं ज्येष्ठं यन्मया न विदीर्य
ते ॥ ९ ॥ अनु जानिहि मां भ्रातर राष्ट्रं सराजकं ॥ भस्मीभूतं करोम्यद्य तत्राज्ञां तात देहि मे ॥ १० ॥ एवमुक्त्वा
गृहीत्वापः करस्थाः अभिमंत्र्य च ॥ क्रोधेन शप्तेयावद्धुंकारस्तावदुः स्थितः ॥ ११ ॥ तेन हुंकारेण शश्चेन
सर्षयो विस्मिताः कुलः ॥ मुनेः समीपमागम्य तमपृच्छन् द्विजोत्तमाः ॥ १२ ॥ सर्षय ऊचुः ॥ निवारय किंचि
प्रशापं नप जिघांसया ॥ येनायं मुनयः क्रूरकृतश्चाधर्मबुद्धिना ॥ १३ ॥ मार्कंडेय० ॥ सर्षीणां वचनाद्विप्र स
भ्रातरिदमथाब्रवीत् ॥ अभिवंदामि वो भूयो शृणुध्वमृषयः स्मह ॥ १४ ॥ अर्घादि पूजा मानर्हान् सामभिस्तानु
पास्य च ॥ निविश्यैकाग्रमनसा मांडव्यो वाक्यमब्रवीत् ॥ १५ ॥ मांडव्य उवाच ॥ प्राप्तं दुःखं मया घोरं पूर्वज
न्मार्जितं वचः ॥ क्रीयतां मा विषादोत्र यतः स्वकृतभुक् नरः ॥ १६ ॥ सर्षय ऊचुः ॥ केन कर्मविपाकेन जंतु
र्जायते नरं व्रजेत् ॥ केन धर्मफलेनाथ केन स्वर्गं च गच्छति ॥ १७ ॥ मांडव्य उवाच ॥ शृणुध्वं सर्षयः सर्वे यस्य
छंततपोधनाः ॥ भवतां नास्त्यविदितं त्रैलोक्ये सचराचरे ॥ १८ ॥ तथापि पूज्यं यस्य श्च कृपास्नेहप्रदर्श
कैः ॥ तत्सर्वं वक्ष्यामि संक्षेपाद्दशक्तोपि यथाबलं ॥ १९ ॥ अदत्तदाना जायंते परभाग्योपजीवनः ॥ नस्ना
नं जपो होमो नातिथ्यं न सुरार्चनं ॥ २० ॥ न पर्वणी पितृश्राद्धं कृतं यैर्द्विजसत्तमः ॥ व्रजंति नरके घोरे जायं
चांत्यजादिषु ॥ २१ ॥ दरिद्रास्तु भवंत्येव पुनः पापं प्रकुर्वते ॥ पापाच्च नरकं यांति तिष्ठंति रेषा द्विजोत्तमाः ॥ ३१०

623/2008

कृमयश्च पतंगश्च गोखश्च गालसरिः सृपाः ॥ मत्स्य कर्कट मार्जार मंडूक मशकादयः ॥ २३ ॥ उलूक गृध्र काकोलव
कलासकपोतकाः ॥ विड्वराहाश्च महिषा कुकुंभस्याः पिपीलिकाः ॥ २४ ॥ इत्येवमादिपापासु जायंते सर्वयोनिषु ॥
॥ २५ ॥ येन स्नानशीला द्विजदेवभक्ताजितेंद्रियादिवदयानुशीलाः ॥ तदेवलोकेषु वसंति हृष्टाः पुनर्धना
ढ्याः पुनरेव नारकाः ॥ २६ ॥ ये धर्मशीला जितमानरोषा विद्याविनीता नपरोपतापिनः ॥ स्वदारतुष्टाः पर
दारवर्जिता तेषां कुत्रापि भयं हि किंचित् ॥ २७ ॥ सर्षय ऊचुः ॥ किं पूर्वजन्मनि कृतं त्वया विप्र सुदुःकृतं ॥ श्रु
त्वा त्वा मागताः सर्वे मन्यमानो मृतं त्वि हि ॥ २८ ॥ जीवंतं त्वां प्रयच्छामो यदि मन्या महे वयं ॥ किं कूर्मः कस्य का
श्रमो न चेज्ञानाति कश्चन ॥ २९ ॥ राजेंसंतनजं दुःखमसह्यातव वेदना ॥ मांडव्य उवाच ॥ सुकृतं दुष्कृतं
सर्वं स्वयमेवोपभुज्यते ॥ ३० ॥ सुकृतं दुष्कृतं विप्रा नान्ये भुंजंति कर्हिचित् ॥ यथा धेनुसहस्रेषु वत्सो विंद
ति मातरं ॥ ३१ ॥ तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ॥ न माता न पिता भ्राता भार्या वा न सुतः सुहृत् ॥ क
र्मयोगभोक्ता वै स्वयमेवोपभुज्यते ॥ श्रूयतां मम वाक्यं वै भवद्भिः पृष्टतो यथा ॥ ३३ ॥ पूर्वं वयसि विप्रे
द्रास्ता नार्थ महमुद्यतः ॥ आप्यंगसमये प्राप्ते नानाबाल प्रसेलसः ॥ ३४ ॥ धृत्वा विद्दोदाद्रुमरि प्रोतामे शूल
कंटके ॥ तदिह पापफलं सद्य इहैव मम भुपागतं ॥ ३५ ॥ तत्त्व मुक्तो क्रियत्कालं प्राशेमोक्षं निरामयं ॥ भवद्भिर्न ह
संतापो धार्यभ्रात्रा यवाद्विजाः ॥ ३६ ॥ इमामवस्थां भुक्त्वाहं किंचित्क्लेषं न रोत्तमे ॥ शूलाधिरोहणं प्राप्तोस्मि
पथि ध्याम्यत स्त्वयं ॥ ३७ ॥ प्राक्तनं कर्म भुंजानो यन्मया संचितं पुरा ॥ भ्रातर्भस्य क्षंतव्यं क्रूरकोपं निव
र्तय ॥ ३८ ॥ मार्कंडेय० ॥ श्रुत्वाय तस्य तद्वाक्यं मांडव्यस्य महर्षयः ॥ रेभिरे हर्षमतुलं साधुसाध्वीप्रपू
जमन् ॥ ३९ ॥ नारायण उवाच ॥ इदं जलं मंत्रपूतं क्व भुंजामि वदस्व तत ॥ येन राजा भवेद्भस्म सराष्ट्रः स
पुरोहितः ॥ ४० ॥ मांडव्य० ॥ इदं जलं तं रक्षस्व कालकूटविषोपमं ॥ क्षिप्स्यामि जलधौ काले देवकार्ये स

मर्थितुं॥४१॥अथते सपयः सर्वे मांडव्यं प्रणिपत्य च॥तमष्टकागहानू अगमुः कश्यपाद्याः सुहर्षिताः॥४२
॥गत्वं त्वस्तिनने चोक्ताः पंचमेहनिमानसः॥ भवद्भिः पुनरेतव्यं भस्मकाशीशिवाज्ञाया॥४३॥ मार्कंडेय०॥
३११ तथेतितेप्रतिज्ञाय प्रतिजग्मुर्यथागतं॥गतेषु विप्रमुख्येषु शांडिलीयात पोधना॥४४॥ द्वितीयेह्नि समा
याता नचाबुध्यत तं मुनी॥ पतिं शिरसि चारोप्य रात्रौ पर्यटते तु सा॥४५॥लुब्धं गलितकुष्ठार्थं करंडक
लपं डिलं॥ कामुकं वहमाना सा त्वरिता गच्छते यदा॥४६॥ नरदृष्टः शूलिकाप्रोक्ता विप्रभारा तयायदा
॥मंडव्यजानुस्खलिताश्चेहल रुष्टस्य पतिव्रता॥४७॥सर्वांगेषु व्यथा जाता तस्याः प्रस्खलितान्मुनेः॥ मांडव्य
उवा०॥ईदृग्विधे वर्तमाने कष्टे वै पौर्वदैहिके॥४८॥पुनः पापफलं किंचित्हा कष्टं मम वर्तते॥कंकणा
नारणत्कारे वेधि नारीं तु सर्वथा॥४९॥ व्यथितोयं त्वया पापे किमर्थं सोनिकेतया॥राक्षसी त्वं नु म
न्येहं स्वैरिणीमथ तस्करीं॥५०॥एवमुक्ता क्षणं मोहात्पक्रंदमानो मुहुर्मुहुः॥ नारायणाद्यायेविप्रास्त
दूरस्था तपस्विनः॥५१॥ मत्वा महत्ततेकष्टं सोष्टन्युधिष्ठिर॥ किमर्थं मम से भूदे निशिथे वहसे
नुर्व्रिं॥५२॥ क्षिप्रं करंडिकाभारं किं चागमन कारणं॥ व्यथामुसाद्य तु मनेदुष्टः तं तु कृतं त्वया॥५३॥
शांडिल्युवाच॥ नासुरी न च गंधर्वी निपीशाचीन राक्षसी॥ नतस्करी स्वैरिणी वा नाम हत्यापी कुत्सिता
॥५४॥पतिव्रतां तु मां सर्वे जानंतु तपसि स्थितां॥ न कामेन च मा क्रोधा न्वैरान्नेमात्सरात्॥५५॥आ
ज्ञानाज्ञाथ का रामेस्खलनं क्षंतुमर्हथ॥ वहनं भर्तुः सोरव्याय दिवायद्यायतेडुजा॥५६॥रोगातुरं
विजानीध्वं करंडे स्थापितं सदा॥अंनपानादि वस्त्राणि ददाम्येतस्य रोगिणः॥५७॥कौनको नाम मे
भर्त्ता शांडिलीं मां निबोधत॥पतिव्रतां परिमाणो कोप त्यजत सुव्रताः॥५८॥नारायणउवाच॥ परस्य थां
न जानीषे विचरंतीय थेच्छया॥ मांडव्यस्य मुनेः कृत्वा व्यथामाघाघकारिणी॥५९॥ प्रभाते धुदिते भो ३११

नौतव भर्त्ता भविष्यति॥आत्मेच्छया न्यदुःखं त्वं न जानासि कुलाधमे॥६०॥मार्कंडेय०॥तेन वाक्येन घोरेण शा
ंडिलीविमनाभवत्॥ विषादं परमं गत्वा क्षणं ध्यात्वा ब्रवीद्वचः॥६१॥ कोपसंरक्तनयना भर्त्सयंती मुनीस्तदा
॥शांडिल्युवाच॥सतां गेहमनुप्राप्तः सचापनयकृद्यदि॥६२॥सर्वे मान्यश्च सामान्ये किं पुनः शिष्ट आगते॥भ
वद्भिरीदृगातिथ्यं कृतं यदिममाधुना॥ स्वर्गापवर्गधर्मोपि भवद्भिर्नैव वीक्षितः॥दुर्वरामिव मां दृष्ट्वा यथान्याः
प्राकृताः स्त्रियः॥६४॥ भवद्भिः स्त्रीबलं मेघपश्यं त्वपि च देवताः॥नमरिष्यति मे भर्त्ता नोदेष्यति च भास्करः॥
सांधकारं जगत्कृत्स्नं सुभास्वयं यावत् शर्वरी॥ मार्कं०॥एवमुक्ते तथा वाक्ये स्तंभिते र्कं च पांडव॥६६॥ नष्ट अज्ञाम
भूत्सर्वं निर्वषट्कार भंजसा॥स्वाहाकारस्वधाकार पंचयज्ञ विनाकृतं॥६७॥ वेदाध्ययननिर्मुक्तं जपपूजावि
नाकृतं॥स्नानदानजपैर्हीनं संध्याध्यानबहिष्कृतं॥ गोकंटबंधनयुक्तं नानाशास्त्ररशोभितं॥ षण्मासानभवत्स
र्वं लुप्तपिंडोदकक्रियं॥६९॥ ॥इतिरेवामहात्म्ये शांडिलीशापो नाम॥ ॥मार्कं०॥अथते सपयः सर्वे देवाश्चेंद्रपु
रोगमाः॥ मांडव्यस्याश्रमे दिव्ये समीपे नर्मदातटे॥१॥विरिंचिः प्रेषिताः पार्थ ज्ञानदृष्ट्यापि वीक्ष्य च॥ शंखदुंदुभि
नादेन जयशब्दपुरस्कृताः॥२॥अष्टाशीतिः सहस्राणि स्नातकानां तपस्विनां॥ समाजे त्रिदशैः सार्द्धं तत्र भाव
दिदिक्षया॥३॥ ब्रह्माविष्णुमहेशाना स्तत्रहर्षात्समागताः॥मातरो भद्रिकाद्याश्च क्षेत्रपाला विनायकाः॥दिक्पालाश्च
लोकपालाश्च गंगाद्याश्च सरिद्वराः॥ प्रयागादिनि तीर्थानि सस्मिन् सर्षिसमागमे॥५॥राजापि च समायातः श्र
त्वा पौरजनैः सह॥ इदं कुतूहलं तत्र व्याकुले भूतले सति॥ वित्रस्तमानसा लोकाः स्तंभिता इव संस्थिताः॥त
स्मिन्समागमे दिव्ये ब्रह्माद्यास्तमथाब्रुवन्॥७॥भो मांडव्य महासत्त्व वरदास्ते मरा स्थिताः॥ कष्टेनानेन धन्यस्या
वत वसिद्धिर्भविष्यति॥८॥प्रार्थयस्व यथाकामं यत्ते मनसि रोचते॥ अनादिस्त्वमिमं लोकं निर्वषट्कारमाकुलं
नष्टधर्मं विजानीहि प्रकृतिस्थं मुने कुरु॥अनुयतं शांडिल्याः प्रार्थयामहि जोत्तम॥ एषते कष्टदो राजा समाया

625
2008

रे०खं० तस्त्वायतः॥संपश्यस्वसौहार्द्दं देवर्षिनृपमानवान्॥मांड०॥त्रयीमूर्त्तिः प्रसन्नात्मेत्यथायातासुरैः सह॥कृपां मयि परां
कृत्वा तीर्थेस्मिन्नर्मदातटे॥१२॥सांनिध्यमत्र क्रियतां ब्रह्मविष्णीश्वराः सुराः॥दिक्पालैर्लोकपालैश्च क्षेत्रपालवि
३१२ नायकैः॥साधं तपस्विभिः सिद्धैस्तथैव सर्षिभिः सह॥नन्नपस्थान दोषोस्ति भूपे कौपीनवर्त्मता॥१४॥स पुत्रप
शुभार्याभिराजा सोसुखमेधतां॥मार्कं०॥ततो देवैश्च मुनिभिरत्रेर्भार्या पतिव्रता॥शांडिल्यानुनयार्थं तु समाहूता
तपस्विनी॥अनुनीता तपःसाध्वी सूर्योदयमवर्त्तयत्॥भर्त्ता च जीवितस्तस्या सतीत्वबलरक्षितः॥नसाध्वी
सदृशं तेजस्त्रैलोक्ये स्ति भारत॥१७॥गोभिर्विप्रैश्च वेदैश्च सतीभिः सत्यवादिभिः॥अनुब्धैर्दानशीलैश्च स
प्तभिर्धार्यते मही॥१८॥मांड०॥प्रणतोस्मि विधिं विष्णुमीशानं देवतागणान्॥प्रजापतिमुनीन्सिद्धांस्तथा मातृ
गणानपि॥स्वस्त्यस्तु गोब्राह्मणेभ्यो भूपाले च प्रजासु च॥इति ब्रुवती मांडव्ये विस्मितास्ते सुरर्षयः॥२०॥एवम
स्त्वित्यथोत्क्रांते यावद्गच्छंति पांडव॥तावत्तपोबलाक्रांत मांडव्यस्य महामुनेः॥रक्षस्त्वरं ग्राहि बाग्रे कन्या कामो
दिनीं शुभां॥देवर्षिनृपलोकानां पश्यतां तत्र भारत॥२२॥राक्षस उ०॥ममाभूद्दुर्वशी शापस्तस्यांतो धाम्नेव नर्मदा॥
दैत्यरूपधरं रक्षः शंबरारव्यं समाश्रितं॥अयं मम महाशत्रुं मांडव्योन्नपसर्वदा॥रक्षोघ्नैर्मंत्रैः आप्ये मामलंकुरु
ते द्विजः॥कल्याद्रिकर्मसु संनिधौ तिष्ठते द्विजः॥तस्माद्रक्षिमहं दूरं पूरितं नृपसत्तम॥२५॥हरता कन्यकां तु
भ्यमित्युत्क्रांतरधीयत॥मार्कं०॥गते वादर्शते पार्थ राक्षसो विस्मयान्वितः॥२६॥समाजस्तत्र देवानां ऋषीणां च
तपस्विनां॥साधु साध्वीति मांडव्यं प्रशशंसुः पुनः पुनः॥ततो यथागतं जग्मुर्देवाः सर्वे सवासवाः॥विष्णुब्रह्मशि
वाद्याश्च वीक्ष्य सम्यक् ततो बलं॥ततो राजा सुतां वीक्ष्य पुरः पद्मदलेक्षणां॥मंत्रैर्मंत्रिय लाच सर्षिभिर्ब्राह्म
णैः सह॥शिल्पिनश्च सभाकार्यं तं मंडलादवरोहयत॥सामभिर्वेदनिर्दिष्टैः स्तवानबानुमान्य च॥दंड
वत्तं प्रणम्याग्रे भूमौ नृपपुनः पुनः॥स्नापयित्वा शुभैर्गंधैः पवित्रैर्नर्मदाजलैः॥ददौ कन्यां निजां राजा मांड
व्यमुनये ततः॥गंधर्वाप्सरसां गीतनृत्यवाद्यपुरस्कृतां॥सूतमागधशब्दैश्च जयशब्दादिमंगलैः॥विवाहयि ३१२

627
2008

तां कन्यां वेदोक्तविधिना नृप॥सम्यं मांडव्यमुनिना तान्ऋषीनभिवाद्य च॥सर्वान्संतोषयामास दानसन्मानगौरवैः॥
मांडव्याय वराय त्थ भूषणाच्छादनादिकं॥ददावनिकुले त्यसमैरत्नानि विविधानि च॥३७॥प्रसादं वै वंदतो राजात
स्मै कन्यामलंकृतां॥प्रणम्य च ऋषीन्सर्वान्व्यसर्जयद्यथाक्रमात्॥३८॥शांडिल्य पिच भर्त्तारं जीवमानमवाप्य
सा॥हृष्टतुष्टा पयो गेहं राज्ञा सन्मानिता सती॥३९॥निरोगस्तत्यतिर्जातो देवैर्दत्तवरो नृप॥अनुसूयाप्रभावेन
यथा काश्यपयाश्विनौ॥२७॥रूपयौवनसंपन्नं प्राप्य सा स्वपतिं मुदा॥रमयामास राजेंद्र रात्रिं दिवमतंद्रिता॥पूर्व
वत्सुजगज्जोतं स्वस्वकर्मरतं नृप॥मांडव्यस्तमनुज्ञाप्य नृपं गत्वा स्वमाश्रमं॥रेवाया दक्षिणे कूले स्नात्वा भ्रातुस
मन्वितः॥स्थापयामास राजेंद्र मांडव्येश्वरसंज्ञितं॥४०॥महादेवं तथा भ्राता स्वयं नारायणेश्वरं॥दिव्यवर्षशतं
पार्थ पूजयामास शंकरं॥ततो गतौ भ्रातरौ तौ सहितौ मेरुपर्वतं॥देवकार्ये समुत्पन्ने ब्रह्मादीनां समागमं॥४२॥
मार्कं०॥ततः प्रभृति विख्यातं मांडव्येश्वरसंज्ञितं॥नारायणेश्वरं वापि तीर्थं तीर्थवरं नृप॥भक्त्या परया तत्र ती
र्थे स्नानं करोति यः॥पश्येच्च पूजयेत्सर्वं सगच्छेच्छाश्वतं पदं॥४४॥तत्र तीर्थेषु यः स्नात्वा तर्पयेत्पितृदेवताः॥त
स्मिन्यांतु पितरः श्राद्धदानाच्छताब्दिकं॥सन्मार्जनं यः करोति पश्चाद्देवतालये॥नरः सहस्रगोदानफलमा
प्नोति भारत॥द्विगुणं तच्चोपलिप्य संपूज्य चतुर्गुणं॥दीपमुद्वाल्य वै पुण्यं तद्वाष्टगुणं स्मृतं॥४७॥दध्याम
धु सिताज्येन पयसा नर्मदोदकैः॥स्नापयंति च ये भक्त्या गंधमाल्यानुलेपनैः॥यच्चर्यंति विरूपाक्षं तथा नारा
यणेश्वरं॥तेपि दिव्यविमानेन क्रीडंते कल्पसंख्यया॥दीपाष्टकं च यो दद्यात्तत्र भूताष्टमीदिने॥एकादश्यां
सितायां च तेन पश्यंति वै यमं॥दध्योदनेफले राज्ये यः कुर्यु लिंगपूरणं॥शिवलोकं हि ते यांति सिद्धचारणसेवि
ताः॥घंटां पताकां च वितानकं च धूपोपधानं कलशं च चामरं॥पुष्पोपधानं पटं च दत्त्वा शिवासारूप्यां
मुक्तिमाप्नुयात्॥शिवलोके वसेद्धापि यावदाहूतसंप्लवं॥तत्र तीर्थे च यः शक्त्या ब्राह्मणान्भोजयेन्नृप॥सि
क्थे सिक्थे भवेत्तृप्तिः पितॄणां शतवार्षिकी॥सिक्थे सिक्थे भवेत्प्रीतः शिवस्तु सनातनः॥५४॥एकस्मिन्भो

जितेविप्रेकोटिभवतिभोजिता॥ आश्विनेमासिसंप्राप्तेमाघेमार्गशिरेपिवा॥५५॥कृष्णपक्षेचतुर्दश्यांसोपवा
सोयजेच्छिवं॥आरात्रिकैश्चविविधैरूपहारैरनुत्तमैः॥रात्रौजागरणंकृत्वागीतनृत्यकथानकैः॥दीपमालां
 चतुर्दिक्षुकारयित्वास्वशक्तितः॥५७॥पितृभिःसहराजेंद्रस्वर्गवद्धिविमोदते॥प्रभातेविमलेस्नात्वाकृत्वा
नित्यविधिंस्वकं॥मार्गमभ्युक्ष्यमौनीयःपश्येद्देवंत्रियंबकं॥धनीपुत्रसुरूपश्चदशजन्मनिजायते॥चैत्र
वैशाखयोर्वापिनभस्येश्रावणेपिवा॥पूर्णमास्यांचतुर्दश्यांस्नात्वातत्रार्चयेच्छिवं॥फलंसममवाप्नोतिवाजपे
याश्वमेधयोः॥यारुद्रकलशस्नानंकुर्यान्नारीविधानतः॥दुर्भगादुःखितावंध्यादरिद्राचमृतप्रजा॥सास्त्रीदो
षविनिर्मुक्तासर्वान्कामानवाप्नुयात्॥६२॥कृमिकीटपतंगाश्चस्तस्मिंस्तीर्थेचयेमृताः॥तेपिस्वर्गपुरंयांति
प्राहवंशकरःपुरा॥अनाशकेजलाग्निभ्यांयेमृताव्याधिपीडिताः॥अनिवर्त्तिगतस्तेषांरुद्रलोकात्कदाचन॥नि
त्यंनमतियोराजन्शिवनारायणेश्वरौ॥गोदानफलमाप्नोतितीर्थस्यास्यप्रभावतः॥देवालयंचराजेंद्रयोवैकु
र्यात्प्रदक्षिणं॥प्रदक्षिणीकृतातेनसप्तद्वीपावसुंधरा॥तेनसार्धंचतीर्थानामदृष्टकाभवनाद्बहिः॥तावप्रमा
णंसूत्रेणवेष्टयेत्सत्रमुत्तमं॥शिवस्यमंदिरंवापिलिंगंवाशिवसंभवं॥वेष्टितातेनराजेंद्रसशैलवनका
नना॥साब्धिक्षेत्रमहातीर्थासप्तद्वीपावसुंधरा॥रेवायादक्षिणेभागेशिवक्षेत्रसमीपतः॥देवखातंसरस्त
त्रपूर्वोक्तंदेवनिर्मितं॥तत्रयःकुरुतेस्नानमुच्यतेसर्वपातकैः॥पौर्णमास्याममायांवाव्यतीपातेर्कसंक्रमे॥रवी
दोग्रहणेश्राद्धंकृत्वागच्छेत्परांगतिं॥७१॥देवखातेत्रयोदेवाब्रह्मविष्णुमहेश्वराः॥तिष्ठंतिसर्षिःसार्द्धंपितृदे
वगणैःसह॥तत्रतीर्थेश्विनेमासिचतुर्दश्याविशेषतः॥वायुमार्गेस्थितःशक्रस्तिष्ठतेदेवतैःसह॥पृथिव्यांया
नितीर्थानिसरित्सागरास्तथा॥विशंतितानिसर्वाणिदेवखातेदिनद्वयं॥गयासुरेचयत्पुण्यंप्रयागेमस्तकं
टके॥देवखातेहितत्पुण्यंमांडव्येश्वरदर्शनात्॥पदबंधेनयत्पुण्यंयात्रायांत्रिकुलेश्वरी॥आश्विन्यामश्विनीयोगे
तत्पुण्यंतत्रभारत॥उज्जयिन्यांमहाकालेवाराणस्यांत्रिपुष्करे॥यन्निर्हृतिरवेग्रासेमांडव्येश्वरदर्शनात्॥इतिज्ञात्वा ३१२

महाराजसर्वतीर्थमनुत्तमं॥पितॄन्देवान्समभ्यर्च्यस्नानदानादितर्पणैः॥धौतपापोविशुद्धात्मालभतेवांछितंफ 629/2008
लं॥हिरण्यंवृषभंधेनुंभूमिंगोमिथुनंहयं॥शिवमुद्दिश्यदातव्यंदंपतीपरिधानकं॥पादुकोपानहछत्रंभाजनं
चकमंडलुं॥८१॥जपोहोमस्तथादानंसर्वंस्यादक्षयंनृप॥सर्वमेकंतुस्वेदायजुर्वेदंतथायुः॥सामैकंसा
मवदातुजपेद्वाग्रतःस्थितः॥वेदपारायणफलंतस्याप्यसंशयंक्षयं॥८२॥गायत्रीजाप्यमात्रेणसम्यक्वेद
फलंलभेत्॥सम्यक्तुफलंपार्थलभतेवैशिवार्चनात्॥शिवलोकमवाप्नोतियावदिंद्राश्चतुर्दश॥ततःकालेन
महतामर्त्यलोकमुपागतः॥राजाभवतिमेधावीसर्वसौख्यान्वितस्त्वदृढ॥जीवेद्वर्षशतंसाग्रपुत्रपौत्रसमन्वितः
तत्रतीर्थंपुनःप्राप्यशैवेमहसिलीयते॥उपास्तेयस्तुसकृत्संध्यांतस्मिंस्तीर्थेतुपर्वणि॥संध्यालोपप्रत्रमत्रंशाकाला
तिक्रमसंचितात्॥पापाच्चविधिलोपोत्थान्मुच्यतेनात्रसंशयः॥तत्रतीर्थेशिवःक्षेत्रात्तत्रपातेसमंततः॥प्रविशेन्
भवोद्धिग्नंपातकंभरतर्षभ॥यत्रतत्रस्थितोवक्षांनीक्षतेयदितीर्थजात॥नरःपवित्रमाप्नोतितीर्थश्राद्धरतोयदि
॥शिवस्यपश्चिमेभागेपितृक्षेत्रमनुत्तमं॥वृषोत्सर्गंतुयःकुर्यात्तस्मिंस्तीर्थेयुधिष्ठिर॥क्रीडंतिपितरस्तस्य
शिवलोकेयदृच्छया॥अगम्यागमनेपापंतथैवायाज्ययाजने॥तेयाकोब्राह्मणवधाकुरुद्रोहादुपार्जितं॥तत्स
र्वंनश्यतेपापंवृषोत्सर्गविधानतः॥ मार्कंडेय०॥मांडव्यतीर्थमाहात्म्यंयःशृणोतिसमाहितः॥गंगास्नानफ
लंप्राप्यस्वर्गलोकेमहीयते॥९४॥ ॥इतिश्रीवायुप्रोक्तशिवसंहितायांरेवामाहात्म्येमांडव्येश्वरनारायणेश्व
रतीर्थं॥ मार्कंडे०॥पार्थतीर्थंततोगच्छेदक्रूरेश्वरमुत्तमं॥रेवायादक्षिणेमांडव्येश्वरपश्चिमे॥यत्रसिद्धोम
हाराजअक्रूरोनामराक्षसः॥आद्येत्रेतायुगेपार्थशिवस्याराधनेरतः॥२॥अक्रूरेश्वरसंभूतिंशृणुत्वंनृपस
त्तम॥मानसोब्राह्मणःपुत्रपुलस्त्यइतिविश्रुतः॥वेदशास्त्रार्थकुशलःसाक्षाद्ब्रह्मावापरः॥भार्यार्थंनर
याचासतत्यानिंदोःसुतासर्वे॥तस्यांसजनयामासपुत्रंविश्रवसंनृप॥कदाचिदथकालेनमारहाजोम
हामुनिः॥ददौविश्रवसेकन्यांस्वकीयांविधिनातदा॥सतस्यांजनयामासपुत्रंवैश्रवणंनृप॥सोपिमौन

रे॰ खं॰ व्रतंकृत्वाबालएवयुधिष्ठिर॥ सर्वभूताभयंदत्वाचचारपरमंतपः॥ ७॥ ततस्तुष्टोमहादेवोदिक्पतित्वंददौ
प्रभुः॥ यमेंद्रवरुणानांचचतुर्थत्वंतथैवच॥८॥ ततस्त्वनंतरेकालेकैकसीनामराक्षसी॥ विश्रवसंवरया
३१७ मासपातालान्निःसंतानृप॥९॥ पुत्रोस्यरावणोजातःस्तस्यांभरतसत्तम॥ कुंभकर्णोमहाबाहुर्धर्मात्मा
बिभीषणः॥१०॥ कुंभश्चैवनिकुंभश्चकुंभकर्णसुतावुभौ॥ अक्रूरोराक्षसःश्रेष्ठःकुंभस्यतनयोभव
त्॥११॥ बिभीषणस्यानुगतोजन्मप्रभृतिभारत॥ ततःसयौवनंप्राप्यज्ञात्वापैतामहंधनं॥१२॥ परंनिर्वेद
मापन्नश्चचारपरमंतपः॥ नर्मदायांनृपश्रेष्ठदिव्यंवर्षशतंकिल॥१३॥ ततस्तुष्टोमहादेवोवरंब्रूहित्यबा
चत॥ अक्रूरोपिततःप्राहयदितुष्टोसिमेप्रभो॥१४॥ दुर्लभंसर्वदेवानांममरत्वंप्रयच्छमे॥ नदेवत्वेकिम
प्यस्तिदानवत्वेनराक्षसे॥१५॥ भवविष्णुप्रपन्नानांकल्याणंस्यात्सदेपदे॥ त्वांप्रपन्नामहादेवदेवायेविष्णु
माश्रिताः॥१६॥ मोदंतेसततंसर्वेतेसर्वत्रापिनिर्भयाः॥ ममनाम्नात्रदेवेशतीर्थेसंनिहितोभव॥१७॥
ईश्वरउ॰॥ एवंतेभवितावत्सतीर्थेस्थास्यामिसर्वदा॥ यावद्बिभीषणंयावि धर्मनिषेवसे॥१८॥ तावत्त्वममर
तोवश्यममवाक्यान्नविष्यति॥ एवमुक्त्वामहादेवस्तत्रैवांतरधीयत॥१९॥ अक्रूरस्थापयामासस्वना
म्नाधूर्जटिंततः॥ तत्रतीर्थेतुयःस्नात्वापूजयेत्परमेश्वरं॥२०॥ श्राद्धंकुर्याद्विधानेनसोश्वमेधफलंलभेत्॥
॥इतिरेवायांअक्रूरेश्वरतीर्थनाम॥ ॥मार्कंडेय॰॥ ततःकोशत्रयांतेनतीर्थंपरमशोभनं॥ सिद्धरुद्रेश्व
रंनामत्रिषुलोकेषुविश्रुतं॥१॥ यत्रसिद्धोमहाराजामहादेवोमहेश्वरः॥ हत्यादोषयुतःसर्वदेवआसी
त्त्रिलोचनः॥२॥ ॥युधिष्ठिरउवाच॥ ॥कथंसिद्धोमुनिश्रेष्ठोदेवदेवत्रिशूलधृक्॥ कासासिद्धि
रनुप्राप्तात्नेकथयसुव्रत॥३॥ मार्कंडेय॰॥ विश्वस्यजगतस्त्रष्टाब्रह्मालोकपितामहः॥ पुराकाले
महाराजपंचवक्त्रोबभूवसः॥४॥ तंदृष्ट्वास्यर्द्धितेपार्थधूर्जटिःसततंहरात्॥ कस्मिंश्चित्समयेतेनशंक ३१७

रेणमहात्मना समीपस्थोस्यमहसः पारंदृष्टोसुराबुभौ ब्रह्मविष्णुजगदनुस्तनज्ञाज्ञानमानिनौस्वरूप
स्यपरंपारंनववित्थोमहेश्वर इत्युक्तेधूर्जटिः प्राहसाधुविज्ञायतेखिलं भवद्भ्यांयदिमेलिंगपारोविज्ञास्य
तेधुना मार्कंडेयउ॰ एवमुक्तौशिवेनाथज्ञातुंपारंहिलैंगिकं ऊर्ध्वंब्रह्माजगामाशुतथाधोहरिरप्यगात्
कालेनमहतागत्वापुनः प्राप्तौशिवाग्रतः अप्राप्तवंतौतौपारंपुरःपप्रच्छधूर्जटिः ब्रह्मोवाच गत्वामयो
र्द्धदेवेशादृष्टःपारोहिलिंगजः विष्णुरुवाच नप्राप्तस्तेपरःपारोत्यधोगत्वापिशंकर भयात्त्वाद्दिसदे
नयदुक्तंनत्क्षमस्वमे रुद्रउवा॰ अविदित्वापरंपारंविधेकिमनृतंवदीः इत्युक्त्वासहसानसोचुकोप
परमेश्वरः उत्स्छायाच्छिन्नदास्यस्यमूर्धानंकरजैस्तदा तस्यैवतत्करेलग्नंच्यवतेनकदाचन पंचमंब्र
ह्ममूर्धानंछित्वाहत्यापवापसः लोभकोपौनृदेहस्थौकुरुतःकिंनदुःकृतं षड्भिरिद्दितंमूर्तपरंब्रह्म
सनातनं ततःकपालीभगवान्पर्यटन्पृथिवीमिमां क्रमात्काशीपुरीप्राप्तस्यस्तेनदपनाच्छिरः पति
तेपिकपालेतुब्रह्महत्यानमुंचति नानुगच्छंतिनंदेवानवीक्ष्यंतेमहर्षयः संभाषंकुर्वतेनैवसिद्धवि
द्याधरोरगाः ततःससागरेगत्वापूर्वस्मिन्दक्षिणेतथा पश्चिमेचोत्तरेपार्थदेवदेवोमहेश्वरः पर्यटन्
सर्वतीर्थेषुस्वस्यशुद्धिंनमन्यते तीर्थात्तीर्थंभजन्रेवांप्राप्तवान्दक्षिणेतटे द्विजसंघंसमासाद्यप्रार्थ
यित्वास्वशुद्धये तत्रतीर्थेतपोतप्यतपरमंदुश्चरंचिरं मार्कंडेउवा॰ ततोदेवाःसगंधर्वाऋषयःसिद्ध
चारणाः शुद्ध्यर्थंमत्वामहादेवंसमाजग्मुःसहस्रशः रेवादिसर्वतीर्थेभ्यःसमानीयजलंशुचि॥ स्नात्वाश
मोकृतंतत्रैःकुंडदेवविनिर्मिते स्तुत्वानत्वाभ्यर्थयित्वास्नापितस्तत्रधूर्जटिः देवस्नातेशिवस्नात्वाव
भूवगतकल्मषः देवैःसंपूजितोभक्त्यास्थापितस्तत्रधुर्जटिः रुद्रःसिद्धेश्वरोनामसिद्धेश्वर्यसमन्वितः
निष्कल्मषोहृष्टतुष्टोयदासिद्धिंगतःशिवः तेषांदत्वातुतत्स्थानंवरांश्चांतर्दधेततः तदाप्रभृतितती

631
2008

र्थंसिद्धरुद्रेतिकल्पितं विख्यातंसर्वलोकेषुब्रह्महत्याहरंपरं माघेमासिसितेपक्षेभूतामायांयुधि स्नात्वातत्र
विधानेनतर्पयित्वापितॄन्देवताः दत्वापिंडान्पितॄणांचभावितेनांतरात्मना तस्यतेद्वादशाब्दानितृप्तियांतिपिता
महः गंधधूपप्रदीपाद्यैरभ्यर्च्यपरमेश्वरं॥ पंचामृतैः स्नापयित्वासिद्धरुद्रेश्वराह्वयं नैवेद्यैर्वनिवाद्यैश्चतसा
सुतोषयेत् भोजयित्वापतीन्विप्रान्शिवलोकेमहीयते देवखातेनरः स्नात्वानत्वासिद्धेश्वरीन्नृप अका
मोवासकामोवासर्वतीर्थफलंलभेत् सिद्धरुद्रेश्वरेकुंडेस्नातस्यभरतर्षभ सर्वपापानिनश्यंतितमःसूर्यो
दयेयथा सर्वेदेवाश्चतुष्टास्युः सर्वतीर्थफलंलभेत् सर्वकार्याणिसिध्यंतिनकेश्चित्परिभूतये नानावस्तु
पहारैर्योदेवींसिद्धेश्वरीयंजेत् सर्वकामफलावाप्तिःसुखसंतानभाक्भवेत् एतत्तेकथितंराजन्तीर्थं
सिद्धेश्वराह्वयं सिद्धेश्वरीरुद्रकुंडंसर्वतीर्थांबुसंभृतं यथाश्रुतंमयापूर्वंसकाशात्शूलपाणिनः सिद्धरु
द्रस्यमाहात्म्यंयः शृणोतिसमाहितः मुच्यतेसर्वपापेभ्योरुद्रलोकंचगच्छति॥ ॥इतिश्रीशिवसंहिता
यांरेवामाहात्म्येसिद्धेश्वरंतथादेवखाततीर्थंनाम॥ ॥मार्कंडेय० ततः क्रोशद्वयेगत्वापार्थतीर्थमुनु
त्तमं वैद्यनाथाह्वयंतत्रजलधिस्पर्द्धिनंसरः दुर्गमंवीक्ष्यरेवायाः पयःपंकामिपिच्छलं प्रवाहस्यचवैपुल्या
त्कुलयोरुभयोरपि कृतानिऋषिभिर्देवैकुंडाकारसरांस्यपि आत्मानश्चपरेषांचकर्तुंस्नानादिकंविधिं॥
रेवातोयाभिपूर्णानिमंत्रपूतानितानिच॥युधिष्ठिरउवा०॥ वैद्यनाथमितिप्रोक्तयत्वयामुनिसत्तम॥ कोवै
द्यः किंकृतंतेनतन्मेकथयविस्तरात्॥ मार्कंडेयउ०॥ शृणुराजन्प्रवक्ष्यामिवैद्यनाथस्यसंभवं॥देवर्षिःकश्य
पोनाममरीचिकुलसंभवः६ तेनलोकहितार्थायतपस्तप्तंयुधिष्ठिर॥ विविधैर्व्याधिभिर्वीक्ष्यविश्वंव्याकुलि
तंमुहुः ७ सर्पादिभिर्दंदशूकैः कृत्स्नंवीक्ष्यकदर्थितं राजयक्ष्मादिरोगाणांनाशायनृपसत्तम॥८॥ जंगम २१५
स्थावराणांचविषाणांप्रतिकर्मसु॥आयुर्वेदमिदाष्टांगंप्राप्तंपरपरंजय॥९॥ क्षीरार्णवाविःकृतंस्वंध्याय

यन्धन्वंतरिंशिवं॥मृत्युंजयंमहात्मानंसर्वव्याधिविनाशनं॥१०॥भिषक्क्रियासुकुशलंसुधाकलशपाणिनं॥ 635/2008
तपसाराधयंदेवंनर्मदातीरसंश्रितः ११ कृत्वाकुंडंजलपूर्णंतत्रत्रिषवणंचरन्॥स्थापयित्वाशिवंशांतंपुष्पै
रारम्यकैर्यजन्॥१२॥ ततोवर्षशतेपूर्णेपरितुष्टोस्यशंकर॥ भिषक्सिद्धिंपरांप्रादात्सर्वलोकहितैषिणः
॥१३॥ आयुर्वेदस्यचसंपूर्णंसरहस्यंससाधनं॥कश्यपस्यददौविद्यांविषघ्नींचापिभारत॥१४॥ प्रार्थितस्तीर्थसांनि
ध्यंस्वनाम्नातेनशंकरः॥ वैद्यविद्याप्रदानेनवैद्यनाथस्ततोभवत्॥१५॥ स्थापितस्तेनविधिनासरसिस्वाख्यया
नृप॥ ततः प्रभृतिविख्यातंतीर्थमेतद्युधिष्ठिर॥१६॥ वैद्यनाथाह्वयंपुण्यंपूजनात्पापनाशनं॥तत्रस्थःपूजयेद्दे
वंवैद्यनाथःस्वभक्तितः १७ नानाविधोपचारैश्चउपहारैरनुत्तमै॥ व्याधिनाशमवाप्नोतिस्नानाद्वार्चनाद
पि॥ दीपदानेनचैकेनप्रज्ञोत्कर्षमवाप्नुयात्॥१८॥ वैद्यविद्याप्रदानेनतत्रतीर्थेनृपोत्तम॥ वर्णसंख्यानिव
र्षाणिशिवलोकेमहीयते॥१९॥ नानौषधप्रदानेननरोरोगैःपरिभूयते॥२०॥ इतिश्रीरेवामाहात्म्येवैद्यनाथती
र्थं॥ ॥मार्कंडेय०॥ ततः क्रोशार्धभूभागेमात्तृणांस्थानमुत्तमं॥सर्वकामप्रदंपार्थदौर्भाग्यसुखनाशनं॥१॥
कार्तिकेयसमुत्पन्नेदेवकार्यायवैपुरा स्तन्यंदातुंसुरैस्तस्यकृत्तिकायाःप्रयोजिताः॥२॥ षट्संख्यास्तत्रता
गत्वास्तन्यंदातुंप्रचक्रमुः॥ सशिशुस्तास्तुषट्सुद्भाषण्मुखान्यकरोनृप॥३॥ ततस्तनान्यपीतासांततृप्तिंप्रा
पतास्वपितसमर्थाश्चततृप्तैताः सर्वापिचकृत्तिकाः॥४॥ ततोनारदवाक्येनप्रेरितानर्मदातटे॥ आराधनायमा
तृणांतपस्तेपुर्नृपोत्तम १५ स्नानार्चनरतानित्यंभक्तिध्यानपरायणः॥एवंमासैश्चतुर्भिश्चतासांतुष्टाश्चमातरः
१६॥ब्राह्मीचवैष्णवीरौद्रीनारसिंहीचषण्मुखी॥वाराहीचैवशाक्तीचवरदाःसप्तमातरः॥१७॥गणेशक्षेत्रपा
लाद्यैर्ग्रहैश्चोपग्रहैःसह॥प्रत्यक्षाःप्रददुस्तासांस्तन्यंप्रचुरमंजसा॥८॥ ययातृप्तिंययासाशुषण्मुखःशर्वनंद
नः॥९॥भगवत्यःप्रसन्नाश्चेदस्माकंस्तन्यदास्थिताः॥ भवतीनांनिवासोत्ररोचतांलोकभूतये॥१०॥ यत्रै

रे॰ खं॰ वाराधिताः पूज्याः पूजिताश्च वरप्रदाः ॥ अस्माभिः प्रार्थितास्तत्र तीर्थसार्थकता स्तुनः ॥११॥ यत्र नसंतवोघो
रमस्माभिर्यूयमागताः ॥ तत्र वः पूजयेद्यो वै स प्राप्नोत्यभिवांछितं १२ मार्कंडेयउ॰ ॥ इत्युक्ते कृत्तिकाभिस्ता
३१६ तथेत्युक्त्वा युधिष्ठिर ॥ तत्र स्थित्वा निजैरंशैस्तैर्नीस्थानानि भेजिरे ॥१३॥ ततः प्रभृति विख्यातं मातृतीर्थमनुत्त
मं ॥ पुण्यं मातृकुटीग्रामं मातृभिस्त्वधिवासितं ॥१४॥ तत्र तीर्थे नरो नारी यः कुर्यान्मातृपूजनं ॥ क्षीरस्सौद्रेश्च
तैलाज्यैर्दध्ना तास्थापयेच्छुचिः ॥१५॥ बलिपूजोपहारैश्च लभते वांछितं फलं ॥ सुखसंतानसौभाग्यधनधा
न्यादिकं नृप ॥१६॥ इति श्रीरेवामाहात्म्ये मातृतीर्थनामः ॥ ॥ मार्कंडेय॰ ॥ ततः क्रोशद्वये पार्थ तीर्थं चैवोत्तरेश्व
रं ॥ आग्राविंदोस्तु राजर्षेस्तनया विनयान्विता १ प्रजालक्ष्मैकपुत्राणामुपरिप्रेमदा पितुः ॥ मातुश्चमनुजश्रेष्ठ
सा यौवनवती स्थिता २॥ लक्षाद्दृष्ट्वेनुया जाता उनरातेन गाथते ॥ अपि योग्या विवाहस्य न प्राप्नोति वरं हिसां
॥३॥ नवृणोति हि तां कश्चिन्नतस्याः सदृशैर्गुणैः ॥ अनुज्ञाप्याथ पितरौ तपस्तप्तुं जगाम सा ॥४॥ मुनीनां व
चनाद्रेवामभजत्सर्वसिद्धिदां ॥ रेवाया दक्षिणे कूले तपस्तप्तुं प्रचक्रमे ॥५॥ कृच्छ्रचान्द्रायणपराकपृथकाला
न्नाशकचित् ॥ उमापतिं पशुपतिं सर्वस्य जगतः पतिं ॥६॥ हरं विश्वगुरुं चित्ते ध्यायमाना वरप्रदं ॥ निर्वेदयं
ती दौर्भाग्यं निर्जनी लगता तनः ॥७॥ ततः कतिपयाहोभिस्तस्याः सत्वतश्शंकरः ॥ भुवं भित्वा समुत्तस्थौ पु
रो लिंगात्मको विभुः ॥८॥ प्रत्यक्षः प्राह तां प्रीत्यां भक्त्या च परितोषितः ॥९॥ ईश्वरउवाच ॥ अकंतसेन तेपु
त्रीवरं ब्रूहि यदिच्छसि ॥ तपसा तेप्रसन्नोस्मि यमैश्च नियमैरपि ॥१०॥ उत्तराउ॰ ॥ यदि तुष्टोसि मे देव वरार्हा
यद्यहं मता ॥ हरस्व मम दौर्भाग्यं हर पापं हर प्रभो ॥११॥ मम देहे पतिं योग्यमवैधव्यं च शाश्वतं ॥ तिष्ठ त्वं मम ता
न्येह तीर्थे लिंगं स्थिरी कुरु ॥१२॥ सर्वलोकादि नाथ यि उमामहेश्वयासह शंकर ॥१३॥ महेश्वर॰ ॥ एवं भव
तु ते पुत्री मनसा यद्यदिच्छसि ॥ वरं प्राप्स्यसि भर्तारं तृणविंदोसुतं नृप १४ अहं चात्र वसिष्यामि प्रीत्या तीर्थे ३१८

त्वदाह्वयः ॥ इत्युक्त्वा भगवान्सर्वस्तस्मिंल्लिंगे लयं ययौ ॥१५॥ कालेनाल्पेन सा सर्वमलभत्सर्वतोदितं ॥१६॥ मार्कं
डेयउ॰ ॥ ततः प्रभृति विख्यातं तीर्थं तत्रोत्तरेश्वरं ॥ सर्वपापप्रशमनं सर्वोपद्रवनाशनं ॥१७॥ सर्वसौभाग्यकरणं
दौर्भाग्याबुद्धिशोषणं ॥ यस्तत्र पूजयेद्देवं यथालब्धोपहारतः ॥१८॥ स दौर्भाग्यविनिर्मुक्तः शिवलोके महीयते
पुत्रपौत्रनवाप्नोति वांछितं चापि विंदति ॥१९॥ ॥ इति रेवामहात्म्ये उत्तरेश्वरतीर्थं ॥ ॥ मार्कंडेयउ॰ ॥ ततः
क्रोशद्वयं गच्छेदुत्तरेश्वरतीर्थतः ॥ नर्मदेश्वरतीर्थं तु सर्वपापप्रणाशनं १ स्वमूर्तेस्तु तृतीयायां मार्गमाश्रित्य शं
करः ॥ जगद्भवगतिः सोमः सर्वस्यार्तिहरो हरः ॥२॥ नीलयैव पुरा दृष्टुं स्नतनूस्थानट द्वयं ॥ क्रमेणैवागतो
देवो नर्मदांबुधिसंगमं ॥३॥ पुराकल्पे स भगवानुन्नतारवृषाननः ॥ उत्तरेश्वरपार्श्वे वै विचरन्वीक्ष्यते यदा ॥४॥
तदा रेवा महोत्साहा स्वप्रवाहात्समुत्थिता ॥ दिव्यमाल्यांबरधरा दिव्याभरणभूषिता ॥५॥ प्रणमत्परमा देवी
लुठंती पुरतः स्थिता ॥६॥ नर्मदाउवाच ॥ स्वागतं ते महादेव लोकानुग्रहकारक ॥ धन्येयमद्य धरणी धन्या
हं धर्मवाहन ॥७॥ परां मयि कृपां कृत्वा यत्वं साक्षादुपागतः ॥ स्थापयित्वार्चयिष्यामि त्वामद्य प्रभृति प्रभो ८
अंशेनैकेन देवेश स्थेयमत्र सदा त्वया नमस्ते स्तु नमस्ते स्तु प्रसीद परमेश्वर ॥९॥ मार्कंडेउवा॰ ॥ एवमुक्तस्तया
देव्या महादेवो हसन्मुदा ॥ सहगौर्यास्मि सहितं प्रछाप्य प्रणतां पुरः १० कृपया देवदेवेशः कृत्वांके परिषस्वजे
११ ईश्वरउवा॰ ॥ साधु साधु महाभागे नर्मदे नर्मदायिनी यद्यदिच्छसि मनस्त्वं तत्सर्वं ते भविष्यति ॥१२॥ स
दैव नवतीरे ह्यसंश्रितोस्मि पुरापि ते ॥ इत्युक्त्वांतर्दधे देवस्तत्रैव शिवया सह ॥१३॥ ततश्च नर्मदा देवी तत्र सं
स्थाप्य शंकरं ॥ विधिवत्पूजयित्वा च स्वनाम्ना विश्वपावनी ॥१४॥ विबेशास्व जलं पश्चादीशजामरपूजिता ॥
आप्यर्चितुं तमायाति सदा पर्वणि पर्वणि ॥१५॥ इति ते कथितं पार्थ तीर्थं वै नर्मदेश्वरं ॥ तत्र स्नात्वा च पीत्वा च
ब्रह्महत्यां व्यपोहति ॥१६॥ तत्र स्नात्वा तथा राजन्पूजयेन्नर्मदेश्वरं ॥ उपचारैस्तु विविधैर्यथालब्धैस्तथापि ते

635
2008

१७ उपहारैः सदीपैश्च सगच्छेदीश्वरालयं ॥ विप्राणां भोजनैः शक्त्या नर्मदा परितुष्यति ॥१८॥ ॥ इति श्रीरे
वा माहात्म्ये नर्मदेश्वरतीर्थं ॥ ॥ मार्कंडेय॰ ॥ ततो गच्छेत्ततो राजन्मातृतीर्थमनुत्तमं ॥ सुखसौभाग्यसंतान
 सिद्धिदं पापनाशनं ॥१॥ पुराकल्पे महाराज स्थापयित्वा जगद्विधिः ॥ मानसान् दशपुत्रान्वै ससर्ज च प्रजाप
तीन् ॥२॥ मरीचिमत्र्यंगिरसौ पुलस्त्यं पुलहं क्रतुं ॥ भृगुदक्षं वशिष्ठं च नारदं चेति ते दश ॥३॥ नारदेन पुराश
प्तो दक्षः केनापि हेतुना ॥ दशाब्द्यस्तु प्रचेतेभ्यो दक्षः प्राचेतसोभवत् ॥४॥ कालेनाल्पेन राजेंद्र सृष्टिहेतोः प्रजा
तिपेः ॥ दक्षस्य चाभवन्पुत्र्यः पंचाशत्पुण्यलक्षणाः ॥५॥ मारीचः कश्यपो ज्ञानस्तपः सिद्धः प्रजापतिः
॥ ददौ दक्षश्च सर्वेभ्यो विभज्याथ पृथक् पृथक् ॥६॥ पुत्रीका दश धर्माय कश्यपाय त्रयोदश ॥ सप्तविंशति सोमा
य नक्षत्रस्थानगाश्च ताः ॥७॥ सप्तर्षयस्तेि ताः पुत्रा ब्रह्मणा दौ युधिष्ठिर ॥ सृजेति ब्रह्मणा प्रोक्तो मरीचिः
प्राह कश्यपं ॥८॥ नियोगाद्ब्रह्मणः पुत्र सृज विश्वं चराचरं ॥ स्वमाश्रयमथो गत्वा कश्यपोपि च विस्मितः ॥९॥
किं सृज्यं नु कथं स्रक्ष्ये कोत्र तत्कारकोत्र कः ॥१०॥ मार्कंडेय॰ ॥ एवं चिंतयतस्तस्य कश्यपस्याति दुष्करं ॥ पप्र
च्छुस्तास्तदा पत्न्यः परिवार्य पतिं नृप ॥११॥ पत्न्य ऊचुः॰ ॥ महती वर्तते चिंता मुने केनाद्य हेतुना ॥ कः सशायो
विस्मयो वा कृपेसत्यं वदाशु नः ॥१२॥ कश्यप उ॰ ॥ सृजेति ब्रह्मणा प्रोक्तस्ततो मामाह वै तया ॥ तत्कथं सिध्य
ते पत्न्यस्तमृषिं कश्यपं मुदा ॥ मा विचारं कुरुष्वात्र यतेचिंतां परित्यज ॥१५॥ तपः स्तप्स्याम हे सर्वास्तपसः किंतु
दुःकरं ॥ अनुजानीहि नः शीघ्रं सृष्टिरस्मासु संस्थिता ॥१६॥ इत्युक्तः कश्यपस्ताभिः प्राह प्रीत्या पुनः पुनः
१७ कश्य॰ ॥ एवं भवतु कल्याण्यः साधूक्तं वेदसंमतं ॥ तत्कुरुध्वं भुवं वल्भा भवंतो लोकमातरः ॥१८॥ मार्कंडे
य उवा॰ ॥ अनुज्ञातास्ततस्तेन पत्न्यस्तास्तपसे ययुः ॥ विलोक्य सर्वतीर्थानि विचार्य च पुनः पुनः ॥१९॥ इदमे
कमतं ज्ञातं रेवा सेवैव सिद्धिदा ॥ इति मत्वा ततः सर्वाः प्राप्यानुज्ञां च तत्वतः ॥२०॥ रेवाया दक्षिणे कुले समु ३१७

द्दीपानं माश्रिताः ॥ अदितिर्दितिर्दनुः कद्रुर्विनता विनता तथा ॥२१॥ अरुंधती वसुर्जामिर्लंबा भानुर्मरुत्वती ॥ 637/2008
इरा चेति समाख्याता मुनिपत्न्यस्त्रयोदश ॥२२ दृष्ट्वा तत्संकिलं तीरं तीरं त्यागम्यमन्वहं ॥ निम्नभूमौ ततः खात्वा
सरस्यकुरनुत्तमं २३ रेवाजलं च कलशैः कृत्स्न्या पूरयन्सरः ॥ कुंभा वनामितं तोयं यदा भटभटायते ॥२४॥
ऋषिभिर्मुनिभिः सिद्धैः स्निग्धैः स्तत्र भारतः ॥ तेन शब्देन नामापि कृतं तासां विनोदतः ॥२५॥ मार्कंडे॰ ॥
आपूर्य तत्सरस्ताश्च तपस्तेपुः समाहिताः ॥ दिव्यवर्षशतं पार्थ सृष्ट्यर्थं संयतेंद्रियः ॥२६॥ ततस्तुष्टः त्रयीमूर्ति
र्भगवान् सृष्टिकृत्शिवः प्रसन्नः प्राह सर्वं वो भविष्यति समीहितं ॥२७॥ भवतीभिः सरस्तेन संश्रितं सर्वमि
मदं ॥ भविष्यति हि लोकानां कृशानां हि सुव्रताः ॥२८॥ युष्मासु भर्द सान्निध्यान्न भविष्यति चराचरं ॥ प्रजा
पतिः कश्यपोयं भवत्यो लोकमातरः ॥२९॥ भविष्यय पतिः सर्वं स्त्रक्ष्यते भवत पुर्वे ॥ इत्युक्त्वा च महादेवस्तत्रै
वांतर्दधे नृप ३० तत्रस्थितास्तानि जे रंशैस्ततस्ता लोकमातरः ॥ वरं प्राप्य निजं भर्तुर्भर्तृसमीपतः ॥३१॥ तासु वि
श्वं समभवत् सदेवासुरमानुषं ॥ यक्षराक्षसगंधर्वपक्षिवृक्षाद्रिगोगजं ॥३२॥ चराचरमिदं जातमिति मातृ
गणान्नृप ॥ ततः प्रभृति विख्यातं मातृतीर्थं युधिष्ठिर ॥३३ तत्र स्नात्वा देवखाते मातृकुंडे विधानतः ॥ नरो
वा यदि वा नारी लभते वांछितं फलं ॥३४॥ राजन् भटभटाख्यास्ताः मातृः संपूजयेच्छ्रयः ॥ तस्मिन्सरसि वै
भक्त्या पुत्रार्थी पुत्रमाप्नुयात् ॥३५॥ रोगार्तो मुच्यते रोगात् धनार्थी धनमाप्नुयात् ॥ वर्द्धीभिर्दीपिकाभिश्च तासां
नीराजनं कृते ॥३६॥ वंध्यादिदेहजैर्दोषैर्मुच्यते नात्र संशयः ॥ भोजनं गौरिणीनां च मानरस्तुष्टिमाप्नुयुः ॥३७
इति श्रीरेवामहात्म्ये भटभटामातृतीर्थं नाम ॥ ॥ मार्कंडेय॰ ॥ ततो गच्छेन्महाराज रेवाया उत्तरे तटे ॥ तीर्थास्थि
ता महातीर्थं स्थितं क्रोशांतरे नृप १ विख्यातं कुररीतीर्थं सर्वपापप्रणाशनं ॥ तत्र स्नात्वा महाराज लभते वां
छितं फलं ॥२॥ युधिष्ठिर उवा॰ ॥ का नाम कुररी विप्र कथं तीर्थं कृतं तया ॥ कदा तीर्थमिदं जातं तन्मे कथयति

रे.ख. स्तरान् ॥३॥ मार्कंडेय उवाच ॥ शृणु राजन् सुरावृत्तं रौच्ये मन्वंतरे यथा ॥ महाकालवनात्पार्थ श्येनेन शकुनिर्धृतः
४ कुररः कुररी चैव वृक्षकोटरसंश्रितौ ॥ श्येनो गृहीत्वा तत्रैकं स प्रतीचीमगाद्दिशं ५ भिक्षार्थं तु तदा पार्थ कुररी
३१८ चाप्यगात्तदनु ॥ भर्तृस्नेहेन शोकार्ता क्रंदमाना मुहुर्मुहुः ६ श्येनोपि पश्चिमोदधितीरं प्राप्स्यति यावता तावत्स
पक्षिभिश्चान्यैर्धावमानैरितस्ततः ७ वेष्टितस्ताडितश्चंचुपक्षघातैरनेकधा ॥ व्याकुलीकृतदेहस्य तस्य पा
र्श्वात्तु खगोपतत् ८ कुररो मृतकल्पस्तु पतमानो ममार च रेवांभसि ततस्तीरं कुरर्यपि च संश्रिता ९ तीरे नी
रतरंगैस्तं नीयमानं समीक्ष्य सा क्रंदमाना निराहारा शोचंती चाति दुःखिता १० भर्तृशोकसमाक्रांता पति
व्रताधरा यदा ॥ सा सक्षति निजं देहमेतस्मिन्नंतरे तदा ११ अंतरिक्षे वृषारूढौ प्राप्तौ गौरीमहेश्वरौ स्वलीलया
गच्छमानौ ददृशाते च तावुभौ १२ क्रंदमानां च तां दृष्ट्वा कुररीं पतितां पुरः ॥ उवाच शंकरं गौरी कृपया परितो
षिता १३ ॥ उमा उ० ॥ देवदेव जगन्नाथ भक्तेश भवनाशन ॥ पश्य साधुसमाचारां पक्षिणीं शोकपीडितां १४
स्वां तनूं त्यजमानां तु भर्तृदुःखां कुशाहतां ॥ पतिप्रिया पतिप्राणा नित्यं पतिहिते रता ॥१५॥ पतिव्रताधरा सा
ध्वी सर्वलोकेषु शोभते ॥ सततं राजते साध्वी पशुपक्षिगणेष्वपि ॥ वराकीयं यतः पूर्वं कपोती किल भर्तृगा
तदस्या देवदेवेश वरं त्वमभिवांछितं १७ तव दृष्टिपथं प्राप्य शकुनी शोचते कथं ॥ स्थानं त्वं नाथ नाथ त्वं दी
नोद्धरणकारक ॥१८॥ शैलेंद्रि महतामेतद्दुर्जनं त्यज्यसौ ॥ स्वसमानं च कुरुते सुदामानं यथा हरिः १९
साधु साधु महादेवी यदुक्तं तत्तथैव च ॥ त्वदाज्ञापितं करिष्यामि विनोदं पश्य सांप्रतं २० मार्कंडेय० ॥ एवं वदति दे
वेशे यावत्सा त्यजते तनुं तावत्तापार्थ संप्रतं तत्र लिंगद्वयं शुभं ॥२१॥ देहरूढा ते तयोर्बंधं विविधार्थप्रसाध
नं कुररेश्वरसंज्ञं तत् तदा प्रोवाच भारती ॥२२॥ विमानवरमारूढौ दृष्टौ गौर्या च तौ दिवि ॥ गजचर्मपरीधा ३१८
नौ त्रिशूलवरधारिणौ ॥२३॥ व्याघ्रचर्मोत्तरीयौ च जटामुकुटमंडितौ ॥ सारूप्यां मुक्तिमापन्नौ शिवस्य

गणतां गतौ २४ मार्कंडेय० ॥ ततः सा विस्मिता देवी प्रणम्योवाच शंकरं ॥ कृतं साधु महादेव त्वया त्वं जगतां 639
गुरो २५ ॥ इमौ यद्गणतां नीतौ भक्तार्तिहरणं प्रभो ॥ इत्युक्त्वांतर्हितौ पार्थ पार्वतीपरमेश्वरौ २६ ततः प्रभृति वि 2008
ख्यातं कुररीतीर्थमुत्तमं ॥ तत्र तीर्थे नरः स्नात्वा तर्पयित्वा सुरान् पितॄन् ॥२७॥ यथाप्राप्तोपहारैश्च पूजयेत्कुर
रेश्वरौ ॥ सर्वपापविनिर्मुक्तः सारूप्यां मुक्तिमाप्नुयात् २८ दीपं दत्वा च देवाय देववन्मोदते दिवि ॥ पितॄनुद्दि
श्य यो भक्त्या विधिवत् श्राद्धमाचरेत् ॥२९॥ तृप्यंति पितरस्तस्य यावन्मन्वंतरं नृप ॥३०॥ इति श्रीरेवामाहा
त्म्ये कुररीश्वरतीर्थं ॥ ॥ मार्कंडेय उवाच ॥ तत्रैव च महाराज क्षेत्रपालः स्थितो महान् ॥ टोटेश्वरो नाम वि
ख्यातो लोकानां भयनाशनः ॥१॥ टोटी नाम पुरा पार्थ राक्षसी कामचारिणी ॥ बलात्प्रविश्य तं ग्रामं बालान् हंत
तदा ॥२॥ एकदा बालकं हृत्वा ब्राह्मणस्याग्निमध्यमः ॥ यावत्तावत्स निर्गृहात् तावत्तु विप्रेण पृष्टं तं ॥३॥ मध्य
रात्रे महाराज उच्चैर्ग्रामस्य निर्गमे ॥ बुबारावं प्रकुर्वाणो य उवाच शृणु ब्रुवन् ॥ ब्राह्मण उ० ॥ ग्रामपालोत्र कोप्य
स्मिन्नाथो वसते जनः ॥ यातुधानी हरत्येषा प्रत्यहं बालकानि च ॥५॥ किं कुर्मः कस्य ता ब्रूमो न देवो न च राक्ष
सः ॥ यं वयं शरणं याम बालान् हरति राक्षसी ॥६॥ क्षेत्रपालश्च देव्यश्च सर्वत्र ग्रामपालकः ॥ संति ह्यत्रैव नो पा
लिता ग्रामा वृथा कृतः ॥७॥ मार्कंडेय उ० इति श्रुत्वा ततो विप्रैर्व्योमचर क्षेत्रपालकः ॥ मा भैरिति ब्रुवन् तूर्णमा
जगाम तदाश्रमः ॥८॥ पप्रच्छ तं द्विजं विप्रो वृत्तांतं तमुवाच ह ॥ क्षेत्रपालेन दिग्बंधः स्वशक्त्या तत्र निर्मितः ॥९॥
स बाला राक्षसी दृष्ट्वा धृत्वा चैव निपातिता ॥ ब्राह्मण्या शुद्धबालं दत्तवान् क्षेत्रपालकः १० गले बध्वा च तां पर्णत्रि
मापणरूचिर्यदा ॥ रुदमाना तदोवाच तं प्रणम्याथ राक्षसी ॥११ यातुधान्युवाच ॥ क्षेत्राधिप शृणुष्व त्वं मम वाक्यं
यथातथा ॥ त्वयुक्तं त्वया हं तु दाक्षाध्या वचरात्यहं १२ ब्राह्मणेन समुत्पन्ना हृता साहा खिला शने ॥ शिवेन ब्रा
ह्मणाच्चैव निषिद्धा विश्वभक्षणात् १३ विचार्य च शिवाद्यैस्तैर्मर्यादा मम कल्पिता ॥ फाल्गुनस्यासिते पक्षे पूर्णिमा

रे॰ ख॰ स्यांतुराक्षसी ॥१४॥ योदास्यतिबलिंतुभ्यंग्रामेपुरेपुरे ॥ तत्रत्वयानोपसर्गः कर्तव्यः कस्यचित्क्वचित् ॥१५॥ इति
मेस्थापितादेवैमर्यादाक्षेत्रपालक ॥ तंपालयामिसततमन्यग्रामेपुरेपिच ॥१६॥ नग्रामोपंबलिंदत्तेमेममनाधि
३१९ कोमतः ॥ तस्मादिमंभक्षयिष्येलोकंवैबालपूर्वकं ॥१७॥ प्रसादंकुरुमेदेवभिक्षांयाचेचिराशनि ॥१८॥ क्षेत्रपा
लउवा॰॥ ढौंढेत्वामेवयाचेहंदेहिग्राममिमंमम॥ नोवाद्यग्रामतावासवासिनीत्वंभविष्यसि १९ त्वयायंतत्रवैपृथ्वी
ग्रामोमप्यत्रसंस्थिते ॥२०॥ राक्षस्युवाच ॥ एवंभवतुदत्तोयंमयाग्रामस्तवाखलः ॥ ममनाम्नाधिपोभूत्वाग्रामेयु
दिनिवत्स्यसि ॥२१॥ मार्कंडेयउवाच ॥ तथेत्युक्त्वास्थितस्तत्रढौंढेशः क्षेत्रपालकः ॥ मुक्त्वासाराक्षसीतेनमुक्तो
ग्रामोपिवैतया २२ तंपूजयित्वानत्वाचजगामस्वेच्छयातुसा ॥ ततः प्रभृतिविख्यातोढौंढेशः क्षेत्रपालकः
२३ तस्यत्वाराधनंकृत्वानारीवापुरुषोपिवा ॥ पूजयित्वानमस्कृत्यदुर्भगासुभगाभवेत् २४ अपुत्रोलभतेपु
त्राधनतोधनमाप्नुयात् नारीनरोथवाप्येवंलभतेकाममुत्तमं ॥२५॥ स्पर्शनाद्दर्शनात्तस्यस्तवनान्नमनाद
पि॥ नराक्षसभयंतस्यभूतप्रेतपिशाचजं ॥२६॥ शाकिनीराक्षसोत्थंगभयंतस्यांद्रियोरपि ॥२७॥ इतिश्री
कुररीश्वरतीर्थेढौंढेशक्षेत्रपालमाहात्म्यं॥ ॥मार्कंडेयउ॰॥ कोशाद्वयांतरेपार्थतीर्थपरमशोभनं ॥ द
शाकन्येतिविख्यातंकृतंसर्वेणलीलया॥१॥ एकदाभुविदेवेशोलीलयाव्यचरंनृप ॥ समुद्रोपात्तमाश्रित्यरे
वातीरंव्यलोकयत् ॥२॥ ब्राह्मणान्दशतत्रस्थानदृष्ट्वादेवोपिकौतुकी ॥ नियमव्रतसत्वस्थान्जपध्या
नरतान्मुनीन् ॥३॥ यथास्यकारिषड्वर्गान्साख्ययोगविचिंतकान् ॥ त्यक्तमानापमानांश्चसमलोष्टा
श्मकांचनान् ॥ दृष्ट्वादूरस्थितोदेवोदशोकन्याःससर्जह रूपयौवनसंपन्नाः सर्वाभरणभूषिताः ॥ तन्वं
गोमृगशावाक्ष्योमदनस्यापिमोहताः ॥४॥ गजेंद्रगतिगामिन्यः पुंस्कोकिलस्वनाः ॥ स्वयमग्रेसरस्तासां
वृद्धब्राह्मणरूपधृक् ५ दशाकन्याः समानीयतान्वाचद्विजान्विभुः ॥ बध्धांजलिपुटः प्रह्वः पुरः स्थि ३१९

त्वाचगद्गतिः ॥६॥ इश्वरउवाच ॥ पश्यंतुवैत्नवीमार्यावृद्धत्वेपिद्विजोत्तमाः ॥ अहंचममभार्याचद्वौवृद्धावप्यचक्रमौ ॥७
नज्ञायतेजीवितस्यगतिः कापिभविष्यति ॥ जन्मन्यस्मिन्निमाः कन्याः पुत्रोमाप्यवशाद्भवेत् ॥८॥ दशेमामत्प्रसूतास्तु 641/2008
कुमार्यः पुण्यलक्षणाः ॥पृथ्यामवंतोयोग्याःस्थदशौवब्राह्मणाः शुभाः ॥९॥ सहैववदातुंवः सर्वमितः संप्रतिवर्तते॥
समकालंविवाहायत्वरतेतीवमेमनः ॥१०॥ वरयध्वंद्विजश्रेष्ठागतिर्दैवस्यदुर्विदा॥ महातीर्थमिदंरेवाभवंतः पा
त्रमुत्तमं ॥११॥ चित्तंवित्तंचपात्रंचयोगोयंभुविदुर्लभः ॥ जपस्यतपसस्तीर्थयमस्यनियमस्यच ॥१२॥ एतदे
वफलंपुंसांयद्भवेत्सद्गृहागृहे ॥१३॥ मार्कंडेय॰ ॥ इत्युक्तेतत्रदेवेनतेदृष्ट्वाकन्यकाः शुभाः ॥१३॥ परंजहृषुसर्वेपि
विस्मयंपरमंदधुः ॥१४॥ परस्परंनिरीक्षंतोविनोदात्जयुरंजसा ॥ तेषांचविस्मृतंध्यानंतपस्तूर्णपलायितं ॥१५॥
जल्पातंजपश्चक्रेननाशनियमोपिच ॥ यमः कमशंतंगत्वाविनोदंविश्येस्थितः ॥१६॥ मंदावस्थामगन्मौनंकुशाः
कुमधित्रोरतेविरुक्षाल्पस्रसूत्राणिमुद्रानिद्राविभूर्णिमा ॥१७॥ इक्षांचक्रेपुरोदीक्षासंध्यातद्विप्रचेष्टितं ॥एवमानं
दिताविप्राहर्षविभ्रमथोचिरे ॥१८॥ विप्राउचुः ॥भवंतंप्रतिकिंब्रूमश्चोतोदोलायतेतुनः ॥ नपोनियमयुक्तास्म
शास्त्रंब्रूतेतथान्यथा ॥१९॥ सिद्धौषधंब्रह्मजधीरसायनंसिद्धिर्निधिः साधुकुलावरांगनामंत्रस्तथासिध्यरसश्च
धर्मतेनेमेनिषेध्याः सुधियासमागताः ॥२०॥ बलात्कारयतेयत्रशास्त्रंतत्रकिमुच्यते ॥२१॥ मार्कंडेयउ॰॥
ब्रह्मणावरयामासुर्गत्वातस्यसमीपतः ॥ अक्षसूत्राजिनादीनीजलेक्षिप्ताशुनर्मदे ॥२२॥ तेभ्यः स्ताः सदौ
कन्याउद्वाहनुपुयोजच ॥ तासामुद्वाहसमयेवीक्षांचक्रुः सुरादिवि ॥२३॥ विस्मितंचजगत्सर्वंदृष्ट्वादेवस्यके
लितं॥ ततस्त्वांतर्दधेदेवोदत्वातेभ्यस्तुकन्यकाः ॥२४॥ तदाप्रभृतितत्तीर्थदशाकन्येतिविश्रुतं ॥ पवित्रंपापशमनं
शिवप्रीतिकरंपरं ॥२५॥ तत्रस्नात्वापितृणांचश्राद्धंकृत्वार्चयेच्छिवं ॥ तत्रतीर्थेचयः कन्यांददातिसमलंकृतां
२६ प्राप्नोतिपुरुषोदत्वाशतशातत्रसंशयः अग्निष्टोमातिरात्राभ्यांफलंशतगुणीकृतं ॥२७॥ तेनदानेनभू

तेशः शिवः प्रीतिमवाप्नुयात् ॥ तेनपुण्येनपूतात्माशिवलोकेनृपोत्तम ॥२८॥ सवसेंद्रोमसंख्यानिवर्षाणि
शिवसन्निधौ ॥ ततः कालेनमहतामर्त्यलोकमुपागता ॥२९॥ धनायुः पुत्रसौभाग्यसुखसिस्थियुतोभवेत् ॥
३० इतिश्रीरेवामाहात्म्येदशकन्यातीर्थं ॥ ॥ मार्कंडेयउवाच ॥ ततः श्रेष्ठांनरेतीर्थंसा स्वर्णबिंद्वाख्यमुत्त
मं ॥ पापदोषहरंपुण्यंधन्यंस्वर्गस्यसाधनं ॥१॥ वैश्योधनपतिर्नामजयंतीसंभवः पुरा ॥ स्वर्णकोटिसमायुक्तोवृ
धस्तीर्थरुचिर्बभौ ॥२॥ रेवातीरमनुप्राप्यतत्रस्थानेयुधिष्ठिर ॥ व्रतोपवासनिरतो जलाशीफलभक्षक ॥३॥
एवंकिंबहुनातत्रस्नात्वास्वर्णंप्रयच्छति ॥ जलबिंदुप्रमाणंतुप्रत्यहंब्राह्मणायवै ॥४॥ एवंकतिपयाहोभिर्ब्राह्म
णाः शतशस्ततः ॥ तेनसंतोषिताः पार्थनददातितनोधिकं ॥५॥ एवंकालेनमहतास्वर्णकोटीर्व्ययीकृता ॥
ब्राह्मणैः स्वर्णबिंद्वाख्यांप्रापितोवैश्यसत्तमः ॥६॥ प्रत्यहंशिवमभ्यर्च्यतस्मैस्वैबिंदुमात्रकं ॥ यतः स्वर्णंददा
तीहतेनोक्तः स्वर्णबिंदुकः ॥७॥ तेनस्वर्णप्रदानेनतथाचशिवपूजया ॥ प्रसन्नेशंकरेराजन् वैश्यः शिवपुरं
ययौ ॥८॥ यावद्बिंदुप्रसंख्यानिवर्षाणिशिवलोकभाक् ॥ एवंतीर्थंभुविख्यातंतस्यनाम्नायुधिष्ठिर ॥९॥ तत्र
स्नात्वादिवंयांतिमतास्तेचापुनर्भवाः ॥ तत्रतीर्थेतुयोभक्त्यासुवर्णंविप्रायकांचनं ॥१०॥ ददातिनृपशार्दूलतस्य
पुण्यंफलंशृणु ॥ सर्वेषामेवदानानांकांचनंरत्नमुत्तमं ॥११॥ वन्हितेजः समुद्भूतंतेनपुण्यतमंविदुः ॥ तेनदत्ताहि
पृथिवीसशैलवनपत्तना ॥१२॥ दत्तानिसर्वरत्नानिकांचनंयः प्रयच्छति ॥ वाचिकंमानसंपापंकर्मणायदुपा
र्जितं ॥१३॥ वन्हिसूर्यसुरेंद्राणांलोकेषुसविराजते ॥ तत्रविद्याधरैः सिद्धैर्विमानवरमास्थितः ॥१४॥ पूज्यमा
नोवसेत्तत्रयावदाहूतसंप्लवं ॥ पूर्णेचैवततः कालेमानुष्यमिहचागतः ॥१५॥ सुवर्णकोटिसहितंद्विजानांजाय
तेकुले ॥ दानीभोगीचनिर्व्याधीधर्मवान्लोकपूजितः १६ जीवेद्वर्षशतंपार्थराजेवभुविविश्रुतः ॥ तत्रस्नात्वापितॄन्पा
र्थतर्पयित्वाविधानतः ॥१७॥ पिंडदानेनचैकेनतृप्तास्युः पितरश्चिरं ॥ स्वर्णबिंद्वीश्वरंदेवंभक्त्यासंपूज्यमानवः १८ ३२०

उद्धरेदात्मनात्मानंपुरुषोनेकविंशतिं ॥ १९ ॥ इतिश्रीरेवाखंडेसुवर्णबिंदुतीर्थः ॥ ॥ मार्कंडेयउवा॰ ॥ ततः
श्रेष्ठांनरेगत्वातीर्थंवैऋणमोचनं ॥ सर्वलोकेषुविख्यातंनृणांप्रीतिविवर्धनं ॥१॥ युधिष्ठिरउवा॰ ॥ ऋणंकिंत
मुनिश्रेष्ठकस्तस्मान्मोचितः पुरा ॥ किमत्रविहितंतीर्थेसर्वविस्तरतोवद ॥२॥ मार्कंडेयउ॰ ॥ श्रास्पपक्षेक्षयाहेच
तीर्थेपर्वणियद्भवेत् ॥ तर्पणंपिंडदानंचपैतृकंतदृणंस्मृतं ॥३॥ अग्निहोत्रंतथायज्ञाः पशुबंधास्तथेष्टयः ॥
एतद्देवऋणंप्रोक्तंमानुष्यंशृणुवतः परं ॥४॥ ब्राह्मणेषुचतीर्थेषुदेवायतनजोत्सवे ॥ अभ्यागतानियिपुयद्दी
यतेव्यवहारतः ॥५॥ ऋणंमानुष्यकंवैतदितिप्रोक्तंऋणंत्रयं ॥ ऋणत्रयविमोक्षार्थंपुत्रमिच्छंतिसाधवः ॥६॥
इच्छंतिपितरश्चापिस्वार्थहेतोसुतंतुते ॥ पुरादुस्यवनोराजासोमवंशसमुद्भवः ॥७॥ रेवातीरमुपायातस्तपु
त्रः पुत्रवांछया ॥ संस्थाप्यशंकरंतत्रनित्यंस्नात्वाशिवंयजन् ॥८॥ देवंविज्ञापयत्येवतघृणुष्वनराधिप ॥
पूजनांतेशिवंवीक्ष्यन्रुदन्वैश्रीफलाशनः ॥९॥ जानुभ्यामवनिंगत्वामुखंक्षिप्त्वाद्दशांगुलीः ॥१०॥ दुस्यवनउ॰
दीनोद्धरणदेवेशममापुत्रस्यकागतिः ॥ पितृदेवमनुष्याणांऋणंपापेमयिस्थितं ॥११॥ अनाथनाथमांपाहि
कृपणंपुत्रवर्जितं ॥ किंकरोमिकृपामीशास्थितंममपिऋणत्रयं ॥१२॥ त्वमेवजगतांनाथस्त्वत्तोनान्योस्तिकश्च
न ॥ तेनसत्येनविश्वात्मन् मामुद्धरऋणत्रयात् ॥१३॥ मार्कंडेयउ॰ ॥ तमेवंवादिनंनित्यंदीनंदुस्यवनंनृपं ॥
सस्पमेमासिदेवेशः प्रत्यक्षः प्राहलीलया ॥१४॥ ईश्वरउ॰ ॥ दीनोसिपुत्रहीनोसिभोराजन्पुत्रमीच्छसि ॥ ऋ
णत्रयविमोक्षायपुत्रस्तवभविष्यति ॥१५॥ इत्युक्त्वासमहादेवस्तत्रैवांतरधीयत ॥ पुत्रंलेभेसराजापिऋण
मोचनसंज्ञकं ॥१६॥ इतितेकथितंपार्थतीर्थंवैऋणमोचनं ॥ तत्रस्नात्वाविधानेनसंतर्प्यपितृदेवताः ॥१७
शिवंपूज्यनरः पार्थपुत्रवाननृणोभवेत् ॥ सस्त्रियश्चापियेराजन् तीर्थेश्रद्धासमन्विताः ॥१८॥ ऋणऋण
त्रयाद्विमुच्यंतेअपुत्रापुत्रिणस्तथा ॥ दुत्वादत्वातथाजप्त्वास्नात्वासंपूज्यभारत ॥१९॥ श्रद्धावान्ससजन्मा

643/2008

न्मानिफलमक्षय्यमाप्नुयात्॥ ॥इतिश्रीरेवामाहात्म्येऋणमोचनतीर्थं॥ ॥मार्कंडेयउ० ततःक्रोशान्तरे
गर्घतीर्थंत्रैलोक्यविश्रुतं॥देवदानवगंधर्वैरप्सरोगणसेवितं॥१॥यत्रतिष्ठतिदेवेशः साक्षाद्रुद्रोमहेश्वरः॥भा
रेणमहताजातोभारभूतिस्तथोच्यते॥२॥युधिष्ठिरउवा०॥भारभूतिमितिप्रोक्तंत्वयातीर्थंतुयन्मुने॥कथंकुदाच
तज्जातंवदविस्तरतोमम॥३॥मार्कंडेयउ०॥भारभूतिसमुत्पत्तिंशृणुपांडवसत्तम॥विस्तरान्मेयथाप्रोक्तंपुरादेवेन
शंभुना ४ आसीत्कृतयुगेविप्रोवेदवेदांगपारगः॥रेवातस्यमनोराज्येसाधुकर्मगुणान्वितः ५ विष्णुशर्मेतिविः
ख्यातः सर्वशास्त्रविशारदः॥क्षमादमोदयादानंसत्यशौचंधृतिर्घृणा॥६॥विद्याविज्ञानमास्तीक्यमेतत्तस्मिन्प्रति
ष्ठितं इदग्विधाहियेविप्रापूज्यंतेनृपसत्तम॥७॥पततंनरकेघोरंतारयंतिनरंतिते॥८॥क्षांताश्चदांताअतिशी
लिनोयेजितेंद्रियाः प्राणिवधान्निवृत्ताः॥प्रतिग्रहेसंकुचिताग्रहस्तास्तेब्राह्मणास्तारयितुंसमर्थाः ९ एवंगुणग
णाकीर्णोब्राह्मणोनर्मदातटे॥शिलोंछवृत्तिजीवीचवसतिब्राह्मणैः सह॥१०॥तीर्थेतीर्थेप्रशंसन्तिब्राह्मणा
विष्णुशर्मणः॥ तादृशंब्राह्मणंज्ञातुंदेवदेवोमहेश्वरः॥११ भूत्वाद्विजवटुःश्रीमान्आजगामतदाश्रमं॥ द
ष्ट्वातंब्राह्मणोसार्धउत्थाय्यतंपदक्रमं॥१२॥अभिवाद्यसततंविप्रः स्वागतेनाभ्यपूजयत्॥मुहूर्तात्तुवाचायब्रा
ह्मणस्त्वमिहागतः॥१३॥किमर्थमेवबटोब्रूहीकिंकरोमितवेप्सितं॥१४॥बटुरु० विद्यार्थिनमनुप्राप्तंविद्धिमांद्वि
जसत्तम दास्यसेयदिमेविद्यांततः स्थास्यामितेगृहे १५ ब्राह्मणउ० सर्वेषामेवविप्राणांबटोत्वंपात्रउत्तमः॥दा
नानांपरमंदानंकथंविद्यानदीयते १६ गुरुशुश्रूषयाविद्यापुष्कलेधनतेनवा॥अथवाविद्ययाविद्याचतुर्थंनोप
लभ्यते॥१७॥बटुरुवा०॥यथान्येबालकास्तातशुश्रूषंतित्यहर्निशं॥भगवान्बटुभिः सार्धंशुश्रूषामितथाध्रु 	३२१
वं॥१८॥मार्कंडेयउवा० तथेतिचोक्ताविप्रेंद्रः पाठयस्तंदिनेदिने॥वर्ततेसहशिष्यैः सशिलोंछानुपहारयन्
१९ ततः कतिपयाहोभिप्रोक्तोवटुभिरीश्वरः॥पचनार्थंसर्वकर्मकुरुपर्यायमागतं॥२०॥तथेतिचोक्ता

देवेशस्तदाश्रमपदेस्थितः॥अध्यापकश्चशिष्याश्चवनंजग्मुर्यथापुरा॥२१॥बटुर्वनस्पतीन्ध्यात्वाकामधेनु
मथाब्रवीत्॥यावदागच्छतेविप्रोबटुभिःसहमंदिरं॥२२॥संसिध्यमन्नंसर्वंहिकर्तव्यंतावदाश्रमे॥२३॥मार्कंडे
य०॥एवमुक्त्वासतान्सर्वान्बटुरूपोमहेश्वरः॥तदानीमेववनेयत्रतत्रयातोनुलीलया॥२४॥पिक्रतोबटुभिः
स्तैः सततौवगुरुसन्निधौ २५ बटुरुउवा०॥श्रुत्वामकंटाः सर्वस्मइतोगत्वास्वमाश्रमं॥त्वयासिद्धेनचान्नेनतृ
प्तिंयास्यामिवैयतः २६॥ तद्दृथाचिंतितंसर्वंत्वयागत्यकृतंहितः॥मिथ्याप्रतिज्ञमूढेनदुरनिष्टिनमद्यते॥२७॥
बटुरुवा०॥ईर्ष्यांवाप्यनुतापंवाभोजनार्थेद्विजर्षभः॥माकुरुध्वंयथान्यायंसिद्धेन्नेगृह्यमेवच॥२८॥बटुरुवा०
दिनशेषेणचास्माकंपचनांतुदिनेदिने॥निष्पत्तिंयातिवानेतितदसिद्धमशेषतः॥२९॥असिद्धेसिद्धमस्माकं
यत्त्वयासमुदाहृतं॥गतेस्तत्रान्तरंदृष्ट्वाबध्वाक्षेप्यस्त्वमंभसि॥३०॥बटुरु०॥शृणुध्वंभोबटुवराः सोपाध्यायाद्वि
जर्षभाः॥प्रतिज्ञांममदुर्धर्षांयांश्रुत्वाविस्मयोभवेत्॥३१॥यदिसत्यमिदंसर्वंयदुक्तंभवतामया॥यूयंबध्वाततः
सर्वक्षिप्स्यातनर्मदाजले॥३२॥पश्यत्वद्यउपाध्यायोबध्वातांक्षिप्यतांह्रदे॥गतानामाश्रमेसाक्षीसर्वंनिवासिनां
हितः॥३३॥मार्कंडेयउ०॥तथेतिकृत्वातेसर्वेसमयंगुरुसंनिधौ॥स्नात्वाजप्त्वाविधानेनभूतिश्रामंततोययुः॥३४
दृष्ट्वातेविस्मयंजग्मुर्विस्तृतेक्षणभोजने॥षड्रसान्नेनतेराजन्जुहुवुर्बुभुजुः पृथक्॥३५॥तुष्टः प्रोवाचवचनं
उपाध्यायस्ततोमुदा॥३६॥उपाध्यायउ०॥वरदोस्मिवरंवत्सवृणुयस्तवरोचते॥सांगोपांगास्तुतेवेदाः शास्त्रा
णिविविधानिच॥३७॥प्रतिभास्यंतितेवत्समदीयश्चेदृशोवरः॥३८॥मार्कंडेयउ०॥एवमुक्तःसगुरुणाते
श्चक्रीडेयथासुखं॥द्वितीयेचततः प्राप्तेदिवसेनर्मदाजले॥३९॥क्रीडनार्थंगताः सर्वेसोपाध्यायायुधिष्ठिर॥
ततः स्मृत्वापणंतंसमाभाष्यपरस्परं॥४०॥भारंबभंधसर्वेषांबटूनांवल्लिदामभिः॥शापानुग्रहकृद्वाः क्षि
पतोयेयथागृहे॥४१॥जलेक्षिप्त्वाबटुन्दृष्ट्वाविषण्णेनततोनृप॥बटुः सगुरुणाप्रोक्तोहाकिंतेसाहसंकृतं॥

६४५/2008

४२॥ एतेषांपितरोमूढ शिष्याणांगृहमागताः॥यदिप्रक्ष्यंतितेपुत्रान्वक्ष्यामिकिंगतानहं ४३॥ एवंसतिमहा
भारेयदिकश्चिन्मरिष्यति॥ तदास्वकीयजीवेनकिंजीवपितुर्मेहसि॥४४ मृतेष्वेतेषुविप्रेषुनजीवेनिश्चयोम

म॥अस्यहंचमरिष्यामितेनदृष्टुमलंयथा॥४५॥ ब्रह्महत्याश्वतेवस्यो भविष्यंतिमृतेमयि॥ द्विजबंधनमात्रे
णनरकेपतनंध्रुवं॥४६॥ प्राप्तेतेमरणावस्थांतत्रनज्ञायतेमृतिः॥ मनसापिद्विजेहिंसायश्चिंतयतिमूढधीः
४७ तस्यापिब्रह्मवध्यास्यात्किमुताधिककारिणः ४८ मार्कंडे०॥ एवमुक्तस्तुविप्रेणउच्चहारबदूनजेरूतान्॥
भारंमुक्त्वागुरोरग्रेछादयामासतान्द्विजान्॥४९॥ स्ववस्त्रेणनृपश्रेष्ठतस्थौप्रांजलिरग्रतः ५० उपाध्यायउ०
मुंचसर्वान्पृथक्कृत्वायदिजीवंतिसत्वरं॥ पणानृपएवंगताः सर्वेहृष्टः स्वांतेचवैबटौ॥५१॥ उपाध्यायवचः श्रु
त्वायावद्द्वाराद्बहिर्मेचनिभारस्थानेमहल्लिंगंतावदुत्थितमैश्वरं॥५२॥ ददर्शसमृतांस्तांश्चजीवितान्पुरतोगुरोः
स्वरूपधारिणंशंभुंसविधुमूर्धसविभूषणं ५३ ततः सविस्मयाविष्टोवीक्ष्यसर्वांश्चशिष्यकान्॥ निष्णुशर्मासमुत्था
यप्रणाममकरोद्भुवि॥५४॥ विष्णुशर्मोवाच॥ धन्योस्मिकृतपुण्योस्मिकिंकरोस्मितवेश्वर॥अज्ञानेनमयाते
ययुदुक्तंपरमेश्वर॥५५॥ दुरुक्तमप्रियंवापिकृतंतत्क्षंतुमर्हसि॥५६॥ महेश्वरउ०॥भवान्देवोभवानमान्यभवा
पूज्यश्चमेपिता॥ वेदगर्भनमस्तेस्तुनास्तिकश्चिद्व्यतिक्रमः ५७॥ जनेतान्योपनेतान्चयस्तुविद्यांप्रयच्छति॥अ
न्नदातामयत्रातापंचेतेपितरः स्मृताः॥५८॥ यत्त्वमेवहितोभारः सहाध्यायद्विजन्मनां॥भारभूतिरितिख्यातं
तेनतीर्थंभविष्यति॥५९॥भारभूतीश्वरंनाम्नायोमामभ्यर्चयिष्यति लिंगेस्मिन्ब्राह्मणः श्रेष्ठभुक्तिंमुक्तिंसलि
प्स्यते॥६०॥ एवमुक्त्वातदापार्थविष्णुशर्माणमीश्वरः॥ तत्रतीर्थेसमापृच्छद्द्विजानंतर्दधेस्वयं॥६१॥ मार्कंडेयउ०
तदाप्रभृतितत्तीर्थंभारभूतीश्वरंमतं॥ विख्यातंसर्वलोकेषुमहापातकनाशनं॥६२॥ ब्राह्मणाविस्मिताः सर्वेविष्णु
शर्मपुरोगमाः॥ पूजयांचक्रिरेदेवंतत्रतीर्थेयुधिष्ठिर॥६३॥तत्रतीर्थेपुनर्वृत्तमितिहासंब्रवीमिते॥ समाहितम ३२२

नाः पार्थशृणुतत्पापनाशनं॥६४॥ पुराकृतयुगस्यादौवैश्यः कश्चिन्महाधनः॥सुकेशइतिविख्यातस्तस्यपुत्रोति 6417
धार्मिकः ६५ सोमशर्मइतिख्यातोदातामतिमतांवरः॥ ससखायंवणिक्पत्रंकंचिच्चक्रेतिनिर्धनं॥६६॥ सह 2008
देवाह्वयंराजन्सर्वकर्मसुकोविदं॥ एकदातुसमंतेनव्यवहारमचिंतयत्॥६७॥ वैश्य० सखेसमुद्रयानेनं॥ग
च्छावोयदिमन्यसे॥ भांडंबहुसमादायमदीयंद्रव्यसाधने॥६८॥ परद्वीपंगमिष्यावउत्कर्षश्चावयोः समः॥तथेति
तेनचैवोक्तेमंत्रयित्वामनोगतं॥६९॥ सर्वंक्रयाणकंनीत्वानावरूढौमहोदधिं॥ परद्वीपंचतौगत्वाविक्रीतंवस्तु
तदा॥७०॥प्रासंबहुसुवर्णंवैरत्नानिविविधानिच॥ नावंतांसंभृतांकृत्वातौपश्चादारुरोहतुः॥७१॥ तावमंजले
जातानिशीघ्रेस्वर्णसंभृतं॥ दृष्ट्वातंसोमशर्माणंउत्संगेकृतमस्तकं ७२ शयानमतिविश्वस्तंसहदेवोप्यचिंतय
त्॥ एषनिद्रावशंप्राप्तोसोमप्रियप्राणांनिधापवै॥७३॥ अस्याधीनमिदंसर्वंद्रव्यजातमशेषतः॥ उत्क्षिप्यचिमेर
थानंत्रगत्वेतिवानवा॥७३॥ इतिनिश्चित्यमनसापापस्तंलवणोदधौ॥चिक्षेपसोमशर्माणंध्यात्वापापंदिवसे
ते॥७४॥ उत्तीर्णस्तरणात्तस्मात्ततः संगृह्यतद्धनं॥स्वस्थः स्वगृहमागात्सनिःशंकसुप्रतीकवत् ७५ ततः क
तिपयाहोभिः संयुक्तः कालधर्मतः॥गतोयमपुरंघोरंगृहीतोयमकिंकरैः ७६ सनीतस्तेनमार्गेणयेनसंतप
तेरविः॥कृत्वाह्वादशधात्मानंसंप्राप्तेप्रलयेयथा॥७७॥सुतीक्ष्णाः कंटकायत्रश्वानः सुदारुणाः॥तीक्ष्णादं
ष्ट्रामहाव्यालाव्याघ्रायत्रमहावृकाः॥७८॥ सुतप्तावालुकायत्रक्षुधातृष्णातमोमहत्॥यत्रतोयकथाना
स्तिनछायानाश्रयः क्वचित्॥७९॥अत्रोदकंप्रार्थयंतोज्वलदंगारभक्षणं॥छायांसंप्रार्थमानानांभृशंत
पतिभास्करः॥८०॥ तैर्दत्स्यमानावहुशोविनपंतिमुहुर्मुहुः॥ हाभ्रातःपुत्रमातेतिपतंतिपथिमूर्छिताः
८१ इत्थंभूतेनतामार्गेसनीतोयमकिंकरैः॥ यत्रतिष्ठतिदेवेशः प्राणिसंयमनोयमः॥८२॥ तेद्वारदेशेतं
स्थाप्यतिगदुर्यमकिंकराः॥दूतउवा०॥बध्वागृहखलपाशेनआनीतोमित्रघातकः॥स्थापितोद्वारिलोकेश

रे. ख० विधस्त्वयदनंतरं ॥८४ यम उवाच ॥ नैवपूर्वंवीक्षितंयेमुखंविश्वासघातिनां ॥ योमित्रद्रोहकाः पापोमानवो
मा प्रवेशार्ता ॥८५ ऋषयोत्रविचारार्थंनियुक्तानिपुणास्थिताः ॥ नेयत्रधुवनेतत्रनियतंमाविचार्यतां ॥८६॥
३२३ इत्युक्तास्तेतमादायकिंकराः शीघ्रगामिनः ॥ ऋषीन्गत्वाथनानूचुस्तेनिवेद्ययमाज्ञया ॥८७॥ शृणुध्वंभो
ऋषिश्रेष्ठाः पापिनानेनयत्कृतं ॥ मित्रंवैश्यस्तुवणिजासंयुत्तोनिशिघातिनः ॥८८॥ धनलोभेनविश्वस्तः
कृतोसंगतिशिराः शुचिः ॥ आदिश्यतांगतिस्त्वस्यपथाशास्त्रंहिनोद्विजाः ॥८९॥ ऋषयऊचुः ॥ आदृष्टपूर्वमस्मा
भिर्मुखंविश्वघातिनां ॥ मित्रद्रोहकृतांदृताः कृतघ्नानांविशेषतः ॥९०॥ कृत्वापटांतरंतेनशृण्वंत्वस्ययथाग
तिं ९१ मार्कंडेयउ० ॥ तेशास्त्राणिविचार्याथजल्पयस्तुपरस्परं ॥ अरूययदृतांश्चानूचुश्चात्मणपुंगवः ॥९२॥ अ
न्वेषितानिशास्त्राणिवेदाः सांगाः स्मृतीस्तथा ॥ पुराणानीचमीमांसासर्वशश्चविचारिताः ९३ ब्रह्मघ्नेवसुरापे
गुर्वंगनागमे ॥ निःकृतिर्विहिताशास्त्रेकृतघ्नेनास्तिनिष्कृतिः ॥९४॥ स्त्रीबालगुरुवृद्धानांस्वामिद्रोहकृतांयथा
निःकृतिर्विहिताशास्त्रेमित्रघ्नेनास्तिनिष्कृतिः ९५॥ सर्वपापरतानांचदुर्वृताभक्ष्यभक्षिणां ॥ कास्युक्तानिष्कृतिःशा
स्त्रेनतुविश्वासघातिनां ॥९६॥ मित्रद्रोहकृतघ्नश्चयश्चविश्वासघातक ॥ त्रयस्तेनरकंयांतियावच्चंद्रदिवाकरौ
॥९७॥ वापीकूपतडागादिभेत्तारोपेचमानवाः ॥ उद्यानवाटिकादीनांतरूणांछेदकारिणः ॥९८॥ दवाग्निदाहका
येचसततंप्राणिहिंसकाः ॥ न्यासापहारिणोयेचगरदाःस्वामिवंचकाः ॥९९ मातापितृगुरूणांचत्यागिनोदो
षदोषिनः ॥ बालघ्नीचपतिघ्नीचभर्तृघ्नीकुलटाचया ॥१०० विवेकरहितायाचयास्त्यक्त्वानपतिंव्रजेत् ॥ सिक्षा
न्नंवास्वयंभुक्तेत्यक्त्वादेवपितृनपतिं ॥१०१॥ एतासांतुगतिर्दृष्टानतुविश्वासघातिनां ॥ इतिस्थितेषुपापेषुगु
निरेवंविधीयते ॥२॥ नान्यागतिर्मित्रिहणोविश्वस्तेपिचनिश्चितं ॥२॥ ऋषयऊचु० यमदूताइतोनीत्वात्वे ३२३
नं ॥ कल्पकोटिशतंशासंपचयिणपृथकपृथक ॥३॥ त्रिंशत्कोटिप्रसंख्येषुनरकेषुस्वकर्मतः ॥ क्षिप्यतामेष

6449/2008

मित्रघ्नोनविचारोत्रकश्चन ॥४॥ मार्कं० ॥ इतितेवचनंश्रुत्वाकिंकराऋषिभाषितं ॥ निगृह्यघोरान्नरकान्
प्रतिक्षेसुगताहितं ५ तेनुमारोहितंकेरेघोरेरौरवसंज्ञके ॥ चिक्षिपुस्तत्रपापिष्ठंक्षिप्तेरावोभवन्महान्
६ प्राणिनांरौरवस्थानामेतंमुचंतुभाषिणां ॥ अस्यसंदर्शनादेवपीडाशतगुणाहिनः ७ यथोल्मुकैःप्रदी
प्तैश्चसमृद्धैर्दह्यतामिह ॥ भवेसंदर्शनादस्यतुंडस्यैवफलंमहत् ८ यथाकुजनसंगस्यासुजनोयातिदुर्ग
तिं ॥ सन्निपातानथास्यापृतक्षतेक्षारावसेचनं ९ प्रसादःक्रीयतामाशुपापोन्यत्रानिवर्त्यतां ॥ नरकाः
संतिबहवः कथमेकोस्तिरौरवः ॥१०॥ एवमुक्तास्ततस्तेतिगताश्चैवमुनिप्रति ॥ तत्रापिनरकाःसर्वेपूर्वव
तप्रचुक्रुशुः ॥११॥ एवंतेकिंकराःसर्वान्नितनीत्वानरकान्नृप ॥ पर्यटंतोविपस्मावैकिंकार्यमितिच्चावदन् ॥
१२ नरकेपिस्थितिर्नास्तिपापिनोस्यापदुर्मतेः ॥ ततोनिगृह्यतंजग्मुःकिंकरायमसन्निधौ ॥१३॥ गत्वानिवे
दयामासुयद्वृत्तंनरकैःसह ॥ किंतस्यवदकर्तव्यंनरकेयस्यनस्थितिः १४ यमउ० ॥ तथाप्यशेषनरकान्भुक्त्वा
लंयथोचितं ॥ योनिंयात्वेषपापिष्ठस्तैर्यग्चीपापवृद्धितां ॥१५॥ कालंऋषिभिरुद्दिष्टंमात्रपापःप्रवेश्यतां ॥ एव
मुक्तेतुवचनेप्रजासंयमनेनच ॥१६॥ चक्रुर्यथोक्तंतेदूतानिन्युस्तंनरकान्पृथक् ॥ ततोनीकःसहस्रमितांवि
ष्टासुबहुधानृप ॥१७॥ ततश्चदंशमशकमंकोटकपिपीलिकाः ॥ यूकामत्कुणविड्वृक्षस्वशृंगालाहिपक्षिणां ॥
१०१८ मक्षिकासरटानांचसरहगोधागवाशिनां ॥ काककुक्कुटगृध्राणांवृकवृश्चिकशौकरीं १९ खराश्वगज
रादीनांयोनिंपापःक्रमाद्गतः ॥ एताश्चान्याश्चबह्व्योवैयोनिःस्थावरसंभवाः २० पशुयोनिंततोगत्वागवां
योनिमवाप्तवान् ॥ सतांयोनिमनुप्राप्यपूर्वंयेभिद्वारवाहकः २१ गृहेनुपार्थिवेशस्यधार्मिकस्ययशस्विनः
एकदासनृपःप्रासंमत्वावैकार्तिकींशुभां २२ पुरोहितमथाहूयब्राह्मणान्शुभवान्बहून् ॥२३॥ राजोवा०
नगृहेकार्तिकींकुर्यादितिमेवहुराश्रुतं ॥ समेतास्तत्रगच्छामइतिश्रुतद्विजर्षभः ॥२४॥ योगृहेकार्तिकींकुर्यादि

रे॰ख॰ त्तिमेवहुताशस्तुतं ॥ समेतास्तत्रगच्छामइत्तिश्रुत्वाद्विजर्षभः ॥२५॥ यो गृहे कार्त्तिकीं कुर्यात्स्नानदानविवर्जितः ॥ संवत्सर
कृतात्पुण्यात्सवस्यादितिश्रुतिः ॥२६॥ तस्मात्सर्वप्रयत्नेन तीर्थं सर्वगुणान्वितं ॥ वयं सर्वेपि गच्छामः स्नातुं दातुं स्वश
३२४ क्तितः ३७ मार्कं॰ एवमुक्ते तु वचने पार्थिवेन द्विजोत्तमाः ॥ तत्रयामो वयं सर्वे तीर्थं पापक्षयंकरं ॥ ३८ एवमाभाष्य नृपति
गृहीत्वा प्रचुरं वसु ॥ शाकटानि परं भृत्वा तत्र युक्तः सधूर्वहः ३९ मित्रघातकरो यैवेगो यो नित्यं तु क्रमाद्गतः ॥ इत्थं स नर्मदां
राजा प्राप्तवांस्तीर्थमुत्तमं ४० गत्वा चतुर्दशीदिने ऽपकृतेक्षणः ॥ स्नानार्थं तीरमासाद्य प्रसादाद्देवं शिवं स्मरन् ॥१४१॥ शुचि
प्रदेशाच्च मृदं स्वयं जग्राह मंत्रवान् ॥ मंत्रध्वननात्रिवराहेण कृष्णेन शतबाहुना ॥४२॥ मामुद्धरतथा धात्री प्रजया च ध
नेन च ॥ स एवं मृदमादाय गत्वा तीरे जलांतिके ४३ उदत्रयितृ भास्कराय मंत्रमेनमनुस्मरन् ॥ अश्वक्रांते रथक्रांते वि
ष्णुक्रांते वसुंधरे ४४ मृत्तिके हर मे पापं यन्मया पूर्वमर्जितं ॥ ततो वगाहयेदंभो रेवं मंत्रमुदीरयन् ४५ त्वं नर्मदे पुण्यज
ला तवांभः शंकरोद्भवं ॥ स्नानं प्रकुर्वतो मे घपापं नाशय सर्वतः ४६ ॥ स्नानमंत्र ॥ अनेन विधिना स्नात्वा संतर्प्य पितृदेव
ताः ॥ प्रीणयित्वा पितॄन् श्राद्धैस्ततो देवालयं व्रजेत् ॥ ४६ सुधान्संभृत्य संभारानचिंतयन् शंकरं हृदि ॥ आगमोक्तपुरा
णोक्तविधिना पूजयेच्छिव ४७ पूजा चतुष्टयं देवे शिवरात्र्यां समाचरेत् ॥ संस्नाप्य प्रथमे यामे पंचगव्येन शंकरं ४८ पं
चामृतेन च तथा देवं ध्यायन् जगद्गुरुं ४९ मार्कंडे॰ ॥ एवं राज्ञा कृतं तेन सिंगमाज्येन पूरितं ॥ धूपदीपादिनैवेद्यैरुप
हारैर्यथाक्रमं ॥५०॥ ददावर्घं च देवाय मंत्रेणानेन भारत ॥ नमस्ते गिरिजाधांगिशंभो परमकारण ५१ गृहाणार्घ्यं च
देवेश संसाराद्धुत्तरस्व मां ॥ वित्तानुरूपतो दत्तं सुवर्णं मंत्रकल्पितं १५२ वह्निर्वै देवताः सर्वाः सुवर्णं च हुताशना
न् ॥ अतः सुवर्णदानेन प्रीतास्युः सर्वदेवताः १५३ अनेन स्वर्णदानेन प्रीतो भवतु शंकरः ॥ अनेन विधिना राजा पू
जितः प्रथमे शिवः ५४ यामे द्वितीये च तथा पूर्वोक्तविधिना यजन् ॥ स्नापयामास गव्येन दुग्धेन त्रिपुरांतकं ॥५५॥ तं ३२४
दुलैरक्षतैस्तैन सितैर्लिंगं प्रपूरितं ॥ सितवस्त्रयुगं चैव दत्तं देवाय भारत ॥५६॥ यामे तृतीये मधुना संस्नाप्य परमे

श्वरं ॥ तिलैः प्रपूरितं लिंगं तिलद्रोणं च दत्तवान् ॥५७॥ तिलाश्चैवास्य कृष्णाश्च पवित्राः सर्ववल्लभाः ॥ तिलद्रोणप्र 651/2008
दानेन छिंधि पापं महेश्वर ॥५८॥ सितवस्त्रयुगं यामे द्वितीये चापि वै ददौ ॥ दध्योदनेन च कृतं तुरीये लिंगपूरणं
५९ तस्मिन्यामे प्रदत्ता गौः शंकरः प्रीयतामिति ॥ अनेन विधिना राज्ञा यामिनी त्वतिवाहिता ॥ ६०॥ गीतनृत्यविनोदै
श्च ब्रह्मघोषेण भारत ॥ चकार जागरं चापि बहुपुण्यप्रसाधकं ६१ यो जागरे त्रिनेत्रस्य शिवरात्र्यां व्यवस्थिताः ॥
तेषां तिर्यांगति पार्थ न तां वै प्रतुयाज्जिनः ॥६२॥ यानि कानि च पापानि जन्मकोटिकृतानि च ॥ हरकेशवयोस्ता
नि जागरे यांति संक्षयं ॥६३॥ यावंतो निमिषा नॄणां भवंति निशि जाग्रतां ॥ निमिषे निमिषे राजन् अश्वमेधफलं
लभेत् ६४ उपवासपराणां च देवायतनवासिनां शृण्वतां पुण्यमाख्यानं ध्यायतां हरकेशवौ ॥६५॥ भागे तृती
ये च रमे निशायाः किं पुनर्नृप ॥ तदा कालार्जितं पुण्यं वक्तुं ब्रह्मापि न क्षमः ॥६६॥ न शिवः केशवो वापि का कथा
न्यसुरस्य वै ॥ बहु स्वर्णेन निमिषः कृतुना न तुलां लभेत् ॥६७॥ शिवरात्रिनिर्तिः पुण्या कीर्तिकी च विशेषतः ॥
रेवाया उत्तरे कूले तीर्थं भारेश्वरे नृप ॥६८॥ कृतं जागरणं दुःस्वानुकथं पापं न हास्यति ॥ इत्थं स जागरं कृत्वा शिवरात्र्यां
नरेश्वरः ६९ प्रभाते विमलं गत्वा नर्मदानीरसंन्निधौ ॥ स्नापितास्तेन तेसर्वे तु रगाश्च धुरंधराः ॥७०॥ तत्र मध्यस्थि
तः स्नानस्तिर्यत्वयोगतो वणिक् ॥ यैव हरागतस्तीर्थं स्नातो हं स्नापयामि तान् ॥७१॥ दर्पात्तेभ्यः समुद्दिश्य किंचि
च्छक्त्यानुरूपतः ॥७२॥ मार्कंडेय॰ ॥ एवं वाहनजान् दोषान्मुक्तो भवति मानवः ॥ अन्यथा सुकृतान् भागेन व्रजेत्पि
तान्प्रति ॥७३॥ संस्नाप्य तांस्ततो राजा स्वयं स्नात्वा विधानतः ॥ संतर्प्य पितृदेवांश्च श्राद्धं कृत्वा यथाविधि ॥७४॥ कृ
त्वा पिंडान् यथाशास्त्रं नृपमत्स्यपार्थिवः ॥ गत्वा देवालयं पश्चाद्देवं तीर्थादिकेन च ॥७५॥ संस्नाप्य पंचगव्यैश्च
ततः पंचामृतेन च ॥ सर्वौषधिजलैः स्नाप्य चंदनेनानुलिप्य च ॥७६॥ कुंकुमैश्च सकर्पूरैर्गंधैश्च विविधैरपि ॥
सुगंधैर्विविधैः पुष्पैर्लिंगमापूर्य सर्वतः ॥७७॥ गोदानं च कृतं पश्चात्तद्विधिना मंत्रपूर्वकं ॥ धेनुके रुद्ररूपासि रु

द्रेणपरिनिर्मिता ॥१७८॥ दत्तामयान्नवाब्धौचयनंतंलसमुद्भर ॥ एवंस्वलंकृतांधेनुदत्वापश्चान्तृक्षमापयेत् ॥७९॥ ब्रा
ह्मणान्भोजयेद्भक्त्याश्रद्धयासंतोषयन्शिवं ॥ षड्रसैर्भोजनैर्भक्ष्यैर्वासोभिस्तानथार्चयेत् ८० दक्षिणाभिर्विचित्रा
भिः संतोष्याथविसर्जयेत् ॥ एवंकृत्वासराजापिस्वयंचबुभुजेनृतः ॥८१॥ इष्टंबंधुजनैः सार्धंपरिवारसमन्वितः ॥
अपितांरजनींतत्रन्यवसज्जगतीपतिः ॥८२॥ तत्रतस्योषितस्यैवंनिशीथेनृपसत्तम ॥ अंतरिक्षेसुनिर्घोषावागु
वाचाशरीरिणी ॥८३॥ भारत्युवा॰ ॥ राजन्संसर्गजंलोकेफलंस्यादपितच्छृणु ॥ पातित्यमथवैत्वस्यसंसर्गादिवजा
यते ॥८४॥ संसारसागरेस्मिन्पतितानांदुरात्मनां ॥ यदिसंसर्गमात्रेणफलंस्यात्किंत्वयनेकथं ॥८५॥ यएषत्वद्गृहे
वोदामहद्भारंधुरंधर ॥ विश्वस्तमित्रघातीवैकृतोत्यतेनपापिना ॥८६॥ पुराजन्मसहस्रेतुव्यतीतेपारजन्मनि ॥
ततोबहूंश्चनरकाननुभूयपृथक्पृथक् ॥८७॥ पापयोनिसहस्राणिगत्वाचारोहिणींगतिं ॥ योगोनिंसमनुप्राप्त
स्तद्गृहेसदुरात्मवान् ॥८८॥ स्नापितश्चत्वयातीर्थेस्मिन्पर्वणिपार्थिव ॥ दृष्ट्वापूजाश्चनेमाघतथाजागरणक्रि
या ॥८९॥ तेननिष्कल्मषोजातस्त्वसुरःपद्मपभूपते ॥ स्वर्गंनासतनूंत्यक्त्वाविमानेनार्कवर्चसा ९०॥ एवमुक्ते
तयादेव्याधुर्यः प्राणैर्विमुच्यते ॥ विमानवरमारूढस्तत्क्षणात्समदृश्यत ॥९१॥ दिव्याभरणशोभाढ्योदिव्यमाल्या
बरावृतः ॥ सतंप्रणम्यराजानंउवाचानंदपूरितः ॥९२॥ वणिगुवा॰ ॥ अहोनृपवरातीवतीर्थमाहात्म्यमुत्तमं ॥ य
त्रसस्माद्विधास्तीर्थेमुच्यंतेपातकैर्नराः ॥९३॥ मयाज्ञातमशेषेणमत्तयोनास्तिपातकी ॥ अतः परंकिंतुकुर्यांनृपती
र्थानुकीर्तनं ॥९४॥ पितामातासुहृद्बंधुर्भगिनीचममेश्वरः ॥ मुक्तात्वशेषपापेभ्योयस्मात्प्रसादादहंनृप ॥९५॥ ऊर्ध्वांसर्ग
स्थितिंप्राप्यपार्थिवत्वत्प्रसादतः ॥ क्षंतव्यंप्रणतोप्यस्मिंधयस्मिंस्तीर्थेहिमादृशाः ॥९६॥ गतिमादरिद्र्यांयातिनजानेत्व
कागतिः ॥ समाराध्यमहेशानंसंपूज्यचयथाविधिः ॥९७॥ लिंगंचतुर्धासंपूज्यदानंदत्वायथोचितं ॥ कागतिस्तवसंभा ३२५
व्यदेश्यनुज्ञांममप्रभो ॥९८ त्वरयंतीत्यमांत्वेतेशांभवाः प्रमथादिवि ॥ स्वस्त्यस्तुतेगमिष्याहमित्युक्त्वांतरधीयत ॥९९

मार्कंडे॰ ॥ अंतर्धानंगतेतस्मिन्सराजाविस्मयान्वितः ॥ तीर्थमाहात्म्यमतुलंवर्णयन्स्वपुरंययौ ॥२००॥ एवंभू 653/2008
तमिदंतीर्थंनर्मदायांव्यवस्थितं ॥ सर्वपापक्षयकरंसर्वदुःखघ्नमुत्तमं ॥१॥ उपपातानितत्रैवंतिस्नानमात्रेण
भारत ॥ कार्तिकस्यचतुर्दश्यामुपवासपरायणः ॥२॥ चतुर्धापूरयेल्लिंगंतस्यपुण्यफलंशृणु ॥ ब्रह्महत्यासुरापा
नंस्तेयंगुर्वंगनागमः ३ महापापानिचत्वारिचतुर्भिर्यांतिसंक्षयं ॥ सोश्वमेधस्ययज्ञस्यलभतेफलमुत्तमं ॥४॥ का
र्तिकेशुक्लपक्षेवैचतुर्दश्यामुपोषितः ॥ तत्रस्नात्वाचदत्वाचवाजपेयफलंलभेत् ॥५॥ अष्टम्यांवाचतुर्दश्यांवैशा
खेमासिपूर्ववत् ॥ दीपंपिष्टमयंकृत्वापित्रन्सर्वान्विमोक्षयेत् ॥६॥ तत्रयद्दीयतेदानंमपिबालाग्रमात्रकं ॥ तद
क्षयफलंसर्वमित्येवमाहपितामहः ॥७॥ भारभूत्यांमृतानांतुनराणांभावितात्मनां ॥ अनिवर्तिगतिस्तेषांशिवलोका
त्रसंशयः ॥८॥ अथवालोकवृत्त्यर्थंमर्त्यलोकेजिगीषति ॥ वेदवेदांगविद्विप्रोजायतेविपुलेकुले ९ धनधान्य
सुतैर्युक्तोधर्मकर्मविशारदः ॥ सर्वव्याधिविनिर्मुक्तोजीवेच्चशरदांशतं ॥१०॥ एतत्पुण्यंपापहरंकथितंनृपसत्त
म ॥ भारभूतेमयाख्यातंमहात्म्यंतीर्थसंभवं ॥२०११॥ ॥ इतिश्रीवायुकरुद्रसंहितायांरेवामाहात्म्येभारभूती
तीर्थंनाम ॥ ॥ मार्कंडेयउवा॰ ॥ ॥ ततः क्रोशांतरेपार्थतीर्थंशुंडीश्वरेपरं ॥ आश्चर्यभूतंलोकस्यदेवदेवेनयत्
कृतं ॥१॥ ततेसर्वंप्रवक्ष्यामिधार्मिकस्ययुधिष्ठिर ॥ द्विजरूपेणदेवेशःकुशीभूत्वाजुगुप्सितः ॥२॥ श्रवद्रुधिरपूः
व्याप्तमक्षिकाकृमिसंकुलः ॥ दुश्चर्मादुर्नखोगंभीप्रस्खलन्वैपदेपदे ॥३॥ ब्राह्मणावसथंगत्वाश्राद्धकालेजगाद्तं
भोभोगृहपतेहर्षब्राह्मणैः सहभोजनं ४ त्वद्गृहेभोकुमिच्छामिसहैभिस्तुसुसंस्कृतं ॥५॥ मार्कंडेय॰ ॥ ततस्तंब्रा
ह्मणादृष्ट्वायजमानसमन्विताः ॥ श्रवंतंसर्वगात्रेषुधिग्धिगित्येवमब्रुवन् ॥ निर्गच्छाशुचिगंधांगगृहान्नःशीघ्रंद्वि
जाधम ॥ भोभोत्यमेनसर्वेषांदर्शनातवसंस्कृतं ॥७॥ मार्कंडे॰ ॥ एवमुक्तस्तथैत्युक्त्वादेवदेवोमहेश्वरः ॥ जगामाः
शुचनंदृष्टः पश्यमानोद्विजोत्तमैः ॥८॥ गतेचादर्शनंदेवेस्नात्वास्युक्ष्समंततः ॥ भोजनायोद्यताविप्रायावत्सा

रे०ख० त्रेपृथकपृथक् ॥९॥ यदन्नंयत्रपश्यंतिक्रमयस्तत्रदारुणा ॥ तंदृष्ट्वाविस्मयाविष्टाः सर्वेकिमितिचाब्रुवन् ॥
॥१०॥ ततः कश्चिदुवाचेदंब्राह्मणोगुणवान्ऋजुः ॥ योगींद्रंत्रांकयातत्रबहुविप्रसमागमे ॥११॥ तस्येदंकीवरू
पस्यभर्त्सितस्यविपाकजं ॥ फलंभवतिनान्यस्यअतिथेःआस्थनोदनात् ॥१२॥ आस्थकालेतुसंप्राप्तमतिथिं
२२६ योनपूजयेत् ॥ पित्राचाराक्षसास्तस्यतद्दिलुंपंत्यसंशयं ॥१३॥ रूपान्वितंतुविरूपंवोमलिनंमलिनांबरं ॥ यो
गींद्रंत्रांकथानित्यमतिथिंनविचारयेत् ॥१४॥ मार्कंडेय० ॥ तच्छ्रुत्वावचनंतस्ययजमानपुरोगमाः ॥ ब्राह्म
णाद्विजमन्वेष्टुमधावन्सर्वतोदिशं ॥१५॥ तावत्कथंचित्केनापिगहनंवनमाश्रितः ॥ दृष्टोदृष्टइतिप्रोक्तेते
नतेसर्वआगताः ॥१६॥ तत्रपश्यंतितंविप्रंस्थाणुवन्निश्चलंस्थितं ॥ तक्रंदत्तेनचलतिस्पंदतेनचपश्यति
१७ विप्राजजल्पुः करुणंप्रणमंतस्तुवत्परे ॥ ततः सर्वाभिराशिषाभिः स्तूयमानास्त्रिलोचनः ॥१८॥ क्षुधा
र्दितानांदेवेशब्राह्मणानांविशेषतः ॥ विनष्टमन्नंसर्वेषामक्षयंप्रददौविभुः ॥१९॥ श्रुत्वाः शुभागिरस्तेषांब्रा
ह्मणानांयुधिष्ठिर ॥ करुणानिधिरीशानउवाचद्विजपुंगवान् ॥२०॥ ईश्वरउ० ॥ मान्योममाप्येषसदैवमुंडीसुरा
सुराणामपियोनमस्यःअयंगृहीत्वावसथांतरालेपूज्यश्चरक्षः सततंद्विजेंद्राः ॥२१॥ अस्मीनायमुद्दृत्यसदाप्रदे
यंप्रदर्शयित्वास्यभवद्भिरार्याः ॥ सुस्वादुभोज्यंभविनाततोन्नयित्स्येवमुंडीविभुनावतीर्णः ॥२२॥ मयाप्रसन्ने
नमहानुभावास्तदेवचान्नंसततंसदेव ॥ भुंजंतुविप्राः सहबंधुभिस्तसंपूज्यपूर्वेस्वलुमुंडिनंतु ॥२३॥ मार्कं
डे० ॥ इत्युक्त्वामुंडिरूपंहिददावात्मानमात्मना ॥ विप्रेभ्यः प्रभुरीशानः स्वयंचांतरधीयत ॥२४॥ तेविप्रास्तं
समादायमुंडिनंजग्मुराश्रमान् ॥ यथोक्तंवामदेवेनचक्रुस्तंमुंडिनंप्रति ॥२५॥ आश्रमद्वारिवस्थोवैमुंडीस
र्वैरपीड्यते ॥ एकदातेवनंजग्मुः सर्वविप्राः पृथकपृथक् ॥२५॥ तीर्थयात्राप्रसंगेननीत्वान्नानिफलानिच
॥ तत्रैवचान्हिकंकर्मचक्रुसर्वेनृपोत्तम ॥२६॥ आश्रमस्थस्तदामुंडीविस्मृतोभरतर्षभ ॥ तयेनभोज्यवेलायां

क्षुधीतपश्यंतिबाडवाः ॥२७॥ फलेष्वपितथान्नेषुविस्मितास्तेततोभवन् ॥२८॥ विप्राऊचुः ॥ अहोसवि 655/20048
स्मृतः मुंडीसर्वेषांनस्त्वयाहितत् ॥ पूर्ववत्विकृतंजातमिदमन्नंगतंद्विजः ॥२९॥ व्रजंतुसर्वशस्तत्रत
मभ्यर्च्यशिवंभवेत् ॥३०॥ मार्कंडे० ॥ इत्युक्त्वादुद्रुवुः सर्वेस्वाश्रमान्प्रतिभारत ॥ गतायावच्चविस्पंतंततंपश्यंति
मुंडिनं ॥३१॥ तत्रस्थानेनृपश्रेष्ठतत्रोमोहमुपागमत् ॥ अन्नोदकंनियम्याथतत्रासीनाद्विजोत्तमाः ॥३२॥ मुंडिनं
द्रष्टुकामानांत्रिरात्रंनावदस्यगात् ॥ एकदामुंडिनस्थानेमहल्लिंगंसमुत्थितं ॥३३॥ भुवंभित्वामहाराजव्योमगावा
गुवाचह ॥ हठंमुंचंतुवोविप्रोइदमायतनंमहत् ॥३४॥ मुंडीश्वरंपूजयित्वाशिवंप्राप्स्यथमाचरं ॥ शिवायतनमे
तद्धिनाम्नामुंडीश्वरंशुभं ॥३५॥ संपूज्यफलपुष्पाद्यैस्ततः कल्याणमाप्स्यथ ॥३६॥ मार्कंडेयउवाच ॥ इत्युक्त्वामा
रतीदेवीतत्रैवोपरताभवत् ॥ तथैवायतनंपार्थदेवदेवस्यशूलिनः ॥३७॥ मुंडीश्वरमितिख्यातंतदाविप्रगणा
र्चितं ॥ तेचविप्रास्तमभ्यर्च्यस्वान्कामांश्चलेभिरे ॥३८॥ एतत्कामप्रदंलोकेतीर्थमुंडीश्वरंनृप ॥ सर्वभोगप्रदं
नृणांसर्वपापहरंपरं ॥३९॥ कार्तिक्यांकृत्तिकायोगेतीर्थकालेसमंविदुः ॥ अष्टम्यांवाचतुर्दश्यांपक्षयोरुभयोरपि
४० तत्रस्नात्वापूजयित्वासर्वान्कामानवाप्नुयात् ॥ श्राद्धंदत्वापितृणांचदीपंमुंडीश्वरायच ॥४१॥ यावन्मर्त्यंतरे
पार्थशिवलोकेमहीयते ॥४२॥ ॥ इतिश्रीरेवामाहात्म्येमुंडीश्वरंतीर्थनाम ॥ ॥ मार्कंडेयउ० ॥ ततः क्रोशां
तरगच्छेदकशालंयुधिष्ठिर ॥ ग्रामंमुंडीश्वरात्तत्रतीर्थमीश्वरनिर्मितं ॥१॥ अत्रतेसंप्रवक्ष्यामिशिवस्यचरितंम
हत् ॥ श्रुतमात्रेणयत्रैवसर्वपापैः प्रमुच्यते ॥२॥ लीलाचरितमीशस्यशृणुष्वभरतर्षभ ॥ एकदाभिक्षुरूपेण
देवदेवोमहेश्वरः ॥३॥ एकशालंगतोग्रामंभिक्षार्थीक्षुत्पिपासितः ॥ अक्षसूत्रोधृतकरोभस्मगुंठितविग्रहः ॥४
शिखीशूलीकपालीचजटामुकुटमंडितः ॥ कृत्तिवासामहाकायोमहाहिकृतभूषणः ॥५॥ डिंडिमंप्रथितंवाद्यं
वादयन्मधुरध्वनिं ॥ कपालपाणिर्भगवान्बालकैर्बहुभिर्वृतः ॥६॥ क्वचिद्गायन्हसन्नृत्यन्वादयंश्चक्वचि

तु कश्चित् ॥ यत्र यत्र गृहे देवो भिक्षां नाप्नोति भारत ॥ ७॥ तत्र तत्र वरूथ्यां वै लीलया डिंडिमं न्यसेत् ॥ भाराक्रांतं
गृहं पार्थ नततृणं विनश्यति ॥ ८॥ एवं संप्रचरं देवो वेष्टितो बहुभिर्जनैः ॥ दृश्यादृश्येन रूपेण बहिर्ग्रामाद्विनिर्ययौ
९ इतश्चेतश्च धावंतं न पश्यंति यदा जनाः ॥ विस्मिता ददृशुः क्वापि शंभुं मत्वा ततोस्तुवन् ॥ १०॥ मनसा वचसा चै
व कर्मणा चैक्यमागताः ॥ तेषां च स्तुवतां भक्त्या शंकरं जगतां पतिं ॥ ११॥ डिंडिमं प्रददौ तेषां जनानां गृहसिद्धये ॥
गृहस्थाने विनिर्मुक्ते त्वस्मिन् गेहं न वै भवेत् ॥ १२॥ यदाहं प्रार्थयिष्यामि दातव्यो डिंडिमस्तदा ॥ इत्युक्त्वा देवदेवस्त
त्रैवांतरधीयत ॥ १३॥ गृहीत्वा डिंडिमं सर्वे लोका ग्रामसमागताः ॥ यावत्पश्यंति गेहानि ददृशुर्नूतनानि वै ॥ १४॥
एकशालानि सर्वाणि प्रहृष्टास्ते ततो जनाः ॥ डिंडिमं ग्राममध्ये वै मुक्त्वा चक्रुर्महोत्सवं ॥ १५॥ आसने स्थापितं तेस्था
प्य पूजयां चक्रुरंजसा ॥ रात्रौ जागरणं कृत्वा प्रभाते पुनरेव ते ॥ १६॥ यावत्पश्यंति पूजां तस्य तावद्ददृशुरीश्वरं ॥ म
हालिंगं महाराज भुवं भित्वा विनिर्गतं ॥ १७॥ न डिंडिमं ते ददृशुस्ततो विस्मयमागताः ॥ डिंडिमेश्वरनामानं जगुस्ती
र्थं हि ते जनाः ॥ १८॥ पूजयंत्यन्वहं सर्वे तथान्यग्रामवासिनः ॥ १९॥ मार्कं॰ ॥ एवं तत्पार्थ विख्यातं तीर्थं वै डिंडिमेश्वरं ॥
दर्शनात्स्पर्शनात्तस्य पूजनाच्चापि भक्तितः ॥ २०॥ सर्वपापानि नश्यंति तमः सूर्योदये यथा ॥ भुक्तिमुक्तिप्रदं तीर्थं ख्यातं
वै डिंडिमेश्वरं ॥ २१॥ शिवेन निर्मितं तीर्थं लोकानां हितकाम्यया ॥ २२॥ ॥ इति श्रीरेवामाहात्म्ये एकशालायां डिं
डिमेश्वरतीर्थं ॥ ॥ मार्कंडे॰ ॥ अप्सरेशं परं तीर्थं तत्रैव भरतर्षभ ॥ स्नातुमप्सरसः सर्वास्तत्र पूर्वं समागताः ॥ १॥
ताभिराराधितः शंभुः स्थापयित्वा सुभक्तितः ॥ तुष्टो ददौ वरं तासामदोषास्यदतां नृप ॥ २॥ स्वनाम्ना ताः शिवं भक्त्यास्त्
स्थाप्य प्रययुर्मुदा ॥ अप्सरेशेन रोगत्वा स्नानं तत्र समाचरेत् ॥ ३॥ क्रीडते नागलोकस्थोप्सरोभिः समोदते ॥ अ
प्सरेशं पूजयित्वा नरः शाक्रे पुरे वसेत् ॥ ४॥ इति अप्सरेतीर्थं ॥ मार्कंडेय उ॰ ॥ मुन्यालयं ततो गच्छेत्तत्रैव किंचिदंतरे ॥ ३२७
मुनीनामोकयस्तत्र पूर्वमासीत्सुशोभनं ॥ १॥ मुनिभिः स्थापितो देवो मुनीश्वर इति श्रुतः ॥ स्नात्वा तं शिवमभ्यर्च्य परं

657/2008

निर्वाणमृच्छति ॥ २॥ भोजयेद्ब्राह्मणांस्तत्र कोटिरेकेन भोजिता ॥ कर्मबंधविमोक्षाय पूजयेद्यो मुनीश्वरं ॥ ३॥ वस
न्मुन्यालये भक्त्या समुष्पे पौ यथाविधि ॥ कर्मबंधविनिर्मुक्तः सत्यलोकमवाप्नुयात् ॥ ४॥ इति श्रीरेवामाहात्म्ये मुन्यालय
तीर्थं ॥ मार्कंडेय॰ ॥ ततो गच्छेत्तु राजेंद्र मार्कंडेश्वरसंज्ञितं ॥ मया संस्थापितो देवो यत्र भक्त्या सनातनः ॥ १॥ तीर्थान्मु
न्यालयात्तद्वै दंडपंचाशतांतरे ॥ दृष्टं मया गतेनादौ रेवासागरसंगमं ॥ २॥ तत्र स्थित्वा कियत्कालं लोकानां हितका
म्यया ॥ स्वनाम्ना भरतश्रेष्ठ स्थापितं तीर्थमुत्तमं ॥ ३॥ तत्र स्नात्वा च पीत्वा च पूजयित्वा महेश्वरं ॥ श्राद्धं दत्वा पितॄणां
च तत्सर्वं चेत्कृतात्कृते ॥ ४॥ श्राद्धमन्वंतरं चापि शिवलोके महीयते ॥ वेदपारायणं कृत्वा ब्राह्मणानां तु भोजनं ॥
५॥ दत्वा दीपं स्वशक्त्या च सत्यलोके चिरं वसेत् ॥ ६॥ इति श्रीरेवायां मार्कंडेश्वरतीर्थं ॥ ॥ अर्धक्रोशांतरे पार्थ ग
णितास्थानमुत्तमं ॥ तत्र साक्षात्पराशक्तिः स्थिता वै गणिताह्वया ॥ १॥ पूर्वकल्पे महाराज विश्वं संहर्तुमक्षमः ॥ मां
विना स महादेवः कथं भूतानि संहरेत् ॥ २॥ इति संचिंत्य शर्वाणि चिनोद च्छप्रसंयुता ॥ अमृतानीरमासाद्य गणत्या
मास चाखिलं ॥ ३॥ गणितं गणितं देव्या न संहारमवाप्नुयात् ॥ संहरन्नपि पैशार्वः शक्तो न स्याद्यदा नृप ॥ ४॥ विश्वं त
दा चिंतितवान् किमेतदिति नूतनं ॥ संहारकरणः शक्तः सोहं नष्टाखिलं जगत् ॥ ५॥ मया संह्रीयमाणं वै न संहारं
व्रजेज्जगत् ॥ कोभवः को विशेषोयं न संहर्ता हि मत्परः ॥ ६॥ नेतद्विश्वं न सोहं वा चिंतयंन्निति धूर्जटिः ॥ यदा संस्मरेरु
द्राणीं सापि नायाति संस्मृता ॥ ७॥ तदा तां स्वसरितीरसंश्रितां ज्ञातवान् हरः ॥ गणितं हि तया विश्वं शक्त्या सस्थाणु
जंगमं ॥ ८॥ कालश्च गणितः पार्थ तावस्त्वासोमहेश्वरः ॥ दृष्ट्वा तां परमां शक्तिं विश्वस्य गणने रतां ॥ ९॥ अक्षसूत्रक
रां देवीं ध्याजाप्ये समाहितां ॥ एवं स्थितां महाशक्तिं शर्वः प्रोवाच भारत ॥ १०॥ रुद्र उवा॰ ॥ अजाप्यजपरूपेण किं त्वं
कर्तुमिहेच्छसि ॥ किं नु शीलमिदं देवी चरित्रं कपटं न वा ॥ ११ श्रीदेव्यु॰ ॥ गणितं हि मया विश्वं यदि संहरसि प्रजाः ॥
मां विनापि क्षमेसि त्वं विश्वसंहरणे विभो ॥ १२॥ देव्युवा॰ ॥ गणितं हि मया विश्वं मया त्वं गणिता शुभे ॥ विश्वशक्तिरि

हायत्वंत्वांविनाकथमीश्वरः १३॥ प्रसीदप्रार्थयामित्वांसंहरामित्वयासह॥ स्त्रजाम्यपिचविश्वेस्मिन्नहिकिंचित्वयाविना
१४ त्वयाव्याप्तंजगत्सर्वंआब्रह्मस्थाणुजंगमं॥ त्वयाव्याप्तमिदंदेवीसदसत्क्षरमक्षरं॥१५॥ इत्युक्त्वापूजयामासत्रि
 वस्तांगणिनाह्वयां॥ सर्वकामप्रदांपार्थसर्वपापप्रणाशनीं॥१६॥ तत्रस्नात्वाचयोभक्त्यापूजयेद्गणिनींनृप॥ तस्या
पमृत्युनाशःस्यात्सुखंस्यात्संपदःशुभाः॥१७॥ शक्तिंनानोपचारैस्तांपूजयित्वारवेर्दिने॥ भूताष्टमीषुवाभक्त्यादौर्भा
ग्यंनाशयेन्नरः॥१८॥ नारीचनृपतिःश्रेष्ठसौभाग्यंसंततिंलभेत्॥ गौरिणींभोजयेत्तत्रब्राह्मणांश्चकुमारिकाः॥१९
श्राद्धंदत्तंविधानेनपितॄणामक्षयंभवेत्॥ दीपंचाखंडितंदत्वानसंशोच्योभवेन्नरः॥२०॥ गौरीलोकमवाप्नोतियावदि
न्द्राश्चतुर्दश॥२१॥ इतिश्रीरेवामाहात्म्येगणिनातीर्थं॥ ॥मार्कंडेयउवा०॥ ततःक्रोशद्वयेपार्थतीर्थंचैवामलेश्व
रं॥तत्रचान्यत्प्रवक्ष्यामिदेवस्यचरितंमहत्॥१॥ श्रुतमात्रेणयेनेहमुच्यतेसर्वपातकैः॥ अबालोबालरूपेणग्रामीणै
र्बालकैःसह॥२॥ अमत्वाक्रीडितःशंभुस्तद्वैवक्ष्यामिभारत॥ सर्वैरामलिकाःक्षिप्तास्ततोदेवेनपांडव॥३॥ आनी
तास्ततःक्षणाद्देवततःक्षिक्षेपचेश्वरः॥ यावद्गत्वादिशोदिगभ्यआगच्छंतेपृथक्पृथक्॥४॥ तावत्तमामलीस्थाने
त्वपश्यत्परमेश्वरं॥ लिंगरूपंमहेशानंसर्वदुःखविनाशनं॥ ततस्तेपूजयामासनाम्नाचैवामलेश्वरं॥ तदाप्रभृतिदे
वेशआमलेश्वरउच्यते॥६॥ तेनपूजितमात्रेणप्राप्यतेवांछितंफलं॥ तृतीयमेवतत्कर्मदेवदेवस्यभूपते॥७॥ आ
श्चर्यकरणंस्थानमामलीश्वरमुत्तमं॥८॥ इतिरेवायांआमलीश्वरतीर्थं॥ ॥मार्कंडे०॥ चतुर्थंसंप्रवक्ष्यामिदेवस्य
चरितंमहत्॥ श्रुतमात्रेणयेनात्रमुच्यतेपातकान्नरः॥ कपालीकांयाकोभूत्वाविचचारयथामहीयोगिनीभिः
परिवृतोभूतवेतालसंवृतः॥२॥ भैरवंरूपमाछायहाहाकारंमहत्करोत्॥ त्रस्तभीताभयंदत्वाचचारविपुलंतपः
३ कंथामुत्क्षिप्ययत्रतेनतत्रकंथेश्वरोभवत्॥ लोकैर्निगदितोनाम्नाकंथास्थानेमहेश्वरः॥४॥ तमभ्यर्च्यमहाराजसु
खसौभाग्यवत्भवेत्॥ ॥इतिश्रीरेवामाहात्म्येकंथेश्वरतीर्थं॥ ॥तेनैवयत्रमुक्ताभूदाखाडीभरतर्षभ॥त

654/2008
त्रलिंगंमहद्दृष्ट्वाजनैर्विस्मयमागतैः॥१॥ आखाडीश्वरनाम्नावैरूतंतीर्थमनुत्तमं॥ तत्रस्नात्वाचसंपूज्यलभतेवां
छितंफलं॥२॥ यश्चैवयोगपट्टंचदत्वासिद्धिमवाप्नुयात्॥३॥ इतिश्रीरेवामाहात्म्येआखाडीश्वरतीर्थं॥ ॥यत्र
मुक्ताभवत्शृंगीसुनादासुमनोहरा॥ तत्रशृंगीश्वरंतीर्थंमोक्षदंसर्वदेहिनां॥१॥ मृतानांतत्रराजेंद्रनात्रकार्यावि
चारणा॥ तत्रपिंडप्रदानेनपितॄणामनृणोभवेत्॥२॥ तेनपूजितमात्रेणलभेद्गाणेश्वरीगतिं॥ तन्मोक्षपरमंतीर्थं
प्रवदंतिमनीषिणः॥३॥ इतिशृंगीश्वरतीर्थं॥ ॥मार्कंडेयउवा०॥ ॥देवमार्गेत्रिमत्देवःपुनस्तत्रयदृच्छया
॥देवमार्गेददर्शाथवणिजंकमपिप्रभुः॥१॥ विक्रीणंतंचवल्कलान्दृष्ट्वाप्राहविनोदतः॥ यदिमद्वचनंचैकोपंकरोषि
त्वंपमोपरि॥२॥ वल्कलैर्भरसेचेत्वंइदंलिंगंसखेमम॥ ततस्तेषाचितंयावद्ददामिबहुतेधनं॥३॥ एवमुक्तोथदेवेन
सवणिक्लोभमोहितः॥ योजयामासवल्कलान्लिंगेचोत्तममध्यमान्॥४॥ तावद्यावत्क्षयंसर्वान्गतानवहुदि
नार्जितान्॥ तैर्दत्तवल्कलैःसर्वैःरत्नोपैर्नैवपूरितं॥५॥ अर्धमापूरितंलिंगंदृष्ट्वावैदुःखितोवणिक्॥ स्थोल्येनावर्धय
ल्लिंगंसदेवोलीलयानृप॥६॥ रूत्वावल्कलयखंडानितत्तत्किलशंकरः॥ उवाचप्रहसन्वाक्यंदृष्ट्वातंगतसाहसं॥७॥
लज्जितंजनमध्येवैव्यवसायधनोज्झितं॥८॥ देवउवा०॥ नैवमेपूरितंलिंगंव्रजामियदिमन्यसे॥ ददामीहततेवित्तंय
ल्लिंगंत्रपूर्यते॥ वणिगुवाच॥९॥ धन्योहंरूतपुण्योहंमित्राख्योहंतवेश्वर॥ मयापूर्वंनविज्ञातोभवान्भवभयाप
हः॥१०॥ तवैवविप्रपंरूत्वाशोचिष्येशाश्वतीःसमाः॥ एतत्श्रुत्वावचःशर्वोवणिक्पुत्रस्यभारत॥११॥ असं
ख्येयंधनंदत्वातत्रैवांतरधीयत॥ तत्रोच्छितंमहल्लिंगंवल्कलैरिवपूरितं॥१२॥ प्रत्ययार्थंस्थितंतत्रलोकानांहित
काम्यया॥ देवस्यचरितंपार्थक्रीडास्थानमनुत्तमं॥१३॥ देवमार्गइतिख्यातंत्रिपुलोकेपुशोभनं॥ देवमार्गेतुयोग
त्वापूजयेद्वल्कलेश्वरं॥१४॥ पंचायतनमासाद्यरुद्रलोकंसगच्छति॥ देवस्यलीलाचरितंपंचस्थानेपुसंस्थितं॥१५॥
पश्चात्वापूजयन्चापिसर्वपापैःप्रमुच्यते॥ देवमार्गेमृतानांतुनराणांभाविनात्मनां॥ नभवेत्पुनरावृत्तिरुद्रलोकात्क

दाचन ॥१७॥ देवमार्गस्य माहात्म्यं भक्त्या श्रुत्वा च मानवः ॥ प्रमादजनितात्पापान्मुच्यते नात्र संशयः ॥१८॥ स्नानदानज
पैः पार्थ श्राद्धैर्देवार्चनादपि ॥ अप्यर्कपुष्पदानेन तुष्यते परमेश्वरः ॥१९॥ पंचायतनसंस्थोऽसौ कपाली पंचधागतः ॥
पंचधा संस्थितेत्रैव देवमार्ग इति स्मृतः ॥२०॥ इति श्रीरेवामाहात्म्ये चलकेश्वरतीर्थं ॥ ॥मार्कंडेय उवा॰॥ ॥इति पंच
तीर्थानि ॥ मार्कंडेय॰॥ तथैव चक्रमनातेन महेशेन युधिष्ठिर ॥ यत्र मुक्तं कपालं च लीलया नर्मदातटे ॥१॥ कपालेश्वरसंज्ञे
यं तीर्थं पूज्यः सदा जनैः ॥ इत्युक्तोपरता देवी लोकास्तं चाप्यपूजयन् ॥२॥ ततः प्रभृति तत्तीर्थं कपालेश्वरसंज्ञितं ॥
यत्र तत्र स्थितो वापि कपालेशं संस्मरन्नरः ॥३॥ क्षुधासंपीड्यमानोपि भोज्यार्थी भोजनं लभेत् ॥ तत्र स्नात्वा नृपश्रेष्ठ कपाले
श्वरपूजनात् ॥४॥ रोगडःखार्दितो वापि लभते सुखमुत्तमं ॥ पापानि विलयं यांति शिवलोके महीयते ॥५॥ पुष्पगंधादि
कं दत्वा दीपं देवाय भारत ॥ नरः स भक्त्या प्रणमन् महत्त्वमधिगच्छति ॥६॥ ॥ इति कपालेश्वरतीर्थं ॥ ॥ मार्कंडेय
उवा॰॥ श्रुत्वा तद्देवचरितं नारदोक्तं युधिष्ठिर ॥ लीलाविलसितं शंभोर्दृष्टं यातेन वै मया ॥१॥ ममतात्माकृतं तीर्थं मारवाडी
तीर्थसंनिधौ ॥ तीर्थयात्राप्रसंगेन मार्कंडेश्वरसंज्ञितं ॥२॥ तत्र आप्यार्चनं स्नानदानैः पापक्षयो भवेत् ॥ स्मृत्वा प्रण
म्य देवेशं शिवलोके महीयते ॥३॥ ॥ इति श्रीमार्कंडेश्वरतीर्थं ॥ ॥ क्रोशद्वयांतरे राजन् अमलेश्वरतीर्थतः ॥ क
पिलेश्वरतीर्थं तु यायाद्दुःखौघनाशनं ॥१॥ स्थापितं परमं लिंगं स्वाख्यया नृपसत्तम ॥ तत्र तीर्थे नरो भक्त्या स्नायात्सार्थ
कथंचन ॥२॥ कपिलेश्वरमभ्यर्च्य दीपं दत्वा यथाविधि ॥ स्वशक्त्या भोजयेद्विप्रान् कपिलां च ततो ददेत् ॥३॥ सपापं सप्त
जन्मोघं नाशयेत्तत्क्षणान्नरः ॥ शैवं वा वैष्णवं वापि जपन्मंत्रं शिवाग्रतः ॥४॥ नाशयेद्दुरितं सर्वं मोदते देवसंनिधौ ॥ त
त्र प्राणान्परित्यज्य विधिनोक्तेन भारत ॥५॥ सप्तलोकादिलोके पुरमते शाश्वतीः समाः ॥ इति श्रीरेवामाहात्म्ये कपिलेश्व
रतीर्थं ॥ ॥मार्कंडेय उवा॰॥ ततो गच्छेन्महाराज एरंडीसंगमे परं ॥ अखिलेष्वपि लोकेषु विश्रुतं पापनाशनं ॥१॥ एरंड ३२९
स्य मुनेः पूर्वं शक्तिः पुत्रीत्वमागता ॥ अपुत्रस्य तपस्तीव्रं तस्यतः किल भारत ॥२॥ विवाहसमये पुत्री वरं नेच्छति कंचन॥

प्रार्थिता नृपपुत्रैर्हि ऋषिपुत्रैश्च सर्वदा ॥३॥ पितृभ्यां बोधितानित्यं यदा न कुरुते वचः ॥ उक्ता सा परूषं पुत्री वैमनस्य
मवाप्य च ॥४॥ रेवातीरं समासाद्य चचार विपुलं तपः ॥ ततः कतिपयाहोभिः समुद्रः कामरूपधृक् ॥५॥ वरणार्थं यदा
यातस्तदा सा सिंधुतां गता ॥ विवेष नर्मदां देवीं शैलमूर्तिः स्थिता तटे ॥६॥ एरंडीनाम विख्याता एरंडस्य मुनेः सुता ॥ तदा
प्रभृति तत्तीर्थं संगमे लोकविश्रुते ॥७॥ तद्धि तीर्थं महापुण्यं सर्वपापप्रणाशनं ॥ उपवासपरो भूत्वा ब्रह्मचर्यपरायणः
८ तत्र स्नात्वा च संपूज्य मुच्यते ब्रह्महत्यया ॥ संगमे वै नरः स्नात्वा पितॄन्संतर्प्य भक्तितः ॥९॥ श्राद्धं दत्वा विधानेन न
रकादुद्धरेत्पितॄन् ॥ अक्षयान् लभते लोकान् पितृभिः सह भारत ॥१०॥ एरंडीं पूजयेन्मर्त्यो यः स सौभाग्यपुत्रवान् ॥
प्रेतत्वनाशनं पुण्यं धर्ममायुर्विवर्धनं ॥११॥ एरंडीसंगमं तीर्थं पूर्वं प्राह पितामहः ॥१२॥ इति श्रीरेवामाहात्म्ये रेवायां एर
डीसंगमतीर्थं ॥ ॥मार्कंडेय॰॥ ततो दंडसहस्रांते रामतीर्थं व्रजेन्नरः ॥ पुंखिलं नाम विख्यातं स्थितो यत्र जनार्दनः ॥१
युधिष्ठिर उ॰॥ कथं स्थितोऽमति श्रोष्ठो वासुदेवो जगद्गुरुः ॥ मानुषं लोकमागम्य लोकानां हितकृद्विभुः ॥२॥ एतत्सर्वं यथा ज्ञे
यदेवदेवस्य चक्रिणः ॥ चरितं श्रोतुमिच्छामि कथयस्व प्रसादतः ॥३॥ मार्कंडेय॰॥ आसीत्पूर्वं महाराज हैहयाधिपतिर्महा
न् ॥ कार्तवीर्य इति ख्यातो राजा बाहुसहस्रधृक् ॥४ हस्त्यश्वरथसंपन्नः सर्वशस्त्रभृतां वरः ॥ सोऽहिंस्मति पतिः श्रीमान् सर्वसि
तभयावहः ॥५॥ स कदाचित्तु मृगान् हंतुं निर्ययौ नर्मदातटे ॥ बहुभिर्दिवसैः प्राप्त आश्रमं पुण्यसंयुतं ॥६॥ जमदग्निर्महातेजा
यत्र तिष्ठति तापसः ॥ रेणुकासहितः श्रीमान् सर्वभूताभयप्रदः ॥७॥ यस्य पुत्रोऽभवद्रामः साक्षान्नारायणो विभुः ॥ सर्वैः स्वत्र
गुणैर्युक्तो ब्रह्मण्यविक्रान्तः स्यात्तोनमाः ॥८॥ तोषयन्परया भक्त्यापि तरोपरमार्थवित् ॥ कार्तवीर्यं ततो दृष्ट्वा जमदग्निर्मुनीश्व
रः ॥९॥ चरंतं मृगयां गत्वा आतिथ्येनान्यमंत्रयत् ॥ नयेति चोक्तश्च नृपः सभृत्यबलवाहनः ॥१०॥ स जगामाश्रमं पुण्यं
ऋषेस्तस्य महात्मनः ॥ ततः क्षणाद्देवसंपन्नं श्रियां परमया युतं ॥११॥ हर्म्यप्रासादसंवादे शयनासनभोजनैः ॥ सभावा
तायनैर्युक्तं मतवारणशोभितं ॥१२॥ स्वर्णराजततास्रैश्च भांडभाजनकैर्वृतं ॥ दृष्ट्वा तदद्भुतं राजा विस्मयं परमं ययौ ॥

661
2008

रे॰ख॰ ३३ गतमात्रः समिस्थेनपरमान्नेनभोजनः॥ सम्भृत्यबलवान्राजाब्राह्मणेनयदृच्छया॥३४॥ योयदिच्छतियावच्चतत्तो
नात्संसुसुपुष्कलं॥ किमेतदितिसंचिंत्यराजाविस्मयमागतः॥३५॥ कामधेनोः प्रभावंतंज्ञात्वाप्राहततोद्विजं॥३६॥
३३० राजोवा॰॥ प्रसादंकुरुमेविप्रदेहिमांधेनुमुत्तमां॥ गवांशतसहस्रेणप्रयुतेनार्बुदेनवा॥३७॥ जमदग्निरुवाच॥ सं
हस्रकोटिलक्षेणप्रयुतेनार्बुदेनच॥ कामधेनुरियंराजन्नदातव्याकदाचन॥३८॥ मार्कंडेय॰॥ एवमुक्तः सनृपति
स्तेनविप्रेणधीमता॥ क्रोधसंरक्तनयनइदंवचनमब्रवीत्॥३९॥ राजोवाच॥ यदीदृशः कामचारोमय्यपितेविप्रपांस
न॥ तदहंपश्यतस्तेद्यनयिष्येसुरभींबलात्॥२०॥ द्विजाधमंतिरस्कृत्यधेनुरेषानिगृह्यतां॥२१॥ ऋषिरुवा॰॥ कः
क्रीडतिसरोषेणकालसर्पेणनिर्भयः॥ मृत्युर्दंष्ट्रांतरगतोममधेनुंयनेनयः॥२२॥ अज्ञानाज्ज्ञानतोवापिकः कुर्याद्वह्नि
चुंबनं॥ कोलिहेज्जिह्वयाखड्गंममधेनुंनयेत्तयः॥२३ एवमुक्त्वामहादंडंकालदंडमिवापरं॥ गृहीत्वापरमक्रुद्धोजमदग्निरु
वाचह॥२४॥ यस्यास्तिशक्तिस्तेजोवाक्षत्रियस्यकुलाधम॥ इमांसधेनुंगृण्हातुक्षीणायुः सपरिच्छदः॥२५ मार्कंडेयउ॰
एतच्छ्रुत्वावचः क्रूरहैहयः सुभटैजनाः॥ प्राधावंतचतेयोधाब्रह्मदंडहताभुवि॥२६॥ हुंकारेणततोधेनोः पेतुः पार्थि
वसत्तमाभूयमानातथादेहाज्जायमानाः सहस्रशः॥२७॥ मुखनासाक्षिरोमभ्योगुह्ययोनिस्तनद्वयात्॥ नानाजातिसमा
चारानानासंज्ञाः सहस्रशः॥२८॥ अन्योन्यंतेसमाहत्यहैहयाधेनुजैः सह॥ महारोषसमाविष्टविनाशंजग्मुरंजसा २९
जमदग्निंततोहत्वाबाणैर्विध्वाचरेणुकां॥ कामधेनुमनाप्यगतोन्तपपुरींततः॥३०॥ कार्तवीर्योजपंलब्ध्वाहत्वाचैवमृषिंत
दा॥ प्रविवेशपुरींहृष्टः कृतांतबलमोहितः ३१॥ ततोज्ञात्वानिमित्तैः स्वैस्त्वरन्रामः समागतः॥ आपृच्छ्यदेवमीशानंगुरुंविश्व
गुरुंबली॥३२ ददर्शपितरंरौरंतत्रक्रंदमानांचमातरं॥ परंविषादमगमत्क्रोधंचपुरतः स्थितः॥३३॥ रामउवा॰॥ केनमंदात्म
नामातरज्ञानात्साहसंकृतं॥ मृत्युर्नविक्षितस्तेनममतातंजिघांसता॥३४॥ ततः सारामवाक्येनगतसत्वैवरेणुका॥ घातयं ३३०
तीनदात्मानंरामंपुत्रमुवाचह॥३५॥ रेणुकेवाच॥ हैहयेननृशंसेनसहस्रभुजशालिना॥ इहागत्यपितातेपतिहतः क्ष

त्रियैः सह॥३६॥ तस्यैतदुःकृतंपश्यपापबुद्धेः सुपुत्रक॥ त्वमद्यनिहतंतातंज्वलितेजातवेदसि॥३७॥ संस्कृत्यविपि
नापुत्रततस्तर्पयचांबुना॥३८॥ मार्कं॰॥ जनन्यावचनंश्रुत्वारामस्तामभिवाद्यच॥ प्रतिज्ञामकरोद्घोरांतांशृणुष्वनरा
धिप॥३९॥ रामउ॰ निः क्षत्रियांमहींकृत्वातेषांरक्तेनतर्पणं॥ पितुस्ततः करिष्यामिकुरुक्षेत्रेनसंशयः॥४०॥ कार्तवी
र्यस्यपापस्यछित्वाबाहुवनंरणे॥ बलात्परशुनाद्यः पास्यामिरुधिरंततः॥४१॥ इतिप्रतिज्ञायतदासंस्कृत्यपितरंततः
माहिष्मतींपुरींरामोजगामक्रोधमूर्छितः॥४२ छित्वाहुवनंतस्यहत्वातंक्षत्रियाधमं॥ सभृत्यपुत्रंनृपपंतेनशांतिंचालभ
सुतः॥४३॥ ततः साक्षत्रियांनायपृथिवीमवलोकयन्ससद्वीपार्णवयुतांसशैलवनकाननां॥४४ पूर्वतः पश्चिमांशांतंदक्षिणो
त्तरतः कुरून्॥ क्षत्रियान्बहुशोहत्वारक्तंसंचितवान्बहु॥४५॥ स्यमंतपंचकेपंचचक्रारुधिरह्रदान्॥ त्रिः सप्तकृत्वः
पृथिवींकृत्वानिः क्षत्रियांमहीं॥४६॥ सतेषुरुधिरांभस्सुह्रदेषुक्रोधमूर्छितः॥ पितॄन्संतर्पयामासरुधिरेणेतिनः श्रुतं॥
४७ अथर्चीकादयोभ्येत्यपितरोब्रह्मर्षभं॥ तंक्षमस्वेतिनिषिधस्ततः सचिरराम्॥४८ तेषांसमीपेयोदेशोह्रदानां
रुधिरांभसां॥ स्यमंतपंचकंतीर्थंपुण्यंतत्परिकीर्तितं॥४९॥ निवृत्यकर्मणस्तस्मात्पितॄनप्रोवाचभार्गवः॥ रामः परमध
र्मात्मायदिदंरुधिरंमया ५० क्षिप्तंपंचसुतीर्थेषुततीर्थंस्यादनुत्तमं॥५१॥ मार्कंडेय॰ तथेत्युक्तास्तुतेसर्वेपितरोतर्हिताभव
न्॥५२॥ एतद्रामस्यवचनंदेवमार्गप्रतिष्ठितं॥ शिवस्याराधनायादौसतीर्थंनर्मदाश्रयौ॥५३॥ आराध्यतुंसधनुर्विद्यांगुरुमीश्वर
मात्मवान्॥ नैष्ठिकोब्रह्मचारीतुतप्त्वावर्षशतत्रयं॥५४॥ ततः प्रभृतिविख्यातंरामतीर्थमनुत्तमं॥ पुंखितोयत्रबाणोवैवि
धारंभेमहेश्वरात्॥५५॥ पुंखिलंतेनतत्तीर्थमुक्तंराजन्मनीषिभिः॥ सर्वपापक्षयकरंदर्शनात्स्पर्शनांनृणां॥५७॥ तत्रतीर्थे
नरः स्नात्वासर्वशांतिंयुतोभवेत्॥ तुष्यंतिपितरस्तस्यतर्पणश्राद्धदानतः॥५८॥ इतिश्रीरेवामाहात्म्येपुंखिलरामती
र्थं॥ श्रीमार्कंडेयउ॰॥ क्रोशार्धमात्रेतत्रैवजमदग्निश्चरेणुका॥ प्रासोपुत्रहितंयुक्तौस्नेहाद्धूरतसत्तम॥१॥ पुत्रंपुरात
पस्यंतंज्ञात्वारामंशिवार्थिनं॥ समीपस्थावुभौतत्रतपस्तसुमुपाश्रितौ॥२॥ तत्राश्रमवरोद्वाभ्यांरेवासागरसंगमे॥ तत्रस्नात्वा

663
2008

 तयाश्राद्धंब्राह्मणानांचभोजनं ॥ ३॥ कुर्याद्योनरतश्रेष्ठमुच्यतेपापकंचुकात् ॥ रेणुकासहितंवत्संजमदग्निंप्रपूजयेत् ॥
४ सप्तर्षिसंनिधौलोकेसवसेकल्पमक्षयं ॥ ५॥ इतिजमदग्नितीर्थं ॥ मार्कंडेयउ० ॥ तत्रैवपरमंतीर्थंरेवासागरसंगमं
 सुरर्षयोयमिच्छंतिदिविस्थाधर्मनंदन ॥ १॥ तत्रस्नात्वाविधानेनमुच्यतेपातकैर्नराः ॥ कुशाग्रेणापियोनेयनस्पृष्ट्वा
महोदधिः ॥ २॥ तीर्थयात्रामिमिर्नंहित्वा तव्यंविधिमंत्रतः ॥ अनेनतत्रमंत्रेणस्नातव्यंनृपसत्तम ॥ ३॥ मंत्रः ॥ तीर्थ
यात्रानिमित्तंहिस्नातव्यंविधिमंत्रतः ॥ अनेनतत्रमंत्रेणस्नातव्यंनृपसत्तम ॥ ४॥ नमस्तेविष्णुरूपायनमोविष्णोरमांपते
॥ सांनिध्यंकुरुदेवेशसागरेलवणांभसि ॥ ५॥ आवाहनमंत्रः ॥ अग्निश्चदेवोडेमृथाचदेहोरेतोधाविष्णुरमृतस्यनाभिः
॥ एतद्ब्रुवन्पांडवश्रेष्ठवाक्यंततोवगाहेतपतिंनदीनां ॥ ६॥ सर्वरत्नप्रधानस्त्वंसर्वरत्नाकराकर ॥ सर्वाभिरप्रधानत्वात्
गृहाणार्घ्यमपांपते ॥ ७॥ इत्यर्घः ॥ पंचरत्नसमायुक्तंफलपुष्पाक्षतैर्युतं ॥ मंत्रेणानेनराजेंद्रदद्यादर्घ्यंमहोदधेः ॥ ८॥ वा
ङ्मयःकायजनितासापांमांलवणोदधे ॥ पाद्यर्घ्यंतोरत्ननिधेपर्वतिः पार्वतोनम ॥ ९॥ कोपरःसागरादेवान्स्वर्गद्वारविधा
टनः ॥ तत्रदेवाःसगंधर्वाःऋषयःसिद्धचारणाः ॥ १०॥ जमदग्निंद्विसेवंतेविरूपाक्षमथंशुभं ॥ रेणुकांचैववयोदेवीपश्यं
तिप्रभुविमानवाः ॥ ११॥ भोगाढ्यास्तेशिवेलोकेवसंतिकालमीप्सितं ॥ तत्रस्नात्वानरोराजन्पर्ययित्वापितॄन्सुरान् ॥
१२ तारयेन्नरकान्घोरान्कुलानांशतमुत्तमं ॥ पापक्षयकरंतीर्थंदर्शनादेवभारत ॥ १३॥ रेणुकाप्रत्ययार्थंहिअ
न्येपिपितृदेवताः ॥ जलेवियन्तिवाभूपदत्तंतेपापहारिणः ॥ १४॥ तत्रतीर्थेतुराजेंद्रनर्मदोदधिसंगमे ॥ स्नानंकृ
त्वाविधानेनकथंशोचत्यकृतात्मने ॥ १५॥ एवंसागरपर्यंतंमहातीर्थमनुत्तमं ॥ जामदग्न्येनरामेणतत्रदेवःप्रतिष्ठि
तः ॥ १६॥ तत्रैवदेवगंधर्वाऋषयःसिद्धचारणाः ॥ सेवयंतीविरूपाक्षंजामदग्न्याश्रमेनृप ॥ १७॥ रेणुकांचैवयोदेवीं
तत्रपश्यंतिमानवाः ॥ शिवलोकेवसंतेतेयावदाहूतसंप्लवं ॥ १८॥ जामदग्न्याश्रमंदृष्ट्वाजमदग्नेश्चभारत ॥ स्नात्वासं
तर्प्यसंपूज्यमुच्यतेसर्वपातकैः ॥ १९॥ तारयेत्नरकान्घोरान्पितॄन्कोतरंशतं ॥ २०॥ इतिश्रीवायुपुराणेनर्मदा

माहात्म्येजमदग्नितीर्थेरेवासागरसंगमस्नानविधिः ॥ ॥ मार्कंडेयउ० ॥ अतःपरंप्रवक्ष्यामिलुंटनेश्वरमुत्तमं ॥ 665/2008
नर्मदायास्तुसर्वपापक्षयंकरं ॥ १॥ तत्रगोत्रेकलेज्ञातमातृकेपितृकेतथा ॥ सप्तजन्मार्जितंतत्रपेतानकंचोपपातकं
२ संसर्गजनितंवापिमहापापमथापिवा ॥ तत्क्षणादेवराजेंद्रदेवदेवस्यदर्शनात् ॥ ३॥ युधिष्ठिर० ॥ आश्चर्यमिदं
लोकेपुनर्मदाचरितंमहत् ॥ त्वयावैकथितंविप्रसकलंपापनाशनं ॥ ४॥ यदेकंपरमंतीर्थंसर्वकामफलप्रदं ॥ तद
हंश्रोतुमिच्छामिकथयस्वप्रसादतः ॥ ५॥ यत्श्रुत्वासर्वपापानिविधूयसहबांधवैः ॥ गच्छामिपरमंस्थानंत्वत्प्रसादाद्वि
जोत्तम ॥ ६॥ मार्कं० ॥ साधुसाधुमहाप्राज्ञयस्यतेमतिरीदृशी ॥ तत्तीर्थंकथयिष्यामिसर्वतीर्थफलप्रदं ॥ ७॥ नर्मदा
सरितांश्रेष्ठासर्वतीर्थमयीशुभा ॥ विशेषःकथितःस्तस्यारेवासागरसंगमे ॥ ८॥ समुद्रंनर्मदायत्रप्रविष्टासामहान
दी ॥ तत्रैवलिंगंशर्वस्यस्वयमेवोद्भवंनृप ॥ ९॥ लिंगोद्भूतामहाभागानर्मदासरितांवरा ॥ लयंगतातथालिंगेतेनलिं
गमयीशुभा ॥ १०॥ नर्मदायांवसन्नित्यंनर्मदांबुसदापिबन् ॥ दीक्षितःसर्वयज्ञेषुसोमपानंदिनेदिने ॥ ११॥ प्रसन्ना
यस्यरेवायांपावनीपुरपिद्भवा ॥ दुर्लभंत्रिपुलोकेपुनस्यवैनास्तिकिंचन ॥ १२॥ धर्मंचार्थंचकामंचमोक्षंचभरतर्षभ
सल्लभेत्सर्वकार्येषुयोरेवांवैनिसेवितुं ॥ १३॥ पुराकल्पेमहाराजसुमहोर्मितरंगिणी ॥ फेनहासोज्वलांदेवीगंभीरध्वनि
नादितां ॥ १४॥ हंसचक्रकलालापांसलीलांप्रमदामिव ॥ आगच्छंतिनृपश्रेष्ठदृष्ट्वारेवांमहोदधिः ॥ १५॥ केयंकुतःस
मायातिसतिचिंताकुलोभवत् ॥ ज्ञात्वासतत्वतोरेवांशर्वलिंगोद्भवांपरां ॥ १६॥ तुष्टश्चैसतुस्नात्वातगतोरेवामहोदधिः
प्राणिपत्यपुनःप्रेम्णसंगतोरेवयासह ॥ १७॥ समुद्रंनर्मदायत्रप्रविष्टासायदानृप ॥ तत्रदेवाधिदेवस्यतल्लिंगंसमु
च्छ्रितं ॥ १८॥ लयंगतातत्रलिंगेतेनपुण्यतमाहिसा ॥ लुंठनाद्धेजलनिधेर्यत्रलिंगसमुद्भवः ॥ १९॥ लुंठनेश्वरसं
ज्ञोवैतत्रतीर्थेशिवोभवत् ॥ संगमेतत्रयोगत्वालुंटनेश्वरमर्चयेत् ॥ २०॥ सोश्वमेधस्ययज्ञस्यफलंप्राप्नोतिमानवः
वाचिकंमानसंपापंकर्मणाप्यसुराहृतं ॥ २१॥ लुंठनेश्वरमासाद्यविलयंयातितत्नृप ॥ कार्तिक्यांतुविशेषोवैकथितः

रे.ख॰ शंकरेणवै ॥२२॥ तंशृणुष्वनृपश्रेष्ठ सर्वपापापनोदनं ॥ संप्राप्तां कार्तिकींदृष्ट्वागत्वा तत्रसमाहितः २३ चतुर्दश्यामुपोष्यैवस्ना
त्वावैनर्मदाजले ॥ संतर्प्यपितृदेवांश्चश्राद्धंकृत्वाविधानतः ॥२४॥ रात्रौजागरणंकुर्याल्लुंठनेश्वरमर्चयन् ॥ सफलंजीवि
तंतस्यसफलंतस्यचेष्टितं ॥२५॥ ततः प्रभातेविमलेदृष्ट्वातत्रमहोदधिं ॥ आमंत्र्यस्नानंतत्रैवकारयेत् ॥२६॥ ॐन
३३२ मोविष्णुरूपायनमोविष्णोरमापते ॥ सांनिध्यंकुरुदेवेशसागरेलवणांभसि ॥२७॥ आवाहनमंत्रः ॥ अग्निश्चतेजोमृ
डयाचदेहोरेतोधाविष्णुरमृतस्यनाभिः ॥ ब्रुवन्नेवंपांडवश्रोतवाक्यं ततोवगाहेतपतिंनदीनां ॥२८॥ आजन्मसंस
कंपार्थयत्पापंकुरुतेनरः ॥ सकृत्स्नात्वाप्नुयात्प्रोहेतसागरेलवणांभसि ॥२९॥ पंगवस्तेनसंदेहोजन्मतेषांनिरर्थकं ॥ ए
काग्रहृदयैर्धैर्यैस्तुनद्यस्थोलुंठनेश्वरः ३०॥ पितृणांचत्वान्यवियोनित्वंनभवेतस्यदेहिनः ॥ संगमेतत्रयोगत्वास्नात्वासं
पूजयेच्छिवं ॥३१॥ स्नायादुक्तविधानेननान्यथाकुरुसत्तम ॥ कुशाग्रेणापिपुण्येवानिस्पृश्यव्योमहोदधिः ३२ दत्वार्घं
तु ततः स्नायान्मंत्रेणानेनपांडव ॥ सर्वरत्नप्रधानस्त्वंसर्वरत्नाकराकर ॥३३॥ सर्वाभिरप्रधानस्त्वंगृहाणार्घ्यंमहोदधे
इत्यर्घमंत्रः ॥ पितॄन्देवान्मनुष्यांश्चसंतर्प्याथियथाविधि ॥ ३४॥ संपूज्यब्राह्मणान्श्रेष्ठान्संतोष्यपुरतस्थितः ३४ सु
कृतंदुःकृतंपश्चात्तेभ्यः संविनिवेदयेत् ॥ बाल्यात्प्रभृतियच्चैवयौवनेवार्धके कृतं ॥३५॥ प्रख्यापयित्वातेभ्योथलोकपाल
न्निमंत्रयेत् ॥ बाल्यात्प्रभृतियच्चैवकृतमाजन्मनोशुभं ॥३६॥ निवेदयामिविप्रेभ्योभक्तिप्रह्वः पुरस्थितः ॥ त्रिधाकृतंप
चधाचसुकृतंयत् द्विधाकृतं ॥३७॥ तदक्षयंचसंपूर्णमस्तुतेपरमेश्वर ॥ नर्मदोदधिशर्वाणांब्राह्मणानांप्रसादतः ॥३८
तथैवदुःकृतंयन्मेतत्क्षयंयातुचाखिलं ॥ तीर्थदेवद्विजाप्राणांप्रसादात्तीर्थसेवनं ॥३९॥ नर्मदायाः कृतायात्रासंपूर्णा
चाथसत्तमाः ॥ विधिमंत्रक्रियाहीनंदेशकालादिवर्जितं ॥ ४०॥ विप्रैः संपादितंयस्यसंपन्नंतस्यतत्फलं ॥ इत्युक्तोसं
लुंठेसश्चानसुरांबुधिसंमुखं ॥४१॥ अनुमान्यचतान्पूज्यपश्चात्स्नानंसमाचरेत् ॥ पूर्वस्नात्वाथवापार्थतितस्नानतुमा ३३२
न्यच ॥४२॥ श्राद्धंकृत्वेथविधिवत्पितॄणामनृणोभवेत् ॥ दद्यादानानिसर्वाणियथाशक्त्यायुधिष्ठिर ॥ ४३॥ एवंकृते

नृपश्रेष्ठसर्वपापक्षयोभवेत् ॥ जिज्ञासार्थंचयस्तत्रस्वात्मानंज्ञातुमिच्छति ॥ ४४ शुभाशुभविधानेवैतस्यनिष्ठामिमांशृ 667/2008
णु ॥ स्नात्वातत्रमहातीर्थेलुंठमानोव्रजेन्नरः ॥४५॥ पापकर्मान्यतोयातिधर्मकर्मव्रजेन्नदीं ॥ पापकर्मातितः स्वाप्यस्व
पापंपूर्वमर्जितं ॥४६॥ स्नात्वातीर्थवरेतत्रदानंदद्यात्यथाविधि ॥ एवंपापमपोह्याथअवक्रगमनंव्रजन् ॥४७॥ मुच्यते
पापसंघातात्एवमाहमहेश्वरः ॥ तस्मात्सर्वप्रयत्नेनज्ञात्वैवंनृपसत्तम ॥४८॥ स्नानंयंमानवैस्तत्रयत्रसन्निहितोहरः
॥एवंस्नात्वाविधानेनब्राह्मणान्शास्त्रसंमतान् ४९ तोषयेद्विविधैर्दानैर्भोजनैर्भरतर्षभ ॥ सुवर्णरजतंवस्त्रंमणिमौ
क्तिकभूषणं ॥५०॥ गोवृषंमहिषीधान्यंदत्तंतत्राक्षयंव्रजेत् ॥ शुभंवाप्यशुभंवापितत्रकार्याविचारणा ५१ दृष्ट्वाकामदुघां
प्राप्तांहरस्यवृषभः पुरा ॥ लिंगेनत्रैवदिग्भूटोदक्षिणंस्वखुरंददौ ॥५२॥ गोखुरालंकृतंतत्रलिंगगर्तेनचिह्नितं ॥ तदाप्र
भृतिराजेंद्रशिवस्यातिमनोहरं ॥५३॥ नर्मदोलुकितातत्रलिंगेपूर्वयुधिष्ठिर ॥ तस्माल्लुकेश्वरंनाम्नाख्यातंचैवापराह्वयं ॥५४
वृषखातंसरस्तत्रतत्रस्नात्वानसीदति ॥ तर्पयेच्चपितॄंस्तस्यभक्त्यावैश्राद्धमाचरेत् ॥५५॥ तत्रतीर्थेतुयः कश्चित्प्राण
त्यागंयुधिष्ठिर ॥ भक्त्याकरोतिविधिवत्तस्यपुण्यफलंशृणु ॥५६॥ षष्टिवर्षसहस्राणिकोटिवर्षशतानिच ॥ विमानवरमा
रूढः शिवलोकेमहीयते ॥५६॥ वेदवेदांतविद्विप्रोजायतेवैततोभुवि ॥ पुत्रपौत्रसमृद्धौसौधनधान्यसमन्वितः ५७
प्रभासेभरतश्रेष्ठफलंतदिहवैस्मृतं ॥ कार्तिक्यांकृत्तिकायोगेप्राप्यतेलुंठनेश्वरे ॥५८॥ गयागंगाकुरुक्षेत्रेनैमिषे
पुष्करेयथा ॥ तत्फलंलभतेपार्थलुंठनेश्वरदर्शनात् ॥ ५९॥ नर्मदासर्वतीर्थेभ्यः स्नानदानेनयत्फलं ॥ तत्फलंसमवा
प्नोतिरेवासागरसंगमे ॥६०॥ यः शृणोतिनरोभक्त्यापठ्यमानमिदंशुभं ॥ सर्वपापविनिर्मुक्तोइंद्रलोकंसगच्छति ६१
इतिवायुपुराणेनर्मदामाहात्म्येरेवासागरसंगमेलुंठनेश्वरतीर्थं ॥ ॥मार्कंडेयउवाच ॥ ॥ततोगच्छेनराजेंद्ररेवो
या ॥ दक्षिणेतटे ॥ क्रोशद्वयांतरेतीर्थमात्रतीर्थादनुत्तमं ॥१॥ नाम्नाहंसेश्वरंपुण्यंवेमनस्यविनाशनं ॥ कश्यपस्यकुले
जातोहंसोदाक्षायणीततः ॥२॥ ब्रह्मणोवाहनंजातः पुरातस्थानपोमहत् ॥ सैकदाविधिनिर्दिष्टेनिनानेयग्रमास्ति

तः॥३॥अभिद्रुतःशिवगणैः प्रननाशयुधिष्ठिर॥दक्षयज्ञप्रमथनेकादिशीकोविधिर्विता ४ ब्रह्मणासंस्मृतोप्याशु
नायातिसपदाखगः॥तदातंशप्तवान्ब्रह्मापातयामासवैपदात्॥५॥ततःसशप्तमात्मानंमत्वाहंसस्त्वरान्वितः
॥पितामहमुपागम्यप्रणिपत्येदमब्रवीत्॥६॥हंसउ॰॥तिर्यग्योनिसमुत्पन्नंभवान्शप्तुंनमर्हति॥स्वभावए
वतिर्यक्षुविवेकविकलंमनः॥७॥तथापिदेवपापोस्मियदहंस्वामिनंत्यजे॥किंतुधावद्भिरत्युग्रैर्गणैःशार्वैःपि
तामह॥८॥सहसाहंभयाक्रांतस्तत्पंस्यक्तापलायितः॥अथापिभयमेवाहंपश्यंनास्मिविभोपुरः॥९॥तेनस्मृतो
पिमता नाब्रजंभवदंतिकं॥१०॥मार्कंडेयउवाच॥इतिब्रुवन्लुठंधातुरग्रेहंसःश्वसत्पक्षिपुंजःसुदीनः॥ति
र्यंचंमांपापिनंमूढभावंप्रभोपुरःपतितंपाहिपाहि॥१०॥एकोदेवस्त्वंहिसर्गस्यकर्तानानाविधंसृष्टमेतत्त्वयैव॥
अहंसृष्ट१त्वादृशोयत्त्वयावैसोयंदोषोधातुरत्रानवैव॥११॥शापस्यात्रानुग्रहस्यापिशक्तस्त्वत्तोनान्यःशरणंकं
ब्रजामि॥सेवाधर्मंसदसधुर्निरीचनानाभावान्जगतस्त्वंविधात्से॥१२॥एकोसिबहुरूपोसिनानान्तित्रैककर्म
तः॥निःकर्माखिलकर्मासित्वामतःशरणंब्रजे॥१३॥नमोनमोवरेण्यायवरदायनमोनमः॥१४॥ब्रह्मोवा॰॥शि
क्षादतात्तवैवेयंमाविखादंकृथा —खग॥तपसाशोधयात्मानंयथाशापात्प्रमुच्यसे॥१५॥रेवासेवाकरःस्नात्वा
स्थापयित्वामहेश्वरं॥अचिरेणैवकालेनततःसंस्थानमाप्स्यसि॥१६॥यच्चेष्ट्वाबहुभिर्यज्ञैःसमाप्तवरदक्षिणैः
गोस्वर्णकोटिदानेश्चतत्फलंस्थापितेशिवे॥१७॥ब्रह्मघ्नोवासुरापोवास्वर्णहृत्गुरुतल्पगाः॥रेवातीरेशिवंस्था
प्यमुच्यतेसर्वपातकैः॥१८॥तस्मात्दुर्गसरित्तीरेस्थापयित्वात्रियंबकं॥विमुक्तःसर्वदोषैस्त्वंयास्यसेपदमुत्तमं॥१९॥
एवमुक्तःसविधिनात्दृष्टतुष्टःखगोत्तमाः॥तथेत्युक्ताजगामाशुनर्मदातीरमुत्तमं॥२०॥पूजयित्वापरंस्थानंप्राप्त
वान्खगसत्तमः॥तत्रहंसेश्वरेतीर्थेगत्वास्नात्वायुधिष्ठिर॥२१॥पूजयेत्परमेशानंसपापैःपरिमुच्यते॥स्तुव
न्नेकमनादेवंनदैन्यंप्राप्नुयात्क्वचित्॥२२॥श्राद्धंदीपप्रदानंचब्राह्मणानांचभोजनं॥दत्वाशक्त्यानृपश्रेष्ठ

स्वर्गलोकेमहीयते॥२३॥त्रिकालमेककालंवायोभक्त्यापूजयेच्छिवं॥नवप्रसूतांधेनूंचदत्वापार्थद्विजोत्तमे॥२४॥
षष्टिवर्षसहस्राणिशिवलोकेमहीयते॥२५॥इतिश्रीरेवामाहात्म्येहंसेश्वरतीर्थं॥ ॥मार्कंडेय॰॥ततःकोशांतरेग
च्छेतिलादंतीर्थमुत्तमं॥तिलप्राशनकृयत्रजाबालिःशुद्धिमाप्तवान्॥१॥मातृपितृपरित्यागीभ्रातृभार्याभिरक्षा
परःत्॥पुत्रविक्रयकृत्पापःछलकृतगुरुणासह॥२॥एवंदोषसमाविष्टोयत्रयत्रापिगच्छति॥तत्रतत्रापिधिक्का
रंलभतेसत्सुभारतः ३ नकोपिसंगतिंधत्तेतेनसार्धंसंभाषत्यपि॥इतिलज्जान्वितोविप्रःकालेनमहतानृप ४ चिंतामु
वापमहतींमगतिंद्रोद्दिपावने॥चकारसर्वतीर्थानिरेवांचाप्यवगाहयन्॥५॥अर्णवोपांतमासाद्यदक्षिणेनर्मदा
तटे॥तस्थौयतव्रतःपार्थजाबालिःप्राशनेयत्तिलान्॥६॥तिलैरेकाशनंकुर्वतत्थैवैकांतराशनं॥अहपट्द्वा
दशाहाश्चापिपक्षमासाशनंतथा॥७॥कृच्छ्रचांद्रायणादीनीव्रतानिचतिलैरपि॥तिलादत्वमनुप्राप्तोस्पृष्टद्वासत्य
तिक्रमात्॥८॥कालेनगच्छतातस्यप्रसन्नोभवतीश्वरः॥प्रादादिहामुत्रिकींतुशुद्धिंसालोक्यमात्मकं॥९॥तेनसं
स्थापितोदेवःस्वनाम्नाभरतर्षभ॥तिलादेश्वरसंज्ञांचप्रापलोकादपिप्रभुः॥१०॥तदाप्रभृतिविख्यातंतीर्थंपा
पप्रणाशनं॥तत्रतीर्थेनरस्नात्वाचतुर्दश्यष्टमीषुच॥११॥उपवासपरःपार्थतथैवहरिवासरे॥तिलहोमीति
लोद्वर्तीतिलस्नायीतिलोदकी॥तीलदाताचभोक्ताचनानापापैःप्रमुच्यते॥१२॥तिलैरापूरयेल्लिंगंतिलतैले
नदीपदः॥रुद्रलोकमवाप्नोतिपुनात्यासप्तमंकुलं १३ तिलपिंडप्रदानेनश्राद्धेनृपतिसत्तम॥विकर्मस्थापिगच्छं
तिमिपांहिपूर्वजाः॥१४॥स्वर्गलोकस्थिताश्राद्धेब्राह्मणानांचभोजनैः॥अर्थस्थानांतृप्तिमःसाद्यमोदतेशाश्वतीःसमाः१५
पितुःकुलंमातृकुलंतथाभार्यापितृपकुले कुलत्रयंसमुद्धृत्यस्वर्गंनयतिवैनरः॥१६॥ ॥इतिश्रीरेवामाहात्म्येतिला
देश्वरतीर्थं॥ ॥मार्कंडेयउ॰॥ततःकोशांतरेपार्थवासवंतीर्थमुत्तमं॥वसुभिःस्थापितंतत्रस्थित्वावेदाद्दशापृथक् १
धराध्रुवश्चसोमश्चआपश्चैवानिलोनलः॥प्रत्यूषश्चप्रभासश्चवसवोष्टाविमेपुरा॥२॥पितृशापपरीखिन्नार्गर्भवासाय

669
2008

भारत॥ नार्मदंतीरमासाद्यतपश्चक्रुर्यतेंद्रियः॥३॥ आराधयंतः परमंभवानीपतिमव्ययं॥ द्वादशाब्दानिराजेंद्रततस्तुष्टो
महेश्वरः ४ प्रत्यक्षः प्रददौतेभ्यः स्वमभीष्टंवरमुत्तमं॥ ततः स्वनाम्नासंस्थाप्यवसवस्तंमहेश्वरं॥५॥ जग्मुराकाशमावि
३३३ श्यप्रसन्नेसतिशंकरे॥ ततः प्रभृतिविख्यातंतीर्थंतद्वासवाह्वयं॥६॥ तस्मिंस्तीर्थेमहाराजयोभक्त्यापूजयेच्छिवं॥
यथालब्धोपहारैश्चदीपंदद्यात्प्रयत्नतः॥७॥ शुक्लपक्षेसदाष्टम्यां प्रत्यहंवापिशक्तितः॥ अष्टौवर्षसहस्राणिसवसेच्छिव
संन्निधौ॥८॥ ततः शिवेलयंयातिगर्भवासंनपश्यति॥ पुष्पैर्वाबिल्वपत्रैर्वापिफलैर्धान्यैस्तथापिवा ९ पूजयेद्देवमीशानं
सदैन्यंनाप्नुयात्क्वचित्॥ सर्वदोषविनिर्मुक्तः स्वर्गलोकेमहीयते॥१०॥ एकाहमपिकौंतेययोवसेद्वासवेश्वरे॥ पापरा
शीविनिर्धूयभानुवद्दिविमोदते॥११॥ विप्रांश्चभोजयेच्छक्त्यादद्याद्वासांसिदक्षिणाः॥१२॥ इतिरेवामहात्म्येवासवेश्वरती
र्थं॥ ॥ मार्कंडेयउवा०॥ ततः कोशांतरेराजन्तीर्थंकोटीश्वरंपरं॥ यत्रस्नानंचदानंचजपोहोमार्चनादिकं॥१॥ भक्त्या
कृतंनरैस्तत्रसर्वकोटिगुणंभवेत्॥ तत्रदेवाः सगंधर्वाऋषयश्चतपोधनाः॥२॥ जलधिंप्रतिगच्छंतींनर्मदांवीक्ष्यतुंकि
ल॥ मीलिताः कोटिशोराजन्रेवासागरसंगमे॥३॥ विनोदमतुलंदृष्ट्वारेवार्णवसमागमे॥ स्नात्वाशिवंचसंस्थाप्यपूजयि
त्वामहेश्वरं॥४॥ कोटीश्वराभिधानंचस्वस्वभक्त्याविधानतः॥ कोटितीर्थेपरांसिद्धिंसंप्राप्ताः शर्वतोषणात्॥५॥ तत्रदक्षि
णेमार्गस्थायेकेचिदपिसत्तमाः॥ सिद्धामृतपदंयांतिपितृलोकंतथोत्तमं॥६॥ उत्तरेनर्मदाकूलेदक्षिणेचाश्विनाश्रये॥ देव
लोकंगतास्तत्रइतिमेनिश्चितामतिः॥७॥ बिल्वार्कपुष्पधत्तूरकुशकाशप्रसूनकैः॥ ऋतूद्भवैस्तथान्यैश्चपूजयित्वामहे
श्वरं॥८॥ नानोपचारैर्विधिवन्मंत्रपूर्वंयुधिष्ठिर॥ धूपदीपादिनैवेद्यैस्तोषयित्वाचधूर्जटिं॥९॥ शिवलोकमवाप्नोतिया
वदिंद्राश्चतुर्दश॥ पौषकृष्णाष्टमीयोगेविशेषः पूजनेस्मृतः॥१०॥ नित्यंचनृपतिःश्रेष्ठेचतुर्दश्यष्टमीषुच॥ शिवमभ्यर्च्य
विप्रांश्चभोजयेद्भक्तितोवरान्॥११॥ इतिश्रीरेवामाहात्म्येकोटीश्वरतीर्थं॥ ॥ मार्कंडेयउवाच॥ ततश्चोशांतरे
गच्छेदलिकातीर्थमुत्तमं॥ अलिकानामगंधर्वीकुटिलाकुटिलाशया॥१॥ चित्रसेनस्यदौहित्रीविभानंदमृषिंगता॥ ३३३

671/2008

वव्रेतंस्वीकृतानेनदशवर्षाणितंश्रिता॥२॥ पतिंजघानतंसुप्तंकस्मिंश्चित्कारणांतरे॥ गत्वानिवेदयामासपितरंरत्न
वल्लभं॥३॥ पित्रामात्राचसंत्यक्तावहुनिर्भर्त्सितानृप॥ गर्भभीत्वंपतिघ्नीत्वमितिदर्शयिमामुखं॥४॥ ब्रह्मघ्नीयाहिपापि
ष्टेपरित्यक्तागृहात्यज॥५॥ मार्कंडेयउ०॥ इतिदुःखान्वितामृदानाभ्यांनिर्भर्त्सितासती॥ नमुत्यक्तुंमनश्चक्रेप्राप्यतीर्थांत
रंक्वचित्॥६॥ सपृच्छमानातीर्थानिब्राह्मणेभ्योयुधिष्ठिर॥ श्रुत्वापापहरंतीर्थंरेवासागरसंगमं॥७॥ तत्रपार्थतपश्च
क्रेनिराहारापतन्मना॥ कृच्छ्रातिकृच्छ्रपाराकमहासांतपनादिभिः॥८॥ चांद्रायणैर्ब्रह्मकूर्चैः कर्शयामासवैतनुं॥
एवंवर्षशतंसाग्रंव्यतीतंतपसानृप॥९॥ तस्याविशुद्धमिच्छत्याः शिवध्यानार्चनादिभिः॥ ततः कतिपयाहोभिःस्त
स्याज्ञात्वाहृदंपरं॥१०॥ परितुष्टःशिवः प्राहपार्वत्यापरिनोदितः॥११॥ ईश्वरउवा०॥ पुत्रीमासाहसंकार्षीःशुद्धदेहा
सिसांप्रतं॥ तुष्टोहंतपसानेयवरंवरयवांछितं॥१२॥ अलिकाउ०॥ यदितुष्टोसिमेदेववरार्हायद्यहंमता॥ नानापापाग्नितप्ता
यादेहिमुक्तिंपरांमम॥१३॥ त्वंमेनाथोत्वनाथायास्त्वमेवजगतांगुरुः॥ दीनानाथसमुद्धातशरण्यः सर्वदेहिनां॥१४॥ ईश्वर
उ०॥ त्वंभद्रेशुद्धदेहासिमाकिंचिदनुशोचिथाः॥ स्वनाम्नास्थापयित्वेवमांततः स्वर्गमेष्यसि १५ इत्युक्त्वादेवदेवेशस्तत्रैवां
तरधीयत॥ अलिकापितनोभक्त्यास्नात्वासंस्थाप्यशंकरं॥१६॥ दत्वादानंचविप्रेभ्योलोकमाहमंदोत्कटं॥ पितरंचसमा
साद्यमातरंचयुधिष्ठिर॥१७॥ ताभ्यांसन्मानिताप्रीत्याबंधुभिः सालिकाततः॥ विमानवरमारूढागौरीवविमलछविः
१८ गौरीलोकमनुप्राप्तासखित्वेधापिमाद्यते॥ ततः प्रभृतितत्तीर्थंविख्यातमलिकेश्वरं॥१९॥ तत्रतीर्थेतयानारीपुरुषोवा
युधिष्ठिर॥ स्नात्वासंपूजयद्भक्त्यामहादेवमुमायुतं॥२०॥ सपापैर्विविधैर्मुक्तोलोकमाप्नोतिशांकरं॥ मानसंवाचिकंपापंका
यिकंयसुरार्जितं॥२१॥ सर्वंतद्विलयंयातिभोजयित्वाद्विजान्सदा॥ दीपंदत्वाचदेवाग्रेनरोगैःपरिभूयते॥२२॥ धूपपात्रंवि
तानांतघंटांकलशमेवच॥ दत्वादेवायराजेंद्रशांकंलोकमवाप्नुयात्॥२३॥ इतिश्रीरेवासागरसंगमेअलिकातीर्थं
मार्कंडेयउवा०॥ ततः कोशांतरेपुण्यंतीर्थंतद्विमलेश्वरं॥ यत्रस्नानेनदानेनपेजेहोमार्चनादिभिः॥१॥ विमलेश्वरमास

यथोयंइच्छेत्सनत्लभेत्॥ स्वर्गभोगादिकंवापिपार्थिवत्वंयथेप्सितं॥२॥ पुराविश्वरसंहत्वालघुःपुत्रंशतक्रतुः॥यस्यती
र्थस्यमाहात्म्याच्चैर्मल्यंपरमंगतः॥३॥ यत्रवेदनिधिर्विप्रामहत्तस्त्वानपःपुरा॥नानाकर्ममलैःक्षीणैर्विमलोभवदर्कवत्
॥४॥ महादेवप्रसादेनसोमवास्त्रिपदर्शनः॥पुराभानुमतीभानुःसुतांस्मरशरार्दितः॥५॥ चकमेतेनदोषेणकुष्ठरोगा
श्रितोभवत्॥सचाप्यत्रतपःकृत्वाविमलत्वमुपागतः॥ महादेवेनतुष्टेनस्वस्थानंमुदितोभजत्॥ तथैवचपुरापार्थमांि
डकसुतोमुनिः॥७॥ योषित्संगंवनेप्राप्यपुरेचनृपतेस्तथासचसंसर्गदोषातेमालिन्यपरमात्मनः ८ विचार्यचात्रप्युपेत्य
रेवासागरसंगमं॥ शांतयाभार्ययासार्धंतप्त्वाद्वादशवत्सरान्॥९॥ कृच्छ्रचांद्रायणैर्देवंतोषयन्त्र्यंबकंमुनिः॥ महादेवतुष्टे
नसोपितैर्मण्यमाप्तवान्॥१०॥ शर्वाण्याप्रेरितःशर्वःपुरादारुवनेनृप॥ मोहनान्मुनिपत्नीनांसंवीक्ष्यसमलंकिल॥११॥
विचार्यपरमंस्थानंनर्मदोदधिसंगमं॥ तत्रास्थित्वामहाराजतपस्तप्त्वासहोमया॥१२॥ विमलोसौयतोजातस्तेनासौवि
मलेश्वरः॥ तेननाम्नास्वयंतस्थौलोकानांहितकाम्यया॥१३॥ ततस्तिलोत्तमांसृष्ट्वाब्रह्मलोकपितामहः॥ प्रजानाथोपितां
सृष्ट्वाग्रेसुमनोहरां॥१४॥ भावियोगवशाक्रांतःसतस्याकामुकोभवत्॥ तेनवीक्ष्यसदोषस्वंरेवानीरहृयंश्रितः॥१५॥ ती
र्थान्यनुसरन्मौनीस्थित्वाथीसंस्मरन्शिवं॥ रेवार्णवसमायोगेस्नात्वासंपूज्यशंकरं॥१६॥ कालेनाल्पेनराजर्षेब्रह्माप्य
मलतांगतः॥ एवमन्येपितृपतेदेवर्षिनृपसत्तमाः १७ त्यक्तादोषमलंतत्रबहुधाविमलाभवन्॥ तथात्वमपिराजेंद्रत
त्रस्नात्वाशिवार्चनात्॥१८॥ अमलोपिविशेषेणवैमल्यंप्राप्स्यसेपरं॥ तत्रस्नात्वानरोनारीपूजयित्वामहेश्वरं॥१९॥ पापदोषवि
निर्मुक्तोब्रह्मलोकेमहीयते॥ तत्रोपवासंयःकृत्वापश्येत्तविमलेश्वरं॥२०॥ अष्टम्यांचचतुर्दश्यांसर्वपर्वसुपार्थिव॥सप्तजन्म
कृतंपापंहित्वायातिशिवालयं॥२१॥ श्राद्धंकृत्वाविधानेनपितॄणामनृणीभवेत्॥ ब्राह्मणान्भोजयेच्छक्त्यातेभ्योदद्याच्चद
क्षिणां॥२२॥ यद्यदिष्टतमंलोकेपत्नीवामहितंगृहे॥ ततद्गुणवतेदेयंतत्रैवाक्षयमिच्छता॥२३॥ स्वर्णधान्यानिवासांसि ३३५
छत्रोपानत्कमंडलूः॥ गृहंदेवस्यवैशक्त्याकृत्वास्याद्भुविभूपतिः॥२४॥ गीतनृत्यकथाभिश्चतोषयेत्सरमेश्वरं॥२५॥ ॥

इतिश्रीवायुपुराणेरेवामाहात्म्येविमलेश्वरतीर्थं॥ ॥मार्कंडेय॰॥एतानितवसंक्षेपात्प्राधान्यात्कथितानितु॥नशक्ता ६७३/२००८
विस्तराद्वक्तुंसंख्यातीर्थेषुपांडव॥१॥ एषापवित्राविमलानदीत्रैलोक्यविश्रुता॥नर्मदासरितांश्रेष्ठामहादेवस्यवल्लभा
२ मनसासंस्मरेद्यस्तुनर्मदांसततंनृप॥ चांद्रायणशतस्यासौलभतेफलमुत्तमं॥३॥ अश्रद्धधानाःपुरुषानास्तिक्यंचात्र
पेश्रिताः॥ पतंतितेनकेघोरेप्राहैवंपरमेश्वरः॥४॥ नर्मदांसेवतेनित्यंस्वयंदेवोमहेश्वरः॥ तेनपुण्यानदीज्ञेयाब्रह्महत्याप
हारिणी॥५॥ इयंमाहेश्वरीगंगामाहेश्वरतनूद्भवा॥ प्रोक्तादक्षिणगंगावैरेवानास्त्यत्रसंशयः॥६॥ यथादिपुरुषोदेवस्त्रि
मूर्तित्वमुपागतः॥ब्रह्मविष्णुमहेशाख्यंनभेदस्तत्रवैयथा॥७॥ तथासरित्त्रयेपात्रभेदंमनसिमाकृथाः॥ कोटिशोस्यत्रती
र्थानिलक्षशश्चापिभारत॥८॥ तथासहस्रशोरेवातीरद्वयगतानितु॥ दिव्यान्तरिक्षसंस्थानिजलगतानितु॥९॥ कशक्तः
स्तानितान्वर्णितुंवागीशोवामहेश्वरः॥ स्मरणाज्जन्मजनितंदर्शनाच्चत्रिजन्मजं॥१०॥ सप्तजन्मगतंपापंनश्येद्रेवावगाहना
त्॥ देवकार्यंकृतंतेनश्रयोविधिवद्हुताः॥११॥ पवित्रास्ततुरीवेदायेनरेवावगाहिता॥ प्राधान्याच्चापिसंक्षेपात्तीर्थान्यु
क्तानितेमया॥१२॥ नशक्योविस्तरःपार्थश्रोतुंवक्तुंचवैमया॥१३॥ युधिष्ठिरउ॰॥ कथंतीर्थविधानंचनियमांश्चवदस्वमे॥प्रा
यश्चित्तार्थगमनेकोविधिस्तंवदस्वमे॥१४॥ मार्कंडेय॰॥ साधुपृष्टेमहाराजयच्छ्रेयःपारलौकिकं॥ शृणुष्वावहितोभूत्वायथाज्ञा
तंवदामिते॥१५॥ अध्रुवेणशरीरेणध्रुवंकर्मसमाचरेत्॥ अवश्यमेवयास्यंतिप्राणाःप्राघूर्णकाइव॥१६॥ दानैर्विनाद्द
नवोच्चःकीर्तिधर्मैर्नियायुषः॥ परोपकारणंकायादसारात्सारमुद्धरेत्॥१७॥ अस्मिन्महामोहमयेकटाहेसूर्याग्निनारा
त्रिदिनेधनेन॥ मासर्तुदर्वीपरिघट्टनेनभूतानिकालःपचतीतिवार्ता॥१८॥ ज्ञात्वाशास्त्रविधानोक्तंकर्मकर्तुमिहार्हसि॥ना
यंलोकोस्तिनपरोनसुखंसंशयात्मनः॥१९॥ मंत्रेतीर्थेद्विजेधेनौदेवज्ञेभेषजेगुरौ॥ यादृशीभावनायस्यसिद्धिर्भवतिनादृ
शी॥२०॥ श्रेअस्यध्याहुतंनरंतपस्तप्तंचयद्भवेत्॥ असदित्युच्यतेपार्थनचतत्प्रेत्यनोइह॥२१॥ शास्त्रविधिवेदविहितं
धर्ममुत्सृज्यय:कामकारतःयथेत्संवर्तते॥ ससिद्धिंतत्त्वज्ञानंनप्राप्नोतिनचसुखंउपशमंनचपरांगतिंमुक्तिंप्राप्नोतिमुत्सृज्यत

त्तिकामकारतः ॥ नससिद्धिमवाप्नोति न सुखं न परां गतिं ॥२२॥ संती हविविधोपाया नृणां देहविशोधनाः ॥ तीर्थसेवापरं
नास्तिस्वशरीरस्यशोधनं ॥२३॥ कृच्छ्रचांद्रायणाद्यैर्वाद्वितीयं तीर्थसेवया ॥ यदा तीर्थं समुद्दिश्य प्रयाति पुरुषो नृप ॥२४॥
 तदा देवाश्च पितरस्तं व्रजंत्यनुखेचराः ॥ परं प्रहर्षपूर्णास्ते प्रयातस्यानुयायिनः ॥२५॥ कृत्वाभ्युदयिकं श्राद्धं आपृच्छ्य कु
लदेवताः ॥ इष्टबंधुंश्च विप्रांश्च शंकरं सगणेश्वरं ॥२६॥ व्रजेद्द्विजाप्यनुज्ञातो गृहीत्वा नियमानपि ॥ एकाशनं ब्रह्मचर्यं
भूशय्यां सत्यवादितां ॥२७॥ वर्जनं च परान्नस्य प्रतिग्रहविवर्जनं ॥ वर्जयित्वा तथा द्रोहवंचनादि नृपोत्तम ॥२८॥ साधुवे
षं समारुह्य विधिनेन विभूषितः ॥ दंभाहंकारमुक्तो यः स तीर्थफलमश्नुते ॥२९॥ अक्रोधनश्च राजेंद्र सत्यशीलो दृढव्र
तः ॥ आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते ॥३०॥ मुंडनं चोपवासश्च सर्वतीर्थेष्वयं विधिः ॥ वर्जयित्वा कुरुक्षेत्रं विशालां वि
रजां गयां ॥३१॥ स्नानं सुरार्चनं चैव श्राद्धे वै पिंडपातनं ॥ विप्राणां भोजनं शक्त्या सर्वतीर्थेष्वयं विधिः ॥३२॥ प्रायश्चित्तनि
मित्तं च यो व्रजेद्यत्नमास्थितः ॥ तस्यापि विधिं वक्ष्ये शृणु पार्थ समाहितः ॥ ३३॥ एकाशनं ब्रह्मचर्यमक्षारलवणाशनं
॥ वर्जयेत्सततालापं वह्नभाषणमेव च ॥ ३४॥ परिवादं परान्नं च नीचसंगं च वर्जयेत् ॥ व्रजेच्च निरुपानत्को वसानो वास
सी शुचिः ॥३५॥ संकल्पं मनसा कृत्वा ब्राह्मणानुज्ञया व्रजेत् ॥ गत्वा तीर्थं तथा स्नात्वा कृत्वा चैव सुरार्चनं ॥३६॥ दुःकर्मतो
विमुक्तः स्यादनुतापी भवेत्पापी ॥ वेदे तीर्थे च देवे च दैवज्ञे भेषजे गुरौ ॥३७॥ यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥
उक्ततीर्थफलानां च पुराणेषु स्मृतिष्वपि ॥३८ अर्थवादभवां शंकां विहाय भरतर्षभ ॥ कृत्वा विचारं शास्त्रोक्तं परिकल्प्य यथो
चितं ॥३९॥ कायेन कृच्छ्राचरणे ह्यशक्तानां विशुद्धये ॥ ज्ञात्वा तीर्थविशेषं हि प्रायश्चित्तं समाचरेत् ॥ ४०॥ न घृणु षमहा
राज नर्मदायां पथोचितं ॥ चतुर्विंशतिसंख्येभ्यो योजनेभ्यो व्रजेन्नरः ॥४१॥ चतुर्विंशति लक्षाणां फलमाप्नोति शोभनं ॥
अत ऊर्ध्वं योजनेषु पादकृच्छ्र उदाहृतः ४२ तन्मध्ये च महाराज यो व्रजेद्बुद्धिकांक्षया ॥ योजने योजने तस्य प्राजापत्यं विदु
र्बुधाः ॥४३॥ प्रणवाख्ये महाराज तथा रेवोरिसंगमे ॥ भृगुक्षेत्रे तथा गत्वा फलं तद्द्विगुणं स्मृतं ॥४४॥ संगमे देवनद्या ३३५

श्च भूलभेरे नृपोत्तम ॥ द्विगुणं पादहीनं स्यात्करजासंगमे तथा ॥४५॥ एरंडीसंगमे तद्वत् कपिलायाश्च संगमे ॥ केचित्त्रिगु
णितं प्राहुः कुब्जारेवोघसंगमे ॥४६॥ ॐकारे च महाराज तदपि स्यात्समं जलं ॥ संगमे पुनरन्यास्यां नदीनां रेवया सह ॥
४७ प्राहुस्ते सार्द्धकृच्छ्रं वै फलं पूर्वं युधिष्ठिर ॥ योजने योजने गत्वा चतुर्विंशतियोजनं ॥४८॥ तत्र तत्र वसेद्यस्तु चिरं नृप
वरोत्तम ॥ रेवासेवासमाचारः संयतः शुद्धबुद्धिमान् ॥४९॥ दंभाहंकाररहितः शुध्यते स विमुच्यते ॥ इति ते कथितं पा
र्थ प्रायश्चित्तार्थलक्षणं ॥५०॥ रेवायात्राविधानं च गुह्यमेतद्युधिष्ठिर ॥५१॥ युधिष्ठिर उ॰॥ योजनस्य प्रमाणं मे वद त्वं
मुनिसत्तम ॥ यज्ज्ञात्वा निश्चितं मे स्यात्सतः शुद्धेस्तु कारणं ॥५२॥ मार्कं॰॥ शृणु पांडव वक्ष्यामि प्रमाणं योजनस्य य
त् ॥ तथा यात्राविशेषेण विशेषं कृच्छ्रसंभवं ॥५३॥ तिर्यग्यवोदराण्यष्टावूर्ध्वा वा त्रीहयस्त्रयः ॥ प्रमाणमंगुलं स्याद्वितस्ति
स्तिर्द्वादशांगुला ॥५४॥ वितस्तिर्द्वितयं हस्तश्चतुर्हस्तं धनुः स्मृतं ॥ स एव दंडो गदितो विशेषज्ञैर्युधिष्ठिर ॥५५॥ धनुःस
हस्रे द्वे क्रोशश्चतुःक्रोशं च योजनं ॥ एतद्योजनमानं च कथितं भरतर्षभ ॥५६॥ येन यात्रां व्रजन्वेत्ति फलमानं निजार्जितं
॥ उक्तकृच्छ्रफलं तीर्थे जपरूपेण नृपोत्तम ॥५७॥ यथाविशेषं तेनाम्यपि पूर्वोक्ते तत्र तत्र च ॥ तं मे शृणु महीपाल श्राद्धधानाय
कथ्यते ॥५८॥ यस्मिंस्तीर्थे च यत्प्रोक्तं फलं कृच्छ्रादिकं नृप ॥ तथाप्युपोषणात् कृच्छ्रफलं प्राप्नोत्यथाधिकं ॥५९॥ दिनजाप्या
च्छ्रभते फलं कृच्छ्रस्य शक्तितः ॥ तत्र च स्थानदेवेशं स्मात्वा दद्याद्भिपृज्य च ॥ प्रणम्य लभते पार्थ फलं कृच्छ्रभवं सुधीः ॥६०॥
तीर्थे मुख्यफलं स्नात्वा द्वितीयं चाप्युपोषणात् ॥ तृतीयं स्थानदेवस्य दर्शनाभ्यर्चनादिभिः ॥६१॥ चतुर्थं चाप्ययोगेन देह
शक्त्या बहुनित्रिशं ॥ एवं सर्वत्र तीर्थेषु कल्पनीयं हि रूपतः ॥६२॥ तीरस्थो योजनाद्वर्वाक् दशांशं लभते फलं ॥ उक्ततीर्थ
फलात्सार्थं नात्र कार्या विचारणा ॥६३॥ उपवासेन सहितं महामयांहि सज्जनं ॥ अप्यर्वाक् योजनात्सार्धदिवात् कृ
च्छ्रफलं नृणां ॥६४॥ षड्योजनं च ह्रदकुल्यानद्योऽल्यादादशैव च ॥ चतुर्विंशतिगा नद्यो महानद्यस्ततोऽधिकः ॥६५॥
इति श्रीवायुप्रोक्तांत्रिनसंहितायां रेवाखंडे तीर्थयात्राविधानं नाम ॥ ॥ युधिष्ठिर उवा॰॥ परार्थं तीर्थयात्रायां गच्छतः

6HS 2008

कस्यकिंफलं॥कियन्मात्रंमुनिश्रेष्ठतन्मेब्रूहिकृपानिधे॥१॥मार्कं०॥परार्थंगच्छतस्तन्मेवदतःशृणुपांडव॥य
थायावत्फलंयस्ययात्रादिविहितंभवेत्॥२॥उत्तमेनेहवर्णेनद्रव्यलोभादिनानृप॥नाधमस्यकचित्कार्यंतीर्थया
त्रादिसेवनं॥३॥धर्मकर्ममहाराजस्वयंविद्वान्समाचरेत्॥शरीरस्याश्रवात्राक्वा अन्यद्वाकार्ययोगतः॥४॥धर्मकि
र्मसदाप्राज्ञःसवर्णेनैवकारयेत्॥पुत्रपौत्रादिकैर्वापिज्ञातिदौहित्रकादिभिः॥५॥श्रेष्ठंहितिनंप्राहुर्वैधर्मकर्मयु
धिष्ठिर॥नैरेवकारयेत्तस्मान्नोत्तमैर्नाधिमैरपि॥६॥अधारेणकृतंसम्यक्तन्नभवेदितिमेमतिः॥उत्तमश्चाधमार्थेहि
कुर्वन्दुर्गतिमाप्नुयात्॥७॥नशूद्रायमतिंदद्यान्नोच्छिष्टंनहविःकृतं॥नचास्योपदिशेधर्मंनचास्यव्रतमादिशेत्॥
८ जपस्तपस्तीर्थसेवाप्रव्रज्यामंत्रसाधनं॥देवताराधनंदीक्षास्त्रीशूद्रपतनानिषट्॥९॥पतिवंतीपतस्येववि
धवासर्वमाचरेत्॥सभर्तृकाशक्तेपत्यौसर्वंकुर्यादनुज्ञया॥१०॥गत्वापारार्थंतीर्थंदिषोडशांशफलंलभेत्॥गच्छतस्तु
प्रसंगेनतीर्थधर्मफलंस्मृतं॥११॥अनुषंगेणतीर्थस्यस्नानेस्नानफलंविदुः॥नैवयात्राफलंतज्ज्ञाःशास्त्रोक्तंकल्मषापह
१२ पितुर्थेचपितृव्यस्यमातुर्मातामहस्यच॥मातुलस्यतथाभ्रातुःश्वशुरस्यसुतस्यच॥१३॥पोषकार्थदियोश्चापिमाता
महस्यागुरोस्तथा॥स्वसामातृष्वसापौत्रीआचार्याध्यापकस्यच॥१४॥इत्याद्यर्थेनिरःस्नात्वास्वयमष्टांशमाप्नुयात्॥साक्षा
त्पित्रोःप्रकुर्वाणश्चतुर्थांशमवाप्नुयात्॥१५॥पतिपत्न्योःमिथश्चार्धफलंप्राहुर्मनीषिणः॥भागिनेयस्यशिष्य
स्यभ्रातृव्यस्यसुतस्यच॥१६॥षड्भिःपंचमाद्भागात्फलंप्राप्नोतिवैनरः॥इतितेकथितंपार्थपारंपर्यक्रमागतं॥१७
कर्तव्यंज्ञातिवर्गस्यपरार्थेधर्मसाधनं॥वर्षाकृतुसमायोगेसर्वंतियोरजस्वलाः॥१८॥मुक्त्वासरस्वतींगंगांनर्मदांयमु
नांतदा॥ ॥इतिश्रीरेवामाहात्म्येपरार्थतीर्थयात्राफलकथनं॥ ॥मार्कंडेयउवाच॥एवंतेकथितंराजन्पुराणं
धर्मसंहितं॥शिवप्रीत्यायथाप्रोक्तंवायुनादेवसंसदि॥१॥शांतिरस्तुशिवंचास्तुलोकाःसंतुनिरामयाः॥गोब्रा ३३६
ह्मणेभ्यःस्वस्त्यस्तुधर्मधर्मात्मिजाश्रय॥२॥नरकांतकरीदेवीसतीर्थाविश्वपावनी॥नर्मदाधर्मदाश्चास्तुशर्मदापा

र्थतुसदा॥३॥सूतउ०॥इत्युक्तोपरमायपांडोःपुत्रायवैमुनिः॥मृकंडतनयोधीमान्ससत्कल्पस्मरःपुरा॥४॥मार्कंडेमुनि
नाप्रोक्तंयथापार्थायसत्तमाः॥तथावःकथितंसर्वंरेवामाहात्म्यमुत्तमं॥५॥इयंपुण्यासरित्श्रेष्ठारेवाविश्वैकपावनी॥रु
द्रदेहसमुद्भूतासर्वभूताभयप्रदा॥६॥ॐकाराज्जलधिंयावत्उवाचभृगुनंदनः॥तीर्थसंगमभेदांश्चधर्मपुत्रायपृच्छते
७ समासेनैवमुनयस्तथाहंकथयामिवः॥सप्तषष्टिसहस्राणिषष्टिकोट्यस्तथैवच॥७॥कथंतेनात्रशक्यंतेवक्तुंवर्षश
तैरपि॥तथाप्यत्रमुनिश्रेष्ठाःप्रोक्तंपार्थायवैयथा॥८॥तीर्थमोंकारमारभ्यवक्ष्येतीर्थावलींशुभां॥प्रोच्यमानांसमासे
नतांशृणुध्वंमहर्षयः॥९॥नत्वासोमंमहेशानंनत्वाब्रह्माच्युतावुभौ॥सरस्वतींगणेशानंवेदव्यासंद्विपंकजं॥१०॥पूर्वा
चार्यांस्तथासर्वान्दृष्टादृष्टार्थवादिनः॥प्रणम्यनर्मदांदेवींवक्ष्येतीर्थावलींशुभां॥११॥ॐनमोखिलरूपायॐकाराया
खिलात्मने॥परमम्प्रवक्ष्यामिरेवातीर्थावलींशुभां॥१२॥अस्मिन्मार्कंडगदितेरेवातीर्थक्रमेशुभे॥पुराणसंहि
ताध्यायोमार्कंडाश्रमवर्णनं॥१३॥ततःप्रश्नापिकारस्यप्रशंसानर्मदोद्भवा॥तयापंचदशानांचप्रवाहानांचकीर्तनं॥
१४॥नामनिर्वचनंतद्वत्तथाकल्पसमुद्भवः॥एकविंशतिकल्पानांतद्वन्नामानुकीर्तनं॥१५॥मार्कंडेयानुभूतानांसप्तानां
लक्षणानिच॥माहात्म्यंचैवरेवायाःशिवविष्णोःस्तथैवच॥१६॥संहारलक्षणंतद्वदोंकारस्यचसंभवः॥तथैवांका
रमाहात्म्यममरंकटकीर्तनं।अमरेश्वरतीर्थंचतथादारुवनंमहत्॥दारुकेश्वरतीर्थंचतीर्थंवैचरु॥केश्वरं॥चारुकासं
गमस्तद्वद्व्यतीपातेश्वरंतथा॥१७॥कपालेश्वरतीर्थंचकोटियज्ञाह्वयंतथा॥चरुणेश्वरतीर्थंचलिंगान्यष्टोत्तरंशतं॥१९॥
सिद्धेश्वरंयमेशंचब्रह्मेश्वरमतःपरं॥सारस्वतंचाष्टरुद्रंसावित्रंसोमसंज्ञितं॥२०॥शिवखातंमहातीर्थंरुद्रावर्तंद्विजो
त्तम॥ब्रह्मावर्तंपरंतीर्थंसूर्यनिर्मितःपरं॥२१॥पिप्पलावर्ततीर्थंचपिपिल्याश्चैवसंगमः॥अमरंकटमाहात्म्यंकपिलासंग
मस्तथा॥२२॥विशल्यासंभवश्चापिभृगुतुंगाद्रिकीर्तनं॥विशल्यासंगमःपुण्यःकरमर्दसमागमः॥२३॥करमर्देश्वरंती
र्थंवक्रतीर्थमनुत्तमं॥संगमोनीलगंगायाविध्वंसस्त्रिपुरस्यच॥२४॥कीर्तियंतंतिथिदानानांमधुकतृतीयाव्रतं॥अम
रेश्वरतीर्थंचदेहक्षेपविधिस्ततः॥२५॥तीर्थंज्वालेश्वरंनामज्वालायाःसंगमस्तथा॥शक्रतीर्थंकुशावर्तंहंसतीर्थंतथैवच

6ııı
2008

 अंबरीयस्यतीर्थंचमहाकालेश्वरंतथा॥ मातृकेश्वरतीर्थंचमृगुतुंगानुवर्णनं ॥२७॥ तत्रभैरवमाहात्म्यंकावेरीसंगमस्त
था॥कुबेरेश्वरतीर्थंचवाराहीसंगमस्तथा॥२८॥ संगमश्चंडवेगायास्तीर्थंचंद्रेश्वरंतथा॥ एरंडीसंगमःपुण्यएरंडेश्वरमु
 त्तमं २९ पितृतीर्थंचतत्रैवॐकारस्यचसंभवः॥ माहात्म्यंपंचलिंगानांॐकारस्यमुनिश्वरः॥३०॥ कोटितीर्थस्यमा
हात्म्यतीर्थकाकहृदंतथा॥ जंबुकेश्वरतीर्थंचसारस्वतमतनःपरं॥३१॥ कपिलासंगमस्तद्वत्तीर्थंचकपिलेश्वरं॥दैत्य
सूदनतीर्थंचचक्रतीर्थंचवामनं॥३२॥तीर्थंलक्षंविदुः पूर्वेकपिलायास्तुसंगमे॥ स्वर्गस्यनरकस्यापिलक्षणंमुनिभा
षितं॥३३॥व्यवस्थानंशरीरस्यगोप्रदानानुवर्णनं॥ अशोकवनिकातीर्थमतंगाश्रमवर्णनं॥३४॥अशोकेश्वरतीर्थंच
मतंगेश्वरमुत्तमं॥तथामृगवनंपुण्यंतत्रतीर्थमनारथं॥३५॥ संगमोंगारगर्तायाअंगारेश्वरकीर्तनं॥ तथामेघवनंती
र्थंरेवीनामनुकीर्तनं॥३६॥ संगमश्चापिकुब्जायातीर्थंकुब्जेश्वरंतथा॥ बिल्वाम्रकंतथातीर्थंस्वर्णद्वीपमतःपरं॥३७॥
तथाहिरण्यगर्भायाः संगमःपुण्यकीर्तनं॥ द्वीपेश्वरंनामतीर्थंपुण्यंयज्ञेश्वरंतथा॥३८॥ मांडव्याश्रमतीर्थंचविशोका
संगमस्तथा॥ वाग्बीश्वरंनामतीर्थंपुण्योवैवायुसंगमः॥३९॥ सहस्रावर्तकंतत्रतीर्थंसौगंधिकंतथा॥ संगमश्चसरस्व
त्यतःपरं॥४०॥ सहस्रयज्ञतीर्थंचकपालमोचनंतथा॥ आज्ञेयमदितीशंचवाराहंतीर्थमुत्तमं॥४१॥ तथादेवपथंती
र्थंतीर्थयज्ञसहस्रकं॥ शुक्लतीर्थंदीप्तिकेशंविष्णुतीर्थंचबोधनं॥४२॥ नर्मदेश्वरतीर्थंचवरुणेशाचमारुतं॥ योगेशं
रोहिणीतीर्थंदेवतीर्थंगुहाश्रयं॥४३॥ नर्मदेश्वरतीर्थंचकपिलातीर्थमुत्तमं करंजेशंकुंडलेशंपिप्पलादमतः परं॥४४॥
विमलेश्वरतीर्थंचपुष्करिण्याश्चसंगमः॥ प्रशंसामूलभेदस्यतत्रैवांधकविक्रमः॥४५॥ देवाश्वासनदानंचतथैवांध
कविग्रहः॥ मूलभेदस्यचोत्पत्तिस्तथापात्रपरिक्षणं॥४६॥ प्रशंसादानधर्मस्यऋषिशृंगानुभावनं॥ स्वर्गतीर्थतपसो
भानुमतास्तथैंगिनं॥४७॥ शबरस्वर्गगमनंमाहात्म्यंमूलभेदजं॥ कपिलेश्वरतीर्थंचमोक्षतीर्थमतःपरं॥ संगमोमो
क्षनधाम्नतीर्थंचविमलेश्वरं॥ तथैवोल्लकतीर्थंचपुष्करिण्याश्चसंगमः॥ आदित्येश्वरतीर्थंचविंग्रहंचवैसंगमेश्वरं
॥४८॥ संगमोभीमकुल्यायास्तीर्थंभीमेश्वरंशुभं॥मार्कंडेश्वरतीर्थंचतथावैपिप्पलेश्वरं ४९॥ करोटीश्वरतीर्थंचतीर्थमिं

द्रेश्वरंशुभं॥ अगस्त्येशंकुमारेशंव्यासेश्वरमनुत्तमं॥५०॥ वैद्यनाथंचकेदारमानंदेश्वरसंज्ञितं॥ मातृतीर्थंचमुंडेशासौरंकामे
श्वरंतथा॥५१॥ संगमश्चानडुत्वावैतीर्थंभीमार्जुनाह्वये॥ तीर्थंभीमेश्वरंनामलुंकेश्वरमतःपरं॥५२॥ ततोधनदतीर्थं
चजटोशंमंगलेश्वरं॥ कपिलेश्वरतीर्थंचगोपारेश्वरमुत्तमं॥५३॥मणिनागेश्वरंनाममणिनद्याश्चसंगमः॥ तिलकेश्वरती
र्थंचगोतमेशमतःपरं॥५४॥ तत्रैवमातृतीर्थंचमुनिनोक्तमुनीश्वरः॥ शंखचूडंचकेदारंपाराशरमतःपरं॥५५॥भी
मेश्वरंचचंद्रेशंअश्ववत्याश्चसंगमः॥ बद्रीश्वरंनारदेशंवैद्यनाथंकपीश्वरं॥५६॥ कुंभेश्वरंचमार्कंडेरामेशंलक्ष्मणेश्वरं
मेघेश्वरंमत्स्यकेशमप्सरोहृदसंज्ञितं॥५७॥ दधिस्कंदंमधुस्कंदंनदिकेश्वरंचवारुणं॥ पावकेश्वरतीर्थंचहनुमंतेश्वरंत
था॥५८॥ पूतिकेश्वरतीर्थंचकुबेरेश्वरसंज्ञितं॥ सोमेश्वरंमहातीर्थंतत्ररेवोरिसंगमः॥५९॥ तीर्थंनर्दहृदंनामत
थावैपिंगलेश्वरं॥ ऋणमोचनतीर्थंचतथैवकपिलेश्वरं॥६०॥ नारायणाह्वयंतीर्थंचक्रतीर्थमनुत्तमं॥ चंडादित्यंपरं
तीर्थंचंडिकातीर्थमुत्तमं॥६१॥ यमहासाह्वयंतीर्थंतथागंगेश्वरंशुभं॥ नंदिकेश्वरसज्ञंचनरनारायणाह्वयं॥६२॥नला
ह्वयंचमार्कंडेशुक्लतीर्थमतःपरं॥ व्यासेश्वरंपरंतीर्थंतत्रास्तिस्थेश्वरंतथा॥६३॥ कोटितीर्थंप्रभातीर्थंवासुकीश्वरमुत्तमं॥
संगमश्चकरंजायामार्कंडेश्वरमुत्तमं॥६४॥ तीर्थंकोटीश्वरंनामतथासंकर्षणाह्वयं॥ कनकेश्वरंमन्मथेशंतीर्थंचैवानुसूय
कं॥६५॥ एरंडीसंगमःपुण्योमातृतीर्थंचशोभनं॥ तीर्थंस्वर्णशिलाख्यंचतथाचैवांबिकेश्वरं॥६६॥ करंजेशंचभरतेशंना
गेशंमुकुटेश्वरं॥ सौभाग्यसुंदरीतीर्थंधनदेश्वरमुत्तमं॥६७॥ रोहिणीचक्रतीर्थंचउत्तरेश्वरसंज्ञितं॥ भोगेश्वरंचकेदारंनिःकलं
कमतःपरं॥६८॥मार्कंडेधौतपापंचतीर्थमांगिरसेश्वरं॥ कोटवीसंगमः पुण्यः कोटितीर्थमतःपरं॥६९॥ अयोनिजंपरंतीर्थं
अंगारेश्वरमुत्तमं॥ स्कंदंचनार्मदंब्राह्म्यंवाल्मीकेश्वरमुत्तमं॥७०॥ कोटितीर्थंकपालेशंपांडुतीर्थंत्रिलोचनं॥ कपिलेशंकंबुके
शंप्रभासंकोहकेश्वरं॥७१॥ इंद्रेशंवासुकेशंचदेवेशंशाक्रमेवच॥ नागेश्वरंगौतमेशंअहिल्यातीर्थमुत्तमं॥७२॥ रामेश्वरंमो
क्षतीर्थंतथाकुशालवीमीश्वरं॥ नर्मदेश्वरंशंकपर्दीशंसागरेशंमतःपरं॥७३॥ धौतादित्यंपरंतीर्थंतीर्थंचैवाप्ययोनिजं॥
पिंगलेश्वरतीर्थंचभृग्वीश्वरमतःपरं॥७४॥ दशाश्वमेधितीर्थंकोटितीर्थंचसत्तमाः॥ मार्कंडेब्रह्मतीर्थंचआदिवाराह

6779
2008

रे॰ख॰ मुत्तमं॥ ७५॥ तीर्थमाशापुरारव्यंच कौबेरंमारुतंतथा॥ वारुणेशंयमेशंचरामेशंकर्कटेश्वरं॥ ७६॥ शक्रेशं सोमतीर्थंचनं
दाह्रदमनुत्तमं॥ वैष्णवंचक्रतीर्थंचरामकेशवसंज्ञितं॥ ७७॥ तथैवरुक्मिणीतीर्थंशिवतीर्थमनुत्तमं॥ जयवाराहती
२३८ र्थंचतीर्थम्यामाहकाम्यहं॥ ७८॥ अंगारेशंचसिद्धेशंतापेश्वरमनुत्तमं॥ पुनः सिद्धेश्वरंनाम तीर्थंवरुणेश्वरं॥ ७९॥ पाप
शरेश्वरंनामकुसुमेशंमनुत्तमं॥ श्वेतवाराहतीर्थंचभार्गलंसौरमुत्तमं॥ ८०॥ हुंकारस्वामितीर्थंचशुक्लतीर्थंचशोभनं॥
संगमोमस्याश्वतीर्थंवैसंगमेश्वरं॥ ८१॥ नर्मदेश्वरतीर्थंचनदीत्रितपसंगमः॥ अनरकेश्वरतीर्थंचसर्पेशंमोक्षसंज्ञि
तं॥ ८२ कावेरीसंगमपुण्यस्तीर्थंगोपेश्वराह्वयं॥ मार्कंडेशंचनागेशंऔर्वबर्यश्विसंगमः॥ ८३॥ सांवादित्याह्वयंतीर्थंउ
र्वायाश्वसंगमः॥ सिद्धेश्वरंचमार्कंडेंतथासिद्धेश्वरीकृतं॥ ८४॥ गोपीशंकपिलेशंचवैद्यनाथमनुत्तमं॥ पिंगलेश्वर
तीर्थंचसैंधवायतनंमहत्॥ ८५॥ भूतीश्वराह्वयंतीर्थंगंगावाहममनुत्तमं॥ गौतमेश्वरतीर्थंचदशाश्वमेधिकंतथा॥ ८६॥
भृगुतीर्थंतथापुण्यंख्यातासौभाग्यसुंदरी॥ वृषखातंचतत्रैवकेदारंधौतपातकं॥ ८७॥ तीर्थंधौतेश्वरीसंज्ञंएरंडीसं
गमंतथा॥ तीर्थंचकनकेश्वर्यांज्वालेश्वरमतः परं॥ ८८॥ शालिग्रामाह्वयंतीर्थंसोमनाथाह्वयंतथा॥ तथैवोदीर्णवाराहती
र्थंचंद्रप्रभासकं॥ ८९॥ द्वादशादित्यतीर्थंचतथासिद्धेश्वराह्वयं॥ कपिलेश्वरतीर्थंचतथात्रैविक्रमंशुभं॥ ९०॥ विश्वरूपा
ह्वयंतीर्थंनारायणकृतंतथा॥ मूलश्रीपतिसंज्ञंचचौलश्रीपतिसंज्ञकं॥ ९१॥ देवतीर्थंहंसतीर्थंप्रभासंतीर्थमुत्तमं॥ मू
लस्थानंकटेशंचजदहासमतः परं॥ ९२॥ भूर्भुवेश्वरतीर्थंचख्यातामूलेश्वरीतथा॥ सारस्वतंदारुकेशंमन्वितोस्तीर्थमु
त्तमं॥ ९३ सावित्रीतीर्थमतुलंवालखिल्येश्वरंतथा॥ नर्मदेशंमातृतीर्थंदेवतीर्थमनुत्तमं॥ ९४॥ मत्स्यकेश्वरतीर्थंचशिखि
तीर्थंसुशोभनं॥ कोटितीर्थंमुनिश्रेष्ठास्तत्रकोटीश्वरीमिता॥ ९५॥ तीर्थंपैतामहंनाममांडव्येश्वरसंज्ञितं॥ नारायणेश्वरं
नामअंकुरेश्वरमतः परं॥ ९६॥ देवखातंसिद्धरुद्रंवैद्यनाथमनुत्तमं॥ तथैवमातृतीर्थंचउत्तरेशमतः परं॥ ९७॥ तथै २३८
वनर्मदेशंचमातृतीर्थंतथापुनः॥ तथाचकुररीतीर्थंदौटेशंदशकन्यकं॥ ९८॥ सुवर्णबिंदुतीर्थंचऋणपापविमोचनं
॥ भारभूतीश्वरंतीर्थंतथामुंडीश्वरंविदुः॥ ९९॥ एकशालंडिंडिपाणिंतीर्थंचाप्सरसंपरं॥ पुण्यालयंचमार्कंडेशाणिताह्व

681
2008

यं॥ १००॥ अमलेश्वरतीर्थंचतीर्थंकंथेश्वरंतथा॥ आषाढीतीर्थमित्याहुः शृंगीतीर्थंतथैवच॥ १॥ वालकेश्वरतीर्थंचक
पालेशंतथैवच॥ मार्कंडेंकपिलेशंचएरंडीसंगमस्तथा॥ एरंडीदेवतीर्थंचरामतीर्थंमतः परं॥ २॥ जामदग्नेः परंतीर्थं
रेवासागरसंगमः॥ लुंटनेश्वरतीर्थंचतलुकेशमनामयं॥ ३॥ वृषखातंतत्रकुंडंतत्रैवऋषिसत्तमाः॥ तथाहंसेश्वरंता
मलिकादंवासवेश्वरं॥ ४॥ तथाकोटीश्वरंतीर्थमालिकातीर्थमुत्तमं॥ विमलेश्वरतीर्थंचतथासागरसंगमे॥ ५॥ एवंतीर्थावि
लीपुण्याग्रथितातीर्थरज्जुना॥ नर्मदानीरनिर्णिक्ता मार्कंडेयविनिर्मिता॥ ६॥ मंडनाप्येहसाधूनांसर्वलोकहिताय च॥
दुरितध्वांतहंत्रीधार्यधिमार्थिभिः सदा ७ अहोरात्रकृतंपापंसकृज्जप्त्वाप्रणाशयेत्॥ त्रिकोलजप्तामासोघंवर्षं
स्तोत्रेशनाब्दकं॥ ८॥ श्रधकालेचविप्राणांभुंजतांपुरतस्थितः॥ पठंतीर्थावलीपुण्यांगयाश्राद्धप्रदोभवेत्॥ ९॥ पूजाका
लेचदेवानांश्रध्ययापुरतः पठन्॥ प्रीणयेत्सर्वदेवांश्चपुनातिसकलंकुलं॥ १०॥ एवंतीर्थावलीपुण्यारेवातीरद्वयाश्रिता
मयाप्रोक्ता मुनिश्रेष्ठास्तथैवशृणुतानघाः १११ इतिश्रीरेवामाहात्म्येउत्तरखंडेतीर्थावलीकथनंनाम॥ ॥ सूतउवा॰॥
तथैवतीर्थस्तबकान् वक्ष्येहमुनिसत्तमाः॥ यैस्तुतीर्थावलीगुंफः पूर्वोक्तैरेकतः कृतैः॥ विभक्तोभक्तलोकानांमानंदप्र
थमः शुभः॥ १॥ मृकंडतनयः पूर्वंप्राहपार्थयपृच्छते॥ यथातथाहंवक्ष्यामितीर्थानांस्तबकानिह॥ २॥ शिवांबुपानजा
पुण्यारेवाकल्पलताकिल॥ तीरद्वयोद्भूततीर्थाप्रसूनैः पुष्पिता॥ शुभा॥ ३॥ यत्पुण्यगंधलक्ष्म्यावैत्रैलोक्यंसुरभीकृतं
तत्पुष्पमकरंदस्यरसस्वादविदुत्तमाः ४ भ्रमरः खलुमार्कंडोमुनिर्मतिमतांवरः॥ तत्पुष्पमालाह्रदयेतीर्थस्तबकत्रि
त्रिंतां ५ दधातिसततंपुण्यांमुनीभृगुकुलोद्भवः॥ तस्यास्तबकसंस्थानंवक्ष्येहमुनिसत्तमाः॥ ६॥ ओंकारतीर्थादार
भ्यायावत्पश्चिमसागरे॥ संगमाः पंचत्रिंशद्वैनदीनांपापनाशनाः॥ ७॥ दशोकमुत्तरेतीर्थेसप्तविंशतिदक्षिणे॥ पंचत्रि
शतमः श्रेष्ठोरेवासागरसंगमः॥ ८॥ संगमैः सहितावंरेवातीरद्वयेपि च॥ चतुः शतानितीर्थानिप्रसिद्धानिद्विजोत्तमाः
९ त्रिशतंशिवतीर्थानित्रयस्त्रिंशत्समन्वितं॥ तत्रापिव्यक्तितोवक्ष्येशृणुध्वंतानिसत्तमाः॥ १०॥ मार्कंडेश्वरतीर्थानिद
शतेषुमुनीश्वराः॥ दशादित्यभवान्यत्रतत्वैककपिलेश्वराः॥ ११॥ सोमसंस्थापितान्यष्टौतावंतोनर्मदेश्वराः॥ कोटिती

 र्थान्यथो चाष्टौ सप्तसिद्धेश्वरास्तथा ॥१२॥ नागेश्वराश्च सप्तैव रेवातीरद्वयेपि च ॥ सप्तैव वन्हिविहितान्यथाप्यावर्तसप्तकं
१३ केदारेश्वरतीर्थानि पंच पंचेंद्रजानि च ॥ वरुणेशाश्च पंचैव चत्वारो धनदेश्वराः ॥१४॥ देवतीर्थानि पंचैव चत्वारो वैय
 मेश्वराः ॥ वैद्यनाथाश्च चत्वारश्चत्वारो वानरेश्वराः ॥१५॥ अंगारेश्वरतीर्थानि तावंत्येव मुनीश्वराः ॥ सारस्वतानि चत्वा
रि चत्वारो दारुकेश्वराः ॥१६॥ गौतमेश्वरतीर्थानि त्रयो वै विमलेश्वराः ॥ सहस्रयज्ञतीर्थानि त्रीण्येव मुनिसत्तमाः १७
भीमेश्वरास्त्रयः ख्याताः स्वर्णतीर्थानि त्रीणि च ॥ धौतपापद्वयं प्रोक्तं करंजेशद्वयं तथा ॥१८॥ ऋणमोचनतीर्थं द्वितया
स्कंदेश्वरद्वयं ॥ दशाश्वमेधतीर्थे द्वे नंदातीर्थद्वयं तथा ॥१९॥ मन्मथेशद्वयं चैव भृगुतीर्थद्वयं तथा ॥ पराशरेश्वरौ द्वौ च
अयोनिसंभवद्वयं ॥२०॥ व्यासेश्वरद्वयं तद्वच्चंडालेश्वरौ स्मृतौ ॥ शुक्लतीर्थद्वयं पुण्यं अप्सरेशद्वयं तथा ॥२१॥ पिप्पले
श्वरतीर्थे द्वे द्वे मांडव्येश संज्ञके ॥ द्वीपेश्वरद्वयं चैव प्राह नद्दूगृद्दह ॥२२॥ उत्तरेश्वरतीर्थे द्वे अकाशेशं द्वयीं तथा ॥
द्वयोधनपुरे चैव रोहिणीतीर्थजद्वयं ॥२३॥ लुंकेश्वरद्वयं ख्यातमाख्यातं मुनिना यथा ॥ सैकोनविंशतिशतं तीर्था
न्येकशो द्विजाः ॥२४॥ स्तवकेषु कृतं तीर्थाद्विशतं सचतुर्दशं ॥ शैवान्येतानि तीर्थानि वैष्णवानीति च सत्तमाः ॥२५॥ शृणु
ध्वं प्रोच्यमानानि शाक्त्यशकानि च क्रमात् ॥ अष्टाविंशति तीर्थानि वैष्णव्यान्यब्रवीन्मुनिः ॥२६॥ तेषु वाराहतीर्थानि षडे
व मुनिसत्तमाः ॥ चत्वारि चक्रतीर्थानि शेषाण्यष्टादशैव तु ॥२७॥ विष्णुनाधिष्ठितान्येवं प्राह पूर्वं मृकंडजः ॥ तथैव ब्रह्म
णः सिध्येसप्त तीर्थान्यवीवदत् ॥२८॥ त्रिषु च ब्रह्मणः पूजा ब्रह्मेशाख्या तु रोय रे ॥ अष्टाविंशति तीर्थानि शाक्तानि त्वब्र
वीन्मुनिः ॥२९॥ तेषु सप्तैव मातॄणां तीर्थानि मुनिसत्तमाः ॥ त्रितयं संश्रिता ब्राह्म्यां द्वितयं वैष्णवी स्थिता ॥३०॥ तथाष्टि
पृथु तीर्थेषु रौद्री शक्तिरधिष्ठिता ॥ नास्ति तीर्थमशार्कं द्वि धरापाते तु किंचन ॥३१॥ तथापि रेवातीर्थे तु पृथक् तत्तेनद
र्शितं ॥ तथैकं क्षेत्रपालस्य तीर्थाधिष्ठानमद्भुतं ॥३२॥ इति प्राधान्यतः ख्यातं तीर्थाविल्मास्तु लक्षणं ॥ रेवा सूत्रपरि
प्रोता तीर्थरत्नावली शुभा ॥३३॥ यस्यां मध्ये मणिमुख्यो जगदादिर्महेश्वरः ॥ स च ब्रह्मा स वै विष्णुः स चादिपुरुषो महा
न् ॥३४॥ त तेजसा भुवि यं तीर्थरत्नावली शुभा ॥ धार्या हृदि सदा सद्भिर्महादुरितनाशनी ॥३५॥ हृदि यो धारयेत्तिसंती

र्थरत्नावलीमिमां ॥ स बाह्यार्थं नरैर्देषिर्नलिप्येर्भार्गवो यथा ॥३६॥ देवापि तं नमस्यंति मन्यंते तं मुनीश्वराः ॥ रेवादेवास्थित दि 683 / 2008
तानीर्थरत्नावली द्विजाः ॥३७॥ शुद्धयायः शृणोतीमां सोपि पापैः प्रमुच्यते ॥३८॥ ॥ इति श्रीरेवामाहात्म्ये तीर्थरत्नावली
कथनं नाम ॥ ॥ सूत उवाच ॥ एवमुद्देशतः प्रोक्तो रेवातीर्थक्रमो मया ॥ यथापाथयि संक्षेपात् मार्कंडो मुनिरब्रवीत् ॥१॥ अवां
तराणि तीर्थाणि तेषु सत्यनेकशः ॥ यत्रापारप्रमाणानि तान्याकर्णयितानघाः ॥२॥ ॐकारतीर्थपरितः पर्वतादमरकं
टात् ॥ क्रोशद्वये सर्वदिक्षु सार्धकोटित्रयी स्थिता ॥३॥ तीर्थानां संख्यया गुप्तप्रकाटानां द्विजोत्तमाः ॥ कोटिरेका तु तीर्था
नां कपिलासंगमे पृथक् ॥४॥ अशोकवनिकायां तु तीर्थलक्षं प्रतिष्ठितं ॥ शतं संगारगत्याः संगमे समवस्थितं ॥५॥ ती
र्थायामयुतं तद्वत् कुब्जायाः संगमे स्थितं ॥ शतं हिरण्यगर्भायाः संगमे समवस्थितं ॥६॥ तीर्थानामष्टषष्टिश्च विशोका
संगमे स्थिता ॥ तथा सहस्रतीर्थानां संस्थिता वायुसंगमे ॥७॥ शतं सरस्वतीसंगे शुक्लतीर्थे शतद्वयं ॥ सहस्रविष्णुतीर्थे च
माहिष्मत्यामथायुतं ॥८॥ शूलभेदे च तीर्थानां साग्रलक्षं शतं द्विजाः ॥ देवग्रामे सहस्रं च तीर्थानां मुनिरब्रवीत् ॥९॥ वैद्या
नाथे च तीर्थानां शतमष्टाधिकं विदुः ॥ एवं तावत्प्रमाणानि कुंभनाथे विदुर्द्विजाः ॥१०॥ साग्रं लक्षं च तीर्थानां स्थितं रेवो
रि संगमे ततो वाप्यधिकानि स्युरिति मार्कंडभाषितं ॥११॥ अष्टाशीतिसहस्राणि व्यासद्वीपाश्रितानि च ॥ संगमे च करंजा
याः स्थितमष्टोत्तरायुतं ॥१२॥ एरंडीसंगमे तद्वत्तीर्थान्यष्टाधिकं शतं ॥ धूतपापे च तीर्थानां षष्टिरष्टाधिका स्थिता ॥१३॥
स्कंदतीर्थे शतं पुण्यं तीर्थानां मुनिरुक्तवान् ॥ कोहनेशे च तीर्थानां षष्टिरष्टाधिका स्थिता ॥१४॥ सार्धकोटिश्च तीर्थानां
स्थिता वै भारिल्लापुरे ॥ रामकेशवतीर्थे च सहस्रं साग्रमुक्तवान् ॥१५॥ असमाहके सहस्रं च तीर्थानि निवसंति ॥ लक्षा
पूर्वक सहस्रं द्वे शुक्लतीर्थे द्विजोत्तमाः ॥१६॥ तीर्थानि कथयामास पुरा तीर्थयि भार्गवः ॥ शतमष्टाधिकं प्राह प्रत्येकं संगमेषु च
॥१७॥ नदीनामवशिष्टानां कावेरीसंगमं विना ॥ कावेर्याः संगमे विप्राः स्थिता पंचशती तथा ॥१८॥ तीर्थानां पंच सुतथावि
शोपो मुनिनोदितः ॥ मोक्षतीर्थे ततः प्राहुः पुराणपुरुषाश्रितं ॥१९॥ भृगोः क्षेत्रा च तीर्थानां कोटिरेका समाश्रिता ॥ सा
धिका स्ता मृषिश्रेष्ठा व कुंशाकोटि कोभवेत् ॥२०॥ सर्वमिराश्रयं क्षेत्रं सर्वतीर्थाश्रयं तथा ॥ त्रिषु लोकेषु विख्यातं पूजितं

सिद्धिसाधनं॥२१॥ भारभूत्यां च तीर्थानां स्थितं मम शोभनं स्थानं॥ अक्रूरेश्वरतीर्थे च सार्धं तीर्थशतं स्थितं॥२२॥ विमले
श्वरतीर्थे तु रेवासागरसंगमे॥ दशायुतानि तीर्थानि साधिकान्यब्रवीन्मुनिः॥२३॥ सूत उ०॥ इति वः कथितं विप्रा रेवामा
हात्म्यमुत्तमं॥ यथोपदिष्टं पार्थाय मार्कंडेयेन वै पुरा॥२४॥ तथा तीर्थकदंबाश्च तेषु तीर्थविशेषतः॥ प्राधान्येन मया ख्याता
यथासंख्यं यथाक्रमं॥२५॥ एतत्पवित्रमतुलं सेतिहासं परात्परं॥ नर्मदाचरितं पुण्यं माहात्म्यं मुनिभाषितं॥२६॥ ससक
ल्पानुगो विप्रो नर्मदाया मुनीश्वराः॥ मृकंडतनयो धीमान् परमार्थविदुत्तमः॥२७॥ संसेव्य सर्वतीर्थानि नदीः सर्वाश्च वै पुरा॥
बहुकल्पस्मरां रेवामारुक्ष शिवदेहजां॥२८॥ मेकलेति च शर्वाणी कांशरण्यं सर्वजां ययौ॥ अजरामसृतां देवीं दैन्यध्वंस
करीं परां॥२९॥ महद्वैभवसंयुक्तां भवघ्नीं भवजान्हवीं॥ तस्या माहात्म्यसत्स्नेहं जातः सोप्यजरामरः॥३०॥ षष्टितीर्थसह
स्राणि षष्टिकोट्यश्च सत्तमाः॥ व्यवस्थितानि रेवायास्तीरयुग्मे पदे पदे॥३१॥ सरितः परितः संति सतीर्थास्तु सहस्रशः
न तुल्या कापि रेवाया यातिमन्ये मुनीश्वराः॥३२॥ एतद्वः कथितं सर्वं यत्सृष्टमखिलं द्विजाः॥ यन्महेशमुखाच्छ्रुत्वा वायु
राह मुनीश्वरान्॥३३॥ नद्वन्मृकंडतनयोप्यनुभूयाखिलां नदीं॥ सतीर्थपदशः प्राह पांडुपुत्राय पाविनीं॥३४॥ शैवीयं
संहिता पुण्या वायुना परिकीर्तिता॥ चतुर्विंशतिसाहस्रा मया वः समुदाहृता॥३५॥ तत्रैव कथितं सर्वं संक्षेपेणाद्य शौनकः
नर्मदाचरितं पुण्यं त्रिषु लोकेषु दुर्लभं॥३६॥ किमन्यैः सरितां तोयैः सेवितैस्तु सहस्रशः॥ यदि संसेव्यते तोयं रेवायाः पाप
नाशनं॥३७॥ मेकलाजलसंसेवी मुक्तिमाप्नोति शाश्वतीं॥ यथा यथा भोजेन्मर्त्यो यियासा दिक्षतितीर्थगः॥३८॥ नर्मदा शांति
नियतं श्रद्धया श्रद्धयापि च॥ इदं ब्रह्मा हरिरिदं इदं साक्षान्महेश्वरः॥३९॥ इदं ब्रह्म निराकारं कैवल्यं नार्मदं जलं॥ ताव
द्गर्जंति तीर्थानि नयो दृष्टफलप्रदाः॥४०॥ यावन्न स्मर्यते रेवा सेवा हेवाकिभिर्नरैः॥ ध्रुवं लोकहिता याथ यि शिवेन स्वशरीर
तः॥४१॥ शक्तिः कापि सरिद्रूपा रेवेयमवतारिता॥ तावद्गर्जंति यज्ञाश्च वनक्षेत्रादयो भृशं॥४२॥ यावन्नर्मदानामकीर्तनं ३५०
क्रियते कलौ॥ गरिमा गण्यते तावत्तपोदानव्रतादिषु॥४३॥ नरैर्न प्राप्यते यावद्दुर्विभवर्गभवाधुनि॥ ये वसंत्युत्तरे कूले
रुद्रस्यानुचरा हि ते॥४४॥ वसंति याम्यतीरं ये लोकं ते यांति वैष्णवं॥ धन्यास्ते देशवर्यास्ते येषु देशेषु नर्मदा॥४५॥ नर

685
2008

कांतकरीशाश्वसंश्रिता शर्वनिर्मिता॥ कृतपुण्याश्च ते लोका शोकायतनमवंतिते॥४६॥ ये पिबंति जलं पुण्यं पार्वतीपति
सिंधुलं॥ इदं पवित्रमतुलं रेवायाश्चरितं द्विजाः॥४७॥ शृणोति यः कीर्तयते मुच्यते सर्वपातकैः॥ यत्फलं सर्ववेदेश्च
सषडंगपदक्रमैः॥४८॥ श्रुतैश्च पठितैस्तस्मात्फलमष्टगुणं लभेत्॥ सन्न्यासी फलं यस्य लभते द्वादशाब्दिकं॥४९॥ श्रु
त्वा सकृच्च रेवायाश्चरितं तत्फलं लभेत्॥ सर्वतीर्थविगाहाच्च यत्फलं सागरादिषु॥५०॥ सकृच्छ्रुत्वा च माहात्म्यं रेवायास्त
त्फलं लभेत्॥ एतद्धर्ममुपाख्यानं सर्वशास्त्रेषु तुत्तमं॥५१॥ देशे वा मंडले वापि नगरे ग्राममध्यतः॥ गृहे वापि धृतेयस्य
लिखितं सा वै वार्णिकि॥५२॥ स ब्रह्मा स शिवः साक्षात्स च देवो जनार्दनः॥ धर्मार्थकाममोक्षाणां मार्गोयं देवनिर्मितः
५३॥ गुरूणां च गुरुः शास्त्रं परमं सिद्धिकारणं॥ यश्चेदं शृणुयान्नित्यं पुराणं देवभाषितं॥५४॥ ब्राह्मणो वेदवान्
भूयात् क्षत्रियो विजयी भवेत्॥ धनाढ्यो जायते वैश्यः शूद्रो वै धर्मभाग्भवेत्॥५५॥ सौभाग्यं संततं नारी सुखेन स
मवाप्नुयात्॥ श्रियं सौख्यं स्वर्गवासं जन्म चैवोत्तमे कुले॥५६॥ रसभेदी कृतघ्नश्च मित्रध्रुक् मित्रवंचकः॥ गोघ्नश्च
गरदश्चैव कन्याविक्रयकारकः॥५७॥ ब्रह्मघ्नश्च सुरापी च स्तेयी च गुरुतल्पगः॥ नर्मदाचरितं शृण्वन् तु नामर्ष
यानि शृण्वते॥५८॥ सर्वपापविनिर्मुक्तो जायते नात्र संशयः॥ पाकभेदी वृथापाकी देवब्राह्मणनिंदकः॥५९॥ प
रिवादी गुरोः पित्रोः साध्वीनां नृपतेस्तथा॥ तेपि श्रुत्वा च पापेभ्यो मुच्यते नात्र संशयः॥६०॥ ये पुनर्भावितात्मानः शास्त्रं
शृण्वंति नित्यशः॥ पूजयंति च तच्छास्त्रं नार्मदं वस्त्रभूषणैः॥६१॥ पुष्पैः फलैश्चंदनाद्यैर्भोजनैर्विविधैरपि॥ शास्त्रे
स्मिन्पूजिते देवाः पूजिता गुरवस्तथा॥६२॥ इह लोके परे चैव नात्र कार्या विचारणा॥ तस्मात्सर्वप्रयत्नेन गंधवस्त्रा
दिभूषणैः॥६३॥ पूजयेत्सरयाभक्त्या वाचकं शास्त्रमेव च॥ वेदपाठैस्तु यत्पुण्यं अग्निहोत्रैश्च पालितैः॥६४॥ तत्फ
लं समवाप्नोति नर्मदाचरितेश्रुते॥ पत्रभोजी फलं यच्च लभते द्वादशाब्दिकं॥६५॥ तत्फलं समवाप्नोति नर्मदाच
रिते श्रुते॥ एकान्नेन हविष्येण अक्षारालवणेन च॥६६॥ मासि मासि फलं यच्च नर्मदाचरिते श्रुते॥ कुरुक्षेत्रे च य

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

सुण्यंप्रभासेपुष्करेनथा ॥६७॥ रुद्रावर्त्तेगयायांचवाराणस्यांविशेषतः॥ गंगाद्वारेप्रयागेचगंगासागरसंगमे ६८
एवमादिषुतीर्थेषुयसुण्यंजायतेनृणां॥ नर्मदाचरितंश्रुत्वातत्पुण्यंसकलंलभेत् ॥६९॥ आदिमध्यावसानेचनर्मदाचरितंशुभं॥ यःशृणोतिनरोभक्त्याशृणुध्वंतत्फलंमहत् ॥७०॥ सप्राप्यशिवसंस्थानंदेवकन्यासमावृतः
रुद्रस्यानुचरोभूत्वाशिवेनसहमोदते ॥७१॥ धर्माख्यानमिदंपुण्यंसर्वाख्यानेषुनुत्तमं॥ गृहेपिविद्यतेयस्यचातुर्वर्ण्येनिसत्तमः ॥७२॥ धन्यंतस्यगृहंमन्येगृहस्थश्चापियत्कुलं॥ पुस्तकंपूजयेद्यस्तुनर्मदाचरितंस्यतु॥ नर्मदापूजितातेनभगवांश्चमहेश्वरः॥ वाचकेपूजकेतस्यदेवाश्चऋषयोर्च्चिताः॥७४॥ लिखापयित्वासकलंरेवाचरितमुत्तमं॥ भूषणंसर्वशास्त्राणांयोददातिद्विजन्मने॥७५॥ नर्मदासर्वतीर्थेषुस्नानदानेतत्फलं॥ तत्फलंसमवाप्नोतिसनरोनात्रसंशयः॥ ७६॥ एतत्सुराणांरुद्रोक्तंमहापुण्यफलप्रदं॥ यस्त्रदत्तमिदंपुण्यंपुराणंवाच्यतेद्विजैः॥७७॥ शिवलोकेस्थितिस्तस्यपुराणाक्षरवत्सरी ॥७८॥ इतिनिगदितमेतन्नर्मदायाश्चरितंपवनगदितमग्र्यंशार्ववक्रादवाप्य॥ त्रिभुवनजनवंद्यंयतदादौमुनीनांकुलपतिपुरतः सत्सूतमुखेनसाधू॥
७९॥ इतिश्रीवायुप्रोक्तचतुर्विंशतिसाहस्र्यांसंहितायांउत्तरखंडेनर्मदामाहात्म्येपुराणपरिसमाप्तिर्नामाध्यायः
॥ ॥ कष्टेनलिखितंग्रंथंसंप्रयत्नेनप्रतिपालयेत्॥ मूर्खहस्तेनदातव्यंएवंवदतिपुस्तके॥ ॥ ५